75. Against the MSS., Abhyankar unites the nos. 50 and 51 as Paribhāṣā no. 50.
76. B °*bhāṣā*.
77. C *tatho*°; D *yadho*°.
78. B *anuprayogaḥ*; C *apratyayogaḥ*.
79. A *prāpnuthan*; D *prāpnudan*.
80. C *nidhir*.
81. D °*thakaı*.

antyābhāve 'ntyasadeśasya[82] ||57||
saṃjñāpūrvako vidhir anityaḥ ||58||
nañivayuktam anyasadṛśādhikaraṇe[83] *tathā hy arthagatiḥ*[84] ||59||
sarvavidhibhya[85] *idvidhir*[86] *balīyān*[87] ||60||
sarvavidhibhyo lopavidhir balīyān[88] ||61||
vyākhyānato[89] *viśesapratipattir na hi saṃdehād alakṣaṇam*[90] ||62||
cānukṛṣṭam uttaratra nānuvartate ||63||
prakṛtigrahaṇe liṅgaviśiṣṭasyāpi[91] *grahaṇam* ||64||
prakṛtigrahaṇe yanśluganta syāpi[92] *grahaṇam* ||65||
vyapadeśivadbhāvo[93] *na prātipadikagrahaṇena* ||66||
tadādeśas[94] *tadgrahaṇena*[95] *gṛhyate* ||67||
arthavaśād[96] *vibhaktiparināmaḥ* ||68||
parjanyaval laksanapravṛttiḥ[97] ||69||
akṛtavyūhāḥ[98] *śākaṭāyanīyāḥ*[99] ||70||
kṛtam api[100] *śāstram nivartayanti*[101] ||71||

82. Against the MSS., ABHYANKAR *'bhāve antya°* [sic!].
83. D *°ādikaranat*
84. Thus C and D A and B split this Paribhāsā : *nañivayuktam* . ||60|| and *tathā hy arthagatih* ||61||
85. A *°bhyah*; D *°vidi°*
86. D *idvidhir*.
87. A *balīyā*.
88. Thus C, D, A, B *balavān*.
89. D *vyāyānato*.
90. C, D *ilakṣanam*.
91. B *°viśesasyāpi*; C *°viśistatyāpi*, D *lingaśista°*.
92. C *manślug°*. The *Amoghavrtti* on IV 1, 244 has *yanśluco 'pi* —Against the MSS., ABHYANKAR has *yañlug°* (in agreement with, e.g., Nāgojībhaṭṭa no. 93.9).
93. A, B, D *vyapadeśavadbhāvo*, C *vyapadeśivadbhāve*.
94. C *tathādeśas*.
95. C *madgra°*, D *tradgra°*.
96. D *attha°*.
97. C *°vrttih—rjjale varṣati sthale varṣati*–This is missing in A, B and D.—ABHYANKAR gives *jale* ... as part of his Paribhāsā no. 68.
98. B *°vyahāḥ*
99. A *°niyāh*.
100. B *api ca*.
101. A, B, D give nos. 70 and 71 as separate Paribhāṣās; in C this appears as one Paribhāṣā.—ABHYANKAR follows C.

atantraṃ taranirdeśaḥ[102] *pravṛddhābālaviśiṣṭayoḥ*[103] ||72||
pradhānānvācayaśiṣṭayoḥ[104] *pradhāne*[105] *kāryasaṃpratyayaḥ*[106] ||73||
yogavibhāgād iṣṭaprasiddhiḥ[107] ||74||
grahaṇavatā[108] *prātipadikena*[109] *tadantavidhir*[110] *nāsti* ||75||
prātipadikavidhau pratyayagrahaṇe tadantavidhir nāsti ||76||[111]
saṃjñāvidhau pratyayagrahaṇe tadantavidhir nāsti ||77||[111]
abhidhānalakṣaṇāḥ kṛttaddhitasamāsāḥ ||78||
akṣarādhikyād[112] *yogavibhāgo garīyān* ||79||
samāsānto vidhir anityaḥ ||80||
anityam āgamaśāsanam ||81||
lakṣaṇāntareṇa[113] *prāpnuvan vidhir anityaḥ*[114] ||82||
na lakṣaṇāntarabādhanenānityatvam[115] ||83||
punaḥprasaṅgavijñānāt siddham ||84||
asiddhaṃ bahiraṅgam antaraṅge ||85||
ājñānantarye[116] *bahiprakḷptiḥ*[117] ||86||
apavādaviṣaye 'py[118] *utsargasamāveśaḥ*[119] ||87||

102. A, B, C, D *atamtrāmtara°*
103. Thus ? A *pravaddhābālavi'eṣayoḥ*, B *pravrddhābālaviśeṣayoḥ*; C *pravrddhābālaśiṣṭayo* (follows a lacuna of about 20 *aksaras*), D *pravrddhābālaviśiṣṭayoḥ*—ABHYANKAR *pravṛddhabālaviśiṣṭayoḥ*.
104. A *°śiṣṭayoḥ* ||75|| *pradhāne* . ||76||, C has a hyphen after *°śiṣṭayoḥ*—
105. Against the MSS., ABHYANKAR has *pradhānaśiṣṭe*.
106. C has only *sampratyayaḥ*–Cf. above note 103.
107. A *°siddhi grahanavatā* ... ||77||, in B the Paribhāsā is not numbered; C *viṣtanna-prasiddhaḥ*
108. C *grahanavatām*, D *grahaṇavattā*.
109. C *prātipadikana*.
110. A *taṃdamta°*; B *tambhanta°*.
111. B omits this Paribhāsā.
112. C *°ādikyār*.
113. B *°tarenā*.
114. D p. 35, l. 31 : ... *anityaḥ*--] *madhyapatitas ta*
p. 36, l. 1 : ... ... *na lakṣanā*
madhyapatitas ta belongs to Paribhāṣā no. 22. Cf. above p. 114, note 37. What appears in line 1 before *na* ... does not belong to the Paribhāṣās.
115. B *°bādhenā°*, D *°bādenā°*
116. Thus C, D; A, B *nānantarye*.
117. A *bahiḥpra°*; D *bahiḥ-pra°*.
118. A, C, D *ey*.
119. C *utsarggasakhodeśaḥ*; B reads the Paribhāṣā as follows : *apavādaviṣayam / sarga-samāveśaḥ* ||88||

samudāye[120] *hi pravṛttāḥ śabdā avayaveṣv*[121] *api vartante* ||88||
prakṛtivad anukaraṇaṃ bhavati ||89||
avyakte guṇasaṃdehe[122] *napuṃsakaliṅgaṃ prayoktavyam* ||90||
avayavalopinām ato lopābhāvaḥ ||91||
antaraṅgavidheḥ[123] *pratipadavidhir balavān* ||92||
dhātupratipadād anubandhapratipadaṃ balīyaḥ[124] ||93||
sāmānyātideśe viśeṣānatideśaḥ ||94||
nityānityayor nityavidhir balavān ||95||
antaraṅgabahiraṅgayor antaraṅgo vidhir balavān ||96||[125]
sāvakāśānavakāśayor anavakāśo vidhir balavān[126] ||97||[125]
ubhayatreha śāstre ṣaṣṭhī[127] *na prakalpyate*[128] ||98||
ubhayanirdeśe pañcamīnirdeśo[129] *balavān* ||99||
dvirbaddhaṃ subaddhaṃ bhavati ||100||

iti śabdānuśāsane[130] *paribhāsāsūtrāṇi samāptāni*[131] ||

120. C *samudā.*
121. C *avayavesṭapi.*
122. C *'saṃdihe.*
123. A *°vidhe.*
124. C *baliya.*
125. B omits this Paribhāsā.
126. Thus C, D; A *balīyān.*
127. C *ṣaṭthi*
128. C *prakalpyante.*
129. B *pañcamīdeśo.*
130. All MSS. agree in reading *iti śabdā'*. Against them, ABHYANKAR has *iti śākaṭāyanīye śabdā°*.
131. D *°tāniḥ.*

APPENDIX II*

॥ ॐ अर्हम् ॥

॥ नमोस्तु श्रमणाय भगवते श्रीमहावीराय ॥

यापनीय-यतिग्रामाग्रणिभदन्त-शाकटायनाचार्य-विरचितं

स्त्रीमुक्ति-केवलिभुक्ति-प्रकरणयुग्मम्

॥ स्त्रीमुक्तिप्रकरणम् ॥

प्रणिपत्य भुक्तिमुक्तिप्रबममलं धर्ममर्हतो विशतः ।
वक्ष्ये स्त्रीनिर्वाणं केवलिभुक्तिं च संक्षेपात् ॥१॥

अस्ति स्त्रीनिर्वाणं पुंवत्, यदविकलहेतुकं स्त्रीषु ।
न विरुध्यति हि रत्नत्रयसंपद् निर्वृतेर्हेतुः ॥२॥

रत्नत्रयं विरुद्धं स्त्रीत्वेन यथाऽमरादिभावेन ।
इति वाङ्मात्रं नात्र प्रमाणमाप्ताऽऽगमो ऽन्यद् वा ॥३॥

जानीते जिनवचनं, श्रद्धत्ते, चरति चार्याऽयिका शबलम् ।
नाऽस्याऽस्त्यसंभवोऽस्यां नाऽदृष्टविरोधगतिरस्ति ॥४॥

सप्तमपृथिवीगमनाद्यभावमव्याप्तमेव मन्यन्ते ।
निर्वाणाऽभावेनाऽप्यग्रिमतनवो न तां यान्ति ॥५॥

विषमगतयोऽप्यधस्ताद् उपरिष्टात् तुल्यमासहस्रारम् ।
गच्छन्ति च तिर्यञ्चस्तदवोगत्यूनताऽहेतुः ॥६॥

वाद-विकुर्वणेत्वादिलब्धिविरहे श्रुते कनीयसि च ।
जिनकल्प-मनःपर्यवविरहेऽपि न सिद्धिविरहोऽस्ति ॥७॥

वादादिलब्ध्यभाववद् अभविष्यद् यदि च सिद्धभावोऽपि ।
तासामवारविष्यद् यथैव जम्बूयुगावारात् ॥८॥

'स्त्री'ति च धर्मविरोधे प्रव्रज्यादोषविशतो 'स्त्री'ति ।
बालादिवद् वदेयुर्न 'गर्भिणी बालवत्से' ति ॥९॥

---

* The following text of the *Strimuktiprakaraṇa* and the *Kevalibhuktiprakaraṇa* of Śākaṭāyana is reprinted from the *Jaina Sāhitya Saṃśodhaka*, vol. 2, part 4, Poona 1924. Cf. above p. 17. प्रतिगतपाठाः—१. विकुर्वाण ।

यदि वस्त्राद् अविमुक्तिः, त्यजेत तद्, अथ न कल्पते हातुम् ।
[1]उत्सङ्गप्रतिलेखनवद्, अन्यथा देशि[2]को दूष्येत ॥१०॥

त्यागे सर्वत्यागो ग्रहणेऽल्पो[3] दोष इत्युपादेशि ।
वस्त्रं गुरुणाऽऽर्याणां परिग्रहोऽपीति चुत्यादौ ॥११॥

यत् संयमोपकाराय वर्तते प्रोक्तमेतदुपकरणम् ।
धर्मस्य हि तत् साधनमतोऽन्यद् अधिकरणमाहाऽर्हन् ॥१२॥

अस्तैन्यबाहिर (*अस्त्यैर्यव्याहार) व्युत्सर्गविवेकैषणादिसमितीनाम् ।
उपदेशनमुपदेशो ह्युपधेरपरिग्रहत्वस्य ॥१३॥

निर्ग्रन्था ....शास्त्रे सर्वत्र नैव युज्येत ।
उपधेर्ग्रन्थत्वेऽस्याः[4] पुमानपि तथा न निर्ग्रन्थः ॥१४॥

संसक्तौ सत्यामपि चोदितयत्नेन परिहरन्त्यार्या ।
हिंसावती पुमानिव न जन्तुमालाकुले लोके ॥१५॥

वस्त्रं विना न चरणं स्त्रीणामित्यर्हंतोऽब्रुवत, विनाऽपि ।
पुंसामिति न्यवार्यंत (नाऽवार्यत), तत्र स्थविराविवद् मुक्तिम् (मुक्तिः) ॥१६॥

अर्शो-भगंदरादिषु गृहीतचीरो यतिर्न मुच्येत ।
उपसर्गे वा चीरे ग्रहादिः संन्यस्यते चास्ते ॥१७॥

उत्सङ्[5]गमचेलत्वं नोच्येत तदन्यथा नरस्याऽपि ।
आचेलक्या (क्यं) योग्यायोग्याऽसिद्धेरदीक्ष्य इव ॥१८॥

इति जिनकल्पादीनां युक्त्यङ्गानामयोग्य इति सिद्धेः ।
स्याद् अष्टवर्षजातादिरयोग्यो ऽवीक्षणीय इव ॥१९॥

संवर-निर्जरारूपो बहुप्रकारस्तपोविधिः शास्त्रे ।
योगचिकित्साविधिरिव कस्याऽपि कथंचिदुपकारी ॥२०॥

वस्त्राद् न मुक्तिविरहो भवतीत्युक्तं, समग्रमन्यच्च ।
रत्नत्रयाद् न वाऽन्यद् युक्त्यङ्गं शिष्यते[6] सद्भिः ॥२१॥

प्रव्राजना निषिद्धा क्वचित्तु रत्नत्रयस्य योगेऽपि ।
धर्मस्य हानि-वृद्धी निरूपयद्भिर्विवृद्ध्यर्थम् ॥२२॥

अप्रतिबन्धत्वात् चेत् संयतवर्गेण नाऽऽर्यिकासिद्धिः ।
बन्ध्यतां (बध्नन्तां) ता यदि ते, नोनत्वं कल्प्यते तासाम् ॥२३॥

[7]सन्त्यूनापुरुषेभ्यस्ताः स्मारण-धारणादिकारिभ्यः ।
तीर्थंकराऽऽकारिभ्यो न च जिनकल्पादिरिति गणधरादीनाम् ॥२४॥

अर्हन् न बन्धते न तावताऽसिद्धिरङ्गगतेः ।
प्राप्ताऽन्यथा विमुक्तिः, स्यानं स्त्री-पुंसयोस्तुल्यम् ॥२५॥

आकृष्यते श्रिया स्त्री पुंसः सर्वत्र किं न तन्मुक्तौ ।
इत्यमुना क्षेप्यस्त्री-पुंसां सिद्धिः (सिद्धं) सममकस्मात्वम् ॥२६॥

---

१. उत्संगं । २. देसको । ३. त्यो । ४. धेर्ग्र । ५. मुत्संग । ६. सिष्यते । ७. सन्त्यूनाः ।
* ( ) एतच्चिह्नान्तर्गताः पाठाः संपादककल्पिताः ।

मायादिः पुरुषाचारमपि वेशत्वि (द्वेषादि) प्रसिद्धेभावश्च ।
षण्णां संस्थानानां तुल्यो वर्णत्रयस्यापि ॥२७॥

'स्त्री' नाम सत्त्वसत्त्वा [2]उत्सङ्गसमप्रता न तेनाऽत्र ।
तत् कथमनल्पवृत्तयः सन्ति हि शीलाम्बुधेर्वेलाः [3] ॥२८॥

ब्राह्मी सुन्दर्याऽऽर्या राजीमती चन्दना गणधराऽन्या ।
अपि देव-मनुज-महिताः विख्याताः शील-सत्त्वाभ्याम् ॥२९॥

गार्हस्थ्येऽपि सुसत्त्वा विख्याता शीलवतितमा जगति ।
सीतादयैः कथं तास्तपसि विसत्त्वा विशीलाश्च ॥३०॥

संत्यज्य राज्यलक्ष्मीं पति-पुत्र-भ्रातृ-बन्धुसम्बन्धम् ।
पारिव्राज्यवहायाः किमसत्त्वं सत्यभामादेः ? ॥३१॥

महता पापेन स्त्री-मिथ्यात्वसहायकेन न सुवृष्टिम् ।
स्त्रीत्वं चिनोति, तद् न, तवङ्गे क्षपणेऽपि निर्माणम् ॥३२॥

अन्तःकोटीकोटीस्थितिकानि भवन्ति सर्व-कर्माणि ।
सम्यक्त्वलाभ एवाऽऽशे [4]षोऽप्यक्षयकरो मार्गः ॥३३॥

अँष्टशतमेकसमये पुरुषाणामादिरागमः (माहुरागमे) सिद्धिः (सिद्धम्) ।
स्त्रीणां न मनुष्ययोगे गौणार्थो मुख्यहानिर्वा ॥३४॥

शब्दनिवेशनमर्थः प्रत्यासत्त्या क्वचित् कयाचिदतः ।
तदयोगे योगे सति शब्दस्याऽन्यः कथं कल्प्यः [8] ॥३५॥

स्तन-जघनादिव्यङ्ग्ये 'स्त्री'शब्दोऽर्थे, [10] न तं विहायैषः ।
वृष्टः क्वचिदन्यत्र स्वग्निर्माणवकवद् [11] गौणः ॥३६॥

'आ षष्ठ्या स्त्री' त्यादौ स्तनादिभिस्त्री स्त्रिया इति च वेदः ।
स्त्रीवेद स्त्र्यनुबन्धास्तुल्यानां (बन्धः पत्यानां) शतपृथक्त्वोक्तिः ॥३७॥

न च पुंवेदे स्त्रीवेदोदयभावे प्रमाणमङ्गं च ।
भावः सिद्धौ पुंवत् पुंमां अपि (पुंसोऽपि) न सिध्यतो वेदः ॥३८॥

क्षपकश्रेण्यारोहे वेदेनोच्येत भूतपूर्वेण ।
'स्त्री'ति नितरामुख्ये मुख्येऽर्थे युज्यते नेतराम् ॥३९॥

मनुषीषु मनुष्येषु च चतुर्दशगुणोक्तिरार्जि (यि) कासिद्धौ ।
भावस्तथोपरिष्टाच्य.....नवस्थो नियत उपचारः ॥४०॥

पुंसि स्त्रियां, स्त्रियां पुंसि—अतश्च [12] तथा भवेद् विवाहादिः ।
यत्तिषु न संवासादिः स्यादगतौ निष्प्रमाणेष्टिः ॥४१॥

[13]अनडुह्याऽनड्वाहीं वृष्ट्याऽनड्वाहमनडुहाऽऽरूढम् [14] ।
स्त्रीपुंसेतरवेदो वेद्यो नाऽनियमतो वृत्तेः ॥४२॥

नाम-स्थविन्द्रियलब्धेरिन्द्रियनिवृत्तिमिव प्रमाणाङ्गम् ।
वेदोदयाद् विरचयेद् इत्यतदङ्गेन तद्वेदः ॥४३॥

---

१. द्वा । २. मुत्संग । ३. वेला: । ४. स्य हिता- । ५. शीता । ६. शेषा । ७. अमू- । ८. कल्प्याः । ९. र्थगे । १०. ब्दा । ११. वह्नीयः । १२. तश्च । १३. अनद्गुह्याऽनद्वाहीं । १४. नद्वाहमनद्गुहा ।

या पुंसि च प्रवृत्तिः, पुंसि स्त्रीवत्, स्त्रिया स्त्रियां च स्यात् ।
सा स्वकचेवात् तिर्यंग्[1] बबलाभे मत्तकाशिन्याः ॥४४॥

विगतानुवादनीतौ सुरकोपादिषु चतुर्दश गुणाः स्युः ।
नव मार्गणान्तर इति प्रोक्तं वेदे ऽन्यथा नीतिः ॥४५॥

न च बाधकं विमुक्तेः स्त्रीणामनुशासकं[2] प्रवचनं च ।
संभवति च मुख्येऽर्थे न गौण इत्यार्यिका सिद्धिः ॥४६॥

॥ इति स्त्रीनिर्वाणप्रकरणं समाप्तम् ॥

---

१. तिर्यक् । २. अनुशोसकम् ।

॥ केवलिभुक्तिप्रकरणम् ॥

अस्ति च केवलिभुक्तिः समग्रहेतुर्यथा पुरा भुक्तेः ।
पर्याप्ति-वेद्य-तैजस-दीर्घायुष्कोदयो हेतुः ॥१॥

नष्टानि न कर्माणि क्षुधो निमित्तं विरोधिनो[1] न गुणाः ।
ज्ञानादयो जिने किं सा संसारस्थितिर्नास्ति ॥२॥

तम इव भासो बुद्धौ ज्ञानादीनां न तारतम्येन ।
क्षुध् हीयतेऽत्र न च तद् ज्ञानादीनां विरोधगतिः ॥३॥

अविकलकारणभावे तदन्यभावे भवेदभावेन ।
इदमस्य विरोधीति ज्ञाने न तदस्ति केवलिनि[2] ॥४॥

क्षुद् दुःखमनन्तसुखं विरोधे तस्येति चेत् कुतस्त्यं तत् ।
ज्ञानादिवच्च तज्जं विरोधि न परं ततो वृष्टम् ॥५॥

आहारविषयकाङ्क्षारूपा क्षुद् भवति भगवति विमोहे[6] ।
कथमन्यरूपताऽस्या न लक्ष्यते येन जायेत ॥६॥

न क्षुद् विमोहपाको यत् प्रतिसंख्यानभावनानिवर्त्या ।
न भवति विमोहपाकः सर्वोऽपि हि तेन विनिवर्त्यः ॥७॥

शीतोष्णवात[3]तुल्या क्षुत् तत् तत्प्रतिविधानकाङ्क्षा तु ।
मूढस्य भवति मोहात् तथा भृशं [4]बाध्यमानस्य ॥८॥

तैजस[5]समूहकृतस्य द्रव्यस्याऽन्यबहुतस्य पर्याप्त्या ।
अनुत्तरपरिणामे क्षुत् क्रमेण भगवति च तत् सर्वम् ॥९॥

ज्ञानावरणीयावेर्ज्ञानावरणादि कर्मणः कार्यम् ।
क्षुत् तद्विलक्षणाऽस्यां न तस्य सहकारिभावोऽपि ॥१०॥

क्षुद्बाधिते 'न जाने, न वेद्म' इत्यस्ति न तु विपर्यासः ।
तद् वेद्यं सहकारि तु, तस्य न तद् वेद्यसहकारि ॥११॥

ज्ञानावरणादीनामशेषविगमे[6] क्षुधि प्रजातायाम् ।
अपि तद् ज्ञानादीनां हानिः स्याद्वितरवत् तत्र ॥१२॥

नष्टविपाका[7] क्षुदिति प्रतिपत्तौ भवति चागमविरोधः ।
शीतोष्ण-क्षुद्-उदन्याऽऽदयो हि ननु वेदनीय इति ॥१३॥

उदये[8] फलं न तस्मिन् उदीरणेत्यफलता न वेद्यस्य ।
नोदीरणा फलात्मा तथा भवेदायुरप्यफलम् ॥१४॥

प्रतिगतपाठाः—१. विरोधेनो । २. केवलिनि । ३. वाच । ४. वाध्यमानस्य । ५. तैजसमूह । ६. विगमा । ७. नष्टविपाकः । ८. उदयं ।

अनुदीर्णवेद्य इति चेद् न क्षुद् वीर्यं किमत्र नहि वीर्यम् ।
क्षुदभावे क्षुदभावेन स्थित्यै क्षुधि तनोर्विलयः ॥१५॥

अपवर्तते कृतार्थं नायुर्ज्ञानादयो न हीयन्ते[1] ।
जगदुपकृतावनन्तं[2] वीर्यं किं मततृषो भुक्तिः ॥१६॥

ज्ञानाद्यलयेऽपि जिने मोहेऽपि स्याद् क्षुद् उद्भवेद् भुक्तिः ।
वचन-गमनादिवच्च प्रयोजनं स्व-परसिद्धिः[3] स्यात् ॥१७॥

ध्यानस्य समुच्छिन्नक्रियस्य चरमक्षणे गते सिद्धिः ।
सा नेदानीमस्ति स्वस्य परेषां च कर्तव्या ॥१८॥

रत्नत्रयेण मुक्तिर्न विना तेनाऽस्ति चरमदेहस्य[4] ।
भुक्त्या तथा तनोः स्थितिरायुषि न त्वनपवर्त्येऽपि ॥१९॥

आयुरिवाऽन्यैर्व्यवहारो जीवनहेतुर्विनाऽन्यव्यवहृतेः[5] ।
चेत् तिष्ठत्वनन्तवीर्ये विनाऽप्युषा कालमपि तिष्ठेत् ॥२०॥

न ज्ञानवदुपयोगो वीर्ये कर्मक्षयेण लब्धिस्तु ।
तत्राऽप्युरिवाऽऽहारोऽपेक्ष्येत[6] न तत्र बाधाऽस्ति[7] ॥२१॥

मासं वर्षं वाऽपि च तानि शरीराणि तेन भुक्तेन ।
तिष्ठन्ति[8] न चाऽऽकालं नान्यथा पूर्वमपि भुक्तिः[9] ॥२२॥

असति [10]क्षुद्बाधेऽङ्गे क्षये न शक्तिक्षयो न संक्लेशः ।
आयुश्चानपवर्त्यं[11] बाध-क्षयौ प्राग्वदधुनापि ॥२३॥

देशोनपूर्वकोटीविहरणमेवं सतोह केवलिनः ।
सूत्रोक्तमुपपादि न, मुक्तिश्च न नियतकाला स्यात् ॥२४॥

अपवर्तहेत्वभावे[12] ऽनपवर्तनिमित्तसंपदायुष्कः[13] ।
स्याद् अनपवर्त इति तत् केवलिभुक्तिं समर्थयते ॥२५॥

कायस्तथाविधोऽसौ जिनस्य यदभोजनस्थितिरितीदम् ।
वाङ्मात्रं[14] नाऽत्रार्थे प्रमाणमाप्तागमोऽन्यद् वा ॥२६॥

अस्त्येवादि[15] प्रागपि सर्वाभिमुखादि तीर्थंकरपुण्यात् ।
स्थितनखतादि [16]सुरेभ्यो न क्षुद् देहान्यता वाऽस्ति ॥२७॥

[17]भुक्तिर्दोषो यदुपोष्यते, न दोषश्च भवति निर्दोषैः ।
इति निगदतो निषद्याऽर्हति न स्थान-योगादेः ॥२८॥

रोगादिवत् [18]क्षुधो न व्यभिचारो वेदनीयजन्मायाः ।
प्राणिनि "एकादश जिन" इति जिनसामान्यविषयं च ॥२९॥

तद्हेतुकर्मभावात् परीषहोक्तिर्न जिन उपस्कार्यः ।
नञ्चाऽभावासिद्धेरित्यादेर्न क्षुदादिगतिः ॥३०॥

---

१. हीयते । २. तं । ३. द्धि । ४. स्या । ५. अत्यन्यवहारो । ६. -पेक्षेत । ७. बाधा । ८. तिष्ठति । ९. चान्यथा । १०. क्षुद्बाधेगे । ११. आतपवन्यं त्वाध- । १२. -वो । १३. ष्को । १४. मात्रं । १५. दिः । १६ सुरेत्यो । १७. दोषो । १८. क्षु ।

तैलक्षये न दीपो न जलागममन्तरेण[1] जलधारा ।
तिष्ठति[2] तथा तनोः स्थितिरपि न [3]विनाऽऽहारयोगेन ॥३१॥

परमावधेर्युक्तस्य[4] छद्मस्थस्येव नान्तरायोऽपि ।
सर्वार्थदर्शनेऽपि स्याद् न चान्यथा पूर्वमपि भुक्तिः ॥३२॥

इन्द्रियविषयप्राप्तौ यदभिनिबोधप्रसञ्जनं[5] भुक्तौ ।
तच्छब्द-गन्ध-रूप-स्पर्शप्राप्त्या प्रतिव्यूढम् ॥३३॥

छद्मस्थे तीर्थकरे विध्वंसनानन्तरं च केवलिनि ।
चित्तामलप्रवृत्तौ व्यासैवाऽत्रापि भुक्तवति ॥३४॥

विग्रहगतिमापन्नाश्चागमवचनं च सर्वमेतस्मिन् ।
भुक्तिं ब्रवीति तस्माद् द्रष्टव्या केवलिनि भुक्तिः ॥३५॥

नाऽनाभोगाहारः सोऽपि[6] विशेषितो नाऽभूत् ।
युक्त्याऽभेदे नाङ्[7]गस्थिति-पुष्टि-क्षुच्छमास्तेन ॥३६॥

तस्य विशिष्टस्य स्थितिरभविष्यत् तेन सा विशिष्टेन ।
यद्यभविष्यद्विहैषां [8]शाली-तरभोजनेनेव ॥३७॥

॥ इति केवलीभुक्तिप्रकरणम् ॥

॥ इति स्त्रीनिर्वाण-केवलीय[9]भुक्ति-प्रकरणम् ॥
॥ कृतिरियं भगवदाचार्य-शाकटायनभदन्त[10]पादानामिति ॥

---

१. मन्तरेण । २. -ष्ट- । ३. विना । ४. यु- । ५. -बो- । ६. सो । ७. साली । ८. श्रीनिर्वाण । ९. केवलीर्य । १०. कृदन्त- ।

शाकटायनव्याकरणम्

अमोघवृत्तिसमलङ्कृतम्

प्रथमोऽध्यायः

[प्रथमः पादः]

नमः श्रीवर्धमानाय प्रबुद्धाशेषवस्तवे ।
येन शब्दार्थसम्बन्धाः सार्वेण सुनिरूपिताः ॥१॥

श्रीवीरममृत ज्योतिर्नत्वाऽऽदिं सर्ववेदनम् ।
शब्दानुशासनस्येयममोघा वृत्तिरुच्यते ॥१॥

अविघ्नेनेष्टप्रसिद्धयर्थं मङ्गलमारभ्यते—नम इति । शब्दो वाचकः, अर्थो वाच्यः, तयोः सम्बन्धो योग्यता । अथवा—शब्द आगमः, अर्थः [1]प्रयोज्यमभ्युदयो निःश्रेयसं च, तयोः सम्बन्ध उपायोपेयभावः । [2]ते एव सर्वसत्त्वहितेन सता तत्त्वतः प्रज्ञापिताः, तस्मै परमार्हन्त्यमहिम्ना विराजमानाय भगवते वर्धमानाय षडपि द्रव्याणि अशेषाणि अनन्त[3]रूपाणि साकल्येन साक्षात्कुर्वते नमस्कुर्वे इत्युपस्कारः ॥१॥

एवं कृतमङ्गलरक्षाविधानः परिपूर्णमल्पग्रन्थं लघूपायं शब्दानुशासनं शास्त्रमिदं महाश्रमणसङ्घाधिपतिर्भगवानाचार्यः शाकटायनः प्रारभते, शब्दार्थज्ञानपूर्वकं च सन्मार्गानुष्ठानम्—

अइउण् ॥१॥ ऋऌक् ॥२॥ एओङ् ॥३॥ ऐऔच् ॥४॥ हयवरलञ् ॥५॥ ञमङणनम् ॥६॥ झभञ् ॥७॥ घढधष् ॥८॥ जबगडदश् ॥९॥ खफछठथट् ॥१०॥ चटतव् ॥११॥ कपय् ॥१२॥ शषस अंअः क पर् ॥१३॥ हल् ॥१४॥

इति वर्णसमाम्नायः क्रमानुबन्धोपादानः प्रत्याहारयन् शास्त्रस्य लाघवार्थः । सामान्याश्रयणात् दीर्घप्लुतानुनासिकानां ग्रहणम् । तथा च भाव्यतकारोपलक्षितयोरतत्कालव्युदासे यतिष्यते । 'ऋ' इत्येव ऌवर्णस्य ग्रहणम् । तयोरेकत्वं हि 'गुरुर्वैकोलनृत्' [२।३।२७] इति ऌग्रहणात् प्रतिज्ञायते । तथा च 'ऋत्यकः' [१।१।७५] इत्यादिलृकारेऽपि सिद्धं भवति । अनुबन्धकार्यं चैं पृथगनुबन्धसंज्ञानात् व्यवतिष्ठते; अन्यथा अन्यतर एवानुबध्येत, तावताऽर्थसिद्धेः । हकारस्य द्विरुपदेशोऽषादौ वलादौ च ग्रहणार्थः । हकारादिष्वकारादय उच्चारणार्थाः । णकारादयनुबन्धानां ('ञमङणनम्' इत्यादौ उपदिष्टानाम्) परार्थमुच्चारणमिति तत्तत्प्रत्याहारेष्वग्रहणम् । णकारस्य प्रत्याहारो—'वृलुक्ष्वणः' [१।१।८०] इत्यकारेण, ककारस्य—'ऋत्यकः' [१।१।७५] इत्यकारेण; 'चयेवादिकः' [१।१।७२] इतीकारेण; 'उगिदचोऽनेधादेः' [१।२।११४] इत्युकारेण, ङकारस्य—'देश एवैङ् ह्रादौ'

---

१. प्रयोजनम् म० । २. ते येन म० । ३. अनन्तपर्यायरूपाणि म० । ४. च इति म० पुस्तके नास्ति ।

[१।२।२०।] इत्येकारेण, चकारस्य—'मिदचोऽन्त्यात्' [१।१।४५] इत्यकारेण; 'खिती च एकाचोऽमः' [२।२।३] इतीकारेण; 'एचोऽय्यवायावौ' [१।१।७१] इत्येकारेण; 'यस्याचवादिरादैच्' [१।१।१६] इत्यैकारेण, जकारस्य—'किन्न सः षि' [१।२।६०] इतीकारेण; 'यञेवादिकः' [१।१।७२] इति यकारेण, मकारस्य—'छय्यम्यप्रशानः' [१।१।१५०] इत्यकारेण; 'हलो यमि यमो वा' [१।१।१३२] इति यकारेण; 'अमोऽङः' [ ] इति जकारेण; 'ह्रस्वान् ङमः पदान्ते' [१।१।१२३] इति ङकारेण, शकारस्य—'जषि जश्' [१।१।१३६] इति जकारेण; 'वशो भष् झषस्ध्वोश्चैकाचः प्रत्यये' [१।२।७६] इति बकारेण, षकारस्य—'ष्वोऽध्वाधोभोभगोः' [१।१।१५३] इत्यकारेण; 'अतोऽद्भ्युः' [१।१।१५७] इति हकारेण; 'बलादेरिडन्न वसुणादेः' [४।२।१३४] इति वकारेण; 'जषि जश्' [१।१।१३६] इति जकारेण, 'वशो भष् झषस्ध्वोश्चैकाचः प्रत्यये' [१।२।७६] इति झकारभकाराभ्याम्, टकारस्य—'अप्फलिभजत्रझट्कृज्ह्लादिदृदिशसिकृतस्यातोऽन्तर्हलोः' [४।१।६३] इति झकारेण, वकारस्य—'छय्यम्यप्रशानः' [१।१।१५०] इति छकारेण, यकारस्य—'मयोऽचि वोऽसन्' [१।१।१०५] इति मकारेण; 'ञनां जय्यपदान्ते' [१।१।१०६] इति जकारेण; 'खय् खयः शरि वा' [१।१।११४] इति खकारेण, रेफस्य—'जरि जरः स्वे वा' [१।१।१३३] इति जकारेण; 'खरश्चर्' [४।१।७६] इति खकारचकाराभ्याम्; 'खय् खयः शरि वा' [१।१।११४] इति शकारेण, लकारस्य—'षष्ठ्याः स्थानेऽन्तेऽलः' [१।४।४७] इत्यकारेण; 'हलो यमि यमो वा' [१।१।१३२] इति हकारेण; 'सिद्ध्यधातोः' [१।१।६४] इति वकारेण; 'यौ हलादेरलः संस्वोः' [४।१।१५२] इति रेफेण, 'जल्लो जश्' [१।२।७५] इति जकारेण; 'शल्यनुस्वारः' [१।१।११०] इति शकारेण [च बोध्यः]।

सात्मेतेत् ॥ १ । १ । १ ॥ वर्णः समुदायो वा यो येन इता सहोपादीयते, स आत्मनः प्रभृत्या तस्मादितो व्यवस्थितानां संज्ञा भवति। आत्मना सह [2]आत्मनश्चेत्यर्थः। अण्, अक्, इक्, सुप्[4], गुङ्, तिङ्, क्तिण्। सात्मेति [5]आत्मार्थम्। इतेति [6]संज्ञिनिर्देशार्थम्। आ इत्—एदिति अव्ययीभावो मर्यादार्थः।

उता स्वः ॥१।१।२॥ उकारेण इता सहोपादीयमानो वर्णः स्वस्य वर्गस्य सज्ञा भवति, आत्मना सह। 'श्नौ श्नू स्वोः' [१।१।१३७] तच्चरति। तच्छादयति। तच्छेत्ते। भवाञ्छेत्ते। 'ष्टौ ष्टू' [१।१।१३८] कष्टीकते। कष्टकारेण। भवाण्डीनः। भवाण्टीकते। 'कुपौ [7]क [8]पम्' [१।१।१६६] कः करोति। कः खनति। कः पचति। कः फलति। वर्गाकृत्याश्रयणे—'रुहः पः' [४।१।१६६] इत्यादावपि स्यादिति वचनम्।

तेयान् ॥१।१।३॥ तकारेण इता सहोपादीयमानो वर्ण इयान् इयत्तावच्छिन्नो यावन्मात्र उपात्तस्तावन्मात्र एवासौ वेदितव्यः। 'अतोऽद्भ्युः' [१।१।१५७] श्रवणोऽस्मि। धर्मो जयति। इह न भवति—देवा यत्र। देवा इसन्ति। द्रुतादिषु उच्चारणेषु वृत्तिषु न तत्कालो वर्णस्येति न वर्णस्य इयत्ताभेदः। सामान्याश्रयणादनुपातमात्रस्य परिग्रहे प्राप्ते तन्निवृत्त्यर्थं वचनम्।

भाव्योऽग् ॥१।१।४॥ भाव्यो विधेयः। अगकारानुबन्धो इयान् इयत्तावच्छिन्न एव यावन्मात्र उपात्तस्तावन्मात्र एवासौ वेदितव्यः। भित्तुः। अस्मै। अष्टाभिः। लविता। अगिति किम्? अमुम्। अम्। अननुनासिकोच्चारणाद् भाव्येऽनुनासिकव्युदासः। भाव्योऽगिति वचनात् सर्वत्र भाव्ये तकारोच्चारणं गुरु। 'उता स्वः' [१।१।२] इत्यादिर्न्यायानुवादः।

अप्रयोगीत् ॥१।१।५॥ इह शास्त्रे उपदिश्यमानो वर्णः समुदायो वा लौकिकशब्दप्रयोगे न दृश्यते, स इत्संज्ञो भवति। अतएव चास्य प्रयोगाभावः सिद्धः। उपदेशस्तु कार्यार्थः। एधि—एधते। स्पर्धि—स्पर्धते। अइउण्, ऋक्—अक्, इक्, उक्। [9]भिभिदा—भिन्नः। टु वेपृङ्—वेपथुः,। डुकृञ्—कृत्रिमम्। परमकुलीन इति खित्त्वेऽपि कृदन्ते [10]मत्ववचनाददोषः। इत्प्रदेशाः—'सात्मेतेत्' [१।१।१] इत्येवमादयः।

---

१. -नति मका -म०। २. -ति लका -म०। ३. आत्मतश्चेत्यर्थः म०। ४. सुप् सुट् म०। ५. -र्थम्। अन्यथा स्वयं संज्ञैव स्यात् न संज्ञि। उत्तरार्थश्च। इते—म०। ६. संज्ञा म०। ७. कष्करोति कष्खनति म०। ८. भिभिदा–भिन्नः म०। ९. -मत्ववचना -म०।

स्वः स्थानास्यैक्ये ॥१।१।६॥ स्थानं कण्ठादि, यत्र पुद्गलस्कन्धस्य वर्णभावापत्तिः। आस्यं मुखम्, ओष्ठात् प्रभृति प्राक्काकलकात्। तत्र भवमास्यम् स्पृष्टतादि प्रयत्नपञ्चकम्, स्थानस्योक्तत्वात्। द्वयमेव ह्येतदास्ये वर्णाना भवति। विवारादयस्तु बाह्याः प्रयत्नाः। तयोरभेदे वर्णो वर्णस्य स्व आत्मीयो नाम वेदितव्यः। अकुहविसर्जनीयजिह्वामूलीयाः कण्ठ्याः। कुर्जिह्वामूले। हविसर्जनीयावुरस्यौ। जिह्वामूलीयो जिह्वयः सर्वमुखस्थानमवर्णमिति एके। इ-ए-ऐ-चुयशास्तालव्याः। ए-ऐ कण्ठ्यतालव्यौ एकेषाम्। उ-ओ-औ-पूपध्मानीया ओष्ठ्याः[1]। ओ-औ-कण्ठ्यौष्ठ्यौ एकेषाम्। वो दन्त्यौष्ठ्यः। सृक्कस्थानम् एकेषाम्। ऋटुरषा मूर्धन्याः। रेफो दन्तमूल एकेषाम्। लृतुलसाः दन्त्याः। नासिक्योऽनुस्वारः। कण्ठ्यनासिक्य एकेषाम्। आस्यं स्पृष्टं करणं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम्। विवृतमूष्मणा स्वराणाञ्च। ए-ओ विवृततरौ, ताभ्यामैच्, ताभ्यामवर्णः। ईषद्विवृतमूष्मणाम्। संवृतमकारस्येति। अ-अ-अ-इत्यकार[2] उदात्तोऽनुदात्तः स्वरितश्चाननुनासिकोऽनुनासिकश्चेति षट्। एवं दीर्घप्लुताविति द्वादश वर्णभेदाः परस्परस्य स्वे भवन्ति। एवम्, इवर्णादीनां त्वष्टादशभेदाः, तत्र [3]दीर्घप्लुत इति द्वादश भेदाः। एचा ह्रस्वाभावात् द्वादश भेदाः। यवलानामनुनासिकोऽननुनासिकश्चेति द्वौ भेदौ। वर्ग्याः पञ्च पञ्च रेफोष्मणा स्वे न भवन्ति। स्थानस्याऽऽस्यस्वे स्थानग्रहणम्, स्थानप्रयत्नयोः स्वत्वे पृथग्व्यापारव्युदासार्थम्। तेन अरुः श्च्योतति तर्सति [इत्यत्र] 'जरि जरः स्वे वा' [१।१।१३३] लुङ् न भवति। स्वप्रदेशाः—'उता स्वः' [१।१।२] इत्येवमादयः।

आसन्नः ॥१।१।७॥ इहाऽऽसन्नानासन्नप्रसङ्गे स्थानगुणप्रमाणादिभिर्यथास्वमासन्न एव विधिरुपात्तो वेदितव्यः। तत्र, स्थानेन 'दीर्घः' [१।१।७७] लोकाग्रे। मुनीन्द्रः। गुणेन 'क्ङिनिट्चजः कुर्घिति' [४।१।१७१] पाकः। त्यागः। चकारस्याघोषस्याल्पप्राणस्यानुनासिकस्य तादृश एव ककारो भवति। जकारस्य—घोषवतोऽल्पप्राणस्याननुनासिकस्य तादृश एव गकारः। प्रमाणेन 'दो मोऽस्यादसो माद्गुश्चाघिन्यसन्' [१।२।४४] अमुष्मै। अमूभ्याम्। मात्रिकस्य मात्रिकः, द्विमात्रस्य द्विमात्रः। अर्थेन 'मानिस्यैकार्थ्ययोः स्यन्यत्तोऽन्' [२।२।४१] वातण्ड्यं युवतिः, दारदवृन्दारिका। [4]वतण्डिशब्दस्य तदर्थो वातण्ड्यभावः। दरच्छब्दस्य दारदभावः। वर्गाणा तृतीयचतुर्थपञ्चमा अन्तःस्थाः। हकारानुस्वारौ च घोषवन्तौ। अन्येऽघोषाः। वर्गाणां प्रथमतृतीयपञ्चमा अन्तःस्थाश्चाल्पप्राणाः।

एकमात्रो भवेद्ह्रस्वो द्विमात्रो दीर्घ उच्यते।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं स्वर्धमात्रिकम्॥

इति न्यायाबाधनार्थं वचनम्।

सम्बन्धिनां सम्बन्धे ॥१।१।८॥ सम्बन्धिशब्दाना यत्कार्यमुच्यते [5]तत्सम्बन्ध एव भवति, नान्यत्र। 'श्वशुराद् यः' [२।४।४६] श्वशुर्यः। संज्ञाया श्वशुरादिभ्येव भवति, श्वाशुरिः। 'मातृपितुः स्वसुः षिः' [२।२।१४१] 'ङः' [२।२।१४२] मातृष्वसा। अन्य [6]मातुर्न भवति—मातृस्वसा।

षट्कृति संख्या ॥१।१।९॥ धतु डति प्रत्ययान्तं संख्यावद् भवति। एकाधिका संख्या तत्कार्यं प्रतिपद्यत इत्यर्थः। यावत्कः[10]। यावद्धा। यावत्कृत्वः[11]। तावत्कः। तावद्धा। तावत्कृत्वः। कियत्कः। कियद्धा। कियत्कृत्वः। कतिधा। कतिकृत्वः। यतिधा। यतिकृत्वः। ततिधा। ततिकृत्वः। अन्तरेणापि वतिमतिदेशा गम्यन्ते। यथा—अग्निर्माणवक इति।

---

१. उओऔपूपध्मानीया ओष्ठ्याः। लृतुलसा दन्त्या इति स्थानेनासन्नः। वर्गेष्वाद्या द्वितीयाश्च शषसा अप्यघोषकाः। द्वितीयचतुर्थवर्णाः स्युर्महाप्राणा हसंयुताः॥ म० टि०। २. कण्ठ्ये म०। ३. उच्चैरुदात्तो नीचैः स्यादनुदात्तः स्वरस्तथा। व्यामिश्रः स्वरितो ज्ञेयः प्रत्येकं विबुधैरिह॥ क० म० टि०। ४. नित्यं सन्ध्यक्षराणि दीर्घाणि म०। ५. अनल्पप्रा–म०। ६. -श्रापि न्यस–म०। ७. वातण्ड -म०। ८. वतण्डीति यनः स्त्रियां स्लुगिति स्लुचि न्यतेरञ्चिय इति ञिः। म० टि०। पुरुद्वयञ्मगधेस्यादिना विहितस्याणः "प्रेरतोऽप्राग्भर्गादेः" इति स्त्रियां स्लुक्। म० टि०। ९. धान्यमातुः, म०। १०. सङ्ख्याऽतेऽश्रासन्धिषु क० म० टि०। ११. सङ्ख्याया वारेकृत्वस् म० टि०।

बहुगणं भेदे ॥१।१।१०॥ बहु गण इत्येतौ शब्दौ भेदे वर्तमानौ संख्यावद् भवतः । भेदो नानात्वम्, एकत्वप्रतियोगी। बहुकः । बहुधा । बहुकृत्वः । गणकः । गणधा । गणकृत्वः । भेदे इति किम् ? वैपुल्ये सङ्घे च संख्याकार्यं मा भूत् । "बहुगणनाऽत्यन्ताय सङ्घस्य[1]ते" इति वचनम् । अत एव भूर्यादीति निवृत्तिः ।

कसमासेऽध्यर्द्धः ॥१।१।११॥ अध्यर्द्धशब्दः कप्रत्यये समासे च विधातव्ये संख्यावद् भवति । अध्यर्द्धकम् । अध्यर्द्धशूर्पम् । क्रीते प्रत्ययस्य द्विगोः[3] श्लुक् । कसमास इति किम् ? 'संख्याया धा' [३।४।२७] इत्यादौ न भवति ।

अर्धपूर्वो डत् ॥१।१।१२॥ अर्धपूर्वपदो डत्प्रत्ययान्तः शब्दः कप्रत्यये समासे च विधातव्ये संख्यावद् भवति । डदिति 'संख्यापूरणे डट्' [३।३।७६] इत्यारभ्य आ 'द्वित्रेस्तीयट्' [३।३।९६] इत्येतस्मात् तकारेण प्रत्याहारः । अर्धपञ्चमकम् । अर्धपञ्चमशूर्पम् ।

पौत्रादिवृद्धम् ॥१।१।१३॥ परमप्रकृतेरपत्यवतो यत्पौत्राद्यपत्यं तद् वृद्धसंज्ञं भवति । गर्गस्यापत्यं पौत्रादिर्गार्ग्यः । वात्स्यः । अनन्तरापत्यं गार्गिः वात्सिः इत्येव भवति । पौत्रस्यापत्यत्वात्[4] तदाद्यत्वमेव विज्ञायते । वृद्धप्रदेशाः 'वृद्धौ यूनाऽनन्यार्थप्रकृतौ' [२।१।८७] इत्येवमादयः ।

प्रपौत्राद्यस्त्री वंश्यज्यायो भ्रात्रोः सति युवा ॥१।१।१४॥ प्रपौत्रः पौत्रापत्यम्, परमप्रकृतेश्चतुर्थः । वंशे भवो[6] वंश्यः । पित्रादिरात्मनः कारणम् । ज्यायान् भ्राता वयोऽधिक एकपितृक एकमातृको वा । परमप्रकृतेः प्रपौत्राद्यपत्यं स्त्रीवर्जितं वंश्ये जीवति सति पुत्रादिज्यायसि भ्रातरि कनीयान् भ्राता युवसंज्ञो भवति । [7]गार्ग्यायणः । वात्स्यायनः । गर्गस्तस्यानन्तरापत्यं 'गार्गिः'[8] तदनन्तरापत्यं वृद्धं [10]गार्ग्यः तृतीयः स्यात् । चतुर्थो गार्ग्यायणो युवा । प्रपौत्रादीति किम् ? पौत्रो गार्ग्यः । अस्त्रीति किम् ? स्त्री—गार्गी[11] । वंश्यज्यायोभ्रात्रोरिति किम् ? अन्यस्मिन्—गार्ग्यः । ज्यायोग्रहणं किम् ? कनीयसि भ्रातरि—गार्ग्यः । सतीति किम् ? मृते गार्ग्यः । वचनभेदः पृथङ्निमित्तार्थः ।

सत्सपिण्डेऽधिवयस्स्थाने वा ॥१।१।१५॥ ययोः पूर्वः सप्तमः पुरुष एकस्तौ अन्योन्यस्य सपिण्डौ । वयो यौवनादि । स्थानम्—पिता, पुत्र इत्यादि । परम प्रकृतेः प्रपौत्राद्यपत्यं स्त्रीवर्जित वयस्स्थानाभ्यां द्वाभ्यामप्यधिके सपिण्डे जीवति सति सञ्जीवदेव युवसंज्ञ वा भवति । पितृव्ये, पितृव्यस्य पितरि पितामहे पुत्रे वा वयोऽधिके जीवति । गर्गस्यापत्यं जीवत् गार्ग्यः गार्ग्यायणो वा । वात्स्यः वात्स्यायनो वा । सदिति किम् ? मृतो गार्ग्यः । सपिण्ड इति किम् ? अन्यत्र गार्ग्यः । अधिवयस्स्थान इति किम् ? द्वाभ्यामन्यतरेण वा न्यूने गार्ग्यः । प्रपौत्रादीति किम् ? पौत्रो गार्ग्यः । अस्त्रीति किम् ? स्त्री गार्गी । सतीति किम् ? मृते, गार्ग्यः । सपिण्डो वंश्यो भ्राता वा नेत्यारम्भः ।

[12]युवबृद्धं कुत्सार्चे ॥१।१।१६॥ युवा च वृद्धं चापत्यं यथाक्रमं कुत्सायामर्चायां च विषये युवसंज्ञो वा भवति । अर्चा पूजा । यूनः कुत्सायां पक्षे युवत्वं निवर्त्यते, तत्र वृद्धप्रत्ययेनाभिधानं भवति । गर्गस्यापत्य युवा कुत्सितो वा गार्ग्यः गार्ग्यायणो वा जाल्मः[13] । गुरुमान् भूत्वा स्वतन्त्र उच्यते । कुत्साया अन्यत्र गार्ग्यायण एव । वृद्धस्यार्चायां पक्षे युवत्वं प्राप्यते तत्र युवप्रत्ययेनाभिधानं भवति । गर्गस्यापत्यं वृद्धमर्चितं-तत्रभवान् गार्ग्यायणः गार्ग्यो वा । अर्चाया अन्यत्र गार्ग्य एव । अस्त्रीत्येव—स्त्री गार्गी एव ।

---

१. सङ्घाते म० । २. भूयादिति म० । ३. द्विगोः क०, म० । ४. पूर्वपदोऽत् क०, म० । ५. तदाद्यपत्यमेव क०, म० । ६. वंशशब्दस्य दिगादित्वात् "दिगाद्यङ्गांशाद्यः" इति भवार्थे यः म० टि० । ७. बलिभ्यः इति यून्यपत्ये फञ् म०, टि० । ८. अत इञ् म० टि० । ९. वृद्धो म० । १०. वृद्धादेर्यञ् म० टि० । ११. यस्मोऽप्राबटात् इति ङी । लुगतः मस्त्यतद्धितस्य हलो यः इति यलुक् म० टि० । १२. समवचने यथासंख्यं शैलीयमाचार्यस्य म० टि० । १३. जाल्मोऽसमीक्ष्यकारी स्यात् कुण्ठो मन्दः क्रियासु यः । म० टि० ।

[1]**नाम दुः** ॥१।१।१७॥ यन्नामधेयं संव्यवहाराय हठात् नियुज्यते देवदत्तादि तत् दुःसंज्ञं भवति वा। [2]देवदत्तीयाः। दैवदत्ताः। षड् [3]द्रव्याण्याहुः सिद्धसेनीयाः [4]सिद्धसेनाः [इत्यादि]।

त्यदादिः ॥१।१।१८॥ त्यदादयः शब्दाः दुःसंज्ञा भवन्ति। त्यदीयम्। तदीयम्। यदीयम्। इदमीयम्। अदसीयम्। एतदीयम्। एकीयम्। द्वीयम्। युष्मदीयम्। अस्मदीयम्। भवदीयम्। किमीयम्। यादायनिः। तादायनिः। योगविभागाद् वेति नानुवर्तते।

यस्याच्वादिरादैच् ॥१।१।१९॥ यस्य शब्दस्य अचां मध्ये आदिरच् आकारः ऐज् वा स दुःसंज्ञो भवति। आम्रगुप्तायनिः। सालगुप्तायनिः। [5]आम्बष्ठ्यः। सौवीर्यः। शालीयः। मालीयः। ऐतिकायनीयः। औपगवीयः। यस्येति संज्ञिनिर्देशार्थम्, अनेन हि स इत्याक्षिप्यते। अच्विति हलामनपेक्षार्थम्। तेन बुद्धि-निष्कृष्टाच्[6]सन्निवेशापेक्षमादित्वं विज्ञायते इति हलादेरपि [7]दुःसंज्ञा सिद्धा भवति। [8]आदिरिति किम्? सभासन्नयने भवः साभासन्नयनः। आदैजिति किम्? दात्राः। रात्रिताः। अत्राच्वादिरकारोऽस्तीति स्यात्। चैङ्कीया इत्यादिषु न स्यात्।

देश एवैङ् छादौ ॥१।१।२०॥ देश एव वर्तमानस्य यस्य शब्दस्य अचामादिरजेङ् भवति स छादौ प्रत्यये विधातव्ये दुः[9]संज्ञो भवति। [10]सैपुरिकी। सैपुरिका। स्कौनगरिकी। स्कौनगरिका। सेपुरं स्कोनगरं च वाहीकग्रामः। देश इति किम्? दैवनन्दिनम्। एवकारो वृत्तिव्यवच्छेदार्थः। तेन देशेऽन्यत्र च वर्तमानस्य न भवति। [11]क्रोड नाम उदकग्रामः, तत्र भवः क्रौडः। देवदत्त नाम वाहीकग्रामः तत्र भवो दैवदत्तः। क्रोड-शब्दः स्वाङ्गेऽपि वर्तते। देवदत्तशब्दः पुंस्यपि। क्रियाशब्दश्च। छादौ इति किम्? [12]फिञादौ न भवति।

प्राग्देशे ॥१।१।२१॥ प्राग्देशे वर्तमानस्य यस्य शब्दस्य अचामादेरजेङ् भवति स छादौ प्रत्यये विधातव्ये दुःसंज्ञो भवति। शरावती नाम नदी तदपेक्षा प्रागुदग्व्यवस्था। एणीपचनीयः। गोनर्दीयः। भोजकटीयः। कांशवृक्षीयः। गोमयह्रदीयः। [13]ऐकचक्रकः। क्रोड नाम प्राग्ग्रामस्तस्य क्रौडीयः। देवदत्त नाम प्राग्ग्राम-स्तस्य काश्यादिपाठात् [14]ठण्णिठौ। दैवदत्तिकी। दैवदत्तिका। पूर्वकं देशग्रहणं एवकारेण [15]सम्बद्धमिति पुन-र्देशग्रहणम्। आरम्भादेङादिनिवृत्तिरपि सम्भाव्येत। देश एवेति नियमनिवृत्त्यर्थं वचनम्।

क्रियार्थो धातुः ॥१।१।२२॥ [16]क्रिया प्रवृत्तिः पूर्वापरीभूता साध्यमानरूपा, सा अर्थोऽभिधेयं यस्य स शब्दो धातुसंज्ञो भवति। भू—भवति। एधि—एधते। [स्पर्धि—स्पर्धते] गोपाय—गोपायति। पापच्य—पापच्यते। चिकीर्ष—चिकीर्षति। पुत्रकाम्य—पुत्रकाम्यति। [17]अन्वयव्यतिरेकाभ्या क्रियार्थताऽवगमः। शिष्टप्रयोगानुसारित्वाल्लक्षणस्य आणपयति इत्यादिनिवृत्तिः। शिष्टज्ञानाय चेदं लक्षणम्, एतदविसंवादेन हि [18]शिष्टो ज्ञायते। धातुप्रदेशाः—'धातोस्तिकारकसमस्तानेकाचो तस्संयोगाद्यन्योः' [१।२।३८] इत्येवमादयः।

दाधा घ्वद् ॥१।१।२३॥ दारूपो धारूपश्च यो धातुः सोऽवकारानुबन्धो घुसंज्ञो भवति। दारूपा-श्चत्वारः, धारूपौ द्वौ। दाण्—प्रणिदाता [19]। देड्—प्रणिदयते। डुदाञ्—प्रणिददाति। दो—प्रणियति। धेट्-प्रणिधयति। डुधाञ् प्रणिदधाति [20]। दाधारूपोपलक्षितस्य घुसञ्ज्ञावचनात्, दो-देड्-धेटां शित्यपि घुसंज्ञा सिद्धा। दीङः दारूपस्य बहिरङ्गत्वान्न भवति। उपादास्त। उपादासाताम्। उपादासत। उपदिदासते।

---

१. जातिक्रियागुणद्रव्यान् वर्जयित्वा देवदत्तादि नाम म० टि०। २. युवत्वनिवृत्तिपक्षे म० टि०। ३. नयामा-म०। ४. सैद्धसेनाः म०। ५. नादिद्विरुत्तरकोसलाजादाम्ब्यः म० टि०। ६. -यन्निवेशापे—क०, म०। ७. दुसंज्ञा क०, म०। ८. आदैजिति किम् क०, म०। ९. दुसंज्ञो क०, म०। १०. वाहकाश्यादि-वार्हीकग्रामादिति ठणिठौ क०, म०। ११. न ना क्रोडं भुजान्तरम् क०, म०। १२. इञादौ क०, म०। दुसंज्ञा भवति क०, म०, टि०। १३. ईरोपान्त्याद् बुञ् क०, म० टि०। १४. ठण्ढण्णिठौ क०, म०। १५. सम्बन्धमिति क०, म०। १६. यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते। आश्रितक्रमरूपत्वात् सा क्रियेत्यभिधीयते। क०, म० टि०। १७. सति सद्भावोऽन्वयः। असत्यसद्भावो व्यतिरेकः क०, म० टि०। १८. शिष्टा ज्ञायन्ते क०, म० टि०। १९. नेर्घुमादीति णत्वम् क०, म० टि०। २०. धातुत्वाभावादुप-सर्गस्य न द्विर्भावः क०, म० टि०।

अभिति किम्? दाप्—दातं बर्हिः। दैप्—अवदातं मुखम्। अबिति बकारो न [अपि तु] पकारः, दातिर्धातिश्च[1] बकारानुबन्धौ, तेन प्रणिदापयति प्रणिधापयतीत्यत्र घुसंज्ञा भवत्येव। घुप्रदेशाः—[7]'घुस्थोरि च' [४।१।१६८] इत्येवमादयः।

प्रादिर्नाप्रत्यये ॥१।१।२४॥ प्रादिः—स्वराद्यन्तर्गणो, न धातुः—[3]धातुरवयवो न भवति, त व्युदस्य ततः परमेव धातुसंज्ञो वेदितव्यः, अप्रत्यये न चेत्ततः परः प्रत्ययो भवति। [4]अभ्यमनायत। अभिमिमनायिषते। [5]अभिमनाय्य। प्रासादीयत्, प्रासिसादीयिषति, प्रासादीय्य। प्रादेरिति किम्? अमहापुत्रीयत्। अप्रत्यय इति किम्? औत्सुक्यायत। [6]उत्सुकायिषते। उत्सुकायित्वा। अभिमनायादिः प्रत्ययान्तः सप्रादिः समुदायः क्रियार्थ इति तस्मिन् धातुसंज्ञे प्राप्ते प्रादिस्ततः प्रतिषेधेन बहिः क्रियते, ततश्च तत उत्तर एव धातुरिति, तस्याट् द्विर्वचने भवतः। प्रादेश्चोत्तरेण समास इति [7]ण्यादेशः। [8]असंग्रामयत शूरः इति नायं सम्प्रादिः, [अपि तु] धात्ववयवोऽयम्, यथा—विच्छाद्यवयवः। संग्राम—इति एतावान् युद्धार्थो धातुः पठ्यते।

तस्यागतार्थाधिपर्यर्चास्वत्यतिक्रमात्युपसर्गः प्राक् च ॥१।१।२५॥ तस्य धातोः सम्बन्धी तदर्थद्योती प्रेत्यादिशब्दगणः उपसर्गसंज्ञो भवति, प्राक् च ततो धातोर्भवति, यौ गतार्थावधिपरी इति, यौ चार्चाविषयौ सु अति इति, यश्चातिक्रमविषयोऽतीति तानेतान् वर्जयित्वा। [9]प्रलम्भः। उपलम्भः। प्रणमति। [10]परिणमति। [11]अभिषजति। उपसर्गसंज्ञाया 'घञ्खेचोपसर्गात्' [४।२।२०७] इत्यादिना नमादि। प्रादिरिति किम्?—पुनर्नमति। साधु सिञ्चति। तस्येति किम्? वृक्षं [12]वृक्षमभिसिच्यते। प्रगता ऋच्छकायस्मात् स प्रार्च्छको देशः। अगतेत्यादि किम्? गतार्थावधिपरी—अध्यागच्छति आगच्छत्यधि पर्यागच्छति आगच्छति परि। उपरिभावः सर्वतोभावश्चान्यतः प्रकरणादिः [13]प्रतिपन्न इति गतार्थत्वम। अध्यागमन प्रयोजनमस्य अध्यागमनिकः। पर्यागमनिकः। अत्र 'प्रयोजनम्' [२।२।११७] इति ठणि। 'आरैचोऽक्षत्रादेः' [२।३।८४] इति अधिपरिशब्दयोः [14]एकारो न भवति, पृथक्पदत्वात। पर्यानतम्। पर्यानीतम्[15]। अत्रानुपसर्गत्वाण्णो न भवति। गतार्थग्रहण किम्? अध्यागच्छति। पर्यागच्छति। उपरिभावस्य सर्वतोभावस्य च प्रकरणादेरप्रतीतस्य द्योतने उपसर्गसंज्ञाऽस्त्येवेति प्राक्त्वनियमः। अर्चासु[16]—सु अति, सुसिक्त भवता सुस्तुतं भवता। अतिसिक्तं भवता। अतिस्तुतं भवता। अत्र धात्वर्थः प्रशस्यते, अर्चा-पूजा-प्रशंसेत्यर्थ। अर्चा ग्रहणं किम्? सुषिक्तं किं तवात्र। अत्र धात्वर्थः कुत्स्यते। अतिक्रमे[17] अति, अतिसिक्तमेव भवता। अतिस्तुतमेव भवता। अतिक्रमेण सेकः कृत इत्यर्थः। [18]अतिसिक्त्वा। अतिस्तुत्वा। समासाभावात् ल्यादेशो न भवति। यदर्थक्रिया तस्मिन्निष्पन्नेऽपि क्रियाप्रवृत्तिरतिक्रमः। अतिक्रमणग्रहण किम्। अतिशय्य। उपसर्गप्रदेशाः—'ऋत्यारूपसर्गस्य' [१।१।६१] इत्येवमादयः। प्राक्चेत्यधिकारः प्रागव्ययसंज्ञायाः।

डाच्च्व्यर्थाद्यनुकरणं च ति ॥१।१।२६॥ डाजन्तं च्व्यन्तमूरी इत्येवमादि अनुकरणं उपसर्गसंज्ञं च धातोः सम्बन्धि तिसंज्ञं भवति। डाच्—पटपटाकृत्य[19]। सपत्राकृत्य[20]। च्वि—मकधीकृत्य[21]। शुक्लीकृत्य[22]।

१. धायिश्च क०,म०। २. -रि चिस्ये -क०,म०। ३. धातोर- क०,म०। ४. मनःशब्दात् क्यङ् सो वा लुक् च क०, म० टि०। ५. धातुत्वाभावादव्ययादुत्तरस्याप्यादेशः। क०, म० टि०। ६. न बन्द्रा वलि इति दस्य न द्विर्भावः क०, म० टि०। ७. ण्यादेशः क०, म०। ८. सङ्ग्रामी यदि चुरादिः क०, म० टि०। ९. घञये चोपसर्गादिति नम् क०, म० टि०। १०. हिनुमीनानिणोऽदुरोऽन्तरश्च णः क०, म० टि०। ११. अभिषिञ्चति। विनियिञ्चति। क०, म०। [स्थासेनिसेधसिच्सञ्जाम् इति षिः। क० म० टि०] १२. वीप्स्यलक्षणेत्यमिति अभिः सिचः सम्बन्धी न। क०, म० टि०। १३. ज्ञाने क०, म० टि०। १४. आकारो क०, म०। १५. अत्र उपसर्गत्वाभावात्प्रतिसंजाततत्तिमः स्वत्याङ्कन्या इति न समासः तेनैव पृथक्परत्वाद्ठणि आकारो न स्यात् क०, म० टि०। १६. अर्चास्वति-क०, म०। १७. -क्रमाति-क० म०। १८. उपसर्गत्वाभावात्तिसंज्ञाभावः। ततः समासाभावः ततो न ल्यादेशः क०, म० टि०। १९. तिमः स्वत्या समासः। अनेकाचोऽव्यक्तानुकरणे इति डाच्। क०, म० टि०। २०. सपत्रनिष्पत्रादतिपीडते इति डाच् क०, म० टि०। २१. सुकधीकृत्य क०, म०। २२. कर्मकर्तृभ्यां प्रागतत्त्वे च्विः क०, म० टि०।

घटीकृत्य। ऊर्यादि—ऊरीकृत्य। ऊररीकृत्य। अनुकरणम्—खात्कृत्य। फट्कृत्य। उपसर्गः—प्रकृत्य। पराकृत्य। डाजादिग्रहणं किम्? अतिसिक्त्वा। अतिस्तुत्वा। पिताकृत्वेति। अत्र डाच्च्विप्रतो ग्रहणान्न भवति, च्विडाच्-साधर्म्यमूर्यादीना[1] कृम्बस्तिभिरेव योगे तिसंज्ञा। उपसर्गाणा मनुकरणानामनियमः, खादिति कृत्वा निरुष्ठीवत् इत्यत्र धातुना खात् इत्यस्य न योगः, कस्य तर्हि? इतेः, इति न भवति। ऊरी ऊररी अङ्गीकरणे विस्तारे च। पार्ष्यौ[2] विध्वसे, माधुर्ये च। ताली-आताली वर्णे। [3]मूशी कान्तौ। शकला शंसकला ध्वंसकला भ्रंशकला आलङ्घि(म्बि) केवाशी शेवाली पर्पाली[4] मस्मसा मसमसा मससस्ना एते हिंसायाम्, गुडु गुधा पीडायाम्, सजः सहार्थे, फलू[5] फली आकली विकली विकारे, श्रौषट् वौषट् वषट् स्वाहा स्वधा दाने, श्रत् श्रद्धाने, प्रादुस् आविस् प्राकाश्ये, एते ऊर्यादयः। प्रादुराविःशब्दो 'साक्षादादो [अच्वि]' [१।१।३५] च पठ्येते, तेनानयोः कृञ्योगे विभाषा भवति। प्रादुष्कृत्य। प्रादुःकृत्वा। आविष्कृत्य। आविःकृत्वा। तिप्रदेशाः 'कृञ्सतिकारकस्यापि' [१।१।६०] इत्यादयः।

कारिकालमदोऽन्तरस्सदसतस्स्थित्यादिभूषानुपदेशापरीग्रहादरक्षेपे ॥१।१।२७॥ स्थित्यादौ भूषानुपदेशपरिग्रहादरक्षेप इत्येतेषु च अर्थेषु यथासख्यं कारिका अलं अदस् अन्तर् सत् असत् इत्येते शब्दाः धातोः सम्बन्धिनः तिसंज्ञा भवन्ति। स्थितिः मर्यादा वृत्तिर्वा। आदिशब्दात् यत्नादिर्गृह्यते। तत्र कारिका-कारिकाकृत्य। भूषा मण्डनम, तत्र अलम्। अलंकृत्य। स्वयं परामर्श अनुपदेशः तत्र अदः। अदःकृत्य। परिग्रहः स्वीकारस्तद्[6]-भावे अन्तः अन्तर्हृत्य। आदरः प्रीत्या सम्भ्रमः, तत्र सत्। सत्कृत्य। क्षेपोऽनादरः परिभवस्तत्र असत्। असत्कृत्य। स्थित्यादाविति किम्? कारिका कृत्वा। कर्त्रीमित्यर्थः। अलकृत्वा[7]। खलुकृत्वा। मा कारीत्यर्थः। अदः कृत्वा गतः। अय परस्योपदेशः। अन्तर्हृत्वा मूषिका श्येनो गतः। परिगृह्य गत इत्यर्थः। सत् कृत्वा। विद्यमानमित्यर्थः। असत् कृत्वा। अविद्यमानमित्यर्थः।

कर्णेमनः श्रद्धोच्छेदे ॥१।१।२८॥ कर्णे मनस् इत्येतौ शब्दौ श्रद्धाया अभिलाषस्योच्छेदे धातोः सम्बन्धिनौ तिसंज्ञौ भवतः। कर्णेहृत्य। मनोहृत्य। श्रद्धामुच्छिद्येत्यर्थः। श्रद्धोच्छेद इति किम्? तण्डुलस्य कर्णेहृत्वा मनोहृत्वा गतः।

अस्तं पुरोऽव्ययम् ॥१।१।२९॥ अस्तं पुरस् इत्येते अव्यये धातोः सम्बन्धिनी तिसंज्ञे भवतः। अस्तगत्य। पुरस्कृत्य। अस्तमिति नाशे वर्तते। अव्ययमिति किम्? अस्तं कृत्वा क्षिप्तमित्यर्थः। गतोऽस्तमर्कः। अस्तो नाम पर्वतः। पुरः कृत्वा। नगरीः इत्यर्थः।

गत्यर्थवदोऽच्छः ॥१।१।३०॥ अच्छेत्यव्ययमभिशब्दार्थे दृढार्थे च वर्तते। तत् गत्यर्थस्य वदेश्च धातोः सम्बन्धि तिसंज्ञं भवति। अच्छगत्य। अच्छव्रज्य। अच्छोद्य[10]। गत्यर्थवद इति किम्? अच्छकृत्वा। अव्ययमिति किम्? अच्छमुदकं गत्वा।

तिरोऽन्तर्धौ ॥१।१।३१॥ तिरस् इत्येतदन्तर्धौ व्यवधाने वर्तमानं धातोः सम्बन्धि तिसंज्ञं भवति। तिरोभूय। तिरोधाय। अन्तर्धाविति किम्? तिरोभूत्वा स्थितः। तिर्यग्भूत्वेत्यर्थः।

कृञो वा ॥१।१।३२॥ तिरस् इत्येतदन्तर्धौ वर्तमानं कृञो धातोः सम्बन्धि तिसंज्ञं भवति वा। तिर[11]स्कृत्य। तिरःकृत्वा। अन्तर्धाविति किम्? तिरः कृत्वा काष्ठं गतः। तिर्यगित्यर्थः।

मनस्युरस्युपाजेऽन्वाजे मध्ये पदे निवचने ॥१।१।३३॥ मनसि, उरसि, उपाजे, अन्वाजे, मध्ये, पदे, निवचने इत्येतानि शब्दरूपाणि सप्तम्येकवचनान्तप्रतिरूपकाणि अव्ययानि कृञो धातोः सम्बन्धीनि तिसंज्ञानि भवन्ति वा। मनसिकृत्य। मनसिकृत्वा। उरसिकृत्य। उरसिकृत्वा। उपाजेकृत्य। उपाजेकृत्वा। अन्वाजेकृत्य। अन्वाजेकृत्वा। मध्येकृत्य। मध्येकृत्वा। पदेकृत्य। पदेकृत्वा। निवचने[12]कृत्य। निवचने कृत्वा।

---

१. साधर्म्यादु -क०, म०। २. -गौनुकरणा -क०,म०। ३. पार्म्पी क०, म०। ४. मार्शी क०, म०। ५. पार्दाली क० म०। ६. फलूल्य क० म०। ७. तद्भावे क० म०। ८. निषेधेऽलंखलू त्वा क०, म०। ९. -मुच्छेद्य क० -म०। १०. वद व्यक्तायां वाचि क०, म० टि०। ११. तिरसस्तेः सिरिति सिः क०, म० टि०। १२. वचनाभावार्थः। वाचं नियम्येत्यर्थः। क०, म० टि०।

अव्ययमिति किम्? भार्यां मनसि कृत्वा सुखं गतः। उरसि पाणिं कृत्वा शेते। उरसि मनसि अव्यये अनत्याधानविषये। अत्याधानमुपश्लेष आश्रयं च।

स्वाम्येऽधिः ॥१।१।३४॥ स्वाम्ये स्वामिभावविषये, अधि इत्ययमुपसर्गः कृञो धातोः सम्बन्धि तिसंज्ञो भवति वा। देवदत्तं ग्रामेऽधिकृत्य ग्रामेऽधिकृत्वा स्वामिनं कृत्वेत्यर्थः। स्वाम्ये इति किम्? अचीत्यधिकृत्य उपसर्ग इति नित्यं प्राप्ते पक्षे अभावाद्यर्थं वचनम्। गतार्थत्वे भावार्थं च। प्रादिरुपसर्ग इति वर्तते, तेन उपसर्गसंज्ञाऽपि विकल्प्यत इति कृत्वाऽधीति प्राक्त्वेऽप्यनियमः।

साक्षादाद्यच्वि ॥१।१।३५॥ साक्षादित्येवमादि शब्दरूपमच्वि[1] च्व्यर्थमव्ययन्तं कृञो धातोः सम्बन्धि तिसंज्ञं भवति वा। साक्षात्कृत्य। साक्षात्कृत्वा। मिथ्याकृत्य। मिथ्याकृत्वा। अच्वीति किम्? [2]लवणीकृत्य। उष्णीकृत्य। अत्र डावच्वीति[3] नित्यं भवति। अच्वीति[4] पर्युदासात् अव्यन्तस्य च्व्यर्थस्य ग्रहणम्, तेन इह न भवति-साक्षात् किञ्चित् करोति साक्षात्करोति। साक्षात् मिथ्या चिन्ता[5] भद्रा रोचना अमा आत्था[6] प्राजर्षा प्राजुरा जिजरा[7] जिजरहा[8] संसर्या[9] अर्थे अग्रौ वशे एकपने[11] प्रहसने[12] विहसने। अर्थ इत्यादयः सप्तमीप्रतिरूपकाः। लवण उष्णं शीतमुदकमार्द्रं लवणादीनामिह तिसंज्ञासन्नियोगे [13]मकारान्तं निपात्यते। नमस् प्रादुस् आविस् इति साक्षादादिः।

नित्यं हस्ते पाणौ स्वीकृतौ ॥१।१।३६॥ हस्ते पाणौ इत्येतौ सप्तमीप्रतिरूपकौ शब्दौ [14]आत्मीयीकरणे कृञो धातोः सम्बन्धिकौ नित्य तिसंज्ञौ भवतः। हस्तेकृत्य। हस्ते करोति। पाणौकृत्य। पाणौ करोति। स्वीकृताविति किम्? हस्ते कृत्वा कार्षापणं गतः।

जीविकोपनिषदावौ[15] ॥१।१।३७॥ जीविका उपनिषद् इत्येतौ शब्दौ, इवे इवार्थे गम्यमाने कृञो धातोः सम्बन्धिनौ तिसंज्ञौ नित्यं भवतः। जीविकामिव कृत्वा जीविकाकृत्य[16]। जीविकाकरोति। उपनिषदमिव कृत्वा उपनिषत्कृत्य। उपनिषत्करोति। इवेति किम्? जीविकां कृत्वा, उपनिषदं कृत्वा।

प्राध्वं बन्धे ॥१।१।३८॥ प्राध्वमित्येतन्मकारान्तमव्ययमानुकूल्ये वर्तते। तदानुकूल्य बन्धहेतुक बन्धमित्युच्यते। बन्धहेतुके आनुकूल्ये वर्तमानः प्राध्वशब्दः कृञो धातोः सम्बन्धी तिसंज्ञो भवति। प्राध्वंकृत्य[17]। बन्ध इति किम्? प्रगतमध्वानं प्राध्वंकृत्वा शकटं गतः।

तस्वन्डामधणत्स्यांक्त्वान्तुन्तिसुड्सस्वाभास्वरादीन्यव्ययम् ॥१।१।३९॥ तस् वत् डाम् इत्येतदन्तानि धण्वर्जिततस्यन्तानि आम् क्त्वा अम् तुम् इत्येतदन्तानि तिसंज्ञकानि सुड्सस्प्रतिरूपकाणि[18] स्वरादीनि च शब्दरूपाणि अव्ययसंज्ञानि भवन्ति। तस् 'एकदिशि' [३।१।१७१] 'तस्' [३।१।१८०]—पीलुमूलतो विद्योतते। वत्—मुनिवद्भृ[19]तम्। क्षत्रियवद्युध्यते। डाम्—उच्चैस्तराम्, उच्चैस्तमाम्। डकारः किम्? प्रतामौ। प्रतामः। पचताम्। पचेताम्। अधणत्तसि—त्रिपृष्ठतः। अश्वग्रीवतः। संवतः[20]। सर्वत्र। बहुशः। अल्पशः। तसीति 'व्याश्रये तस्' [३।४।४] इत्यारभ्याशसेरिकारेण प्रत्याहारः। अधणिति किम्? पथि द्वैधानि, सशयद्वैधानि। आम्—दयाञ्चक्रे[21]। आमिति लिङ्लेडाम्ग्रहणम्[22]। क्त्वा—कृत्वा। हृत्वा। अम्—पूर्वं भोजम्, अग्रे

---

१. अत्र डाच्वि इति नित्यमेव तिसंज्ञा क०, म०टि०। २. कर्मकर्तृभ्यां प्रागतत्सत्वे च्विः क०, म० टि०। ३. डाचि च्वौ क०,म०। ४. अच्वीदिति क०,म०। ५. चित्ता क०, म०। ६. आस्था क०,म०। ७. प्राजर्या क०, म०। ८. बीजर्या क०, म०। ९. बीजरहा क०, म०। १०. संसर्पा क०, म०। ११. विकपने प्रकपने। क०, म०। १२. प्रसहने। विसहने क०, म०। १३. मकारान्तत्वं क०, म०। १४. भार्याकरणे क०, म०। १५. जीविका च उपनिषच्च जीविकोपनिषच्च जीविकोपनिषदमिति समाहारद्वन्द्वे क्षुदपहस्समाहारे इति सूत्रेण अस्समासान्तप्राप्तिः। समासान्तस्य क्वचिन्नित्यत्वादत्र न भवति क०, म० टि०। १६. तिसंज्ञत्वात्समासः क०, म० टि०। १७. बन्धेन स्ववशं कृत्वा क०, म० टि०। १८. प्रतिरूपाणि क०, म० टि०। १९. -वद्वृत्तम् क०, म०। २०. भ्वादिवैपुल्यात्सर्वादिर्किंबहोः तस् क०, म० टि०। २१. -क्रे पलायाञ्चक्रे क०, म०। अथ गतौ रो लो यौ इति रस्य लः क०, म० टि०। २२. विदाङ्करोतु क०, म०, टि०।

भोजम्, स्वादुंकारम्, सम्पन्नकारम्, [1]कन्यादर्शं वरयति, यावज्जीवमदात्। अमिति णमुखमोर्ग्रहणम्। तुम्—कर्तुम्, हर्तुम्। ति—[2]अधःकृत्य। [3]'अनव्ययस्य' [१।१।३७५] इति सिप्रतिषेधः। सुडाभम्—दात्रायाम्[4] [5]मात्रायाम्, अस्ति, स्वस्ति, असि, स्यात्। प्तस्वाभ—यथा, तथा, कथम्, कुत। प्तसु इति 'अद्वयादिवैपुल्यात् सर्वादिकिम्बहोः प्तस्' [३।४।१२] इत्यत आरभ्य आ 'कथमित्थमुः' [३।४।२६] [6]इत्यस्योकारेण प्रत्याहार। स्वरादि—[7]स्वस्तिष्ठति। स्व पश्यति। अत्युच्चैम् अत्युच्चैसम् इत्यत्र उच्चैर्यस्तमतिक्रान्तस्य। पूर्वपदार्थस्य सुबिति न। परमोच्चै परमनीचै इत्यत्र तु अव्ययस्यैव स्वस्तिमाशास्ते। च समुच्चये। पशुर्वै पुरुष इत्यादौ—अव्ययमिति महती संज्ञाऽन्वर्था। अव्ययमव्ययमिति विशेषणार्थेति न भवति। तदन्तविध्यर्था चेति परमोच्चै—इत्यादौ च भवति।

'सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥' —इति।

तमादिग्रहणं किम्? एक[8], द्वौ, बहव, पञ्च, पट्, सप्त, अष्टौ[8]। आपो वर्षा, पचतिरूपम्, पचतोरूपम्, पचतिकल्पम्, पचतस्कल्पम्। स्वर्, अन्तर्, प्रातर्, पुनर्, [9]सर्, तर्, उच्चैम्, नीचैम्, शनैम्, [10]ऋधक्, [11]ऋते, युगपत्, आरात्, [12]पृथक्, [13]ह्याम्, [14]श्वम्, दिवा, सायम्, चिरम्, ईषत्, मनाक्, जोषम्, ज्योषम्, तूष्णीम्, बहिस्, अवस्, निकषा, समया, मृषा, स्वयम्, नक्तम्, इच्छा, सामि, वता, सनम्, सनात्, तिरस्, अन्तरा, ज्योक्, कम्, शम्, सना, [15]नाना, विना, [16]अन्यत्, क्षमा, उपांशु, विहायसा, दोषा, मुधा, मिथ्या, पुरा, मिथो, मिथु, मिथस्, प्रायस्, मुहुस्, [17]प्रबाहु, आर्य, [18]अलम्, [19]अभीक्ष्णम्, सार्धम्, मनस्, हिरुक्, प्रशान्, [20]च, [21]वा, ह, अह, एव, एवम्, [22]मानम्, शश्वत्, नित्यम्, सूपत्, कूपत्, [23]कुवित्, [24]नेत्, [25]चेन्, [26]कश्चित्, यत्र, नह, हन्त, माकिम्, नकिम्, माङ्, नञ्, वावत्, त्वावत्, न्वावत्, त्वै, [27]न्वै, वै, रै, ओषट्, वौषट्, वषट्, स्वाहा, स्वधा, ओम्, हिम्, स्वलु, किल्, अधस्, अथ, स्म, अ, इ, उ, ऋ, लृ, ए, ऐ, ओ, औ, आदह, आनञ्, यावत्, तावत्, किम्, यत्, यद्, तद्, धिक्, हे, है, पाट्, प्याट्, आहो, उताहो, अथो, अंधो, मा, नू, ननु, हि, तु, नु, इति, इव, चन, [28]शु, वत, आम्, शप्, [29]कूकम्, शुकम्, सुकम्, नुकम्, नहिकम्, सत्यम्, ऋतम्, अद्धा, नोहि, नचेत्, जातु, अय, अड, [30]अध, अहाह, स्विद्, बाह्या, दिष्टया, पशु, पट्, सह, अनुषक्, अङ्ग, पुत्, ताजक्, अरे, अये, अवे, वद्, वेद्, वाद्, हुँम्, चुम्, भोस्, क्वित्, मर्या, ईम्, किम्, सिम्, प्र, परा, अप, सम्, अनु, अव, निस्, दुस्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप—इति स्वरादय। आकृतिगणोऽयम्।

---

१. विद्वद्दशिष्यः कात्स्न्यें णम् इति णम् क०, म० टि०। २. अस्य कृकमिकंसकुशेति न सिः कारिकालक्षण इति तिसंज्ञा क०, म० टि०। ३. णम् खमो ग्र—क०, म०। ४. रात्रौ वेलायाम् क०, म०। ५. मात्रायाः म०। ६. इत्येतस्योका—क०, म०। ७ स्वर्गे तिष्ठतीत्यर्थः क०, म० टि०। ८ अष्टौ इति क० म० पुस्तकयोर्नास्ति। ९ सन् क०, म०। १० वियोगशीघ्रप्रवृत्तेषु क०, म० टि०। ११ वियोगार्थे क०, म० टि०। १२ योगे क०, म० टि०। १३ अन्तरार्तीते दिन इत्यर्थः क०, म० टि०। १४. अन्तरागामिनि दिन इत्यर्थः क०, म० टि०। १५. अस्ति स्वस्तीति कैश्चिदभिधीयते प्रीतिकरण इत्येके क०, म० टि०। १६. पृथग्भावे क०, म० टि०। १७. प्रोद्गतो बाहुरत्रेति प्रबाहु। कैश्चित् प्रबाहुगिति पठ्यते क०, म० टि०। १८ कैश्चिद् हलमिति पठ्यते। हल प्रतिषेधे विषादे च क०, म० टि०। १९ पुनः पुनरित्यर्थः क०, म० टि०। २० चशब्दादेकवचनादिषु क०, म० टि०। २१ विकल्पादिषु क०, म० टि०। २२ वितर्के क०, म० टि०। २३ योगप्रशस्तिभावेषु क०, म० टि०। २४ विचारे—क०, म० टि०। २५. सम्प्रश्ने चेति क०, म० टि०। २६. कश्चित्—क०, म० टि०। २७ वै—क०, म०। २८ च—क०, म०। २९. वथप् हिकम् क०, म०। ३० रथ क०, म०।

घ्यसख्यद्वन्द्वपतीदुत् ।१।१।४०। इकारान्तमुकारान्त च शब्दरूप घिसज्ञ भवति सखिशब्दं द्वन्द्वान्तयवं च पतिशब्द वर्जयित्वा । मुनिना । साधुना । मुनये । साधवे । मुनिसुतौ । [1]साधुसुतौ । असख्यद्वन्द्वपतीति किम् ? सख्या । सख्ये । पत्या । पत्ये । अद्वन्द्वग्रहणं किम् ? पतिसुतौ । पतिसखायौ । पति-सखिशब्दयोरय प्रतिषेधो न समुदायस्य, तेनेह भवत्येव—अतिसखेरागच्छ (ति) । अतिसखे: स्वम् । बहुसखेरागच्छति । बहुसखे: स्वम् । बहुपतेरागच्छति । बहुपते स्वम् । घिप्रदेशा —**'घेर्डौरनाट्'** [१।२।२६] इत्येवमादय ।

[2]**प्रत्यय: कृतोऽषष्ठ्या: ।१।१।४१।** इह य कृतो विहित स प्रत्ययसज्ञो वेदितव्य । अषष्ठ्या षष्ठ्यन्तार्थ षष्ठी न चेत् स षष्ठ्यन्तार्थविहितो भवति, आगमो विकारो वेत्यर्थ । **'नृदुगिदन्चोऽस्वस्रादेर्ङी'** [१।२।७]—राज्ञी, । कर्त्री । **'अजाद्यताम्'**[4] [१।२।१३] अजा, खट्वा । **'सुऔजस्'** [ ] वृक्ष: । वृक्षौ । वृक्षा । **'इज्युद्धे'** [२।१।१३५]—केशाकेशि । दण्डादण्डि । **'प्राग् जितादण्'** [२।४।४]—औपगव. । कापटव । **'गुपौधूविच्छिपन्पणेरायः'** [४।१।१]—गोपायति । धूपायति । **'तास्यौ लुलृोः'** [४।३।१]—कर्ता । करिष्यति । घ्यण्—कार्यम् । हार्यम् । कृत इति किम् ? प्रकृत्यादीना[6] मा भूत् । ते हि सिद्धतया उपादीयन्ते । अषष्ठ्या इति किम् ? विकारागमयोर्मा भूत्, तौ हि कस्यचिद्विधीयेते । **'अजाद्यताम्'** [१।३।१३] इत्यभिधेयापेक्षा षष्ठी न विधेयापेक्षया । **'क्लोऽपत्ये'** [२।४।१८] इत्यादावपि षष्ठ्यन्ताद्विधीयते न षष्ठ्यन्तार्थस्येति तत्र प्रत्ययसज्ञा भवत्येव । प्रत्ययप्रदेशा:—**'प्रत्यये'** [१।१।१७६] इत्येवमादय ।

इजाद्यायात्तद्धित: ।१।१।४२। **'इज्युद्धे'** [२।१।१३५] इत्यारभ्य आ— **'गुपौधूविच्छिपन्पणेराय:** [४।१।१] इत्येतस्माद् आ आयात्—आय प्रत्ययात् प्राग्यत्प्रत्ययसज्ञं तत्तद्धितसज्ञ भवति । [7]केशाकेशि । [8]अपड्क्षीण । [9]औपगव: । कापटव । इजादीति किम् ? मृद्वी । आ आयादिति किम् ? पनायन्ति । पटयन्ति । शिक्षयन्ति । नोपदस्येति लुक्, आदेरारैच्च प्राप्नोति । तद्धितप्रदेशा —**'मत्स्यतद्धितस्य हलो य:'** [१।३।७६] इत्येवमादय: ।

घ्याद्यतिङ् कृत् ।१।१।४३। घ्यणादिप्रत्ययसंज्ञ तिङ्वर्जित कृत्सज्ञं भवति । [10]घनघात्य: । उदके विशीर्णम् । गोघायो व्रजति । घ्यादीति किम् ? चीयते प्रवातेन । अतिङ्डिति किम् ? प्रनिस्ते । प्रयापयानि । कृत्प्रदेशा:—**'कृत्सतिकारकस्यापि'** [१।१।६०] इत्यादय ।

पर: ।१।१।४४। य प्रत्यय: स: प्रकृते पर एव भवति । अजा । खट्वा । वृक्ष: । वृक्षौ । वृक्षा ।

मिदचोऽन्त्यात् ।१।१।४५। (यो) मकारानुबन्धको यस्य विधीयते (स) तस्याचामन्त्यात्परो भवति । वन्दते । छिनत्ति । वनानि । यशासि । काष्ठतड्क्षि । नम् सुपीत्यादौ सुपीत्यनेन नप इति विशिष्यते नाच इत्यन्तग्रहणम् ।

स्पर्द्धे । १।१।४६। द्वयोर्विघ्योरन्यत्र सावकाशयोस्तुल्यबलयोरेकत्रोपनिपात स्पर्ध:, तत्र य सूत्रपाठे पर स विधिर्भवति । **'अतोद्व्यु:'** [१।१।१५७] को हसति । को धावति । हल्यनलसमासे लुक्त सात्—एपत्सरुक. । एषत्सरति । एप हसति । स धावतीत्यत्र [11]**'लुग्व्योर्वलवौ'** [२।३।३५] इति परो विधिर्लुग्भवति । नित्यानित्यान्तरङ्गबहिरङ्गोत्सर्गापवादेषु बलवन्तो नित्यान्तरङ्गापवादा एव भवन्ति । परस्परप्रतिबन्धेनावृत्तौ[12] पर्यायेण वा प्राप्तौ वचनम् ।

षष्ठ्या: स्थानेऽन्तेऽल: ।१।१।४७। षष्ठ्यन्तार्थ. षष्ठी, षष्ठ्यन्तार्थस्य विधीयमानो विधिस्तस्य योऽन्तेऽल् तस्य स्थाने प्रसङ्गे भवतीति वेदितव्यम् । **'नपोऽचो ह्रस्व:'** [१।२।१] ग्रामणिकुलम् । सेनानिकुलम् । षष्ठ्या [13]इत्युत्तरार्थम् । स्थान इत्यनन्तरार्थम् । अल इति किम् ? परमपुंस्कोकिल ।

---

१ साधुगुसौ–क०,म० । २ प्रतीयते येनार्थ: स प्रत्यय: क०,म० । ३ -न्तार्थ विहि—क०, म० । ४ तामाह क०, म० । ५ पन्पणे क०, म० । ६ आदिशब्देन उपपदमुपाधिश्च गृह्य(ह्ये)ते । तत्र शोकापनुदेत्यादिकमुपपदम् । 'इतिनाथात्पशाचि:' इत्यादिरुपाधि: । क० म० टि० । ७ इज्युद्धे । आदिजन्ते । ऐरिन्युलुक् । क०,म० टि० । ८. अपदर्क्षीण: क०,म० । ९. अवस्वयम्भुव: क०,म० टि० । १०. हचपा मुद्गरघनौ, क०,म० टि० । ११ लुगुत्वयो:, क०,म० । १२. -न्धेन वृ—क०,म० । १३ अनन्तरार्थम्, क०, म० ।

तस्मादादेः ।१।१।४८। तस्मात् षष्ठ्याः पञ्चमीविशिष्टस्य षष्ठ्यन्तार्थस्य परस्य विधीयमानो विधिस्तस्यादेरलः स्थाने भवतीति वेदितव्यम् । **'द्वयन्तरुपसर्गादीदपोऽनात्'** [२।२।१३८] ङीप । अन्तरीप. । तस्मादिति किम् ? पचते । पचन्ते । **'ए टितः'** [१।४।९३] इति एत्वविधौ न किञ्चिदस्मादिति पूर्वमाश्रयते ।

शिदङ्दिल् ।१।१।४९। षष्ठ्या स्थान इति वर्तते, शिच्चाङिदल् चादेश षष्ठ्यन्तार्थस्य तस्यैव स्थाने भवति, नादेरन्त्यस्य वाऽल । शित्— **'जश्शसः शिः'** [२।१।१६७] वसनानि, वनानि । **'स्भ्येऽश्'** [१।२।२०५] अस्मै । एपु । अङिदल्—**'सामामः'** [१।२।१७६] सर्वेषाम् । विश्वेषाम् । **'त्रिचतुरः स्त्रियां तिसृचतसृ'** [१।१।२२१] तिस्रः, चतस्र· । **'युष्मदस्मद्भ्यामाकम्'** [२।१।१७७] युष्माकम् । अस्माकम् । डिदल्पर्युदासात् टिदल् न भवति । **'जराया ङसिन्द्रस्यावि'** [१।२।३७] जरा—जरसे । य । स· । भावाश्रयाल्लुक्—भवान् । शिद्ग्रहणान्तानुबन्धकृतमनेकाल्त्वम्—गाम् । गा । निर्दिश्यमानस्यादेशा भवन्ति ततः पष्ठी श्रुते —पचेयुः । पच्यासु । पेचुप । पेचुषेति वलभावादिडभावः ।

स्थानीवानलाश्रये ।१।१।५०। यस्य स्थाने यो विधीयते स स्थानी, इतर आदेश , स्थानं प्रसङ्ग· । स्थानीव भवत्यादेश —स्थानिकार्य प्रतिपद्यत इत्यर्थ. । अनलाश्रये—न चेत्तत्कार्य स्थान्यलाश्रय भवति । युवा । राजा । सुब्लोपेऽपि[1]—**'न्यक्'**[१।२।१३४]इति दीर्घ पदत्वादि च । कस्मै । कस्मात् । किवत् । सर्वादित्वात् स्मायादि । धर्मो वो वर्धताम् । धर्मो नो वर्धताम् । सुबन्तत्वात् पदत्वादि । पचतु । पचन्तु । एकदेशादेशेऽप्यनुमेयस्य स्थान्यादेशभावादवयवधर्मिणोऽवयविव्यपदेशात् समुदाये वाऽवयवान्तर्भावात्—एकदेशविकृतस्यानन्यत्वाद्वा सिद्धम् । इवग्रहण स्वाश्रयार्थम्, अन्यथाऽन्यादेशस्य संज्ञा विज्ञायेत । न च सज्ञाकार्य प्रतिपद्यते, तेन स्थानिन्यादेशे च कार्य सिद्ध भवति । आहत । आवधिष्ट । **यमरमनः स्वेऽङ्के चाङः'** [१।४।५८।] इति तङ् । अनलाश्रय इति किम् ? स । पन्था । अत्र स्थानिवत्त्वाभावाद्वल· परत्वलक्षण. सोर्लुग् न भवति । क इष्ट., स उप्त हृपि हलीन्युत्वलोपौ न भवत । श्राय स्थालीपाक —[अत्र] **'ए'** [२।३।७४] इति लुग् न भवति । आश्रयग्रहण किम् ? प्रदीव्य । प्रसीव्य । वलादेरिति इड् न भवति । शब्दार्थातिदेशेऽत्र गुण प्राप्नोति । अग्रहीत् इति **'च ईटीटः'** [४।२।७७] इति लुग् न स्यात् । स्थान्यलाश्रयप्रतिषेधादिह भवत्येव । सर्वेषाम् । अरुदिताम् । धवना । अनुबन्धकार्यमभावाश्रय नालाश्रयमिति भवति । शोभना दृषदोऽस्य सुदृपत् । सुदृषद्वान् इत्यत्र **'श्लुचीगेनत्'** [१।१।५२] इति नियमात्—एधादिसमासपरिग्रहादसद्विज्ञानादितिकरणाच्च स्थानिवद्भावो[3] नास्तीति [4]इग्दीर्घौ न भवत ।

परेऽचः प्राचोऽक्विदीर्घयदुब्यासदस्क्नुंग्विधौ ।१।१।५१। अजादेशः परिनिमित्तकस्तत पूर्वविधौ कर्त्तव्ये स्थानिवद् भवति, क्विविधि दीर्घस्य विधि यकारस्य विधि द्वयोर्द्वित्वस्य विधिम्,—आ एतस्मादारभ्य **'दोमोऽस्यादसोमाद् गुश्चाघिन्यसन्'** [१।२।४४] इत्यसदधिकाराद्यो विधिर्विधीयते **'संयोगस्यादिस्कोर्लुक्'** [१।२।९१] इति लुग्वर्जितस्तं वर्जयित्वा । कथयति । अवधीत्—अत्राल्लुगुपान्त्यविधौ कर्तव्ये स्थानिवद् भवति । पादिक·—अत्र पद्भावे । [5]शातनो । पातनो । अत्र ल्युनादेशे । धारणि । रावणिः । अत्रान्त्याजादिलुक् । स्रंस्यते । ध्वंस्यते । [7]अत्र णिलुचि न लुग् न लुनचि । [6]याज्यते । वाप्यते अत्र यज इकि । निराद्य । समाद्य । अत्र जग्धादेशे । घात्यान्—अत्र वधादेशे । श्रायसौ । गोमतौ । अत्रैजादेशो नमि । [9]चासुरौ । आनडुहौ—अत्र वादेशे । [10]पदि । अत्र पद्भावे । अन्यतरेण च व्यपदेश समुदायोऽव्यवहित । व्यवहितेऽपि प्राक्शब्दो लक्षणभेदात् । अवीवदद् वीणा परिवादकेनेति णिजात्याश्रयणाद्ध्रस्व । पर इति किम् ? वैयाघ्रपद्य. । अत्र पादस्यान्तलुग् न परनिमित्तेति पद्भाव. ।

---

१. सुबल्लोपेऽपि—क०, म० । २. धर्मेणा—क०, म० । ३ भावे, क०, म । ४ विन्दीर्घौ क०, म० । ५. स्क्लुग्वि—क०, म० । ६ शातनी पातनी, क०, म० । ७ अत्र णिलुग्भवति न लु—क०, म० । ८ यजति कश्चित्तमन्यः प्रयुङ्क्ते प्रयुज्येति णि याजि, ततः श्लो···रेणेत्येति णिलुकि याज्यते । अत्र णिलुचः स्थानिवद्भावाद्यक् इग्न भवति । श्न्यादीत्यादि क०, म० टि० । ९. चातुरौ क०, म० । १०. पादे क०, म० ।

अच इति किम् ? आगत्य । अभिमत्य । अत्रानुनासिक [1]इति लुक्, नाच इति तक् । प्राच इति किम् ? नैधेय । निधीक । [2]परिखीयः । अत्र द्वयञ्लक्षणो ढण्ठण्विधी चोपान्त्यलक्षणश्च [3]खन् प्राच इति आकारलुग् न स्थानिवत् । प्राच इति पूर्वस्मादपि विधौ स्थानिवद्भाव इति अपीपचन् इति न जुस् [क्वि इत्यादि] क्विविष्यादिप्रतिषेधः किम् ? देवयते [4]द्यू । लवमाचष्टे लौ. । पौः । अत्र णिलुग् अचो क्विविधावूचि न स्थानिवत् । शामम् शामम् । अशामि । शशामम् शशामम् । अशंशामि । अत्र णि, ण्यन्ताद्यङ्, ण्यन्ताच्च खमुञि औ च णिलुगल्लुचौ दीर्घविधौ । सौरी बलाका । ब्राह्मणकण्डूति. । क्षत्रियकण्डूति । अत्राल्लुग् यविधौ यलुचि । वाय्वोऽध्वर्वो —इत्यत्र वकारो न प्रत्ययस्येति लुग्न भवति । दध्यत्र । मध्वत्र । अत्र यज् धकारस्य द्वित्वविधौ स्थानिवत्त्वे ह्यचीति प्रतिषेध स्यात् । द्वित्वस्यासद्विधित्वेऽपि [5]द्विग्रहणमसिद्धं बहिरङ्गमन्तरङ्ग इत्येतद् बाधनार्थम् । नयनम् । लवनम् । वैयाकरण. । सौवश्व. । तौ स्त । यौ स्त । तानि सन्ति । अभिषन्ति । विषन्ति । अपयन्ति । वियन्ति । अत्रैङ् यञ् अल्लुचो [ऽ] यादावमद्विधौ । सस्वीयते. पतीयतेश्च [6]क्विरपि, सस्युः । पत्युः । लुनीयते पुनीयतेश्च—क्विप्, लून्युः । पून्युः । [7]अत्रालुग्यञादेशे सति यञादेशे क्वौ विधावस्थानिवत्त्वाद्यकारस्य लुक् स्यात्, इसिडसोस्तु यञादेशोऽसिद्धं बहिरङ्गमन्तरङ्ग इति न [8]लुप्यते । शिण्ढि । पिण्ढि । अत्राल्लुक् परस्वेऽनुनासिके । शिषन्ति । पिषन्ति । अत्रानुस्वारे । जक्षतु । जक्षु । अत्र चर्त्वे । दोहयतेः—धोक् । लेहयते —लेट् । पाचयते **'नाग्नि'** [४।३।१०८] क्तौ पाक्ति । पापच्यते —पापक्ति । याजयते —याष्टिः । यायज्यते —यायष्टि । स्कन्धयते —स्कन्धि । अत्र णिलुगल्लुचौ [9] । [10]श्लुग्विधिप्रतिषेध किम् ? सुकुस्मयते —सुकूः । काष्ठ तक्षयति—काष्ठतक् । अत्र **'संयोगस्यादिस्कोर्लुक्'** [१।२।११] इति लचि प्राप्तायां णिलुच स्थानिवद्भावात् **'पदस्य'** [१।२।१२] इति लुक् काष्टतडित्यण्यन्ते [11]अस्कुगिति प्रायिकोऽयं निषेधः, तेन मधुगित्यत्र सलोप. । अतएवासदिति परामर्शाधिकार [12]व्याप्ति । वेतस्वान् इत्यत्र मत्वर्थे पदत्वाभावाद्विर्न भवति । [13]ब्रह्मबन्ध्वो । ब्रह्मबन्ध्व । कीर्यो. । गीर्यो. । काम्यर्थं वास्यर्थमित्यत्रासिद्धं बहिरङ्गमन्तरङ्ग इति पददीर्घलुचो न भवन्ति । षडिक इत्यत्र षडित्यतो जस्, द्वाभ्या देयमिति [14]द्वयोर्देय ऋण इति निपातनादत्वे न स्थानिवत् । बिम्ब्या फल बिम्बम् । आमलकम् । पञ्चभिः पट्वीभि क्रीत पञ्चपटु । पञ्चखारः । पञ्चेन्द्राण्यो देवताऽस्येति—पञ्चेन्द्र । पञ्चाग्निरिति । **'लुग्यगोर्णीसूच्योः ष्यतः'** [१।३।८१] इति ष्यच्छास्त्रस्य लुग्विज्ञानात् ष्यतोऽनुत्पत्तिरिति सिद्धम् ।

श्लुचीणेनत् ॥१।१।५२॥ परस्य प्रत्ययस्य श्लुचि सजाताया श्लुग्भूतपरनिमित्तक पूर्वकार्यं इक् एनत् [15]इत्येव भवति । वेवेद्धि । शोशवीति । जरीगृहीति । एनच्छ्रितक. । स्थानीवानलाश्रय इति सिद्धे नियमार्थं वचनम्, तेनान्यानि न भवन्ति । तद् । गर्गा । कुवलम् । पञ्चगोणी. । जुहुत ।—श्लुच्यपि श्लुग्रूपताऽस्तीति नियम तथा श्लुग्यपि । तथा च **'निजामेत्'** [४।१।६४] इति [16]श्लुचीति श्लुप्येत्ववचनं शकारविशेषणादिह नियमो न भवति । गोमान्, यवमान् । श्लुग्निमित्तनियमादिह न भवति । [17]संक्राम । प्रतिक्राम । अत्र णिद्दीर्घनिमित्त तस्मान्नडा न इति विशेषणम् । पूर्वकार्यनियमादिह न भवति—शिर कर्म । समुदायस्य हीय पदसज्ञा । पापक्ति, पापचीति इति यङन्तस्येद द्विर्वचनम् । अगात् । अध्यगात् । ल्यश्लिकार्य विषयभावे ।

टिदादिः ॥१।१।५३॥ टिद्यो यस्य विधीयते स तस्यादिः प्रथमावयवो भवति । **'डुस्तट् सोऽश्चः'** [१।१।१४६] [18]श्वविट्त्साये । **'लङ्लुङ्लृङ्क्षमाङाट्'** [४।२।१३१] अयात् । अभात् । **'वलादेरिट्'** [४।२।१३४]—वदिता । वदितुम् । आद्यन्तस्थानित्वापवादोऽयम् ।

---

१ 'इति' क०,म० नास्ति । २. पारिखीयः क०, म० । ३ खञ् क०,म० । ४ द्यवः क०,म० । ५ द्विर्ग्र—क०, म० । ६ क्विपि क०, म० । ७ अत्रालुग्यञा—क०, म० । ८ लुप्यते क०, म० । ९. चौ । घुस्वादौ श्लु—क०, म० । १० स्कु क०, म० । ११ अस्वलुगिति क०, म० । १२. -राभिव्याक०, म० । १३ ब्रह्मबन्धवौ क०, म० । १४ युवावो द्वयो—क०, म० । १५ इत्येतदेव क०, म० । १६. श्लुप्ये क०, म० । १७. अतो हेः, इति हेः श्लुक् क०, म० । १८. श्वलिट्त्साये क०, म० ।

किदन्तः ॥१।१।५४॥ किद्यो यस्य विधीयते स तस्यान्त —अवसानावयवो—भवति । 'नः शि जक्' [१।१।१४७] भवाञ्छूरः । 'ह्रस्वस्य तक् पिति कृति' [४।१।४२] अग्निचित् । प्रकृत्य । अन्ते स्थानित्वापवादोऽयम् । योगविभाग उत्तरार्थ· ।

विशेषणम् ॥१।१।५५॥ विशेषण विशेष्यस्य समुदायस्यान्तावयवो भवति । इह धान्वादि समुदायोऽभेदेनावयविविशेषणक उपादीयते, तत्र स तत्समुदायस्यान्तावस्त्वेन[1] नियम्यते । 'नपोऽचो ह्रस्वः' [१।२।१] कीलालपं कुलम् । ग्रामणिकुलम् । इह न भवति—[2]आर्यशी कुलम् । 'ऋवृ' [४।४।१४] इत्यच् । जय. । स्तव. । इह न भवति—सेक । योग । एयम्, अय इत्यादौ व्यपदेशिवद्भावाद् भवति ।

प्राक्पञ्चमी ॥१।१।५६॥ पञ्चम्यन्तार्थ पञ्चमी, इह पञ्चमी विशेषणममानाधिकरणं विशेष्यात्प्राक् पूर्व भवति । 'पदाद्वाक्यस्य वस्नसौ युष्मिभक्तेः' [१।२।१११] धर्मो वो वर्धताम् । धर्मो नो वर्धताम् । इह न भवति—युष्माक धर्मो वर्धताम्, अस्माकं धर्मो वर्धताम् । पदादित्यादौ दिग्योगलक्षणा पञ्चमी, तत्र पूर्वं परं च विशेष्य स्यादिति नियमार्थ वचनम् ।

न सप्तम्यध्यादिषु ॥१।१।५७॥ इह सप्तमीनिर्दिष्ट विशेषणं विशेष्यात् पूर्वं न भवति,—ध्यणादिविधेरन्यत्र। 'पृचोच्चयवायाव्' [१।१।७१] मुनये । [3]साधवे । अचीति न [4]पुनर्विशेषणम्, इति परस्यायादिर्न भवति । अध्यादिष्विति किम् ? स्मरसि वत्स्याम कलिङ्गेषु । इह मा भूत् । अचीति आद्यौपश्लेषिकमधिकरण पूर्वं पर च भवति, तत्र पूर्व न ग्राह्यमित्येनदर्थ वचनम् ।

तस्यादिः ॥१।१।५८॥ सप्तम्यर्थस्य विशेषणं तस्यादिरवयवो वेदितव्य । 'जराया ङसीन्द्रस्याचि' [१।२।३७] जरस । जरसाम् । इह न भवति । जरासु । 'द्रुस्फुनांचि ल्यलौ'[5] [४।२।११] नेनिजानि । अनेनिजम् । इह न भवति । नेनेक्ति । 'हल्योरौत्' [४।२।२१] यौनि । रौनि । इह न भवति । अब्रवीत् । जरसा । जरसे । [6]अयात् । अरौदित्यादौ व्यपदेशिवद्भावाद् भवति । सप्तमीत्यस्य स्त्रीत्वेऽपि तस्येत्यनेन स्त्रीत्वं न परामृश्यते । अन्तत्वापवादोऽयम् । सुबादिविशेष्येऽजाद्यवयवे कार्यविज्ञान इद शक्यमकर्तुम् । अजादिमात्रे च व्यपदेशिवद्भावात्तस्य तद्[7]भावः ।

प्रत्ययन्यक्ष्यत्प्रकृत्यादेः ॥१।१।५९॥ यस्माद्य प्रत्ययो विधीयते स तस्य प्रकृतिः, प्यदिति—'गुरूपोत्तमस्यानार्षेऽपत्येऽणिञः ष्यङ्' [१।३।२] इत्यारभ्य आ—'यूनस्तित्' [१।३।७६] इत्यतस्तत्कारेण प्रत्याहार, प्रत्ययो न्यगुपसर्जनश्च प्यद्विशेषणं प्रकृत्यादे [8]समुदायस्य वेदितव्यं । नोनाधिकस्य प्रत्यय । मातृभोगीण । खारपायण । 'सुङ् पदम्' [१।१।६२] इति पदसंज्ञा ऊनस्य न भवति । तेन 'अभिन्ने' [१।२।५६] इति ण । राज्ञ पुरुषो राजपुरुष । 'षष्ठ्यर्थत्नात्' [२।१।४३] इति समास । अधिकस्य समुदायस्य न भवति । वृद्धस्य राज्ञ पुरुष । गार्ग्यस्यापत्य गार्ग्यायण 'यञिञः' [२।४।३२] इत्यादिना अधिकात्समुदायान्न भवति, देवदत्तो गार्ग्यायण । पुत्रमिच्छति पुत्रकाम्यति । 'सुपः कर्तुः काम्यः' [४।१।१७] अधिकान्न भवति, महान्तं पुत्रमिच्छति । न्यक्ष्यत् । 'अतिकारीषगन्ध्याबन्धु । अतिकौमुदगन्ध्याबन्धु । 'बन्धौ ष्यस्येश्' [२।२।११५] न भवति । अनुपसर्जनस्तु ष्यदधिकस्यापि भवति, परमकारीषगन्धीबन्धुः । परमकौमुदगन्धीबन्धु । प्रत्यय. प्रकृत्यादेरित्यूनाधिकनिवृत्त्यर्थम्[10] ।

कृत्सतिकारकस्यापि ॥१।१।६०॥ कृत्प्रत्यय सतिसज्ञकस्यापि सकारकस्यापि सतिकारकस्यापि प्रकृत्यादेः समुदायस्य विशेषणं भवति, अपिशब्दात् केवलस्यापि । उदके विशीर्णम् । अवतप्तेन कुलस्थितम् ।

---

१. -न्तत्वेऽनेन क०, म० । २. आर्यान् शास्तीति आर्यशीः स्यौविधिशासे रूपान्त्यस्येकारः क०, म० टि० । ३ साधवोऽन्नः, क०, म० । ४ पूर्वं क०, म० । ५ इत्येत्वं न भवतीत्यर्थः, क०, म० टि० । ६. अयौत्, क०, म० । ७. तस्मिन् भावः, क०, म० । ८ न्यङ्क्ष्यु—क०, म० । ९ प्रकृतिप्रत्ययसमु—क०, म० । १०. न्यङ्क्ष्यदादिग्रहणं नियमार्थम् । इत्यधिकः । क०, म० ।

देवदत्तनखनिर्भिन्नम् । भस्मनिहुतम् । प्रवाहेमूत्रितम् । साकोटिनम् । सारावणम् । व्याक्रोशि । व्यात्युक्षि । प्रत्ययः प्रकृत्यादेरिति प्राप्ते वचनम् ।

तिङा वाक्यम् ॥१।१।६१॥ इह साक्षात् पारम्पर्येण वा तिङन्तस्य विशेषणं प्रयुज्यमानमप्रयुज्यमानं वा तेन तिङन्तेन प्रयुज्यमानेनाप्रयुज्यमानेन वा सह वाक्य भवति । धर्मो वो रक्षतु । धर्मो नो रक्षतु । साधुर्वो रक्षतु । साधुर्नो रक्षतु । शालीना ते ओदन ददाति[1] । [2]कुरुञ्चग्राम गच्छति । [3]लुनीहि सक्तूंश्च पिब । देवदत्तेन वो दातव्यम् । देवदत्तेन नो दातव्यम् । साकाङ्क्षत्वेऽपि तिङन्तभेदे वाक्यभेदार्थ वचनम् । ओदन पच, तव भविष्यति[4] । पच तव भविष्यति । मम भविष्यति । ओदन तव भविष्यति । मम भविष्यति । अर्थात्प्रकरणाद्वा—गतावप्रयोग. । वाक्यप्रदेशाः—**'पदाद्वाक्यस्य वस्नसौ युग्विभक्तेः'** [१।२।।६१] **'वाक्यस्य परिवर्जने'**[12] [२।३।।१६] इति ।

सुङ् पदम् ॥१।१।६२॥ सुडिति प्रथमैकवचनादारभ्य आ महिङो ङकारेण प्रत्याहार । सुबन्त पदसंज्ञं भवति । धर्मः । कर्म । पचत. । अपचन् । ब्रूमहे । व' । पदप्रदेशा —**'पदान्तेऽत्येकः'** [१।१।६४] इत्येवमादयः ।

नं क्ये ॥१।१।६३॥ नकारान्तं शब्दरूप क्ये प्रत्यये परे पदसज्ञ भवति । क्य इति [6]क्यच्क्यङ्क्यङ्का विशेषक[7]राननुबन्धानुत्सृज्य सामान्येन ग्रहणम् । राजीयति । राजायते । चर्मायति । चर्मायते । ऊष्मायते । नमिति किम् ? वाच्यति । स्रुच्यति । क्य इति किम् ? सामन्यः । वेमन्य । [8]सुप्तिङित्येवमन्या । प्रत्यये सुङ् पदमिति पदसंज्ञा वेति वचनम् ।

सिद्धत्यधातोः ॥१।१।६४॥ सिति वलादौ च प्रत्यये परे पूर्व पदमंज्ञ भवति ? अधातो —न चेत्स प्रत्ययो धातोर्विहितो भवति । सिति—भवदीय । ऊर्णायु । अहंयु । शुभयु । वलि—पयोभ्याम् । पयस्सु । राजभ्याम् । राजसु । राजता । वाक्त्वम् । राजकाम्यति । द्विपात्काम्यति । सिद्धलोति किम् ? भवन्ती । राजानौ । अधातोरिति किम् ? यज्वा । वच्मि । अन्तस्सुपा सिद्धे पदत्वे सिद्ग्रहण प्रत्यये परे नियमार्थम् । तेनेह न भवति—सौश्रुतम् । भागवतम् ।

न वृत्त्यन्तः ॥१।१।६५॥ परार्थाभिधान वृत्ति, तद्वांश्च शब्दसमुदाय समासादि., तस्यान्तशब्द पदसंज्ञो न भवति । परमगिरौ । परमदिवौ । श्वलिहौ । गोदुहौ । परमवाचौ । [9]बहुसेचौ । बहुदण्डिनौ । वृत्तिग्रहण किम् ? देवदत्तस्य कर्म । अन्तग्रहणं किम् ? राजवाक् । वाक्त्वक्स्रुच. [10]तिस्र इति न त्रयाणा वृत्तौ न पृथक् द्वयोर्वृत्तिरिति न मध्यमस्य निषेध । वाक्त्वचमिति वृत्तेरनन्तत्वेऽपि समासार्थं समासान्त इति त्वचो न पदत्वम् । स्थानिवद्भावात्पदत्वं प्रत्यय प्रकृत्यादेरिति सिद्ग्रहणान्न निवर्तत इत्यारम्भ ।

स्तं मत्वर्थे ॥१।१।६६॥ सकारान्तं तकारान्त च शब्दरूपं मत्वर्थे प्रत्यये परे पदसज्ञं न भवति । वलीति प्राप्ति । यशस्वी । यशस्वान् । विदुष्मान् । पेचुष्मान् । मरुत्वान् । उदश्वित्वान् । विद्युत्वन्तो वलाहका. । स्तमिति किम् ? तक्षवान् । राजवान् । मत्वर्थ इति किम् ? भवद्भ्याम् । यशोभ्याम् । मुख्यसम्भवे दुर्लभत्वादुपचारस्य मतावित्यर्थो दुष्प्राप इति प्रत्ययान्तरार्थमर्थग्रहणं विशेषणस्यापि मतोस्तदर्थवृत्ते प्रतिपत्ते. परिग्रह ।

मनुर्नभोऽङ्गिरो वति ॥१।१।६७॥ मनुम् नभम् अङ्गिरम् इत्येतानि शब्दरूपाणि वतिप्रत्यये परे पदसंज्ञानि न भवन्ति । मनुरिव मनुष्वन् । नभस्वत् । अङ्गिरस्वन् । पदत्वाभावाद् रिर्न भवति ।

विरामेऽगिदनाङ् चाद्यण्वानुनासिकः ॥१।१।६८॥ विरतिर्विराम , [11]न भवन्ननन्त पदमनुपसर्गस्य पदस्यान्ते भवति । गानुबन्धको गित्, चादिरसत्त्ववाची—आङ्वर्जित —अनाङ् चादिः, मुखनासिकावचनोऽनुनासिक., विरामे वर्तमानस्याणोगिदनाङ्चादिवर्जितस्य तदासन्नोऽनुनासिकशब्दश्चादेशो भवति वा । सामँ ।

---

१ -सि शालीनां मे ओदनं ददाति । कुरु—क०, म० टि० । २ कुरु ३ क०, म० । ३ लुनीहीहि ३ क०, म० । ४ -ष्यति मम भविष्यति । प—क० म० । ५ -जेनेनेति क०, म० । ६ क्यङ्क्यष्क्यचां क०, म० । ७ कारान—क०, म० । ८ सुप्तिङित्येवमन्याप्रत्यये क०, म० । ९ दधिसेचौ क०, म० । १० तिस्रः क०, म० प्रत्योर्नास्ति । ११ स क०, म० ।

साम । खट्वा । खट्वा । दधि । दधि । मधु । मधु । विराम इति किम् ? दधि करोति । मधु करोति । अगिदनाङ्यादिरिति किम् ? मुनी । साधू । अमू । अमी । किमु । अनाङ्ग्रहणं किम् ? पाटलिपुत्रादौ । औ इति विष्णो. सम्बोधनम् । प्लक्षश्च न्यग्नोधश्चेत्यवयवस्य चस्य न चादि । अणिति किम् ? कर्तृ । हर्तृ ।

चर्जशः ॥१।१।६६॥ विरामे वर्तमानस्य जश स्थाने तदासन्नश्चरादेशो भवति वा । त्रिष्टुप् । त्रिष्टुभ् । वाक् । वाग् । षट् । षड् । तत् । तद् । जश इति किम् ? कर्तृत्वम् । विद्वान् । विराम इति किम् ? वागत्र ।

न ॥१।१।७०॥ इत ऊर्ध्वं यद् वक्ष्यते तद्विरामे वर्तमानस्य न भवतीत्यधिकृत वेदितव्यम् आपादपरिसमाप्तेः । ते आहु. । भवान् लुनाति । अग्निः अत्र । एङाजादीनामजाद्युपश्लेषविज्ञानाद्विरामेऽप्याद्यभावसिद्धौ वचन मन्दानुग्रहार्थम् । **'तदः पादपूरणे'** [१।१।७१।] इति च प्राप्नोति ।

एचोऽच्ययवायाव् ॥१।१।७१॥एच स्थानेऽचि परे अय् अव् आय् आव् इत्येते क्रमेणादेशा भवन्ति । नयनम् । लवनम् । रायौ । नावौ । एच इति किम् ? त्वमत्र । किमत्र । अचीति किम् ? गोकुलम् । नौकुलम् । अचीति स्थान्युपश्लेषो विज्ञायते । नादेशो न सत्सप्तमीति व्यवहितस्य न भवति ।

यञेवादिकः ॥१।१।७२॥ एच स्थाने अवर्णात् परो य इगादिष्ट[2]स्याचि परे यञेवादेशो भवति नान्य. । आगमा ३ अग्निभूता३यत्रागच्छ । आगमा ३ अग्निभूता३यिहागच्छ । अगमाम्बा पटाम्बावत्रागच्छ । अगमाम्बा पटाम्बावुदकमानय । एवकारो दीर्घबाधनार्थ, अन्यथा हि **'पूर्वेऽपवादा अनन्तरस्विधौ बाधन्ते नोत्तरान्'** इति ह्रस्वस्यैव बाधः स्यात् । आदिति किम् ? अतिरि अत्र । अति नु अत्र, अतिरीहते । अतिनूहते । इक इति किम् ? म्लानम् । म्लानम् । एच इति किम् ? [3]गच्छतु देवदत्ताम्बा इ आगच्छतु । इ इति अस्यापत्य स्त्री ई, तस्य [4]ह्रस्वे इ इति । अचीति किम् ? अगमाम्बा अग्निभूताम्बा इ गच्छ ।

अस्वे ॥१।१।७३॥ इक स्थानेऽस्वेऽचि परे तदामन्नो यञादेशो भवति । दीर्घापवाद. । दध्यत्र । मध्वत्र । पित्र्थ । लाकृति । [5]दध्यूतकाय दीयताम् । साध्वृतश्च इत्याह । इक इति किम् ? पचति । पठति । अचीति किम् ? दधि करोति । मधु करोति । अस्व इति किम् ? दधीदम् । मधूष्ट्र. । इको यञ्भिर्व्यवधानमित्येके । दधियत्र । मधुवत्र । रीगि ति रियङ् भूवादय तेषामिक इति पञ्चमी द्रष्टव्या, तेनेक. परो यञ् भवति ।

ह्रस्वो वाऽपदे ॥१।१।७४॥ इक स्थानेऽस्वेऽचि[6] परे ह्रस्वादेशो वा भवति, न चेत्ताविगचावेकत्र पदे भवत. । नदि एषा । नद्येषा । दधि अत्र । दध्यत्र । मधु अत्र । मध्वत्र । अति एति । अत्येति । ह्रस्वस्यापि ह्रस्व, पर्जन्यवल्लक्षणप्रवृत्ते, ह्रस्वविधानमामर्थ्याच्चान्यत्कार्यं न भवति । अपद इति किम् ? नद्यौ । वध्वौ । नद्युदकम् । वध्वाननम् । अनुव्यचलदित्यत्र स्वरादेराकृतिगणत्वेनाव्ययत्वादैकपद्यम्, अत [7]एवात्रानुप्राविशदित्यत्र च **'पदात्प्रथमाद्या वा'** । [१।२।२०२] इत्यपि भवति । इक इति किम् ? मुनयाचर । साधवाचर । अचीति किम् ? नदी वहति । कुमारी रमते । अस्व इति किम् ? कुमारीयम् ।

ऋत्यकः ॥१।१।७५॥ अक स्थाने ऋति ऋकारे[8] चापि परे ह्रस्वो वा भवति । खट्व ऋश्य । खट्वर्श्य· । मह ऋषिः । महर्षिः । धूलि ऋतु । धूल्यृतु । वधु ऋणं । वध्वृणम् । कर्तृ ऋश्य । कर्तृश्य । लृति—कन्य लृकार. । कन्यल्कारः । कन्यलृतकाय । कन्यल्तकाय । कन्य लृतक इत्याह । कन्यल्तक इत्याह । ऋवर्णलृवर्णयोरेकत्वप्रतिज्ञानादृतीति लृकारोऽपि गृह्यते । ऋतीति किम् ? दण्डाग्रम् । तकार. किम् ? कन्या ऋकार· । अक इति किम् ? वृक्षावृश्य· । अनिगर्थं पदार्थं स्वार्थ[9] वचनम् ।

ऋश्योस्साचः ॥१।१।७६॥ उः ऋवर्णस्य लृवर्णस्याक. स्थाने ऋति चाचि परे परेणाचा सहितस्य ऋर् इत्यच्समुदायो व्यञ्जनसमुदायो वर्णान्तरं वा ईषत्स्पृष्टकरणं द्विरेफतुरीयं वाऽध्यर्धाङ्मात्रं संवृततरं

---

१ -धस्य लृ इत्यवयवस्य न चादिः—क०, म० । २. तस्य स्थानेऽचि क०, म० । ३ गच्छ क०, म० । ४ ह्रस्वः । अची—क०, म० । ५ दध्यूतका—क०, म० । ६ -नेऽचि प—क०, म० । ७. वात्रानु—क०, म० । ८ -रे लृकारे—क०, म० । ९ -र्थं च व—क०, म० ।

वा [1]सकलरेफाकारमर्धमात्राऽभक्तिक द्विरेफश्रुतिक वाऽऽर्ध्यर्धाज्मात्रादेशो भवति वा। पितृ ऋषभः। पितृषभ.। लृति—पित्लृकार'। पितृलृकार। लृवर्णस्य ऋृति पित्लृतक इत्याह। ऋवर्णलृवर्णयोरेकत्वं[3]विज्ञानात्—लृत्यादेशे ऋफिडादिदर्शनाल्लत्वम्। दीर्घस्वेऽप्यस्योत्तरेणोभयदीर्घलाभ। इहोत्वं[4] चकार इत्ययमपि गुरुरेवेति प्लुत। उरिति किम्? दध्यृच्छति। मध्वृनकाय। ऋतीति किम्? पित्रर्थ। लाकृति.। चकारो वेत्यस्यानुकरणार्थ। साच इत्यधिकार **'पदान्तेऽप्येङ्'** [१।१।६४] इति यावत्।

दीर्घः ॥१।१।७७॥ अक स्थानेऽचि परे परेणाचा सहितस्य तदामन्नो नित्य दीर्घादेशो भवति। दण्डाग्रम्। सागता। दधीदम्। नदीहते। मधूदकम्। वधूदरम्। पितृभ्य। पितृकार। पितृतकम्। तकारानपेक्षया [5]अत इत्यधिकारे दीर्घ इत्यावृत्त्याऽनुकरणादन्यत्र लृवर्णस्य [6]दीर्घो नास्तीति लृवर्णे ऋकार एव दीर्घ। प्रेजु., प्रोपु, इत्यत्रान्तरङ्गत्वादेङो दीर्घ। एङप्ययदोर्हे [7]लादेर्लुप्येङ्। अक इति किम्? वागत्र। अचीति किम्? दधिशीतम्।

शस्यक् ॥१।१।७८॥ अक शसि द्वितीया बहुवचनेऽचि परे परेणाचा सहितस्य यथासंख्यमग्दीर्घ आदेशो भवति। शाला पश्य। माला पश्य। बुद्धी। धेनू। नदी। वधू। मातृ'। दुहितृ। शसीति किम्? नद्य। वध्व। धनानि। त्रपूणि पश्य इत्यत्र [8]नपुंत्वाच्छिनमौ भवत।

नन्तः पुंसः ॥१।१।७९॥ अक पुंल्लिङ्गमम्बन्धिनि शस्यचि परे परेणाचा सहितस्य यथासंख्यमग्दीर्घो नकारान्त आदेशो भवति। वृक्षान्। प्लक्षान्। मुनीन्। माधून्। पितॄन्। भ्रातॄन्। चञ्चा। रम्भा। पट्टिका। खरकुटी। उदपान् पुरुषान् पश्येत्यत्र चञ्चादय स्त्रीत्व नोज्झन्तीति न भवति।

ढ्रलुच्यणः ॥१।१।८०॥ ढकारस्य रेफस्य च लुचि पूर्वस्याणो दीर्घो भवति। लीढम्। गूढम्। पुनारात्रौ। [9]मालन्ता रमते। अग्नी रथेन। पटू राजा। अजघा। अपास्या। ढ्रग्रहण किम्? सहितम्। सततम्। लुचीति किम्? दधि ढौकते। मधु रहयते। अण इति किम्? आतृढम्। आवृढम्। द्वाभ्या विशेषणादिह न भवति-[10]एष ददाति। स करोति। लुच स्थानिवद्द्वारकं परत्व ढ्रयोर्लुगस्मिन्निति बहुव्रीहिणा वा लुग्निमित्तमुच्यते।

सहिवहोऽस्यौः ॥१।१।८१॥ [11]सहेर्वहेरवर्णस्य ढ्रलुच्योकार आदेशो भवति। सोढा। सोढुम्। वोढा। वोढुम्। [12]अवोढ। अस्येति किम्? ऊढ। औजिढत्। तन्मध्यपतितस्तद्ग्रहणेन गृह्यते। **'सिवूसहोऽडेऽसोः'** [४।२।२३०] इत्यत ओकारनिश्चय। अस्येत्यधिकार **'तथानिणेध्येङ्'** [१।१।६३] यावत्।

इक्येङर् ॥१।१।८२॥ अस्य साच इति वर्तते। अस्यावर्णस्य स्थाने इकि परे परेणाचा सहितस्य यथासख्यं एड् अर्, इत्येत आदेशा भवन्ति। दीर्घापवाद। देवेन्द्र। मालेयम्। खट्वोढा। गन्धोदकम्। मालोदकम्। मालोढा। महर्षि। परमर्षि। तवल्कार। स्वल्कारेण। तवल्कारेण। तवल्तक। स्वल्तक इत्याह। त्रिमात्राधिकयोरपि स्थानिनोरेङभाव्यत्वाद्दीर्घाधिकाराद्वा द्विमात्र एव भवति। अस्येति किम्? दधीदम्। मधूदकम्। दध्यन्नम्। इकीति किम्। दण्डाग्रम्।

एजूच्यैच् ॥१।१।८३॥ अवर्णस्य स्थान एचि [13]ऊचि च परे परेणाचा सहितस्य क्रमेणासन्न ऐजादेशो भवति। तवैषा। खट्वैषा। तवैन्द्री। तवौदन। खट्वौदन। तवौपगव.। खट्वौपगव'। ऊचि—धौत। धौतवान्। लौ। पौ। ऊच्येङोऽपवाद।

प्रस्योढोढ्यूहैषैष्ये ॥१।१।८४॥ प्रशब्दस्य यदवर्ण तस्य स्थान ऊढ-ऊढि-ऊह-एष-एष्य इत्येतेषु परेणाचा सहितस्यासन्न ऐजादेशो भवति। एङोऽपवादः। प्रौढ। प्रौढि। प्रौह.। प्रैष। प्रेष्य। प्रस्येति किम्?

---

१ फार्कारमर्धमात्रा—क०,म०। २ -र्धोऽर्धमात्रमादेशो—क०,म०। ३ प्रतिज्ञानात्—क०,म०। ४ इहोत्वं चकार क०, म०। ५. उत क०, म०। ६. दीर्घा न सन्तीति, क०, म०। ७ -यवोर्हे—क०, म०। ८. पदत्वाच्छि—क०,म०। ९ मा अन्ता रमते, क०, म०। १० एष करोति। स ददाति, क०,म०। ११ सहिवहोर—क०, म०। १२ अवोढुम्, क०, म०। १३ ऊजादेशो क०, म०।

अपोढ[1]। ऊढादिष्विति किम् ? प्रेतः। प्रोत। एष्य प्रेष्य इति, ईषतेर्ण्यणि ईष्य इति रूपम्, तस्याड्पूर्वस्यापि आ ईष्य-एष्य प्रेष्य इत्येव भवति, **'ओमाङि परः'** [१।१।८६] इति। **येन नाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवतीति**। तथा—निणिघ्येड्येडीति बाध्यते नोमाङि पर।

स्वैरस्वैर्यक्षौहिण्याम् ॥१।१।८५॥ स्वैर स्वैरिन् अक्षौहिणी इत्येतेष्ववर्णस्य परेणाचा सहितस्य ऐजादेशो भवति। स्वस्य ईर. स्वैर। घञ्—स्व ईरोऽत्रेति स्वैरमास्यताम्। स्वयमीरतीति स्वैर अच्। स्वयमीरितुं शीलमस्येति स्वैरी। अक्षाणामूहोऽस्यामस्तीति अक्षौहिणी सेना।

ओमाङि परः ॥१।१।८६॥ अवर्णस्य स्थाने ओशब्दे आडादेशे च परे परेणाचा सहितस्य परोऽजादेशो भवति। [2]ऐज् दीर्घापवाद। तवोकार। कोमित्यवोचत्। आङि—आ-ऋश्यात् अर्श्यात्। अद्य-ऋश्यात् अद्यर्श्यात्। खट्वा-अर्श्यात् खट्वर्श्यात्। आ-इहि एहि। उप-एहि उपेहि। परा-एहि परेहि। आ-ऊढा ओढा। अद्य-ओढा अद्योढा। खट्वा-ओढा खट्वोढा। [3]शकन्धु, कर्कन्धु, कुलटा, सीमन्त इति शकन्ध्वादय पृषोदरादिषु द्रष्टव्या।

एवेऽनियोगे ॥१।१।८७॥ अवर्णस्य स्थाने एवशब्दे परे परेणाचा सहितस्य परोऽजादेशो भवति। ऐचोऽपवाद। अनियोगे—न चेत्स शब्दो नियोगे विषयेऽवधारणे वर्तते। नियोग —इदमेव कर्तव्यमिति। इहैव दृश्यते। अद्येव निष्ठति। [4]तत्त्वान्वाख्यानमेनत्। अनियोगे इति किम् ? इहैव भव माऽद्य गाः। अत्रैव त्वं तिष्ठेति। नियुज्यते इति नियोगोऽयम्। नियोगोऽवधारणम्। तदभावेऽयं विधि। क्वेव भोक्ष्यसे। अनवक्लृप्तावयमेवकार इत्येके।

वौष्ठौतौ समासे ॥१।१।८८॥ अवर्णस्य ओष्ठशब्दे ओतुशब्दे च परे परेणाचा सहितस्य परोऽजादेशो वा भवति, तौ चेन्निमित्तनिमित्तिनावेकत्र समासे भवत। बिम्बोष्ठी। त्रिम्बोष्ठी। वटजोष्ठी। वटजौष्ठी। स्थूलोतु। स्थूलौतु। समास इति किम् ? राजपुत्रौष्ठ पश्य। देवदत्तौतुं [5]विजृम्भितं पश्य।

आर्तृतीयाया ऋते ॥१।१।८९॥ तृतीयान्तसम्बन्धिनोऽवर्णस्य स्थाने ऋतशब्दे परे परेणाचा सहितस्य आरादेशो भवति। अरोऽपवाद। तौ चेन्निमित्तनिमित्तिनावेकत्र समासे भवत। सुखार्त। दु खार्त। **'ऋत्यारुपसर्गस्य'** [१।१।९१] इति पुनरार्वचनाद् ह्रस्वो न बाध्यते। सुखऋत। दु खऋत.। तृतीयाया इति किम् ? परमर्तः[6]। ऋत इति किम् ? [7]सुखेतः। दु खेतः। समास इति किम् ? सुखेनर्त। दु खेनर्तः।

प्रदशार्णवसनकम्बलवत्सतरस्यर्णे ॥१।१।९०॥ प्र दश ऋण वसन कम्बल वत्सतर इत्येतेषामवर्णस्य स्थाने ऋणशब्दे परे परेणाचा सहितस्यारादेशो भवति। अरोऽपवाद.। प्रगतमृणं—प्रार्णम्। दशानामृणं—दशार्णम्। दश ऋणानि यस्याः सा—दशार्णा नदी। दशार्णो जनपदः। [8]ऋणापनयनाय ऋणं—ऋणार्णम्। वसनमेव ऋणं—वसनार्णम्। एवम्, कम्बलार्णम्। वत्सतरार्णम्। ह्रस्वो न बाध्यते इति—प्रऋणमित्यादि भवति।

ऋत्यारुपसर्गस्य ॥१।१।९१॥ उपसर्गस्य यदवर्णं तस्य स्थाने ऋकारादौ धातौ परे परेणाचा सहितस्यारादेशो भवति। सर्वापवादः। उपार्च्छति। प्रार्च्छति। उपार्च्छति। प्रार्च्छति। ऋतीति किम् ? अपेतः। उपेत। उपसर्गस्येति किम् ? इहर्च्छति। इह ऋच्छति। प्रगतः ऋच्छकोऽस्मात् प्रर्च्छको देशः। प्र-[9]ऋषभं वनम् प्रर्षभं वनम्। प्र-ऋश्यं वनम् प्रश्यं वनम्। आरिति वर्तमाने पुनरार्ग्रहणं परमप्यारं ह्रस्वो बाधते इति ज्ञापनार्थम्, तेन पूर्वत्र ह्रस्वो भवत्येव।

सुपि वा ॥१।१।९२॥ उपसर्गस्य यदवर्णं तस्य स्थाने सुपि—सुबन्तावयवे—ऋकारादौ धातौ परे परेणाचा सहितस्यारादेशो वा भवति। पक्षे यथाप्राप्तम्। उपार्षभीयति। उपऋषभीयति। उपर्षभीयति। उपा-

---

१ अपोढः। उपोढः क०, म०। २ ऐजि दी—क० म०। ३ कर्मकण्डुः क० म०। ४. -ख्याख्यान—क० म०। ५ -तौ तु विजृ०। ६. -र्तः। उत्तमर्तः। क० म०। ७. सुखितः। दुःखितः क० म०। ८. -णावयव ऋणम् क० म०। ९ श्रेष्ठार्थस्वरभेदवृषवराहपुच्छकर्णरम्भेषु ऋषभः, क० म० टि०।

ल्कारीयति । उपलृकारीयति । उपल्कारीयति । ऋवर्णलृवर्णयोरेकत्वप्रतिज्ञानात्—[1]लृकारेऽपि भवति । ऋतीति सतकारत्वादिह नित्यमेव भवति । उपक्रृकारीयति—उपर्कारीयति ।

तथाऽनिणेधेयेङ्येङ् ॥१।१।९३॥ उपसर्गस्य यदवर्णं तस्य स्थाने इण् गतौ एधि वृद्धौ इत्येताभ्यामन्यस्मिन्नेङादौ धातौ परे परेणाचा सहितस्य एडादेशो भवति । तथा–सुध्धातौ[2] वा । ऐचोऽपवादः । प्रेलयति । प्रेषयति । उपोखति । प्रोखति । सुध्धातौ—उपेलकीयति । उपैलकीयति । उपोदनीयति । उपौदनीयति । अनिणेधीति किम् ? उपैति । प्रैधते । एडीति किम् ? उपायते । प्लायते । तथाग्रहणं सुध्धातौ विकल्पार्थम् ।

पदान्तेऽत्येङः ॥१।१।९४॥ पदान्ते य एङ् तस्याकारे परे परेणाचा सहितस्य एडादेशो भवति । अयवोरपवादः । तेऽत्र । पटोऽत्र । पदान्त इति किम् ? नयनम् । लवनम् । अतीति किम् ? तयिह । पटविह । तकारः किम् ? तयाहु । पटवाहु । एङ् इति किम् ? दध्यत्र । मध्वत्र । क्षीरपेण[3] द्वादशात्मिक । वृक्षे अपचे इति [4]पूर्वपरयोरचो. स्थानिवत्त्वात् स्थानिवद्भावेनैकाच् बह्वच सुड्डिति व्यपदेशा. प्रवर्तन्ते इति णट्पदसंज्ञा भवन्ति, अत [5]साजादेशस्यान्तादिवद्भावो नोच्यते ।

गोरोद्वा ॥१।१।९५॥ साच इति निवृत्तम् । गोशब्दस्य य पदान्ते एङ् तस्य अकारे परे ओकारादेशो वा भवति । गो अग्रम् । गवाग्रम् । गोऽग्रम् । गोरिति किम् ? द्योऽग्रम् । एङ इति किम् ? चित्रगवग्रम् । हे चित्रगोऽग्रमित्यत्र गोशब्दस्य लाक्षणिकत्वान्न भवति । अतीति किम् ? गवेङ्गितम् । गवाननम् । ओरोद्वचन प्रकृतिभावार्थम् ।

अवोऽय्यनक्षे ॥१।१।९६॥ गोशब्दस्य पदान्ते वर्तमानस्यैङ अचि परे अव इत्ययमादेशो भवति वा [6]न चेत्सोऽक्षशब्दस्य. । गवाग्रम् । गोऽग्रम् । गोअग्रम् । गवेश्वर । गवीश्वर । पदान्ते इति किम् ? गवि । एङ इति किम् ? [7]चित्रगवग्रम् । अनक्ष इति किम् ? गोऽक्षम् । गो अक्षम् ।

इन्द्रे ॥१।१।९७॥ गोशब्दस्य पदान्ते वर्तमानस्यैङ इन्द्रशब्दस्थेऽचि परे अव इत्ययमादेशो नित्यं भवति । गवेन्द्र । गवेन्द्रदत्त । नित्यार्थ वचनम् ।

वातायनेऽक्षे ॥१।१।९८॥ गोशब्दस्य पदान्ते वर्तमानस्यैङ अक्षशब्देऽचि परे वातायने वाच्ये अव इत्ययमादेशो नित्यं भवति । गवाक्ष. । वातायनमित्यर्थ । वातायन इति किम् ? गोऽक्षम् । गोअक्षम् ।

न प्लुतस्यानितौ ॥१।१।९९॥ प्लुतस्यानितावचि परे यत् प्राप्नोति तन्न भवति । देवदत्ता३—अत्रान्वसि । जिनदत्ता ३ इदमानय । सुश्लोका ३ आगच्छ । [8]सुमङ्गला ३ इदमानय । अनितावितिं किम् ? सुश्लोकेति । सुमङ्गलेति । अग्नी इति, वायू इति [9]उत्तरेण प्रतिषेध । अचीति किम् ? देवदत्तामा । ई चाक्रवर्मणस्य [अष्टा० ६।१।१३०] इत्यप्लुतवद्भावः पतञ्जलेरनुपस्थितार्थ [10] [महा० ६।१।१३०] । तत्र चिनुहि इदम् । चिनुहीदम् । इति सर्व एव प्लुत. साहसमनिच्छता विभाषया वक्तव्य [महा० ८।२।९२] इति [11] विकल्पेनैव सिद्धम् ।

गितः ॥१।१।१००॥ गानुबन्धस्याचि परे तन्निमित्त यत् प्राप्नोति तन्न भवति । मुनी एतौ । साधू एतौ । त्रपुणी अत्र । काण्डे अत्र । शाले एते । माले इमे । अमू अत्र । अमी अत्र । पचेते अत्र । पचेथे अत्र । पचावहे आवाम् । गित्करणात् गित्कार्यं न गुण्यसत्त्वं भाव्योऽगित्येतावत्यर्थेऽनुबन्धान्तरमामज्येत । अचीति किम् ? तव ई तवै । प्रत्यासत्तेस्तन्निमित्तकार्यप्रतिषेधादिह न भवति तव ई आसाते तवै आसाते । पदान्त इत्येव, अमुया, अमुयोः । युष्मे इति । अस्मे इति । त्वे इति । मे इति । शेर्गित्त्व चादित्वं वाऽभ्युपगन्तव्यम् । योगविभागादिहानितावितिं नास्ति ।

---

१ अकारेऽपि क० म० । २. -ध्धातौ तु वा क० म० । ३. द्वादशाग्निकः, क० म० । ४. पूर्वपरयोः, क० म० । ५. साजा—क० म० । ६ -त्सोऽक्ष- क० म० । ७ चित्रगवर्थः, क० म० । ८. सुमङ्गलाम्बा ३ इदमानय, क० म० । ९. इत्युत्तरेण क० म० । १० -तार्थः स्थितः, क० म० । ११ प्लुतविकल्पेनैव क० म० ।

चादेरचोऽनाङः ॥१।१।१०१॥ चादिरसत्त्ववाची । आङ्वर्जितो योऽच् तस्याचि परे तन्निमित्तं यत् प्राप्नोति तन्न भवति । अ अपेहि । इ इन्द्रं न पश्य । उ उत्तिष्ठ । आ एवं नु मन्यसे । आ एवं किल तत् । चादेरिति किम् ? चकारात्र । [1]हे आगच्छ आगच्छ । अच इति किम् ? त्व चाहं च । अच इति चादेरित्यस्य विशेष्यं न विशेषणमित्यज्मात्रस्य ग्रहण नाजन्तस्य । अनाङ् इति किम् ? ईषदुष्णम् ओष्णम् । आ इहि एहि । आ उदकान्तात् ओदकान्तात् प्रियं पान्थमनुव्रजेत् । आ आर्येभ्य आर्येभ्योऽस्य यशो गत शाकटायनस्य ।

ईषदर्थे क्रियायोगे मर्यादाऽभिविधौ च यः ।
एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥

[2]आङिति किम् ? जानु-उ । [3]उआ जानू । अचि परे प्रत्यासत्तेस्तन्निमित्तकप्रतिषेधादिह न भवति । जानू अस्य रुजति ।

ओतः ॥१।१।१०२॥ चादेरोकारान्तस्य शब्दरूपस्याचि परे यत् प्राप्नोति तन्न भवति । अहो इदम् । उताहो एवम् । अथो अस्मै । [4]अहो आगच्छ । नो इन्द्रियम् । चादेरिति किम् ? गवीश्वर । अगौर्गौ समपद्यत इति गोऽभवत् । भिक्षोऽत्र । भिक्षो इति चात्पूर्व । तिरोऽभवन्नमोऽकरोदित्यादौ लाक्षणिकत्वाच्च न भवति । अहो इत्यादयोऽखण्डा निपाता इति पृथग्योग ।

सौ वेतौ ॥१।१।१०३॥ मुनिमित्तको [5]य ओकारस्तस्य इतिशब्दे परे यत् प्राप्नोति तन्न भवति वा । पटो इति, पटविति । साधो इति, साधविति । साविति किम् ? गवित्याह । अहो इति । इताविति किम् ? पटोऽत्र । साधोऽत्र ।

ऊं चोञः ॥१।१।१०४॥ उञित्येतस्य इतिशब्दे परे, ऊमित्ययं दीर्घोऽनुनासिक आदेशो भवति वा, चशब्दाद्यदन्यत्प्राप्नोति तच्च भवति वा । एव त्रैरूप्यं भवति । ऊ इति । उँ [6]इति । विति । इताविति किम् ? किं उ उत्तिष्ठ । इह उ ऊम् इत्युकारप्रश्लेष , तेनोञो विशेषणादिह न भवति । अह उ–अहो इति । उ ऊ इति चाद्यन्तरत्वेऽगिति परोऽपि प्रयुज्यते इत्यादेशवचनम् । अकार पूर्वाचार्यानुबन्ध ।

मयोऽचि वोऽसन् ॥१।१।१०५॥ मय इति प्रत्याहार । मय उत्तरस्य उञः स्थानेऽचि परे वकारादेशो भवति वा, स चासन्—न भूतवत् । 'कुँङ्क्वास्ते, कुङ्कु आस्ते । किम्वावपनम्, किमु आवपनम् । किम्वुष्णम्, किमु उष्णम् । तद्वस्य मतम्,—तदु अस्य मतम् । जान्वस्य रुजति, जानु अस्य रुजति । किम्विति, किमूं इति । किमु इति, कि विति । मय इति किम् ? स्वर् उ उपैति । अन्तर् उ उपैति । अचीति किम् ? इतावेव स्यात् । असत्त्वात् द्वित्वमनुस्वारानुनासिकभावश्च ।

हलोऽनुनासिकेऽनुनासिकः स्वः ॥१।१।१०६॥ पदान्ते वर्तमानस्य हलः स्थानेऽनुनासिके परे स्थानिनः स्वोऽनुनासिक आदेशो भवति वा । [7]मुखनासिकावचनोऽनुनासिक । वाङ्मधुरा, वाग्मधुरा । षण्णयाः, षड्नया सड्ग्रहादय । तन्नयनम्, तद् नयनम् । ककुम्मण्डलम्, ककुब् मण्डलम् । हलूँ मात्रम्, हल् मात्रम् । साविति—त्वङ्[8] इति,त्वग्[9] इति । विश्वलिण्[10] इति, विश्वलिड् इति । तनूं इति,तदू इति । असन्नित्येव वर्तते, तेन [11]त्वङ् ल इत्यादौ **'ह्रस्वान्क्रमः पदान्ते'** [१।१।१२३] इति द्वित्वं न भवति । ऊङ्र्ङायति त्वद् जयतीत्यादौ [12]व्यवस्थितविभाषाविज्ञानाज्जात्याश्रयणाद्वा न दोष. । हल इति किम् ? दधि मधुरम् । अनुनासिक इति किम् ? गुरुवाक्यप्रमाणम् । स्व इति किम् ? स्वर्णयति । अन्तर्मधुरम् । पदान्त इति किम् ? यज्ञ , यत्ल. ।

---

१. हे आ आग-क० म० । २ अचीति किम्, क० म० । ३. उआ जानू क० म० । ४ अङ्हे-क०, म० । ५ -ण्डनिपा-क०, म० । ६ -मिश्रो क०, म० । ७ ऊ इति क०, म० । ८ कुङ्वास्ते, कुङ्कु आस्ते । ९ मुखसहितनासिका-क०, म० । १० त्वङ् इति क०, म० । ११ त्वगूँ इति-क०, म० । १२ श्वलिणूँ, इति । श्वलिङ्,इति क०,म०। १३.त्वङ्ँ, इत्यादौ क०,म०। १४ -स्थिते विभा-क०,म० ।

प्रत्यये ॥१।१।१०७॥ पदान्ते वर्तमानस्य हलः स्थानेऽनुनासिकादौ प्रत्यये परे स्थानिनः स्वोऽनुनासिक आदेशो नित्यं भवति। वाङ्मयम्। गुडलिण्मात्रम्। षण्णाम्। पदान्त इति किम्? यज्ञ॰। यत्नः। नित्यार्थं वचनम्।

रोस्योः ॥१।१।१०८॥ पदान्ते वर्तमाने रेफे सकारे च ईकारानुबन्धे परे यः पूर्वस्तस्य स्थाने स्वोऽनुनासिक आदेशो भवति। न्ँयाहि। काँस्कान्। भवाँच्छादयति[1]। पुस्कोकिल.। सस्कर्ता। ईदिदुपादानादिह न भवति। पटुरत्र। पटुस्तरति।

म्नां जय्यपदान्ते ॥१।१।१०९॥ मकारनकाराणामपदान्ते वर्तमानाना जयि परे[2] निमित्तस्य स्वोऽनुनासिक आदेशो भवति। मस्य—गन्ता। गन्तुम्। नस्य—शङ्किता। शङ्कितुम्। म्नामिति किम्? चञ्चूर्यति। पम्पूर्यति। व्यङ्क्ता। व्यङ्क्तामिति अकारस्यानुनासिकस्यासदधिकारादसत्त्वाद् भवति। बहुवचन व्यक्तिभेदेन नकारस्य विध्यन्तरबाधनार्थम्। विलम्भ.। संरम्भ.। लषन्ति इति उचितम्। चरन्ति। असत्त्वादनुनासिकाच्चास्य न भवति। जयीति किम्? गम्यते। हन्यते। अपदान्त इति किम्? भवान्परमः। स्वोऽनुनासिक इति उभय निमित्तस्वानुनासिकार्थम्।

शल्यनुस्वारः ॥१।१।११०॥ मकारनकाराणामपदान्ते वर्तमानाना स्थाने शलि परेऽनुस्वार आदेशो भवति। मस्य—पुंसि। गंस्यते। नस्य—दंशः। सुदीशि कुलानि। धनूंषि। यशांसि। गुडलीहि कुलानि। बहुवचनमेषा विध्यन्तरबाधनार्थम्। बृंहणम्। सर्पींषि। शिण्ढि। पिण्ढि। इत्यत्रासत्त्वेन जश्त्वे[3] शलाभावादनुस्वाराभाव। **'नर्माजादेरेव'** [४।१।२५०] इत्येवकारान्नत्वेनासत्त्वम्। अपदान्त इति किम्? भवाञ्छान्तः। भवान्हेतु.। शलीति किम्? गम्यते। हन्यते।

मम्नो हलि तौ ॥१।१।१११॥ पदान्त इति वर्तते, मम्ग्रहणान्ममागमस्य पदान्ते वर्तमानस्य च मकारस्य स्थाने हलि परे तौ निमित्तस्वोऽनुनासिकोऽनुस्वारश्च पर्यायेण भवत। चङ्क्रम्यते, चक्रम्यते। दन्द्रम्यते, दंद्रम्यते'। [4]यय्यम्यते, यंयम्यते। [5]वहंल्लिहो गौ, वहलिहो गौः। [6]अभ्रंल्लिहो वायुः, अभ्रंलिहो वायु॰। मस्य—त्वङ्करोषि, त्वं करोषि। त्वन्तरसि, त्वं तरसि। संय्यन्ता, सयन्ता। **'छय्यम्यप्रशान्'** [7] [१।१।१५०] इति लाक्षणिकत्वान्न भवति। स्व इति किम्? ररम्यते। शशम्यते। त्वं रमसि। त्वं शान्त। त्व साधु। पदान्त इति किम्? रम्यते, गम्यते। मम्ग्रहणमपदान्तार्थम्। तौग्रहणमुभयार्थम्। अन्यथा ह्यनन्तरोऽनुस्वार एव स्यात्।

हि ल्व्यम्नि ॥१।१।११२॥ पदान्ते वर्तमानस्य मकारस्य स्थाने ल व य म न इत्येतद्वर्णपरे हकारे परे लवयमनाना स्वोऽनुनासिकोऽनुस्वारश्च पर्यायेण भवत। किल्ँ [8]ह्लादयते, किं ह्लादयते। किव्ँ ह्वयते, किं ह्वयते। किय्ँ ह्य., किं ह्य.। किम् ह्मलयसि, किं ह्मालयसि। किं न् ह्नुषे, किं ह्नुषे। ल्व्यम्नोति किम्? किं हकार।

सम्राट् ॥१।१।११३॥ समित्यस्य राजतौ क्विबन्ते, उत्तरपदे परेऽनुस्वाराभावो निपात्यते। सम्राट्। सम्राड्। पञ्चमः शान्तिः (नाथ.)। साम्राज्यम् सार्वभौमन्ते।

खय् खयश्शरि वा ॥१।१।११४॥ पदान्त इति निवृत्तम्, खयः स्थाने शरि परे खयादेशो भवति वा। तच्छेते, तच्शेते। [9]षट्षण्ढे, षट्षण्ढे। वध्स. वत्स.। ख्षीरं, क्षीरम्। अप्सराः, अप्सरा। खय इति किम्? भवान् साधु.। शरीति किम्? वाक् चरति। खय इत्येतावान् प्रत्याहार उत्तरार्थः।

शरोऽनु द्वे ॥१।१।११५॥ शरः परस्य खयः स्थाने अनु यदन्यत्प्राप्नोति तस्मिन्कृते पश्चात् द्वे रूपे भवतो वा। त्वंक्खनसि, त्वं खनसि। कश्च्छादयति, कश्छादयति। कश्च्चरति, कश्चरति। कण्ट्टकारः, कण्ठ-

---

१ भवाँन् छादयति-क०, म०। २. -त्स्वो, क०, म०। ३. शलभावात् क०, म०। ४ यँय्यम्यते क०, म०। ५ -हँल्लिहो क०,म०। ६. -भ्रँल्लिहो क०,म०। ७. -न इति क०, म०। ८. ह्लादते क०,म०। ९. षड्षण्ढे क०, म०।

कारः । स्थाली, स्थाली । स्फीता, स्फीता । शर इति किम् ? भवान् करोति । खय इति किम् ? आस्यम् । असन्निति [1]निवृत्त्यर्थमन्वित्युच्यते, अतो द्वित्वे कृते प्राप्नुवच्चर्त्वादि भवति । पुनः खय. परस्य शर. स्थाने द्वे रूपे भवतो वा । तत् श्शेते, तत्शेते । षट्ष्षण्डे, षट्षण्डे । वत्स्स., वत्स. । क्ष्षीरम्, क्षीरम् । अप्स्सरा अप्सराः । खय इति किम् ? भवान् साधु. । शर इति किम् ? मथ्नाति ।

यञो मयः ॥१।१।११६॥ यञ परस्य मय स्थाने द्वे रूपे भवतो वा । वृक्षव्वकरोति । वृक्षव् करोति । उल्ल्का, उल्का । वल्म्मीकम्, वल्मीकम् । यञ इति किम् ? भवान् मधुरः । मय इति किम् ? सेव्यम् । अन्वित्येव, [2]प्रोर्ण्णुनाव । ऊर्ज्जिजयिषति । पुन मय. परस्य यञः स्थाने द्वे रूपे भवतो वा । दध्य्यत्र, दध्यत्र । त्रप्व्वत्र, त्रप्वत्र । मय इति किम् ? बाल्यम् । यञ इति किम् ? वाग्जयति ।

अचो ह्रोऽह्रचः ॥१।१।११७॥ अच उत्तरो यो हकारो रेफश्च ताभ्या परस्याह्रच —हकाराद्रेफा दचश्चान्यस्य वर्णस्य स्थाने द्वे रूपे भवतो वा । ब्रह्म्मा, ब्रह्मा । बाह्य्यम्, बाह्यम् । आर्य्य, आर्य । सर्व्व, सर्व । मूर्ख्ख, मूर्ख । दीर्घ्घ, दीर्घ । [3]ऊर्क्क्, ऊर्क् । [4]ऊर्ग्ग्, ऊर्ग् । अच इति किम् ? ह्लुते, ह्लयते । अभ्यते । ह्र इति किम् ? आस्यम्, वास्यम् । अह्रच इति किम् ? [5]बर्हि । दह्र । अह्र वीर ।

अदीर्घात् ॥१।१।११८॥ अदीर्घादच. परस्याह्रच स्थाने द्वे रूपे भवतो वा । दध्य्यत्र, दध्यत्र । पठ्य्यदनम्, पठ्यदनम् । [6]सय्य्यन्ता । सय्यन्ता । उर><क, उर><क, [7]उर क, [8]पर><पर, पर><पर, पर पर । त्वक्क्, त्वक्क । त्वग्ग्, त्वग् । षट्ट्, षट् । षड्ड्, षड् । तत्त्, तत् । तद्द्, तद् । गो३त्त्रात, गो३त्रात । नौ३त्त्रात, नौ३त्रात । अन्वित्यधिकारात्कुत्वादौ कृते द्वित्वम् । अह्रच इति किम् ? सह्यम् । वह्यम् । [9]आर्य । वर्य । [10]तिन्वु । अदीर्घ इत्युक्तेरिह न भवति—सुपात्र भवान् । वाक् । अदीर्घादिक हलीत्यनुक्त्वा न सयोगे । अचीति योगद्वयारम्भाद्विरामेऽप्ययमादेश । अतएव च यत्नात् **'पदस्य'**[१।२।४२] इति लोपो न भवति ।

न संयोगे ॥१।१।११९॥ हलोऽनन्तरा सयोग. । सयोगे परेऽह्रच स्थाने द्वे रूपे न भवत । इन्द्रः । चन्द्र. । कृत्स्नम् । मृत्स्ना ।

पुत्रस्यादिपुत्रादिन्याक्रोशे ॥१।१।१२०॥ पुत्रशब्दस्यादिन्शब्दे परे पुत्रादिन्शब्दे च परे आक्रोशे विषये द्वे रूपे न भवत । पुत्रादिनी त्वमसि हा पापे । पुत्रपुत्रादिनी भव । आक्रोश इति किम् ? पुत्रादिनी शिशुमारी । पुत्रपुत्रादिनी ।

अचि ॥१।१।१२१॥ अदीर्घात्परस्याह्रच स्थानेऽचि परे द्वे रूपे न भवत । दधि । मधु ।

शरः ॥१।१।१२२॥ शरोऽचि परे द्वे रूपे न भवत । **'अचो ह्रोऽह्रचः'** [१।१।११७] इति प्राप्तिः प्रतिषिध्यते । दर्शनम् । अर्प । कर्प । वर्ष. । [11]तर्प । वर्सः । अचीति किम् ? [12]शश्वर्यते । वर्ष्यते ।

ह्रस्वान्ङमः पदान्ते ॥१।१।१२३॥ ह्रस्वात्परस्य पदान्ते वर्तमानस्य ङम स्थानेऽचि परे द्वे रूपे भवत । कृङ्ङास्ते । सुगण्णिह । कृषन्नास्ते । कृषन्निह । **'असिद्धं बहिरङ्गमन्तरङ्गे'** इति णो न भवति । ह्रस्वादिति किम् ? प्राङास्ते । [13]अजानिह् । ङम इति किम् ? त्वमत्र । किमत्र । पदान्त इति किम् ? सामनि । वेमनि । अचीति किम् ? कृङ् शेते । पठन् रमते ।

दीर्घाच्छो वा ॥१।१।१२४॥ पदान्ते वर्तमानाद्दीर्घात्परस्य छकारस्य द्वे रूपे भवतो वा । कन्याच्छत्रम् ।

---

१. निवृत्तमित्य- क० म० । २ प्रोर्ण्णुनाव क० म० । ३ ऊर्क्क्, ऊर्क्-क० म० । ४ ऊर्ग्ग्, ऊर्ग्—क०म० । ५ बर्हः, क०म० । ६ संय्यन्ता क० म० । ७ उरः कः । उरः कः । क० म० । ८ उरः><पः । उरः><पः । उरः पः । उरः पः । क० म० । ९ अर्यः—क० म० । १० तितउः—क० म० । ११ तर्सः क० म० । तृ प्लवनतरणयोः, वृ भरणे, अनयोः वृतृमावद्यमिहनिकमिकषिभुचिभ्यः सः, इति सप्रत्ययः अकङितिस्वर्—क० म० टि० । १२ कर्ष्यते, क० म० । १३ राजानिह, क० म० ।

कन्याछत्रम् । मुनेच्छाया, मुनेछाया । दीर्घादिति किम् ? श्वेतच्छत्रम् । [1]राजच्छत्रम् । पदान्त इति किम् ? ह्रीच्छति । म्लेच्छति ।

प्लुतात् ॥१।१।१२५॥ पदान्ते वर्तमानाद्दीर्घस्थानिकात्प्लुनात्परस्य छकारस्य स्थाने द्वे रूपे भवतो वा । आगच्छ भो इन्द्र अग्निभूते चा३च्छत्रमानय, आगच्छ भो इन्द्र भूतेचा छत्रमानय । दीर्घादिति किम् ? आगच्छ भो देवदत्त३छत्रमानय ।

अजाङ्माङः ॥१।१।१२६॥ अवः आङो माङश्चाव्ययादुत्तरस्य छकारस्य द्वे रूपे नित्यं भवतः । इच्छति । गच्छति । ह्रीच्छति । म्लेच्छति । देवच्छत्रम् । आच्छिनत्ति । आच्छायाया । आच्छाया । माच्छिदत् । माच्छासीत् । डकारः किम् ? आच्छायायाम्, आछायायाम् । वावये स्मरणे वाऽयमाकारः । उपमाच्छत्रम्, उपमाछत्रम् । माच्छिन्दि, माछिन्दि । पुत्रो माच्छिनत्ति । पुत्रो मा छिनत्ति । आङ्साहचर्येणाव्ययस्य माङो ग्रहणादिह न भवति, प्रमिमीते इति प्रमा, अप्रत्यय । प्रमाच्छात्र, प्रमाछात्रः । आङ्माङ्ग्रहण विकल्पबाधनार्थम् । अन्वित्येव । प्रश्न । [2]पृष्टा । शषाभ्यामन्तरङ्गमपि द्वित्व न भवति । विच्छित्तेत्येड् न छकारस्येति भवति ।

डाज्भाजोऽतो लुगितौ ॥१।१।१२७॥ डाज्भाजोऽनेकाचोऽव्यक्तानुकरणस्य योऽच्छब्दस्तस्य इति शब्दे[3]परे लुक् । लुञ्चन [लुक्] लोपो भवति । छमत् इति छमिति । पटत् इति पटिति । घटत् इति घटिति । पतत् इति पतिति । अत् इति वचनान्सर्वलुक् । **'असिद्ध बहिरङ्गमन्तरङ्गे'** इति लुचि जशादशो न भवति । डाज्भाज इति किम् ? छत् इति छदिति । श्रत् इति श्रदिति । जगत् इति जगदिति । एकाचो व्यक्तवर्णस्य यदनुकरण तस्य च न भवति । अत् इति किम् ? मरुत् इति मरुदिति । मरत् इति मरदिति । इतावितिं किम् ? पटत् अत्र पटदत्र । घटदिति गम्भीरमम्बुदैर्नदित चकदिति तडिताऽपि कृतमिति दकारान्त द्रष्टव्यम् ।

न द्व्युक्तेः ॥१।१।१२८॥ द्वे उक्ती यस्य तस्य डाज्भाजो योऽच्छब्दस्तस्य इतौ परे लुग्न भवति । पटत्पटदिति । घटत्घटदिति । वीप्साया द्विवचनम् । द्व्युक्तेरिति किम् ? पटिति । पटत्पटिति करोति । इति समुदायानुकरण द्रष्टव्यम् ।

तः ॥१।१।१२९॥ द्व्युक्तेर्डाज्भाजोऽतो यस्तकारस्तस्य इतौ परे लुग् भवति । पटत्पटेति करोति । घटत्घटेति करोति । विधिनिषेधाभ्या द्वैरूप्यम् ।

डाच्यादौ ॥१।१।१३०॥ द्व्युक्तेरादौ पूर्वस्यामुक्तौ, अतो यस्तकारस्तस्य डाचि परतो नित्य लुग्भवति । पटपटाकरोति । दमदमाकरोति । आदाविति किम् ? पतपताकरोति । डाच्यन्त्याजादिलोप सनि पद्रूपस्य न भवति । पत इत्यत्र तु योऽत् तस्य डाचो विप्रकर्षान्न भवति ।

ढो ढि ॥१।१।१३१॥ ढकारस्य रेफस्य च यथासख्य ढकारे रेफे च परे लुग्भवति । लेढा, लेढुम् । गोढा, गोढुम् । लोढम् । गूढम् । आतृढम् । आवृढम् । अग्नी रथेन । पटू राजा । अन्ना रौति । पुना रमते । ढ् इति किम् ? वाग्ढौकते । [4]वाग्राजते । ढ्रीति किम् ? दधि ढौकते । पटुरत्र । पुनर्गच्छति । अन्तरत्र । अन्तर्गच्छति । ढौकते । [5]ढ्रोपदेशे लुचि पूर्वस्याणो दीर्घार्थ स्यात् । गुडलिड्ढौकते इत्यत्राय पुरस्तादपवादत्वात् **'अपि जश्'** [१।१।१३६] इत्यस्यैवानन्तर[6]स्यैव बाधको न **'झलो जश्'** [१।२।७५] इत्यस्येति पदान्ते जशेव भवति । चक्रुड्वे, लुलुड्वे इति द्वित्वे लाक्षणिकत्वात्, उत्तरवाग्रहणाभिसम्बन्धाद्वा न भवति ।

हलो यमि यमो वा ॥१।१।१३२॥ हल परस्य यमो यथासख्य यमि परे लुग्भवति वा । आदित्य[7], आदित्यः । हल इति किम् ? अन्नम् । भिन्नम् । यमीति किम् ? शार्ङ्गम् । सर्वम् । यम इति किम् ? स्वँर्ज्ञ । पुनर्ज्ञः । यथासंख्यविज्ञानादिह न भवति—पिण्यम् । [8]वर्ण्यन्ते । केषाञ्चित् यमामिति [द्र० अष्टा० ८।४।६४]

---

१ वाजच्छत्रम्, क० म० । २ प्रष्टा, क० म० । ३ -ब्दपरे, क० म० । ४ वाग्रजते, क० म० । ५ ढोपदेशो क० म० । ६ -रस्य वा-क० म० । ७. सङ्ग्रः—क० म० । ८ वर्ण्यते, क० म० ।

पाठ. । तेषा वचनभेदाद् यथासख्य नास्तीत्युदाहरणम्[1]—बभ्यते । बभ्यते । बभ्रादीना त्रयाणा जलि रलोप केचिदिच्छन्ति वावप्ति[2] । बाबप्ति । अन्येषाम्—बावभ्रति । बाबभ्रति[3] ।

जरि जरः स्वे वा ॥१।१।१३३॥ हल परस्य जर स्वे जरि परे लुग्भवति वा । भिन्न , भिन्न । भिन्तः, भिन्त[4] । जरीति किम् ? सक्थना । सक्थ्ने । जर इति किम् ? [5]शार्ङ्ग. । शार्ङ्गी । स्व इति किम् ? [6]तप्ता । धप्ता । स्वग्रहणाद्[7]थासख्याभाव, तेन शिण्ढि । पिण्ढि । भिन्नः । भिन्द. । हल इति किम् ? बोद्धा । योद्धा । इह वाग्रहणमुत्तरत्राननुवृत्त्यर्थम् ।

उदस्स्थास्तम्भः ॥१।१।१३४॥ उद परस्य स्था-स्तम्भोर्धातोरवयवस्य[8] जरो जरि परे नित्यं लुग्भवति । उत्थाता । उत्थातुम् । उत्तम्भिता । उत्तम्भितुम् । उत्थाता, उत्तम्भितेति त्रिसयोगः **'अर्दावर्ति'** [१।१।११८] इति द्वित्वेन भवति । उद इति किम् ? संस्थाता । संस्तम्भिता । स्थास्तम्भ इति किम् ? उत्-स्तोता । उत्सन्न । जरि इति किम् ? उत्तिष्ठति । जर इति किम् ? उदस्थात् । उदस्तम्भत् । स्कन्धेरुत्कन्धको रोग इति पृषोदरादिषु द्रष्टव्य ।

चर ॥१।१।१३५॥ जर स्थाने जरि परे चरादेशो भवति । देवच्छत्रम् । गुडलिट्चरति । दृषत्क्रियते[9] । त्रिष्टुप् पठ्यते । नस्यते । लप्स्यते । **'जषि जश्'** [१।१।१३६] इति वचनात् खरि चत्वम् । जरीति किम् ? भज्यते । भिद्यते । जर इति किम् ? भवान् खनति ।

जषि जश् ॥१।१।१३६॥ जर स्थाने जषि परे जशादेशो भवति । चरोऽपवाद । लब्धा । लब्धुम् । आरब्धा । आरब्धुम् । दोग्धा । द्रोग्धा । द्विड्भि । षड्भि. । बोद्धा । योद्धा । विद्युद्भद्रा । जषीति किम् ? वृत्तम् । नृत्तम् । त जयतीत्यादौ अनुस्वारस्यासन्नाभावान्न भवति ।

श्चौ श्नृ स्त्वोः ॥१।१।१३७॥ सकारस्य शकारे चवर्गे चोपश्लिष्टस्य स्थाने शकार आदेशो भवति, तथा तवर्गस्य चवर्ग । आप्तश्शोभते । आगमश्शोभते । तपश्चरति । यशश्छत्रम् । श्च्योतते । वृश्चति । भृज्जति । मज्जति । तवर्गस्य—तच्शेते । भवाञ्शेते । तच्चरति । तच्छादयति । तज्जयति । तज्झषयति । भवाञ्जकारेण । राज्ञा । यज्ञ. । श्चू स्त्वोरिति समवचने यथासख्यमिष्यते । नञ्छवीति [10]विवेचने शैलीयमाचार्यस्य । **'न शात्'** [१।१।१३९] **'टोः पदान्ते'** [१।१।१४०] इति प्रतिषेधात्परे **'तो.षिः'** [१।१।१४१] इति निषेधात्पूर्वे च चुत्वष्टुत्वे पत्वकुत्वे **'असिद्धं बहिरङ्गमन्तरङ्गे'** इत्यसिद्धत्वात् **'प्रत्यये'** [१।१।१०७] इत्यधिकाराच्च न [11]भवति ।

ष्टौ ष्टू ॥१।१।१३८॥ षकारस्य स्थाने षकारे टवर्गे चोपश्लिष्टस्य षकार आदेशो भवति, तथा तवर्गस्य च टवर्ग । कष्षण्डे । कष्षण्डिक । कष्टीकते । [12]कष्टकारेण । तवर्गस्य—पेष्टा । पेष्टुम् । तट्टीकते । तट्टकारेण । तड्डीनम् । तड्डौकते । तण्णकारेण । भवाण्डीनः । भवाण्डौकते । भवाण्णकारेण । अड्डति । अट्टते । ष्टुत्वे जश्त्व-मसिद्ध बहिरङ्गमन्तरङ्ग इति न भवति ।

न शात् ॥१।१।१३९॥ शकारात्परस्य श्चुत्व न भवति । अश्नाति । क्लिश्नाति ।

टोः पदान्तेऽनाम्नगरीनवतेः ॥१।१।१४०॥ पदान्ते वर्तमानाट्टवर्गाद्[13]त्तरस्य ष्टुत्वं न भवति नाम्न-गरीनवतिशब्दान्वर्जयित्वा । मधुलिट्मीदति । गुडलिट्साये । [13]षट्तयम् । षण्णया । टोरिति किम् ? चतुष्टयम् । सर्पिष्टमम् । पदान्त इति किम् ? ईट्टे । अनाम्नगरीनवतेरिति किम्? षण्णाम् । षण्णगरी । षण्णवति । आमादेश-प्रतिषेधादिह न भवति—[14]षण्नाम । मधुलिण्नाम । पदान्त इत्यधिकार आपादपरिसमाप्ते ।

---

१ -रणम् । वभ्यते, वभ्रयते, क० म० । २ वावच्चि, वावच्चि । क० म० । ३ वावभ्सि, वावभ्सि क० म० । ४. -न्तः, भिन्त्ता, भिन्ता, क० म० । ५. शार्ङ्गम् क० म० । ६. तप्तो दग्धो-क० म० । ७. -थासंख्या-क० म० । ८ धात्वो-क० म० । ९. -यते । सकृत्क्रियते । त्रिष्टु-म० । १० वि (नि) वचने क० म० । ११. भवतः क० म० । १२ कष्टकारेण क० म० । १३. षट्तयोः क० म० । १४ षड्नाम । मधु-लिड्नाम-क० म० ।

तोः षि ॥१।१।१४१॥ तवर्गस्य पदान्ते वर्तमानस्य षकारे परे ष्टुत्व न भवति । अग्निचित् षडिक । महान षण्ड । तोरिति किम् ? कष्षण्डे । कष्षडिक । षीति किम् ? तच्चरति । तट्टीकते ।

लि लः ॥१।१।१४२॥ पदान्ते वर्तमानस्य तवर्गस्य स्थाने लकारे परे लकारादेशो भवति । तल्लुनाति । भवाल्लिखति । अनुनासिकोपदेशोऽन्यत्र भाव्येऽननुनासिकार्थ । इह तूभयोपदेशादुभयस्तोरासन्नो व्यवतिष्ठते ।

जशो हो झष् वा ॥१।१।१४३॥ पदान्ते वर्तमानाज्जश परस्य हकारस्य स्थाने यथासंख्य वा झष् भवति । अज्झलौ । अज्हलौ । त्रिष्टुब्भुतम् । त्रिष्टुब्हुतम् । वाग्घरति । वाग्हरति । षड्भलानि । षड्हलानि । तद्धितम् । तद्हितम् । जश इति किम् ? प्राड् हसति । भवान् हरति ।

शश्छोऽमि ॥१।१।१४४॥ पदान्ते वर्तमानाज्जश उत्तरस्य शकारस्यामि परे छकारादेशो भवति वा । तच्छोभते । तच्शोभते । त्रिष्टुब् छ्यते । त्रिष्टुब्श्र्यते । वाक्छर । वाक्शर । षट्छ्यामा । षट् श्यामा । तच्छ्लोक । तच्श्लोक । तच्छ्मशानम् । तच्श्मशानम् । अमीति किम् ? वाक्श्च्योतति । जश इति किम् ? प्राड् शूर । भवाञ्शोभन ।

ङ्णोः गक् डक् शरि ॥१।१।१४५॥ पदान्ते वर्तमानयोर्ङकारणकारयो शरि परे यथासख्यं गक् डक् इत्येतावागमौ भवतो वा । कृङ्क्छेते, कृङ्शेते । प्राङ्क्षण्डे, प्राङ्षण्डे । प्रत्यङ्क्सिनोति, प्रत्यङ्सिनोति । [1]सुगण्ट् शेते, सुगण् शेते । पिनट्षण्डे, पिन् षण्डे । सुगण्ट् साधु । सुगण् साधु । ङ्णो इति किम् ? भवाञ् शेते । महान् षण्डः । शरीति किम् ? प्राङ्करोति । सुगण् चरति । पूर्वान्तिरकरण छत्वपत्वष्टुत्वार्थम् ।

ङ्नस्तट् सोऽञ्चः ॥१।१।१४६॥ पदान्ते वर्तमानाङ्कारान्नकाराच्च परस्य सकारस्य नडागमो भवति वा, अञ्च —ञ्चसयोगस्यावयवश्चेत्सकारो न भवति । मधुलिट्त्सीदति, मधुलिट्सीदति । गुडलिट्त्सदि, गुडलिट्सदि । भवान्त्सीदति, भवान् सीदति । महान्त्संसदि, महान्ससदि । केचित्तु पादानाच्चत्वं नेच्छन्ति । ङ्न इति किम् ? प्राङ्साधु । अक्षराधिक्याद्योगविभागो गरीयान, न इति चोत्तरं षष्ठ्यन्त पञ्चम्यन्तेन चेहार्थ इति न ग्रहणम् । स इति किम् ? मधुलिट्षण्ड । महान् षण्ड । अञ्च इति किम् ? अङ्श्च्योतति । षड्श्च्योतति । [2]भाश्च्योतति । श्च्युते सोपदेशात् शकारस्य [3]सोपदिष्ट कार्य विज्ञायते, तेन श्च्युतेर्मधुगितिसिद्ध परादिकरण [4]ष्टुत्वाप्रतिषेधार्थम् ?

नश्शि जक् ॥१।१।१४७॥ पदान्ते वर्तमानस्य नकारस्य शकारे परे जगागमो वा भवति, अञ्च —ञ्च सयोगस्य तु शकारे न भवति । कुर्वञ्च्छेते, कुर्वञ्शेते । भवाञ्च्छर । भवाञ्शूर । शीति किम् ? महान् षण्ड । अञ्च इति किम् ? भवाञ्श्च्योतति । प्रत्यय इत्यधिकारात्कुत्वं न भवति जकारविधानाच्च, अन्यथा हि गकार एव विधीयेत ।

नॄनः पि री रक् ॥१।१।१४८॥ नॄनित्येतस्य नकारस्य पदान्ते वर्तमानस्य पकारे परे री इति ईकारानुबन्ध आदेशो रक् चागम पर्यायेण भवतो वा । नॄ[5]ँ पाहि, नॄ[6]ँ: पाहि, नॄन् पाहि । री[7] ईकारो रीस्योरिति विशेषणार्थ ।

काँस्कान् सी सक् ॥१।१।१४९॥ काँस्कानिति स्यवयव सगवयवञ्च शब्दरूप निपात्यते । कानित्येतस्य [8]शसन्तस्य द्विर्वचने कृते पूर्वस्य सी इति ईकारानुबन्ध आदेश सक्चागम पर्यायेण निपात्यते । काँस्कान् । कास्कान् । सीसकोर्विधानाद् रिर्न भवति । अन्यथा हि रीरगावेव विधीयेयाताम् । काँस्कानिति निपातनाच्च सयोगान्तलोपाभाव ।

छव्यम्यप्रशानः ॥१।१।१५०॥ प्रशान्वर्जितस्य यो नकारस्तस्य पदान्ते वर्तमानस्य अम्परे छवि परतः सीरादेश. सक् चागम. पर्यायेण भवन । [9]भवाँश्छादयति, भवाश्छादयति । भवाँष्ठकारेण, भवाष्ठकारेण । भवाँ-

---

१ सुगण्ट्छेते, क० म० । २ भाश्च्योतति, क० म० । ३ सकारोपदिष्टं-क० म० । ४ ष्टुत्वार्थम्-क० म० । ५ शस्यनुस्वारः, क०म० टि० । ६. उभयविकल्पे त्रैरूप्यम् । क० म० टि० । ७ री इति ईका-क०म० । ८ द्वितीया बहुवचनस्य-क०म० । ९ रीस्योरित्यनुनासिकः-क०म० टि० ।

स्थुडति, भवास्थुडति । भवाँश्चरति, भवाश्चरति । भवाँष्टीकते, भवाष्टीकते । भवाँस्तरति, भवास्तरति । छवीति किम् ? भवान् फलति । भवान् करोति । अमीति किम् ? भवान्मरुक । अप्रशान इति किम् ? प्रशाञ्चरति । पदान्त इति किम् ? भवन्त. । श्रीमन्त. ।

पुमः खयि ॥१।१।१५१॥ पुमित्येतस्य यदन्त्यं तस्य पदान्ते वर्तमानस्य अम्परे खयि परत सीरादेश सगागमश्च पर्यायेण भवतः । पुंस्खातम्, पुंस्खानम् । पुँस्कामा, पुंस्कामा । पुँस्कोकिल , पुंस्कोकिल । पुँश्चलो, पुंश्चली । पुम इति किम् ? संख्यानम् । खयीति किम् ? पुमाद. । पुंगव । अमीति किम् ? पुक्षुर । पुक्षार ।

समस्कृसि ग्लुक् च ॥१।१।१५२॥ स्कृसि समुट्कस्य कृञोऽवयवे सकारे परे समित्येतस्य सीरादेश. सगागमो ग्लुक् च पर्यायेण भवन्ति । सँस्कर्ता । सँस्कर्तुम् । सकि—संस्कर्ता । सस्कर्तुम् । ग्लुचि—सस्कर्ता । सस्कर्तुम् । सम इति किम् ? उपस्कर्ता । उपस्कर्तुम् । स्कृगीति किम् ? सम्भवति । सञ्चरति । स्कृग्रहण किम् ? सस्मरति । संस्खलति । ममकारोपादानं किम् ? संकृति । संकृत्य । साकृत्य । साकृत्यायन । सीग्रहणं सकार-परत्वाव्यभिचारार्थम्—तेन द्विर्वचनादौ न भवति । सञ्चस्कार । समस्करोत् । ग्लुचो गित्वमुत्तरार्थम् । चकार. सीगकोरनुकर्षणार्थ ।

व्योऽप्याघोभोभगोः ॥१।१।१५३॥ अवर्णान्तादघो भो भगो इत्येतेभ्यश्च परस्य पदान्ते वर्तमानस्य वकारस्य यकारस्य चापि परे ग्लुग्भवति । वृक्ष हसति । वृक्षवृश्चमाचक्षाणो वृक्षव् । देवा यान्ति । धार्मिका दयन्ते । अघो हसति । अघो देहि । भो हसति । भो देहि । भगो हसति । भगो देहि । व्य इति किम् ? वागत्र । वा पदत्र । अपीति किम ? वृक्षव्करोति ? अपीत्येतावान् प्रत्याहारो 'रेर्यः' [१।१।१५६] इत्येतदर्थं । इह हि हसीति पर्यायेण । अघोभोभगोरिति किम् ? दध्यत्र । मध्वत्र । पदान्त इति किम् ? भव्यम् । जय्यम् । भो व्योम ।

[1]**अच्यम्पष्टश्च ॥१।१।१५४॥** अवर्णान्तादघो भो भगो इत्येतेभ्यश्च परस्य पदान्ते वर्तमानस्य वकारस्य यकारस्य च अचि परे ग्लुक्—गकारानुबन्धो लोप अस्पष्ट —अव्यक्तध्वनिश्चामान्न आदेशौ भवत । [2]पटउ, पटव् । [3]असाउ, [4]असाव् । तउ, [5]तयु । तस्माउ, [6]तस्माय् । अघोउ, [7]अघोय् । अघोअत्र, [8]अघोयत्र । भो अत्र, [9]भोयत्र । भगोअत्र, [10]भगोयत्र । ग्लुचि गित्वाद्गिन इति सन्धिप्रतिषेध । अचीति किम् ? वृक्ष हसति । पदान्त इति किम ? नयनम् । लवनम् । रायौ । नावौ ।

[11]**वाऽनुज्यात् ॥१।१।१५५॥** अवर्णान्परस्य पदान्ते वर्तमानस्य वकारस्य यकारस्य च उञ्वर्जितेऽचि परे ग्लुगस्पष्टश्चादेशौ वा भवत । पक्षे तादवस्थ्यम् । पटइह, पटविह, पटविह । असाइन्दु , असाविन्दु , असाविन्दुः । तआहु , तयाहु , तयाहु । तस्माआसनम्, तस्मायासनम्, तस्मायासनम् । क आस्ते, कयास्ते, कयास्ते । देवा आसते, देवायासते, देवायासते । अनुज्यात् किम् ? पटउ, [12]पटव् । उञि द्वैरूप्यमेव । उञिति निपातो न प्रत्याहार । प्रत्याहारे ह्यनुज्यात्यवर्णेवर्णयोरचो प्रतिपत्ति स्यात्, तत्र तावेव साक्षादुपादीयेयाताम् । चकारेण वा प्रत्याह्रियेत । त उतमुत्वेति वेत्रादेशो लाक्षणिकत्वान्न गृह्यते । आदिति किम् ? अघोअत्र, अघोयत्र । [13]अघो आदिभ्योऽपि द्वैरूप्यमेव । पदान्त इति किम् ? नयनम् । लवनम् ।

रेर्यः ॥१।१।१५६॥ अघो भो भगोरिति वर्तते नादिति अघो भो भगो [14]व्योर्लुग्वचनात् । अवर्णादघो भो भगो इत्येतेभ्यश्च परस्य रेरिकारानुबन्धस्य रेफस्य स्थाने अचि परे यकारादेशो भवति । [15]पदान्त इत्यस्यापवादः । कयास्ते । देवायांसते । देवा हसन्ति । धार्मिका दयन्ते । अघोयत्र । अघो हसति । भोयत्र । भो हसति । भगोयास्ते । भगो हसति । रेरिति किम् ? भवान् दयते । अन्तर्दयते[16] । अघोभोभगोरिति किम् ? मुनिर्दयते । साधुर्दयते । अपीति किम् ? क. खनति । अघोः करोपि ।

---

१ व्योर्लघुतरप्रयत्नः शाकटायनस्य, इति पाणिनीयसूत्रम् क० म० टि० । २. उञ्वर्जितेऽचि विकल्पस्य वक्ष्यमाणत्वात्, अत्रोञ्चेव दर्शितः क० म० टि० । ३ पटवुँ क०, म० । ४ असावुँ क०, म० । ५. तयुँ क०, म० । ६. तस्मायुँ क०, म० । ७ अघोयुँ क०,म० । ८. अघोयँत्र क०,म० । ९. भोयँत्र क०, म०, । १०. भगोयँत्र क०, म० । ११ वाँ क०, म०, । १२ पटवुँ क०, म० । १३ अघोपादि–क०, म० । १४. व्यो–क०, म० । १५ रः पदा –क०, म० । १६. अन्तर्दयते क०, म०,।

अतोऽङ्ष्युः ॥१।१।१५७॥ अकारान्तात्परस्य रे स्थाने अकारे हषि च परे उकारादेशो भवति। यत्वापवादः। श्रमणोऽस्मि। संयतोऽस्मि। धर्मो जयति। धार्मिको दयते। अहोभ्याम्। अहोभि। अत इति किम्? मुनिरस्मि। साधुरस्मि। तकार. किम्? देवा यत्र। देवा यान्ति। [1]सुस्रोताम्बा यत्रान्वसि। [2]सुस्रोताम्बा देहि। अङ्षीति किम्? क इह। तकार किम्? सर्वज्ञ आस्ते। [3]सुस्रोतयाँबाश्चिदन्त। रेरिति किम्? अन्तरस्मि। मातरस्मि।

हल्यनञ्समासे लुक्तः सात् ॥१।१।१५८॥ तकारस्थानिकात् सकारात्परस्य रेर्हलि परे लुग्भवति, न चेत्स सकारो नञ्समासे भवति। एषत्सरुक। स क्षरति। एष करोति। स [4]दधाति। परमेष करोति। परमस [5]दधाति। त इति वचनात् एतदोऽपि षे पूर्वमेव लुक्, अन्यथा यदुत्तरत्र तद इति तदत्रैव क्रियेत न त इति। हलीति किम्? एषोऽस्मि। सोऽस्मि। अनञ्समास इति किम्? अनेषो गच्छति। असो गच्छति। त इति किम्? दासः करोति। मास प्रयाति। सादिति किम्? वान करोति। चेत प्रयाति। **येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्याद्**, एकेन वर्णेन व्यवधानमाश्रीयते इति वा। अत इति वाऽनुवृत्तेः—सादकारात्परस्य भवति, इह तु न भवति—स्यः करोति, एषक करोति, सक करोति।

तदः पादपूरणे ॥१।१।१५९॥ तदादेशात्सकारात्परस्य रेरचि परेऽनञ्समासे लुग्भवति, पादपूरणविषये लोपे चेत्पाद पूर्येत। सैष दाशरथी राम। सैष राजा युधिष्ठिर। तद इति किम्? एनदो न भवति। पादपूरण इति किम्? स एष भरतो राजा यो न्याय्ये पथि वर्तते।

रोऽह्नोऽप्यसुब्रूपरात्रिरथन्तरे ॥१।१।१६०॥ अहन्नित्येतस्य रेरपि परे रेफादेशो भवति, न सुब्रूपरात्रिरथन्तरेषु। अहरेति। अहरधीते। अहर्ददाति। अह्न इति किम्? पयोऽस्य। पयो ददाति। अपीति किम्? अह खण्डम्। असुब्रूपरात्रिरथन्तर इति किम्? अहोभ्याम्। अहोभि। दीर्घाह्नो निदाघः। [6]दीर्घाह्नोऽयम्। हे दीर्घाह्नो निदाघ। अहो रूप गतम्। अहो रात्रिरागता। अहोरात्र। अहो रथन्तरम्। रे रेफवचनमुच्चयत्वबाधनार्थम्।

विसर्जनीयस्य ॥१।१।१६१॥ विसर्जनीयस्यापि परे रेफादेशो भवति। मुनिरस्मि। साधुरस्मि। मुनिर्दयते। साधुर्दयते। मजूरत्र। सजूर्दयते। मातरस्मि। पितर्दयते। अपीति किम्? क खनति। तवर्षभ.। सुखार्तः। नार्कटे नार्पत्य इत्यत्र [7]रेफस्य बहिरङ्गत्वाद्विसर्जनीयादि न भवति। विसर्जनीयेष्वित्यधिकार आपादपरिसमाप्ते।

वाऽहर्पत्यादिषु ॥१।१।१६२॥ अहर्पतीत्येवमादिषु शब्देषु विसर्जनीयस्य स्थाने रेफादेशो वा भवति। अहर्पति, अह पति। गीर्पति, गी पति। धूर्पति, धू पति। प्रचेता राजन्, प्रचेतो राजन्। आश्रयाद्रेरुत्वबाधया विसर्जनीयः। रेफाभावे रेर्विसर्जनीयस्य वा स्थानिवद्भावे नोत्व (?) रेफस्य विधानाद्य भवति, यं विधि प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते, य प्रति निमित्तमेव न स [8]बाध्यते इति लुग्भवत्येव।

सश्छव्यशरि ॥१।१।१६३॥ विसर्जनीयस्य स्थानेऽशर्परे छत्रि परत [9][10]मकारादेशो भवति। कश्छादयति। कष्ठकारेण। कस्थुडति। कश्चरति। कष्टीकते। कस्तरति। अन्तश्छादयति। मातष्ठकारेण। छवीति किम्? क खनति। क फलति। क करोति। क. पठति। अशरीति किम्? क त्सरु [11]। क त्सरति। अशर्पर इत्यधिकार आपादपरिसमाप्ते।

शरि वा ॥१।१।१६४॥ विसर्जनीयस्य स्थानेऽशर्परे शरि परत सकार आदेशो वा भवति। कश्शोभते, क शोभते। कष्षण्ढे, क. षण्ढे। कस्साये, क साये। अन्तश्शोभते, अन्त शोभते। मातष्षण्ढे, मात.

---

१ —तां वा य—क०, म०। २ —तां वा देहि क०, म०। ३. —तयाँबाश्चिदन्त क०, म०। ४. ददाति म०। ५. ददाति म०। ६. दीर्घाह्नायम् क०, म०। ७ इति रेफ-क०, म०। ८ स्थयमधिक०, म०। ९ सम्बाध्यते क०, म०। १० सकार आदेशो क०, म०। ११ असेः त्सरुकः क०, म०।

षण्डे । शरीति किम् ? कः खनति । कः पठति । अशरीति किम् ? कः शकार. । क स्सकार । वापुं, गीर्षु इत्यत्र रः [1]सुप्सु इत्यधिकारार्थमिति न भवति ।

लुक् खयि परे ॥१।१।१६५॥ विसर्जनीयस्य खयि परे शरि परतो लुग्वा भवति । चेतस्खलति, चेतस्स्खलति, चेत स्खलति । चक्षुस्पन्दते, चक्षुस्स्पन्दते, चक्षु स्पन्दते । अन्तस्खलति, अन्तस्स्खलति, अन्त.-स्खलति । खयीति किम् ? क. शेते, कश्शेते । परेग्रहणं शरीत्यस्यानिवृत्त्यर्थम्, [2]अन्यथा खय्येव स्यात् । असमास उत्तरत्र पर इत्यस्याननुवृत्त्यर्थं । खयीत्यधिकार आपादपरिसमाप्तेः ।

कुपौ [3]≍क≍पम् ॥१।१।१६६॥ विसर्जनीयस्य स्थाने कवर्गीये पवर्गीये च अशर्परे खयि परे ≍क [4]≍प इति जिह्वामूलीयोपध्मानीयौ वा यथासख्यमादेशौ भवतः । क≍करोति । क करोति । क खनति । क≍खनति । क≍पचति, कः पचति । क≍फलति, क फलति । अन्त≍करोति, अन्त करोति । अन्त≍फलति । अन्त फलति । कुपाविति किम् ? कश्चरति । कश्छादयति । सविधि ≍कं≍पविवेकिकल्पा-त्तदभावे गावकाश. स्यात्, यथासख्यार्थमुत्तरार्थञ्च । अशर्पर इति किम् ? वास. क्षौमम् । [5]दन्तै. स्फातम् । खयीति किम् ? अन्तर्गच्छति । अन्तर्भाषते । [6]ककारपकारावुच्चारणार्थौ । कुपाविन्यधिकार आपादपरिसमाप्तेः ।

तिरसस्तेस्सिः ॥१।१।१६७॥ तिसंज्ञकस्य तिरस्शब्दस्य सम्बन्धिनो विसर्जनीयस्य स्थाने कवर्गीये पवर्गीये चाशर्परे खयि परे सिरादेशो भवति वा । तिरस्कृत्य, तिर.कृत्य । तिरस्करोति, तिर. करोति । तेरिति किम् ? तिर. कृत्वा काष्ठ गत, तिर्यक् कृत्वेत्यर्थ ।

नमस्पुरसः ॥१।१।१६८॥ नमस्पुरस् इत्येतयोस्तिसज्ञयो सम्बन्धिनोर्विसर्जनीयस्य स्थाने कवर्गीये पवर्गीये चाशर्परे खयि परे सिरादेशो भवति । नमस्कृत्य, नमस्करोति । पुरस्कृत्य, पुरस्करोति । तेरिनि किम् ? नम कृत्वा । पुरः करोति, नगरीरित्यर्थ । योगविभागो नित्यार्थः ।

चतुर्निर्दुर्बहिराविर्≍प्रादुसाम् ॥१।१।१६९॥ चतुर् निर् दुर् बहिस् आविस् प्रादुस् इत्येतेषा सम्बन्धिनो विसर्जनीयस्य स्थाने कवर्गीये पवर्गीये चाशर्परे खयि परे नित्यं सिरादेशो भवति । चतुष्कण्टकम्, चतुष्पात्रम् । निष्करोति । निष्पिबति । दुष्करोनि । दुष्पिबति । बहिष्करोति । बहिष्पिबति । आविष्करोति । आविष्पिबति । प्रादुष्करोति । प्रादुष्पिबति । निष्कुलः । दुष्पुरुषः । निचा३ष्कुल । दुचा३ष्पुरुषः । नैष्कुल्यम् । दौष्पौरुष्यम् ।

सुचो वा ॥१।१।१७०॥ सुच्प्रत्ययान्तस्य सम्बन्धिनो विसर्जनीयस्य शब्दरूपस्य [7] स्थाने कवर्गीये पवर्गीये चाशर्परे खयि परे सिरादेशो वा भवति । द्विष्करोति, द्वि≍करोति, द्विः करोति । त्रिष्करोति, त्रि≍करोति, त्रि.करोति, त्रिष्खनति, त्रि≍खनति, त्रिः खनति । चतुष्पचति, चतु≍पचति, चतु पचति । चतुरः सुचः पर-त्वादनेनैव विकल्प । सुच इति किम् ? मुनिः करोति । साधु पठति । कुपाविति किम् ? द्विश्चरति । त्रिश्चरति । अशर्पर इति किम् ? द्वि क्षरति । त्रिः प्साति । खयीति किम् ? द्विर्गच्छति । द्विर्भाषते ।

इसुसोऽपेक्षायाम् ॥१।१।१७१॥ इसुस्प्रत्ययान्तस्य शब्दरूपस्य सम्बन्धिनो विसर्जनीयस्य स्थाने कवर्गीये पवर्गीये चाशर्परे खयि परे सिरादेशो वा भवति स्थानिनिमित्तपदे चेत्परस्परापेक्षाया विषये भवत । सर्पिष्करोति, सर्पि [10] करोति । सर्पिष्पिबति, सर्पिः [11] पिबति । धनुष्खण्डयति, धनु≍खण्डयति, धनुः खण्डयति । धनुष्फलति, धनु [12] फलति । परमसर्पिष्करोति, [13] परमसर्पि. करोति । परमधनुष्खण्डयति, परमधनु≍खण्डयति, परमधनु खण्डयति । इसुस इति किम् ? पयः करोति । प्रत्ययग्रहणादिह न भवति—मुनि. करोति । मुहु. [14] पठति ।

---

१ सुप्सीत्य—क०,म० । २ हि खय्ये –क०,म०, । ३ –पौम्प≍पम् क०, म० । ४ –प≍प इति क०, म० । ५ –प≍प क०, म० । ६ दन्तैः स्फातम् क०, म० । दन्तैः क० म० टि० । ७ ककार-पकारा उच्चारणार्थाः क०, म० । ८ विष्प्रादु–क०, म० । ९. शब्दरूपस्य, इति क०, म० नास्ति । १० सर्पि≍करोति क०, म० । ११. सर्पि≍पिबति क०, म० । १२ धनु≍फलति क०, म० । १३ परमसर्पि≍करोति क०, म० । १४ मुहु≍पठति क०, म० ।

मुहुरव्युत्पन्नम्—तथा च पुंमुहुमोऽप्रतिषेध[1] इत्यषत्वम्। इसा साहचर्यादुसोऽनिडो ग्रहणादिह न भवति—चक्रुः कलहानि। भिन्द्यु पापानि। अपेक्षायामिति किम्? तिष्ठतु सर्पिः पिब त्वमुदकम्। परमसर्पि कुण्डम्।

नाऽक्रियैकार्थे ॥१।१।१७२॥ इसुम्प्रत्ययान्तस्य शब्दरूपस्य सम्बन्धिनो विसर्जनीयस्य स्थाने कवर्गीये पवर्गीये चाशर्परे खयि क्रियापदवर्जितसमानाधिकरणपदस्थ[2] परे स्थानिनिमित्तपदयोरपेक्षाया विषये सिरादेशो न भवति। **'इसुसोऽपेक्षायाम्'** [१।१।१७१।] इत्यस्याय प्रतिषेधो नान्यस्य, तद्विषय एव विधानात्। सर्पिः कारकम्। यजु पीतकम्। क्रियाया प्रतिषेध किम्? सर्पिष्क्रियते, सर्पिःक्रियते, सर्पिःक्रियते। धनुष्प्राप्तम्, धनुःप्राप्तम्, धनुः प्राप्तम्। एकार्थ इति किम्? सर्पिष्कुम्भे। सर्पिःकुम्भे। धनुष्पुरुषस्य, धनुःपुरुषस्य।

समासेऽसमस्तस्य ॥१।१।१७३॥ पूर्वेणाममस्तस्य इसुम्प्रत्ययान्तस्य शब्दरूपस्य सम्बन्धिनो विसर्जनीयस्य स्थाने कवर्गीये पवर्गीये चाशर्परे खयि परे सिरादेशो भवति। ते चेत्स्थानिनिमित्ते पदे, एकत्र समासे भवतः। सर्पिष्कुण्डम्। सर्पिष्पानम्। [3]सर्पिष्कृत्यम्। धनुष्खण्डम्। [4]धनुष्कृत्यम्। धनुष्फलम्। समास इति किम्? तिष्ठतु सर्पि पिब त्वमुदकम्। अममस्तस्येति किम्? परमसर्पिःकुण्डम्। इन्द्रधनुःखण्डम्। [5]इसुग्रहणे प्रत्ययः प्रकृत्यादेरिति नास्त्यत्रेदमेव लिङ्गम्, तेनापेक्षाया समस्तस्यापि भवति। इह च बहुसर्पिष्कुण्डमिति भवति।

पदेऽधश्शिरसः ॥१।१।१७४॥ पूर्वेणाकृतसमासयो, अधस् शिरस् इत्येतयो सम्बन्धिनोर्विसर्जनीयस्य स्थाने पदशब्दे परे सिरादेशो भवति, ते चेत्स्थानिनिमित्ते एकत्र समासे भवत। अधस्पदम्। शिरस्पदम्। [6]पदमिति [पद इति] किम्? शिरःखण्डम्। समास इति किम्? अध [7]पदम्। अममस्तस्येति किम्? परमशिरःपदम्।

कृकमिकंसकुशाकर्णीकुम्भपात्रेऽतोऽनव्ययस्य ॥१।१।१७५॥ अनव्ययस्य पूर्वेणाममस्तस्य शब्द-(रूपस्य) सम्बन्धिनोऽकारात्परस्य विसर्जनीयस्य स्थाने डुकृञ् करणे, कमृङ् कान्तौ, कस कुशा कर्णी कुम्भ पात्र इत्येतेषु परत सिरादेशो भवति, ते चेत्स्थानिनिमित्ते, एकत्र समासे भवत। अयस्कृत्। अयस्कार। यशस्काम। पयस्कामः। अयस्कसः। पयस्कसः। अयस्कुशा। पयस्कुशा। अयस्कर्णी। पयस्कर्णी। पयस्कुम्भ। पयस्कुम्भी। यशस्पात्रम्। यशस्पात्री। **प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति**। शुनस्कर्ण कस्कादि। कृकम्यादिग्रहण किम्? पय [8]पानम्। यश्चपदम। अत इति किम्? गीकार। धूकार। तकार किम? भा करणम्। भास्कर, कस्कादि। अनव्ययस्येति किम्? स्व. कार.। पुनः कार। समास इति किम्? अय करोति। यश कामयते। अममस्तस्येति किम्? उपपय कार। उपपय काम.। परमयश कार। परमयश काम। समासे कृकम्यादीनामुत्तरपदत्वविज्ञानादिह न भवति। पयस कुम्भकपालम्—पय कुम्भकपालम्। अत्र हि कुम्भकपाल्[9]मित्येतावदुत्तरपद न कुम्भशब्दः। अयस्कृत् अयस्कार इत्यत्र **'नहिवृतिवृषि'** [२।२।६०] इत्यादौ क्विबग्रहणाद्धातुग्रहणे तदादिविज्ञानान्सिद्धम्। न कमिग्रहणे कामिग्रहणम्—तेन [10]पयः काम.। अत्र लिङ्गम्-शीलिकामिति णविधौ कामिग्रहण तद्विषयः कामेत्यण् बाधनार्थम्। पयस्कामीति-कमावणावणि भवति। पयस्काम्यति [11]यङि बहुव्रीहौ।

प्रत्यये ॥१।१।१७६॥ अनव्ययस्य शब्दरूपस्य सम्बन्धिनो विसर्जनीयस्य स्थाने कवर्गीये पवर्गीये चाशर्परे खयि प्रत्ययमात्रे परे सिरादेशो भवति, काम्य-कल्प-क-पाशाः प्रयोजयन्ति। यशस्काम्यति। यशस्कल्पम्। पयस्कल्पम्। यशस्कम्। पयस्कम्। यशस्पाशम्। पयस्पाशम्। गीष्कल्पम्। धूष्कल्पम्। गीष्पाशा। धूष्पाशा। सुगीष्पाशा। सुधूष्पाशा। अनव्यस्येति किम्? [12]प्रात.कल्पम्। पुन कल्पम्।

न रङः काम्ये ॥१।१।१७७॥ रेफान्तस्याङ्गस्य च विसर्जनीयस्य स्थाने काम्यप्रत्यये परे सिरादेशो न

---

१ इत्युपपन्नत्वम् क०, म० टि०। २.-द प-क०, म०। ३ सर्पिष्कृत्य क०, म०। ४ धनुष्कृत्य क०, म०। ५ इसुस्ग्र-क०, म०। ६ पद इति क०, म०। ७ अध>पदम्। शिर>पदम् क०, म०। ८ पय>पानम्, क०, म०। ९ ल इत्येताव-क०, म०। १० तेन काम>पयः का-क०, म०। ११ यङि क०, म०। १२ प्रातःकल्पम्। पुनःकल्पम् क०, म०।

भवति । 'प्रत्यये' [१।१।१७६] इति प्राप्ति प्रतिषिध्यते । गी. काम्यति । धू. काम्यति । अह काम्यति । रङ्[1]ः काम्य इति किम् ? यशस्काम्यति । [2]र इत्यङ्गो ग्रहणमत एवान्यत्रोभय ग्रहणम् ।

ह्रस्वात्सुपस्ति ॥१।१।१७६॥ ह्रस्वात् परस्य विसर्जनीयस्य स्थाने सुबन्ताद्विहिते तकारादौ प्रत्यये परे सिरादेशो भवति । तर-तम-तम्-तय-त्व-तल्[3]त्याः प्रयोजयन्ति । सर्पिष्टरम् । सर्पिष्टमम् । सर्पिष्ट । चतुष्टयम्, चतुष्टवम्, चतुष्टा । निष्टराम्, दुष्टराम्, निष्टघ । ह्रस्वादिति किम् ? गीस्तरा, धूस्तरा । सुप इति किम् ? चक्रु[4]स्तराम् । तीति किम् ? सर्पिस्माद्भवति, धनुस्माद्भवति । प्रत्यय इति किम् ? सर्पिस्तरति, धनुस्तरति ।

निसोऽनासेवायां तपे ॥१।१।१८०॥ निस्सम्बन्धिनो विसर्जनीयस्य तकारादौ तपतौ परत सिरादेशो भवति—अनासेवायामर्थे । अ[5]नासेवा = पुन. पुन करणम् । निष्टपति सुवर्णम् । निष्टप्ता अरातयः । अनासेवायामिति किम् ? निस्तपति सुवर्णं सुवर्णकार[6] । तीति किम् ? निरतपत् । शब्दनिर्देशादिह न भवति—निस्तातप्ति, निस्तातपीति ।

"स्तिपा शपाऽनुबन्धेन निर्दिष्टं यद्गणेन च ।
यच्चैकाज्ग्रहणं किञ्चित् पञ्चैतानि न यङ्श्लुचि ॥"

कस्कादिषु ॥१।१।१८१॥ कस्क इत्येव प्रकारेषु शब्देषु विसर्जनीयस्य स्थाने पवर्गीये च अशपरे सयि परे सिरादेशो भवति । कस्क.[7] । कौतस्कुतः । सर्पिष्कुण्डिकादीनामिह [गण] पाठः समस्तार्थ , तेन परमसर्पिष्कुण्डिका परमबहिष्फलम् परमधनुष्कपालम्[8] परमयजुष्पात्रम् [इत्यादि] आकृतिगणत्वादस्य अविहितलक्षणस्याऽऽदेशकः शिष्टप्रयोग । भास्कर मेदस्पिण्ड इत्यादि कस्कादिषु द्र[9]ष्टव्यम् । कस्क । कौतस्कुत[10] । शुनस्कर्ण । साय्यस्काल[11] । मस्काण्डः । अयस्कान्त । अयस्पिण्ड. । सर्पिष्कुण्डिका । धनुष्कपाल । [12]बहिष्पाल. । यजुष्पात्र इति कस्कादिराकृतिगण । बहुवचनग्रहणमस्याऽ[13]कृतिगणत्वं द्योतयति ।

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने[14] अमोघवृत्तौ[15] प्रथमाध्यायस्य प्रथमः पादः समाप्तः ।

[द्वितीयः पादः]

नपोऽचो ह्रस्वः ॥१।२।१॥ इयमयमिदमिति शब्दस्य[16] व्यवहारहेतुरुपदेशगम्य प्रातिपदिकार्थधर्मो लिङ्ग स्त्रीपुनपुसकत्वानि । नपो नपुंसकार्थाभिधायिनोऽजन्तस्य शब्दरूपस्य ह्रस्वादेशो भवति । कीलालपम्-ग्रामणि । नतभ्रु । अतिहि । अतिरि । अतिशु । अतितु कुलम् । नप इति किम् ? कीलालपा पुमान् । ग्रामणी स्त्री । अच इति किम् ? सुवाक् कुलम् । रमते कुलम् । काण्डे, कुड्ये, काण्डीभूतम् कुलमित्यत्र लिङ्गानुपादानान्न भवति—युगवरत्राय, युगवरत्रार्थम् । युगवरत्रेन्द्र इत्यत्र, **असिद्धं बहिरङ्गमन्तरङ्गे ।**

[17]**नबूद्वयच् मन्तमवेधो जरस्तथा मन्त्रकर्तरिन्नान्तम् । स्वाद्यात्वाद्बहुलं [18]द्व्यष्कानखभावोऽव्ययाभाव ॥१॥ द्वन्द्वैकत्वं सख्याऽव्ययपूर्वपदः पथोऽथ तत्पुरुषः । नञ् कर्मधारयो बहुरेभ्यश्छाया सभा शाला ॥२॥**

१ रङ्ग इति क०, म० । २ इत्यङ्गो गृहणाच्चिरनुबन्धग्रहणम् । अतएवान्यत्रो—क०,म० । ३ भिन्धुस्तराम्, क०, म० पुस्तकयोरधिकः (पाठः) । ४. आसेवा क०, म० । ५ —कार इत्यासेवायाम् क०, म० । ६ कवर्गीये पवर्गीये च क०, म० । ७ प्राणिनां सुखमल्पीयो भूयिष्ठं दुःखमेव तत् । संमृतौ तदिहाश्वासः कस्कः कौतस्कुतोऽथवा ॥ कौतस्कुतस्किमर्थं वा तवागमनमित्यसौ । रावणेनानुयुक्तः सन् कुविलीवमभाषत ॥ क०, म० टि० । ८ परमबहिष्पूलम्, क०, म० । ९. द्रष्टव्यः, क०, म० । १० —स्कुतः । भ्रातुष्पुत्र । क०, म० । —११. स्काल । साय्यस्कृत क०, म० । १२. बहिष्पूल क०, म० । शुनस्कर्ण इत्यादिषु विसर्गो नास्ति क० म० पुस्तकयोः । १३ नमस्याकृ—क०, म० । १४ —सने कृ—क०, म० । १५ प्रथमस्याध्यायस्य क०, म० । १६ —द्रव्यवस्थाहे—क०, म० । १७ लिङ्गानुशासनसूत्राणि क०, म०, टि० । १८ प्युक्ता म० । —प्युष्कता क० ।

राजार्थराज्ञ[2] रादेरराज आदावुपक्रमोपक्रमम् । संज्ञायां कन्थोशीनरेषु सेना सुरा[3] छाया ॥३॥
शाला निशा च वोर्णो[4] स्थूणे शशगृहपरे सुदिनपुण्या–[5]देकाशकाहोरात्रः संख्यायां किल युगमपाने ॥४॥
फलभेदनयनजललवनधनाज्ञहललोह[6] विवर–मांसधनुर्जल[7] कुसुमतुल्यवर्णमुखदलरुधिरनामानि ॥५॥
दध्यस्थिसक्थिजत्रुरमश्वत्थास्थ[8]ु वस्तुमस्तुजतु–त्रपुतालुजानुदारुकशोरुस्वादूनि [9]वरुचार्थे ॥६॥
[10]चुबुकांशुकशुष्कोलूखशालूकप्रातिपदिकमुकु[11]टतटम् । पिटवटतिरीटलोष्टकरोटललाटानि शृङ्गाटम् ॥७॥
तुण्डाण्डभाण्डकुण्डं पर्णमृण लवलतोरणो[12] प[13]रणम् । पीठोक्थरिक्थकाष्ठं पृष्ठाजिनजघनदधि(दीन)तुहिनम् ॥८॥
सोपानभुवनकाननमिथुनलवनगगनवेतनं वृजिनम् । कठिनश्मशानशासनरत्नविपिनिम्नजिह्माहः[14] ॥९॥
तलभं त्रिविष्टभं[15] भं रूपोडु[16] शिखपुष्पाणि । पापसमीपपरोपान्तरीपयुग्मेध्मसिध्मानि ॥१०॥
गुल्माध्यात्मं कुङ्कुमहिमकिसलयहृदयमिन्द्रियं वलयम् । प्रालेयमुत्तरीयं प्रान्तप्रत्यन्तराष्ट्राणि ॥११॥
द्वाराभ्रवक्रसक्थस्फाराजिरचीरतोरकेयूरम् । क्षिप्रक्षुद्रश्वभ्रक्रूराम्बनीरमाराणि[17] ॥१२॥
रन्ध्रं चीवरकेसरमुदरान्तरजठरगह्वरकुटीर–छिद्रकुकुन्दरपञ्जरमन्दिरचत्वरशरीराणि ॥१३॥
वैराग्यपुष्करचाम्र[18] शिशिरशिबिरं तनोः[19] शुक्रम् । पनसा ससाहसबिसं पीयूषपुरीषकल्मापम् ॥१४॥
शार्पं जार्पं किलिबपमिन्द्रियमत्तं पृषद्दषदुदश्वित् । वियताजगच्छकृत्यकृदलातपित्तं वृनं वृत्तम् ॥१५॥
नवनीतनिमित्तानृतंरजतामृतपलितमरकतविचित्तम् । शबवर्दीश(?)विश्वकुलिशाङ्कदैवगुदास्पदाकाशम् ॥१६॥
द्वन्द्वसुखदुःखवर्हं श्रद्धाङ्कशरावपार्श्वकिण्वानि । भयलिङ्गवर्षभगपदविम्बकुटुम्बानि शफवृन्दम् ॥१७॥
शिक्य मध्य धान्य सत्यापत्याज्यपण्यधिष्ण्यानि । सस्यं कुड्य कुप्य[21] माल्याश्वकव्यकाव्यानि ॥१८॥
हर्म्यं तूर्यं सैन्यं पिच्छकवर्चनामरोमाणि[22] । यादोलान्तशतादीनि धातुनैकाधिकरण च ॥१९॥
सारं न्याय्ये धर्ममपूर्वनिमित्ते समे विभागेऽर्धम् ।

[इति नपुंसकलिङ्गम्]

असमाहारे द्वन्द्वः पुसि भवेदश्ववडव इति ॥२०॥
णवजज्घननङ्घोः किरिमा विषवातारि पङ्कनिर्यास–स्वर्गसुरासुरवत्सर ऋतुमसुद्रपुरुगाहः ॥२१॥
कण्ठोष्ठकेशदन्तस्तनगुल्फकपोलनखभुजात्माभ्र–[24]ऋतुमान खड्ग गिरिशरशरण्य[25] भिधानानि धान्यानि ॥२२॥
कटणथनपभमयरषसशब्दनसौनोहरिद्गरुद्गर्मुत् । अर्घो[26] [27]वैमै केषां[28] विट्वणिजो दुन्दुभिर्ग्रन्थिः[29] ॥२३॥
पाप्यञ्जलिमणिसारथिरत्यधिवस्त्यतिथिकुक्षिरविराशिः[30] ।
ध्वनिमुनिकलिबलिकेलिकृमिकपिकविवह्निवृष्ण्यग्निः ॥२४॥
शङ्खौघशङ्कुपुङ्खतरङ्गमृदङ्गा समुद्गयुगपूगाः । मञ्चा ध्वजगजपुञ्जा नार्डाव्रणबल्वजा लाजाः ॥२५॥
हृदकन्दकुन्दबुद्बुदजनपदशब्दान्तकुन्तदूतमठाः । धूर्तमुहूर्तव्राता हस्ताहवपुस्तसङ्ग्रामाः ॥२६॥
गण्डकरण्डवरण्डाः पण्डो मुण्डः शिखण्डगुडमुण्डाः । गेहस्तम्भनितम्बाः ककरेककटाहनिर्यासा[31] : ॥२७॥
आत्माश्मानौ पाप्मश्लेष्मोष्मस्कन्धगन्धपदरार्थाः (गन्धरार्था ?)।
सीरोधनराज्ञान् हाहापाङ्गाः पल्लवो मेढ्रः ॥२८॥

---

१. –ऋमादे क०,म० । २ राज्ञ क०, म० । ३. पुरा, क०,म० । ४. स्थूणे क०, म०, । ५ –देका-स्वाहो–क०, म० । ६ जलवन क०, म० । ७ शुक्लवक्त्रनरणमुख क०, म० । ८ कशेरु क०, म० । ९ वस्वर्थे क०,म० । १० चिबुकां–क०,म० । ११ मकुट क०, म० । १२ लवण क०, म० । १३ पणम् क०, म० । १४ चिह्न क०, म० । १५ त्रिविष्टपं क०, म० । १६ दुपशि–क०, म० । १७ तूराणि क०, म० । १८ चामराभ्र क०, म० । १९ तनौ क०, म० । २० वृत क०, म० । २१. मूल्याद्य क०, म० । २२ च बीज नाम क०, म० । २३ मास क०, म० । २४ ऋतु क०, म० । २५. रश्म्य क०, म० । २६ वैमैके–क०, म० । २७ विद् क०,म० । २८ ग्रन्थि क०,म० । २९ राशि क०,म० । ३०. निर्याहाः क०, म० । ३१. धारार्थाः क०, म० ।

वृत्ता मित्राश्छात्राः[1] पुत्रो मन्त्रो दशास्तु वक्त्रस्य । वशांशपुरोडाशप्राग्वंशास्तण्डुलस्तरलः ॥२९॥
कम्बलचषालभ्रमरकललतालकुसूलदवला[3] वृषलाः । मुसलोपकरैकालास्तूलो वाकप्रभृतयश्च पुल्लिङ्गम् ॥३०॥

[इति पुंल्लिङ्गम्]

ईदूदन्तं स्त्री स्त्री भू विद्युद्वल्लिदिक्सरिन्नाम । गायभ्यादीन्[4] प्राण्यङ्गं नौस्तर्मीन्यनीस्त्युक्ताः[5] ॥३१॥
विंशत्याद्या नवतेः प्रियङ्गुसरयूद्भुतनुकुहूस्नायुः । रज्जुरधेनुदुन्दुभिरक्षीरुचिरशानिखनिनेमिः[6] ॥३२॥
कुटितुंदिर्दाधितिकाकणिराश्निच्छ्विनीविवेणीपरया[7] श्रीः । राज्याजिदविंपक्त्रिप्रवेणिनिःश्रेणिकृषिकोटिः ॥३३॥
धूलिबलिनालिशष्कुलिपाल्योपधिशक्तिशुक्तिकिकिवेदी । स्थालीवापीवर्तिविपणिकार्ङ्वीचिदरी ॥३४॥
मारी भेरी सूची वाण्यटवी भारतीमुसुण्ढी ज्या । माण्डयार्ली[9] मञ्जरिखारी लाजा[10] वेर्मासिकाशम्पा ॥३५॥
जङ्घा पामा सीमा सीरा गदा नासिका शिफा ज्योत्स्ना । वीणा तूणा घोणा तृष्णा कृष्णा घृणा घिषणा ॥३६॥
शाला माला वेला दोला पेला तुला शिलीला[11] । हेला लाला श्रेतैला राथ्या[12] मन्दुरा मदुरा ॥३७॥
मदिरा कृसरा रशना शिरोधरा वागुरा सुरा वर्षाः । प्रतिसरया प्रतिसिरया शर्करया बालुका सिकता ॥३८॥
आरा हारा कारा तारा धारा भिधाच्छिदा मेधा । रेखा विधा गुहा वपवसा क्षिया क्षिपमृजा लेखा ॥३९॥
चूडा पीडा क्रोडा घोटा[13] घण्टा जटा सटा खट्वा । यात्रा मात्रा भस्त्रा दष्ट्रा ग्रीवा वरत्रेधा ॥४०॥
जिह्वा स्पृहा स्फुलिङ्गा मञ्जिष्ठा रोचना कुथाथ[14] कन्था । मञ्जूषा गण्डूषा मूषा सास्ना रसा रास्ना[15] ॥४१॥
शाखा शिखा शलाका कक्षा स्वाहा स्वधा सुधा गोधा । यूकोकोलका कपया कृपा निशा मेखला लाक्षा ॥४२॥
छाया माया पेया दया बलाका कशेष्टिकेपीका । युक्ता[16] रम्भा सेना समा सभा पिण्डिका पृतना ॥४३॥
योग्या लता पताका शरद्दरद्दषदुपानद्वत्सम्पत्[17] । विपदापत् प्रतिपच्युत्संसत्परिषत्समित् क्षुद्भुत्[18] ॥४४॥
संयत् प्रावृट्वि[19]प्रुड्विड्वणिक्सुमनसार्शाः । भारुछादि[20]र्गीर्धूः पृथ्वीर्द्वार्वाक् त्वक् स्फिग्रुक् स्रक् स्रुक् ॥४५॥
पात्रादिवर्जिता[21]दन्तोत्तरपदको द्विगुः समाहारे । अक्षादन्वान्तो[22] वा नपुंसकं ङेऽर्थसो गुणिवत् ॥४६॥

[इति स्त्रीलिङ्गम्]

स्त्रीपुंसेऽशनिर्योनि[23] श्रोण्यूर्मिगविषुधिमणितरण्यरणि । तुटियष्टिमुष्टिपाटलिमरीचिमषिबस्तिशाल्मलयः ॥४७॥
कर्कन्धुसिन्धुबार्क्षीपुंकंड्वाणीमृत्युकिष्कुतिथिरेणुः । आपत्यतद्धितोऽचिः स्त्रीनपि नपि पुसि चार्धर्चः ॥४८॥
मधुसिन्धुसीधुकमण्डलुसक्तुसानु[24]पिप्लुषुरेणुदार्वपरे । मोदकतटाकमस्तकसरकाढककण्टकार्नाकम् ॥४९॥
वर्चस्कटङ्क चषकपिटकंशु[25]शुकपिनाकशूकवल्मीकम् । तण्डकविटङ्कनिष्ककफलकपङ्काः कल्कशुल्कौ च ॥५०॥
मूषकनिदाघमञ्जकनखपुङ्खविडङ्गशृङ्गमुद्योगः । [26]व्रजकुण्डकूर्चपुच्छध्वजकपाटकुटकूटाः ॥५१॥
[27]कवटकिरीटपिष्टं कवटानटनिकटशकट[28]मथ नीडाः । दण्डाण्डमण्डखण्डाः कुक्कुटदृढकाण्डरणवरणाः[29] ॥५२॥
कार्षापणबाणव्रणसुवर्णतृणवर्णवारबाणानि । द्रोणसवर्णौ भूषणतोरणमपराह्णधृतभूताः ॥५३॥
वृत्तवेष्टितलोहितपलितैरावतशतायुतप्रयुताः । [30]चुस्तवसन्तो हस्तः[31] पुस्तो यूथद्वियूथौ च ॥५४॥
गृथप्रोथौ तीर्थः कुकुदार्वादयोधमौपधकबन्धौ । अष्टापदायुधदीनस्थानासनमलिनपुलिनानि[32] ॥५५॥

१ –त्रच्छात्राः क०, म० । २ चषालभ्रमल क०, म० । ३. देवला क०, म० । ४ –दीरप्राण्य–क०, म० । ५. –स्तस्मीन्य–क०, म० । ६ –मेति क०, म० । ७ तुटि क०, म० । ८. पेश्यश्रीः क०, म० । ९. मुष्ट्या –क० म० टि० । १० मासीसिका क० –मासिका म० । ११ शिलालीला क०,म० । १२. रथ्या क०, म० । १३. घोटा क०, म० । १४ था क–क०, म० । १५. रास्ना क०, म० । १६. मुक्ता भम्भा क०, म० । १७. नद्दः स–क०, म० । १८. ट् तृट् त्विट् रुट्वि–क०, म० । १९ शछहि–क०, म० । २०. दान्तोत्तरपदको क०, म० । २१. दन्तान्तो–क०, म० । २२ नि यो–क०, म० । २३ कण्ड्वाणि क०, म० । २४. षष्टि–क०, म० । २५ शाक क०, म० । २६. कुञ्ज क० । कञ्ज म० । २७ कर्वड क०, म० । २८ मर क०, म० । २९. रणचरणाः क०, म० । ३० चुस्त क०, म० । ३१ पूस्तो क०, म० । ३२ नलिन क०, म० ।

खलीनसमानद्विपिनि चन्दनशतमानमानशयनानि । स्तैनापिजानयौवननिधनविमानौदनवितानाः ॥५६॥
उद्यानयानकुणपकुतपविटपाः शूर्पमण्डपद्वीपाः । विम्बं जृम्भ सङ्क्रमदाडिमगुल्माश्रमक्षेमाः ॥५७॥
ब्रह्मोद्याम[न] हिमकुसुमकुट्टिमकर्मनामलोमहिमम् ।
गोमयकपायमलयाव्ययवलयहिरण्यश्च[1] विलयानि ॥५८॥
मध्यारण्यो शल्यं विहारपुरचक्रतोमराङ्गारः । क्षीरान्धकारशेखरशिखरोर्शीरातिखरवप्राः ॥५९॥
प्रतिसरससहस्रराष्ट्र वज्रसमरतिमिरपारवारार्द्राः । कान्तारजठरकन्धरशरीरकेदारदरवस्त्रम् ॥६०॥
सूत्रं पात्रं पत्रच्छत्रपत्राणि[2] वक्त्रनेत्रमलाः । मण्डलतमूलवल्कलमृणालनलमुसलबलवालाः ॥६१॥
शूलपलालवषालोत्पलखण्डलहलशकलफलमुकुलाः । नीलप्रवालकुण्डलसालकमलशीलमूलानि ॥६२॥
मङ्गलनिगलकपालाहलतैलविशालपार्श्वपौत्रीवाः[3] । रावशरावौ सैन्धवपूर्वप्रग्रीवगाण्डीवाः ॥६३॥
काशाकाशकशाङ्कुशकोशकलशकर्परवर्षविषयूपाः । [4]विषमाषकरीशरसाम्बरीपकार्पासनिर्यासे ॥६४॥
कसचमसकासमासौपवासदिवसा नृकसगृहपटहाः । देहोऽसु शङ्खपद्मौ स्वतो द्विधैतेऽर्थतः केचित् ॥६५॥

[इति उभयलिङ्गम्]

त्रिषु शृङ्गलवल्लवरविषाणहरीतकबिभीतकामलकाः । भल्लातकतटपात्राः परलिङ्गं द्वन्द्वतत्पुरुषे ॥६६॥
अतिवर्तन्ते स्वार्थं प्रत्ययकाः प्रकृतिलिङ्गवचनानि । प्रकृतिर्न निवासादिषु हरीतकीत्यादिका व्यक्तिम् ॥६७॥
वचनं तु खलतिकादिर्बहुविषयोत्तरपदं समासे नुः । साम्यादगुणवचनानामाश्रयतो लिङ्गवचनानि ॥६८॥

[इति त्रिलिङ्गम्]

स्त्रीपुंनपां सहोक्तौ वर नदति युष्मदस्मदन् सख्या । लिङ्गे सुङ् धात्वव्ययवाक्यमवचनं च बहुलमिदम् ॥६९

पञ्चतोऽनेकतरस्यान्यादेर्दक् स्वमोः ॥१।२।२॥ नपुंसकाभिधायिनामन्यादीना सर्वाद्यन्तर्वर्तिनाना पञ्चाना शब्दरूपाणा तत्सम्बन्धिनो सु अम् इत्येतयो दगागमो भवति एकतरशब्द वर्जयित्वा । अन्यत्तिष्ठति[5] । अन्यतरत् । इतरत् । कतरत्तिष्ठति । कतरत्पश्यति[6] । यतरत् । ततरत् । कतमत्तिष्ठति । कतमत्पश्यति[7] । यतमद् ।[10] एकतमत् ।[11] पञ्चत इति किम् ? नेम तिष्ठति । नेम पश्य । अन्यतरस्मिन्[12] किम् ?[13] एकतर तिष्ठति । एकतर पश्य । नपुंसकस्येति किम् ? अन्यपुरुष । तत्सम्बन्धिनो स्वमोर्ग्रहणादिह न भवति—[14] प्रियान्यम् । अन्यन्यम् कुलम् । इह तु भवति—[15] परमान्यत्तिष्ठति । परमान्यत्पश्यसि ।

अलुग्वा ॥१।२।३॥ अलुग्यो 'न डान्लुक्' [१।२।१२६] इति लुचोऽभाव प्रतिषेध उक्त स नपुंसकस्य वा भवति । हे चर्मन्, हे चर्म । हे दण्डिन्[16], हे दण्डिकुलम् ।

अतोऽम् ॥१।२।४॥ अकारान्तस्य नपुसकस्य सम्बन्धिनो स्वमोरमित्ययमादेशो भवति । श्लुचोऽपवाद । कुण्ड तिष्ठति । कुण्ड पश्य । धन तिष्ठति । धन पश्य । अत इति किम् ? दधि[17] पश्य । दधि तिष्ठति । तकारो लाघवार्थ । अविधानं ह्यमर्थम्—अतिजरसं कुल तिष्ठति ।

श्लुक् ॥१।२।५॥ नपुसकस्य सम्बन्धिनोः स्वमो श्लुक् शकारविशिष्टो लोपो भवति । दधि तिष्ठति । दधि पश्य । मधु ।[18] उदश्वित् । शकारः सर्वादेशार्थः श्लुचीति कार्यार्थश्च । तत्कुलम् । यत्कुलम् ।

---

१ -ण्य खवियानि म० । -ण्यश्च वियानि क० । २ पवित्राणि म० । ३ तमाल क०, म० । ४. पूल क०, म० । ५ योग्री क०,म० । ६ मिष क०,म० । ७ -ष्ठति, अन्यत्पश्य, अन्य –क०,म० । ८ पश्यसि क०, म० । ९ पश्यसि क०, म० । १० मद्, ततमद्, एकत–क०, म० । ११. मत्, हे एकतमत्, पञ्च–क०, म० । १२ अनेकतर—क०, म० । १३ वैकादिति डतरप्रत्ययः म०, टि० । १४ प्रियोऽन्यो यस्य तत् म०, टि० । १५ परमं च तदन्यच्च इति परमान्यत् म०, टि० । १६ ग्रीह्यादतोऽनेकाच इति मत्वर्थे, इन् म०, टि० । १७. दधि तिष्ठति, दधि पश्य, म०, टि० । १८. उदश्वित्मथितं तक्रम्, म०, टि० ।

जरसो वा ॥१।२।६॥ जरसन्तस्य नपुंसकस्य स्वमोः श्लुग् भवति वा । अतिजरः[1] अतिजरसं, कुलं तिष्ठति । अतिजरः, अतिजरस कुलं पश्य ।

इको लुक् ॥१।२।७॥ इगन्तस्य नपुंसकस्य सम्बन्धिनो स्वमो श्लुग् लुग्वद्वा भवति = लुग्भवतीत्यर्थः । हे वारे[2], हे वारि । हे त्रपो, हे त्रपु । हे जतो, हे जतु । हे कर्त । हे कर्तृ । प्रियतिमृ[3] कुलं तिष्ठति, प्रियत्रि कुलं तिष्ठति । प्रियतिसृ कुल पश्य, प्रियत्रि कुलं पश्य । इक इति किम् ? यत्कुलम्, तत्कुलम् । श्लुचो लुग्वचनमसः सर्वलोपार्थम् ।

पुमाँश्चान्यतोऽप्यापि ॥१।२।८॥ यदिगन्तं शब्दरूपमन्यतो विशेष्यवशान्नपुंसकार्थे वर्तते तदर्थोऽजादावापि टादौ सुपि परे पुंवद्भवति वा, नम्ह्रस्वौ न भवत इत्यर्थः । ग्रामण्या[4] कुलेन, ग्रामणिना कुलेन । ग्रामण्ये कुलाय, ग्रामणिने कुलाय । ग्रामण्य कुलात्, ग्रामणिन कुलात् । ग्रामण्य कुलस्य, ग्रामणिनः कुलस्य । ग्रामण्योः कुलयो, ग्रामणिनो कुलयो । ग्रामण्या कुलानाम्, ग्रामणीना[5] कुलानाम् । ग्रामण्या कुले, ग्रामणिनि कुले । एवं कर्त्रा, कर्तृणा । कर्त्रे, कर्तृणे । कर्तुः, कर्तृण. । कर्त्रो, कर्तृणो । कर्तरि, कर्तृणि । शुचये, शुचिने । मृदवे, मृदुने । शुचे, शुचिनः । मृदो, मृदुन । शुच्यो, शुचिनो. । मृद्वो, मृदुनो । शुचौ, शुचिनि । मृदौ, मृदुनि । चित्रगवे, चित्रगुणे । अतिरायां, अतिरिणा । अतिनावा, अतिनुवा । अहंयवे, अहयुने । अन्यत इति किम् । त्रपुणे । जतुने । पीलुने,[6] फलाय । अचीति किम् ? ग्रामणीभ्याम्[7], ग्रामणीभिः कुलैः । आपीति किम् ? ग्रामणिनी कुले, शुचिनी कुले । इगिति किम् ? कीलालपेन कुलेन । चेन वाऽनुकर्षणमुत्तरत्राविकल्पार्थम् ।

दध्यस्थिसक्थ्यक्ष्णोऽनङ् ॥१।२।९॥ दधि अस्थि सक्थि अक्षि इत्येतेषामिगन्तानां नपुंसकानामनङादेशा[8]ऽजादावापि परे । दध्ना, दध्ने । दध्नि, दधनि । अस्थ्ना[9], अस्थ्ने । अस्थ्नि, अस्थनि । सक्थ्ना, सक्थ्ने । सक्थ्नि, सक्थनि । अक्ष्णा । अक्ष्णे । अक्ष्णि,अक्षणि । परमदध्ना । परमास्थ्ना[10] । परमाक्ष्णा । अतिदध्ना प्रियमक्ष्णा । अतिसक्थ्ना । प्रियाक्ष्णा पुरुषेण ।[11] अतिदध्ना स्त्रिया प्रियदध्ना स्त्रिया प्रकृतावपि नप्यस्यं योगस्योत्तरत्रानुवृत्तेर्नमबाधनेनार्थाऽनङ् भवति[12] । अचीति किम् ? दधिभ्याम्, दधिभि । आपीति किम् ? दध्निनो, दधीनि । नपुंसकस्येति किम् ? दधिना, दधये । दधिनामि कश्चिद्धानशीलो वा ।

नम् सुपि ॥१।२।१०॥ इगन्तस्य नपुंसकस्य, अजादौ सुपि परे नमागमो भवति । वारिणी । त्रपुणी । कर्तृणी कुले । वारिणा । वारिणे । वारिणः । वारिणो । वारीणाम् । वारिणि । सुपीति किम् ? तौम्बुरवं चूर्णम् । प्रत्ययः प्रकृत्यादेरितीह न भवति—बहुवारी, निर्वारी कूपौ । अचीति किम् ? हे त्रपो, हे जतो । इक इति किम् ? काण्डये, कुड्ये । नपुंसकस्येति किम् ? मुनी । साधू ।

शावचः ॥१।२।११॥ अजन्तस्य नपुंसकस्य शौ 'जश्शसः शिः' [२।१।१६७] इत्येतस्मिन्[13] परे नमागमो भवति ।[14] वनानि । धनानि । वारीणि । त्रपूणि । कर्तृणि कुलानि । अच इति किम् ? विमलदोवि । चत्वारि । अहानि । अच इति प्रत्याहार उत्तरार्थः ।

---

१ अरामतिक्रान्तम्–[इति] समासे न्यग्गो स्यत इति ह्रस्वः अतिजर इति जाते । अतोऽमित्यमि जराया ऊसिन्द्रस्याचि इति ऊस्, पुनर्लुक् म०, टि० । २ ह्रस्वैचो लुचि चारेङ् म०, टि० । ३ प्रियास्तिस्रो यस्य तत् लुचि सोः स्थानिवद्भावात् त्रिचतुरमिति तिस्रादेशः श्लुचि न भवति । म०,टि० । ४. प्रत्यये सुधिणः इति यण् म० टि० । ५ नस्य स्थानिवद्भावे सति अतिसृचतुर इति वचनादेव एकहल्व्यवधानेऽपि दीर्घो भवति क०, म० । ६. पीलोर्विकार इत्यत्र विकार इत्यण् । फले इति विकार प्रत्ययस्य श्लुक्, म०, टि० । ७. -भ्यां कुलाभ्याम् क०, म० । ८ शो नित्यं भवति तत्सम्बन्धिन्यन्यसम्बन्धिनि वाऽजादावापि परे क०, म० । ९. स्नो नो ह्रस्वमात् म०, टि० । १० -स्थ्ना, परमसक्थ्ना, परमा—क०, म० । ११ अतिदध्न्या स्त्रिया । प्रियदध्न्या क०, म० । १२ बाधया क०, म० । १३. -स्मिन् शौ परे क०, म० । १४ -न्यदिति दीर्घः म०, टि० ।

जलाम् ॥१।२।१२॥ अच. परा या जल्जातिस्तदन्तस्य नपुसकस्य शौ परे नित्यं नमागमो भवति। उत्तरविकल्पापवादः। उदश्विन्ति। पयासि[1]। यशासि। [2]काष्ठतङ्क्षि। जलामिति जातौ बहुवचनम्। अच इति किम्? [3]बहूजि। सूजि।

ततः प्रागार्यवज्रस्य ॥१।२।१३॥ जलन्तस्य नपुसकस्य शौ परे ततोऽत्या या जल्जाति [4][तस्याः] प्रागार्यवज्रस्य मतेन नम् भवति। बहून्जि। महोन्जि। सून्जि। आर्यवज्रस्येति किम्? बहूजि। महोजि। सूजि। आर्यवज्रादन्येषा न भवति। तत इत्युक्तेर्नपुसकात् प्राङ्माभूदिति जल पूर्वो यथा स्यादिति।

अज्झेः शतुः ॥१।२।१४॥ अद्भवति झिर्यस्मात् ततोऽज्झेर्झिरुक्ताज्जक्षादेश्च पञ्चकात् परो यः शतृप्रत्ययस्तदन्तस्य नपुंसकस्य शौ परे आर्यवज्रस्य आचार्यस्य मतेन नम् भवति। **'न नम्'** [१।२।१५] इत्यस्यायमपवाद.। ददन्ति[5] कुलानि, ददति कुलानि। दधन्ति, दधति। जक्षन्ति, जक्षति। जाग्रन्ति, जाग्रति। दरिद्रन्ति, दरिद्रति। शासन्ति, शासति। चकासन्ति, चकासति कुलानि। आर्यवज्रादन्येषा न भवति। अज्झेरिति किम्? पचन्ति[6], पठन्ति कुलानि। शतुरिति किम्? ददानानि, दधानानि कुलानि। शाविति किम्? ददती, दधती कुले।

न नम् ॥१।२।१५॥ अज्झेः परो यः शना तदन्तस्य शब्दरूपस्य यो नम् प्राप्नोति स सर्वोऽपि न भवति। [7]ददती स्त्री। दधती स्त्री। ददती कुले। दधती कुले। ददन्। दधत्। दधती। दधन्। दधतम्। दधता। ददत्। ददती। ददन्। ददतम्। ददती। जक्षत्। जक्षती। जक्षन्। जक्षतम्। जक्षती। नम्ग्रहण नम्मात्रप्रतिषेधार्थम्।

ङीग्योर्वादशनः ॥१।२।१६॥ शनावर्जिनादवर्णान्परो य शना तदन्तस्य ङी गी इत्येतयो परयोर्नमागमो भवति वा। तुदन्ती स्त्री, तुदती स्त्री। तुदन्ती कुले, तुदती कुले। करिष्यन्ती स्त्री, करिष्यती स्त्री। करिष्यन्ती कुले, करिष्यती कुले। भान्ती स्त्री[8]। भान्ती कुले, भाती कुले। ङीग्योरिति किम्? तुदना कुलेन। [9]अदिति किम्? सुन्वती स्त्री। सुन्वती कुले। तन्वती स्त्री। तन्वती कुले[10]। रुदन्ती[11] स्त्री। रुदन्ती कुले। अशन इति किम्? क्रीणती[12] स्त्री। क्रीणती कुले। अत्र—आदिति [13]निषेधादशन इति प्रतिषेधाच्च लोपदीर्घाभ्या पूर्व नम् भवति। भूतपूर्वतया वा अत इत्यनुवृत्त्या अशन इति वचनात् परत्वादन्तरङ्गत्वाच्च प्रथम श्लुक् पश्चाच्छदित्यदतीत्यादौ न भवति।

शप् श्यात् ॥१।२।१७॥ अवर्णात् शप श्याच्च परस्य शतुर्ङीग्यो परत नित्य नमागमो भवति। भवन्ती स्त्री, भवन्ती कुले। विद्यन्ती स्त्री, विद्यन्ती कुले। आत् किम्? अदती स्त्री, अदती कुले। घ्नती स्त्री। नित्यार्थं वचनम्।

जश्शसः शिः ॥१।२।१८॥ नपुंसकस्य सम्बन्धिनोर्जश् शस् इत्येतयो. स्थाने शि इत्ययमादेशो भवति। वदनानि तिष्ठन्ति। वदनानि पश्य। वारीणि। त्रपूणि। कर्तॄणि। पयांसि। यशांसि। सुबधिकारादिह न भवति—कुण्डशो[14] ददाति। वनशः प्रविशति। शकार सर्वादेशार्थः।

---

१. -स्महत्, इति दीर्घः म०, टि०। २ काष्ठं नक्षतीति काष्ठतट्। तसू तनूकरण क्विपि, संयोगस्येति कलुक्, जलो जश्, काष्ठतट्, काष्ठतड्, काष्ठतक्षी, काष्ठतङ्क्षि। स्नां जश्यपदान्ते म० टि०। ३. ऊर्ज बलप्राणनयोरिति धातुः, क्विप्, म०, टि०। ४ -तेः प्रागा—क०, म०। ५ डुदाञ् दाने ह्वादिः, सस्लडुवर्स्यंति शतृ, द्वित्वं, बाश्य अचोऽण्, इटि चातो लुक्, म०, टि०। ६ उगिदचो नेदादेरिति नम् म०, टि०। ७. अत्र ङीग्योर्वा, इति प्राप्तिः म०, टि०। ८. स्त्री। भाती स्त्री क० म०। ९ अदिति किम् क० म०। १० -ले। अदती स्त्री, अदती कुले रु—क० म०। ११ रुन्धती स्त्री, रुन्धती कुले क०, म०। १२ श्नोऽविग्रहात इति ह्रस्वः। म० टि०। १३ विशेषणाद्—क०, म०। १४ बहुलपार्थात्कारकाच्छसिष्टाशिष्टे म० टि०।

आडश्चौतो गीः [1] ॥१।२।१६॥ नपुंसकस्य आडन्त स्य च [2] शब्दरूपस्य सम्बन्धिन औकारस्य सुपः स्थाने गी इत्ययमादेशो भवति । वने तिष्ठत. । वने पश्य । वारिणी । त्रपुणी । पयसी । यशसी । आड खल्वपि—शाले तिष्ठत. । शाले पश्य । बहुराजे [3] नगर्यौ । आड इति डिद्ग्रहणं किम् ? कीलालपौ पुरुषौ । तत्सम्बन्धिविज्ञानादिह न भवति—प्रियशालौ ग्रामौ । अतिशालौ पुरुषौ । इह तु न भवति—परमशाले तिष्ठतः । परमशाले पश्येति । नमा व्यवधानेऽपि भवति । गीति गकारः 'गितः' [१।१।१००] इति प्रतिषेधार्थः ।

ङितो याट् ॥१।२।२०॥ आडन्तस्य सम्बन्धिनो ङकारानुबन्धस्य सुपो याट्(ड)इत्ययमागमो भवति । शालायै । शालाया. [4] । शालायाम् । बहुराजायै । बहुराजाया [5] । बहुराजायाम् । ङित इति किम् ? शालाः तिष्ठन्ति । शालाः पश्य । टित्त्वेन पराधिकरण न्यशादामित्येवमर्थम् । दीर्घ ऐज् दीर्घार्थ [6] । अकार उच्चारणार्थ. स्यात् ।

टौस्येत् ॥१।२।२१॥ आडन्तस्य सम्बन्धिनो. टा ओस् इत्येतयो परत एकारादेशो भवति । शालया। परमशालया । शालयो । परमशालयोः । बहुराजया । बहुराजयो. । आड इति किम् ? पुरुषेण । प्रियशालेन । अतिशालेन । नकारोऽनन्देहार्थ ।

इदुतो गिग्वौतोऽस्त्रेः ॥१।२।२२॥ इकारादुकाराच्च परस्य औकारस्य सुपः स्थाने यथासंख्यं गि गु इत्येतावादेशौ भवत स्त्रीशब्देकार वर्जयित्वा । मुनी तिष्ठत । मुनी पश्य । यती तिष्ठत । यती पश्य । साधू तिष्ठत । साधू पश्य । इदुत इति किम् ? वृक्षौ । कीलालपौ । रायौ । नावौ । तकार किम् ? नद्यौ । वध्वौ । औत इति किम् ? मुनि । साधु । अस्त्रेरिति किम् ? अतिस्त्रियौ पुरुषौ । अतिशस्त्री पुरुषौ, इत्यत्र अर्थवद्ग्रहणे नानर्थकस्य इति प्रतिषेधो न भवति । अस्त्रेरितीदमेव ज्ञापकमियुवपवादेनेदुत्कार्यं भवतीति, तेन अतिस्त्रिय , सहस्त्रिय , इत्यादि सिद्ध भवति । मकारो 'गितः' [१।१।१००] इति प्रतिषेधार्थ. ।

जस्येङ् ॥१।२।२३॥ इकारस्य उकारस्य च जसि परे एङादेशो भवति । मुनय । साधव । बुद्धयः । धेनव । जसीति किम् ? मुनि । साधु ।

ङिरौत् ॥१।२।२४॥ इकारादुकाराच्च परस्य ङि इत्यस्य [7] स्थाने औ इत्ययमादेशो भवति । सख्यौ । पत्यौ । ङिरौत् इत्यभेदनयेन निर्देश तकारश्चासन्देहार्थ ।

न्यंशादाम् ॥१।२।२५॥ नी इत्येतस्मादंशादवयवाद् याट. आटश्च परस्य ङीतीकारस्य स्थाने आमित्ययमादेशो भवति । नियाम् । ग्रामण्याम् । शालायाम् । बहुराजायाम् । नद्याम् । वध्वाम् । न्यंशादिति किम् ? शरदि । धरदि । ङीत्यवयवे वृत्तेरशात् परत्वम् ।

घेर्ङितीनाटि ॥१।२।२६॥ घिसज्ञकात् परो यो ङिस्तस्यानाट. ङौ इत्ययमादेशो भवति । मुनौ । पटौ [8] । बुद्धौ । धेनौ । घेरिति किम् ? सख्यौ । पत्यौ । पतौ इति केचित् [9] । अनाटीति किम् ? बुद्ध्याम् । धेन्वाम् । डकारो 'ङित्यन्त्याजादेः' [१।२।१०७] इति लुगर्थ ।

नाखौ टः ॥१।२।२७॥ घेरस्त्रीविषयस्य ट. इति तृतीयैकवचनस्य ना इत्ययमादेशो भवति । मुनिना । साधुना । मुनिपतिना । नरपतिना । अस्त्री ट इति किम् ? मुनि । साधु । अस्त्रीग्रहणं किम् ? बुद्धया । धेन्वा । पुंग्रहणं न कृतम् । अमुना कुलेन, इति नपुंसके'ना'भावार्थम् । नमि हि गुरसन् भवति । घेरिति किम् ? सख्या । पत्या ।

---

१. गी क०, म० । २. च इति नास्ति क०, म० । ३ मकान्बहुर्माहेर्नच इत्याङ् म० टि० । ४. शालायाः, शालायाः, शालायाम्, क०,म० । ५ बहुराजायाः, बहुराजाया बहुरा—क०,म० । ६ ङितो याट्, इत्यनुक्त्वा दीर्घकरणं एदे इति लुग्बाधनार्थम् म०टि० । ७. अतिस्त्रयः,सहस्त्रयः, क०,म० । ८ इत्येतस्य क०,म० । ९ सुङ्यवयवात् क०,म० । १० साधौ म० । ११ इति च के—क०,म० । तथा चान्यमताचार्यप्रयोगः क०, म० ।

ङ्ययेङ् ॥१।२।२८॥ घिसज्ञकस्य इ इकारादौ सुपि पर एडादेशो भवति। मुनये। साधवे। बुद्धये। धेनवे। बुद्धे.। धेनो। डीति किम्? मुन्यो'। साध्वो। बुद्धयै। धेन्वै। सुपीति किम्? शुची[1]। पट्वी।

स्त्रिया वाट् ॥१।२।२९॥ स्त्रिया स्त्रीलिङ्गमर्थमभिदधत इदुदन्ताच्छब्दात् परस्य तत्सम्बन्धिनोऽन्यसम्बन्धिनो वा ङित. सुप आडागमो भवति वा। बुद्धयै, बुद्धये। धेन्वै, धेनवे। बुद्धया, बुद्धेः। धेन्वा, धेन्वो। बुद्धयाम्, बुद्धौ। धेन्वाम्, धेनौ। मुष्ट्यै, मुष्टये। इष्ट्यै, इष्टये। शुच्यै, शुचये। पट्वै, पटवे। पत्यै, पतये[2]। जीवपत्यै, जीवपतये स्त्रियै पुरुषाय वा। प्रियबुद्ध्यै, प्रियबुद्धये। अतिधेन्वै, अतिधेनवे। कन्यापत्यै, कन्यापतये स्त्रियै पुरुषाय वा। स्त्रिया इति किम्? मुनये। साधवे। पञ्चम्या कार्यविशेषाद्— आटो ङिदादित्वम्।

य्वोऽपुंसः ॥१।२।३०॥ अपुंसि स्त्रिया वर्तमानादीकारान्तादूकारान्नाच्च शब्दरूपात् परस्य तत्सम्बन्धिनोऽन्यसम्बन्धिनो वा ङित सुपो नित्यमाडागमो भवति। नद्यै। लक्ष्म्यै। नद्या। लक्ष्म्याः। नद्याम्। लक्ष्म्याम्। कुवै। वध्वै। कुर्वा। वध्वा। कुर्वाम्। वध्वाम्। अतिलक्ष्म्यै। अतिवध्वै स्त्रियै पुरुषाय वा। खरकुटीव खरकुटी, तस्यै खरकुट्यै स्त्रियै पुरुषाय वा। कुमारीव आचरतीति कुमारी, तस्यै कुमार्यै स्त्रियै पुरुषाय वा। आमलक्या फलाय, आमलकाय। अतिकुमार्यै। अतिकुमार इत्यत्र य्व इत्यलाश्रयत्वेन स्थानिवद्भावाभावाद् ईकारोकारान्तता नास्तीति आट् न भवति। य्व इति किम्? मात्रे। दुहित्रे। बुद्धये। धेनवे। अपुस इति किम्? ग्रामण्ये स्त्रियै। खलप्वे स्त्रियै।

वेयुवोऽस्त्रियाः ॥१।२।३१॥ इयुवादेशभाविनौ यावीकारोकारौ तदन्तादपुमर्थात् स्त्रीवृत्ते शब्दरूपात् परस्य तत्सम्बन्धिनोऽन्यसम्बन्धिनो वा ङित पुमो[3] वा आडागमो भवति। नित्यापवाद, स्त्रीशब्द वर्जयित्वा। श्रियै, श्रिये। भ्रुवै, भ्रुवे। श्रिया, श्रिय। भ्रुवा, भ्रुव। श्रियाम्, श्रियि। भ्रुवाम्, भ्रुवि। अतिश्रियै, अतिश्रिये। पृथुश्रियै, पृथुश्रिये। अतिभ्रुवै, अतिभ्रुवे। पृथुभ्रुवै, पृथुभ्रुवे स्त्रियै पुरुषाय वा। इयुव इति किम्? आध्यै। प्रध्यै। वर्षाभ्वै। पुनर्भ्वै। इयुवोऽनुक्त्वाप्येकवचनमार्द्रे प्राग्भावार्थम्। तेनाऽऽर्द्रान्त प्राग्भवति। अस्त्रिया इति किम्? स्त्रियै। स्त्रिया। स्त्रियाम्। परमस्त्रियै। परमस्त्रिया। अपुस इति किम्? यवक्रियै। कण्टप्रुवे स्त्रियै।

नामः ॥१।२।३२॥ इयुवादेशभाविनौ यावीकारोकारौ तदन्तादपुमर्थाच्छब्दरूपात् परस्य तत्सम्बन्धिनोऽन्यसम्बन्धिनो वा आम षष्ठी बहुवचनान्तस्य नामित्ययमादेशो भवति वा नित्यापवाद स्त्रीशब्दं वर्जयित्वा। श्रीणाम्, श्रियाम्। भ्रूणाम्, भ्रुवाम्। अतिश्रीणाम्, अतिश्रियाम्। पृथुश्रीणाम्, पृथुश्रियाम्। अतिभ्रूणाम्, अतिभ्रुवाम्। पृथुभ्रूणाम्, पृथुभ्रुवाम् स्त्रीणा पुरुषाणा वा। अस्त्रिया इति किम्? स्त्रीणाम्। परमस्त्रीणाम्।

नमृहस्वाट्साटः ॥१।२।३३॥ नमन्तादभ्रस्वान्तादाडन्तात् मस्मवदाटश्च शब्दरूपात् परस्य आम. षष्ठीबहुवचनस्य स्थाने नित्य नामित्ययमादेशो भवति। वारीणाम्। त्रपूणाम्। ह्रस्वात्-वृक्षाणाम्। वनानाम्। मुनीनाम्। साधूनाम्। बुद्धीनाम्। धेनूनाम्। पितॄणाम्। आङ'—शालानाम्। बहुराजानाम्। साट'—नदीनाम्। वधूनाम्। स्त्रीणाम्। लक्ष्मीणाम्। नमृग्रहण परानपि विधीन् बाधते इति ज्ञापनार्थम्। तेन वारीणि इत्यादि सिद्ध भवति।

रण्णां सङ्ख्यानाम् ॥१।२।३४॥ रेफान्तस्य[5] नकारान्तस्य च सङ्ख्यावाचिन. शब्दस्य सम्बन्धिन आमः[6] नामित्ययमादेशो भवति। चतुर्णाम्। परमचतुर्णाम्। षण्णाम्। परमषण्णाम्। पञ्चानाम्। सप्तानाम्। परमसप्तानाम्। अष्टानाम्। परमाष्टानाम्। रण्णामिति किम्? त्रिंशताम्[7]। चत्वारिंशताम्। आका-

---

१. सुचि क०, म०। २ पत्यै, पतये क०,म०। ३ सुपो—क०,म०। ४ माटः—क०,म०। ५. —स्थ षकारान्तस्य नका—क०, म०। ६. आमः षष्ठीबहुवचनस्य स्थाने क०,म०। ७. त्रिंशताम्। चत्वारिंशताम्। क०, म०।

रान्तस्यापि नाम् । 'वाष्ट्रण आः' [१।२।२१६] इति व्यवस्थितविभाषा वा इति अष्टानाम् इति नित्यं नाम् । संख्यानामिति किम् ? गिराम् । विप्रुषाम् । मघनाम् । बहुवचननिर्देश षष्ठ्यभिव्यक्त्यर्थ., तेन तत्सम्बन्धिन एव भवति नान्यसम्बन्धिन । प्रियचतुराम् । अतिचतुराम् । अतिषपाम् । प्रियषष्ठ्याम् । अतिषष्ठ्याम् ।

श्रेस्त्रयः ॥१।२।३५॥ त्रिशब्दस्याऽऽम सम्बन्धिनस्त्रयादेशो भवति । त्रयाणाम् । परमत्रयाणाम् । आम्सम्बन्धिविज्ञानादिह न भवति—अत्रीणाम् । अतिस्त्रीणाम्[1] । तिसृणाम् इत्यत्र 'स्पर्धे,[2] बुद्धयते ।

मोऽणोऽमः ॥१।२।३६॥ अण परस्याऽऽम आदेर्मकारादेशो भवति । वनम् । धनम् । श्रमणम् । संयतम् । मुनिम् । साधुम् । बुद्धिम् । धेनुम् । नदीम् । वधूम् । अण इति किम् ? रायम् । नावम् ।

जराया ङसीन्द्रस्याचि ॥१।२।३७॥ जराशब्दस्य तत्सम्बन्धिनि अन्यसम्बन्धिनि वा अजादौ सुपि पर इन्द्रस्याऽऽचार्यस्य मतेन ङस् इत्ययमादेशो भवति । जरस । जरसा[3] । जरसे । जरस । एकदेशविकृतस्यानन्यत्वात् । अनिजरसौ । अनिजरसाम् । अतिजरासि कुलानि । अतिजरसा । अनिजरसे[4] । अतिजरस. आगतम् । अनिजरस स्वम् । अनिजरसो । इन्द्रस्येति किम् ? अन्येषा न भवति । जरे । जरा । जराम् । जरया । अचीति किम् ? जराभ्याम् । जराभि । सुपीति किम् ? जराग्रम्, जारः । जारेय[5] । ङकार. 'शिदङिदल्' [१।१।४६] इति पर्युदासार्थ : ।

धातोस्तिकारकसमस्तानेकाचोऽतत्संयोगाद्यङ्यः ॥१।२।३८॥ तिना कारकेण च यो धातु समस्त कृतसमासो यश्चानेकाच् तयोर्य्वादीवर्णौ तयोरजादौ सुपि परे यङादेशो भवति न चेत्तौ इवर्णोवर्णौ तस्य धातोरवयवात् सयोगात् परौ भवत । सुल्वौ । सुल्व । सुल्वम् । सुल्वौ । सुल्व । सुल्वा । सुभ्वौ[6] । सुभ्व. । यवल्वौ । यवल्व: । खलप्वौ । खलप्व । शतस्वौ । शतह्वौ । अनेकाच. वस्विच्छति । वसू क्यच क्विप् । वस्वौ । वस्व । इवर्णस्य परत्वात् 'प्रत्ययेऽसुधीणः' [१।२।४०] इत्यनेनैव भवति । तद्ग्रहणमुत्तरार्थम् । धातोरिति किम् ? गुरू । साधू । तिकारकसमस्तानेकाच इति किम् ? लुवौ । लुव: । परमलुवौ । परमलुव । समस्तग्रहणादिह न भवति—यवस्य लुवौ यवस्य लुव । अतत्संयोगादिति किम् ? कटप्रुवौ । कटप्रुव । तद्ग्रहणादिह प्रतिषेधो न भवति—उल्वौ । सकृल्वौ । यजिति प्रत्याहार उत्तरार्थ । तयोरिति किम् ? पयोमुचौ । प्रनामौ । सुपीति किम् ? लुलुवतु । लुलुवु । पुपुवतु । पुपुवु । अचीति किम् ? सुलू । सुपू । भ्रूहल्श्नोश्चेयुवित्यस्यायमपवाद ।

दृन्पुनःकरवर्षाभिर्भुवः ॥१।२।३९॥ दृन् पुनर् कर वर्षा इत्येतै सह समस्तस्य भू इत्येतस्य क्विबन्तस्य य उवर्णस्तस्याजादौ सुपि परे यङादेशो भवति । दृन्भ्वौ । दृन्भ्व[7] । वर्षाभ्वौ । वर्षाभ्व । एतैरिति किम् ? स्वयम्भुवौ । प्रतिभुवौ[8] । पूर्वेणैव सिद्धे नियमार्थं वचनम्, एतैरेव भुवो नान्यैरिति ।

प्रत्ययेऽसुधीणः ॥१।२।४०॥ [10]तिकारकेण च यो धातु कृतसमास., यश्चानेकाच्, तयो सुधि इण् इत्येतद्वर्जितयोरिवर्णस्याजादौ प्रत्यये परे यङादेशो भवति न चेत्स इवर्णस्तस्य धातोरवयवात् सयोगात् परो भवति । सुन्यौ । सुन्य । सुन्यम् । सुन्यौ । सुन्य. । सुन्या । सेनान्यौ । सेनान्य. । सेनान्यम् । सेनान्यौ । आध्यौ । प्रध्यौ । अनेकाचः—लुन्यु । पुन्यु, । [11]चिच्ये । चिच्याते । चिच्यिरे । निन्ये । निन्याते । निन्यिरे । पृथग्योगकरणात् 'असुधीण.' इति प्रतिषेधाच्च, इवर्णस्यैवायं विधिः । प्रत्यय इति किम् ? मुनीन्द्र । सेनानीश । सुनियन्नीयदित्यादौ प्रत्यासत्तेरावृत्त्या वा योरिति प्रत्ययविशेषणात् प्रत्ययः प्रकृत्यादेरेव विशेषणमिति वा तदिवर्णोवर्णान्तप्रत्ययविधानान्न भवति । योरिति प्रकृतिविशेषणात् परमलूनी इत्यादौ भवति । निर्दिश्यमानस्या-

---

१. अतिस्त्रीणाम् क०,म० । २ स्पर्द्धौ क०,म० । ३ जरसम् । जरसे । जरसाम् । क०, म० । ४. –रसे । अतिजर । अतिज—क०,म० । ५ क्यच इति ङण् क०, म० टि० । ६ यो र्व्यादीवर्णौ क०,म० । ७. सुभ्वौ, सुभ्वः, क०,म० । ८ –भ्वः । पुनर्भ्वौ । पुनर्भ्वः-करभ्वौ । करभ्वः । कर एव (इति) कारः एकदेशविकृतस्यानन्यत्वादिति कारभ्वौ । कारभ्वः । कार इत्यपि पाठः । वर्षा—क०,म० । ९ भुवौ । विभुवौ, मित्रभुवौ । पूर्वे—क०, म० । १०. तिना कार—क०,म० । ११ चिञ् चयने लिट् क०,म० टि० ।

ऽऽदेशा इति नेयुवौ सर्वादेशौ प्रत्यय इति कार्यविशेषणाद्वा सिद्धम् । अचीति किम् ? सुनीः । सेनानीः । असुधीण इति किम् ? सुधियौ । सुधियः । ईयतुः । ईयुः । अत एव इण् प्रतिषेधात् प्रकृतिप्रत्ययय्यो. कार्यं बलीयः । सुष्ठु ध्यायति दधातीति वा सुधीः । अस्मादेव निपातनाद्धोभावः । धातोरिति किम् ? मुनी । यती । अवन्ती । कुन्ती । तिकारकसमस्तानेकाच इति किम् ? परमनियौ । परमनियः । प्रधीयति । प्रपीयति । वियति[1] । अतत्सयोगादिति किम् ? यवक्रियौ । यवक्रियः । शिश्रियतुः । शिश्रियुः । तद्ग्रहणादिह प्रतिषेधो न भवति । उन्यौ । उन्यः । उद्वधौ । उद्वधः ।

भ्रूहल्ज्ञो श्चेयुवौ[2] ॥१।२।४१॥ भ्रूशब्दस्य हल उत्तरस्य श्नुप्रत्ययस्य धातोश्च यौ इवर्णोवर्णौ तयोरजादौ प्रत्यये परे यथाक्रमं इय् उव् इत्येतौ आदेशौ भवतः । भ्रुवौ । भ्रुवः । आप्नुवन्ति । राध्नुवन्ति । नियौ । नियः । लुवौ । लुवः । शिश्रियतुः । शिश्रियुः । लुलुवतुः । लुलुवुः । भ्रूहल्ज्ञोश्चेति किम् ? नद्यौ । हल्ग्रहण किम् ? सुश्रवन्ति[3] । चिन्वन्ति[4] । चकारो धातोरित्यस्य समुच्चयार्थः । योरिति किम् ? ग्लायति । म्लायति । प्रत्यय इति किम् ? भ्रग्रम् । न्यर्थम् । त्वर्थम्[5] । अचीति किम् ? भूभ्याम्[6] । आप्नुत । नी. । लूः । नयनम् । लवनम् । इत्यादौ परत्वादेट् भवति ।

स्त्रियाः ॥१।२।४२॥ स्त्री इत्येतस्य शब्दस्य य इवर्णस्तस्याजादौ प्रत्यये पर इयादेशो भवति । स्त्रियौ । स्त्रियः । अतिस्त्रियौ । स्त्रीणाम् इत्यत्र तु नित्यत्वाद्ग्रामेव भवति ।

वाम्शसि ॥१।२।४३॥ स्त्री इत्येतस्य य इवर्णस्तस्य अमि शसि च परे वा इयादेशो भवति । नित्यापवादः । स्त्रियम्, स्त्रीम् । स्त्रियः, स्त्रीः । अतिस्त्रियम् अतिस्त्रीम् । अतिस्त्रियः, अतिस्त्रीन् पुरुषान् ।

दो मोऽस्यादसो मादुगुश्चापिन्यसन् ॥१।२।४४॥ अदस् इत्येतस्य अवर्णान्तस्य दकारस्य मकारादेशो भवति तस्माच्च मकारात् परस्याल स्थाने गु इत्ययमादेशो भवति । स च गु पेर्नाभावाच्च अन्यस्मिन् कार्ये कर्तव्ये असन्नलब्धात्मा पूर्ववस्थो भवति । अदस इत्यावृत्त्या मात्परावयवविज्ञानात्—अपिनीति वचनाच्च गोः स्थानिलाभः । अमू । अमुम् । अमू । अमून् । अमूदृक् । अमूदृश । अमूदृक्ष । गकारो गित्कार्यार्थः । दो मा[7] इति चान्त्यप्रतिषेधार्थम् । अमुया[8] । अमुकौ । अस्येति किम् ? अद कुण्डं प्रीयात् । असौ चकारः सन्नियोग[9]-विशिष्टार्थः, तेन उत्तरत्र गुर्न विकल्प्यते । अपिनीति किम् ? अमुष्मै । अमुना । अमू[10] इति स्थानिन्यविप्लावितें[11] तद्द्वारक प्लुत । असन्निति किम् ? अमुष्मै । अमुष्मात् । अमुया । अमूभ्याम् । अमुयोः । अमू कुले । असद्वचनमादेशलक्षणाप्रतिषेधार्थं स्थानिलक्षणभावार्थम्[12] । असन् इत्यधिकार 'नोर्म्यादिभ्य' [१।२।१०१] इति यावत् ।

'असस्वेऽमू सुकर्माणः पिपठीः[13] सुभुदौजिढत्[14] ।
गुदलिष्मान् भवानिष्ट[15] राजभिश्चेति सिद्धयति ॥'

वाऽद्रेः ॥१।२।४५॥ अद्रयन्तस्य, अदसो दकारस्य वा यथासम्भव विकल्पेन मकारादेशो भवति, मकाराच्च परस्याऽऽल. स्थाने गुर्नित्य भवति । अमुद्रयड् । अदमुयड् । अममुयड् । अदद्रयड् ।

गो बहुष्वेः ॥१।२।४६॥ बहुषु वर्तमानस्य, अदसो मकारात् परस्येकारस्य स्थाने गो, इत्ययमादेशो भवति । गोरपवादः । अमी[16] । अमीभि । अमीभ्य[17] । अमीषाम् । अमीषु । बहुष्विति किम् ? अमू कुले । अमू

---

१ ति । पियति क०,म० । २ युव् क०,म० । ३. पुत्र् अभिषर्व्यादिः क०,म०टि० । ४ चिन् क०, म०टि० । ५. त्वर्थम् क०,म० । ६ भ्रूभ्याम्-क०,म० । ७ मादिति वा—क०,म० । ८ टौस्येत्-क०,म० । ९. -शिष्टा—क०,म० । १०. अमू ३ क०,म० । ११.-न्यचि प्लु—क०,म० । १२ -वार्थं च क०,म० । १३. पिपरीः क०,म० । सन्न पृ पालनपूरणयोः क०,म० टि० । १४ बुधि, मनि ज्ञाने, क०,म० टि० । १५. वहि प्रापणे । लुक्, ङ् प्रत्यये न्विः । क०,म० टि० । १६ यजिभ्रस्मृज्ञि इति नेद् क०, म० टि० । १७. अदसः शिः, क०,म० टि० । १८. बहोस्भ्येत्, क०,म० टि० । १९. आदश्चौसो गो०म० टि० ।

कन्ये । एरिति किम् ? अमूः कन्याः । अमून् नरान् । अमूभि. । अमूभ्यः । अमूषाम् । अमूषु कन्यासु । मादिति किम् ? अमुके । अमुकेभ्यः ।

न्लुक् सुबाश्रये ॥१।२।४७॥ 'नः' [१।२।४५] इति यो नकारोऽसुपः[1] सुपि परतः यत्पूर्वस्य कार्यं यच्च सुपस्तस्मिन् कर्तव्ये असन् भवति । राजभ्याम् । राजभ्य· । राजसु । सुप.—राजभिः । सुबाश्रय इति किम् ? राजीयति । राजायते[2] । वृत्रहभ्याम्, वृत्रहभिः इत्यत्र 'असिद्धं बहिरङ्गमन्तरङ्गे' इति तन्न भवति । आश्रयग्रहणमुभयपरिग्रहार्थम् । सुबाश्रय एवेति नियमार्थं वचनम् ।

श्योऽलुचि ॥१।२।४८॥ चक्षादेशस्य ख्याञ. 'शो यः' [४।२।४४] इति य. शकारादेशो यकार सलुचोऽन्यस्मिन् कर्तव्ये, असन् भवति । पुङ्ख्यानम्, पुख्यानम् । अत्रासत्त्वादमि 'पुमः खयि' [१।१।१५१] इति न भवति । नम. ख्यात्रे । 'कुपौ ⩙ क ⩙पम्' [१।१।१६६] इत्यस्य अशरीति प्रतिषेध. पर्याख्यानम् । 'श्चुष्टुस्तौ[3] नान्तरे' [१।२।५१] इति णत्वप्रतिषेधः—सौप्रख्यम् । योपान्त्यलक्षणो लुक्[4] न भवति । आख्यात 'हलो यञ आतोऽध्याख्यः' [४।१।२४७] इति नत्व न भवति । अलुचीति किम् ? सौप्रख्यम् । 'हलो यमि यमो वा' [१।१।१३२] इति लोपः । चर्त्वं खोपदेशान्न भवति ।

परे ॥१।२।४९॥ अधिकारोऽयम्—'नोर्म्यादिभ्यः' [१।२।१०१] इति यावत् । परस्मिन् अर्म[5]दित्येतदधिकृतं वेदितव्यम् । तत्र नोर्म्यादिभ्यः इत्यस्य परतो यदध्यर्द्धपादोनमनुक्रम्यते तस्मिन्नेतत्सूत्रादारभ्य नोर्म्यादिभ्य इत्यन प्रागनुक्रम्यमानो विधिरसन् भवति पूर्वं पूर्वश्च परे परे । पिपठीः[6] । सुभुद् । गुडलिड्भार्न्[7] । पर इति किम् ? सर्पिष्टरम् । गोस्तराम् । प्रदांस्तरति । भवांस्तरति । काष्ठतडित्यपवादो वचनप्रामाण्यात् णत्वाद्यन्तरङ्गमकृद्भावेन[8] असद्भवति, तेन माघवापाणि माघवापाणि[9] । मातुष्वसा[10], मातुःस्वसा । ह्रीणो[11] ह्रीण । ह्रीतो ह्रीत । अभिनो[12] अभिन. । अभिनद्, अभिनद् । द्रोग्धा[13] द्रोग्धा । द्रोढा, द्रोढा इत्येव भवति । न तु द्रोग्धा द्रोंढा, द्रोढा, द्रोग्धा इति । औजिहन् इत्यत्र तु परिभाषानित्यत्वमाश्रीयते ।

पूरान्नो णः ॥१।२।५०॥ परिभाषेयम् । [14]स्थाननिमित्तमियमार्थ[15] य कश्चिदिह शास्त्रे णो नाम विधीयते स सर्वं पकाराद् रेफाच्च परस्य नकारस्य स्थाने भवति । स चाऽऽनः परे असद्भवतीति वेदितव्यः । वक्ष्यति अभिन्नेनो (णो) न भवतीति । तत्र पूरान्नो णो भवति । पूष्ण. । तक्षणः । चतुर्णाम् । तीर्णम् । आस्तीर्णम् । प्रादिति किम् ? यज्वना[16] । सहयुध्वना[17] । न इति किम् ? पेष्टा । कर्ता । णोऽसेरविणा गः—शूर्पणखा । षूरादिति किम् ? देवनागः । न इति किम् ? इन्द्रजित् ।

श्चुष्टुस्तौ नान्तरे ॥१।२।५१॥ शकारे चवर्गे लकारे टवर्गे सकारे तवर्गे च अन्तरे स्थानिनिमित्तयोर्मध्ये सति णो न भवति । शकारे—रशना । राशिना । चवर्गे—अर्चना । मूर्च्छना । अर्जनम् । वर्जनम् । लकारे—वृषलेन । विरलेन । प्रक्रियमाणम्[18] । टवर्गे—दृष्टेन[19] । पृष्टेन । दृढेन । करणेन । सकारे—रसना । रसेन । तवर्गे—वर्तमानम् । तीर्थेन । नर्दनम् । वर्धनम् । एतेष्विति[20] किम् ? मूर्खेण । गर्वेण । तिसृणाम् । चतसृणाम् । मातॄणाम् । अज्भक्तिमध्यगतरेफमृवर्णं प्रतिज्ञायते । कर्षणाम् । ऋषिणा । गुरुणा । वृषेण ।

---

१. –कारलोपः सुबाश्रये सुपि परतः । २. क्यङ् म० टि० । ३ शुल् टुस्तौ क०, म० । ४. योपान्त्यादगुरूपोत्तमाद् वुञ्, क०, म० टि० । २. वुञ् क०, म० । ६. असन्नित्येत—क०,म० । ७. पिपरीः क०,म० । ८ गुडलिण्मान् । ९ –रङ्गत्वादसकृद्भा—क०,म० । १०. माघवापानि माघवापानि क०,म० । ११ मातुःष्वसा । मातुःस्वसा । मातुःस्वसा क०,म० । १२. ह्रीग्रा प्रद्राघ्रोन्दनुद्विन्तेः इति तस्य वा नः म० टि० । १३. भिदङ् विदारणे । लङ् । स्वाम्नम्न्लुश्च इति नम् । ख इति सूत्रेण सिपः सकारस्य लुक् । सिपिदश्च वा इति दस्य वा रेफादेशः । म० टी० । १४. दुहमुहस्निह्नो वेति हस्य वा धः । भद्धः लुट् । म० टि० । १५ स्थानि क०,म० । १६. –मार्थां क०,म० । १७. सु यजो क्वनिप् । न हल्वमा विति निषेधात् न श्नादेशः । म०टि० । १८ राज सहा कृन्युधिभ्याम् । इति क्वनिप् म०टि० ।१९ –नम् । परिक्रियमाणम् क०,म० । २०. पृष्टेन । पृष्टेन । क०,म० । २१. एतेष्विति क०,म० ।

वर्हेण । कषायेण । गर्वेण । शुष्केण । मूर्खेण । वर्गेण । अर्घेण । पुष्पेण । दर्पेण । दर्भेण । कर्मणा । बृंहणम् । उरःकेण । उर><केण । उरःपेण, उर><पेण । षग्रहणं प्रतिषेधवचन च ज्ञापकमन्यस्मिन्नन्तरे च भवतीति ।

घि घ्नः ॥१।२।५२॥ हन्तेर्घकारे स्थानिनिमित्तयोरन्तरे सति णो न भवति । वृत्रघ्ना । वृत्रघ्ने । ब्रह्मघ्ना । ब्रह्मघ्ने । घीति किम् ? वृत्रहणौ । वृत्रहण । घ्न इति किम् ? अर्घेण[1] ।

पदेऽनाङ्थतद्धिते ॥१।२।५३॥ आङ्वर्जिते पदे स्थानिनिमित्तयोरन्तरे सति णो न भवति न चेत् पदं[2] तद्धिते परे भवति । प्रावनद्धम् । पर्यवनद्धम् । मापकुम्भवापेन । चतुरङ्गयोगेन । अनाङिति किम् ? प्राणद्धम् । पर्याणद्धम् । अतद्धित इति किम् ? आर्द्रगोमयेण । शुष्कगोमयेण ।

अन्तः[3]क्षुभ्नादीनाम् ॥१।२।५४॥ पदान्तस्य क्षुभ्नादीना च नकारस्य णो न भवति । वृक्षान् । नरान् । क्षुभ्नाति । क्षुभ्नीतः । क्षुभ्नन्ति । क्षुभ्नन् । क्षुभ्नान. । तृप्नोति । तृप्नुत । तृप्नुवन्ति । तृप्नु इत्यत एव पाठात् स्नु—आचार्यानी । आचार्यभोगीन. । क्षुभ्ना, तृप्नु, आचार्यानी, आचार्यभोगीन, युवन् अहन्, षक्वन् वन मन सर्वनाम नटन घर्न[4] वन नदी विवेष[5] निवास अग्नि अनृप नन्दिन् नन्दन नर्तन गहन नदन इति क्षुभ्नादिराकृतिगण । अत्र-आचार्यभोगीनान्तेष्वभिन्न इति प्राप्ति· युवन् अहन् इत्यत्र पूर्वपदस्थात्[6] षत्वे[7] सक्वे वा चोरिति । ततो गहनान्तेषु णोऽसेरिति । नदने हि नुभीनाऽनिण इति च ।

नृतेर्यङः ॥१।२।५५॥ नृतेर्धातोर्यङन्तस्य णो न भवति । नरीनृत्यते । नर्नर्ति । नरीनर्ति । नर्नृतीति । यङ इति किम् ? हरिर्णर्ति[8] ।

अभिन्ने ॥१।२।५६॥ ण इति वर्तते । षकाराद् रेफाच्च परस्य नकारस्य स्थाने ण इत्ययमादेशो भवति न चेत् स्थानिनिमित्ताद्भिन्नेऽन्यस्मिन् पदे वर्तेत । पूष्ण[9] । तक्ष्ण· । चतुर्णाम् । तीर्णम् । आस्तीर्णम् । तिसृणाम् । चतसृणाम् । मातृणाम् । पद इति किम् ? मुनिर्नयति । साधुर्नयति । अत्र-अभिन्नवाक्ये मा भूत् । मेघनामिक । चर्मनामिकः इत्यत्र यद्यपि समासपदेऽभिन्नमवयवौ तु भिन्नपदे । नृभिर्नृभिः इत्यत्र आवृत्तिभेदान् पदभेद इत्याश्रीयते । कुर्वन्नास्ते । कृषन्नास्ते इत्यत्र 'अभिद्धं बहिरङ्ग' जात्याश्रयेण वा प्रतिषेध. । तथा च कुर्वन् इत्यपि सिद्धम् । क्षुभ्नादौ वा द्वित्वम् । गर्गभगोऽस्या अस्तीति गर्गभगिणी । मातृभोगीण· । खारपायण· इत्यत्र नकारः प्रत्ययस्थो न भिन्नपदस्थः ।

पूर्वपदस्थाद्धान्तनम्सुपः ॥१।२।५७॥ पूर्वपदस्थात् षकाराद् रेफाच्च परो य उत्तरपदस्यान्तो यश्च नम यश्च सुबवयवो नकारस्तस्य नकारादेशो वा भवति । माषवापिणौ । माषत्रापिनौ । व्रीहिवापिणौ । व्रीहिवापिनौ । नम्—मापवापाणि । माषवापानि । व्रीहिवापाणि, व्रीहिवापानि कुलानि । प्रहिण्वन्, प्रहिन्वन् । प्रेण्वन्, प्रेन्वन्[11] । माषवापेण, मापवापेन । व्रीहिवापेण, व्रीहिवापेन । मापवापाणाम्, (माषवापानाम्) । (व्रीहिवापाणाम्) व्रीहिवापानाम् । पूर्वपदस्थादिति किम् ? कूपवारिणा । पुरुषकारेण इत्यत्र—अन्तरङ्गत्वान्नित्यमेव णत्वम् । स्वस्थग्रहण तदन्तविधिव्युदासार्थम् । तथा चैत्रोदाहृतम्—अन्तर्नम्[12] । सुप इति किम् ? दाक्षीणा भगिनी दाक्षिभगिनी । गर्गभगिनी । खारपायण । मातृभोगीण । मापवापिणी, मापवापिनी इत्यत्र णिन्नन्तस्य पूर्व समास पश्चात् (द्) ङी । गर्गभगिनी इत्यत्र गर्गभगोऽस्या अस्तीतीन् । तत्र मातृभोगीण[13] इतिवत् 'अभिन्ने' [१।२।५६] इति णत्वम् । आर्ययून । क्षत्रिययून·, प्रपक्वानि, परिपक्वानि, दीर्घाह्नी शरद् इति युवपक्वाहच्छब्दाः क्षुभ्नादिषु ।

सक्केकाचोः ॥१।२।५८॥ पूर्वपदस्थान्निमित्तादुत्तरस्य कवर्गवत्येकाचि चोत्तरपदे तदन्तस्य नमः सुबवयवस्य[14] नकारस्य नित्यं णकार आदेशो भवति । मोक्षगामिणः । स्वर्गगामिणः । मोक्षकामाणि, स्वर्गकामाणि

---

१. व्याख्यार्थनिदाधावदाघण्नीति साधुः म० टि० । २. तत्पदं क०,म० । ३. अन्तक्षु—क०, म० । ४. घन गर नृत्त क०, म० । ५. निवेश क०,म० । ६. –स्थात् इति—क०,म० । ७. षक्वे सक्वेकाचोरि—क०,म०। ८ परिणत्ति क०,म० । ९. पूष्णः क०,म० । १०. मभिन्नमव–क०,म० । ११. स्वन् । सुप् । माष—क०,म० । १२ अन्तनम् क०,म० । १३. गोणवत् क०,म० । १४. –वस्य च नका—क०, म० ।

कुलानि । ऋषिमुखेन । गुरुमुखेन । पुष्पमेघाणाम् । क्षीरमेघाणाम् । एकाचि—ब्रह्महणौ । वृत्रहणौ । मांसपाणि । क्षीरपाणि । मांसपेण । क्षीरपेण । नित्यार्थं वचनम् ।

क्तोऽग्नि ॥१।२।५६॥ क्तक्तवत्वो· क्त्वाप्रत्ययस्य च तकारस्य त आदेश· स षादेशादन्यस्मिन्नस्मात् सूत्रात् परस्मिन् विधौ प्रवर्तमानेऽसन् भवति । क्षामिमान् । शुष्किका । लून्युः । पून्युः । बुद्ध्वा । दग्ध्वा । क्त इति किम् ? य. येन । ककारः किम् ? हे मनः[2] । असत्यत्र ककारे लुक्तोऽणीति लुचो[3]ऽसत्वान्मेत्यस्य प्लुतः प्रसज्येत । अणीति किम् ? वृक्ण । वृक्णवान् । पर इति किम् ? लग्नः[4] । मग्नः ।

क्विब्रः सर्पिः ॥१।२।६०॥ परिभाषेयं स्थानिनिमित्तनिमित्तार्था[5] । य· कश्चिदिह शास्त्रे षिर्नाम विधीयते,स सर्व कवर्गादिग्रश्च परस्य सकारस्य स्थाने[6] भवति। स च परस्मिन् शास्त्रे प्रवर्तमानेऽसन्[7] भवतीति वेदितव्यम् । शास्त्रसिर्ध सिकृतस्यासक्मा[8]तोऽबहुपदात् । तत्र क्विब्रः सर्पिर्भवति । वाक्षु । त्वक्षु । प्राड्क्षु । कृड्क्षु । इब्—सर्पिषा । धनुषा । पितृषु । मातृषु । एष. । दोषा । गोषु । नौषु । धूर्षु । क्विब्र इति किम् ? शालासु । मालासु । स इति किम् ? मुनीनाम् । साधूनाम् । मातृपितृ ष्वसृष्विरितिवत् माने एत्यग. । श्रीषेण । वारिषेणः । क्विब्र इति किम् ? वृषसेनः । वीरसेनः । स इति किम् ? श्रीदेवः ।

शर्नमः ॥१।२।६१॥ इयमपि परिभाषा । क्विब्र् परो य· शर् नम् च तस्माच्च परस्य सकारस्य स्थाने षिर्भवतीति वेदितव्यम् । सर्पिष्षु । धनुष्षु । सर्पिःषु । धनु षु । सर्पींषि । धनूंषि । नम्ग्रहणमनुस्वारनियमार्थम् । 'पुंसु निस्वे[9]े निस्वे' इत्यत्र क्विब्र· परात्परो नेति न भवति योगविभाग क्विब्रा शर्नम्या विशेषणार्थः । तेनेह न भवति—यशस्सु । यशांसि ।

सिचो न यङि ॥१।२।६२॥ सिचि क्षरण इत्येतस्य यङि षिरादेशो न भवति । सेसिच्यते[11] । यङीति किम् ? सिषेच । अभिषिषिक्षति । परिभाषेयम्, तेन उपसर्गनिमित्ता षिप्राप्ति प्रतिषिध्यते ।

सुग्रः स्यसनि ॥१।२।६३॥ सुग्र.[12] शसनि इत्येव सूत्रं साधीयः । सुग्रः स्ये सनि च प्रत्यये षिरादेशो न भवति[13] । अभिसोष्यति । परिसोष्यति । अभ्यसोष्यत् । पर्यसोष्यत् । सनि—सुसूषति[14] । क्विप्—सुसू । स्यसनीति किम् ? सुषाव । अभिषुणोति । इयमपि परिभाषा ।

सेधतेर्गतौ ॥१।२।६४॥ सेधतेर्गतौ वर्तमानस्य षिरादेशो न भवति । अभिसेधति गा· । अभिसेधयति गा· । गताविति किम् ? निषेव[15] प्रतिषेधत्यकार्यात् । इयमपि परिभाषैव ।

शास्वसिघस्सि कृतस्यासक्सातोऽबहुपदात् ॥१।२।६५॥ क्विब्रः क्विब्परांश्च शर्णम परो यः शासिवसिघसीनां यश्च सिस्किरानुबन्ध[16] 'तिरसस्तेः सिः' [१।१।१६७] इत्यादिविहितो यश्च कृतो विहितः सगागम स स्थानिकवर्जितो यश्च कृतस्य सात्प्रत्ययवर्जितस्य—अवयवः सकारस्तस्य स्थाने षिः इत्ययमादेशो भवति न चेत् स बहुप्रत्ययात् पदाच्च भवति । शासि[17]—अशिषत् । अशिषताम् । अशिषम् । शिष्टः । शिष्टवान् । शिष्ट्वा । शिष्टिः । आशिषा । वसि—उषितः । उषितवान् । उषित्वा । उष्यते । घसि—जक्षतुः । जक्षुः । जक्षिवान् । सि—चतुष्कण्टकम् । द्विष्करोति । त्रिष्पचति । सर्पिष्कुण्डम् । धनुष्काण्डम् । कृत —एष. । सिषेच । कृतस्य—वाक्षु । त्वक्षु । विवक्षति । वक्ष्यति । शासादिग्रहणं किम् ? असिसेकत् । असिस्रेकत् । घसिप्रकृत्यन्तरमित्युपादीयते । असक्सात इति किम् ? दधिस्यति । मधुस्यति । निस्ते । निस्से । सुषिस्यते[18] । अत्र षट्द्वित्वयोर्न भवति । क्सेति[19] न संयोगलोपोऽपदान्तत्वात् । मुनिसात्करोति । साधुसात्करोति । अपदादित्येव सिद्धे सातः प्रतिषेधो वलिपदादप्रतिषेधार्थ, तेन वाक्षु त्वक्षु मुनिषु साधुषु इत्यत्र प्रतिषेधो न

---

१. य क०, म० । २. हैमनः क०, म० । ३. लुशोऽस—क०, म० । ४. अग्नः—क०, म० । ५. विधमार्थां क०, म० । ६ –ने षिर्भ—क०, म० । ७. मानेऽस—क०, म० । ८. घसिस क०, म० । ९. सक्स्सातो क०,म० । १०. निस्से क०,म० । ११. –ते । अभिसेसिच्यते क०,म० । १२. इति वाक्यं क०, म० पुस्तकयोर्नास्ति । १३. –ति । स्ये । अभि—क०,म० । १४. सुसूषते क०, म० । १५. सिषेध क०, म० । १६. सिरिकारानु—क०, म० । १७. शास् क०, म० । १८. सुसुष्यते क०, म० । १९. क्सीति क०,म० ।

भवति । अबहुपदादिति किम् ? बहुसेक् । बहुसेचौ । बहुसेच· । दधिसेक् । दधिसेचौ । दधिसेचः । मुनिस्तरति, साधुस्तरति इत्यत्र सिग्रहणं पदान्ते नियमार्थम् असिद्धं बहिरङ्गमन्तरङ्गे[1] वा । निस्त इतिवद् वा न भवति । तस्ओस् इत्यादौ बाहुलकात् ।

षढः कः सि ॥१।२।६६॥ षकारस्य ढकारस्य च सकारे परे ककारादेशो भवति । पेक्ष्यति । तोक्ष्यति । विविक्षति । अविक्षत् । अद्राक्षीत् । अम्राक्षीन् । ढस्य–लेक्ष्यति । निहोक्ष्यति[2] । अलिलिक्षत् । षढ इति किम् ? अत्सि । भिनत्सि । सीति किम् ? द्वेष्टि । पिनष्टि ।

रः पदान्ते विसर्जनीयः ॥१।२।६७॥ रः रेफस्य पदान्ते वर्तमानस्य विसर्जनीयादेशो भवति । सजूः । सजू षु । अहः । अह सु । आशीः । आशी.षु । वृक्षः । प्लक्षः । प्रातः । पुनः । गीः । धूः । पदान्त इति किम् ! गिरौ । गिरः । तवकारं । प्राच्छंति । नार्कुटा, नार्पत्यम्[3] इत्यत्र असिद्धं बहिरङ्गमन्तरङ्ग इति विसर्जनीय परे असन्निति च[4] भवति । पदान्त इत्यधिकार. 'पदस्य' [१।२।६२] इति यावत् ।

धातोर्वोर्दीर्घोऽयहल्नि चाच्छुकुरोः ॥१।२।६८॥ छुर् कुर् इत्येतद्वर्जितस्य धातोरवयवे वकारे रेफे च पदान्ते यप्रत्ययवर्जितहल्परे नकारपरे रेफे च परे तदवयवपूर्व ह्रस्वदीर्घो भवति । गीः । धूः । आशीः । सजू. । गीर्षु । धूर्षु । आशीष्षु । सजूष्षु । अयहलि—विद्यात्[5] । सीव्यात् । तूर्वति । धूर्वति । मूर्च्छा । हूर्च्छा । शीर्णम् । अवगूर्णम् । कीर्तयति । कूर्दते । उर्हिदिवते[6] । चिकीर्षति । लुलूर्षति । निदीव्ना । दीव्ने । प्रतिदीव्ना । प्रतिदीव्ने । धातोरिति किम् ? चतुर्भिः । चतुर्थः धातोर्ग्रीत्यै[7] तस्य विशेषणं किम् ? दीव्ना । दीव्ने । दीव्यर्त इत्यर्थ. । इको विशेषणं किम् ? दधिव्रज्या । ग्रामणीव्रज्या इत्यत्र तु प्रत्यासत्त्यै शकाश्रयणान्न भवति । व्रीति किम् ? छिद् । भिद् । सिद्धयति । बुद्धयते । इगिति किम् ? अबिभः । अजाग । अव्यते । अर्यते । अयहल्नि चेति किम् ? गिरौ । गिरः । किरति । गिरति । हलित्येव सिद्धे न-ग्रहणम् 'असिद्धं बहिरङ्गमन्तरङ्गे' इति, तेन इह न भवति—विव्यतु. । विव्युः । रिर्यतुः । रिर्युः । चतुर्यति । कुर्कुरीयति । मुर्मुरकाम्यति । गोर्यति । धूर्यति इत्यवयवधानुरबहिरङ्गः । य. प्रतिषेध इति किम् ? गिर्यः । दुर्यः[10] । निरनुबन्धोपादानादिह भवत्येव—दीव्यति । सीव्यति । कीर्यते । गीर्यते । चकारः 'पदान्ते' इत्यनेनास्य समुच्चयार्थे. । अच्छुकुरोरिति किम् ? छुर्यात्[11] । कुर्यात् । उकारः किम् ? कुर शब्दे कूर्यात् । केचिदस्य ग्रहणमिच्छन्ति ।

म्वोश्च मो निः ॥१।२।६९॥ मकारान्तस्य धातोरन्तस्य पदान्ते मकारवकारयोश्च परयोर्नकारादेशो भवति । प्रशान् । प्रतान् । प्रदान् । प्रदान्भिः । प्रतान्भि. । प्रतान्सु । प्रदान्सु । तस्त्वस्यासत्त्वाल्[12] लुग् न भवति । म्वोः—नन्नम्नि । नन्नन्वः । नन्नन्मः । जङ्गन्मि । जङ्गन्त्र. । जङ्गन्म । जगन्वान् । म्वोश्चेति किम् ? प्रतामौ । प्रताम. । म इति किम् ? छिद् । भिद् । धातोरिति किम् ? इदम् । किम् ।

अनडुद्द्युदुष्णिग्वि(ग्)क्ष्टक्स्पृग्दधृक्परिव्राट् ॥१।२।७०॥ अनडुदित्यादीनि शब्दस्वरूपाणि पदान्ते कृतदत्वादीनि निपात्यन्ते । 'अनडुह्' इत्येतस्य[13] दत्वम्—स्वनडुत्कुलम् । अनडुद्भ्याम् । अनडुत्सु । द्युत्[14] इति । दिव इत्यस्य उत्वम्—विमलद्यु दिनम् । द्युभ्याम् । द्युषु । तकारा[15]द्द्यौर्भवति द्युभवति[16] । ह्यौ दीर्घो न भवति । अत एव तकारात् अस्यासत्त्वाभाव. । तेन 'द्यौकां[17]म्' इत्युकारस्यैच् सिद्धो भवति । उष्णिहः—उष्णिक् । उष्णिग्भ्याम् । उष्णिक्षु । दिशः—दिक् । दिग्भ्याम् । दिक्षु । दृशः—दृक् । दृग्भ्याम् । दृक्षु । वज्री चाभूत् सहस्रदृक् । यादृक् । तादृक् । स्पृश—घृतस्पृक् । घृतस्पृग्भ्याम् । घृतस्पृक्षु । दधृषः—

---

१. –क्षे, इति वा क०,म० । २. –ति । लिलिक्षति । अलि—क०,म० । ३. नार्पत्य इत्य–क०,म० । ४. च न भ—क०, म० । ५ दीव्यात् क०, म० । ६. ऊर्हिधिषते क०, म० । ७. र्ग्रीत्येत—क०, म० । ८ ह्रदीव्यत इत्य— क०, म० । ९. धः कि—क०, म० । १०. धुर्यः क०,म० । ११ अधुर्कु—क०,म० १२. न त्वस्या—क०, म० । १३ इत्यस्य क०, म० । १४. द्युत् क०, म० । १५. तकारादद्यौर्यौ— क०, म० । १६. वर्तीति द्यौ र्दी— क०, म० । १७ यौकामिः क०, म० ।

दधृक् । दधृग्भ्याम् । दधृक्षु । एषा गत्वम् । परिव्राज्–इत्यस्य ह्रत्वम् । परिव्राट् (ड्)। परिव्राड्भ्याम् । परिव्राट्सु । पदान्त इति किम् ? अनड्वाहौ । अनड्वाहः[1] । दिशौ । दिशः । घृतस्पृशौ । घृतस्पृशः । दधृषौ । दधृषः । परिव्राजौ । परिव्राजः ।

नग्धा ॥१।२।७१॥ नगिति नशेर्धातोः शकारस्य पदान्ते गत्वं[2] निपात्यते । जीवनग् । जीवनग्भ्याम्[3] । जीवनक्षु । पक्षे ष.—जीवनड् । जीवनड्भ्याम् । जीवनट्सु । पदान्त इति किम् ? जीवनशौ । जीवनशः ।

सजूरहःसोऽतिप्यकस्रंसुभ्वंसो रिः ॥१।२।७२॥ सजुष् अहन् इत्येतयोरन्त्यस्यालः सकारस्य च पदान्ते वर्तमानस्य रिरादेशो भवति क्वस्रंसुभ्वसु इत्येतान् वर्जयित्वा । अतिपि—न चेत्तिप्परो भवति । सजूः । सजूर्भ्याम् । सजूष्षु । अहः । अहोभ्याम् । अहस्सु । श्रमण संयतः । पय. । पयोभ्याम् । पयस्सु । अहस्सु-इति निर्देशात् "**न रङ्कः काम्ये**" [१।१।७७] इति प्रतिषेधात् '**राऽङ्कोऽप्यसुद्यूपरात्रिरथन्तरे**' [१।१।१६०] इति प्रत्याहाराच्च अनामन्त्रणेऽपि-अह्नो रि.[4] ।

सिपि दश्च वा ॥१।२।७३॥ पदान्ते वर्तमानस्य दकारस्य सकारस्य च सिपि परतः रिर्वा भवति । अभिनस्त्वम् । अभिनत्त्वम् । अचकास्त्वम् । अचकात्त्वम् । अन्वशास्त्वम् । अन्वशात्त्वम् ।

रः सुप्सि ॥१।२।७४॥ रेफस्य सुप. सकारे परे रिरादेशो भवति । वार्षु । द्वार्षु । गीर्षु । धूर्षु । र इति किम् ? भित्सु । छित्सु । अहस्सु पयस्सु इति न रिरसत्त्वात्[5] । सुप्(ब्)ग्रहणं किम् ? गीस्सुनोति । धूस्सुनोति[6] । सिग्रहण किम् ? गी. । धूः । इदमेव[7] ज्ञापक सुप्(ब्)ग्रहणे प्रत्याहारग्रहणमेवेति । रेफस्य रिवचनं विसर्जनीयबाधनार्थम् ।

जलो जश् ॥१।२।७५॥ जल पदान्ते वर्तमानस्य जशादेशो भवति । त्रिष्टुब् । त्रिष्टुब्भिः । सुभुग्[8] । सुभुग्भिः । गुडलिड् । गुडलिड्भिः । कुड्[9] । कुड्भिः । विद्युद् । विद्युद्भि । वाग् । वाग्भि । षड् ।षड्भिः । विद्वद् । विद्वद्भि । उखास्रट् (ड्) । उखास्रड्भि । पर्णध्वट् (ड्) । पर्णध्वड्भि । सुपूर्वात् दु खयतेर्दुम्खयतेर्वा विवप्—सुधुग् । सुधुग्भि. । पदान्त इति किम् ? त्रिष्टुभौ । त्रिष्टुभः । इदं करोति, शंवान्, कस्तरति,कष्टीयते[10] चतुष्टयम् इत्यत्र असिद्ध बहिरङ्गमन्तरङ्गे विसर्जनीयस्थानिपरे अमन्निति च न भवति ।

बशो भष् झषस्तथोर्धोऽधः ष्टुना ष्टुः ॥१।२।७६॥ पदान्ते यो झष् यश्च सकारादौ ध्वशब्दादौ च प्रत्यये परतस्तदन्तस्य—एकाच शब्दरूपस्य—अवयवस्य बशः स्थाने भषादेशो भवति । धर्मभुद् । धर्मभुत् । धर्मभुद्भ्याम् । धर्मभुत्सु । पर्णघुड्भ्याम्[12] । पर्णघुट्सु । तुण्डिभ कुर्वन्नाचक्षाणो वा तुण्डिप् । तुण्डिक्याम्[13] । तुण्डिक्सु । गोधुक् । गोधुग्भ्याम् । गोधुक्षु । गर्दभं कुर्वन्नाचक्षाणो वा गर्भप्[14] । गृधेर्यड्, श्लुक्, लड्, सिप्, अजग्धाः । स्थ्वोः—भोत्स्यते । अबुद्धम् । निधोक्ष्यते[15] । न्यद्यद्ध्वम्[16] । धोक्ष्यते । अधुग्ध्वम् । बश इति किम् ? रुध् । क्रोत्स्यति । झष इति किम् ? सुगण् दास्यति । स्थ्वोश्चेति किम् ? धर्मबुधौ । धर्मबुधः । ध्वशब्दोपादानादिह न भवति-दादद्धि । एकाच इति किम् ? दामलिट् । प्रत्यय इति किम् ? दध्व. । दध्वहे । उत्तरार्थं च ।

धात्वो जलि च ॥१।२।७७॥ झषन्तस्य धात्वो धातोरवयवस्य बशः स्थाने जलि प्रत्यये परे भषादेशो भवति । धत्त । धत्थ. । धत्थ । धत्ते । धत्से । धद्ध्वे[17] । धात्र इति किम् ? दान्तः[18] । दात्तः । दात्वदेटः

---

१. –हः । दिवौ । दिवः । दण्डिहौ । दण्डिहः । दिशौ क०, म० । २ –त्वं वा नि—क०, म० । ३ जीवनग्भिः म० । ४ अह्नो रिः । अतिपीति किम्? अचकाद् भवान् । अन्वशाद् भवान् । अक्रस्संसुभ्वंसु इति किम् ? विद्वत् उपसेदिवत् कुलम् । उरवास्रद् । पर्णध्वद् । कसोति ककारः किम् ? औः । औभवः । चर्मवः । पदान्त इति किम्? सजुषौ । सजुषः । अहनी । अहानि । पयसा पयसे । रीरिलिकारो रेर्यं इति विशेषणार्थः । क० म० । ५ रेरस—क०, म० । ६. धूस्सुमता क०,म० । ७. –मेव च ज्ञाप—क०, म० । ८ सुभुग्, सुभुग्भिः, क०, म० । ९. कुड्, कुड्भिः, क०, म० । १०. कष्टीकते—क०, म० । ११ षः स्थ्वोः—क०, म० । १२. पर्णघुट्, पर्णघुड्भ्याम् क०, म० । १३. तुण्डिक्भ्याम् । तुण्डिक्सु—क०, म० । १४. गर्भप्, क०, म० । १५. निधोधोक्ष्यते—क०, म० । १६. न्यध्वध्वम्, न्यधुध्वम्, न्यधुधिध्वम् म० । १७. धद्ध्वे—क०, म० । १८ दात्तः, क०, म० ।

झष इति किम् ? ददाति । ददासि । जलीति किम् ? दद्धः । दद्मः । चकारः पदान्ते इत्यनेनास्य समुच्चयार्थः । तेन उत्तरत्र जलि च पदान्ते च इत्युपस्थाप्येते[1] ।

थको ऽन्येषाम् ॥१।२।७८॥ दधातेर्यङ् श्लुगन्तस्य झषन्तस्य धश स्थाने जलि प्रत्यये पर एकेषामाचार्याणां मतेन भषादेशो भवति । धात्त । धात्थ । धात्थ । अन्येषाम्—दात्तः । दात्थः । दात्थ । झष इति किम् ? दधाति[2] । दधासि । जलीति किम् ? दधाति[3] । दाद्धः । दाद्मः ।

धेस्तथः[4] ॥१।२।७९॥ धेटो यङ्लुगन्तात्[5] झषन्तात् परयोस्तकारथकारयोः स्थाने एकेषामाचार्याणा मतेन भषादेशो भवति । दाद्धः । दाद्धः । दाद्ध । अन्येषाम्—दात्तः । दात्थः । दात्थ । धेरिति किम् ? धात्तः । धात्थः । धात्थ ।

अधः ॥१।२।८०॥ अदधतेर्झषन्तात् परयोस्तकार-थकारयोः स्थाने भषादेशो भवति । लब्धा । लब्धुम् । अलब्धा । अलब्धाः । दोग्धा । दोग्धुम् । अदुग्ध । अदुग्धाः । लेढा । लेढुम् । अलीढ । अलीढाः । बोद्धा । बोद्धुम् । अबुद्ध । अबुद्धाः । धाप्रतिषेधात्—धत्तः । धत्ते । धत्थः । धत्थ ।

इजो लिलुडां धो ढः ॥१।२।८१॥ इजः परयोर्यो.—लिङो लिटश्च लुङश्च धकारस्य ढकारादेशो भवति । क्षेषीढ्वम् । क्ष्योषीढ्वम् । चकृढ्वम्[6] । बबृढ्वे । अचेढ्वम् । अक्ष्योढ्वम् । इज इति किम् ? पक्षीष्वम् । यक्षीष्वम् । लिलुडामिति किम् ? स्तुष्वम् । स्तुष्वे । अस्तुष्वम् । स्तुवीष्वम् । परिवेवि[7], एष्वम् । क्ष्योषिष्वम्[8] । लिक्षीष्वम्, युक्षीष्वम्, मत्सीष्वम्[9] इत्यादौ परत्वात् ढत्वादि[10] न भवति ।

वेड् ञेः ॥१।२।८२॥ इजः परस्मादिटो ञे लिटश्च परेषा लिलुडा धकारस्य ढकारो भवति वा । अविषीढ्वम्, अविषीष्वम् । उपदिधेढ्वे, उपदिधेध्वे । अलविढ्वम्, अलविध्वम् । ग्रहेणीढ्वम्[11], ग्रहणीष्वम् । संवलिषीढ्वम्, संवलिषीष्वम् । ञेः—लाविषीढ्वम्, लाविषीष्वम् । अलाविढ्वम्, अलाविष्वम् । ग्राहिषीढ्वम्, ग्राहिषीष्वम् । इज इति किम् ? आशिषीष्वम् । वर्तिषीष्वम् । हानिषीष्वम् । दर्शिषीष्वम् । अिडिरोल्विभक्तित्वेऽपि ल्योर्वचनात् तत. परत्वं विज्ञायते ।

हः ॥१।२।८३॥ हकारस्य पदान्ते जलि च प्रत्यये परे ढकारादेशो भवति । गुडलिट् । गुडलिड्भ्याम् । गुडलिड्सु[12] । परिषट् । परिषड्भ्याम् । परिषड्सु[13] । जलि—लेटा[14] । लेक्ष्यति । वोढा । वक्ष्यति । जलि चेति किम् ? गुडलिहौ । गुडलिहः ।

दादेरेधादेर्घः ॥१।२।८४॥ एधादेर्धातोर्यो धकारादिरवयवस्तदवयवस्य हकारस्य पदान्ते जलि च प्रत्यये घकारादेशो भवति । गोधुक् । गोधुग्भ्याम् । गोधुक्षु । काष्ठधक् । काष्ठधग्भ्याम् । काष्ठधक्षु । अधोक् । जलि—अधाक्षीत् । दोग्धा । धोक्ष्यति । दग्धा । धक्ष्यति । दादेरिति किम् ? गुडलिटा[15] । एधादेरिति किम् ? दामलिट् । दृंहंद्बुट्[16] । जलि चेति किम् ? गोदुहौ । गोदुहः । धविधान भष्भावार्थम् ।

नि घ्नः ॥१।२।८५॥ हन्तेर्धातोर्हकारस्य नकारे परे घकारादेशो भवति । वृत्रघ्ना । वृत्रघ्ने । घ्नन् । घ्नन्ति । श्लेष्मघ्नम् । पित्तघ्नम् । घ्न इति किम् ? अहना । पिहना[17] ।

दुहमुहस्नुहस्निहो वा ॥१।२।८६॥ दुह् मुह् स्नुह् स्निह् इत्येतेषा हकारस्य पदान्ते जलि च प्रत्यये परे घकारादेशो वा भवति[18] । मित्रध्रुक् । मित्रध्रुग्भ्याम् । मित्रध्रुक्षु । मित्रध्रुट् । मित्रध्रुड्भ्याम् । मित्रध्रुट्सु । उन्मुक् । उन्मुग्भ्याम् । उन्मुक्षु । उन्मुट् । उन्मुड्भ्याम् । उन्मुट्सु । [19]उस्नुक् । उस्नुग्भ्याम् ।

---

१. -पस्थाप्यते क०, म० । २. दाधाति क०, म० । ३. दाधति । ४ -स्थथः क०, म० । ५. -क्श्लुग्-क०, म० । ६. अदधाते क०, म० । ७ चकृढ्वे क०, म० । ८. परिवेविषीष्वम् क०, म० । ९ ध इति किम् ? धेषीष्वम् । क्ष्योषीष्वम् क०, म० । १०. मत्सिढ्वम् क०, म० । ११. -दि भव— क०, म० । १२. ग्रहीषि(षी)ढ्वम् । ग्रहीषि(षी)ष्वम् क०,म० । १३ गुणलिट्सु क०,म० । १४. परिषट्सु क०, म० । १५ लेढा, लेक्ष्यति, क०, म० । १६ गुडलिट्, क०, म० । १७. दृंढ्वट् क०, म० , १८. ट् । ह इति किम् ? दग्धः । दाता । जलि—क०, म० । १९. ह्नींह्ना क०, म० । २०. ति, भ्रुक् । मि—क०, म० । २१. उस्नुक्, उस्नुग्भ्याम्, उस्नुक्षु । उस्नुट्, उस्नुड्भ्याम्, उस्नुट्सु । उस्निक्, उस्निग्भ्याम्, उस्निक्षु, उस्निट्, उस्निड्भ्याम्, उस्निट्सु क०, म० ।

उस्नुक्षु । उस्नुट् । उस्नुड्भ्याम् । उस्नुट्सु । उस्निक् । उस्निग्भ्याम् । उस्निक्षु । उस्निट् । उस्निड्भ्याम् । उस्निट्सु । जलि—द्रोग्धा, द्रोढा । मोग्धा, मोढा । स्नोग्धा, स्नोढा । स्नेग्धा, स्नेढा । जलि चेति किम् ? मित्रद्रुहौ । मित्रद्रुहः । दोद्रोग्धि, दोद्रोद्ढि । इति यङ्लुगर्थं न द्रुहादेरित्युच्यते ।

नहो धः ॥१।२।८७॥ नहो हकारस्य पदान्ते जलि च परे धकारादेशो भवति । उपानत् । उपानद्भ्याम् । उपानत्सु । परीणत् । परीणद्भ्याम् । परीणत्सु । जलि—संनद्धा । सन्नत्स्यति । जलि चेति किम् ? उपानहौ । उपानहः ।

चोः कुः ॥१।२।८८॥ चवर्गस्य पदान्ते जलि च प्रत्यये परे कवर्गादेशो भवति । वाच्—(वाक्), वाग् । वाग्भ्याम् । वाक्षु । त्वच्—त्वक्, स्रज्—स्रक् । स्रजीस्रग् । स्वप्नच्—स्वप्नक्[2] । ऋत्विज्—(ऋत्विक्), ऋत्विग् । जलि च—वक्ता । वक्तुम् । वक्ष्यति । जलि चेति किम् ? वाचौ । वाचः । प्रत्यय इति अधिकारादिह न भवति । इच्छति । मज्जति । इदञ्चुञ्चु., इदञ्चणः इत्यत्र च लक्षणप्रतिपदोक्तपरिभाषया न भवति । तच्चुञ्च्[3], तच्चण इत्यत्र जशश्चुत्वं जश्च परे कुत्वे असन्निति च न भवति । चुयुज्यम् । चिक्रुञ्च । कुरित्येकयोगत्वे[4] व्रश्चादिसूत्रे यथा च्छश इति व्रश्चादिसाहचर्यात् धातोरेव ग्रहणं तथाऽत्रापि च्विति युज्यादिसाहचर्याद्विज्ञायते[5] । तथा च स्रुग् इत्यादौ न स्यादतो योगविभागः ।

युज्यञ्जिक्रुञ्चः ॥१।२।८९॥ युज् अञ्चु क्रुञ्चु इत्येतेषा पदान्ते जलि च प्रत्यये परे कवर्गादेशो भवति । युङ् । [युङ्भ्याम् । युङ्क्षु ।] प्राङ् । प्राङ्भ्याम् । प्राङ्क्षु । क्रुङ् । क्रुङ्भ्याम् । क्रुङ्क्षु । जलि—पूर्वेण सिद्धम् । पदान्ते पदस्येति लोपे नकारस्य न सिद्ध्यति । म्ना जय्यपदान्ते इत्यसन् । तथा च वाञ्छते क्विपि वान् वाशौ वाशः । क्रुञ्च इत्यत एव निपातनात् क्रुञ्चे केवलात् क्विपि रेफो नलोपाभावश्च ।

व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छ्शः षः ॥१।२।९०॥ व्रश्च् भ्रस्ज् सृज् मृज् यज् राज् भ्राज् इत्येतेषा चवर्गस्य छकारस्य शकारस्य च पदान्ते जलि च प्रत्यये परे षकारादेशो भवति । मूलवट् । मूलवड्भ्याम् । धानाभृट् । धानाभृड्भ्याम् । तीर्थमृट् । तीर्थमृड्भ्याम् । कंसपरिमृट्(ड्) । कंसपरिमृड्भ्याम् । देवेट् । देवेड्भ्याम् । विराट् । विराड्भ्याम्[6] । शस्यविट् । शस्यविड्भ्याम् । गोलिट्[7] । गोलिड्भ्याम् । जलि—व्रष्टा । व्रष्टुम् । भ्रष्टा । भ्रष्टुम् । स्रष्टा । स्रष्टुम् । मार्ष्टा । मार्ष्टुम् । यष्टा । यष्टुम् । राष्टि । भ्राष्टि । छस्य—प्रष्टा[8] । प्रष्टुम् । शस्य—उपदेष्टा[9] । उपदेष्टुम् । उपविक्ष्यते । भ्राजे राजिसहचरितस्य षत्वम्, इतरस्य कुत्वमेव । विभ्राक् । 'शुछवोऽनुनासिके च'[10] [४।१।१४१] क्विन्तीत्यनुवर्तते इति छग्रहणम् । जलि चेति किम् ? मूलवृश्चौ । मूलवृश्चः । प्रत्यय इत्यधिकारादिह न भवति-पृच्छति । व्रश्चादिसाहचर्यादधातोर्नेष्यते । निशार्य[11] । निड्भ्याम् । निच्छु ।

संयोगस्यादिस्कोर्लुक् ॥१।२।९१॥ पदान्ते यः संयोगो यश्च जलि प्रत्यये परे तस्यादे सकारस्य ककारस्य च लुग्लोपो भवति । [12]मृस्ज्—साधुमृक्, साधुमृग्भ्याम् । साधुलक् । साधुलग्भ्याम् । तक्ष्—काष्ठतक्[13] । काष्ठतग्भ्याम् । जलि— लग्नः । लग्नवान् । वृक्ण । वृक्णवान् । तप्टा । तक्ष्यति । धर्ममाचष्टे । सयोगस्येति किम् ? स्थाता कृतम् । आदिग्रहण किम् ? वक्केः वावक्ति । शङ्के शाशङ्कि । स्कोरिति किम् ? नर्नर्ति । जलि चेति किम् ? साधुमज्जौ । साधुमज्जः । काष्ठतक्षौ । काष्ठतक्षः । प्रत्यय इत्यधिकारादिह न भवति [14]दक्ष्लिप्सातम् । [15]शक्त्साता । स्यर्थम्, काक्ष्यर्थम् इत्यत्र बहिरङ्गस्य यज[16] असिद्धत्वादनेन उत्तरेण च लुग् न भवति ।

---

१. यङ्लुग्, -क०, म० । २ स्वप्नग्, क०, म० । ३. -स्वप्नक् म०, टि० । ४. स्वेक-क० म० । ५. विज्ञायेत क०, म० । ६. -भ्याम् । विभ्राड्, विभ्राड्भ्याम् क०, म० । ७ गोविट्, गोविड्भ्याम्-क०, म० । ८ प्रष्टा, प्रष्टुम् क०, म० । ९. उपवेष्टा । उपवेष्टुम् । उपवेक्ष्यते । क०, म० । १० चेत्यत्र क्विन्तीत्य-क०, म० । ११. निशायाः, निग्भ्याम् । क०, म० । १२. मस्ज् । साधुमक् । साधुमग्भ्याम-क०, म० । १३. काष्ठतक्, क०, म० । १४. दक्ष्लिप्सातम्-क०, म० । १५. शक्त्साता, क०, म० । १६. यज् सिद्ध क०, म० ।

पदस्य ॥१।२।९२॥ संयोगान्तस्य पदस्य लुग्[1] न भवति । श्रीमान् । श्रेयान् । पुंभ्याम् । पुंसु । पदग्रहणं जलोत्यरय निवृत्त्यर्थम् । स्कान्ता[2] । स्पन्ता ।

रात्सः ॥१।२।९३॥ रेफात् परो यः सकारस्तदन्तस्य पदस्य लुग्[3] न भवति । चिकी । चिकीर्भ्याम् । चिकीर्षु । जिह्रीः । जिह्रीर्भ्याम् । जिह्रीर्षु । पदस्येति सिद्धे नियमार्थं वचनम् । सर्वादिः । सर्वौ[4] निर्देशात् रात्स एवेति नियमः । तेनेह न भवति-उर्ग्[5] । उर्ग्भ्याम् । न्यमार्ड् ।

लो ॥१।२।९४॥ लादेशेन सह प्रकृतेर्यः संयोगस्तदन्तस्य पदस्य लुग्[6] न भवति । शकेः—अशाशक् । वस्केः—अवावक् । अभिभर्भर्भवान्[7] । अजागर्भवान् । भर्यादिति नलो सयोगादिरेफस्य रादिति नियमस्य चायमपवाद ।

नः ॥१।२।९५॥ नकारान्तस्य पदस्य लुग् भवति । राजा । राजभ्याम् । राजभि । राजभ्यः । राजसु । पदस्येति किम् ? राजानौ । राजान. । सर्वस्मिन् । कुर्वीरन् इति सुट् नकारस्योपदेशसामर्थ्यान्न भवति । अहः, अहोभ्याम् इत्यादौ अह्न. सजूरहस्स इति निर्देशाद् रोहृ्नोऽप्यसुबिति प्रत्याहाराच्च रित्व नलोपस्य बाधक विज्ञायते ।

मान्तोपान्तजयो मतोर्मो वः ॥१।२।९६॥ पदस्येति निवृत्तम् । मश्च अश्च मौ । मान्तौ[10] अन्त्योपान्त्यौ यस्य तस्मात्—मकारान्तात्—मकारोपान्तादवर्णोपान्तात्[11] जयन्ताच्च परस्य मतोर्मकारस्य वकारादेशो भवति । मान्तात्—किवान् । मोपान्तात्—शमीवान् । दाडिमीवान् । अवर्णान्तात्—वृक्षवान् । प्लक्षवान् । शालावान् । मालावान् । अवर्णोपान्तात्—अहर्वान् । पयस्वान् । यशस्वान् । जय —उदश्वित्वान् । विद्युत्वान् । [12]दृषत्वान् । मान्तोपान्तजय इति किम् ? अग्निमान् । वायुमान्[13] । [14]नमिन इत्याकारो बहिरङ्ग. । म इत्युत्तरार्थ. । 'नाम्नि' [१।२।९७] इत्यत्र ह्यस्मादिति पूर्वस्य नाश्रयणात् । 'तस्मादादेः' [१।१।४८] इत्यस्य प्रवृत्ते 'पृटितः' [१।४।९३] इत्येत्वबत् मे इत्यसत्यन्ते लः प्राप्नोति ।

नाम्नि ॥१।२।९७॥ नाम्नि सज्ञाया विषये मतोर्मकारस्य वकारादेशो भवति । अहीवती । कपीवती[15] । कृपीवती । मुनीवती । एत[16] नाम्न्यो नद्य । [17]आसन्धीवान नाम ग्राम. ।

अष्ठीवच्चक्रीवत्कक्षीवच्चर्मण्वद्रुमण्वत् ॥१।२।९८॥ अष्ठीवत् चक्रीवत् कक्षीवत् चर्मण्वत् रुमण्वत् इत्येते शब्दा.[19] नाम्नि विषये निपात्यन्त । अष्ठीवान् नाम शरीरैकदेश. । अत्र—अस्थिशब्दस्याष्ठीभावो निपात्यते । चक्रीवान् राममः । चक्रीवान् नाम राजा च । अत्र चक्रशब्दस्य चक्रीभाव । कक्षीवान् नाम ऋषि.,[18] करि(री)वा । अत्र कक्ष[20]शब्दस्य कक्षीभाव. । चर्मण्वती नाम [21]नदी । नकारस्य लोपाभावो णत्व च । [22]रुमण्वान् नाम मन्त्री । अत्र लवणशब्दस्य रुमण्भाव । रुमन्निति प्रकृत्यन्तरमस्तीत्येके । तस्य वा णत्वम् । वत्वं तु यथायोगमस्त्येव । नाम्नीति किम् ? अस्थिमान् । चक्रवान् । कक्षेवान्[23] । चर्मवान् । लवणवान् ।

अब्धौ चोदन्वान् ॥१।२।९९॥ आपो धीयन्तेऽस्मिन्निति अब्धि । अब्धौ नाम्नि च उदन्वान्-इत्युदकशब्दस्य मतावुदन्भावो निपात्यते । उदन्वान् घट । उदन्वान् मेघ. । नाम्नि—उदन्वान् समुद्रः ।

---

१. लुग्भवति क० ,म० । २. स्कन्ता, स्यन्ता, क०, म० । ३ -ग्भवति क०, म० । ४.-वौ सुपि समानिति क०, म० । ५ ऊर्क्, ऊर्ग्, ऊर्ग्भ्याम, न्यमार्ट्-क०, म० । ६ लुग्भव-क०, म० । ७. अभिभर्भवान्-क०, म० । ८. भूयादिति-क०,म० । ९.-दिलोपस्य रादि-क०,म० । १० तावन्त्यो-क०,म० । ११. -न्तादवर्णान्तादवर्णो-क०, म० । १२ दृषद्वान् क०, म० । १३ नामंत इ- म० । नाम इ-क० । १४ -वर्ती, ऋषीवर्ती, कृषी क०, म० । १५ एवं नानानो-क०, म० । १६ आसन्धीवान्-क०, म० । १७ -ख्या मतौ ना क०, म० । १८. ऋषिर्लौकिक क०, म० । १९ कक्षशब्द-क०, म० । २० नाम । नरस्य लोपाभावादो णत्वम् क०, म० । २१ रुमण्वान्नाम पर्वतः, रुमण्वान् नाम मन्त्री । क०, म० । २२. कक्षवान्-क०, म० ।

उदन्वान्[1] ऋषिः । उदश्वामा द्रुमः । अब्भो चेति किम् ? उदन्वान्[2] घटः । अत्र घटस्य उदकसम्बन्धमात्र विवक्षितं न तद्वान् इत्यर्थः ।

राजन्वान् सुराज्ञि ॥१।२।१००॥ शोभनो राजा यस्य तस्मिन् विवक्षिते राजन्वानिति मतौ लुगभावो[3] निपात्यते । राजन्वान् देश. । राजन्वती पृथिवी । राजन्वत्य प्रजास्त्वया । सुराज्ञि इति किम् ? राजवान् देशः ।

नोर्म्यादिभ्यः ॥१।२।१०१॥ ऊर्मि इत्येवमादिभ्यः परस्य मतोर्मो वत्वं न भवति । ऊर्मिमान् । यवमान् । गरुत्मान् । इक्षुमती । ऊर्मि भूमि वल्मि क्रिमि यव क्रुञ्च विशा द्राक्षा गरुत् हरीत् (?) द्रुजिन् ककुद्-शिम्बि-इक्षु-गोद्रु मधु इति ऊर्म्यादि । आकृतिगणोऽयम् । यस्य सति निमित्ते मतोर्वा[4] न दृश्यते स ऊर्म्यादिषु द्रष्टव्यः ।

ङ्यौट्यृतोऽपदस्यार् ॥१।२।१०२॥ 'अप्-स्वसृ-नप्तृ-नेष्टृ त्वष्टृ[5]-क्षत्तृ-होतृ-पोतृ-प्रशास्त्रृणामर्धः' [१।२।१३३] इत्यदीर्घवचनादसन्निति निवृत्तम् । अपदस्य ऋकारस्य ङौ औटि च परे अर् इत्ययमादेशो भवति । औटीति सुँङ्प्रत्याहारादारभ्य-आ-औट्प्टकारेण प्रत्याहार' । अपदस्येति वचनात्—पितरि । पितरौ । पितर. । पितरम् । पितरौ । कर्तरि । कर्ता । कर्तारौ । कर्तार. । कर्तारम् । कर्तारौ । ङ्यौटीति किम् ? पित्रा । मात्रा । कर्तृणी, कर्तृणी इत्यत्र नम ह्रस्वार्द[6] साट इति नम्ग्रहणात् पूर्वं न भवतीति । ऋत इति किम् ? श्रमणौ । संपतौ । तकार[7] किम् ? द्रौ[8] । ग्रौ । अपदस्येति किम् ? कर्तृ कुलं पश्य ।

ङातो ङुः ॥१।२।१०३॥ अपदस्य ऋकारात् परस्य ङातो ङकारोपलक्षितस्य ङसिङसोरकारस्य ङुः—इत्ययमादेशो भवति । पितुरागच्छति । पितु स्वम् । मातुरागच्छति । मातु स्वम् । ङे[9] इति किम् ? पितरम्[10] । मातरम् । अत इति किम् ? पित्रे । मात्रे । तकार उत्तरार्थः । अपदस्येति किम् ? कर्तृश्रुते[12] कुल कर्तृस्याः[13] । ङकारानुबन्धोऽन्त्याजादिलुगर्थ[14] ।

स्यत्य उः ॥१।२।१०४॥ आदस्य स्यत्य इत्येताभ्यामनच्काभ्या परस्य ङातः [ऐ] ङसि ङसोरकारस्य उकारादेशो भवति । सख्युरागच्छति सख्यु स्वम् । पत्युरागच्छतिः पत्यु स्वम् । सखि-पतिशब्दयोः सह खमस्थानेन वेति सख. । सखं सख्यायं वा इच्छति सवीः[15] पातीति पत , पतं पतिं वा इच्छतीति पतीरित्येतयोर्वा । लूनमिच्छतो लव्यु:, प्लव्यु. । 'क्तोऽषि' [१।२।५३] इति नत्वासत्वाद्यरूपत्वम् । स्यत्य इत्यनच्कग्रहणादिह न भवति । मुख्यात् । मुख्यस्य । अपत्यात्, अपत्यस्य । अत इति तकारादिह न भवति—सख्याः । पत्या ।

एङो लुक् ॥१।२।१०५॥ अपदस्य एङ परस्य ङातो ङसिङसोरकारस्य लुग् भवति । मुनेरागच्छति मुने स्वम् । साधोरागच्छति साधोः स्वम् । गोः । धो.[16] । एङ इति किम् ? दृषदागच्छति दृषद. स्वम् ।

एदे ॥१।२।१०६॥ अकारान्तस्य अपदस्य एकारे अकारे च परे लुग् भवति । पचे । यजे । पचन्ति । पठन्ति । सः । तौ । ते । एद इति किम् ? श्रमणे । संयते । तकारादिह न भवति । श्रमणानाम् । संयतानाम् । अत इति किम् ? आसे । अदन्ति । तकारः किम् ? यान्ति । वान्ति । अपदस्येति किम् ? तवैषा । दण्डाग्रम् ।

ङित्यन्त्याजादेः ॥१।२।१०७॥ अचा सन्निविष्टाना योऽन्त्योऽच् तदादेः शब्दरूपस्य ङिति परे

---

१. उदन्वाञ्जाम ऋषिः, क०, म० । २ उदकवान्, क०, म० । ३. म्लुगभावो, क०, म० । ४. मतोर्मो वो, क०, म० । ५. ट्वष्टो क०,म० । ६ तष्टृ क०,म० । ७. सु औ इत्यौकारादारभ्य-क०, म० । ८. स्वाट् साटः, क०, म० । ९. द्रौ ग्रौ-क०, म० । १०. कृ इति-क०, म० । ११. पितरः, पितरम्-क०, म० । १२ स्नुते–क०, म० । १३ कर्त्रास्याः, क०, म० । १४ डकारा क०, म० । १५. सखा क०, म० । १६. धोः, क०, म० ।

लुग् भवति । मुनी । साधी । पितुः । मातुः । पिता । माता । आसन्नं च ता , अदूरं[1] च ताः । महत्या. करः महाकरः । महावासः । त्रिंशता क्रीतं त्रिंशकम् । उपसरजो मन्दुरजः वादि डित्यादेकस्यापि तदादिविधिः । कुमुद्वान्, नड्वान् इत्यत्र अपदाविकारेऽप्यनु[2]करणसामर्थ्याद् भवति । द्विपदा ऋग् इत्यादौ परत्वात् लुचं बाधित्वा पद् भवति । डितीति किम् ? दृषदौ । दृषद ।

न[3] पथिमथ्यभुक्षः ॥१।२।१०८॥ पथिन् मथिन् ऋभुक्षिन् इत्येतेषा नकारान्तानामपदसज्ञानामन्त्याजादेर्लुग् भवति । पथ । पथा । मथ । मथा । ऋभुक्ष ।ऋभुक्षा । सुपथी नगरी, सुमथी स्त्री । अनृभुक्षी सेना । न इति किम् ? पन्थानमिच्छत पथ्यः पश्य[4] । सुपथीर्नगरी पश्य । सुमथी स्त्री पश्य । अपदस्येति किम् ? पथिभ्याम् । पथिभि ।

श्यनप्सुटथन् ॥१।२।१०९॥ पथिन् मथिन् ऋभुक्षिन्नकारान्ताना शौ—अनपुंसकविषये च इत्येतेषा सुटि परे अन्त्याजादेरन्नित्ययमादेशो भवति । लुचोऽपवादः । सुपन्थानि कु[5]लानि । सुमन्थानि कुलानि । अनृभुक्षाणि बलानि । पन्थानौ । पन्थान. । पन्थानम् । पन्थानौ । मन्थानौ । मन्थान. । मन्थानम् । मन्थानौ । ऋभुक्षाणौ । ऋभुक्षाणः । ऋभुक्षाणम् । ऋभुक्षाणौ । श्यनप् सुटीति किम् ? पथिभ्याम् । पथिभिः । मथिभ्याम् । मथिभिः । नपः प्रतिषेध किम् ? सुपथी वने । सुमथी कुले । अपदस्येति किम्[6] ? पन्थानमिच्छन्तौ पथ्यौ । मथ्यौ ।

थो नट् ॥१।२।११०॥ पथ्यादीना नकारान्ताना शौ अनपुसकविषये च सुटि परे थकारस्य नडागमो भवति । तथैवोदाहृतम् । थकार किम् ? अन्त्याजे[7]दिऋभुक्षश्च माभूत् ।

आस्त्यनः ॥१।२।१११॥ पथ्यादीना सकारादौ श्यनप्सुटि परे अन स्थाने आकारादेशो भवति । पन्था । मन्था. । ऋभुक्षाः । सीति किम् ? पन्थानौ । मन्थानौ । ऋभुक्षाणौ । अन इति किम् ? थकारस्य माभूत् ।

द्यौः ॥१।२।११२॥ दिव् इत्यव्युत्पन्नस्य प्रातिपदिकस्य तत्सम्बन्धिनि असम्बन्धिनि वा सकारादौ श्यनप्सुटि परे औकारो निपात्यते । द्यौ । हे द्यौ । प्रियद्यौ । अतिद्यौ । अर्थादक्रियाशब्दस्य अव्युत्पन्नस्य निपातनात् अक्षद्यु इत्यत्र न भवति ।

अनडुहो नम् ॥१।२।११३॥ अनडुह् इत्येतस्य तत्सम्बन्धि[8]नि असम्बन्धिनि वा सकारादौ श्यनप्सुटि परे नमागमो भवति । अनड्वान् । बह्वनड्वान् ।

उगिदचोऽनेधादेः ॥१।२।११४॥ उक् इत् यस्य तस्य अनेधादेरञ्चतेश्च तत्सम्बन्धि[9]नि असम्बन्धिनि वा श्यनप्सुटि परे नमागमो भवति । गोमन्ति, पचन्ति, प्राञ्चि कुलानि । गोमान् । गोमन्तौ । गोमन्त. । गोमन्तम् । गोमन्तौ । पचन् । पचन्तौ । पचन्त. । पचन्तम् । पचन्तौ । प्राङ् । प्राञ्चः प्राञ्चम् । उ[10]गि[11]दिति किम् ? दृषद् । दृषदौ । अञ्चिग्रहणमनेधादेरिति प्रतिषेधार्थम् । अनेधादेरिति किम् ? उखास्रन्[12] । पर्णध्वत् । एधादे. प्रतिषेधादिह[13] न भवति । गोमत्यतेरप्रत्ययः गोमान् । गोमन्तौ । श्यनप्सुटीति किम् ? गोमत. पश्य । गोमती कुले । योगविभागो[14]ऽमीत्यस्य निवृत्त्यर्थं ।

युञोऽसमासे ॥१।२।११५॥ युजृञ् योगे इत्यस्यासमासे श्यनप्सुटि परे नमागमो भवति । युञ्जि कुलानि । युङ् । युञ्जौ । युञ्ज । युञ्जम् । युञ्जौ । ऋनो निर्देश. किम् ? युजि समाधौ इत्यस्य मा भूत् । युजमापन्ना ऋषय । असमास इति किम् ? अश्वयुक् । अश्वयुजौ । अश्वयुज । श्यनप्सुटीति किम् ? युज. पश्य । युजी कुले ।

पुंसो ङस् ॥१।२।११६॥ पुंस इत्येतस्य तत्सम्बन्धि[15]नि असम्बन्धिनि वा श्यनप्सुटि परे ङस् इत्ययमादेशो भवति । बहुपुमासि कुलानि । पुमान् । पुमांसौ । पुमांसः । पुमांसम् । पुमांसौ । श्यनप्सुटीति

---

१. –रे च ताः क०,म० । २. –प्यनुकरण-क०, म० । ३. नः क०,म० । ४. –थ, मथ्यः पश्य । सुप-क०, म० । ५ वनानि, सुमन्थानि-क०, म० । ६. न इति किम् ? क०, म० । ७. –स्याजादेर्ऋभु-क०, म० । ८. अन्यसम्ब-क०, म० । ९. अन्यसम्बन्धिनि क०, म० । १०. अन्यसम्ब-क०, म० । ११. उगिदच इति म० । १२ उखास्रद्, पर्णध्वद्, क०, म० । १३. –दिह भवति, म० । १४. –गः र्सीत्य-क०, म० । १५. अन्यसम्बन्धिनि, क०, म० ।

किम् ? पुंसः पश्य । द्विपुंसी कुले । डकारः 'शिदङ्डित्' [१।१।४६] इति पर्युदासार्थ. । पुंस उदित्वान्नम् ङीर्ह्रस्वविकल्पश्च । बहुपुंसि । बहुपुंसितरा ।

औत[1] औ ॥ १।२।११७ ॥ श्यनप्सुटि परे ओकारस्य औकारादेशो भवति । गौ । गावौ । गाव । द्यौ । द्यावौ । द्यावः । सुगौः । अतिगौः । प्रियद्यावौ । अतिद्यावौ । औत[2] इति किम् ? चित्रगुः, चित्रगू । तकारो निर्देशार्थः । लाक्षणिकत्वादिह न भवति—हे चित्रगो । हे चित्रगवः । श्यनप्सुटीति किम् ? गवा । द्यवा । औ इत्यविभक्तिको निर्देशः ।

डाप्शसः ॥१।२।११८॥ डे[3]ऽओकारात् परस्य श्यनप्सुट्यम शसश्चादेर्डा इत्ययमादेशो भवति । गाम् । गा. । द्याम् । द्याः । डकारोऽन्त्याजादिलुगर्थ । श्यनप्सुटीति किम् ? अचिनवम् । असुनवम् । गोशो गोकुल ददाति । द्योशः स्वर्गलोकं प्रविशति ।

ऋत्सखीदुशनस्पुरुदंशोऽनेहसः सोः ॥ १।२।११९ ॥ ऋकारान्तादिकारान्ताच्च सखिशब्दात् उशनस् पुरुदंशस् अनेहस् इत्येतेभ्यश्च परस्य श्यनप्सुटः सोर्डा इत्ययमादेशो भवति । प्रिया[4] । कर्त्रा । प्रियसखा । उशना । पुरुदंशा । अनेहा । तकारो दीर्घनिवृत्त्यर्थ । गृ निगरणार्थोग्द शब्दार्थ । इयं सखी । सखीयतेरप्[5]त्यय । सखा । अयमेव च सखीदिति तकारो ज्ञापयति—प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्, एकदेशविकृतस्य वाऽनन्यत्वमिति, तेन पयस्कुम्भी, पयस्पात्री, अनिजरसि इत्यादि सिद्धं भवति । सोरिति किम् ? उशनसौ । पुरुदशसौ । श्यनप्सुटीति किम् ? कर्तृ सखि कुलम् ।

ह्रल्ङ्याड्ड्यार्घाल्लुक् ॥१।२।१२०॥ ह्रलो ङी आड् इत्येताभ्या च दीर्घाभ्या परस्य श्यनप्सुटः सोर्लुग् भवति । राजा । तक्षा । उखास्रन् । पर्णध्वन् । गौरी । किशोरी । बहुश्रेयसी । बहुप्रेयसी[6] । आड्देवना । शाला । बहुराजा । ह्रलड्याड्दीर्घादिति किम् ? श्रमणः । संयत । ड्याड्ग्रहण किम् ? लक्ष्मी. । तन्त्री । ग्रामणी । कीलालपाः । दीर्घग्रहणं किम् ? निष्कौशाम्बि[7] । अतिखट्व. । श्यनप्सुटीति किम् ? तत्कुलम्[8] । पदस्येति सिद्धे ह्रल्ग्रहण नलोपार्थ सयोगादिलोपाभावार्थ च ।

वोशनोशनघो भगो भोः स्वमश्चैकामन्त्रणे ॥ १।२।१२१ ॥ उशन उशनन् अघोर् भगोर् भोर् इति । उशनस् इत्येतस्य सकारस्य लोपो नकारश्च । अघवत् भगवत् भवतु इत्येतेषामवशब्दस्योत्पन्नमश्च रिग्रादेशो निपात्यते वा एकामन्त्रणे श्यनप्सुटि परत सु अम् इत्येतयोश्च लुक् । प्रसिद्धतत्सम्बन्धस्य कार्यान्तरं प्रत्यभिमुखीकरणमामन्त्रणं सम्बोधनमुच्यते । हे उशन, हे उशनन्, हे उशना. । हे अघो[9], हे अघवन् । हे भगोः, हे भगवन् । हे भोः, हे भवन् । स्वमश्चेत्युत्तरार्थम् । एकग्रहणं किम् ? हे उशनसौ । हे उशनस. । हे अघवन्तौ । हे अघवन्त । हे भगवन्तौ । हे भवन्त । हे भवन्तौ । हे भवन्त । आमन्त्रण इति किम् ? उशना । अघवान् । भगवान् । भवान् । भोरिति सर्वादेर्भवच्छब्दस्य निपातनम् । इह न भवति—भाग्यस्य सन्तीति मनु. भवतेर्वा शता हे भवन् । भो ब्राह्मणि, भो भो शृणुत सर्वेऽपि मम देशनिवासिन इति सुङ् प्रतिरूपमव्ययं द्रष्टव्यम् । इह च भोरिति भवतो निपातनं कर्तव्यम् । स भोः । तर्[10] (तौ) भो । तत्र भो । अय भो. । इह भोः इति । भवदायुष्मद्दीर्घायुर्देवाना प्रियैकोऽर्थादिति यथा स्यादिति ।

ह्रस्वोऽग्नित्याटः ॥१।२।१२२॥ अकारान्तस्य यस्य च 'स्त्रिया वाट्' [ ] 'ह्रस्वो पुंसः' [१।२।३०] इति नित्यमाट् (ड्) विधीयते । तस्य च एकामन्त्रणे श्यनप्सुटि ह्रस्वादेशो भवति । सोरमश्च लुक् । हे श्रमण । हे संयत । हे धन । हे नदि । हे वधु । हे अतिलक्ष्मि । हे अतिस्त्रि[11] । हे वन, हे धन इत्यत्र श्यनप्सुट्यधिकारात्—हे उपकुम्भ इत्यत्र चाऽऽम परत्वात् सोर्लुग् नास्तीत्यामो लुगुच्यते । [12]अग्नित्याट इति

---

१. ओत क०, म० । २. ओत-क०, म० । ३. डाश्शस ओका-क०, म० । ४. पिता, क०, म० । ५. क्विबिति यावत्-क०, म० टी० । ६. –वर्सी देवदत्तः । आ-क०, म० । ७. यत्कुलम्, तत्कुलम् क०, म० । ८. ततो भोः क०, म० । ९. हे अतिस्त्रि, क० म० । १०. ह्रस्वाग्नित्याट इति ह्रस्वः । श्यनप्सुटीत्यनुवृत्तावपि स्वमोश्च लुग् ग्रहणसामर्थ्याद् विधानसामर्थ्यात् च सर्वत्र भवतीति रूपसिद्धावुक्तम् क०, म० टि० ।

किम् ? हे कीलालपा. । हे सेनानीः । अट्(ड्)ग्रहणमदेङ्बाधनार्थम् । नित्यग्रहणादिह न भवति–हे श्रीः । हे भ्रूः । [1]ह्रस्वग्रहणं नित्यार्थम् ।

द्व्यचोऽम्बार्थस्य ॥ १।२।१२३ ॥ द्वावचौ यस्य तस्य मात्रर्थस्य एकामन्त्रणे श्यनप्सुटि ह्रस्वो भवति सोश्च लुक् । हे अम्ब[2] । हे अक्क । हे अत्त । हे परमाम्ब । हे प्रियाम्ब । द्व्यच इति किम् ? हे अम्बाडे । हे अम्बाले । हे अम्बिके । अम्बार्थस्येति किम् ? हे सुनीः । हे सुलू[3] । हे मात इत्यत्र परत्वात्[4] डमङेकामन्त्रणयो. (?) तॅरोऽग्रम् वा देवते निदेहि[5] । देवनाया[6] निदेहि । हे देवत, हे देवते तच्छान्दसमाहु[7] ।

एदाडः[8] ॥१।२।१२४॥ आड एकामन्त्रणे एकारादेशो भवति सोश्च लुक् । हे शाले । हे माले । आड इत्याकारप्रश्लेषादिह न भवति—हे प्रियशाल ।

ह्रस्वैतो लुचि चारेऽङ् ॥ १।२।१२५ ॥ ह्रस्वान्तस्य एदन्तस्य च एकामन्त्रणे लुचि श्यनप्सुटि च आरेङ् चासम्र आदेशो भवति सोश्च लुक् । हे पितः । हे मात । हे मुने । हे साधो । हे अतिहे । हे से । हे परमे । 'हे' शब्दम् अतिक्रान्तः–अतिहे । इना समासे से । परमे[9] । लुचि–हे कर्त्त. कुल, हे हर्त्त. कुल । हे वारे । हे त्रपो । लुचि चेत्यनरीति प्रतिषेधाऽप्राप्ते[10] ग्रहणम् । हे नदि, हे वधु इत्यत्र ह्रस्वविधान-सामर्थ्यान्न भवति ।

पुत्रेऽर्हे मातुः कचोऽङ् ॥१।२।१२६॥ स्वपदार्थोपसर्जनो यो मातृशब्दः पुत्रे वर्तते बहुव्रीहौ तस्मात् परस्य कच श्यप्सुनटि एकामन्त्रणे अङिति डिदादेशो भवति । अर्हे—पुत्रस्य प्रशसायां गम्य-मानायाम् । हे गार्गीमात । हे वात्सीमात । अत्र पुत्र. संभावितोत्कर्षया श्लाघ्यया मात्रा तत्पुत्रव्यपदेशयोग्यतया प्रशस्यते । पुत्र इति किम् ? गार्गीमातृके वत्से । अर्ह इति किम् ? अरे गार्गीमातृक । मातुरिति किम् ? हे गार्ग्यपितृक । डकारोऽन्त्याजादिलुगर्थ. ।

वोऽनडुच्चतुरोः ॥१।२।१२७॥ अनडुह् चतुर् इत्येतयोरुकारस्य एकामन्त्रणे श्यनप्सुटि परे वशब्द आदेशो भवति । हे अनड्वन् । हे बह्वनड्वन् । हे प्रियचत्व. । हे अतिचत्व. । वकाराकार. प्रयोगी नेत् ।

वाः ॥१।२।१२८॥ अनडुच्चतुरोरुकारस्य श्यनप्सुटि परे वा इत्ययमादेशो भवति । बह्वनड्वाहि । चत्वारि कुलानि । अनड्वान् । अनड्वाहौ । अनड्वाहः । अनड्वाहम् । अनड्वाहौ । चत्वार. । प्रियचत्वा. । प्रियचत्वारौ । प्रियचत्वार. । प्रियचत्वारम् । प्रियचत्वारौ ।

नडान् लुक् ॥१।२।१२९॥ 'ऋत्यखिन्०' [१।२।११५] इति यो डादेशो या च 'नः' [१।२।९५] इति नकारस्य लुक् तौ द्वावपि एकामन्त्रणे न भवत. । हे पित. । हे सखे । हे उशन. । हे पुरुदंश. । हे अनेहः । हे राजन् । हे दण्डिन् ।

सखित ऐ च ॥१।२।१३०॥ इकारान्तस्य सखिशब्दस्य तत्सम्बन्धिनि [10]असम्बन्धिनि वा श्यनप्सुटि परे ऐकारादेशो भवति न चैकामन्त्रणे । सखायौ । सखाय. । सखायम् । सखायौ । प्रियसखायौ । प्रियसखाय. । तकारः किम् ? हे सख्यौ । सख्येतेरप्रत्यय । सख्यौ । सख्यानि कुलानि इत्यत्र नित्यत्वान्नम् ह्रस्वाट् साट इति नम्ग्रहणाच्च नमि सति तेन व्यवधानान्न भवति । श्यनप्सुटीति किम् ? सख्यीन् । सख्या । अनपीति प्रतिषेधाल्लु-चीह न भवति सखि कुलम् । न चैकामन्त्रणे–इति किम् ? हे सखे । चकार एकामन्त्रणे नेत्यस्य समुच्चयार्थः, तेन उत्तरत्र श्यनप्सुटी न चैकामन्त्रणे इत्युभयमुपतिष्ठते ।

क्रोष्टोऽक्रोष्टु ॥१।२।१३१॥ क्रोष्टुशब्दस्य तत्सम्बन्धिनि अस[11]म्बन्धिनि वा श्यनप्सुटि परे क्रोष्टु इति तृप्रत्ययान्त आदेशो भवति न चैकामन्त्रणे। क्रोष्टा । क्रोष्टारौ[12] । अतिक्रोष्टा । प्रियक्रोष्टा । बहुक्रोष्टा । बहुव्रीहौ–

---

१. ह्रस्ववचनं निग्याडर्थम् क०, म० । २. हे अम्ब । हे अड्ब । हे अक्क क०, म० । ३. त्वादूर् ङ्येकामन्त्रणयोः क०, म० । ४. तलोऽग्रम् क०, म०, ह्रस्वम् क०, म० टी० । ५. निधेहि क०, म० । ६. निधेहि क०, म० । ७. यदाहः, क०, म० । ८. परम इः कामो यस्य क०, म० टि० । ९. -धेधादभा-क०, म० । १०. अन्यसम्बन्धिनि—क०, म० । ११. अन्यसम्बन्धिनि क०, म० । १२. -रौ, क्रोष्टारः, क्रोष्टारम्, क्रोष्टारौ । अति क०, म० ।

असिद्धं बहिरङ्गमन्तरङ्गे इति अल्लक्षण. कम् न भवति । श्यनप्सुटीति किम् ? क्रोष्टून् । अनपीति प्रतिषेधात् लुजिह् न भवति—कुशक्रोष्टूवचनम् । न चैकामन्त्रणे इति किम् ? हे क्रोष्टो । कुशक्रोष्टूनि वनानि इत्यत्र नित्यत्वान्नम् । ह्रस्वाट् साट इति नम्ग्रहणाच्च प्रथमं नमि सति तेन व्यवधानान्न भवति । क्रोष्टो[1] ट्टरित्यूकार-मनुक्त्वा समुदायवचनं प्रत्ययान्ताभिव्यक्त्यर्थम्, तेन क्रोष्टारौ इत्यादौ 'अप्स्वस्रनप्तृ०' [१।२।१३३] इत्यादिना दीर्घ. ।

वाऽप्यापि ॥१।२।१३२॥ क्रोष्टुशब्दस्य तत्सम्बन्धिनि [3]असम्बन्धिनि वा आपि तृतीयैकवचनादौ सुप्यजादौ परे वा क्रोष्ट् इत्ययमादेशो भवति । क्रोष्ट्रा, क्रोष्टुना । क्रोष्ट्रे, क्रोष्टवे । क्रोष्टुः, क्रोष्टोः । क्रोष्ट्रो, क्रोष्ट्वो· । क्रोष्टरि, क्रोष्टौ । अचीति किम् ? क्रोष्टुभ्याम् । क्रोष्टुभिः । आपीति किम् ? क्रोष्टून् । क्रोष्टूनाम् इत्यत्र नित्यत्वान्नम् भवति । यद्यपि तृप्रत्ययान्तो मृगवाची स्यात् प्रयोगनियमो दुर्ज्ञानि इत्यादेशोऽस्ति श्वादिवत् ।

अप्स्वस्रनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄदोर्घः ॥ १।२।१३३ ॥ तृप्रत्ययान्तस्य अप् स्वसृ नप्तृ नेष्टृ त्वष्टृ क्षत्तृ होतृ पोतृ प्रशास्तृ इत्येतेषा च तत्सम्बन्धिनि अन्यसम्बन्धिनि वा श्यनप्सुटि परे तदासन्नोऽकारो दीर्घो भवति न चैकामन्त्रणे । तृ—कर्तारौ । कर्तार. । कर्तारम् । कर्तारौ कटस्य । वदिता । वदितारौ । वदितार । वदितारम् । वदितारौ जनवादान् । आपः—स्वापः । स्वसारौ । स्वसारः । स्वसारम् । स्वसारौ । नप्तारौ । नप्तार । नप्तारम् । नप्तारौ । नेष्टारौ । नेष्टारः । नेष्टारम् । नेष्टारौ । त्वष्टारौ । त्वष्टार । त्वष्टारम् । त्वष्टारौ । क्षत्तारौ । क्षत्तारः । क्षत्तारम् । क्षत्तारौ । होतारौ । होतारः । होतारम् । होतारौ । पोतारौ । पोतार । पोतारम् । पोतारौ । प्रशास्तारौ । प्रशास्तार. । प्रशास्तारम् । प्रशास्तारौ । अतिकर्तारौ । अतिकर्तारः । तृ इत्यर्थवत. प्रत्ययस्य ग्रहणमिति नप्त्रादीनामव्युत्पन्नाना सज्ञाशब्दाना तृशब्देनाग्रहणम्, अतस्तेषा पृथगुपादानम् । इदमेव ज्ञापकम् 'अर्थवद्ग्रहणे नानर्थकस्य' (ग्रहणम्) इत्यस्य । अद्ग्रहणं किम् ? अन्त्यस्य न स्यात् । स्वस्रादीनामनादेशाकारस्य श्यनप्सुटो विप्रकर्षान्न भवति । श्यनप्सुट इति किम् ? अव पश्य । कर्तरि । स्वसरि । न चैकामन्त्रण इति किम् ? हे कर्त । हे स्वस । केचिदप:—बह्वम्भि तटाकानि इत्युदाहरन्ति तत्र भवितव्य समासान्तेन । अथापि न स्यात् नित्यत्वान्नमा प्रथमं भवितव्यम् । तत्राकारः श्यनप्सुटीति[4] प्रकृष्यते ।

न्यक् ॥१।२।१३४॥ श्यनप्सुटि परे यो नकारस्तस्मिन् पूर्वोऽदीर्घो भवति न चैकामन्त्रणे । वनानि । धनानि । दधीनि । मधूनि । त्रपूणि । जतूनि । कर्तॄणि । हर्तॄणि । राजा । राजानौ । राजान । राजानम् । राजानौ । नीति किम् ? दृषद् । दृषदौ । दृषदः । अगिति किम् ? स्रुघ्नयतेरप्रत्यय· । स्रुग् । स्रुघ्नौ । स्रुघ्नः । अत्र घकारस्याकार स्यात् । श्यनप्सुटीति किम् ? कर्मणा । शर्मणा । अनपीति प्रतिषेधादिह न भवति—कर्मणि । शर्मणि । न चैकामन्त्रण इति किम् ? हे राजन् । हे तक्षन् ।

स्मृहतः ॥१।२।१३५॥ सकारान्तस्य महच्छब्दस्य च श्यनप्सुटिनिमित्तो[6] यो नकारस्तस्मिन् पूर्वोऽदीर्घो भवति न चैकामन्त्रणे । श्रेयासि, महान्ति कुलानि । सर्पींषि । धनूंषि । श्रेयान् । श्रेयासौ । श्रेयासः । श्रेयासम् । श्रेयासौ । महान् । महान्तौ । महान्त । महान्तम् । महान्तौ । प्रियश्रेयान् । अतिश्रेयान् । प्रियमहान् । अतिमहान् । न चैकामन्त्रण इति किम् ? हे श्रेयन् । हे महन् । श्यनप्सुटिनिमित्तविज्ञानादिह न भवति—सुहिन् । सुहिसौ । सुहिसः ।

इन्हन्पूषार्यम्णशौ ॥ १।२।१३६ ॥ इन् हन् पूषन् अर्यमन् इत्येतेषा शौ परे यो नकारस्तस्मिन् पूर्वोऽदीर्घो भवति। बहुदण्डीनि, बहुवाग्मीनि कुलानि । बहुब्रह्माणि । बहु भ्रूणहाणि । बहुपूषाणि । बह्वर्यमाणि । न्यगित्येव सिद्धे नियमार्थं वचनं शावेव नान्यत्र[7] । ब्रह्म हायते इत्यन्यनिमित्तो भवत्येव । अर्थवद्ग्रहणे नानर्थ-

---

१. -ष्टोर्ष्टरि-क०, म० । २. -स्वापिभ्य-क०, म० । ३. अन्यसम्बन्धिनि क०, म० । ४. -टि विप्र-क०, म० । ५. क्विप् क०, म० । ६. -मित्ते यो क०, म० । ७. -न्यत्रेति । तेनेह न भवति । दण्डिनौ, प्रियब्रह्मणौ, पूषणौ, अर्यमणौ । हनः क्विपि इन् । इन्नित्यस्मादेव निपातनात् क्विजलि क्विन्त्यनुनासिक इति दीर्घो न भवति । ब्रह्म अधिकः पाठः क०, म० ।

कस्य' (ग्रहणम्) इति प्लीहानौ, प्लीहानः इत्यत्र नियमो न भवति । वाग्मिनौ, वाग्मिनः इत्यत्र अनिनस्मन् ग्रहणान्यर्थवताऽनर्थकेन च इति भवति ।

सावतोश्च ॥१।२।१३७॥ अत्वित्युदनुबन्धस्य इन्-हन्-पूषार्यम्णा च सौ परे यो नकारस्तस्मिन् पूर्वोऽदीर्घो भवति न चैकामन्त्रणे । भवान् । गोमान् । एतावान् । कृतवान् । दण्डी । वाग्मी । ब्रह्महा । पूषा । अर्यमा । प्रियगोमान् । प्रियदण्डी । न चैकामन्त्रण इति किम् ? हे गोमन् । हे दण्डिन् । [1]अत्वित्युकारानुबन्धस्यादूपस्योपादानादिह न भवति । वृहत्-बृहन् । शतृ-पचन् , पठन् । जॄ-जरन् [2] । इन्नादीनां सौ नियमादप्राप्ते ग्रहणम ।

असोऽनेधादेः ॥१।२।१३८॥ अनेधादेरसन्तस्य सौ परे यस्तदासन्नोऽक् स दीर्घो भवति न चैकामन्त्रणे । [3]अप्सरा । सुपया. गौ. । सुस्रोता. नदी । अनेधादेरिति किम् ? पिण्डग्रः । चर्मव. । एधादेः प्रतिषेधादिह भवति । स्थूलशिरस्यतेरप्रत्ययः—स्थूलशिरा. । न चैकामन्त्रण इति किम् ? हे वेध. । हे सुपयः । योगविभागो नित्यस्याभावार्थ । भावे हि सावेवेति नियमो विज्ञायेत [4] ।

श्चे ॥१।२।१३९॥ 'श्चो च' इति य. शकारानुबन्धश्चकार आदेशस्तस्मिन् पूर्वोऽदीर्घो भवति । प्राच् । प्राचा । दधीच । दधीचा । मधूच । मधूचा । कर्तृच् । कर्तृचा । प्राची । प्रतीची । प्राच्य । प्रतीच्य । शकारानुबन्धादिह [5] न भवति । 'अग्निचित्' शकारस्तदभिव्यक्त्यर्थ । अन्यथा हि मधुश्चुनमाचष्टे मधुग् । मधुश्चौ [6] इत्यत्र स्यात् । अगिति किम् ? स्तुक्चा । गुडलिट्चा ।

नाम्यतिसृचतुष्पः ॥१।२।१४०॥ नामि आमादेशे तिसृचतुष्पकारान्तवर्जितस्य पूर्वोऽग् दीर्घो भवति । श्रमणानाम् । संयतानाम् । मुनीनाम् । साधूनाम् । पितॄणाम् । मातॄणाम् । अतिसृचतुष्प इति किम् ? तिसॄणाम् । चतुर्णाम् । चतसृणाम् [7] । अगित्यलाश्रयविधेर्न प्रतिषेध । आदेशगतश्चालिति स्थानिवद्भावाद् अचतस्रपि प्रतिषेध । अप इति प्रतिषेधेन नामि व्यवधानेऽपि दीर्घो ज्ञाप्यते । सप्तानाम् । पञ्चानाम् । वारीणाम् । त्रपूणाम् । नामीति वचनादिह न भवति । दृषदाम् । चर्मणाम् । वर्मणाम् । दधिनाम् । दण्डनाम् इत्यत्र अनर्थकत्वाल्लाक्षणिकत्वाच्च न भवति ।

नृर्वा ॥१।२।१४१॥ नृ इत्येतस्य नामि परे पूर्वोऽग् दीर्घो भवति वा । नॄणाम्, नृणाम् । वाग्रहणमस्य विकल्पार्थम् ।

संख्याया विसायाद्वह्नस्याहन् ङौ ॥१।२।१४२॥ संख्याया [10] वि साय इत्येताभ्या च शब्दाभ्या परस्य अह्न इत्येतस्य ङौ परे वा अहन् इत्ययमादेशो भवति । द्वयोरह्नोर्भवो द्व्यह्नस्तस्मिन् [11] द्व्यह्नि । [12] तावदह्नि, तावदहनि, तावद्ह्ने । विगतमहो व्यह्नस्तस्मिन् व्यह्नि, व्यहनि, व्यह्ने । सायमह्न सायाह्नस्तस्मिन् सायाह्नि, सायाहनि, सायाह्ने । संख्याविसायादिति किम् ? मध्याह्ने । अह्नस्येति किम् ? द्वयोरह्नोः समाहारो [13] द्व्यह्नस्तस्मिन् [14] द्व्यह्ने । ङाविति किम् ? द्व्यह्नः । व्यह्नः ।

पद्दन्नोमास्हृन्निशसन्यूषदोषन्यकन्शकन्नुदन्नासँध्वासुटि ॥१।२।१४३॥ असुटि [16] प्राप्ता प्रकृति. पदादीनां [17] सञ्ज्ञा कल्प्यते । पाद दन्त नासिका मास हृदय निशा [18] असृक् यूष दोष् यकृत् शकृत् उदक आसन इत्येतेषामसुटि सुटोऽन्यस्मिन् सुपि परे यथाक्रमं पद् दत् नस् [19] हृद् निश् असन् यूषन् दोषन् यकन् शकन् उदन् आसन् इत्येते आदेशा भवन्ति वा । पदा, पादेन । दाद्भ्, दन्तै । नसा, नासिकया । मासि, मासे । हृदि, हृदये ।

१. अत्वि-यु-क०, म० । २. जृषोऽतृ—जरन्, क०, म० । ३. वेधाः, अप्सराः क०, म० । ४. विज्ञायेत क०, म० । ५. — न्धोपादानादि-क०, म० । ६. —श्चौ । मधुश्च इ-क०, म० । ७. —तुष्प. क०, म० । ८. —सृणाम् । षण्णाम्—क०, म० । ९. —त् अचतुरिति चतुसुरपि—क०, म० । १०. सङ्ख्या वि-क०, म० । ११. द्व्यह्नि, द्व्यहनि, द्व्यह्ने । क०, म० । उभयविकल्पे, त्रैरूप्यम्—क०, म० टि० । १२. आद्यद्व्यहश्चे क०, म० टि० । १३. द्व्यहः, क०, म० । १४. द्व्यहे, क०, म० । १५. -षन्दो-क०, म० । १६. क्लुसा क०, म० । १७. —मास क०, म० । १८. असृज् क०, म० । १९. नस् मास् हृद् क०, म० ।

निशि, निशायाम् । अस्ना, असृजा । यूषा[1], यूषेण । दोष्णा, दोषा । यक्ना,यकृता । शक्ना, शकृता । उद्ना, उदकेन । आस्नि, आसनि । आसने । चकाराद्रा इत्युत्तरत्र नानुवर्तते । असुटीति किम् ? पाद । पादौ ।

पादोऽपदस्य ग्यसुट्छिण्यादौ पद् ॥ १।२।१४४ ॥ अपदसञ्ज्ञकस्य य पाद इत्यवयवः, तस्य गीत्येतस्मिन् सुट्च्छिण्यादिवर्जिते चान्यस्मिन् प्रत्यये परे पद् इत्ययमादेशो भवति । द्विपदी कुले । द्विपदः पश्य । द्विपदी इयम् । द्विपदिका दधाति । वैयाघ्रपद्यः । पदि गतौ पिञ्[2] क्विपि पद. । पदेत्यत्र व्यपदेशिवद्भावात् । अपदस्येति किम् ? द्विपाद्म्याम् । द्विपात्सु । द्विपात्काम्यति । ग्यसुट्च्छिण्यादाविति किम् ? द्विपादौ । द्विपाद. । व्याघ्रपान्दि कुलानि पश्य । पादयति[3] । व्याघ्रपाद्यति[4] । व्याघ्रपाद्यते पादुक[5] ।

क्वस उस् ॥ १।२।१४५ ॥ अपदसञ्ज्ञकस्य अवयवो य क्वसुस्तस्य ग्यसुट्च्छिण्यादौ परे उसित्ययमादेशो भवति । विदुषी कुले । विदुषः । विदुषा । विदुष्मान् । पेचुषी कुले । पेचुषः । पेचुषा । पेचुष्मान् । पयुँषी कुले । पयुषः । पयुषा । पयुष्मान् । ग्यसुट्च्छिण्यादाविति किम् ? विद्वासौ । पेचिवासौ । विद्वासि कुलानि । विद्वयति । विद्वस्यति । विद्वस्यते । अपदस्येति किम् ? विद्वद्भ्याम् । विद्वत्सु । ककार. किम् ? चर्मवसा । चर्मवसे ।

श्चोऽचः ॥१।२।१४६॥ अपदसंज्ञकस्यावयवो योऽञ्चतिर्लुप्तर्नकारस्तस्य ग्यसुट्च्छिण्यादौ परे श्च इत्ययमादेशो भवति । दधीची, मधूची कुले[6] । मधूच. । मधूचा । ग्यसुट्च्छिण्यादाविति किम् ? दध्यञ्चौ । दध्यञ्चि कुलानि । दध्ययति । दध्यच्यति । दध्यच्यते । अपदस्येति किम् ? दध्यग्भ्याम् । दध्यक्षु । लुप्तनकारग्रहणादिह न भवति—साध्वञ्चा । साध्वञ्चेरञ्चनेरर्चाया[7] लुग् नास्ति । शकारः सर्वादेशार्थः ।

उद ई ॥१।२।१४७॥ उद् इत्येतस्मात् परस्य अपदसञ्ज्ञकस्य अवयवस्य लुप्तनकारस्याञ्चते ग्यसुट्च्छिण्यादौ प्रत्यये परे ई इत्ययमादेशो भवति । उदीची कुले । उदीच. । उदीचा । उदीचीयम् । ग्यसुट्च्छिण्यादाविति किम् ? उदञ्चौ । उदञ्च । उदञ्चि कुलानि । उदयति । उदच्यति । उदन्यते । अपदस्येति किम् ? उदग्भ्याम् । उदक्षु । लुप्तनकारग्रहणात् (?) सकारस्य न भवति—उदञ्चौ । उदञ्चे ।

श्वयुवन्मघोनां वस्येसुप्युश् ॥१।२।१४८॥ श्वन् युवन् मघवन् इत्येतेभ्य अपदसंज्ञकावयवेभ्य ग्यसुट्च्छिण्यादौ ई प्रत्यये सुपि च परे तदवयवस्य वशब्दस्य उशादेशो भवति । शुनीयम् । प्रियशुनी कुले । शुन । शुना । अतियूनीयम । अतियूनी कुले । यूनः । यूना । अतिमघोनीयम् । अतिमघोनी कुले । मघोनः । मघोना । ईसुपीति किम् ? शौन मासम् । यौवनम् । माघवनम् । ग्यसुट्च्छिण्यादाविति किम् ? श्वानौ । युवानौ । मघवानौ । प्रियश्वानि । प्रिययुवानि । प्रियमघवानि कुलानि । अपदस्येति किम् ? श्वभ्याम् । श्वभि[8] । युवन्निति नकारोच्चारण नकारान्तसम्प्रत्ययार्थम् । इह न भवति—युवतीः पश्य । युवत्या । युवत्यै । प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि (ग्रहणम्) इति प्राप्नोति । तन्त्वदृश्वना, मातरिश्वना इत्यत्र अर्थवद्ग्रहणान्न भवति । शकार सर्वादेशार्थः ।

श्वोऽनोऽहल्वमात् ॥ १।२।१४९ ॥ अपदसञ्ज्ञकावयवस्य अन् इत्येतस्य ग्यसुट्च्छिण्यादौ ईसुपि परे श्वादेशो भवति, न चेत् सोऽन्शब्दो हलोऽनन्तराद्दकारान्मकाराच्च पर. स्यात् । राज्ञीयम् । राज्ञ । राज्ञा । तक्ष्ण. । तक्ष्णा । अहल्वमादिति किम् ? पर्वणा । चर्मणा । मातरिश्वन् । भस्मन् । हल्ग्रहणं किम् ? प्रतिदीन्ना । साम्ना । ग्यसुट्च्छिण्यादाविति किम् ? राजानौ । सुराजानि कुलानि । अपदस्येति किम् ? राजभ्याम् । राजभिः । ईसुपीति किम् ? राजान. । शकारः सर्वादेशार्थ ।

ङिग्योर्वा ॥ १।२।१५० ॥ अपदसञ्ज्ञकावयवस्य असन्नित्यतेस्य ङौ ग्यादेशे च परे श्वादेशो भवति वा, न चेत् सोऽन्शब्दो हल्वमात्परो भवति । राज्ञि, राजनि । तक्ष्णि, तक्ष्णि[11] । साम्नि, सामनि । अहल्वमादिति

---

१. पूष्णा क०, म० । २. णिञ् क०, म० । ३. णिज्बहुलं कृत्यादिषु क०, म० टि० । ४. व्याघ्रपादमिच्छत्यात्मनः क्यच्चामाव्ययात्, क०, म० टि० । ५. क्यङ् क०, म० टि० । ६. लषपत्पद इत्युकण्—क०, म० टि० । ७. पपुषी कुले । पपुषः । पपुषा । पपुष्मान् क०, म० । ८. –हलोऽनोऽनर्चामिति क०, म० टि० । ९. –ले । दधीचः, दधीचा । मधू—क० म० । १०. न लुग्—क०, म० । ११. –क्षणि । दाक्षि, दामनि । साक्षि । क०, म० ।

किम् ? पर्वणि । चर्मणि । पर्वणी । चर्मणी । पूर्वेण नित्ये प्राप्ते विकल्प. ।

आतोऽनाङः श्लुक् ॥ १।२।१५१ ॥ अपदावयवस्य आकारस्य ग्यसुट्छिण्यादौ सुपि परे श्लुग् भवति आङन्तं वर्जयित्वा । कीलालप । कीलालपा । शुभंय[1] शुभंया[2] । आत इति किम् ? नदीः । नद्याः । अनाङ इति किम् ? शालाः पश्य । माला पश्य । ग्यसुट्छिण्यादाविति किम् ? कीलालपास्तिष्ठन्ति । कीलालपाः पश्य । अपदग्येति किम् ? कीलालपाभ्याम् । कीलालपाभि[3] । शकार उत्तरार्थ. ।

डतिष्णां संख्यानां जश्शसः ॥१।२।१५२॥ डति षकारनकारान्तायाः सख्यायाः सम्बन्धिनो जश् शस् इत्येतस्य सुप श्लुग् भवति । कति तिष्ठन्ति । कति पश्य । यति तिष्ठन्ति[3] । तति तिष्ठन्ति । तति पश्य । षट् तिष्ठन्ति । षट् पश्य । पञ्च तिष्ठन्ति । पञ्च पश्य । सप्त । नव । दश । परमषट् । परमपञ्च । डतिष्णामिति किम् ? त्रय, चत्वार, तावन्त, शतानि, सहस्राणि, इत्यत्र नमोऽवयवत्वान्न भवति । मिदचः परो हि नावयव । संख्यानामिति किम् ? विप्रुष । राजान । जश्शस इति किम् ? कतिभि । षड्भि । सप्तभिः । तत्सम्बन्धिविज्ञानादिह न भवति—प्रियषपस्तिष्ठन्ति । प्रियषप पश्य । प्रियपञ्चानस्तिष्ठन्ति । प्रियपञ्च्ञः पश्य ।

अष्ट औश् ॥ १।२।१५३ ॥ अष्टा इति कृताकारान्तस्य अष्टन्नित्येतस्य सम्बन्धिनोर्जश्शसो औशादेशो भवति । अष्टौ तिष्ठन्ति । अष्टौ पश्य । परमाष्टौ । उत्तमाष्टौ । आकारान्तपरिग्रहणादिह न भवति—प्रियाष्टा-(न)स्तिष्ठन्ति[4] । प्रियाष्ट (ष्टृण.) पश्य । णिचि क्विप्यप्यौशमिच्छन्ति, तदयत्न सिद्धम् ।

अव्ययस्य ॥१।२।१५४॥ अव्ययस्य सम्बन्धिन सुप श्लुग् भवति । स्व । उच्चै । नीचै । परमोच्चै. । परमनीचै: । अत्युच्चैसौ[6] इत्यत्र अमैम्बन्धिविज्ञानान्न भवति ।

अव्ययीभावस्य ॥१।२।१५५॥ अव्ययीभावस्य सम्बन्धिन सुप. श्लुग् भवति । अधिस्त्रि । उपवधु । तत्सम्बन्धिविज्ञानादिह न भवति—प्रियोपवधुः । प्रत्युपवधु. । योगविभाग उत्तरार्थः ।

नातः ॥१।२।१५६॥ अकारान्तस्य अव्ययीभावस्य सुप श्लुग् न भवति । उपकुम्भेन । उपकुम्भाभ्याम् । उपकुम्भै । उपकुम्भात् । उपकुम्भाभ्याम् । उपकुम्भेभ्य । उपकुम्भे । उपकुम्भयो । उपकुम्भेषु । अत इति किम् ? अधिस्त्रि । उपवधु ।

अमपञ्चम्याः ॥ १।२।१५७ ॥ अकारान्तस्य अव्ययीभावस्य सम्बन्धिन सुप अमित्ययमादेशो भवति पञ्चमी वर्जयित्वा । उपकुम्भं तिष्ठति । उपकुम्भं पश्यति । उपकुम्भ देहि । उपकुम्भं खर्म् । अमपञ्चम्या इति किम् ? उपकुम्भात् । उपकुम्भादो उपादव्ययपूर्वपदार्थप्रधानेऽव्ययीभावे स उपाद्यर्थो नानाविभक्तियोगी द्रष्टव्य ।

तृतीयाया वा ॥ १।२।१५८ ॥ अकारान्तस्य अव्ययीभावस्य तृतीयाया अमादेशो वा भवति । किं न उपकुम्भेन । किं न उपकुम्भम् ।

सप्तम्याः ॥१।२।१५९॥ अकारान्तस्य अव्ययीभावस्य सप्तम्या अमादेशो वा भवति । उपकुम्भं निधेहि । उपकुम्भ निधेहि । योगविभाग उत्तरार्थ ।

नद्यृद्धवंश्यस्य ॥१।२।१६०॥ नद्यन्तस्य ऋद्धान्तस्य वंश्यान्तस्य चाकारान्तस्याव्ययीभावस्य सप्तम्या नित्यममादेशो भवति । उन्मत्तगङ्गम्[9] । लोहितगङ्गं वसति । द्रियमुनम् । सप्तगोदावरं[10] वसति । सुमद्रम् । सुमगधं वसति । एकविंशति भारद्वाजम्[11] । त्रिपञ्चाशद्गौतमम् । त्रिकोशलं वसति । प्रतिपदोक्तग्रहणादिह न भवति—उपगङ्गे । उपयमुने । नित्यार्थ वचनम ।

---

१. —नाङः क० म० । २. या, भः, टः, क्वः । आत इ—क०, म० । ३. —न्ति । यति पश्य । तति ति—क०, म० । ४. —न्तपरिग्रहादि—क०, म० । ५ प्रिया अष्टौ येषां ते—क०, म० । ६. —सौ । अत्युच्चैस इत्य—क०, म० । ७. अवयवसम्बन्धिविज्ञा—क०, म० । ८. स्वम्, क०, म० । ९. नदीभिर्नाम्नीति समासः, क०, म० टि० । १०. सङ्ख्या वंश्येश्च पूर्वपदार्थे, इतिसमासः । सङ्ख्याया नदी गोदावर्या इति अच् समासान्तः । क०, म० टि० । ११. त्रिपञ्चाशद् गौतमम्, क०, म० ।

परस्परान्योऽन्येतरेतरस्यां सुपो वाऽपुंसि ॥१।२।१६१॥ परस्पर अन्योऽन्य इतरेतर इत्येतेषामपुंसि स्त्रिया नपुसके च प्रयुज्यमानाना सम्बन्धिन सुप. स्थाने आमित्ययमादेशो भवति वा। इमे सख्यौ परस्परा भोजयत. । परस्परं भोजयत. । आभि: सखीभि: परस्परा भोज्यते । परस्परं भोज्यते। परस्परेण भोज्यते । इमा: सख्य: परस्परा प्रयच्छन्ति। परस्परस्मै प्रयच्छन्ति । इमे सख्यावन्योन्या भोजयत[1]: । अन्योन्यं भोज्यते । अन्योन्येन भोज्यते । इमे सख्यौ इतरेतरा भोजयतः । इतरेतर भोजयत । नपुसके—इमे कुले परस्परा भोजयन., परस्परं भोजयत. । अन्योऽन्या भोजयत[2]. । इतरेतर भोजयत । सुप इति स्यादिविषयेऽपि भवति। अपुंसीति किम्? परस्परमिमे जना: भोजयन्ति । अमित्यन्ये । पुंसीत्यपरे । इमे परस्परादय. शब्दा: कर्मव्यतिहारैकत्वविषया: सर्वत्र पुंस्त्वोपादाना अस्मादेव निपातनात् परादय सर्वादय[3] कृतद्विर्वचनादयो विज्ञेया. ।

भ्यत्या: ॥१।२।१६२॥ भकारयकारादावकारादौ जसि शसि च सुपि परे अकारस्य आकारादेशो भवति । श्रमणाभ्याम् । सयताभ्याम् । श्रमणाय । संयताय । श्रमणा: । संयता. । श्रमणान् । संयतान् । काँस्कानिति वचनादतीति सामान्येन वचनाच्च शस्यात्वे 'आतोऽनाङः इलुक्' [१।२।१५१] इति इलुग्न भवति । श्रमणमित्यपि नित्यत्वात् 'मोणोऽमः' [१।२।३६] इति मकारो भवति । श्रमणात्, श्रमणस्य इत्यत्र आत्स्येत्स्यौ युष्मभ्यम्, अस्मभ्यम् इत्यादौ युष्मदस्मदो: अमौद्वल्या इत्यत्र हल्ग्रहणान्न भवति । हल्ग्रहणस्य हि तस्य आकारादेव[4] सुब्व्यवच्छेद: ।

बह्वोसि स्येत् ॥१।२।१६३॥ सकारभकारादौ बहुविषये ओसि च सुपि परे अकारस्य एकारादेशो भवति । एभि. । अमीभि: (?) । श्रमणेभ्य । संयतेभ्य: । सर्वेषाम् । विश्वेषाम् । श्रमणेषु । सयतेषु । श्रमणयो[5] । संयतयो । स्भीति किम् ? युष्माकम् । अस्माकम् । श्रमणानाम् । संयतानाम् । नामि दीर्घो मुनीनाम् इत्यादौ सावकाश:, इह परत्वादेत्वेन बाध्यते ।

ऐस् भिसोऽशश: ॥१।२।१६४॥ अकारात् परस्य सुपो भिस स्थाने ऐसादेशो भवति । अशशो दकारादेशौ यो मकारस्तदन्तादकारादिदमादेशौ[6] च्छम परस्य तु न भवति । श्रमणै । सयतै । अतिजरसै । सुप इति किम्? देवदत्तभिस्सा । ओदनै[7]भिस्सा । सुप इत्यनुवृत्तमिह अर्थवद्ग्रहणनिरपेक्षमैस्त्वं व्यवस्थापयति । अत इति किम् ? मुनिभि । साधुभि । तकार किम् ? शालाभि. । मालाभि: । अशश इति किम् ? अमीभि । एभि । दकार किम् ? कामै. । वामै । मकार किम् ? छेदै । भेदै. । अमुकै: इत्यत्र मकारानन्तरो नाकार इति न भवति ।

ङसाद्येस्स्येनाद्यम् ॥ १।२।१६५ ॥ अकारात् परेषा ङस् आ अमि ए इत्येतेषा सुपा स्य इन्[8] आत् य इत्येते यथाक्रममादेशा भवन्ति । श्रमणस्य । संयतस्य । श्रमणेन । संयतेन । श्रमणात् । सयतात् । श्रमणाय । सयताय । अतिजरसेन । अतिजरसात् । आदित्यादेशाद् ङसाद्यादेशे सन्निपातपरिभाषा नास्ति ।

सर्वादेर्ङ्यस्येः स्मिन्स्मात्स्मै ॥१।२।१६६॥ अकारान्ताना सर्वादीना शब्दरूपाणा सम्बन्धिना ङि असि ए इत्येतेषा सुपा यथाक्रम स्मिन् स्मात् स्मै इत्येते आदेशा भवन्ति । सर्वस्मिन् । सर्वस्मात् । सर्वस्मै । तस्मिन् । तस्मात् । तस्मै । परमसर्वस्मिन् । परमसर्वस्मात् । परमसर्वस्मै । तत्सम्बन्धिविज्ञानादिह न भवति—प्रियसर्वे । प्रियसर्वात् । प्रियसर्वाय । द्वयन्याय । त्र्यन्याय । अतिसर्वे । अतिसर्वात् । अतिसर्वाय । आद्यपूर्वाय । अत इति किम् ? भवति । भवत: । भवते । डतर-डतमौ प्रत्ययौ तदुपादानं स्वार्थिकप्रत्ययान्तैकदेशानामिहाग्रहणार्थम् । [9]सर्वतमे । सर्वतमात् । सर्वतमाय । दगर्थं च । त्व । त्वत् । एकोऽकारान्तोऽन्यस्तकारान्त: । समं सर्वार्थे । सम. शब्द: सर्वशब्दार्थे सर्वादिर्भवति । इह न भवति—समे

---

१. —यत: । अन्योऽन्यं भोजयत: । आभि: सखीभिरन्योऽन्यां भोज्यते । अन्यो—क०, म० । २. —जयत: । अन्योऽन्यं भोजयत: । इतरेतरां भोजयत: इतरेत—क०, म० । ३. अन्योऽन्यं परस्परेतरेतरा क्रिया व्यतिहारे निपात्यन्ते इति द्विर्वचनं वर्धमानार्थे । क०, म० टि० । ४. आकारादिरेव सुब्व्यवच्छेद:, क०, म० । ५. शांबास: क०, म० । ६. ओदनभिस्सिद्धा क०, म० । ७. इन क०, म० । ८ प्रत्ययान्यैकदेशा क०, म० । ९. सर्वतमम्—क०, म० ।

देशे–अविषमे इत्यर्थ[1]। यथादेशमनुदेश समानाम् तुल्यानामित्यर्थः। पूर्वपरावरदक्षिणोत्तरा[2]धराणि व्यवस्थायाम्। स्वाभिधेयापेक्षावधिनियमो व्यवस्था। तत्रैतानि सर्वादीनि भवन्ति[3] नान्यत्र। दक्षिणाय गाथकाय प्रवीणायेत्यर्थ। स्वमज्ञातिधनाख्यायाम्। स्वं इत्येतत्सर्वादि[4] भवति, ज्ञातिधनपर्यायस्तु न भवति। स्वाय ददाति, ज्ञातये इत्यर्थ। स्वाय क्लिश्यते, धनायेत्यर्थ। अन्तरं बहिर्योगोपसंव्यानयोरपुरि। बहिर्योगे बहिर्भावे[5] बाह्येन वा योगे-उपसंव्या[6]ने उपसवीयमाने च वर्तमान[7] इत्येतत्सर्वादि वा भवति, नान्यत्र। बहिर्योगेऽपि न पुरि[8]। अस्मिन् अन्तरे शीतानि उदकानि मध्ये इत्यर्थ.। अन्तराया पुरि वसति। भवतु इत्युदित्, तस्य पाठो दुत्वैकप्रयोगपूर्वनिपात (पूर्वो निपात) पुभावडद्रीगक् क्विकट् सार्थ[10]। संज्ञाया न[11]। सर्वाण्येव सर्वादीनि शब्दरूपाणि संज्ञाया न सर्वादीनि भवन्ति। सर्वो नाम कश्चित् तस्मै सर्वाय। सर्व विश्व उभ[12] यट् अन्य अन्यतर इतर डतर डतम त्व त्वत्[13] नेम[14] समं सर्वार्थे। पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायाम्। स्वमज्ञातिधनाख्यायाम्। अन्तरं बहिर्योगोपसंव्यानयोरपुरि। त्यद् तद् यद् अदस् इदम् एतद् एक द्वि युष्मद् अस्मद् भवतु किम्। अमज्ञाया सर्वादि।

जसशिः ॥१।२।१६७॥ अकारान्ताना सर्वादीना सम्बन्धिनो जस स्थाने शि इत्ययमादेशो भवति। सर्वे। विश्वे। उभये। ते। परमसर्वे। तत्सम्बन्धिविज्ञानादिह न भवति—प्रियसर्वा। अतिसर्वा। अत इति किम्? भवन्त.। शकार सर्वादेशार्थ।

नेमार्धप्रथमचरमाल्पकतिपयतयस्य वा ॥१।२।१६८॥ नेमादीना तय इत्येतत्प्रत्य[15]यान्ताना सम्बन्धिनो जस शि इत्ययमादेशो भवति वा। नेमे, नेमा। अर्धे, अर्धा। प्रथमे, प्रथमा। चरमे, चरमा। अल्पे, अल्पा[16]। कतिपये, कतिपया[17]। द्वितये, द्वितया[18]। त्रितये, त्रितया। द्वये, द्वया। त्रये, त्रया। परमनेमे, परमनेमा। तत्सम्बन्धिविज्ञानादिह न भवति—प्रियनेमा। अतिनेमा। प्रत्ययान्ताग्रहणादिह न भवति—अर्धका। व्यवस्थितविभाषाविज्ञानात् संज्ञाया च न भवति नेमा नाम[19] केचित्। अन इति किम्? नेमा.[20] स्त्रिय।

द्वन्द्वे ॥ १।२।१६९ ॥ द्वन्द्वसमासे वर्तमानानामकारान्ताना सर्वादीना सम्बन्धिनो जस स्थाने शि इत्ययमादेशो भवति वा। कतरकतमे, कतरकतमा। परमकतरकतमे, परमकतरकतमा[21]। तत्सम्बन्धिविज्ञानादिह न भवति। वस्त्रान्तरवसनान्तरा। प्रत्ययान्तैकदेशानामसर्वादित्वादिह न भवति—कतरकतमका।

न सर्वादिः ॥१।२।१७०॥ [22]द्वन्द्वसमासे सर्वादि सर्वादिर्न भवति। [23]पूर्वपराय, पूर्वपरात्। अधरोत्तराय, अधरोत्तरात्। [24]पूर्वपराणाम्। अधरोत्तराणाम्। कतरकतमानाम्। कतरकतमका। दक्षिणोत्तरपूर्वाणाम्। अपरदक्षिणोत्तराणाम्। द्वन्द्वस्य निषेधो नावयवस्येति पुंभावो भवत्येव। सर्वादित्वप्रतिषेधः सर्वादिसर्वकार्याभावार्थ।

पूर्वावरं तृतीययोगे ॥१।२।१७१॥ पूर्व अवर इत्येतौ सर्वादी तृतीयान्तेन योगे सम्बन्धे सर्वादी न भवत.। मासेन पूर्वाय मासपूर्वाय। संवत्सरेण अवराय संवत्सरावराय। पूर्वावर[25] इति किम्? वाचाधरस्मै। तृतीययोग इति किम्? ग्रामात् पूर्वस्मै। योगग्रहणं किम्? आगमिष्यति देवदत्तो मासेन। पूर्वस्मै दीयता कम्बलः।

नव पूर्वा वादौ ॥ १।२।१७२ ॥ पूर्वादयो नव सर्वादय —अकारादौ इकारादौ सुपि परे सर्वादयो वा भवन्ति। पूर्वे, पूर्वा। पूर्वस्मात्, पूर्वात्। पूर्वस्मिन्, पूर्वे। परे, पराः। परस्मात्, परात्। परस्मिन्,

---

१. यथासङ्ख्यमनुदेशः समा-क०, म०। २. –रापधरा-क०, म०। ३. पूर्वस्मिन् पर्वते, इत्यादि क०, म० टि०। ४. स्वम् क० म०। ५. –वादिर्भव-क०, म०। ६. –वेन ग्रा-क०, म०। ७. उपसंव्याने क०, म०। ८. -नमन्तर इत्ये—क०, म०। ९. अन्तरस्मै वनाय नगरबाह्यायेत्यर्थः। अन्तरस्मै वस्त्राय वस्त्रान्तरेणावृतायेत्यर्थः। अन्यत्र। क०, म० टि०। १०. सौर्थः क०, म०। ११. असंज्ञायाम् सर्वाण्येव-क०, म०। १२. उभ, उभयट् क०, म०। १३. तत् क०, म०। १४. नेम सिम समं स-क०, म०। १५. तत्प्रत्ययानां चा-क०, म०। १६. नेम नाम केचित् क०, म०। १७. नेमाः स्त्रियः। क०, म०। १८. द्वन्द्वसमासः, क०, म०। १९. पूर्वापराय, पूर्वापरात् -क०, म०। २०. पूर्वापराणाम् क०, म०। २१. –रमि-क०, म०।

परे। नवेति किम् ? [1]ते। स्यस्मात्। पूर्वा इति किम् ? सर्वे[2]। सर्वस्मिन्। अदाविति किम् ? पूर्वस्मै। पूर्वेषाम्। पूर्वस्याः। पूर्वस्याम् इत्यत्र नित्यत्वात् पूर्वमेव याट्। सर्वादय इति किम् ? उत्पादाख्ये पूर्व आग्नायणीये। पूर्वे। पूर्वापरात्। अधरोत्तरात्। मासेन पूर्वा. मासपूर्वाः।

तीयं ङिति ॥१।२।१७३॥ तीयप्रत्ययान्तं शब्दरूपं ङिति ङित्कार्ये कर्तव्ये सर्वादि वा भवति। द्वितीयस्मै, द्वितीयाय। द्वितीयस्यै, द्वितीयायै। तृतीयस्मात्, तृतीयात्। तृतीयस्याः, तृतीयायाः। ङित्कार्येऽन्यं विकल्प इत्यण् न भवति। द्वितीयकाय। तृतीयकाय। प्रतिपदोक्तस्य तीयस्य ग्रहणम्, तेनेह न भवति—मुखतीयाय, मुखतीयात्। पार्श्वतीयाय, पार्श्वतीयात्।

विदिक् च ॥१।२।१७४॥ विदिग्वाची सर्वादिः सर्वादिर्वा भवति। उत्तरपूर्वस्यै, उत्तरपूर्वायै। उत्तरपूर्वासाम्, उत्तरपूर्वाणाम्। चकारो 'वा' इत्यस्य अनुकर्षणार्थः, अनुक्तसमुच्चयार्थो न। बहुव्रीहौ सर्वादि.। त्वत्कपितृको मत्कपितृकः इति ह्रस्वे।

ङस्याटथस्य ॥१।२।१७५॥ अवर्णान्ताना सर्वादीना तत्सम्बन्धिनि याडादौ सुपि परे ङस्—इत्ययमादेशो भवति। सर्वस्यै। सर्वस्याः। सर्वस्याम्। परमसर्वस्यै। तत्सम्बन्धिविज्ञानादिह न भवति—प्रियसर्वायै। अतिसर्वायै। अस्येत्युत्तरार्थम्।

सामामः ॥१।२।१७६॥ अवर्णान्तानां सर्वादीना सम्बन्धिन आम.—षष्ठीबहुवचनस्य स्थाने साम्—इत्ययमादेशो भवति। सर्वेषाम्। सर्वासाम्। तेषाम्। तासाम्। परमसर्वेषाम्। परमसर्वासाम्। तत्सम्बन्धिविज्ञानादिह न भवति—प्रियसर्वाणाम्। अतिसर्वाणाम्। अस्येति किम् ? भवताम्। भवतीनाम्। सटाकमोऽपि प्राप्नोति[3] सावचनम्।

युष्मदस्मद्भ्यामाकम् ॥१।२।१७७॥ युष्मदस्मद् इत्येताभ्या परस्याऽऽमः षष्ठीबहुवचनस्य तत्सम्बन्धिनोऽन्यसम्बन्धिनो वा स्थाने आकमित्ययमादेशो भवति। युष्माकम्। अस्माकम्। प्रिययुष्माकम्। प्रियास्माकम्[4]। आकमित्याकारो [5]यन्तरार्थः। युष्मानाचक्षाणानाम् युष्माकम्[6]। अस्माकम्।

ङश्शस्भ्यसोऽश्नाभ्यम् ॥१।२।१७८॥ युष्मदस्मद्भ्यामुत्तरेषा तत्सम्बन्धिनामन्यसम्बन्धिनां वा ङस् शस् भ्यस् इत्येतेषा सुपामश् नकार. अभ्यं च यथाक्रममादेशा भवन्ति। तव। मम। अतितव। अतिमम। युष्मान्। अस्मान्। प्रिययुष्मान्। प्रियास्मान्। युष्मभ्यम्। अस्मभ्यम्। प्रिययुष्मभ्यम्। प्रियास्मभ्यम्। भ्यसश्चतुर्थीबहुवचनस्याभ्यमादेश.। पञ्चमीबहुवचनस्य तुभ्योऽसोऽदिति वक्ष्यते। अशिति शकारः सर्वादेशार्थः असन्देहार्थश्च।

भ्योऽसोऽद् ॥१।२।१७९॥ युष्मदस्मद्भ्यामुत्तरस्य तत्सम्बन्धिनोऽन्यसम्बन्धिनो वा [7]अस्सहितस्य भ्यसः पञ्चमीबहुवचनस्य असश्च पञ्चम्येकवचनस्य अदित्ययमादेशो भवति। त्वद्। मद्। अतित्वद्। अतिमद्। युष्मद्। अस्मद्। अतियुष्मद्। अत्यस्मद्। युष्मदस्मद्भ्यां भ्योऽसोऽद् यथासङ्ख्यं न भवति वचनभेदात्।

ङे सुटोऽम् ॥१।२।१८०॥ युष्मदस्मद्भ्यां परस्य तत्सम्बन्धिनोऽन्यसम्बन्धिनो वा ङे इत्येतस्य सुटश्च सुपः स्थाने अमित्ययमादेशो भवति। तुभ्यम्। मह्यम्। अतितुभ्यम्। अतिमह्यम्। त्वम्। अहम्। अतित्वम्। अत्यहम्। युवाम्। आवाम्। अतियुवाम्। अत्यावाम्। यूयम्। वयम्। अतियूयम्। अतिवयम्। त्वाम्। माम्। अतित्वाम्। अतिमाम्। युवाम्। आवाम्। अतियुवाम्। अत्यावाम्। ङे सुट इति किम् ? त्वया। मया।

दोर्लुक् ॥१।२।१८१॥ दकारान्तयोर्युष्मदस्मदोस्तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सुपि परे लुग्भवति। युष्मभ्यम्। अस्मभ्यम्। अतियुष्मभ्यम्। अत्यस्मभ्यम्। त्वद्। मद्। अतित्वद्। अतिमद्। युष्मद्। अस्मद्।

---

१. स्ये, स्यस्मात्, स्यस्मिन्, क०, म०। २. सर्वे, सर्वस्मात्, सर्व—क०, म०। ३. प्राप्नोतीति क०, म०। ४. दोर्लुगिति लुग्, दीर्घश्च क०, म० टि०। ५. —कम्। अतियुष्माकम्, अत्यस्माकम्, क०, म०। ६. यन्तार्थः क०, म०। ७. अन्यथा युष्माकमस्माकमिति स्यात्, क०, म० टि०। ८. अस्सहचरितस्य।

अतियुष्मद् । अत्यस्मद् । युष्माकम् । अस्माकम् । अतियुष्माकम् । अत्यस्माकम् । लुप्यलिङ्गे युष्मदस्मदी इति स्त्रियामाट् (ड्) न भवति । सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति वा । दोरिति किम् । मोत्तरो विकल्पः ।

पञ्चम्याश्च चतुर्थ्याश्च षष्ठी-प्रथमयोरपि ।
याम्यद्वित्वचनान्यत्र तेषु लोपो विधीयते ॥

वा ॥१।२।१८२॥ मकारान्तयोर्युष्मदस्मदोस्तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सुपि परे वा लुग्भवति । युष्मानाचक्षाणेभ्यो युष्मभ्यम्, युषभ्यम् । अस्मभ्यम्, असभ्यम् । युष्मद्, युषद् । अस्मद्, असद् । युष्माकम्, युषाकम् । अस्माकम्, असाकम् ।

अमौङ्योः ॥१।२।१८३॥ युष्मदस्मदोस्तत्सम्बन्धिन्यन्यसम्बन्धिनि वा अमि द्वितीयैकवचने —औकारयोः—हलादौ च सुपि परे आकारादेशो भवति । त्वाम् । माम् । अतित्वाम् । अतिमाम् । युवाम् । आवाम् । अतियुवाम् । अत्यावाम् । युष्मान् । अस्मान् । अतियुष्मान् । अत्यस्मान् । युवाभ्याम् । आवाभ्याम् । अतियुवाभ्याम् । अत्यावाभ्याम् । युष्माभिः । अस्माभिः । अतियुष्माभिः । अत्यस्माभि । युष्मासु । अस्मासु । अतियुष्मासु । अत्यस्मासु । अमौङ्योरिति किम् ? त्वम् । अहम् । त्वद् । मद् ।

यौसि यः ॥१।२।१८४॥ युष्मदस्मदोस्तत्सम्बन्धिष्वन्यसम्बन्धिषु वा इ आ ओम् इत्येतेषु सुप्सु परतः यकारादेशो भवति । त्वयि । मयि । त्वया । मया । युवयोः । आवयोः । प्रियत्वयि । प्रियमयि । प्रिययुवयि । प्रियावयि । प्रिययुष्मयि । प्रियास्मयि । यौसीति किम् ? युष्माकम् । अस्माकम् । युगपवादौ योगः ।

मन्तस्य युवावौ द्वयोः ॥१।२।१८५॥ द्वित्वविशिष्टेऽर्थे वर्तमानयोर्युष्मदस्मदोर्मकारावसानो योऽवयवस्तस्य तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सुपि परे यथासङ्ख्यं युव आव इत्येतावादेशौ भवतः । युवाम् । आवाम् । युवाभ्याम् । आवाभ्याम् । युवयोः । आवयोः । अतिक्रान्तौ युवामतियुवाम् । (अतिक्रान्तावावाम्) अत्यावाम् । अतिक्रान्तं युवामतियुवाम् । (अतिक्रान्तमावाम्) अत्यावाम् । अतिक्रान्तौ[2] युवामतियुवाम् । (अतिक्रान्तावावाम्) अत्यावां पश्यन्ति । अतियुवान । अत्यावान् । अतियुवया । अत्यावया । अतियुवाभ्याम् । अत्यावाभ्याम् । अतियुवाभिः । अत्यावाभिः । अतियुवाभ्याम् । अत्यावाभ्याम् । अतियुवभ्यम् । अत्यावभ्यम् । अतियुवत् । अत्यावत् । अतियुवाभ्याम् । अत्यावाभ्याम् । अतियुवत् । अत्यावत् । अतियुवयोः । अत्यावयोः । अतियुवाकम् । अत्यावाकम् । अतियुवयि । अत्यावयि । अतियुवयो. । अत्यावयोः । अतियुवासु । अत्यावासु । सुजस्ङेङस्सु परत्वात्त्वाहादयः । मन्तस्येति किम् ? सर्वादेशो मा भूत् । युवयोः । आवयो. । युवकाभ्याम् । आवकाभ्याम् । द्वयोरिति किम् ? युष्मान् । अस्मान् । युष्माभिः । अस्माभि । युष्मभ्यम् । अस्मभ्यम् । युष्मत् । अस्मत् । युष्माकम् । अस्माकम् । युष्मासु । अस्मासु । युष्मदस्मद्विशेषण किम् ? युष्मानतिक्रान्तौ[3] अतियुष्मान् । अत्यस्मान् । अतियुष्माभ्याम् । अत्यस्माभ्याम् । अतियुष्मयोः । अत्यस्मयो । सुपीति किम् ? युष्मत्पुत्र । अस्मत्पुत्र । युष्मदीयम् । अस्मदीयम् ।

त्वमौ प्रत्ययोत्तरपदे चैकस्मिन् ॥१।२।१८६॥ एकत्वविशिष्टेऽर्थे वर्तमानयोर्युष्मदस्मदोर्मकारावसानो योऽवयवस्तस्य तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सुपि परे प्रत्ययोत्तरपदयोश्च परतः यथासङ्ख्यं त्व म इत्येतावादेशौ भवतः । त्वाम् । माम् । त्वया । मया । त्वद् । मद् । त्वयि । मयि । अतिक्रान्तौ[4] त्वामतित्वाम् । अतिक्रान्तौ माम् अतिमाम् । अतिक्रान्तं त्वाम् (अतित्वाम्) । (अतिक्रान्तं माम्) अतिमाम् । अतिक्रान्तौ त्वामतित्वाम् । (अतिक्रान्तौ माम्) अतिमां पश्यन्ति । अतित्वान् । अतिमान् । अतित्वया । अतिमया । अतित्वाभ्याम् । अतिमाभ्याम् । अतित्वाभिः । अतिमाभिः । अतित्वाभ्याम् ।

---

१. युगपवादौ योगाः क०, युगपवादौ योगौ म०, लुगपवादौ योगो म० । २. अतिक्रान्तौ यु-म० । ३. –क्रान्तौ अतियुष्मान्, अत्यस्मान् म०, क० । ४. –क्रान्तौ त्वा—म० ।

अतिमाभ्याम् । अतिनुभ्यम् । अतिमह्यम् । अतित्वभ्यम् । अतिमभ्यम्[1] । अतित्वद् । अतिमद् । अतित्वाभ्याम् । अतिमाभ्याम् । अतित्वद् । अतिमद् । अतित्वयोः । अतिमयोः । अतित्वाकम् । अतिमाकम् । अतित्वयि । अतिमयि । अतित्वयोः । अतिमयोः । अतित्वासु । अतिमासु । त्वदीयः । मदीयः । त्वद्यति । मद्यति । त्वदयति । मदयति । त्वत्कृतम् । मत्कृतम् । त्वत्प्रधानः । मत्प्रधानः । त्वद्वित्तम् । मद्वित्तम् । त्वच्चित्तम् । मच्चित्तम् । त्वत्पुत्र. । मत्पुत्रः । प्रत्ययोत्तरपदे चेति किम् ? अधियुष्मद् । अध्यस्मद् । सुपीति दो म इत्याद्युत्तरार्थमनुवर्तते । प्रत्ययोत्तरपदग्रहणादन्तरङ्गानपि विधीन् बहिरङ्गा श्लुग्बाधते । तेन गोमत्यते । गोमत्प्रिय इत्यादौ नमादिर्न भवति । एकस्मिन्निति किम् ? युष्माकम् । अस्माकम् । युष्मदस्मद्विशेषणादिह न भवति युष्मानतिक्रान्तमतियुष्माम् । (अस्मानतिक्रान्तम्) अत्यस्माम् । अतियुष्मया । अत्यस्मया । अतियुष्मद् । अत्यस्मद् । अतियुष्मयि । अत्यस्मयि । मन्तस्येति किम् ? सर्वादेशो मा भूत् ।

त्वाहौ सौ ॥१।२।१८७॥ युष्मदस्मदोस्तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सौ परे यथासङ्ख्यं त्व अह इत्येतावादेशौ भवतः । त्वम् । अहम् । अतिक्रान्तस्त्वामतित्वम् । (अतिक्रान्तो माम्) अत्यहम् । अतिक्रान्तौ युवामतित्वम् । (अतिक्रान्तावावाम्) अत्यहम् । अतिक्रान्तौ युष्मानतित्वम् । अतिक्रान्तावस्मान् अत्यहम् । सावितिं किम् ? युष्माभिः । अस्माभि· । युष्मासु । अस्मासु । त्वत्पुत्रको मत्पुत्रक इत्यत्र 'श्लुचीगेनत्' इति नियमान्न भवति ।

यूयवयौ जसि ॥१।२।१८८॥ युष्मदस्मदोस्तत्सम्बन्धिन्यन्यसम्बन्धिनि वा जसि परे यथसङ्ख्यं यूय—वय—इत्येतावादेशौ भवत· । यूयम् । वयम् । प्रियस्त्वमेषा ते प्रिययूयम् । (प्रियोऽहमेषा ते) प्रियवयम् । प्रियौ युवामेषा ते प्रिययूयम् । (प्रियावावामेषा ते) प्रियवयम् । प्रिया यूयमेषां ते प्रिययूयम् । (प्रिया वयमेषाते) प्रियवयम् ।

तुभ्यमह्यौ ङयि ॥१।२।१८९॥ युष्मदस्मदोस्तत्सम्बन्धिन्यन्यसम्बन्धिनि वा ङयि परे यथासङ्ख्यं तुभ्य मह्य इत्येतावादेशौ भवतः। तुभ्यम् । मह्यम् । प्रियस्त्वं यस्य तस्मै प्रियतुभ्यम् । (प्रियोऽहं यस्य तस्मै) प्रियमह्यम् । प्रियौ युवा यस्य तस्मै प्रियतुभ्यम् (प्रियावावां यस्य तस्मै) प्रियमह्यम् । प्रिया यूयं यस्य तस्मै प्रियतुभ्यम् । (प्रिया वयं यस्य तस्मै) प्रियमह्यम् ।

तवममौ ङसि ॥१।२।१९०॥ युष्मदस्मदोस्तत्सम्बन्धिन्यन्यसम्बन्धिनि वा ङसि परे यथाक्रमं[2] तव मम इत्येतावादेशौ भवत । तव । मम । प्रियस्त्व यस्य तस्य प्रियतव । (प्रियोऽहं यस्य तस्य) प्रियमम । प्रियौ युवां यस्य तस्य प्रियतव । (प्रियावावां यस्य तस्य) प्रियमम । प्रिया यूयं यस्य तस्य प्रियतव । (प्रिया वयं यस्य तस्य) प्रियमम ।

पदाद्वाक्यस्य वस्नसौ युग्विभक्तेः ॥१।२।१९१॥ तिङा वाक्यमित्युक्तलक्षणं वाक्यम् । द्वितीया चतुर्थी षष्ठी च युग्विभक्ति. । वाक्यावयवात् पदात्परयोस्तद्वाक्यस्यैवावयवयोर्युष्मदस्मदोर्युग्विभक्त्यन्तयोर्यथासङ्ख्यं वस् नस् इत्येतावादेशौ भवतः । धर्मो वो रक्षतु । धर्मो नो रक्षतु । शीलं वो दीयते । शीलं नो दीयते । शीलं व. स्वम् । शीलं न. स्वम् । पदादिति किम् ? युष्मान् धर्मो रक्षतु । अस्मान् धर्मो रक्षतु । वाक्यस्येति किम् ? ओदनं पचत युष्माकं भविष्यति । अस्माकं भविष्यति । वाक्य इति वक्तव्ये वाक्यस्येति षष्ठी पदावयवयोर्मा भूदिति—इति युष्मदुपाध्यायो ब्रूते । इत्यस्मदुपाध्यायो ब्रूते । इति युष्मान्पश्यन्ति । इत्यस्मान्पश्यन्ति । युग्विभक्तेरिति किम् ? ज्ञाने यूयं तिष्ठत । शीले वयम् । विभक्तिग्रहणं युक् सुप् व्युदासार्थम् । ज्ञाने युवा तिष्ठतम् । शीले आवाम् ।

वांनावौ द्वित्वे ॥१।२।१९२॥ वाक्यस्यावयवात् पदात्परयोस्तद्वाक्यस्यैवावयवयोर्युष्मदस्मदोर्द्वित्वविषये युग्विभक्त्यन्तयोर्यथासङ्ख्यं वां नावित्येतावादेशौ भवतः । धर्मो वां रक्षतु । धर्मो नौ रक्षतु । शीलं वां दीयते । शीलं नौ दीयते । शीलं वां स्वम् । शीलं नौ स्वम् ।

तेमयावेकत्वे ॥१।२।१९३॥ वाक्यस्यावयवात् पदात्परयोस्तद्वाक्यस्यैवावयवयोर्युष्मदस्मदोरेकत्व-

---

१. अतित्वभ्यम्, अतिमभ्यम् इति क० म० इत्यत्र नास्ति । २. –थासङ्ख्यं तव क०, म० ।

विषये युष्मदस्मदन्तयोर्यथासङ्ख्यं ते मे इत्येतावादेशौ भवतः । शीलं ते दीयते । शीलं मे दीयते । शीलं ते स्वम् । शीलं मे स्वम् ।

त्वामौ द्वितीयायाः ॥१।२।१९४॥ वाक्यस्यावयवात्परयोस्तद्वाक्यस्यैवावयवयोर्युष्मदस्मदोर्द्वितीयैकवचनान्तयोर्यथासङ्ख्यं त्वा मा इत्येतावादेशौ भवतः । शीलं त्वा रक्षतु । शील मा रक्षतु ।

नेवामन्त्र्यं पूर्वम् ॥१।२।१९५॥ यदामन्त्र्यते सम्बोध्यते तत्पदं युष्मदस्मद्भ्यां पूर्वं नेव न भवतीव, अविद्यमानवद्भवतीत्यर्थः । अविद्यमानवत्त्वे प्रयोजनं वस्नसाद्यभावादि । देवदत्त युष्मान् रक्षतु धर्मः । देवदत्त अस्मान्रक्षतु धर्मः । देवदत्त युष्मभ्यं शीलं दीयते । देवदत्त अस्मभ्यं शीलं दीयते । देवदत्त युष्माकं शीलं स्वम् । देवदत्तास्माकं शीलं स्वम् । देवदत्त युवा रक्षतु धर्मः । देवदत्त आवा रक्षतु धर्मः । देवदत्त तुभ्यं शीलं दीयते । देवदत्त मह्यं शीलं दीयते । देवदत्त त्वा रक्षतु धर्मः । देवदत्त मा रक्षतु धर्मः । इवग्रहण श्रवणार्थम् । आमन्त्र्यमिति किम् ? धर्मो वो रक्षतु । धर्मो नो रक्षतु । पूर्वमिति किम् ? मया तत्सर्वमाख्यातं युष्माकं मुनिपुङ्गवाः । सद्वस्वेऽत्र[2] पादाद्योरिति[3] निषेधो न स्यात् । पूर्वस्याविद्यमानवद्भावो व्यवहितस्याप्यविद्यमानवद्भावार्थः । अन्यथा हि नामन्त्र्यादित्येवोच्येत । तेन धर्मो वोऽथो रक्षतु । देवदत्त धर्मो नोऽथो रक्षतु—इत्यत्र पदात् प्रथमाया वेति विकल्पो न भवति ।

जसिशेष्यं वाऽऽमन्त्र्ये ॥१।२।१९६॥ तदतद्विषयं विशेष्यं तस्य व्यवच्छेदक विशेषणम् । जसन्तमामन्त्र्यं पदं विशेष्यं युष्मदस्मद्भ्यां पूर्वं तद्विशेषणे आमन्त्र्यपदे परे अविद्यमानवद्भवति वा । नेत्यस्यापवादः । देवाः शरण्या युष्मानथो शरणं प्रपद्ये । देवाः शरण्या वोऽथो शरणं प्रपद्ये । देवाः शरण्या अस्मानथो रक्षत । देवाः शरण्या नोऽथो रक्षत । जसिति किम् ? साधो सुविहित वोऽथो शरणं प्रपद्ये । साधो सुविहित नोऽथो शरण प्रपद्ये[4] । साधो सुविहित नोऽथो रक्षत । विशेष्यमिति किम् ? शरण्याः साधवो युष्मान् शरणं प्रपद्ये । शरण्याः साधवोऽस्मान् रक्षत । आचार्या उपाध्याया युष्मान्नमस्यामि । आचार्या उपाध्याया अस्मान्रक्षत । आमन्त्र्य इति किम् ? देवा युष्मान् शरण्या. शरणं प्रपद्ये । साधव. शरण्या नोऽथो यूय सुविहिता भवत । अन्वादेशे विकल्पार्थ वचनम् ।

न ॥१।२।१९७॥ आमन्त्र्यपदं विशेष्यं युष्मदस्मद्भ्यां पूर्वमामन्त्र्यवदेतद्विशेषणे परे न नेवाविद्यमानवच्च भवति । साधू सुविहितौ[5] वा शरणं प्रपद्ये । साधो सुविहित त्वा शरणं प्रपद्ये । साधू सुविहितौ नो रक्षतम् । साधो सुविहित मा रक्ष ।

पादाद्योः ॥१।२।१९८॥ उक्तपरिमाणमात्राक्षरपिण्डः पादः । पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि[6] ईक्षा दर्शन तदर्थैर्धातुभिः सह (उपरितनैनच्चिह्नमारभ्यैतच्चिह्नपर्यन्तो ग्रन्थः—अमोघवृत्ति ताडपत्रपुस्तके च्युतः स च चिन्तामण्याख्यग्रन्थादुद्धृत्य सगृहीतस्तत्पादस्यादिभूतयोर्न भवति ।)

वीरो विश्वेश्वरो देवो युष्माकं कुलदेवता ।
स एव नाथो भगवानस्माकं पापनाशन. ॥

मनसीक्षार्थैः ॥ १।२।१९९ ॥ पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्न भवति । सा चेत्, ईक्षा मनसि मनोविषया भवति । जनो युष्मान् समीक्ष्यागतः[7] । जनोऽस्मान् समीक्ष्यागतः । जनस्त्वामुपेक्षते । जनो मामुपेक्षते । ज्ञानं तुभ्यं दीयमानमालोक्यागतः । ज्ञान मह्य दीयमानमालोक्यागतः । जनस्तव कार्यमालो-

---

१. मयैतत् स—क०, म० । २. मुनिपुङ्गवा इत्यत्र पादैकदेशस्यासद्भवे सम्पूर्णपादाभावात् क०, म० टि० । ३. —ति प्रतिषे क०, म० । ४. इदं वाक्यं क० म० इत्यत्र नास्ति । ५. —न्त्र्यपदे—क०, म० । ६. —हिता वां क०, म० । ७. —वस्नसादि तत्पादस्यादिभूतयोर्न भवति 'वीरो विश्वेश्वरो देवो युष्माकं कुलदेवता । स एव नाथो भगवान् अस्माकं पापनाशन. ॥' पादाद्योरिति द्विवचनं युष्मदस्मदभिसम्बन्धार्थम् । पादादाविति क्रियमाणे—आमन्त्र्यमेवाभिसम्बद्धयेत । मनसीक्षार्थैः । ईक्षा दर्शनं तदर्थैर्धातुभिः सह तद्भवद्वाक्यं तस्य पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्न भवति । सा चेदीक्षा । म० । ८. विचार्थ क०, म० टि० ।

चयति । जनो मम कार्यमालोचयति । मनसीति किम् ? जनो वः पश्यति । जनो नः पश्यति । चक्षुषेत्यर्थः । ईक्षार्थैरिति किम् ? जनो वो मन्यते । जनो नो मन्यते ।

च वाऽह हैव युक्ते ॥१।२।२००॥ च वा अह ह एव इत्येतैर्योगे सम्बन्धे पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्न भवति । जनो युष्मांश्च पश्यति । जनोऽस्मांश्च पश्यति । जनो युष्मान् वा पश्यति । जनोऽस्मान् वा पश्यति । जनो युष्मानह पश्यति । जनोऽस्मानह पश्यति । जनो युष्मान् ह पश्यति । जनोऽस्मान् ह पश्यति । जनो युष्मानेव पश्यति । जनोऽस्मानेव पश्यति । ज्ञानं युष्मभ्यं च दीयते । ज्ञानमस्मभ्यं च दीयते । शीलं युष्माकं च स्वम् । शीलमस्माक च स्वम् । जनो युवा च पश्यति । जन आवा च पश्यति । जनस्त्वा च पश्यति । जनो मा च पश्यति । योगग्रहणं किम् ? ज्ञानं च शीलं च वः स्वम् । ज्ञानं च शीलं च नः स्वम् ।

नित्यमन्वादेशे ॥१।२।२०१॥ कथितानुकथनमन्वादेशः । तेनान्येन वा शब्देन कस्यचित् किञ्चित् प्रतिपादयितुं कथितस्य प्रतिपाद्यान्तरप्रतिपादनाय तेन द्वितीयं कथन तस्मिन् विषये पदात्परयोर्युष्मदस्मदोर्यदुक्तं वस्नसादि तन्नित्यं भवति । यूयं विनीतास्तद्वो गुरवो मानयन्ति । वयं विनीतास्तन्नो गुरवो मानयन्ति । युवां शीलवन्तौ तद्वा गुरवो मानयन्ति । आवा शीलवन्तौ तन्नौ गुरवो मानयन्ति । अथो क्षमा श्रमणैस्ते ज्ञान दीयते । अथो क्षमा श्रमणैर्मे ज्ञानं दीयते । धनवास्त्वमथो[2] त्वा लोको मानयति । धनवानहमथो[3] मा लोको मानयति । अन्वादेशे नित्यवचनादन्यत्र विकल्प. । धर्मो वो रक्षतु । धर्मो युष्मान् रक्षतु । धर्मो नो रक्षतु । धर्मोऽस्मान्रक्षतु । धर्मो वा रक्षतु । धर्मो युवा रक्षतु । धर्मो नौ रक्षतु । धर्म आवा रक्षतु । धर्मस्ते स्वम् । धर्मस्तव स्वम् । धर्मो मे स्वम् । धर्मो मम स्वम् । धर्मस्त्वा रक्षतु । धर्मस्त्वा रक्षतु । धर्मो मा रक्षतु । धर्मो मा रक्षतु ।

पदात्प्रथमाया वा ॥१।२।२०२॥ पदात्परं यत्प्रथमान्तं पदं तस्मात्परयोर्युस्मदस्मदोरन्वादेशे यदुक्तं वस्नसादि तद्वा भवति । यूयं विनीतास्तद्गुरवो वो मानयन्ति । तद्गुरवो युष्मान् मानयन्ति । वयं विनीतास्तद्गुरवो नो मानयन्ति । तद्गुरवोऽस्मान् मानयन्ति । युवा सुशीलौ तद्गुरवो वा मानयन्ति । तद्गुरवो युवा मानयन्ति । आवा सुशीलौ तद्गुरवो नौ मानयन्ति । तद्गुरवो आवां मानयन्ति । अथो क्षमा श्रमणास्ते ज्ञानं प्रयच्छन्ति । अथो क्षमा श्रमणास्तुभ्यं ज्ञान प्रयच्छन्ति । अथो क्षमा श्रमणा मे ज्ञान प्रयच्छन्ति । अथो क्षमा श्रमणा मह्य ज्ञानं प्रयच्छन्ति । धनवांस्त्वं तल्लोकस्त्वा मानयति । तल्लोकस्त्वा मानयति । धनवानहं तल्लोको मा मानयति । तल्लोको मा मानयति । पूर्वेण नित्ये प्राप्तेऽयमारम्भ. ।

त्यदां द्वितीया टौस्येनदेतदः ॥ १।२।२०३ ॥ एतदित्येतस्य त्यदादीना सम्बन्धिनि द्वितीयायां टायामोसि च सुपि परे अन्वादेश एनदित्ययमादेशो भवति । अधीतमेतत्सूत्रम् । अथो एनद् व्याचड्ढ्वम् । एतकमवैश्यमध्यापय । अथो एनं यथाक्रमं सूत्रम् । सुशीलौ एतौ । अथो एनौ गुरवो मानयन्ति । सुस्थिताः सुपराक्रान्ता एते देवा अप्यथो एनान्नमस्कुर्वन्ति । एतेन रात्रिरधीता । अथो एनेन अहरप्यधीतम् । एतयोः शोभनं शीलमथो एनयोर्महती यशस्कीर्तिः । एनच्छितक इत्यत्र अर्थात्प्रकरणाद्वाऽपेक्ष्य विज्ञाने इदमुदाहरणम् । त्यदामिति किम् ? एतदस्य पात्रम् । अन्वादेश इति किम् ? देवदत्तमध्यापय एतं च गुरुदत्तम् । न पश्चात्कथनमात्रमन्वादेशः ।

---

१. –वयोगे क०, म० । २. –मतस्त्वा क०, म० । ३. –मतो मा क०, म० । ४. –कमावश्यकम्—क०, म० । ५. 'एतं पुरुषं तिङ्सर्वादिरक्ष्यन्तात् पूर्वोऽक्, इत्यक्प्रत्ययः, क०, म० टि० । ६. –वा अथो—अप्येनान्नमस्यन्ति क०, म० । ७. –किम् ? एतदं संगृहाण, अथो एतदमध्यापय । सञ्ज्ञा न त्यदादिः । सुब्विशेषणं किम् ? एतं संगृहाण । प्रियैतदमध्यापय । द्वितीयादौ सीति किम् ? एतस्मै सूत्रं देहि । अथो एतस्मै अनुयोगमपि देहि । एताभ्यां रात्रिरधीता, अथो एताभ्यामहरप्यधीतम् । अभ्युदयनिःश्रेयसप्रदैषा प्रज्ञापना । अथो एतस्यै नमो भगवत्यै । एते मेधाविनो विनीताः । अथो एते साक्षात्य पात्रम् । अन्वादेश इति किम् ? क०, म० ।

इदमः ॥१।२।२०४॥ इदम् इत्येतस्य त्यदादीनां सम्बन्धिनि द्वितीयाया टायामोसि च सुपि परे अन्वादेशे एनदित्ययमादेशो भवति। अधीतमिदं सूत्रम्। अथो एनद् नो व्याचक्ष्वम्। इममावश्यकमध्यापय अथो एनं यथाक्रमं सूत्रम्। सुशीलाविमौ। अथो एनौ गुरवो मानयन्ति। सुस्थिताः सुपराक्रान्ता इमे अथो देवा अप्येनान्नमस्यन्ति। अनेन रात्रिरधीता अथो एनेनाहरप्यधीतम्। अनयोः शोभनं शीलम्। अथो एनयोर्महती यशस्कीर्तिः। योगविभाग उत्तरार्थः।

स्येऽश् ॥१।२।२०५॥ इदमः सकार-भकार-यकारादिके त्यदादिसम्बन्धिनि सुपि परे अन्वादेशे अश्—इत्ययमादेशो भवति। शैशकोयकमध्येत अथोऽस्मै साधु दीयता सूत्रम्। शैशकाविमकावध्येतारौ अथो आभ्यां साधु दीयता सूत्रम्। बालिकेऽयकं याचते अथोऽस्यै दीयता मोदकः। स्म्य इति किम्? इमे इमके। सौ परत्वान्मत्वादि भवति अन्वादेशे विधिः सुपा प्रकृतिं विशेष्य विधीयत इति परमैतं परमैभं परमेमकस्मै इत्येनदादि न भवति। शकारः सर्वादेशार्थः। सककारार्थं वचनम्।

अकः ॥१।२।२०६॥ इदम. ककाररहितस्य सकार-मकार-यकारादिके त्यदादि सम्बन्धिनि सुपि परे अश् इत्ययमादेशो भवति। अस्मै। अस्मात्। अस्य। एषाम्। आसाम्। अस्मिन्। एषु। आसु। आभ्याम्। एभिः। आभिः। एभ्यः। आभ्यः। अस्यै। अस्याः। अस्याम्। अक इति किम्? इमकस्मै, इमकाभ्याम्[1]। इदमेव ज्ञापकं तन्मध्यपतितस्तद्ग्रहणेन गृह्यते इति तेन दो म इत्यादि साकोऽपि भवति। त्यदादिसम्बन्धिनि[2] विज्ञानादिह न भवति। प्रियेदंसुप्रियेदंभ्याम्। अतीदंसुअतीदंभ्याम्। इह तु भवति[3] परमास्मै। परमाभ्याम्। परमास्यै। ते[4]नेन्द्रेति प्रतिषेधो ज्ञापयति पूर्वोत्तरपदयोस्तावत्कार्यं भवति न साजादेश इति।

टौस्यनः ॥१।२।२०७॥ इदमः ककाररहितस्य त्यदादि सम्बन्धिनि टावचने ओसि च सुपि परे अन इत्ययमादेशो भवति। अनेन। अनया। अनयोः। परमानेन। परमानया। परमानयोः। त्यदादिसम्बन्धिविज्ञानादिह न भवति। प्रियेदमा। अतीदमा। अक इति किम्? इमकेन। इमकयोः।

दो मः ॥१।२।२०८॥ सुपीति वर्तते। इदमः त्यदादिसम्बन्धिनि सुपि परे दकारस्य मकारादेशो भवति। इमे। इमौ। इमम्। इमान्। इमकौ। परमेमौ। त्यदादिसम्बन्धिविज्ञानादिह न भवति। प्रियेदमौ। अतीदमौ।

सौ ॥१।२।२०९॥ इदमस्त्यदादिसम्बन्धिनि सौ प्रथमैकवचने परे मकारादेशो भवति। अत्वापवादः। अयम्। परमायम्। इयम्। परमेयम्। सावितिं किम्? इमौ। इमे।

पुंसीदोऽय् ॥१।२।२१०॥ पुंसि वर्तमानस्येदम त्यदादिसम्बन्धिनि सौ परे इद्रूपस्य अय् इत्ययमादेशो भवति। इयोऽपवादः। अयम्। परमायम्। देवदत्त। पुंसीति किम्? इय स्त्री। इद इति किम्? सर्वस्य स्यात्। सावितिं किम्? इमौ। इमे। त्यदादिसम्बन्धिविज्ञानादिह न भवति। प्रियेदम्—अतीदं देवदत्तः।

इद्यय् ॥१।२।२११॥ इदादिसम्बन्धिनि सौ परे इद्रूपस्य इय् इत्ययमादेशो भवति। इयम् परमेयं स्त्री। पारिशेष्यात् स्त्रियामयमादेशः। नपुंसके तु नित्यत्वात् प्रथममेव श्लुग्भवति। इदं कुण्डम्।

औस्सु लुक्चावसोऽनोः ॥१।२।२१२॥ अनुकारस्यादस सौ परे औकारादेशो भवति। अत्वापवादः। तस्य च सोर्लुग्भवति। असौ असकौ पुमान्। हे असौ असकौ विद्वन्। असौ असकौ स्त्री। हे असौ हे असकौ अन्ये[5]। अनोरिति किम्? असुकः। सावितिं किम्? अद। अमू। सोरनौ वचनम्। हल्ङ्याद्दीर्घाल्लुक्। ह्रस्वो नित्याट्। एदाङः। इच्चापुंसां नित्यार्ड्यसुपः, इत्येतत्कार्यनिवृत्त्यर्थम्। सौदोरौकारे हि एतानि कार्याणि स्युः।

---

१. –भ्याम्। इमकस्मै। इद—क०, म०। २. –न्धिविज्ञा—क०, म०। ३. भवतु क०, म०। ४. नेतेन्द्रेति (तेन्द्रेति) क०, म०। ५. अन्ये—आचार्याः हे असौ, हे असकौ—इत्यामन्त्रणमिच्छन्ति। अपरे नेच्छन्ति। तथा चोक्तं रूपसिद्धौ केचिदेवंप्रकाराणां सर्वनाम्नामामन्त्रणे (णं) नास्तीति मन्यन्ते। क०, म० टि०।

वाऽकोऽस्योः ॥१।२।२१३॥ अदसो योऽक् तस्याकारस्य सौ परे उकादेशो भवति वा। असुकः। असकौ। हे असुकः। हे असकौ।

दसः ॥१।२।२१४॥ अदसो दकारस्य सौ परे सकारादेशो भवति। असौ। असकौ। असुकः। अदस इति किम्? हे स से सा।

तोऽष्टानाम् ॥१।२।२१५॥ त्यदादीनामष्टाना तकारस्य त्यदादिसम्बन्धिनि सौ परे सकारादेशो भवति। स्यः। स्या। स्यकः। परमस्यः। स.[1]। सकः। परमसकः[2]। एष। एषा। एषकः। परमैषः। अष्टानामिति किम्? भवति। सावितिं किम्? त्यद्। तद्। त्यौ। तौ। त्यदादिसम्बन्धिविज्ञानादिह न भवति। प्रियैतद्—अत्येतद् देवदत्त।

ससौ चात् ॥१।२।२१६॥ प्तसु इति प्तस आरभ्य कथमित्थमु इत्युकारेण प्रत्याहारः। त्यदादीनामष्टाना तकारस्य[3] त्यदादिसम्बन्धिनि सुपि प्तसौ च परे अकारादेशो भवति। ततः। तत्र। तदा। यतः। यत्र। यदा। स्यः। त्यौ। त्ये। सः। तौ। ते। ये। इमे। अमी। एते। एकः। द्वौ। द्वे। त्यकौ। परमत्यौ। त्यदादिसम्बन्धिविज्ञानादिह न भवति—प्रियत्यदौ। अष्टानामिति किम्? भवान्।

किमः कः ॥१।२।२१७॥ किमित्येतस्य त्यदादिसम्बन्धिनि सुपि प्तसौ च परे क इत्ययमादेशो भवति। कदा। कः। कौ। के। कम्। कौ। कान्। साकोऽपि। कः। कौ। के। परमकौ। त्यदादिसम्बन्धिविज्ञानादिह न भवति—प्रियकिमौ। अतिकिमौ। प्तसौ चेति किम्? किम् ककिम्। अत्र नित्यत्वात् प्रथममेव श्लुक्, न च लक्षणान्तरबाधनेनानित्यत्वम्।

भेऽपोऽद् ॥१।२।२१८॥ अप् इत्येतस्य मकारादौ तत्सम्बन्धिनि अन्यसम्बन्धिनि (वा) सुपि परे अद् इत्ययमादेशो भवति। अद्भिः। अद्भ्यः। स्वद्भिः। अत्यद्भिः। भ इति किम्? आपस्तिष्ठन्ति। अपः पश्य। अपाम्। अप्सु। सुपीति किम्? अब्भक्षः। अब्भयम्।

वाऽष्ट्ण आः ॥१।२।२१९॥ अष्टन्नित्येतस्य तत्सम्बन्धिनि अन्यसम्बन्धिनि वा सुपि परे आकारादेशो वा भवति। अष्टाभि, अष्टभि। अष्टाभ्य', अष्टभ्य। अष्टासु, अष्टसु। प्रियाष्टा, प्रियाष्टा। प्रियाष्टौ, प्रियाष्टानौ। प्रियाष्टाभि', प्रियाष्टभि। लिल। वन्यनुनासिकस्या' इत्यनुनासिकोच्चारणात् भाव्येऽनुनासिकश्रुत्याश्रयणमित्याकारोऽनुनासिको न भवति। सुपीति किम्? अष्टसूत्री। अष्टभृति.।

रायः स्भि ॥१।२।२२०॥ रै इत्येतस्य तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सकारादौ भकारादौ च सुपि परे आकारादेशो भवति। रा। राभ्याम्। राभि.। राभ्य.। रासु। एकदेशविकृतस्यानन्यत्वात्—अतिराभ्या कुलाभ्याम्। अतिरासु कुलेषु। स्भीति किम्? रायौ। राय। सुपीति किम्? रै सूत्रम्। रै भार।

त्रिचतुरः स्त्रियां तिसृचतसृ ॥१।२।२२१॥ त्रि चतुर् इत्येतयो. स्त्रीलिङ्गेऽर्थे वर्तमानयोस्तत्सम्बन्धिन्यन्यसम्बन्धिनि वा सुपि परे यथासङ्ख्यं तिसृ चतसृ इत्येतावादेशौ भवतः। तिस्रस्तिष्ठन्ति। तिस्र. पश्यन्ति। चतस्रस्तिष्ठन्ति। चतस्रः पश्यन्ति। तिसृभिः। चतसृभि'। प्रियतिसा। प्रियचतसा देवदत्तः। असिद्धं बहिरङ्गमन्तरङ्गे इत्युल्लक्षणकज्ञ (?) भवति। प्रियतिसृणी, प्रियतिसॅणि इत्यादौ रोऽनपोऽच्युरित्यनचीति[4] प्रतिषेधाद्बलवतोऽपि नमः पूर्वं तिसृभावः। स्त्रियामिति किम्? त्रयः। चत्वार.। प्रियास्त्रयोऽस्या. प्रियत्रि., प्रियचत्वारीत्ययं स्त्रीत्यत्रापि त्रिचतुरी न स्त्रियामिति न भवति। सुपीति किम्? प्रियास्तिस्रो यस्य स प्रियतिसृक.[5]। प्रियचतुष्कः। इको लुगिति लुचि प्रियतिसृ कुलम्। श्लुचि तु—प्रियत्रि।

रोऽनयोऽच्युः ॥१।२।२२२॥ तिसृ चतसृ इत्येतयोर्ऋकारस्यानपुंसकस्य तत्सम्बन्धिन्यन्यसम्बन्धिनि वा अजादौ सुपि परे रेफादेशो भवति। तिस्रः तिष्ठन्ति। तिस्रः पश्यन्ति। चतस्रः तिष्ठन्ति। चतस्रः पश्यन्ति। प्रियतिस्र आगतम्। प्रियचतस्र आगतम्। प्रियतिस्रः स्वम्। प्रियचतस्र. स्वम्। अनय इति किम्? प्रियतिसृणी। प्रियचतसृणी। प्रियतिसृणि। प्रियचतसृणि। नमोबलीयस्त्वेऽप्यत एव वचनात् तिसृभावः। अचीति किम्?

---

१. सः, सा, सकः म०। २. परमसः क० म०। ३. –ष्टानां त्यदा—क०, म०। ४. –च्येऽनतु—म०। ५. –नचि प्र इति क०, म०। ६. प्रियत्रिकः—क०, म०।

तिसृभिः । चतसृभिः । उरिति किम् ? तिसृचतस्रोरपवादो मा भूत् । [1]शस्यगित्यादेरयमपवादो नामा तु बाध्यते नाम्यतिसृचतुष्[2] इति प्रतिषेधात् । तिसृणाम् । चतसृणाम् ।

ङ्यौटि नीचो वा ॥१।१।२२३॥ तिसृ चतसृ इत्येतयोरुपसर्जनयोः ऋकारस्य अनप्सम्बन्धिनि ङौ[3] औटि चादौ[4] सुपि परे रेफादेशो भवति वा । प्रियतिस्रि । प्रियचतस्रि । प्रियतिसरि । प्रियचतसरि । प्रियतिस्रौ । प्रियचतस्रौ । प्रियतिसरौ । प्रियचतसरौ । प्रियतिस्र । प्रियचतस्रः । प्रियतिसरः । प्रियचतसरः । प्रियतिस्रम् । प्रियचतस्रम् । प्रियतिसरम् । प्रियचतसरम् । ङ्यौटीति किम् ? प्रियतिस्रः स्वम् । प्रियचतस्रः स्वम् । नीच इति किम् ? तिस्रः । चतस्रः । परमतिस्र । परमचतस्रः । चतसर्यादुदात्तनिपातनमिति त्रिचतुरादेशे विधिनातिद्रूपानुकरणे । अनप इति किम् ? प्रियतिसृणी । प्रियचतसृणी । प्रियतिसृणि । प्रियचतसृणि । अचीति किम् ? प्रियतिसृ[5] कुलं पश्य ।[6]

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने अमोघवृत्तौ प्रथमाध्यायस्य[7] द्वितीयः पादः समाप्तः ।

[तृतीयः पादः]

क्रोष्टुर् ॥१।३।१॥ स्त्रियामिति[8] वर्तते । क्रोष्टुशब्दस्य स्त्रिया वर्तमानस्य ऋकारादेशो[10] भवति । क्रोष्ट्री[11] । क्रोष्ट्र्या[12] । क्रोष्ट्रीभ्याम् । क्रोष्ट्रीभि । क्रोष्ट्रीभ्यः । पञ्चभि. क्रोष्ट्रीभि क्रीतै पञ्चक्रोष्ट्रीभी रथै । पञ्चक्रोष्टुषु[13] क्रोष्ट्रो क्रोष्ट्रभ्या[14] चेत्युक्तौ ट्रुभावे पञ्चक्रोष्ट्रभी रथैरिति क्रोष्टृश्रुतिर्नेतीह क्रोष्ट्रोर् इत्युच्यते इत्यत्र पिति[15] तद्धित इति पुम्भावो न भवति । पञ्चक्रोष्टारौ रथौ, पञ्चक्रोष्टार रथा इत्यत्रैकदेशस्य[16] विकृतस्यानन्यत्वात् क्रोष्टृभाव ।

गुरूपोत्तमस्यानार्षेऽपत्येऽणिञः ष्यङ् ॥१।३।२॥ अनार्षेऽपत्ये स्त्रिया यौ विहितावणिञौ प्रत्ययौ तदन्तशब्दरूपस्य[17] गुरूपोत्तमस्य ष्यङादेशो भवति । उत्तमशब्दो ष्युत्पन्नस्त्रिप्रभृतीनामन्त्यमाह तस्य समीपमुपोत्तमम् । गुरु उपोत्तमं यस्य तत्(द्)गुरूपोत्तमम् । अणिञन्तं[18] करोषगन्धेरपत्यं स्त्री कारीषगन्ध्या । कौमुदगन्ध्या । दैवदत्या । जैनदत्या । वाराह्या । बालक्या[19] । औदमेध्या । औडुलोम्या । शातलोम्या[20] । इत्वादणिञोरेवादेशो गुरुग्रहणात्—गुरोरुपोत्तमात्[21]—अनेकहल्व्यवधानेऽपि ष्यङ् । अन्यथा येन नाव्यवधानं तेन व्यवहितेऽपीत्येकहल्व्यवधान एव स्यात् । दीर्घग्रहणमेव क्रियेत । गुरूपोत्तमस्येति किम् ? औपगवी । कापटवी । दाक्षी । प्लाक्षी । अनार्ष इति किम् ? वासिष्ठी[22] । वैश्वामित्री । अपत्य इति किम् ? अहिच्छत्रे जाता अहिच्छत्री काम्यकुब्जी । अणिञ इति किम् ? आर्ता भागो विदाद्यञ् । स्त्रियामिति किम् ?

---

१. ङ्यौद्यृतोपदस्थार् म० टि० । –पवस्थात् क० टि० । २. चतुष्ट क०, म० । ३. ङ्यौ क०, म० । ४. चाजादौ म० । ५. चतसर्ग्यधु—क०, म० । ६. अत्र अचीत्यवर्तमाने लुग्वद्भावपक्षे स्थानिवद्भावेन रेफः स्यात् , क०, म० टि० । ७. पश्य । सू० ४०३ क०, म० । ८. –थमस्याध्या—क०, म० । ९. इयमयमित्रमिति येषु प्रसिद्धिरर्थेषु भवति लोकस्य स्त्रीपुंनपुंसकानि प्रोच्यन्ते तानि लोकेन ॥ न पुनः—स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः । उभयोरन्तरं यच्च तदभावे नपुंसकमित्यस्य प्रायिकत्वादिति महोपाध्यायवर्द्धमानः क०, म० टि० । १०. –कार आदेशो क०, म० । ११. क्रोष्ट्रिः क० । १२. –ट्र्या क्रोष्ट्र्यै क्रो—क०,म० । १३. –षु रथेषु क्रो—म० । १४. क्रोष्ट्र क्रभ्य च्य ष्युक्तौ क०,म० । १५.वाक्यादिति पित्त्वम् क०, म० टि० । १६. –देशविकृ—म० । १७. –न्तस्य श—म० । १८. वोपमानादिति—इत् करीषगन्धिः पश्चात् अट् क् सापत्ये अण अत इञिति इञ् वा तयोर्द्वयोरपि लादेशः उभयत्रापीदमेवोदाहरणम् क० । क० टि,—षडादेशः—उभयत्राप्येकमे (व वारणम्) वोदारणम् , म० टी० । १९. बालाक्या क०, म० । २०. गोत्रे बाह्वादिभ्यः—इति ञ् । सन्नञ्चारीति न लुक् । क० म० । २१. गुरोरुत्तमात् क० म० । २२. शिवाद्यन्धकवृष्णिकुरुभ्योऽपत्येऽण् , क०, म० टि० ।

कारोषगन्धो वाराहिः, पुमान्, बहुकारीषगन्धा। निर्वाहिः स्त्री इत्यत्र स्त्रियामित्यणिञोर्विशेषणान्न भवति। षकारोन्यक्षादिति विशेषणार्थः। ङकारः घिदडि दलिति पर्युदासार्थः। सौधर्मिः[1]। आयस्थूणी। भो लिङ्गी। आलम्बी। औदारमानीति गौरादिपाठाद् ङी।

गोत्रावयवे वृद्धे ॥१।२।३॥ गुरूपोत्तमस्येति नानुवर्तते। प्रकाशैकादिपुरुषाभिधानस्तदपत्यसन्तानो गोत्रम्। अप्रधानं गोत्रं [2]गोत्रावयवः। स्त्रियामनार्षे वृद्धसंज्ञके गोत्रावयवेऽपत्ये विहितयोरणिञोः ष्यङादेशो भवति। पुणिकस्यापत्यं वृद्धं स्त्री पौणिक्या। भौणिक्या। गौप्त्या। मौख्र्या। पुणिकादयः कुलाख्या अनृषिप्रभवा अपि लोके गोत्राणीत्युपचर्यन्ते। [3]तत्राप्राधान्यविवक्षायामयं ष्यङ्। वृद्ध इति किम्? अनन्तरे न भवति पौणिकी। भौणिकी। अनार्षे इति किम्? गौतमी। भौरिकी। भौरकी[4] गौरादिः। अगुरूपोत्तमार्थं वचनम्।

रूढादिभ्यः ॥१।२।४॥ रूढ इत्येवमादिभ्योऽपत्यमात्रे विहितस्य अण इञश्च स्त्रिया ष्यङादेशो भवति। रूढस्यापत्यं स्त्री इञ् रौढ्या। क्रौढ्या। आढ्या। व्याढ्या। आपिशल्या। चोपयतः अपत्यमण् चौपयत्या। चैटयत्या। शैकयत्या। रूढ, क्रोढ, आढ, व्यढ, अपिशल, अपक्षित, भूरोर्क, भूलीर्क, कपिष्ठल, शालास्थल, शालासुधात्री, चोपयत्, चेटयत्[5], शिकयत्, शीतयत्—इति रूढादयः। बहुवचनादाकृतिगणोऽयम्।

देवयज्ञ-शुचिवृक्ष-सत्यमुग्र-कण्ठेविद्धाद्वा ॥१।२।५॥ देवयज्ञ शुचिवृक्ष सत्यमुग्र कण्ठेविद्ध इत्येतेभ्य इञः स्त्रियामपत्ये ष्यङादेशो भवति वा। दैवयज्ञ्या। दैवयज्ञी। शौचिवृक्ष्या। शौचिवृक्षी। सात्यमुग्र्या। सात्यमुग्री। काण्ठे[6]विद्ध्या। काण्ठेविद्धी।

सूत्याभोज्ये युवति क्षत्रिये ॥१।२।६॥ सूत्याभोज्ये इति सूतभोजशब्दौ स्त्रियां ष्यङादेशान्तौ निपात्येते यथाक्रमं युवतिः क्षत्रिया च चेद्वाच्या भवति। सूत्या युवतिः प्राप्तयौवना मानुषीत्यर्थः[7]। अन्ये—सूतसम्बन्धिनी युवतिः सूत्या[8] न सा सर्वेत्याहुः। सूता अन्या। भोज्या भोजवंशजा क्षत्रियेत्यर्थः। भोजाऽन्या।

नृदुगिदञ्चोस्वस्रादेर्ङी ॥१।२।७॥ नकारान्तात् स्वस्रादिवर्जितात् ऋकारान्तादुगिदन्तादञ्चत्यन्ताच्च शब्दरूपात् स्त्रियां वर्तमानाद् ङीप्रत्ययो भवति। न—राज्ञी। तक्षणी। दण्डिनी। छत्रिणी[9]। ऋत्—कर्त्री। हर्त्री। प्रसवित्री। प्रलवित्री। तकारः किम्? प्रियःगृ। अतिगृः स्त्री। उगित्—भवती। महती। गोमती। यवमती। पचन्ती। पठन्ती। अतिभवती। अतिमहती। अतिपुसी। निर्गोमती। भवती महतीत्यव्युत्पन्नं प्रातिपदिकं व्यपदेशिवद्भावेनोगिदन्तम्। अञ्चः—प्राची। प्रतीची। अवाची। उदीची। उगित्वात् सिद्धेऽञ्चतिग्रहणं—उगिद्ग्रहणे धातोरुगितोऽग्रहणार्थम्। उखास्रत्। पर्णध्वत् कन्या। अस्वस्रादेरिति किम्। स्वसा। परमस्वसा। [10]अस्वसा। अतिस्वसा। दुहिता। ननान्दा। याता। माता। तिस्रः। चतस्रः। इति चतस्रो स्वस्रादिषु पाठः सन्निपातपरिभाषाया अनित्यत्वज्ञापनार्थः। तेन या सा अतिदध्न्या कन्या येत्यादि सिद्धं भवति। पञ्चकुमार्यः सप्तरौहिण्य इत्यत्र नान्तायाः सङ्ख्यायाः [11]युष्मदस्मदोरिवालिङ्क्त्वाभ्यां न भवति।

न हृषोऽनुर्वनः ॥१।२।८॥ हृषः परो यो वनुप्रत्ययः ततः स्त्रियां ङीप्रत्ययो न भवति। न चेत्, स हृष ऋवर्णादेशावयवः (स्यात्)। यज्वा[12]। राजयुद्ध्वा। अतियज्वा। सहयुद्ध्वा स्त्री। हृष इति किम्? [13]धीवरी। पीवरी। अपावरी। राजकृत्वरी। सहकृत्वरी। अनुरिति किम्? शर्वरी।

पादो वा ॥१।२।९॥ पाद(द्) इत्येतदन्ताच्छब्दरूपात् स्त्रिया वर्तमानाद् ङीप्रत्ययो भवति वा। [14]द्विपादी

---

१. सौधर्मी म०। २. प्रकाशोऽतिप्रसिद्धे स्यात् क०, म०, टि०। ३. गोत्रो क०, म०। ४. तत्राप्रधानवि—म०। ५. भौलिकी म०। भौविकी क०। ६.—यत् वेदवत् शि—क०, म०। ७. कण्ठेविद्ध्या, कण्ठेविद्धी क०, म०। ८. ब्राह्मजाया हि सूत्याचामयोग्यं कालयापनम् क०, म०, टि०। ९. ब्राह्मण्यां क्षत्रियात्सूतस्तस्य सम्बन्धिनी सूत्या क०, म०, टि०। १०. ङीप्रदिशोः क०, म०, टि०। ११.—सा सस्वसा क०, म०। १२. युष्मदस्मदौ अव्यक्तलिङ्गौ षट्सङ्ख्याकाखिषु समाः। 'युष्मदस्मत्तिङां व्ययम्' इत्यमरः क०, म०, टि०। १३. युवजाज्यानिपदुद्वदाद् वनिप् ईहस्यपविज्यावनो रः क०, म०, टि०। १४. श्रमनूवनिति वन्। अनेत्वद् ज्यां वनो रः क०, क०, टि०। १५. द्विपदी, द्विपाद्, त्रिपदी त्रि—क०, म०।

द्विपाद् । त्रिपादी, त्रिपाद् । पादिति कृत्समासान्तः[1] पादशब्दः मन्नन्बहुव्रीहेरिति योगं विभज्य पाद. स्त्रियां कार्यं बहुव्रीहेरिति वा विज्ञायते ।

कुम्भपद्यादौ ॥१।३।१०॥ कुम्भपदी-इत्येवमादौ पाच्छब्दान्ताच्छब्दरूपात् स्त्रियां नित्यं ङीप्रत्ययो भवति । कुम्भपदी । कलशपदी । द्रोणीपदी । सूचीपदी । जालपदी । एकपदी । अष्टापदी । शतपदी । शोतिपदी[2] । मुनिपदी । दासीपदी । गोधापदी । सूकरपदी । सुपदी । विपदी । निष्पदी । [3]अर्धपदी । कुणिपदी । कुण्णपदी । शकृत्पदी । [4]असुसंख्योपमानपूर्वस्यात एव बहुव्रीहौ पद्भावः । स[5] प्रत्यय पादा(द)न्तात् प्रत्ययमन्नियोग एव वेदितव्यः ।

ऋच्याड् ॥१।३।११॥ पाद् इत्येतदन्ताच्छब्दरूपादृचि स्त्रियामभिधेयायाम् आड्प्रत्ययो भवति । त्रिपदा ऋक्[6] । चतुष्पदा ऋक् । [7]परत्वादन्त्याजादलुचं बाधित्वा पद्भाव । ङकार उत्तरार्थः । ऋचीति किम् ? द्विपदी देवदत्ता ।

मन्नन्बहुव्रीहेर्न च ॥१।३।१२॥ मन्नन्ताच्छब्दरूपाद् अन्नन्ताच्च बहुव्रीहेः स्त्रिया वर्तमानाद् आड्प्रत्ययो भवति । यश्च प्रत्ययः प्राप्नोति स च न भवति । एवं[8] द्वैरूप्यं भवति । दामे । दामाः । दामानौ । दामानः । पामे । पामाः । पामानौ । पामानः । सोमे । सोमाः । सोमानौ । सोमानः । अतिमहिमे । अतिमहिमाः । अतिमहिमानौ । अतिमहिमानः । अनिनस्मं[9](न्म)न्ग्रहणेऽनर्थवताऽनर्थकेन च अन् बहुव्रीहे. । प्रियश्वे । प्रियश्वाः । प्रियश्वानौ । प्रियश्वानः । प्रिययुवे । प्रिययुवा । प्रिययुवानौ । प्रिययुवान. । प्रियमघवे । प्रियमघवा । प्रिय-मघवानौ । प्रियमघवान. । सुपर्वे । सुपर्वा । सुपर्वाणौ । सुपर्वाण । प्रियधर्मे । प्रियधर्मा. । प्रियधर्माणौ । प्रियधर्माणः । बहुराज्ञोति श्नवतो वेति भवति तेन मुक्ते बहुराजे । बहुराजा. । बहुराजानौ । बहुराजानः । अन्निति बहुव्रीहेर्विशेषणादिह न भवति । [10]सभर्त्री । सदण्डिनी । अन्निति पृथग्विज्ञाने मन्-ग्रहणमतिरिच्यते[11] । बहुव्रीहेरिति किम् ? अति पर्वणी यष्टिः । अतिप्रियश्वेति तदन्तविज्ञानान्नेति निषेधाच्चेत्याडर्थम् ।

अजाद्यतान् ॥१।३।१३॥ अज इत्येवमादीनामकारान्तानां शब्दानां वाच्यायां स्त्रियां द्योत्यायां तत आडित्ययं प्रत्ययो भवति । अजादीनां बाधकबाधनार्थमनकारान्तार्थं चोपादानम् । अजा । अश्वा । एलका । चटका । कोकिला । मूषिका । अत्र जातिलक्षणस्य ङयो[12] बाधः। बाला । होडा । पाका । वत्सा । मन्दा । विलाता कन्या । अत्र वयोलक्षणस्य पूर्वापहाणा[13] निपातनाण्णत्वम् । परप्रहाणा अत्र टिल्लक्षणस्य । [14]त्रिफला । अत्र द्विगुलक्षणस्य । क्रुञ्चा । उष्णिहा । देवविशा[15] । अत्र हलन्तत्वादत इत्यप्राप्तिः तथा पाठाच्चान्त्याजादि-लोपाभाव. । अत कारीषगन्ध्या । क्रोड्या । खट्वा । देवदत्ता । या । सा । खट्वादीनामकारान्तत्वम्—अतिखट्व. । प्रियखट्वः । पञ्चभिः खट्वाभिः क्रीतः पञ्चखट्व । दश खट्वप्रयोगादुपदेशाच्च निगृह्यते । तकार किम् ? कीलालपा कन्या हल् ङयाड् दीर्घाल्लुगिति सोर्लुग् न भवति । बहुवचनं षष्ठ्यभिव्यक्त्यर्थं तेन तत्सम्बन्धि-न्यामेव स्त्रिया भवति । इह न भवति पञ्चानामजाना समाहार. पञ्चाजी । दशाजी । इदमेव च ज्ञापकमिह तदन्तादपि भवतीति महाजा । नात्र अजशब्द. पृथगाडमुत्पादयति इति नादन्तस्य[16] वृत्ति. । तथा च व्याड्यादि-

---

१. सुसङ्ख्याज्ञाहस्त्यादेः पादस्य लुक् क०, म०, टि० । २.—शी, सूत्रपदी सूत्रशोतिपदी मु—क०, म० । ३. आर्द्रपदी क०, म० । ४. अंशस—क०, म० । ५. स सप्रत्योपादानात् प्र—क०, म० । ६. पादोऽपदस्येति परसूत्रत्वात् क०, म०, टि० । ७. सकृत्स्पर्द्धे यद्बाधितं तद्बाधितमेवेति पुनर्लुग्न भवति क०, म०टि० । ८. अट्प्रत्ययः पश्चाद् ङीप्प्रतिषेधः । तत्र ङीप्प्रत्ययात् प्रत्ययौ नस्तिरा क०, म०, टि० । ९. अनिन्मन्ग्रहणेन अर्थवता—अनर्थकेन च तदन्तविधिः क०, म०, टि० । १०.—ति सञ्ज्ञी सद्—क०, म० । ११. विभज्यते क०, म०, टि० । १२. बाधा म० । १३.—णा—अपरापहाणा निपा० क०, म० । १४. त्रिफला तु फलत्रिका, इत्यमरः क०, म०, टि० । १५. द्विगुसमा (क० द्विगुःसमा) द्विगुषमा काकरात्रिं यत्र शास्त्रदशामपि । चैत्यालोकाहते न स्यात् प्रायो देवविशा मतिः ॥ देवं परमात्मानं विज्ञातीत्यजन्यधारणीभूय संश्रयतीति शिवन्तादजाद्यतष्टाप् क०, म०, टि० । १६. नादन्तस्य वृत्तिः क० म० । महाजा नाम जातिरजैव क०, म०, टि० ।

सिद्धि. । महाजा चेति स्त्र्यजादेर्विज्ञायते । इतः परं तत्सम्बन्धिन्यामेव स्त्रियां प्रत्ययः ।

टिड्ढ्ढेऽणञ्ङीरादिभ्यः ॥१।३।१४॥ अत इति वर्तते तद्यथासम्भवं विशेषणं टितः ठण् ढ[1] इत्येताभ्यामिकारो य इञ् अण्योऽकारः—ततः–अश्च प्रत्ययाद् गौरादिभ्यश्च स्त्रिया वर्तमानेभ्यो ङीप्रत्ययो भवति । टित्—कुरुचरी । मद्रचरी । पचमाना[3] । पठिता[4] विद्येत्यत्रानेकानुबन्धत्वान्न भवति । सामगी । सुरापी । इत्यादौ टित्वमनवकाशमिति भवति । ठण्—लाक्षिकी । शालाकिकी । प्रास्थिकी । कौडुविकी । णकार. किम् ? धनिका । प्रावृषिका । ढ—सौपर्णेयी । वैनतेयी । निरनुबन्धको ढ स्त्रिया नास्तीति सानुबन्धको गृह्यते । इञ्—सौतङ्गमी । मौनिवती[5] नगरी । इकारप्रश्लेषः किम् ? वाराह्या । बालाक्या । अण्—औपगवी । कापटवी । कुम्भकारी । नगरकारी । कारीषगन्ध्या । कौमुदगन्ध्या । गौतमस्याप्येत्री गौतमा कन्येत्यत्राणोऽकारस्य ग्रहणान्न भवति । प्रो[6]क्तेऽण् न स्त्रियाम् । गौतम्यानी ते रथ्येत्री गौतमेत्यत्र प्रोक्तेऽणो ङी लुग्विषये न जायते । अञ् औत्सी । औदपानी । गौरादिभ्य. गौरी । मत्सी । मनुषी । गौर, मत्स्य, मनुष्य, ऋश्य, हय, [8]गवय, मुकय, शिङ्ग, शृङ्ग, घट, पट, द्रुण, द्रोण, हरीव[9], कण, पटर[10], उकण, आमलक, कुवल, बदर, बिम्ब, तर्कार[11], शर्कर, हरिण, सालद[12], शष्कुण्ड, गडुज, सुशव, पाण्डश, आनन्द, आढक, सूपाट, शष्कुल, [13]सूर्यसूच, सूष, यूष, मूष, वतालक[14], सल्लक, मालत, घातक, वेतस, वृस, अतस, उमा, भङ्ग, मह, [15]मठ, देह, लवण, मेद, सौधर्म, अयस्थूण, भौलिङ्गि, आलम्बि, आलर्क, [16]औदाहमनि, भौरिकि, भौलिकि, आरट, कटेट, नाट, मूलाट, अधिकार, सुन्दर, मन्दर, मण्डल, पट, पिण्ड, नूर्द, सूर्द, गूर्द, पाण्ड, लोहाण्ड, कदर, कदल, तरुण, तलुन,अनडुही, अनड्वाही, आग्रहायणी, पृथिवि, [17]विकल, विष्कल, आश्मरथ्य, काव्य, वैश्य,[18] एहि, पर्येहि, अराल, उदपिद, चण्ड, नद, भष, प्लव, चर, गर, तर, चोर, गहा, सूद, देव, पिप्पल, [19]कोशातक, शमहरीतक, करीर इति गौरादिराकृतिगण. । सप्रत्ययपाठ. पुम्भावनिवृत्त्यर्थ. । अनडुहीभार्या । अनड्वाहीभार्या । [20]ऽलुगभूषार्थ इत्येके । पञ्चानडुहि । [21]दशानडुहि । पाठादेव चानडुहः स्त्रियामुकारस्य पक्षे वा शब्दादेश. सौ नमभावश्च ।

यञोऽषावटात् ॥१।३।१५॥ यञ्प्रत्ययान्तात् स्त्रियां वर्तमानाद् ङीप्रत्ययो भवति न चेत् स यञ् प-शब्दादवटशब्दाच्च परो भवति । [22]गार्गी । वात्सी । अषावटादिति किम् ? गौ कक्ष्या । शार्कराक्ष्या । पौतिमाष्या । आवट्या । इहाषावटादिति प्रतिषेध आडर्थ । यद्येतत् प्रतिषेधेनोत्तर एव विधि स्यादुत्तरत्रैव षावटग्रहणं क्रियेत लोहितादिवत् ।

यञ्यञलोहितादिशकलान्तकौरव्यासुरिमाण्डूकाड्ढ्फड् ॥१।३।१६॥ यञो यञन्तेभ्यो लोहितादिभ्यः शकलपर्यन्तेभ्यः कौरव्य आसुरी माण्डूक इत्येतेभ्यश्च स्त्रिया वर्तमानेभ्यो ढ्फड् इत्ययं प्रत्ययो भवति । यञ्—गार्ग्यायणी । वात्स्यायनी । गौकक्ष्यायणी । शार्कराक्ष्यायणी । पौतिमाष्यायणी । आवप्लायनी । आश्मरथ्यस्य गौरादिपाठाद् ङी तेनाश्मरथीत्येव भवति । यञ् लोहितादि शकलान्त (?) लौहित्यायनी ।

---

१. यत्र सम्भवव्यभिचारौ स्तः विशेषणत्वेऽपि न दोषः, तत्रेह प्रकरणे विशेषणम् । यत्र तु विशेषणत्वे दोषः–तत्र विशेष्यमेव विज्ञायते क०,म०,टि० । २. ठण् ढ इत्यत्र णकारः–ठकारढकाराभ्यां सह युज्यते कथं दण्डापूपन्यायेन क०, म०, टि० । ३. अत्र स्थानिवद्भावाट्टित्वम् क०, म०, टि० । ४. पतिता क०, म० । ल्टि अ । साहचर्यादागमस्य इट् क०, म०, टि० । ५.–न्धकत्वा–क०, म० । ६. मौनिविती क०, म० । ७. ढः प्रोक्ते क. अ. । ८.–गवयो रामः, मुमदो जाहकलम्बाक । मुकय गन्धर्वाः । मतान्तरबोधनार्थं पृथक्पाठः क०, म०, टि० । ९. हरीकण, हरकण, क०, म० । १०. घटर क०, म० । ११. बर्कर क०, म० । १२. –र्कर सालन्द क०,म० । १३. सूर्म क०, म० । १४. यातालक क०,म० । १५. मर क०, म० । १६. आलम्बि, आलम्बिच, कालम्बि, औदा–क०, म० । १७. विकली, विष्कली क० म० । १८. शैव्य क०, म०, टि० । १९. कोशाभक क०, म० । २०. 'लुगभावार्थं क०, म० । २१. दशानड्वाहिः, क०, म० । २२. गर्गादेर्यरक्ना क०, म०, टि० ।

सांशीत्यायनी । वाभ्रव्यायनी । शाकल्यायनी । कौरव्य–कौरव्यायणी[1] । आसुरी–आसुरायणी[2] । मण्डूक—माण्डूकायनी[3] । यत्रः पूर्वोऽयञ्च विधिरिति द्वैरूप्यम् । लोहितादेरयमेव यथा स्यादित्युपादानम् । तस्य यञिति विशेषणं किम् ? लोहिता शकली । यवाद्योगादिति ङी लोहितादिशकलान्तेत्याद्यन्तग्रहण पूर्वोत्तरव्युदासार्थं तत्रोभय भवति–[4]जारमाणी, जारमाण्यायनी । कण्ठी, कण्ठ्यायनी । इफडिति इकार आसुरेरिकारस्य लुगर्थः । एरिति लुक्तद्धिते टकारो ङ्यर्थ. । पदान्तरेण[5] तेनान्यानन्यापेक्षेण विक्रिया सान्तरेतरनानैकप्रत्ययैर्लिङ्गदर्शनम् ।

वयस्यनन्त्ये[6] ॥१।३।१७॥ प्राणिना कालकृतावस्था बाल्यादिर्वयस्तस्मिन्नन्त्येऽवरमे वर्तमानादकारान्ताच्छब्दरूपात् स्त्रिया ङीप्रत्ययो भवति । कुमारी । किशो[7]री । बधूटी । चिरण्टी[8] । अभिप्रेतस्त्रीका पुरुषेणासम्प्रयुक्ता कुमारी । वृद्धकुमारीत्युपमानात् । अनन्त्य इति किम् ? वृद्धा । स्थविरा । अत इति किम् ? शिशुः । उत्तानशया । लोहितपादिका[9] । द्विवर्षा । त्रिवर्षा । मध्येति नैता वयःश्रुतयः । बहिरङ्गात्र वय.प्रतीतिः । बाला,[10] वत्सेत्यादिरजादि. ।

बहुव्रीहेः सङ्ख्यादेर्हायनात् ॥१।३।१८॥ सङ्ख्यादेर्हायनशब्दान्ताद् बहुव्रीहेः स्त्रिया वर्तमानाद् वयसि गम्यमाने ङीप्रत्ययो भवति । द्विहायनी । त्रिहायणी । चतुर्हायणी । शतहायनी । वडवा ।[11] वयसि चतुस्त्रेर्हायण इति णत्वम् । बहुव्रीहेरिति किम् ? शते हायनेषु सम्भूता जाता भवा वा शतहायना । सङ्ख्यादेरिति किम् ? गतहायना । हायनादिति किम् ? द्विवर्षा । त्रिवर्षा । वयसीति किम् ? त्रिहायना । चतुर्हायना शाला ।

दाम्नः ॥१।३।१९॥ दामन्नित्येतदन्तात् संख्यादेर्बहुव्रीहे. स्त्रिया ङीप्रत्ययो भवति । इनवतो वेति विकल्पस्यापवाद' । द्विदाम्नी । त्रिदाम्नी। दाम्न इति किम् ? द्विगुणा रज्जु. । सङ्ख्यादेरिति किम् ?[12] उद्दामाम् । उद्दामानम् । उद्दाम्नी वाऽनडुही पश्य ।

ऊध्नः ॥१।३।२०॥ ऊधन्नित्येवमन्ताद् बहुव्रीहे' स्त्रिया ङीप्रत्ययो भवति । कुण्डोध्नी । घटोध्नी । महोध्नी । पीवरोध्नी । इनवतो वेति विकल्पे वचनम् । स्त्रियामूध्न्यघस इति समासान्ते । पञ्चभि कुण्डोध्नीभिः क्रीत. पञ्चकुण्डीधेति[13] न स्यात् ।

अशिशोः ॥१।३।२१॥ अशिशुरित्येतस्माद्बहुव्रीहेः स्त्रिया ङीप्रत्ययो भवति । न विद्यते शिशुर्यस्या. सा अशिश्वी । बहुव्रीहेरिति किम् ? न शिशुः—अशिशुः ।

इनवतो वा ॥१।३।२२॥ इनवत. यस्य क्वचित् इनादेशो भवति तस्मादन्ताद्बहुव्रीहे स्त्रियां ङीप्रत्ययो भवति वा । तेन मुक्ते[14] निषेधाङ्प्रत्ययो भवत. । बहुराज्ञी । बहुराज्ञ्यौ । बहुराज्ञ्य. । बहुराजानौ । बहुराजान' । बहुराजे । बहुराजा । बहुधीवरी । बहुधीवर्यौ । बहुधीवर्य. । बहुधीवानौ । बहुधीवान' । बहुधीवे । बहुधीवा. । बहुव्रीहेरिति किम् ? अतितक्षणी । निस्तक्षणी । इनवत इति किम् ? प्रियश्वानौ । प्रियश्वान. । प्रियश्वे, प्रियश्वा' । सुपर्वाणौ । सुपर्वाणः । सुपर्वे, सुपर्वाः । अत्र द्वैरूप्यमेव ।

नाम्नि ॥१।३।२३॥ नाम्नि संज्ञाया विषये इनवतो बहुव्रीहेः स्त्रिया नित्यं ङीप्रत्ययो भवति । अधिराज्ञी, सुराज्ञी नाम ग्राम. ।[15] आङ्प्रतिषेधनिवृत्त्यर्थं वचनम् ।

---

१. कुर्वादेर्ण्यः क०, म०, टि० । २. अत इञ् क०, म०, टि० । ३. पलाशमण्डूकाद्वा इत्यण् क०, म०, टि० । ४. काण्ठी क०, म० । ५. सान्तरप्रत्ययस्योदाहरणं गार्गीति । यजुषो वदौत्–इति ङी । निरन्तरनानाप्रत्ययस्योदाहरणमिदम्–गार्ग्यायणीति । यञ्यञिति गृफड पक्षात् कठणि तिकि, एकप्रत्ययस्योदाहरणमिदम्, राज्ञीति ञुट्नुगिति ङी क०, म०, टि० । ६. अनन्त्य इति–अन्त्यवयसो निषेधाद्मध्यवयसोर्ग्रहणम् । अतएव नञोऽत्र पर्युदासोऽर्थः क०, म०, टी० । ७. कुमारी, किशोरी, वर्करी, करभी, कलभीत्यादयः क०, म०, टि० । ८. चिरिण्टी क०, म० । ९. अर्थादत्र वयो गम्यते न शब्दात् क०, म०, टि० । १०. बाला क०, म० । ११. वयसि चतस्रे र्हायण इति णत्वम् । १२. मन्त्यपत्रिके क०, म०, टि० । १३. कुण्डो वेति क०, म० । १४. मन्त्यबहुव्रीहेश्च क०, म०, टि० । १५. आङ्प्रतिषेधयोः क०, म०, टि० ।

अनाच्छादनाऽऽतेः पूर्वपदात् क्ताद्यजातकृतमितप्रतिपन्नात् ॥१।३।२४॥ अनाच्छादनं या जातिस्तद्वाचिनः पूर्वपदात् परो यः क्तान्तो जातकृतमितप्रतिपन्नशब्दवर्जितस्तदन्ताद्बहुव्रीहे स्त्रियां वर्तमानात् (ङ्) ङीप्रत्ययो भवति । शङ्खभिन्नी । ऊरुच्छिन्नी । गलकोत्कृत्ती । केशलूनी । अनाच्छादनादिति किम् ? वस्त्रच्छन्ना । वसनच्छन्ना । जातेरिति किम् ? मासयाता । संवत्सरयाता । पूर्वपदादिति किम् ? प्रियशङ्खभिन्ना । प्रियगोरक्षिता । क्तादिति किम् ? दन्तप्रिया । जातादिप्रतिषेधः किम् ? दन्तजाता । स्तनजाता । दन्तकृता । दन्तमिता । दन्तप्रतिपन्ना । बहुव्रीहेरिति किम् ? पादपतिता । सभ्यजानुप्रतिष्ठिता ।

पाणिगृहीतीति पत्नी ॥१।३।२५॥ पाणिगृहीतीत्येवं प्रकारो ङघन्तो बहुव्रीहि साधुर्भवति । पत्नी भार्या चेद्वाच्या भवति । पाणिगृहीती पत्नी । करगृहीती । पाण्यत्ती । करात्ती । पत्नीति किम् ? पाणिगृहीताऽन्या ।[3] पूर्वेण सिद्धे नियमार्थं वचनम् । पत्नीत्येतस्मादेव निपातनात् [4]पतिशब्दस्य भार्याया नकारादेशः ।

वाऽस्वाङ्गात् ॥ १।३।२६ ॥ अनाच्छादनमस्वाङ्गं या जातिस्तद्वाचिन पूर्वपदात् परो यः क्तान्तः जातकृतमितप्रतिपन्नवर्जितस्तदन्ताद्बहुव्रीहेः स्त्रियां ङीप्रत्ययो भवति वा । [5]शारङ्गजग्धी । शारङ्गजग्धा । पलाण्डुभक्षिती । पलाण्डुभक्षिता । सुरापीती । सुरापीता । अस्वाङ्गादिति किम् ? शङ्ख[6]भिन्नी । [7]ऊरुच्छिन्नी । पूर्वेण नित्यं भवति । अनाच्छादनादिति किम् ? वस्त्रच्छन्ना । वसनच्छन्ना । जातेरिति किम् ? मासयाता । संवत्सरयाता । पूर्वपदादिति किम् ? प्रियशारङ्गजग्धा । प्रियपलाण्डुभक्षिता । क्तादिति किम् ? शारङ्गप्रिया । अजातकृतमितप्रतिपन्नादिति किम् ? कुण्डजाता । कुण्डकृता । कुण्डमिता । कुण्डप्रतिपन्ना । बहुव्रीहेरिति किम् ? सुरामत्ता ।

असहनञ्विद्यमानाभास्किोदरोष्ठजङ्घादन्तकर्णशृङ्गाङ्गाग्रकण्ठाबहुच्संयोगोपान्त्यात् स्वाङ्गात् समासात् ॥१।३।२७॥ सह नञ् विद्यमान इत्येतद्वर्जितादस्वाङ्गवाचिनः पूर्वपदात्पर

---

१. कालाकृतिसुखादिभ्यो वा–इति पूर्वनिपातः स्त्रियाम् । यदित ऊर्ध्वमनुक्रंस्यते तत्स्त्रियां वर्तमानात्(ङ्) मृदः स्वार्थे भवतीत्येषोऽधिकारो ज्ञातव्यः । वक्ष्यति अजाद्यतास्, पाङ् (टाप् म०) अजा, देवदत्ता, स्त्रियामित्येव अजो देवदत्तः । यदि स्त्रियामभिधेयायामिति स्यादेकत्वात् स्त्रीत्वस्य द्विबहू न स्याताम् । अनेकत्वोत्पत्तिश्च गौर्यौ गौर्यः गौरितरा स्त्रियामित्यस्य भावप्रधानत्वात् सामानाधिकरण्यञ्च गौरी देवदत्तेति । स्त्रियामेकाश्रया मृदः–इत्यभ्युपगमे च भूतमियं नारी कारणमियं कन्येति भूवादेः स्त्रीत्यः प्रसज्येत । ततः स्त्रियामिति विषयनिर्देशः प्रकृतिविशेषणम् । स्त्रीत्वमिह प्रत्ययधर्मो व्यापकत्वादभिप्रेत्य न वस्तुधर्मः । शब्दो हि कर्णशष्कुलीकुहरमनुसरन्तमात्मान्वयिनं लिङ्गसङ्ख्याधर्मं प्रत्ययमादधाति । स चान्तरङ्गोऽभिधेयः खट्वादिषु रूपादिष्वभावादिषु च विद्यते तच्च स्त्रीत्वं क्वचित्पदान्तरेण व्यज्यते यथाकारणनियमावपनमियमुष्ट्रिकेति । क्वचित्तेनैवान्यापेक्षेण यदर्थः स्त्रीत्वम्—यथा गौरियं अशनिरियम् अन्यानपेक्षेण च यथा स्वसा, दुहिता । क्वचिद्विकारेण त्यसहितेन पीवरी, कोट्री, यथा त्यरहितेन च तित्त्वः, चतस्रः । तदुभयमपि सामान्येन विक्रियैव यथा पञ्चभिः क्रोष्ट्रीभिः क्रीतास्ती. पञ्चक्रोष्टृभिः रथैरिति । क्वचित्सान्तरेणानेकत्वेन यथा कारितरा, हरिणितरा । निरन्तरेण गार्ग्यायणी तदुभयेनानेकेन वात्सायनितरा । क्वचिदेकेन खर्वा (खप्पा, खर्पा) राजिः । तदुक्तं पदान्तरेण तेनान्यानन्यापेक्षेण विक्रिया । सान्तरेतरनानैकप्रत्ययैर्लिङ्गदर्शनम्—इति जैनेन्द्रचिन्तामणौ क०, म०, टि० । २. पाणिर्गृहीतोऽस्याः इति क०, म०, टि० । ३. यस्याः यथाकथञ्चित्पाणिर्गृहीतः सा पाणिगृहीता क०, म०, टि० । ४. पुंयोगे नकार. पत्युर्भार्या पत्नी चित्तवित्तस्वामिनीत्यर्थः । पुंयोगादन्यत्र पतिरियमस्य ग्रामस्य क०, म०, टि० । ५. साङ्गरजग्धी, साङ्गरजग्धा क०, म०, । साङ्गरं जग्धमनया (सा) साङ्गरजग्धी कालाकृतिसुखादिभ्यो वा, इति पूर्वनिपातः क०, म०, टि० । ६. शङ्खभिन्नायास्याः (इति) क०, म०, टि० । ७. उरुच्छिन्नी क०, म० ।

यन्नासिकादि यच्च बह्वृचः संयोगोपान्त्यात्[1] स्वाङ्गवाचिशब्दरूपं तदन्तादकारान्तात् समासात् स्त्रियां वर्तमानाद्वा ङीप्रत्ययो भवति। दीर्घनासिकी, दीर्घनासिका। तलोदरी, तलोदरा। बिम्बोष्ठी। बिम्बोष्ठा। समजङ्घी, समजङ्घा। चारुदन्ती, चारुदन्ता। लम्बकर्णी, लम्बकर्णा। तीक्ष्णशृङ्गी, तीक्ष्णशृङ्गा। मृदङ्गी, मृदङ्गा। [2]तनुगात्री, तनुगात्रा। कलकण्ठी, कलकण्ठा स्त्री। अबह्वृच्संयोगोपान्त्यात्—[3]स्वडी, स्वडा। वृश्चिकी, वृश्चिका। स्निग्धकेशी, स्निग्धकेशा कन्या। पृथुस्तनी, पृथुस्तना रामा। बहुकेशी, बहुकेशा रथ्या। दीर्घमुखी, दीर्घमुखा प्रतिमा। असहनद्विद्यमानादिति किम्? सहनासिका। अनासिका। विद्यमाननासिका। सहकेशा। अकेशा। विद्यमानकेशा। नासिकेत्यादि किम्? पृथुजघना। महाललाटा। पुष्टगुल्फा[4]। चारुगुल्फा। चारुपार्श्वा। चारुप्रकोष्ठा। नासिकादिग्रहणं बह्वृचसंयोगोपान्त्यार्थम्। स्वाङ्गादिति किम्? शुकनासिका शाला। [5]बहुशोफा। बहुकफा। बहुज्ञाना कन्या। दीर्घमुखा शाला। समासादिति समासमात्रार्थं [6]निरोष्ठी। निरोष्ठा। अतिकेशी। अतिकेशा माला। निष्केशी, निष्केशा यूका। प्राप्तकेशी, प्राप्तकेशा लिक्षा। अलङ्केशी, अलङ्केशा स्त्री। अन्यथा बहुव्रीहेरेव स्यात्। द्विगोः परत्वान्नित्यमेव—द्विपादी। त्रिपादी। अस्वाङ्गादिति किम्? मुखनासिका। पाणिपादा। कल्याणीपाणिपादेत्यत्र स्वाङ्गसमुदायो न स्वाङ्गम्। बह्वृचेति न भवति। पूर्वपदादिति किम्? तुङ्गदीर्घनासिका। स्निग्धप्रियकेशा। अत इति किम्? कल्याणपाणिः। परमशिखा। स्त्रियामिति किम्? दीर्घनासिकः। दीर्घमुख।

[8]अविकारोऽङ्गवं मूर्तं प्राणिस्थं स्वाङ्गमुच्यते।
[9]च्युतं च प्राणिनस्तत्सदृशं च प्रतिमादिषु॥

दीर्घजिह्वाद्वा[10] ॥१।३।२८॥ दीर्घजिह्व इत्येतस्मात् स्वाङ्गान्तात् समासात् स्त्रिया वर्तमानाद्वा ङीप्रत्ययो भवति। दीर्घजिह्वी, दीर्घजिह्वा कन्या। योगविभागो दीर्घजिह्वान्तात् समासादिति नीचोपमा विज्ञायते।

पुच्छात् ॥१।३।२९॥ असहनद्विद्यमानादस्वाङ्गवाचिनः पूर्वपदात् परं यत् स्वाङ्गवाचि पुच्छ इति तदन्तात् समासात् स्त्रिया वा ङीप्रत्ययो भवति। कल्याणपुच्छी, कल्याणपुच्छा। निष्पुच्छी, निष्पुच्छा। असहनद्विद्यमानादिति किम्? सहपुच्छा। अपुच्छा। विद्यमानपुच्छा। योगविभाग उत्तरार्थः।

कबरमणिविषशरात् ॥१।३।३०॥ कबर मणि विष शर इत्येतेभ्यः पूर्वपदेभ्यः परं यत्स्वाङ्गवाचि पुच्छेति तदन्तात् समासात् स्त्रिया ङीप्रत्ययो नित्यं भवति। [11]कबरपुच्छी। मणिपुच्छी। विषपुच्छी। नित्यार्थं वचनम्।

पक्षाच्चोपमानात् ॥१।३।३१॥ उपमीयते येन तदुपमानं तद्वाचिनः पूर्वपदात् परं यत्पक्ष पुच्छ इति तदन्तात् समासाद् ङीप्रत्ययो भवति। उलूकपक्षी शाला। उलूकपुच्छी सेना।

न नखमुखात्संज्ञायाम् ॥१।३।३२॥ नखमुखान्तात् समासात्संज्ञाया विषये ङीप्रत्ययो न भवति। शूर्पणखा। चन्द्रनखा। गोरमुखा। कालमुखा। संज्ञायामिति किम्? [12]सूर्यनखी राक्षसी। चन्द्रमुखी कन्या।

---

१. सूत्रात् क०, म०, टि०। २. आकर्णयिष्यति तवालसगात्रवाणीम् इत्युदाहृते क०, म०, टि०। ३. बह्वृचत्वात् ङी भवति क०, म०, टि०। ४. सुगुल्फा क०, म०। संयोगोपान्त्यः क०, म०, टि०। ५. शोफस्तु श्वयथुः शोथः इत्यमरः क०, म०, टि०। ६. तत्पुरुषसमासस्यापि स्यादित्यर्थः क०, म०, टि०। ७. गणादिषु प्रायः—इति समासः क०, म०, टि०। ८. अविकारादीनां बहुशोफादीनि क्रमेण प्रत्युदाहरणानि क०, म०, टि०। ९. च्युतनिभयोर्मूलोदाहरणं बहुकेशी रथ्यादि। क० म०, टि०, १०. दीर्घजिह्वात् क०, म०। ११. वर्णवाची कुत्सकवाची वा कबरशब्दः क०, म०, टि०। १२. णोऽसेरिति सूत्रस्य व्याख्याने समुदाये नाम्नीत्युक्तत्वात्। अत्र समुदायनामाभावान्ङीत्वं न सम्भवति क०, म०, टि०।

क्रोडादिभ्यः ॥१।३।३३॥ क्रोडाद्यन्तात् समासात् स्त्रिया ङीप्रत्ययो न भवति। कल्याणक्रोडा। कल्याणखुरा। क्रोड, खुर, [1]गोल, उख, पाल, शफ, गुद[2] इति क्रोडादिः। बहुवचनादाकृतिगणोऽयं तेन सुभगा। [3]सुकरा।

करणात् क्रीतात् ॥१।३।३४॥ करणवाचिन. पूर्वपदात् परं यत्क्रीतेति तदन्तात् समासात् स्त्रिया वर्तमानात् (द्) ङीप्रत्ययो भवति। वस्त्रक्रीती। वसनक्रीती। करणादिति किम्? सुक्रीता। दुष्क्रीता। क्रीतादिति किम्? वस्त्रकृता। वसनकृता। समासादिति किम्? वस्त्रेण कृता। वसनेन कृता। पूर्वपदादिति किम्? मनसा क्रीती। विभक्ति. सङ्ख्यामाहेति पक्षे न स्यात्।

क्तादल्पे ॥१।३।३५॥ करणपूर्वपदात् क्तप्रत्ययान्तात् समासात् स्त्रियां वर्तमानात् पूर्वपदार्थस्याल्पत्वे गम्यमाने ङीप्रत्ययो भवति। [4]अभ्रविलिप्ती द्यौः। सूपविलिप्ती पात्री। अल्पसूपेत्यर्थ.। अल्प इति किम्? चन्दनानुलिप्ता कन्या। अनल्पेनेत्यर्थ.।

द्विगोः ॥१।३।३६॥ अकारान्तात् (द्) द्विगोः स्त्रियां वर्तमानात् (द्) ङीप्रत्ययो भवति। [5]पञ्चमूली। दशमूली। पञ्चखट्वी। [6]दशखट्वी। पञ्चतक्षी। दशतक्षी। [7]द्विगोरङ्कोटीति—अट्समासान्तः।

परिमाणादेव लुचोऽविस्ताचितकम्बल्यात् ॥१।३।३७॥ परित आरोहतः [8]परिणाहतश्च मान परिमाणं प्रस्थादि विस्त आचित कम्बल्य इत्येतच्छब्दवर्जितं यत्परिमाणवाचि तदन्तादेव द्विगोरकारान्तादणादिप्रत्ययाना लुचि सत्या तदन्तात् स्त्रिया वर्तमानात् (द्) ङीप्रत्ययो भवति। द्वाभ्या कुडवाभ्या क्रीता द्विकुडवी। त्रिकुडवी। द्वाढकी। त्र्याढकी। परिमाणादिति किम्? पञ्चभिरश्वैः क्रीता पञ्चाश्वा। दशाश्वा। द्विशता। त्रिशता। एवकार इष्टनियमार्थः। द्वयोः कुडवयोः समाहारः—द्विकुडवी। त्रिकुडवी। लुच इति किम्? समाहारे नियमो मा भूत्। पञ्चानामश्वाना समाहारः पञ्चाश्वी। दशाश्वी। अविस्ताचितकम्बल्यादिति किम्। द्वाभ्या [10]विस्ताभ्यां क्रीता द्विविस्ता। त्रिविस्ता। द्व्याचिता[11]। त्र्याचिता। [12]द्विकम्बल्या। त्रिकम्बल्या। द्विपरमविस्तेत्यादौ अवयवावयवोऽपि समुदायावयवो[13] भवति। विस्तादिविशिष्टोत्तरपदान्तस्य वा प्रतिषेधः। केवलान्तस्य च व्यपदेशिवद्भावेनेति प्रतिषेधः।

[14]काण्डादक्षेत्रे ॥१।३।३८॥ काण्डान्तात् (द्) द्विगोर्लुचि सत्या तदन्तात् स्त्रिया वर्तमानादक्षेत्रे विषये ङीप्रत्ययो भवति। द्वे काण्डे [15]प्रमाणं यस्याः[16] द्वाभ्यां काण्डाभ्या क्रीता वा द्विकाण्डी। त्रिकाण्डी अक्षेत्र इति किम्? द्विकाण्डा। त्रिकाण्डा क्षेत्रभक्तिः। काण्डं परिमाणं नेति नियमेन प्रतिषेधे वचनम्।

पुरुषात् प्रमाणाद्वा ॥१।३।३९॥ आयामः प्रमाणं प्रमाणवाची यः [17]पुरुषशब्दः तदन्तात् (द्) द्विगोर्लुचि सत्या स्त्रिया वर्तमानात् (द्) ङीप्रत्ययो वा भवति। द्वौ पुरुषौ प्रमाणमस्या. द्विपुरुषी, द्विपुरुषा। त्रिपुरुषी, त्रिपुरुषा,परिखा। प्रमाणादिति किम्? द्वाभ्या पुरुषाभ्या क्रीता द्विपुरुषा। त्रिपुरुषा वडवा। प्रमाणस्यापरिमाणत्वान्नियमेन प्रतिषेधे वचनम्। समाहारे तु नित्यमेव ङी भवति। द्वयोः पुरुषयोः समाहारो द्विपुरुषी। त्रिपुरुषी।

---

१. गोक क०, म०। २. गुद क०, म०। ३. सुकला क०, म०। ४. विश्वं जगद्वीप्सुरिवोदुवाह थोरभ्रलिप्त्वाऽभ्युदितार्थमेव इति रायः क०, म०, टि०। ५. पञ्चपूली, दशपूली क०, म०। पूलं स्त्री तृणपुञ्जिका—इति वैजयन्ती क०, म०, टि०। ६. द्विगोरङ्कोऽट् क०, म०, टि०। ७. द्विगोरङ्कोऽडिति क०, म०। ८. उत्सेधतः क०, म०, टि०। ९. विशालतायाश्च क०, म०, टि०। १०. सुवर्णविस्तौ हेम्नोऽक्षे क०, म०, टि०। ११. आचितं दश भाराः स्युः। शाकटो भार आचितः क०, म०, टि०। १२. कम्बलमर्हतीति कम्बल्यम्—ऊर्णा पलशतमिति महोपाध्यायवर्द्धमानः क०, म०, टि०। १३. यथा पुंसोऽङ्गुलिः क०, म०, टि०। १४. काण्डं धनुरिति जैनेन्द्रम्। षोडशहस्तप्रमाणं काण्डमिति वर्द्धमानः क०, म०, टि०। १५. तदस्य प्रमाणान्मात्रट्। तस्य द्विगोः संज्ञायां चेति श्लुक् क०, म०, टि०। १६–स्याः सा द्वा–क० म०। १७. पुरुषः चतुर्हस्त इति वर्द्धमानसूत्रिः क०, म०, टि०।

नः पत्यन्तस्य ॥१।३।४०॥ पतिशब्दान्तस्य शब्दरूपस्य स्त्रिया वर्तमानस्य नकारादेशो[1] भवति वा[2]। [3]नृदुपिदन्वोऽस्वस्रादिडीति [4]ङी। वृद्धपत्नी, वृद्धपतिः। दासपत्नी, दासपतिः। अतिपत्नी, अतिपतिः। ग्रामपत्नी, ग्रामपतिः। अन्तग्रहणं [5]बहुप्रत्ययपूर्वार्थम्। बहुपत्नी, बहुपतिः।

सपत्न्यादौ ॥१।३।४१॥ सपत्न्यादिषु स्त्रियां वर्तमानेषु य. पतिशब्दस्तस्य नित्यं नकारादेशो भवति। सपत्नी। एकपत्नी। नित्यार्थवचनं समुदायनिपातनं समानस्य [6]सभावार्थं [7]पुम्भावार्थं च। सपत्नीभार्यः। [8]सपत्न, समान, एकवीर, पिण्ड, पुत्र, भ्रातृ इति सपत्न्यादिगणः।

पतिवत्यन्तर्वत्न्यावविधवागर्भिण्योः ॥१।३।४२॥ पतिवत्नीत्यविधवायामभिधेयायां पतिशब्दात् परस्य मतोर्वत्वं नक्वागमो निपात्यते। अन्तर्वत्नीति गर्भिण्यामन्तःशब्दादधिकरणप्रधानान्मतुर्नक्वच। ङीप्रत्ययस्तु पूर्वेण सिद्धः पतिवत्नी अविधवा। अन्तर्वत्नी गर्भिणी। अविधवागर्भिण्योरिति किम्? पतिमती [9]पृथ्वी। अन्तरस्यां शालायामस्तीत्यन्तर्वती शाला।

रोहिणरेवतान्नक्षत्रे ॥१।३।४३॥ रोहिण रेवत इत्येताभ्यां नक्षत्रे स्त्रिया ङीप्रत्ययो भवति। रोहिणी। रेवती। नक्षत्र इति किम्? अन्यत्र [10]रोहिणा। रेवता।

नीलात् प्राण्योषध्योः ॥१।३।४४॥ नीलशब्दात् प्राणिनि ओषधौ च स्त्रिया वर्तमानाद् ङीप्रत्ययो भवति। नीली गौः। नीली वडवा। नीली ओषधिः। प्राण्योषध्योरिति किम्? नीला शाटी। नीला वनराजी।

नाम्नि काच्च वा ॥१।३।४५॥ नीलशब्दात् कप्रत्ययान्तात् शब्दरूपात् स्त्रिया वर्तमानात् नाम्नि संज्ञाया वा ङीप्रत्ययो भवति। नीली, नीला[11]। प्रबद्धविलूना।

केवलमामकभागधेयपापावरसमानार्यकृतसुमङ्गलभेषजात् ॥१।३।४६॥ केवलादिभ्यः स्त्रिया वर्तमानेभ्यो नाम्नि ङीप्रत्ययो भवति। केवली। मामकी। भागधेयी। पापी। अवरी। समानी। आर्यकृती। सुमङ्गली। भेषजी। नाम्नीति किम्? केवला। मामिका। मामकशब्दस्यात्यन्तस्य ग्रहणं नास्ति नियमार्थम्।

कुण्ड[12]भाजगोणस्थलनागकुशकामुककटकवरात् पात्रश्राणावपनाकृत्रिमस्थूलायसमैथुनेच्छुश्रोणिकेशवेशे ॥१।३।४७॥ कुण्ड भाज गोण स्थल नाग कुश कामुक कट कवर इत्येतेभ्यः शब्देभ्यः पात्र श्राणा आवपन अकृत्रिम स्थूल आयस मैथुनेच्छु श्रोणि केशवेश [13]इत्येतेष्वर्थेषु वर्तमानेभ्यो ङीप्रत्ययो भवति। कुण्डी पात्रम्। [14]कुण्डान्या। भाजी श्राणा पक्वा। भाजान्या। गोणी आवपनम्। [15]गोणान्या। स्थली अकृत्रिमा। स्थलान्या। नागी स्थूला। नागान्या। अजातौ प्रत्युदाहियते। जातौ तु जातिलक्षणो ङीप्रत्ययो भवति। कुशी[16] आयसी। कुशान्या[17]। कामुकी मैथुनेच्छुः। कामुकान्या। कटी श्रोणिः। कटान्या। कबरी केशवेशः। कबरान्या। जानपदी वृत्तिश्चेत्। जानपदाऽन्येत्येके। सर्वत्र [18]जानपदैवेत्यन्ये।

आर्यक्षत्रियाद्वाऽन् ॥१।३।४८॥ आर्य क्षत्रिय इत्येताभ्यां स्त्रिया वर्तमानाभ्यां वा आन्-

---

१.–देशो वा भवति म०। २. 'वा' पदं क० प्रतौ नास्ति। ३.–दृचोऽस्वस्रादेर्ङी इति क०, म०। ४. ङी दृढपत्नी, दृढपतिः वृ—क०, म०। ५. सुपः प्राग् बहुर्वा ईषदसिद्धः पतिरस्याः—इति बहुपत्नी क०, म०, टि०। ६. समासस्य क०, म०। ७. पुम्भावाभावार्थं क० म०। ८. सापत्नः। ९. पृथिवी क०, म०। १०. कथं रेवतीरमणो रामः? रेवती शुष्करेवती? रेवत् शब्दो वत्वन्तोऽस्ति। कथं रोहिणी? रोहिणीशब्दः प्रकृत्यन्तरमस्ति। ११.–ला प्रबद्धविलूनो प्र—क०, म०। १२. कुण्डं देवजलाधारे पिठरेऽथ कमण्डलौ। कुण्डिः कुण्डः स्मृतौ जारपत्नीवत्नी सुतेऽपि च। क०, म०, टि०। १३.–षेषु स्त्रीत्वविशिष्टेष्वर्थे—क०, म०। १४. दाह इत्यर्थः क०, म०, टि०। १५. सम्भोता क०, म०, टि०। हारे क०, म०, टि०। १६. कुशी भवत्ययोविकारः क०, म०, टि०। १७. काष्ठमयी तदाकृतिः क०, म०, टि०। १८. जानपदेवेत्यन्ये क०, म०।

ङ्यय प्रत्ययो भवति । आर्याणी, आर्या । क्षत्रियाणी, क्षत्रिया । अर्धवयोगेऽयं विधिः । धवयोगे तु परत्वात् ङी भवति । आर्यस्य भार्या आर्यी । क्षत्रियो इति ।

धवाद्योगादज्येष्ठादिभ्यः ॥१।३।४९॥ धवो भर्ता तदभिधायिनोऽकारान्तात् शब्दरूपाद् योगात् तत्संबन्धात् स्त्रियां वर्तमानाद् ङीप्रत्ययो भवति ज्येष्ठप्रकारान् वर्जयित्वा । पृष्ठस्य भार्या पृष्ठी । प्रचरी । गणकी । महामात्री । एते प्रष्ठादयः शब्दा. सोऽयमित्यभिसंबन्धाद् भार्यायां वर्तन्ते । तस्येदं विवक्षायां प्रष्ठी प्रचरीति भवति । कौमारी कुमार्यां भवः कौमारो[2] भर्ता । कुमारीमपूर्वपतिमुपपन्न उच्यते तस्य भार्या कौमारीति प्रत्यासत्तेः सैवापूर्वपतिः कुमार्युच्यते । धवादिति किम् ? प्रसूता [3]प्रतिसृष्टा । योगादिति किम् ? देवदत्तो धवः । देवदत्ता भार्या स्वत एव न तद्योगात् । अत्र न भवति । अज्येष्ठादिभ्य इति किम् ? ज्येष्ठा । कनिष्ठा । मध्यमा । गोपालिका । पशुपालिका ।

पूतक्रत्वग्निवृषाकपिकुसितकुसीदादैङ् च ॥१।३।५०॥ पूतक्रतु अग्नि वृषाकपि कुसित कुसीद इत्येतेभ्यो धवाख्येभ्यस्तद्योगात् स्त्रिया वर्तमानेभ्यो ङीप्रत्ययो भवति । ऐकारश्चैषामन्त्यादेशः ।[4] पूतक्रतोर्भार्या पूतक्रतायी । अग्नायी । वृषाकपायी[5] । कुसितायी । कुसिदायी । कुसितकुसीदयोः पूर्वेण ङी सिद्ध. । ऐकारार्थमिहोपादानम् । ऐङिति ङकार आदेशत्वद्योतनार्थ· ।

मनोर्वा ङैच् ॥१।३।५१॥ मनुशब्दाद् धवाख्यात् तद्योगात् स्त्रिया वर्तमानाद् ङीप्रत्ययो भवति वा ङीसंनियोगे चास्य ऐजन्तादेशः । मनोर्भार्या मनायी, मनावी मनुः । ङैञिति ङकार आदेशत्वसूचनार्थ ।

मातुलाचार्योपाध्यायाद्वान् च ॥१।३।५२॥ मातुल आचार्य उपाध्याय इत्येतेभ्यो धवाख्येभ्यस्तद्योगात् स्त्रियामर्थे वर्तमानेभ्यो वा ङी आन् इत्येतौ प्रत्ययौ भवतः । आनि नृदुगिदन्त्र इति । मातुली, मातुलानी, मातुला । आचार्यी, आचार्यानी, आचार्या । आचार्यानीति क्षुम्नादित्वाण्णत्वाभावः । उपाध्यायी, उपाध्यायानी, उपाध्याया ।

वरुणेन्द्रमृडभवशर्वरुद्रादान् ॥१।३।५३॥ वरुण इन्द्र मृड भव शर्व रुद्र इत्येतेभ्यो धवाख्येभ्यः तद्योगात् स्त्रिया वर्तमाने आनिति प्रत्ययो भवति । वरुणस्य भार्या वरुणानी । इन्द्राणी । मृडानी । भवानी । शर्वाणी । रुद्राणी । पुन. आन्ग्रहणं पृथग्भावार्थम् ।

सूर्याद्देवतायाम् ॥१।३।५४॥ सूर्यशब्दाद् धवाख्यात् तद्योगाद् देवतायां स्त्रियां वर्तमानाद् आन् प्रत्ययो भवति । सूर्यस्य भार्या देवता सूर्याणी । देवतायामिति किम् ? सूरी अन्या ।

आत् ॥१।३।५५॥ सूर्यशब्दाद् धवाख्यात् तद्योगाद् देवतायां स्त्रियां वर्तमानाद् आदित्ययं प्रत्ययो भवति । सूर्यस्य भार्या देवता सूर्या । एवं च देवतायां द्वैरूप्यं भवति । योगविभाग उत्तरत्र आडनुवृत्त्यर्थः ।

यवनयवाल्लिपिदुष्टे ॥१।३।५६॥ यवन यव इत्येताभ्यां यथाक्रमं लिपौ दुष्टे चार्थे स्त्रियां वर्तमानाभ्यामान् प्रत्ययो भवति । यवनाना लिपिर्यवनानी । यवनान्या । दुष्टो यवो यवानी । यवान्या ।

हिमारण्याद्वुरौ ॥१।३।५७॥ हिम अरण्य इत्येताभ्यामुरौ महत्यर्थे स्त्रियां वर्तमानाभ्यामान् प्रत्ययो भवति । उर्वहिमं हिमानी । हिमान्या । उर्वरण्यमरण्यानी । अरण्यान्या ।

शक्तिनो ङी ॥१।३।५८॥ इकारान्तादक्तिप्रत्ययान्तात् शब्दरूपात् स्त्रियां वर्तमानाद् वा ङीप्रत्ययो भवति । शक्तिः, शक्ती । यष्टि., यष्टी । अङ्गुलिः, अङ्गुली । धमनिः, धमनी । अशनिः, अशनी । अरणिः,

---

१. अर्वाणी स्वयमार्या स्यात्, क्षत्रिया क्षत्रियाण्यपि । क०, म० टि० । २. –रो भ–क०, म० । ३. –सा पुत्रिस्–क०, म० । ४. –मन्तादे–क०, म० । ५. 'इदविष्णु वृषाकपी' । 'वृषाकपायी श्रीगौर्योः' इत्यमरः । क०, म०, टि० ।

अरमी। शकृत्करिः, शकृत्करी वत्सा। आत्मंभरिः, आत्मंभरी स्त्री।[1] अक्तिन इति किम्? कृतिः, लुतिः। नकारः किम्? रन्तिः[2], रन्ती। केचिदक्तिन इति क्तिन्सदृशाद्धातुप्रत्ययान्तादेवायं विधिः। क्तिन्निति[3] क्तिन्नर्थः सर्वोऽपि ज्ञायते तेन उद्गन्धिः। निष्कौशाम्बिः[4]। ग्लानिः। ह्लानिः। काङ्क्षारिमाकार्षीः। अकर्णिस्ते आस्म भूयादित्यादौ च न भवतीत्याहुः। पूर्वो ङी व्यवहित इति पुनर्ङीग्रहणम्।

गुणादुतोऽचोऽखरोः ॥१।३।५९॥ अचः परो य उकारस्तदन्तात् खलशब्दवर्जिताद् गुणवचनात् स्त्रियां वर्तमानाद् ङीप्रत्ययो भवति वा। पटुः, पट्वी। मृदुः, मृद्वी कन्या। गुणमात्रवृत्तेः[5] स्त्रीत्वायोगात्ततो द्रव्यवृत्तेः प्रत्ययः। गुणादिति किम्? आखुरियम्[6]। चिचीषुरियं कन्या। उत इति किम्? श्वेतेयं कन्या। तकारः किम्? पटयतेः क्विप् पटूः स्त्री। अच इति किम्? पाण्डुरियम्। बभ्रुरियम्। येन नाव्यवधानं[7] तेन व्यवहितेऽपि वचनप्रामाण्याद् भवतीत्येकेन वर्णेन व्यवधानमाश्रीयते। अखरोरिति किम्? खरुरिय[8] कन्या।

द्रव्याश्रयो गुणो द्रव्यं क्रिया[10] पूर्वपरात्मिका।
आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक्[11] ॥

चन्द्रभागान्नद्याम् ॥१।३।६०॥ चन्द्रभागशब्दान्नद्यां स्त्रिया ङीप्रत्ययो वा भवति। चन्द्रभागी, चन्द्रभागा। एवंनामा नदी। चन्द्रभागान्या। पाठान्तरम्–चन्द्रभागान्नद्याम्। तत्र चान्द्रभागी, चान्द्रभागा नदी। चान्द्रभागान्या।

बह्वादेः ॥१।३।६१॥ बहु इत्यादिभ्यः शब्देभ्य स्त्रिया वर्तमानेभ्यो ङी प्रत्ययो भवति वा। बहुः, बह्वी। एवंनाम्नी[12] काचित्। गुणवचने तु पूर्वेणैव सिद्धः। पद्धति, पद्धती। पद्धतिशब्दान् क्तिन्नन्तत्वात् वेदक्तिनो ङीत्यप्राप्तिः। चण्डी, चण्डा। अरालो, अराला। उपाध्यायी, उपाध्याया। उपेत्याधीयतेऽस्या इति इङो घञ्। स्त्रिया क्तिन् बाधया अत एव पाठात् भवति। बहु, पद्धति, चण्ड, अराल, उपाध्याय, कमल, कृपण, विशाल, विशकूट, विकट, भरुज, कल्याण, उदार, पुराण इति बह्वादिः।

शोणश्येतैतहरितभरतरोहितादृणान्तो नश्च ॥१।३।६२॥ शोण श्येत एत हरित भरत रोहित इत्येतेभ्यो वर्णवाचिभ्यः स्त्रिया वर्तमानेभ्यो ङीप्रत्ययो वा भवति तत्संनियोगे च तकारस्य नकारादेशः। शोणी, शोणा। श्येनी, श्येता। एनी, एता। हरिणी, हरिता। भरणी, भरता। रोहिणी, रोहिता। लोहिनी, लोहिता इति ऋफिडादित्वाल्लत्वम्। शोणादिग्रहणं किम्? श्वेता। पीता। वर्णादिति किम्? अन्यत्र शोणा। श्येता। एता। चकारो नकारस्य ङीसंनियोगशिष्टार्थः[13]।

---

१. ङी। इदिति किम्? हनुः। पशुः। तकार किम्? नीः। सेनानीः ङी। अक्तिन। म० २. नामि किः वक्ता दीर्घश्चेति लुग्दीर्घौ न भवतः।१३।२६। पेजलीति दीर्घः। हन्मन्यमिति प्राप्ति न लुप्त्व। क०, म०, टि०। ३. –ति च क्ति– क०, म०। ४. निकौशम्बिः क०, म०। ५. गुणमात्रोक्ते स्त्रीत्वाभावात्–द्रव्यवाचिनः–तस्तस्य विधिः। सत्त्वे निविशते पैति पृथग्जादिषु दृश्यते। आधेयश्चाश्रियजश्च सोऽप्रत्वप्रकृतिर्गुणः॥ सत्त्वे द्रव्ये निविशते समुदेत्याश्रयति वायुः। स गुण इति संबन्धः। द्रव्यादपैत्य गच्छति यदा पुरि तदापि तु। तायामुत्पनाथां पृथग्जातिषु दृश्यते। सैव हरितताशस्त्वेषु–आधेयः कार्यो-दर्वागिति लुगतः। यथा वस्त्रेपुष्पयोगाद् गन्धः आक्रियातोऽति शब्दः म०,टि०। कार्यो यथा वा पुष्पयोगाद् गन्ध आक्रियातोऽतिशब्दः क०, टि०। ६. नोत्पद्यते यथाकाशादिषु यदा संयोगो विभागो वा असत्त्वप्रकृति-द्रव्यस्वभावरहितो निर्गुण इत्यर्थः। क०, म०, टि०। ७. व्यवधानमस्तीत्यर्थः। द्वौ नञौ प्रकृतमर्थं गमयतः। क०, म०, टि०। ८. डकारानुस्वारयोः सज्ञावान्न भवति। क०, म०, टि०। ९. खलर्दन्ते हरे.दर्पे हये श्वेते तु वाच्यवत्। क०, म०, टि०। १०. पूर्वाकारं परित्यज्य अन्यस्वरूपेत्यर्थः। क०, म०, टि०। ११. सा जातिः सर्वविधलिङ्गभाग् न भवतीत्यर्थः। म०, टि०। सर्वेषु लिङ्गभाग् न भवतीत्यर्थः क०, टि०। १२. –नामा का– क०, म०। १३. –शिष्टतार्थः, क०, म०।

क्नोऽसितपलितात् ॥१।३।६३॥ असित पलित इत्येताभ्यां वर्णवाचिभ्यां स्त्रियां ङीप्रत्ययो भवति वा तत्संनियोगे च ककारस्य क्नादेशः। असिक्नी, असिता। पलिक्नी, पलिता। क्न इति ककारो नानुबन्धः। तथा च नकार एवान्तादेशः क्रियेत यथा नः पत्यन्तस्येति।

कालशबलसारङ्गपिशङ्गपिङ्गलकल्माषात् ॥१।३।६४॥ काल शबल सारङ्ग पिशङ्ग पिङ्गल कल्माष इत्येतेभ्यो वर्णवाचिभ्यः स्त्रिया नित्यं ङीप्रत्ययो भवति। काली। शबली। सारङ्गी। पिशङ्गी। पिङ्गली। कल्माषी। वर्णादि[1] किम्? अन्यत्र काला। शबला। सारङ्गा। पिशङ्गा। पिङ्गला। कल्माषा। योगविभागो नित्यार्थः।

[2]जातेरस्त्रीयशूद्रात् ॥१।३।६५॥ यदस्त्यर्थं जातिवाचि तस्मादकारान्तात् शब्दरूपात् स्त्रियां वर्तमानाद् ङीप्रत्ययो भवति न चेत् तच्चान्तं शूद्रशब्दो वा भवति। कुक्कुटी। मयूरी। व्याघ्री। कच्छपी। तटी। हरीतकी। ब्राह्मणी। वृषली। नाडायणी। भारायणी। कठी। बह्वृची। द्रोणी। कुटी। पात्री। [3]स्त्रीत्वेऽप्यस्त्रीत्वं न विरुध्यते तथा दर्शनात्। जातेरिति किम्? शुक्ला कृता देवदत्ता। अस्त्रीयशूद्रादिति किम्? यूका। मक्षिका। इभ्या। क्षत्रिया। शूद्रा। मत्सी। मनुषी। ऋ(रु)ष्यी। हयी। गवयी। मुकयीति गौरादि। य इत्यलग्रहणमिति स्थानिवद्भावो नेति वतण्डीत्यत्र प्रतिषेधो[4] भवत्यत इत्यधिकारादुपान्त्यस्य यकारस्यान्तोपचारः महाशूद्रीति समुदायात् ङी जातिलक्षणस्यायं प्रतिषेधः। धवयोगलक्षणो[5] भवत्येव शूद्रस्य भार्या शूद्री। अत इति किम्? आखुः। तित्तिरी।

आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक्।
सकृदाख्यातनिर्ग्राह्या गोत्रं तु चरणैः सह॥
आजन्मनाशमर्थानां सामान्यमपरे विदुः॥

पाककर्णपर्णबालान्तात् ॥१।३।६६॥ पाक कर्ण पर्ण बाल इत्येतदन्ताज्जातिवाचिनः स्त्रिया वर्तमानाद् ङीप्रत्ययो भवति। क्षणपाकी। ओदनपाकी[6]। आखुकर्णी। शङ्कुकर्णी। शालिपर्णी। पूतिनपर्णी। गोबाली। अश्वबाली। आसां जातीनामस्त्रीत्वं [7]नास्तीति वचनम्।

पुष्पात्सत्काण्डप्रान्तशतैकाच्च: ॥१।३।६७॥ सत् काण्ड प्रान्त शत एक अञ्च इत्येतद्वर्जितात् परो यः पुष्पशब्दः तदन्ताज्जातिवाचिनः स्त्रियां वर्तमानाद् ङीप्रत्ययो भवति। शङ्खपुष्पी। सुवर्णपुष्पी। सदादिप्रतिषेधः किम्? सत्पुष्पा। काण्डपुष्पा। प्रान्तपुष्पा। शतपुष्पा। एकपुष्पा। प्राक्पुष्पा। प्रत्यक्पुष्पा।

फलात्सम्भस्त्राजिनैकशणपिण्डात् ॥१।३।६८॥ सम्भस्त्रा अजिन एकशण पिण्ड इत्येतद्वर्जितात् परो यः फलशब्दः तदन्ताज्जातिवाचिनः स्त्रिया वर्तमानाद् ङीप्रत्ययो भवति। वासी [8]फली। सादिप्रतिषेधः किम्? सम्फला। भस्त्राफला। अजिनफला। एकफला। शणफला। पिण्डफला।

---

१. –दिति किम्? क०, म०। २. आकृतिग्रहणा जात्यं(तिः) लिङ्गानां च न सर्वभाक्। सकृदाख्यं(ख्या)त निर्ग्राह्या गोत्रं तु चरणैः सह॥ क०, म०, टि०। ३. स्त्रीप्रत्ययसद्भावे स्त्रीपुरुषवाचकत्वं न विरुध्यते। क०, म०, टि०। ४. –तिषेधो न भव– क०, म०। ५. –क्षणं भ– क०, म०। ६. सदशामिधानप्रत्ययत्वयोः प्रवृत्तेर्निमित्तं जातिर्मा भूत्। अतिप्रसंग इति ओदनस्य पाक इव पाकोऽस्याः सा ओदनपाकी क०, म०, टि०। ७. कुक्कुटी, मयूरी, व्याघ्री, कच्छपी, संस्थानमाकृतिर्ग्रहणमस्या सा जातिरस्तु। तद्भावेऽप्युपदेशमात्राज्जातित्वमस्तीत्यर्थः। ब्राह्मणत्वादेर्जातित्वे(त्वं) कथं लिङ्गानां च न सर्वभाक्। ब्राह्मणी, वृषली, द्रोणी, कुटी, पुत्री। न चैवमसिद्धव्यापिनी यदृच्छा शब्दानामजातित्वात्—नहि देवदत्ता नाम काचिदेव जातिः लोकतोऽपि प्रतीयते लिङ्गेषु तटस्तटम् तटीत्येवमादिषु सकृदेकदाख्याता सती निश्चयेन ग्राह्या जातिरेव प्रवृत्तिनिमित्तम्—न सङ्केतादिरपि तु इह जातिवाचिन इत्यर्थः। तथा च देवदत्ता कारणा शुक्लेत्येवमादिषु जातिग्रहणं व्रेन व्यावर्त्यं नास्तीति जातिग्रहणमिहानर्थकं स्यात्। गोत्रं च लौकिकमपत्यमात्रं द्वितीयस्मिन्नेव दर्शने कृत्स्नार्थम्। नाडायनी, वात्सायनीति चरणमध्येन क्रियार्थम्। कठी, बह्वृची। जातेरिति किम्? कृता शुक्ला। क०, म०, टि०। ८. –ली पूगफली समा –म०।

मूलकात्तदन्तात् ॥१।३।६९॥ नञ्वर्जितात् परो यो मूलशब्दस्तदन्ताज्जातिवाचिनः स्त्रियां वर्तमानाद् ङीप्रत्ययो भवति । बर्हमूली । अनञ इति किम् ? अमूला ।

नुरितः ॥१।३।७०॥ इकारान्तान्नुर्जातिर्मनुष्यजातिवाचिनः स्त्रिया वर्तमानाद् ङीप्रत्ययो भवति । अवन्ती । कुन्ती । आङ्गायनी । [1]वात्सायनी । बादाक्षी । प्लाक्षी । औदमेयी । नुरिति किम् ? तित्तिरिः । इत इति किम् । चिट् । वरट् । तकारः किम् ? अवन्तीयते. क्विप् अवन्ती स्त्री । जातेरिति किम् ? [2]निष्कौशाम्बि कन्याः ।

ऊरुतोऽप्राणिनश्चायुरज्वादिभ्यः ॥१।३।७१॥ उकारान्तान्नृजातिवाचिनः अप्राणिजातिवाचिनश्च स्त्रिया वर्तमानादूप्रत्ययो भवति यूशब्दान्तं रज्वादींश्च वर्जयित्वा । [3]कुरूः । हस्वाकूः । ब्रह्मबन्धूः । दिवबन्धूः । अप्राणिजातेः—अलाबूः । कर्कन्धू । दीर्घोच्चारणं ब्रह्मबन्धूरित्यादौ कञ्बाधनार्थम् । दीर्घोच्चारणे हि प्रश्लेषेण ह्रावुकारौ विहितौ भवत , तत्र द्वितीय कञ्बाधनार्थो भवति । उत इति किम् ? चिट् । [4]वरट् । तकारः किम् ? अतिवधूः [5] । निर्वधूः । उप्रत्ययोऽत्र ह्रस्वः स्यात् । अप्राणिनश्चेति किम् ? आखुः । कृकवाकुः । जातेरिति किम् ? पटुः । चिकीर्षुः कन्या । अयुरज्वादिभ्य इति किम् ? अध्वर्युरियं कन्या । रज्जुः । हनुः । रज्वादयः प्रयोगतोऽनुसर्तव्याः ।

ऊरुत्तरपदादौपम्ये ॥१।३।७२॥ ऊरुत्तरपदात् शब्दरूपात् स्त्रियां वर्तमानाद् औपम्ये गम्यमाने ऊप्रत्ययो भवति । नागनासोरूः । कदलीस्तम्भोरूः । करिकरवृत्तोरूः । लाघवार्थमूर्वन्तादिति वक्तव्ये उत्तरपदग्रहणं किम् ? हस्तसाम्यूरुः । औपम्य इति किम् ? वृत्तोरुः ।

सहसफसहितसंहितलक्ष्मणवामादेः ॥१।३।७३॥ सह सफ सहित संहित लक्ष्मण वाम इत्येतदादेरुत्तरपदात् शब्दरूपात् स्त्रिया वर्तमानादूप्रत्ययो भवति । सहोरूः । सफोरूः । सफशब्दः संश्लिष्टार्थः । सहितोरूः । संहितोरूः । लक्ष्मणोरूः । वामोरूः ।

बाह्वन्तकद्रुकमण्डलोर्नाम्नि ॥१।३।७४॥ बाह्वन्तात् कद्रुशब्दात् कमण्डलुशब्दाच्च स्त्रिया वर्तमानान्नाम्नि संज्ञायां विषये ऊप्रत्ययो भवति । भद्रबाहूः । भद्रबाहूः । कद्रूः । कमण्डलूः । नाम्नीति किम् ? वृत्तबाहुः । कद्रुः । कमण्डलुः ।

नारी सखी पङ्गूः श्वश्रूः ॥१।३।७५॥ नारी सखी पङ्गू श्वश्रू इत्येते शब्दाः स्त्रियां वर्तमानाः ङ्यू प्रत्ययान्ता निपात्यन्ते । नारी इति नृनरयो ङी नारादेशश्च नारी स्त्री । सखी इति सखिशब्दात् सक्थशब्दाच्च बहुव्रीहे. ङीप्रत्ययः सखी स्त्री । पङ्गू इति पङ्गुशब्दादूप्रत्ययो निपात्यते । पङ्गूः स्त्री । श्वश्रूः इति श्वशुरशब्दस्य धवयोगलक्षणे जातिलक्षणे च ङीप्रत्यये प्राप्ते ऊः प्रत्ययः । अकारोकारयोर्लोपश्च । श्वश्रूः स्त्री ।

यूनस्तित् ॥१।३।७६॥ युवन्नित्येतस्मात् स्त्रिया वर्तमानात् तित्प्रत्ययो भवति । ङीप्रत्ययापवादः[6] । युवतिः । तकार. व्यदिति प्रत्याहारार्थः ।

ङ्यां वनोरः ॥१।३।७७॥ ङीप्रत्यये परे वनो रेफादेशो भवति । धीवरी । पीवरी । बहुधीवरी । बहुपीवरी । ङ्यामिति किम् ? धीवा । बहुधीवा । शुनी । अतियूनी । अतिमघोनीत्यत्र वचनमनर्थकम्[7] ।

लुगतः ॥१।३।७८॥ ङीप्रत्यये परे पूर्वस्याकारस्य लुक् (ग्) भवति । कुहचरी । मद्रचरी । अत इति किम् ? पट्वी । कर्मी ।

---

१. गारसायनी । वाक्षी । प्लाक्ष— क०, म० । २. निष्कौशाम्बिः क०, म० । ३. कुरूः क०, म० । ४. दरट् क०, म० । ५. अतिदरधूः क० । ६. संश्लिष्टार्थः क०, म० । ७. —रलोप— क०, म० । ८ युवतौ च भवन्त्यवन्त्या भर्तुरित्यादयोऽपप्रयोगा इति केचित् । तयो ते काणादिककलिप्रस्थं ताडकी दुनीतयधिकारो भवतीत्याहुः । क०, म०, टि० । ९. अर्थवद्ग्रहणे नानर्थकस्य, क०, म०, टि० ।

मत्स्यतद्धितस्य हलो यः ॥१।३।७९॥ मत्स्यशब्दस्य तद्धितप्रत्ययस्य च यो यकारो हलः परः तस्य ङीप्रत्यये परे लोपो भवति । मत्सी । मत्स्यो नाम कश्चित्तस्यापत्यं स्त्री इञ् ङी मात्सी । ङ्य ङ्येकादेशो हि ङीग्रहणेन गृह्यते । तद्धितस्य मनुषी । मानुषी[1] । प्रकृतिमप्यतीतवान् गार्गी । वारसी । वार्कणी । मत्स्य-तद्धितस्येति किम् ? ऋश्यी । गौरादि ङी । हल इति किम् ? कारि[2]केयी । पूरिकेयी । ङ्यमिति किम् ? मत्स्यचरी । मात्स्यः । आवटपा ।

सूर्यागस्त्ययोश्छे च ॥१।३।८०॥ सूर्य अगस्त्य इत्येतयोर्यकारस्य छे च ङ्या च प्रत्यये परे लोपो भवति । सूर्यस्य भार्या सूरी । अगस्ती । सूर्यस्येयं सौरी । आगस्ती प्रभा । सौरीयः[3] । आगस्तीयः । छे चेति किम् ? सौर्यं । आगेस्त्यः ।

लुग्यगोणीसूच्योः य्यतः ॥१।३।८१॥ तद्धितस्येति वर्तते । य्यदिति गुरूपोत्तमस्यानार्षेऽपत्येऽणिञः य्यङित्यारभ्यानुस्तिदित्यतस्तकारेण प्रत्याहार. । य्यतोऽण्यादीनां तद्धितानां लुचि परतः लुग्भवति गौणीसूची-शब्दौ वर्जयित्वा । पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः । दशेन्द्रः । पञ्चभि. शष्कुलीभिः क्रीतः पञ्चशष्कुल. । दशशष्कुलः । कुवल्या विकार. फलं कुवलम् । बदरम् । आमलकम् । लुचीति किम् ? औपगवी । औपगवीत्वम् । हरीतकी फलमित्यत्र लुगर्थस्य स्त्रीत्वात् पुन. य्यत् । अवन्ती कुन्तीत्यत्र य्यतो लुक् परानेति न भवति लुचः परत्वं स्थानिद्वारकं कल्प्यते । अगोणीसूच्योरिति किम् ? पञ्च[4]गोणिः । पञ्चसूचि. । दशगोणिः । दशसूचिः । य्यत इति किम् ? पञ्चभि. प्रेयोभिः क्रीतः पञ्चप्रेयान्[5] ।

गोण्या ह्रस्वो मेये ॥१।३।८२॥ गोणीशब्द[6]स्योपचाराद् गोणी प्रमेयेऽर्थे वर्तमानस्य ह्रस्वो भवति । गोणी मात्रा गोणि. । मेय इति किम् ? गोणी ।

केऽण्ङ्यः ॥१।३।८३॥ अणो[7] ङीप्रत्ययस्य च कप्रत्यये परे ह्रस्वो भवति । सोमपकः । कोलालपकः । सोमपिका । कोलालपिका । लक्ष्मिका । तन्त्रिका । वधुका[8] । यवागुका । ङ्य षट्विका[9] । मृद्विका । ङीग्रहणं पुंभा[10]वबाधनार्थम् । पाक. इत्यत्र प्रत्ययाप्रत्ययो. प्रत्ययस्यैव ग्रहणमिति न भवति तद्धितस्येति वर्तते ।

न कचि ॥१।३।८४॥ कचि प्रत्यये परे अण्ङ्योः ह्रस्वो न भवति । बहुकोलालपाकः । बहु-लक्ष्मीकः । बहुकुमारीकः । बहुब्रह्मबन्धूकः । खारीकः । काकणीकः । न कचीति प्रतिषेधः पूर्वत्राननुबन्धक-ग्रहणेन सानुबन्धकस्येत्यस्याभावं ज्ञापयति तेन निपाहकर्ष्वां जात इति टिड्ढणकादेश. नैपाहकर्षुकः । शाबरजम्बुकः ।

वाऽङः ॥१।३।८५॥ आङ कचि परे ह्रस्वो वा भवति । पूर्वेण प्रतिषेधे प्राप्ते पक्षे ह्रस्वः क्रियते । प्रियखट्वकः । प्रियखट्वाकः । बहुमालक. । बहुमालाकः ।

ह्रस्वापुंसोऽनित्यड्यसुपः ॥१।३।८६॥ अपुंसः अपुंलिङ्गार्थात् शब्दाद्विहितस्याङ स्थाने अनितः अनकारानुबन्धस्य प्रत्ययस्यावयवे कि ककारे आदि आङ्परे परतः वा इकारो ह्रस्वश्चादेशो भवतः । असुपः स चेत् ककारात् पर आङ् सुपः परो न भवति । खट्विका, खट्वका, खट्वाका । परमखट्विका[11], परमखट्वका, परमखट्वाका । प्रियखट्विका, प्रियखट्वका, प्रियखट्वाका । चकारो ह्रस्वानुकर्षणार्थः । उभय-

---

१. 'मनोर्याण् चक्वे'ति सूत्रेण यप्रत्यये सगागमे च सति मनुष्यः, ततः, 'ऋतः स्वे'इत्यण् ततः 'स्त्रियां ङी लुगत' इत्यणोऽकारस्य लोपः, तस्य च परेऽचः प्राचः इति न स्थानिवद्भावः । यलोपस्य यविधिरित्वात् । क०, म०, टि० । २. अपूपविशेषवाचिनौ कारिकापूरिकाशब्दौ क०, म०, टि० । ३. दीर्घछ इति छः । क०, म०, टि० । ४. पञ्चगोणिः, दशगोणिः, पञ्चसूचिः, दशसूचिः क०, म० । ५. पञ्चप्रियान् क०, म० । ६. कुम्भः सूर्योऽस्त्रियां द्वौ द्वौ गोणी वाहस्तु तद्द्वयम् । द्वौ द्वौ क०, म०, टि० । ७. अहृडण् न स्वण् प्रत्ययः । क०, म०, टि० । ८. मधुका, क० । ९. कुरिसतेस्त्वादिना कप् । क०, म०, टि० । १०. पितिं तद्धिते—इति । ११. सम्महत्परमेति समासः । ततः कप्—आङ् क०, म०, टि० ।

निषविकल्पे च नैरुक्त्यं भवति। अपुंस इति किम्? न विद्यते खट्वाऽस्या इति अखट्वा[1]। अल्पाऽखट्का अखट्विका। खट्वामतिक्रान्ता अतिखट्वा। साऽल्पा अतिखटविका। आड इति किम्? मातृका। अनित इति किम्? अनुकम्पिता आर्द्रवत्ता आर्द्रका। कीति किम्? खट्वाता। मालाता। आडीति किम्? प्रियखट्वाको देवदत्तः। असुप इति किम्? प्रियखट्वाकमतिक्रान्ता अतिप्रियखट्वाका।

स्वज्ञाजभस्त्राधातुक्यः ॥१।३।८७॥ स्व ज्ञ अज भस्त्र इत्येतेभ्यः अधात्ववयवो यः ककारो यकारश्च, तस्माच्च परस्याङ् स्थाने अनित्प्रत्ययावयवे ककारे आड्परे परतः इकारादेशो वा भवति न चेत् स ककारात् पर आड् सुपः परो भवति। कुत्सिता स्वा ज्ञातिः स्विका, स्वका। अस्विका, अस्वका। निःस्विका, निःस्वका। बहुस्विका, बहुस्वका। ज्ञिका, ज्ञका। अज्ञिका, अज्ञका। निर्ज्ञिका, निर्ज्ञका। बहुज्ञिका, बहुज्ञका। अजिका, अजका। अनजिका, अनजका। निरजिका, निरजका। बह्वजिका, बह्वजका। निर्भस्त्रिका, निर्भस्त्रका। बहुभस्त्रिका, बहुभस्त्रका। चटकिका, चटकका। एलकिका, एलकका। मूषकिका, मूषकका। इभ्यिका, इभ्यका। आर्यिका, आर्यका। क्षत्रियिका, क्षत्रियका। भस्त्राग्रहणं न्यगर्थम् अनीचो हि पूर्वेणैव विकल्पः सिद्धः। अधातुग्रहणं किम्? सुशोकिका। सुनयिका। आड इति किम्? कुत्सिता स्वाऽऽमीया वा स्विका। साङ्काश्यिका। शुभ्रयिका। भद्रयिका। प्रियह्रयिका। आडीति किम्? प्रियभस्त्राकः। प्रियचटकाकः। असुप इति किम्? प्रियभस्त्राकमतिक्रान्ता अतिप्रियभस्त्राका।

द्वेरयषसूतपुत्रवृन्दारकस्य ॥१।३।८८॥ द्वि एष सूत पुत्र वृन्दारक[3] इत्येतेषामन्तस्य अनित्प्रत्ययावयवे ककारे आड्परे परतः इकारादेशो वा भवति न चेत् स ककारात् पर आड् सुपः परो भवति। द्विके, द्वके। एषिका, एषका। सूतिका, सूतका। पुत्रिका, पुत्रका। वृन्दारिका, वृन्दारका। द्विशब्दस्य साहचर्यात् एयेति सर्वादेरेतदो विकारनिर्देशः। स यत्रैतद्रूपं तत्राय विकल्पो यथा स्यादित्येवमर्थः। इह न भवति एतिकाश्चरन्ति।

वौ वर्तिका ॥१।३।८९॥ वौ शकुनावभिधेये वर्तिकेति इत्व वा निपात्यते। वर्तिका, वर्तका शकुनिः। वाविति किम्? वर्तिकाऽन्या।

त्यायदाद्यतः ॥१।३।९०॥ त्यप्रत्ययान्तस्य यदादिवर्जितस्य च शब्दरूपस्य योऽकारस्तस्य अनित्प्रत्ययावयवे ककारे आड्परे परतः नित्यमिकारादेशो भवति न चेत् स आड् सुपः परो भवति। इहत्यिका। अमात्यिका। दाक्षिणात्यिका। जटिलिका। अष्टिका। खारी कारिका। हारिका। त्यग्रहणमधातुत्व इति विकल्पबाधनार्थम्। यदादिप्रतिषेधः किम्? यका। सका। यके। तके। क्षिपकाँ[4]। ध्रुवका। अत इति किम्? नाका। नौका। तकारः किम्? प्रियकीलालपाका। अनित इति किम्? अनुकम्पिता। देवदत्ता। देवका। जिनका। जीवका। जीवताज्जीवका। नन्दताच्चन्दका। अनित इति पर्युदासेन प्रत्ययग्रहणादिह न भवति। शक्नोतीति शका। करका। चटका। एलका। इष्टका। अष्टका नाम क्रिया। आडीति किम्? कारकः। हारकः। असुप इति किम्? बहुपरिव्राजका। मण्डकारा[6]। अत्र समासार्थात् सुपः पर आड्। असुप इति प्रसज्यप्रतिषेधः तेनेहापि भवति। बहुचर्मिका नगरी।

नरिका मामिका ॥१।३।९१॥ नरिका, मामिका इति नरकशब्दस्य मामकशब्दस्य चाप्रत्ययावयवे ककारे आड्परे परतः अकारस्येत्वं निपात्यते। नरान् कायतीति नरिका। ममेयं मामिका।

तारका वर्णका ज्योतिस्तान्तवे ॥१।३।९२॥ तारका वर्णका इति निपात्यते यथाक्रमं ज्योतिषि तान्तवे चाभिधेये। तारका ज्योतिः। वर्णका तान्तवं प्रावरणविशेषः। ज्योतिस्तान्तव इति किम्? तारिका, तारिका संसारस्य। वर्णिका, दारिका शासनस्य।

---

१. इति बहुर्माहौ क०, म०, टि०। २. वृन्दारस्य क०, म०, टि०। ३. वृन्दार क०, म०, टि०। ४. –प(थ)का, ध्रुवका, ध्रुव– क०, म०। ५. गाका, नोका क०, म०। ६. –का मधुरा अत्र –क०, म०। ७. कारयतीति क०, म०।

योगे[1] ॥१।३।९३॥ अधिकारोऽयमाशास्त्रपरिसमाप्तेः । वक्ष्यति ऊर्ध्वमनुक्रमिष्यामः तत्सति योगे भवति नासतीति वेदितव्यम् । योगः सम्बन्धः स यथायोगमेकार्थता व्यपेक्षा वा – ऐकपद्ये एकार्थता अन्यत्र व्यपेक्षा । वक्ष्यति 'हाधिक्समयानिकषोपर्युपर्यध्यधोऽधोऽत्यन्तरान्तरेण तस्यैर्यैरभिसर्वोभयैर्दध्याप्रधानेऽम् औट् शस्' । तत्र देवदत्तं जिनदत्तं चान्तरा कमण्डलुः । इह न भवति देवदत्तजिनदत्तयोरन्तरा कमण्डलुः । अत्र हि देवदत्त-जिनदत्तयोः कमण्डलुना संबन्धो नान्तरेत्यनेन । द्वितीया श्रितादिभिः । धर्मं श्रितो धर्मश्रित. । इह न भवति—पश्य धर्मं श्रितो देवदत्तो गुरुकुलम् । तृतीया तत्कृत. । शङ्कुलया खण्डः । इह न भवति किं त्वं करिष्यसि शङ्कुलया खण्डो देवदत्त उपलेन[2] । 'ङसोऽपत्ये ।' उपगोरपत्यमौपगवः । इह न भवति गृहमुपगोरपत्यं देवदत्तस्य । कर्मणोऽण् । कुम्भं करोतीति कुम्भकारः । इह न भवति—पश्य कुम्भ करोति कटं देवदत्तः । 'स्मृत्यर्थेऽयदी लृद् ।' स्मरसि देवदत्त मगधेषु वत्स्यामः । इह न भवति—स्मरति देवदत्तो मातरमवसाम मगधेषु दीर्घम् ।

जातिर्बहुवद्वैकाख्यायाम् ॥१।३।९४॥ [4]जात्यर्थ एक आख्यायाम् नामधेयेऽभिधेयत्वेन वर्तमानो बहुवद्भवति वा । संपन्नो यवः । संपन्ना यवाः । संपन्नो व्रीहिः । संपन्ना व्रीहयः । आत्यर्थस्य[5] बहुवद्भावाद् तद्विशेषणानामपि बहुवचनम् । जातिरिति किम् ? देवदत्तो जिनदत्तः काश्यपप्रतिकृति. काश्यपः । एकेति किम् ? शोभने अक्षिणी कलिङ्गेषु । सख्येतरयोरक्ष्णोः सनिपातशोभाविवक्षायां बहुवद्भावो न भवति । एको व्रीहिः संपन्नः सुभिक्षं करोतीत्यत्र संख्याप्रयोगे विरुद्धं बहुत्वमेकत्वे नेति न भवति । आख्यायामिति किम् ? गोत्वम् । अश्वत्वम् । अय यतो गौरित्यादि बुद्धिशब्दो भवतः । तदभिधीयत[6] इति व्यापारशब्देन जातेराख्येति न भवति । द्रव्यविवक्षाया बहुवचन सिद्धम् । जातिविवक्षायां पक्षे बहुवचनार्थं वचनम् ।

द्वौ चास्मदोऽविशेषणे ॥१।३।९५॥ अस्मदो द्वावेकश्चार्थौ बहुवद्भवति वा अविशेषणे न चेत् तस्य विशेषणं प्रयुज्यते । अहं ब्रवीमि । आवा ब्रूवः । वयं ब्रूमः । अविशेषण इति किम् ? अह देवदत्तो ब्रवीमि । अहं गार्ग्यो ब्रवीमि । अहं पण्डितो ब्रवीमि । सविशेषणे प्रतिषेधार्थं वचनम् । एकानेकस्वभावस्यात्मनोऽनेकस्वभाव-विवक्षाया सिद्धं बहुवचनम् । अत एवान्ययुष्मदोरपि गुरौ बहुवचनं प्रयुज्यते । भवन्तो ब्रुवन्ति । यूयं ब्रूथ । इह भवन्तस्त्वाहुरिति ।

फल्गुनीप्रोष्ठपदस्य नक्षत्रम् ॥१।३।९६॥ फल्गुनीशब्दस्य प्रोष्ठपदशब्दस्य च द्वौ नक्षत्रशब्दवाच्यावर्थौ बहुवद्भवतो वा । कदा पूर्वौ फल्गुन्यौ, कदा पूर्वाः फल्गुन्यः । कदा पूर्वे प्रोष्ठपदे, कदा पूर्वाः प्रोष्ठपदाः । उदिते पूर्वे फल्गुन्यौ, उदिताः पूर्वाः फल्गुन्यः । उदिते पूर्वा(र्वे)प्रोष्ठपदे, उदिताः पूर्वाः प्रोष्ठपदाः । नक्षत्रमिति किम् ? फल्गुनीषु जाते फल्गुन्यौ माणविके । द्वाविति किम् ? एकस्मिन् ज्योतिषि मा भूत् । पञ्चाला जनपदः । गोदौ ग्रामः । खलतिकं वनानि । हरीतक्यः फलानि । पञ्चाला मधुरे । पञ्चापिरूपो[9] मनुष्यः । आपो गृहा वर्षा इति सर्वलिङ्गसंख्ये वस्तुनि स्याद्वादमनुपतति मुख्योपचारितार्थानुपातिनि च शब्दात्मनि रूढित-स्तत्तल्लिङ्गसंख्योपादानव्यवस्थाऽनुसर्तव्या ।

अव्ययात् स्वौजस् ॥१।३।९७॥ अव्ययात् सु औ जस् इत्येते प्रत्यया भवन्ति । अथो स्वस्ते[11] गृहम् । अथो स्वस्तव गृहम् । अथो उच्चैर्मे गृहम् । अथो उच्चैर्मम गृहम् । पदात् प्रथमाया वेति विकल्पः । औ-जस्ग्रहणमुत्तरार्थम् । सु–इत्युकारोऽग्रहे उच्चारणार्थः । जसो जकारः संहितापाठे औकारस्यासंदेहार्थः ।

---

१. योगशब्दः संबन्धसामान्यवाची तेन समवायः संयोगोऽप्याक्षिप्तः (गुणगुणिनोः समवायः । द्रव्ययोरेव संयोगः) क०, म०, टि० । २. तत्सर्वमि– क०, म० । ३. उपलो वा म० । ४. जातिर्नामा-यमेकार्थादभिधाने एकवचनमेव प्राप्तम्, अत इदमुच्यते क०, म०, टि० । ५. जातिवचनेन व्यक्ति-रप्यभिधीयते जातिव्यक्त्योस्तादात्म्यादनुभवात्, इति बहुभावोक्ते क०, म०, टि० । ६. अजातिशब्दानां संपन्नादीनाम् क०, म०, टि० । ७. अभिधीय इत इति । क० । ८. पञ्चालमधुरः क०, म० । ९. पञ्चालरूपो मनुष्यः क०, म० । १०. –पचरिता–क०, म० । ११. ते अथावेकस्मे पदात्प्रथमाया वा । क०, म०, टि० ।

एकद्विबहौ ॥१।३।९८॥ एकत्वादिसंख्येऽर्थे वर्तमानात् शब्दरूपाद् यथासंख्यमेक-द्वि-बहुषु सु औ जस् इत्येते प्रत्यया भवन्ति। दृषद्, दृषदौ, दृषदः। एक-द्वि-बह्वित्ययमधिकारः, तां तां ज्ञ यासार्थां ष्यमिस्वड्हिमड्हिड्स्यातड्विधानात्।

आमन्त्र्ये ॥१।३।९९॥ प्रसिद्धतत्संबन्धस्य क्रियाव्याख्यातुमभिमुखीकरणमामन्त्रणम्। आमन्त्र्यमाणेऽर्थे वर्तमानात् शब्दरूपात् एक-द्वि-बहुषु सु औ जस् इत्येते प्रत्यया भवन्ति। हे देवदत्त। हे देवदत्तौ। हे देवदत्ता.। षष्ठीप्राप्तौ वचनम्।

हाधिक्समयानिकषोपर्युपर्यध्यधोऽधोऽत्यन्तरान्तरेण तस्यर्यभिसर्वोभयैश्चाप्रधाने-ऽमौट्शस् ॥१।३।१००॥ परार्थमप्रधानं हा धिक् समया निकषा उपर्युपरि अध्यधि अधोधस् अति अन्तरा अन्तरेण इत्येतैः तसन्तैश्च परि अभि सर्व उभय इत्येतैरव्ययैर्योगेऽप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) एकद्विबहुषु अम् औट् शस् इत्येते प्रत्यया भवन्ति। हा देवदत्तं वर्धते व्याधि.। धिक् देवदत्तमयशः प्रवृद्धम्। समया पर्वतं नदी। निकषा पर्वतं वनम्। उपर्युपरि ग्रामं ग्रामाः। अध्यधि ग्रामं ग्रामाः। अधोधो ग्रामं ग्रामाः। अतिवृद्धं तु कुरून् महद्बलम्। अन्तरा निषधं नीलं च विदेहा.। अन्तरेण निषधं नीलं च विदेहा.। अन्तरेण पुरुष-कारं न किंचित्। परितो ग्राम वनानि। अभितो ग्रामं वनानि। सर्वतो ग्रामं वनानि। अप्रधान इति किम्? प्रधाने न भवति–हा तात धिङ् मातरित्यादौ च तातादेरामन्त्र्यतया विवक्षा न हादि युक्तत्वेनेति न भवति। हा कृतं देवदत्तस्य। धिक् कृतं देवदत्तस्येत्यत्र च हादे कृते न्यग्भूतस्य न स्वयं योग। कस्य तर्हि? तद्विशिष्टस्य कृतस्य। हादिभि. साहचर्यादन्तरान्तरेण शब्दो स्वरादी गृह्यते। तेनेह न भवति राजधान्या अन्तराया पुरि वससि। किं ते वाऽत्र शालङ्कायनानामन्तरेण गतेन। चकारोऽनुक्तसमुच्चयार्थ.। तेन–बुभुक्षितं न प्रतिभाति किंचित्। वृणोष्व भद्रे प्रतिभाति यत् त्वाम्। योऽक्षपादमृषि न्यायः प्रत्यभाद्वदता वरमित्यत्रापि भवति। औट-ष्टकार. सुडिति प्रत्याहारार्थ.। शसः शकारष्टकारौ स्यासन्देहार्थः।

वीप्स्यलक्षणेत्थंभवनेष्वभिना ॥१।३।१०१॥ अवयवश.[10] समुदायस्य क्रियादिना[11] साकल्येन प्राप्तीच्छा वीप्सा, तत्कर्म वीप्स्यम्। लक्ष्यते (दृश्यते) दर्श्यते येन तल्लक्षणं चिह्नम् केनचिद्विवक्षितेन विशेषेण[12] भाव इत्थंभावस्तद्विषय इत्थंभवनम्। एतस्मिन्नभीत्यनेन युक्तेऽप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) एक-द्वि-बहुषु अम् औट् शस् इत्येते प्रत्यया भवन्ति। वृक्षं वृक्षमभिसिच्यते। वृक्षं[13] वृक्षमभि विद्योतते विद्युत्।

---

१. धातुसुबन्तवाक्येभ्य एकत्वादिसंख्या क०, म०, टि०। २. आमन्त्र्यपदं क्रियाया विशेषणं भवति क०, म०, टि०। ३. अजाभ्यहमिति तत्र क्रियाप्रधानेऽप्रधाने—इति वर्तमाने कर्मोक्तामिति षष्ठीत्यादिसंबन्धः क०, म०, टि०। ४. प्रधानमुपकार्यम्, यदर्थमन्यदुपादीयते ततोऽन्यत्तस्योपकारकम्—यत्तदर्थं तद्विशेषणम् तत्प्रधानम् म०, टि०। ५. निषधनीलयोरन्तरा विदेहा इत्यर्थः। अत्र हि निषधनीलयोर्विदेहेनाभिसंबन्धः। नान्तरेत्यनेनेति। एवं व्यपेक्षा-ऽव्यपेक्षादिरूपेण धर्मं श्रित: पश्य धर्मं श्रित इत्यादि क०, म०, टि०। ६. पर्यभिसर्वोभये—इति तस् क०, म०, टि०। ७. अङ्ग्यादिति तस् क०, म०, टि०। ८. सुडित्युक्ते सोकाटष्टकारेण ग्रहणम्। आहोस्वित् तृतीयैकवचनेन इता टकारेणेति सन्देहे सति व्याप्तिप्रत्यासत्त्योः प्रत्यासत्तिर्गरी-यसीति न्यायेन सन्देहपरिहारः क०, म०, टि०। ९. अभि परि प्रति अनु उप इत्येतेषां कर्मप्रव-चनीयसंज्ञा। तत्कथमिति चेत् लक्षणवीप्सेत्थंभूतेऽभिभागे च परिप्रती—अनुलेपसहार्थे च हीने चोपश्च कथ्यते कर्मप्रवचनीयैश्च कर्मप्रवचनीययोगे लिङ्गाद् द्वितीया भवतीत्युक्तत्वात् इति कालम्भट्टी क०, म०, टि०। १०. संख्यैकाद् वीप्सायामिति शस् क०, म०, टि०। ११. आदिशब्देन जातिगुणद्रव्य-स्वरूपपरिग्रहः क०, म०, टि०। १२. विशेषणभावः, म०। १३. वृक्षमभि विद्योतते विद्युत्। क०, म०।

साधुर्देवदत्तो मातरमभि । एतेष्विति किम् ? यदत्र ममाभि स्यात्तद्दीयताम् । अत्राभिना भागसंबन्धो द्योत्यते योऽत्र मम भागः स्यादित्यर्थः । बहुवचनं यथासंख्यात्[1]भावार्थम् ।

भागिनि च प्रतिपर्यनुभिः ॥१।३।१०२॥ स्वीक्रियमाणोंऽशो भागस्तदीश्वरो भागी । वीप्स्यलक्षणेत्थंभवनेषु भागिनि च प्रति परि अनु इत्येतैर्युक्तेऽप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) एकद्विबहुषु अम्औट्शसो भवन्ति । वीप्सायें—वृक्षं वृक्षं प्रति सिञ्चति । वृक्षं वृक्षं परि । वृक्षं वृक्षमनु । लक्षणे—वृक्षं प्रति विद्योतते । वृक्ष परि । वृक्षमनु । इत्थंभवने—साधुर्देवदत्तो मातरं प्रति । मातरं परि । मातरमनु । भागिनि—यदत्र मा प्रति स्यात् । मा परि । मामनु । तद्दीयताम् । एतेष्विति किम् ? अनु वनस्याशनिर्गता समीप इत्यर्थः ।

टार्थेऽनुना ॥१।३।१०३॥ हेत्वादिष्टार्थस्तस्मिन्ननु इत्यनेन योगेऽप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) एकद्विबहुषु अम्औट्शसो भवन्ति । वृषभस्य प्रव्रज्यामनु प्राव्रजन् राजानः । शान्तिपट्टकप्रसारणमनु प्रावर्षत् पर्जन्यः । तेन हेतुनेत्यर्थ । नदीमन्वावसिता[2] सेना । पर्वतमन्वावसिता सेना । तेन सहावबद्धा कृतान्ता वेत्यर्थ. । तृतीयार्थवादो योगः ।

उत्कृष्टेऽनूपेन ॥१।३।१०४॥ अनु उप इत्येताभ्यां युक्तेऽप्रधानेऽर्थे उत्कृष्टेऽधिकेऽर्थे वर्तमानात् (शब्दरूपात्) एकद्विबहुषु अम्औट्शसो भवन्ति । अनु शाकटायनं वैयाकरणाः । अनु सिद्धनन्दिनं संग्रहीतार. । उपमर्वगुप्त व्याख्यातार. । उपविशेषवादिनं कवय । तस्माद्धीना इत्यर्थ. ।

कर्मणि ॥१।३।१०५॥ क्रियते इति कर्म निर्वर्त्य[4] विकार्य[5] प्राप्यं च तस्मिन्नप्रधानेऽर्थे[6] वर्तमानात् (शब्दरूपात्) एकद्विबहुषु अम्औट्शसो भवन्ति । कुम्भं करोति । शर लुनाति । आदित्यं पश्यति । अहि लङ्घयति । वने व्याघ्रं पश्यति । ग्राम गच्छन् वृक्षमूलान्युपसर्पति । अजा[8] नयति ग्रामम् । भारं वहति ग्रामम् । गा[9] दोग्धि पय. । देवदत्त गा याचते इत्यादौ गवादेरवपीडनादिक्रियाप्यत्र विवक्षाया प्राप्यते[10] इति कर्मत्वम् । प्राप्यमपि हि तत्क्रिया युक्तं क्रियते । गो· पयो दोग्ध्यपाययतीत्यपायादिविवक्षाया तु यथायोगं पञ्चम्यादयो भवन्ति । क्रियते कट· । कृतः कटः । शतेन क्रीतः शत्यः । प्राप्तमुदकं यं स. प्राप्तोदको ग्रामः इत्यत्राभिहितेऽभि[11]धेयाभावादप्रधानाधिकाराच्च[12] न भवति[13] । अभिहितं च प्रधानम्—कटं करोति भीष्ममुदारं दर्शनीयमित्यत्र[14] सत्यपि कटाद्यैक्ये प्रतिशब्दमर्थभेद इति भवति कटः कृतो भीष्म उदारो दर्शनीय इत्यत्र करोति कर्ममात्रा[15]भिधानान्न भवति । अप्रधान इति पर्युदास इति अजां नयति ग्राममित्यजादौ ग्रामाद्यपेक्षया प्रधानेऽपि नयत्याद्यपेक्षयाऽप्रधानोपपत्तेर्भवति ।

---

१. यथासंख्याभावार्थम् । क० म० । २. भावे लकारः । क० म० टि० । ३. अवसिता बीङ् बन्धने इत्यस्य अवबद्धेत्यर्थः । अथवा षोऽन्तकर्मणि इत्यस्य धातोः कृतान्ता इत्यर्थः । क० म० टि० । ४. कर्तरि करणे वा तृतीया । क० म० टि० । ५. कर्मणीति नेदं स्वरूपग्रहणम्—अशब्दसंज्ञेति प्रतिषेधात् । यदि कर्मप्रदेशे स्वरूपमेव गृह्येत (तर्हि) संज्ञाविधानमनर्थकं स्यात् । क० म० टि० । ६. यद्विवर्त्यते यत्प्रागसदवस्थं सत् प्रादुर्भाव्यते । तद्विवर्त्यम्, क० म० टि० । ७. पुनस्त्रिविधं कर्म भवति । इष्टमनिष्टमिष्टानिष्टं चेति, क० म० टि० । ८. –ज्ञानार्थ ब– क० म० टि० । ९. अकथितं कर्म, क० म० टि० । १०. प्राप्यतेतिकर्म– क० म० । ११. उक्ते क० म० टि० । १२. कर्मरूपाभिधेयाभावात्, क० म० टि० । १३. कृत्तद्धितसमासैरभिहितं कर्म । कर्मणि चाभिधेये द्वितीया । न चात्रि हेते अस्तित्व अभिधेयमस्तीति–अर्थे मात्राद् द्वितीया न सवति । क० म० टि० । १४. दर्शयतीत्यत्र, क० म० । १५. पुनस्कृत्कर्म द्विविधं भवति । गुणमुख्यभावेन कर्मान्तरापेक्ष गुणत्वम् अप्रधानाधिकारात् । महीत्यादि । क० म० टि० । (प्रधाने) क० अ० टि० । (द्वितीयेत्यर्थः । तथैव कर्मणोऽभिहितत्वे सति द्वितीयासम्भवात्) क० म० टि० ।

दिवः करणे वा ॥१।३।१०६॥ येन कर्ता करोति तत्प्रकृष्यमाणव्यापारं कारकं करणम्, दीव्यत्यर्थस्य यत्करणं कारकमप्रधानं तस्मिन्नमोट्शसो भवन्ति वा। अक्षान्[1] दीव्यति। [2]शलाका दीव्यति। अक्षैर्दीव्यति। शलाकाभिर्दीव्यति। दिव इति किम्? दात्रेण लुनाति। करण इति किम्? गृहे दीव्यति। परत्वात् तृतीयाया बाधा मा भूदिति द्वितीयाभि[3]धानम्।

कर्म च ॥१।३।१०७॥ दीव्यतेर्यत्करणं तत्कर्म च करण च भवति तदेकं कारकं यथायोगं तदुभयकार्याणि भजतीत्यर्थ। अक्षाणा [4]देवनम्—अत्र कर्मत्वे परत्वात्[5] करणतृतीया कर्मलक्षणा[6] षष्ठी बाधित्वा भवति। देवना[7] अक्षा, अत्र करणलक्षणोऽनट्। अक्षैर्देवयते देवदत्तो गुरुदत्तेन, अत्र करणत्वात् तृतीया, कर्मत्वाच्च प्रयोज्यस्य[8] कर्मत्वं[9] तत्प्रतिषेधश्च[10] न भवन। अक्षैर्द्यूतं देवदत्तेनेत्यत्र दिवः सकर्मकत्वे निवृत्तोऽक्षद्यूतादेरिति ज्ञापकाद्भावे क्त। चकारः समावेशार्थ।

न विनिमेयद्यूतपणम् ॥१।३।१०८॥ विनिमेयं—क्रयविक्रेयं द्यूतपणं—द्यूतजेयं तदुभयं दिवेः प्राप्यं कर्म न भवति। कर्म कार्यं न करोतीत्यर्थ। शतस्य[11] दीव्यति। सहस्रस्य दीव्यति। क्रये विक्रये द्यूतस्य पणत्वे वा तन्नियुङ्क्त इत्यर्थ। कर्मत्वाभावे [12]षष्ठी—शतस्य दीव्यते। शतस्य द्यूतम्। शतस्य देवितव्यम्। शतस्य सुदेवम्। [13]भावे लक्तव्यप्लार्था। शतस्य द्यूतो देवदत्त, कर्तरि क्त.। विनिमेयद्यूतपणमिति किम्? देवान् दीव्यति, स्तौतीत्यर्थः। द्यूतग्रहणं किम्? भूमि दीव्यति, सन्धिना विजिगीषत इत्यर्थ। सन्धिपणस्य प्रतिषेधो न[14] भवति। पणग्रहणं किम्? द्यूतं दीव्यति। अक्षान् दीव्यति।

वोपसर्गात् ॥१।३।१०९॥ उपसर्गात् परस्य दिवेः प्राप्यं यद् विनिमेयं द्यूतपणं च तद्विकल्पेन कर्म न भवति। पूर्वेण प्रतिषेधे पक्षे कर्मकार्यं प्राप्यते। शतं प्रदीव्यति। शतस्य प्रदीव्यतीत्यादि।

पणव्यवहृोः ॥१।३।११०॥ पणतेर्व्यवपूर्वस्य च हरते प्राप्यं यद् विनिमेयं द्यूतपणं च तद्वा कर्म न भवति। शतस्य पणते, शतं पणते। शतस्य व्यवहरति, शतं व्यवहरतीत्यादि। विनिमेयद्यूतपणमिति किम्? साधूनपणायति, स्तौतीत्यर्थः। शलाका व्यवहरति। [15]विगणयन्[16] गोपायतीत्यर्थः।

स्मृत्यर्थदयीशां कर्म ॥१।३।१११॥ स्मरणार्थाना धातूनां दयतेरीष्टेश्च यत्कर्म तत्कर्म वा भवति। मातुः स्मरति, मातरं स्मरति। मातु. स्मर्यते, माता स्मर्यते। मातुः स्मर्तव्यम्, माता स्मर्तव्या। मातुः स्मृतम्, माता स्मृता। मातु सुस्मरम्, माता सुस्मरा[17]। माता स्मृता देवदत्तेन। मातुरध्येति, मातरमध्येति। सर्पिषो दयते, सर्पिर्दयते। लोकानामीष्टे, लोकानीष्टे। कर्मणः कर्मसम्बन्धीति च। सामान्यविशेषरूपाभ्यां स्वतो द्विधाऽवस्थितस्य द्विधेदमवस्थापनं नियमार्थम्। तेनैषां कारकान्तरं सामान्यरूपेण नोच्यते मात्रा स्मृतम्। मनसा स्मृतम्। अयत्नादिति [18]समासाभावार्थं च नेत्यनुवृत्त्या सिद्धे कर्मग्रहणमुत्तरार्थम्।

कृञः प्रतियत्ने ॥१।३।११२॥ पुनर्यत्नः प्रतियत्न। सतो गुणान्तराधानायापायपरिहाराय वा समीहा, तत्र वर्तमानस्य करोते कर्म कर्म वा भवति। एधो दकस्योपस्कुरुते, एधोदकमुपस्कुरुते। शस्त्रपत्रस्योपस्कुरुते, शस्त्रपत्रमुपस्कुरुते इत्यादि। प्रतियत्न इति किम्? कुम्भं करोति। नगरं करोति।

---

१. अक्षास्तु देवनाः पाशकाश्च ते, इत्यमरः क० म० टि०। २. द्यूतोपकरणं शलाका, क० म० टि०। ३. -धानविधानम्, क० म० टि०। ४. अत्र भावेऽनट्, क० म० टि०। ५. परसूत्रत्वात्, क० म० टि०। ६ कृत्कामुकस्येत्यादिना– क० म० टि०। ७. दीव्यन्त एभिरिति देवनाः, क० म० टि०। ८. देवदत्तस्य क० म० टि०। ९. नित्याकर्मेत्यादिना प्राप्तम्, क० म० टि०। १०. न प्राणिस्थणिग इत्यादिना प्राप्तो न भवति। दिव् धातोः सकर्मकत्वात्। क० म० टि०। तं प्रतिषेधश्च क० म०। ११. प्रतिदानं कृत्वा शतं स्वीकरोतीत्यर्थः। क० म० टि०। १२. अपवादविनिर्मुक्तोऽस्य विषयः। क० म० टि०। १३. साध्येनाप्येति क० म० टि०। १४. नास्ति, क० म०। १५. विगणयगोपा क० म० टि०। १६. नो क० म० टि०। १७. सुस्मरा मातुः स्मृतो देवदत्तः माता म०। १८. –मासोऽभावार्थश्च, क० म०।

रुजोऽज्वरिसन्ताप्योः कर्तरि भावे ॥१।३।११३॥ रुक्, रुजा, पीड़ा तस्याज्वरिसन्तापिभ्यामन्येनाभिधीयमानाया यत्कर्म तत्कर्म वा भवति कर्तरि भावे भावश्चेत् अस्या रुजः कर्ता भवति। चोरं रुजति रोगः[1], चोरस्य रुजति। चोरमामयति, चोरस्यामयतीत्यादि। रुज इति किम्? एति जीवन्तमानन्दः। अज्वरिसन्ताप्योरिति किम्? औदारिकं ज्वरयति। अत्याशिनं सन्तापयति। कर्तरीति किम्? देवदत्तं रजत्यत्यासने वातः। भाव इति किम्? देवदत्तं रुजति श्लेष्मा। अत्र कश्चित्—इह षष्ठी न भवति चोरं रुजति रोग इति। अन्यतिरेकेऽयं विधिरिष्यते। व्यतिरेकश्चात्र गम्यत इत्याह।

हिंसायां जासनाटक्राथपिषनिप्रभ्राम् ॥१।३।११४॥ जासेति जस हिंसाया जस तोडने, नाटेति नट अवस्पन्दने, चुरादौ गृह्यते, न जसू मोक्षणे, नट नृत्ताविस्यहिंसार्थत्वात्। क्राथेति स्नथ क्रथ वलय क्षण हिंसार्थाः, घटादि, पिष संचूर्णने—एषां नि प्र इत्येवंपूर्वस्य च हन्तेर्हिंसायाम्, वर्तमानानां यत्कर्म तत्कर्म वा भवति। चोरस्योज्जासयति, चोरमुज्जासयति। चोरस्योन्नाटयति, चोरमुन्नाटयति। चोरस्योत्क्राथयति, चोरमुत्क्राथयति। चोरस्य पिनष्टि, चोरं पिनष्टि। चोरस्य निहन्ति, चोरं निहन्ति। चोरस्य प्रहन्ति, चोरं प्रहन्ति। चोरस्य निप्रहन्ति, चोरं निप्रहन्ति। चोरस्य प्रणिहन्ति, चोरं प्रणिहन्ति इत्यादि। निप्रेति प्रयोगो नास्तीत्येके। बहुवचनं सम्भवि [2]सर्वभङ्गपरिग्रहार्थम्। निप्रेत्युपादानादिह न भवति चोरं हन्ति, चोरमाहन्ति। हिंसायामिति किम्? देवदत्तं बन्धनाज्जासयति, मोक्षयतीत्यर्थः। नटन्तं नाटयति, नर्तयतीत्यर्थ। रागादि निहन्ति, निवर्तयतीत्यर्थः। जासेत्याद्याकारनिर्देशो यत्रा[3] ··· यथा स्यादित्येवमर्थः। तेनेह न भवति दस्युमुदजीजसत्। दस्युमुदनीनटत्। दस्युमुदचीक्रथदिति। अत एव चोरस्योत्क्राथयतीति प्रतिषेधविषय आकारः। अभावार्थं[4] च वचनम्।

आशिषि नाथः ॥१।३।११५॥ नाथतेराशीरर्थे वर्तमानस्य यत्कर्म तत्कर्म वा भवति। सर्पिषो नाथते, सर्पिर्नाथते इत्यादि। सर्पिर्मे भूयादित्यादि (आ) शास्ते इत्यर्थः। आशिषीति किम्? माणवकमुपनाथति। अगपुत्रकादिष्विति याचत इत्यर्थ।

दृश्यभिवाद्योर्णस्तङि ॥१।३।११६॥ तङीति तातांक्षेति तकारादारभ्यामहिडो ङकारेण प्रत्याहारः। पश्यतेरभिवादयतेश्च यो णिस्तङ्विषये यत्र तङ्[5] भवति तस्य कर्मप्रयोज्य.[6] प्रकृतिः कर्ता कर्म वा भवति। पश्यन्ति भृत्याः राजानम्। दर्शयते भृत्यान् राजा भृत्यैरिति वा। अभिवदति[7] गुरुर्देवदत्तम्। तस्मिन्नाशिषं प्रयुङ्क्त इत्यर्थ। अभिवादयते गुरून् देवदत्तः, गुरुणेति वा। आत्मन्याशिषं प्रयोजयतीत्यर्थः। अथवा—अभिवदते[8] गुरून् देवदत्तः, तमन्यः प्रयुङ्क्ते—अभिवादयते गुरुं देवदत्तं जिनदत्तः, देवदत्तेनेति वा। तङिति विषयोपलक्षणात् तङभावेऽपि भवति। दर्शयमानो भृत्यान् राजा भृत्यैरिति वा। अभिवादयमानो गुरुं देवदत्तः, गुरुणेति वा। अथवा अभिवादयमानो गुरुं देवदत्तं जिनदत्तः देवदत्तेनेति वा। तङीति किम्? [9]दर्शयति कार्षापणं रूपतर्कम्[10]। अभिवादयति गुरुं देवदत्तः। अथवा अभिवादयति गुरु देवदत्तं जिनदत्तः। णेरिति किम्? दर्शयते कार्षापणं रूपतर्केण[11]। अभिवादयते गुरुं देवदत्तेन जिनदत्त इति। गुरुकार्षापणयोः प्रतिषेधो न भवति।

अकर्मकात् ॥१।३।११७॥ अविवक्षितकर्मकोऽकर्मकः, उत्तरत्र नित्यग्रहणात्, तस्मात् परो यो णिः तस्य कर्म कर्म वा भवति। पचति देवदत्तः, पाचयति देवदत्तम्, देवदत्तेन वा। लिखति देवदत्तः, लेखयति देवदत्तं, देवदत्तेन वा। गच्छति देवदत्तः, गमयति देवदत्तम्। देवदत्तमिति परत्वान्नित्य एव विधिः। किं

---

१. रोग इत्यस्य अकर्तरीति भावे घञ्, सोऽपि कर्ता, क० म० टि०। २. विकल्प क० म० टि०। ३. यत्रा इत्यनन्तरमष्टाक्षराणि खण्डितानि प्रायः— म० टि०। ४. अभावकर्तृकार्थम्, क० म० टि०। ५. अनात्मन्यनाध्याने, क० म० टि०। ६. व्यवस्तत्कर्मभूतः, परमप्रकृतेः कर्तृभूतः, क० म० टि०। ७. अभिवादयति, क० म०। ८. अभिवदति गुरुं देवदत्तः, क० म०। ९. अत्र दर्शयतीति न फलेशः कर्ता विवक्षितः, नापि प्रकृतकर्मणि, क० म० टि०। १०. सौवर्णिके रूपतर्के रूपतर्कश्च कथ्यते, इत्यजयः। क० म० टि०। ११. रूपं तर्कयतीति रूपतर्कः सौवर्णिकः, क० म० टि०।

करोतीति व्यापारमात्रविवक्षायामविवक्षितकर्मको भवति । [1]तङीति नास्तीति योगविभागः ।

नित्याकर्मणामिज्ञाद्यर्थशब्दकर्मदृशोऽखादिक्रन्दशब्दाय ह्वः ॥१।३।११८॥ वेति निवृत्तमकर्मकाद्वा वचनात् नित्यमकर्मकेभ्यो गमेर्जानातेरदेश्चार्थो येषां तेभ्यः शब्दकर्मभ्यः शब्दनक्रियेभ्यः [2]शब्दार्थेभ्यश्च दृश् [3]इत्येतस्माच्च धातोर्यो णिस्तस्य कर्म कर्म भवति खाद अद् क्रन्द शब्दाय ह्वा इत्येतान् वर्जयित्वा । [4]आमयति देवदत्तम् । शाययति देवदत्तम् । गम्यर्थः—गमयति [5]माणवकं ग्रामम् । यापयति माणवकं ग्रामम् । ज्ञार्थः—ज्ञापयति माणवकं धर्मम् । बोधयति माणवक धर्मम् । अद्यर्थ —भोजयति माणवकमोदनम् । आशयति माणवकमोदनम् । शब्दनक्रियेभ्यः—विलापयति देवदत्तं पुत्रम् । आभाषयति देवदत्तं गुरुम् । महतो [6]विभाषयति देवदत्तं गुरुदत्तः । [7]शब्दार्थेभ्यः—श्रावयति देवदत्त शास्त्रम् । विज्ञापयति देवदत्त वाक्यम् । उपलम्भयति देवदत्तं विद्याम् । दृश्—दर्शयति रूपतर्कं कार्षापणम् । एतेभ्य इति किम् ? पाचयत्योदनं देवदत्तेन । भेदयति काष्ठं जिनदत्तेन । नित्यग्रहणं पूर्वत्राविवक्षितकर्मपरिग्रहार्थम् । अन्यथा विभागो न ज्ञायेत । नित्याकर्मकाश्च कालाध्वभावदेशैः न सम्भवन्ति । तैः सर्वेषा सकर्मकत्वादित्यन्यकर्मणो वेदितव्या. । गम्यर्थो देशान्तरप्राप्तिर्गृह्यते (तेन) इह न भवति स्त्रिय गमयति देवदत्तेन । [8]अजा नयति ग्रामं देवदत्तेनेत्यत्र च नयतिर्हि प्रापणार्थो न प्राप्तिः । ज्ञार्थो ज्ञानसामान्यार्थो न विशेषार्थः, तथा च दृशिग्रहणं तेनेह न भवति प्रापयति देवदत्तोत्पलम् । स्पर्शयति गुरुदत्तेन वस्त्रम् । अखादिक्रन्दशब्दायह्व इति किम् ? खादयति पिण्डी देवदत्तेन । आदयति पिण्डी देवदत्तेन । क्रन्दयति देवदत्तेन । शब्दाययति देवदत्तेन । ह्वाययति देवदत्तेन । कर्मक्रियाकर्मणि त्रिविधा [10]वाप्य क्रियाप्यं तत्रेदं विध्यर्थं नियमार्थं वा प्रकरणम् । कर्मत्वाभावे च कर्ता स्वक्रिया कर्तृत्वेनाभिधायिष्यते ।

भक्षेर्हिंसायाम् ॥१।३।११९॥ भक्षयतेर्हिंसावृत्तेः परस्य णे. कर्म कर्म भवति । भक्षयन्ति बलिवर्दा. सस्यम् । [11]भक्षयति बलीवर्दान् सस्यम् । सस्ये प्रसवप्रयोहसमर्थे प्राणवियोगलक्षणा हिंसास्ति । तल्लक्षणे तद्वान् हिंसितो भवतीति हिंसावृत्ति । हिंसायामिति किम् ? भक्षयति पिण्डी देवदत्तेन । भक्षयति राजद्रव्यं नियुक्तेन । भक्षयति पुत्रान् गार्ग्यो । भक्षयतिरत्राक्रोशविषय. । अद्यर्थत्वात् पूर्वेण प्राप्ते नियमार्थं वचनम् ।

वहे प्रवेयम् ॥१।३।१२०॥ वहते परस्य णेर्यत्कर्म प्रवेयं यत्प्राजान्ति तत्कर्म भवति । वाहयति बलीवर्दान् भारं देवदत्तः । प्रवेयमिति किम् ? वाहयति भारं देवदत्तेन । प्राप्त्यर्थेऽकर्मके च वहो नियमार्थम् । प्रापणार्थे विध्यर्थं च वचनम् ।

हृकोर्वा ॥१।३।१२१॥ हरते करोतेश्च यो णिस्तस्य कर्म कर्म वा भवति । विहरति देशं देवदत्तः । विहारयति देशं देवदत्त देवदत्तेन वा । आहरत्योदनं देवदत्तः, आहारयत्योदनं देवदत्त, देवदत्तेन वा । हरति भारं देवदत्त., हारयति भार देवदत्तं, देवदत्तेन वा । विकुर्वते सैन्धवाः, विकारयति सैन्धवान्, सैन्धवैर्वा । विकुरुते स्वरान् क्रोष्टा, विकारयति स्वरान् क्रोष्टार, क्रोष्टुना वा । करोति घटं देवदत्तः, कारयति घटं देवदत्तं, देवदत्तेन वा । णेरिति किम् ? विकरोति पयो देवदत्तः । प्राप्ते चाप्राप्ते—उभयत्र विकल्पोऽयं वेदितव्यः ।

शीङ्स्थासोऽधेराधार. ॥१।३।१२२॥ अधिपूर्वाणा शीङ् स्था आम् इत्येतेषा य आधारः क्रियाश्रयस्य कर्तुं कर्मणो वा धारणात् तत्कर्म [12]भवति । ग्राममधिशेते । ग्रामोऽधिशयितः । ग्राममधितिष्ठति । ग्रामोऽधिष्ठितः । ग्राममध्यास्ते । ग्रामोऽध्यासितः । अधेरिति किम् ? ग्रामे शेते । पर्वते तिष्ठति । नद्यामास्ते ।

---

१. पूर्वसूत्रे तङ् भवितव्यम् । उत्तरसूत्रे तङ् नास्ति । क० म० टि० । २. शब्दाख्येभ्यश्च, क० म० । ३ इतेतस्माच्च क० म० (न प्राणिन्यन्निज्ञो णिजन्तस्य) क० म० टि० । ४. आस्ते देवदत्तः, क० म० टि० । ५. गच्छति माणवको ग्रामम्, गमयति माणवकं ग्रामं गुरु । कर्तृकर्म । क० म० टि० । ६. शिष्यम् क० म० टि० । ७. न केवलं यो महतो विभाषते शृणोति तस्मादपि यः स पापभाक् । क० म० टि० । ८. शब्दाख्येभ्यः क० म० । ९ नाययति क० म० । १०. त्रिधावाच्यक्रियाप्यं क० म० । ११. भक्षयति क० म० । १२. भवतीति कर्मवद्भावात् कर्मणीति द्वितीयेति शेषः (विशेषः क० टि०) म० टि० ।

आधार इति किम् ? ग्रामोऽधिशयितो देवदत्तेन । कर्ता न भवति । अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्तीति सिद्धं कर्मत्वम् । आधारबाधनार्थं वचनम् ।

वसोऽनूपाध्याङः ॥१।३।१२३॥ अनु उप अधि आङ् इत्येतत्पूर्वस्य वसतेर्य आधारस्तत्कर्म भवति । ग्राममनु वसति । ग्रामोऽनूषितः । ग्राममुपवसति । ग्राम उपोषितः । ग्राममधिवसति । ग्रामोऽध्युषितः । ग्राममावसति । ग्राम आषितः । अन्वादिसाहचर्यादुपेत्यस्य स्थानार्थ-मेव ग्रहणम्—नानशनार्थस्य, तेन ग्रामे उपवसति, भोजननिवृत्तिं करोतीत्यत्र न भवति ।

अभिनिविशश्च ॥१।३।१२४॥ अभि नीत्येतत्समुदायपूर्वस्य विशेराधारः कर्म भवति । ग्राममभिनिविशते । ग्रामोऽभिनिविश्यते । ग्रामोऽभिनिविष्टः । चकारः कर्म भवति न भवति चेति क्वचिदभावार्थः, तेन या या संज्ञा यस्मिन् यस्मिन् अभिनिविश्यते 'कल्याणेऽभिनिवेशः अर्थेऽभिनिविष्टा' इति सिद्धं भवति ।

कालाध्वभावदेशं वाऽकर्म चाकर्मकाणाम् ॥१।३।१२५॥ कालो मुहूर्तादिः, अध्वा गन्तव्यं क्षेत्रं क्रोशादि, भावः क्रिया गोदोहनादिः, देशो जनपद ग्रामनदीपर्वतादिः. सोऽयमाधारोऽकर्मकाणां वा कर्म भवत्यकर्म च । काल –माममास्ते, मास आस्यते । दिवस शेते, दिवस शय्यते । अध्वा–क्रोशं स्वपिति, क्रोशः सुप्यते । योजनं स्वपिति, योजनं सुप्यते । भाव —गोदोहमास्ते । ओदनपाक स्वपिति । गोदोहः शय्यते । ओदनपाकः स्थीयते । देश —कुरून् स्वपिति, कुरवः सुप्यन्ते । ग्राम वसति, ग्राम उष्यते । मासं पचति, मासः पच्यते । अहरधीतम्, रात्रिरधीता । पक्षे रात्रौ सुप्यते । रात्रौ नृतं च द्रक्ष्यसि । क्रोशे सुप्यते । गोदोह आस्ते । ओदनपाके स्वपिति । ग्रामे वासः । ग्रामे वासी । रात्रावधीतम् । दिवसे भुक्तम् । कालाध्वभावदेशमिति किम् ? प्रासाद आस्ते । शय्याया शेते । अकर्म चेति किम् ? मासमास्यते । क्रोशं सुप्यते । गोदोहमासित । इदं गोदोहमासितम् । गोदोहमास्यते । कुरून् सुप्यत इति । गत्यकर्मण्याधारे च साप्या नाप्याल्लक्तव्यप्यर्थात् कर्मभाव इति कर्त्रादौ भावे च भवति । अकर्मकाणामिति किम् ? रात्रावुद्देशोऽधीतः । अह्नघ्ययनमधीतम् । प्राकृतमेवैदं कर्मेति प्रतिपत्तावप्यकर्म चेति एवमर्थमिदं वक्तव्यम् ।

कालाध्वनोरत्यन्तसंयोगे ॥१।३।१२६॥ काले अध्वनि चाप्रधाने वर्तमानात् शब्दरूपात् व्याप्तौ स्वेन संबन्धिना द्रव्यादिनाऽत्यन्तसंयोगे द्योत्ये अम्औट्शसो भवन्ति । मासं गुडाऽपूपा । क्रोशं पर्वतः । मासं कल्याणी । क्रोशं कुटिला नदी । मासमधीते । क्रोशमधीते । कालाध्वनोरिति किम् ? स्थाल्या पचति । व्याप्ताविति किम् ? मासेऽधीते । मासस्याधीते । क्रोशेऽधीते । क्रोशस्याधीते । अत्राव्याप्तिः । षष्ठ्याः सप्तम्या वाऽयमपवादः ।

टाभ्यांभिस्स्वौ ॥१।३।१२७॥ सिद्धौ क्रियाफलनिष्पत्तौ द्योत्यायां कालवाचिनोऽध्ववाचिनश्च शब्दाद् व्याप्तौ एकद्वित्वबहुषु टा भ्यां भिस् इत्येते यथासङ्ख्यं प्रत्यया भवन्ति । मासेन प्राभृतमधीतम् । मासाभ्यां प्राभृतमधीतम् । मासैः प्राभृतमधीतम् । योजनेन प्राभृतमधीतम् । योजनाभ्यां प्राभृतमधीतम् । योजनैः प्राभृतमधीतम् । सिद्धाविति किम् ? मास प्राभृतमधीतम् । योजनं प्राभृतमधीतम् । अत्र व्याप्तिमात्रं गम्यते न सिद्धिः । टकारः पूर्वानुबन्धः । द्वितीयापवादो योगः ।

हेतुकर्तृकरणेत्थम्भूतलक्षणे ॥१।३।१२८॥ फलसाधनयोग्यः पदार्थो हेतुः । यः करोति स कर्ता । क्रियासिद्धौ स्वतन्त्रमगुणभूतं परैरप्रयोज्यं कारकं यद् व्यापारं धातुराह येन कर्ता करोति तत्करणं साधकतमं कारकम् । इमं कंचित् प्रकारमापन्न इत्थम्भूतः स लक्ष्यते येन तदित्थम्भूतलक्षणम्, एतस्मिन्नप्रधाने वर्तमानात् (शब्दरूपात्) एकद्वित्वबहुषु टा भ्यां भिस् इत्येते प्रत्यया भवन्ति । हेतौ—धनेन कुलम् । विद्यया यशः ।

---

१. कर्तृ, क० म० टि० । २. चाकर्मणाम्, क० म० । ३. गोदोहादिः, क० म० । ४. चतुर्विंशत्यङ्गुलानां हस्तो दण्डश्चतुष्करः । तत्सहस्रे तु गव्यूतं क्रोशस्तौ द्वौ तु गोरुतम् ॥ क० म० टि० । ५. गव्या गव्यूति गव्यूति चतुष्क्रोशं तु योजनम् । इत्यभिधानचिन्तामणिः क० म० टि० । ६ पूर्वप्रकृतिसिद्धम्, क० म० टि० । ७. अत्र द्रव्येण व्याप्तिः, क० म० टि० । ८. तयोर्गुणेन व्याप्तिः क० म० टि० ।

कन्यया शोकः (म्)। तीक्ष्णेन[1] परशुना छिनत्ति। कर्तरि—देवदत्तेन कृतम्। गुरुदत्तेन भुक्तम्। करणे—शस्त्रेण लुनाति। परशुना छिनत्ति। इत्थम्भूतलक्षणे—अपि भवान् कमण्डलुना छात्रमद्राक्षीत्। अपि भवान् अवदातेन वर्णेन कुमारमैक्षिष्ट। [2]छात्रत्वादिक प्रकारमापन्नस्य मनुष्यस्य कमण्डल्वादिलक्षणम्। इत्थम्भूतग्रहणं किम्? वृक्षं प्रति विद्योतनम्। अपि भवान् कमण्डलुपाणिं छात्रमद्राक्षीत्, इत्यत्र लक्ष्यप्रधानो निर्देशो न लक्षणप्रधान इति न भवति। इत्थम्भूतलक्षणं सहयोगादतिरिच्यत इत्युपादीयते समेन धावति। समेन पथा ग्रामं धावतीत्यर्थः। द्विद्रोणेन धान्यं क्रीणाति। द्विद्रोणेनार्धेन हिरण्येनेत्यर्थः। एवं पञ्चकेन पशून् क्रीणाति। सहस्रेणाश्वान् [3]इत्यादि तत्परिमाणेन वा [4]मूल्येनेत्यर्थः। क्रेयपरिमाणस्यापि क्रये [5]करणत्वमुपपद्यत एवेत्येषा करण एव तृतीया।

सहार्थेन ॥१।३।१२९॥ सहार्थस्तुल्ययोगो विद्यमानता च तेन युक्तेऽप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) एकद्विबहुषु टा भ्या भिसित्येते प्रत्यया भवन्ति। पुत्रेण सहागतः[6] पिता। पुत्रेण सह स्थूलः। पुत्रेण सह गोमान्। शिष्येण सह ब्राह्मण। तिलैः सह माषान् वपति। [7]सहैव दशभिः पुत्रैर्भारं वहति गर्दभो। अर्थग्रहणं किम्? पुत्रेण साकम्। पुत्रेण सत्रा। पुत्रेण युगपदागतः। पुत्रेणागतः वृद्धो यूना। अर्थग्रहणात् पर्यायप्रयोगेऽप्रयोगेऽप्यर्थसत्तायां भवति[8]।

यद्भेदैस्तद्वदाख्या ॥१।३।१३०॥ यस्य भेदेन प्रकारवतोऽर्थस्य[9] भेदैः[10] प्रकारैर्विशेषैस्तद्वतस्तत्प्रकारवदर्थकस्य[11] आख्या भवति ततः टा भ्या भिसित्येते प्रत्यया भवन्ति। अक्ष्णा काणः। हस्तेन कुणिः। पादेन खञ्जः। शिरसा खलतिः। प्रकृत्या दर्शनीयः। प्रायेण वैयाकरणः। काश्यपो गोत्रेण। ब्राह्मणो जात्या। यद्ग्रहण प्रकृतिनिर्देशार्थम् तत इत्याक्षेपात्। भेदग्रहणं किम्? यष्टीः प्रवेशय। कुन्तान् प्रवेशय। तद्वद्ग्रहण किम्? अक्षिकाणम्। आख्याग्रहणं प्रसिद्धिपरिग्रहार्थम्, (तेन) अक्ष्णा दीर्घ इति न भवति, अश्रुतक्रियाकल्पनया करणाद्विकल्पनाया यद्यपि तृतीया स्यात् (तथापि) तत्सम्बन्धे षष्ठी मा भूदित्यारम्भः।

काले भाद् वाऽऽधारे ॥१।३।१३१॥ काले वर्तमानात् नक्षत्रवाचिनः शब्दात् आधारे, एकत्वे द्वित्वे बहुत्वे च द्योत्ये टा भ्या भिसित्येते वा यथासङ्ख्यं प्रत्यया भवन्ति। पुष्येण पायसमश्नीयात्, पुष्ये पायसमश्नीयात्। मघाभि [12]पललौदनम्, मघासु पललौदनम्। काल इति किम्? पुष्ये चन्द्रमाः। मघासु ग्रहः। अध्वनिवृत्त्यर्थं कालग्रहणम्। भादिति किम्? तिलपुष्पेषु यत् क्षीरम्, तिलच्छेदेषु यद्दधि। काल इति सप्तम्या तन्निमित्तको यदाऽन्यत्र वर्तते तदा न भवति, (यथा) चित्रासु जाता चित्रा माणविका तस्या चित्रायामास्ते। आधार इति किम्? अद्य पुष्यं विद्धि। अद्य कृतिकाः। आधारस्य करणविवक्षाया तृतीया सिद्धयति, अस्ति चाधारस्य करणविवक्षा, यथा स्थाल्या[13] पचतीति तत् क्रियते सम्बन्धविवक्षाया षष्ठीबाधनार्थम्।

प्रसितोऽवबद्धोत्सुकै. ॥१।३।१३२॥ प्रसित अवबद्ध उत्सुक इत्येतैर्युक्ते आधारेऽप्रधाने वर्तमानात् शब्दात् टा भ्या भिसित्येते वा प्रत्यया भवन्ति। केशैः प्रसितः। केशेषु प्रसितः। प्रकर्षेण सितो बद्धः प्रसितः, नित्यप्रसक्त उच्यते। केशैरवबद्धः, केशेष्ववबद्धः। केशैरुत्सुकः, केशेषूत्सुकः।

समोऽस्मृतौ चाप्ये ॥१।३।१३३॥ सपूर्वस्य जानातेरस्मृतौ वर्तमानस्य [14]यदाप्यं कर्मेत्यर्थः, तत्र टा भ्या भिसित्येते प्रत्यया भवन्ति। मात्रा संजानीते। मातरं संजानीते। पित्रा संजानीते। पितरं संजानीते।

---

१. तैक्ष्ण्येन, क० म०। २. दात्रत्वादिकम्, क० म०। ३. श्वान् (शुनः) क्रीणाति—इति तत्परि— क० म०। ४. मूलेनेत्यर्थः, क० म०। ५. —रणतोपप— क० म०। ६. गतः पुत्रेण स— क० म०। ७. सत्तायाम् क० म० टि०। ८. तद्यथा—साकं स्तनाभ्यां जघनं महत्ते, सत्रा भ्रूभ्यामस्य नयने महती, युगपत्कराभ्यामस्याः केशा दीर्घाः, सार्धं जनैर्धनवान्, राजा पुत्रेणागतः, भार्यया वीक्षितः, बन्धुभिः स्वर्गं गतः, क० म० टि०। ९. अक्ष्यादेः, क० म० टि०। १० काणत्वादिभिः— क० म० टि०। ११ देवदत्तादेः, क० म० टि०। १२. 'पललं तिलचूर्णे स्यात्'। क० म० टि०। १३. वस्तुतस्तदनिर्देश्यं न हि वस्तुन्यवस्थितम्। स्थाल्यां पच्यत इत्येषा विवक्षा दृश्यते यतः॥ क० म० टि०। १४. —प्यं, प्राप्यं—क— क० म०।

सम इति किम् ? मातरं जानाति । पितरं [1]जानाति । ज्ञ इति किम् ? मातरं संवेत्ते । अस्मृताविति किम् ? मातरं संजानाति, मातुस्संजानाति । स्मरतीत्यर्थः । चकारो वेत्यस्यानुकर्षणार्थः । आप्य इति किम् ? मातरं स्वरेण संजानीते । करणे विकल्पो न भवति । मातुः संज्ञातेति कृति परत्वात् षष्ठी ।

दाणा धर्मे तङ् च देयैः ॥१।३।१३४॥ अधर्मरूपेऽर्थे वर्तमानेन समो दाण दान इत्यनेन योगे देयैर्दातव्यैराप्ये देयं यदा भवति (तदा) तत्राप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) टा भ्यां भिसिभ्येते प्रत्यया भवन्ति । तस्माच्च दाणस्तङ् भवति । दाम्या संप्रयच्छते । वृषल्या संप्रयच्छते । कामुकः सन् द्रव्यं दास्यै ददातीत्यर्थ. । दाणा[2] इति किम् ? दास्यै संदधाति । अधर्म इति किम् ? पत्न्यै संप्रयच्छति । चकारः संनियोग-[3]शिष्टार्थः । देयैरिति किम् ? द्रव्यं वृषल्या[4] संप्रयच्छते, द्रव्यान्न भवति । सम इति किम् ? दास्यै प्रयच्छति । इह समो[5] दाणः प्रेणाव्यवधानाभावात् सम इति षष्ठीविज्ञानाद् वा व्यवधानेऽपि भवति विशिष्टा एव तङः ताता क्षेत्यत्र वा योगविभागेन नियम इति [6]तङोऽस्थानिकत्वात् दास्या सप्रयच्छत इति, संप्रदानस्य करण-विवक्षाया सहयोगे वा तृतीया । व्यतिहृते तडिति योगानारम्भे नियमो दुर्ज्ञान इति वचनम् ।

ङे भ्यां भ्यस् ॥१।३।१३५॥ देयैराप्ये [7]ऽप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) एकद्विबहुषु यथाक्रमं ङे भ्यां भ्यसित्येते प्रत्यया भवन्ति । उपाध्यायाय गां ददाति । देवदत्ताय कन्या प्रयच्छति । राज्ञे दण्डं वितरति । गुरवे चीवरं प्रयच्छति । छात्राय चपेटां ददाति । देयैरिति किम् ? अजा[8]नयति ग्रामम् । आप्य इति किम् ? देवदत्तेन धनं दीयते । रजकस्य वस्त्रं ददाति । ध्वनतः पृष्ठं ददातीत्यत्र न [9]देयैराप्यतया रजकादिरुच्यत इति न भवति । डकारोऽन्योत्तरत्र चङिनो यादिति विशेषणार्थः ।

स्थानि वुणः ॥१।३।१३६॥ यस्यार्थ· प्रतीयते न च प्रयोगः[10] (सः) स्थानी क्रियायां तदर्थाया वुण्लूट् चेति क्रियाया तदर्थाया वुण् विहितस्तदन्तस्य स्थानिनो धातोराप्ये कर्मणि ङेभ्याम्यसो भवन्ति । उदकाय व्रजति । एधेभ्यो व्रजति । पाकाय व्रजति । भूतये व्रजति । स्थानीति किम् ? एधानाहर्तुं व्रजति । एधानाहारको व्रजति[11] । वुण इति किम् ? प्रविश पिण्डीम् । प्रविश [12]दर्पणम् । अत्र भक्षय [13]पिण्डीमिति लेडन्तः स्थानी । आप्य इति किम् ? एधेभ्यो व्रजति शकटेन । द्वितीयापवादो योगः ।

क्रुद्रुहेर्ष्यासूयार्थैर्यं प्रति कोपो न च कर्म ॥१।३।१३७॥ अमर्षः क्रोध. । अपचिकीर्षा द्रोहः । अक्षमा ईर्ष्या । गुणेषु दोषाविष्करणमसूया । एतदर्थैर्धातुभिर्योगे यं प्रति कोपो भवति तस्मिन्नप्रधाने वर्तमानात् ङेभ्याम्यसो भवन्ति न च तत्कर्म भवति[14] । देवदत्तायेर्ष्यति । देवदत्ताय ईर्ष्यति । देवदत्तायासूर्ष्यति । देवदत्तायासूयति । क्रुद्रुहेर्ष्यासूयार्थैरिति किम् ? [15]जारस्य द्विषन् । योऽस्मान् द्वेष्टि, यं च वयं द्विष्मः[16], निष्पिपिक्षाया वा । यं प्रतीति किम् ? मनसा [17]क्रुद्धयति । मनसा द्रुह्यति । नाप्य इत्यत्राकर्मके संभवति । प्रतिग्रहणं किम् ? न यस्मिन्नित्युच्यते[18] कर्तर्यपि स्यात् । देवदत्तेन क्रुद्धयते । कोप इति किम् ? धनिनो द्रुह्यति धनेच्छया । भार्या-मीर्ष्यति कार्येण । देवदत्तमसूयति लिप्सया । कर्मप्रतिषेधो भावादौ लाघ्यर्थ· । देवदत्तायेर्ष्यते[19] । देवदत्तायासूय्यते । देवदत्तायेर्ष्यितव्यम्[20] । जिनदत्तायासूयितव्यम् । देवदत्तायेर्षितम् । जिनदत्तायासूयितम् । देवदत्ताय दुरीर्ष्यम्[21] । जिनदत्ताय दुरसूयम् । देवदत्तायेर्षितो गुरुदत्तः । जिनदत्तायासूयितो गुरुदासः ।

---

१. –रं सुजा– क० म० । २. दाणेरिति कि– क० म० । ३. –ष्टतार्थः क० म० । ४. दास्यै क० म० टि० । ५. समादाण क० म० । ६. –ङो ऽस्थानिकत्वादि दा– क० म० । ७. अनिराकरणात् कर्तुः स्वाङ्गाङ्गं कर्मणेप्सितम् । प्रेरणाङ्गं मतिभ्यां वा लभते सम्प्रदानताम् ॥ क० म० टि० । ८. अजाञ्च–क० म० । ९. देवेभ्याप्य–क० म० । १०. -गः सः स्थानी क० म० । ११. –ति । पाकं कर्तुं व्रजति । पाकं कारको व्रजति । वु– क० म० । १२. –श तर्प– क० म० । १३. पिण्डेति क० म० । १४. –ति । जिन-दत्ताय क्रुध्यति । देवदत्ताय क्रुध्यति । देवदत्ताय द्रुह्यति । दे –क० म० । १५. किम् ? चोर– क० म० । १६. –ष्मः । द्विड्विरप्रीतौ नि– क० म० । १७. –'स्वबिम्बमाकोक्य विषक्षबुद्धया पुनर्विकुप्यन्ति च रत्नमित्रिषु ।' इति रावः । क० म० टि० । १८. –ख्येत, क– क० म० । १९. –सायैर्ष्य– क० म० । २०. –सायैर्षि–क० म० । २१. दूरीर्ष्यम्, क० म० टि० ।

क्रुद्रुहाशोपसर्गात् ॥१।३।१३८॥ उपसर्गात् परेण क्रुधिना द्रुहिणा च योगे यं प्रति कोपस्तस्मिन् ङेक्याम्यसो न भवन्ति । देवदत्तमभि क्रुद्धयति[1] । गुरुदत्तमभिद्रुह्यति । क्रुधिद्रुही सोपसर्गौ सकर्मकाविति द्वितीया । अकर्मका अपि धातव. सोपसर्गा. सकर्मका भवन्ति । उपसर्गादिति किम् ? देवदत्ताय क्रुद्धयति । देवदत्ताय द्रुह्यति ।

स्पृहेर्वा ॥१।३।१३९॥ स्पृहयतेर्वातिर्यद्दाप्यं प्राप्यं कर्म तस्मिन् वा ङेक्याम्यसित्येते प्रत्यया भवन्ति, तच्चाप्यं न कर्म भवति । पुष्पेभ्य स्पृहयति । पुष्पाणि स्पृहयति । आप्य इति किम् ? पुष्पेभ्य स्पृहयति मनसा । न च कर्मेति किम् ? पुष्पेभ्य. स्पृह्यते देवदत्तेन । पुष्पेभ्य स्पृहितो देवदत्त ।

मन्यस्याकाकादिषु यतोऽवज्ञा ॥१।३।१४०॥ यस्मादवज्ञाऽन्यस्य विज्ञायते तस्मिन्नकाकादिषु काकादिवर्जिते मन्यतेराप्ये कर्मणि ङे म्या म्यसित्येते वा प्रत्यया भवन्ति । न त्वा तृणाय मन्ये[2] । न त्वा वुसाय मन्ये । न त्वा वुस मन्ये । न त्वा लोष्टाय मन्ये । न त्वा लोष्टं मन्ये । न त्वा शुनं मन्ये । न त्वा श्वानं मन्ये । तृणाद्यपि न मन्ये । तृणादपि[3] निकृष्टं मन्ये । इत्यवजानाति । मन्यस्येति किम् ? न त्वा तृणं चिन्तयामि । यदनिर्देश· किम् ? न त्वा तृणं मन्ये । अकाकादिष्विति किम् ? न त्वा काकं मन्ये । न त्वा शुक मन्ये । न त्वा शृगालं मन्ये । यत इति किम् ? न त्वा तृणाय मन्ये । युष्मदो न भवति । अवज्ञेति किम् ? न त्वा कनकं मन्ये । ततोऽप्यधिकं मन्ये इति प्रशसा ।

भद्रायुष्यक्षेमसुखार्थहितार्थहितैराशिषि ॥१।३।१४१॥ भद्र आयुष्य क्षेम सुख अर्थ हित इत्येतदर्थहितशब्दैन च योगेऽप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) आशीर्विषये ङे म्या म्यसित्येते वा प्रत्यया भवन्ति । भद्रमस्तु जिनशासनाय[4] । भद्रमस्तु जिनशासनस्य[5] । कल्याणमस्तु जिनशासनाय । कल्याणमस्तु जिनशासनस्य । आयुष्यमस्तु देवदत्ताय । आयुष्यमस्तु देवदत्तस्य[6] । दीर्घमायुरस्तु देवदत्ताय । दीर्घमायुरस्तु देवदत्तस्य । चिरं जीवितमस्तु देवदत्ताय । चिरं जीवितमस्तु देवदत्तस्य[7] । क्षेमं भूयात् संघाय । क्षेमं भूयात् संघस्य । कुशलं भूयात् संघाय । कुशलं भूयात् संघस्य । निरामयं भूयात् सघाय । निरामयं भूयात् संघस्य[8] । सुख भवतात् प्रजाभ्य । सुख भवतात् प्रजानाम् । श[9] भवतात् प्रजाभ्य । शं भवतात् प्रजानाम् । शर्म भवतात् प्रजाभ्य· । शर्म भवतात् प्रजानाम्[10] । अर्थो जिनदत्ताय भूयात् । अर्थो जिनदत्तस्य भूयात् । प्रयोजनं जिनदत्ताय भूयात् । प्रयोजनं जिनदत्तस्य भूयात् । कार्यं जिनदत्ताय भूयात् । कार्यं जिनदत्तस्य भूयात् । हितार्थ—पथ्यं जिनदत्ताय भूयात् । पथ्य जिनदत्तस्य भूयात् । हित—हितं जिनदत्ताय भूयात् । हितं जिनदत्तस्य भूयात् । हित-शब्दग्रहणमाशिषि पक्षे षष्ठी प्रापणार्थम् । चतुर्थी तु शक्तार्थेत्यादीना विद्यत एव । हितार्थग्रहणं तु पर्यायार्थं स्यात् । आशिषीति किम् ? आयुष्यं देवदत्तस्य तप , तत्त्वाख्यानेन भवति ।

शक्तार्थवषड्नमःस्वस्तिस्वाहास्वधाहितैः ॥१।३।१४२॥ शक्तार्थैः वषट् नमस् स्वस्ति स्वाहा स्वधा हित इत्येतैश्च शब्दैर्योगेऽप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) ङे म्या म्यसित्येते प्रत्यया भवन्ति । शक्तो देवदत्तो जिनदत्ताय । शक्नोति जिनदत्तो देवदत्ताय । प्रभुर्जिनदत्तो देवदत्ताय । प्रभवति जिनदत्तो देवदत्ताय । अलं मल्लो मल्लाय । वषट्—वषडग्नये । नमस्—नमोऽर्हद्भ्य:[11] । स्वस्ति—स्वस्ति प्रजाभ्य: । स्वाहा—इन्द्राय

---

१. क्रियाविषयः कर्मवदक्रियया आप्यत्वे देवदत्तस्य देवदत्तं द्रुह्यति इति स्यात् । कोपे तं देवदत्तायेति । क० म० टि० । २ –म्ये । न त्वा तृणं मन्ये । न क० म० । ३. –णादेरपि क० म० । ४. 'शासनं दर्शनं शास्त्रमागमः पुरुषो मतम् ।' इति सुभूतिटीकै । क० म० टि० । ५. –स्य । भद्रमस्तु जिनशासनाय । भद्रमस्तु जिनशासनस्य । क– क० म० । ६. –स्य । क्षेम । क्षेमं क० म० । ७. –स्य । सुख । सुखं– क० म० । ८. 'दिष्टया ममुपजोषं वेत्थानन्दे' –इत्यमरः । क० म० टि० । ९. –नाम् । अर्थ । अर्थो– क० म० । १०. नारायणं नमस्कृत्येति उपपदविभक्तेः कारकविभक्तिर्बलीयसी इति द्वितीयैव । कथं नारायणाय नमस्कुर्याम् । स्वयम्भुवे नमस्कृत्येति ? आद्राद्य विग्राहगत इत्यादिवत् । इति वर्धमानीयवृत्तौ । "अनभ्यर्चनमःशब्दोऽप्यस्ति यत्तत्रमः किमः । किमपि शुश्रुम देवस्वाम्यस्त्वा-मन्तरेण नमसामवसानभूमिम् ॥" इति विदग्धचूडामणिः । क० म० टि० ।

स्वाहा[1]। स्वधा पितृभ्यः। हितम्—आतुराय हितम्। आमया विनेहितं स्वस्तिशब्दः क्षेमार्थः तद्योगे आशिष्यपि परत्वादनेन नित्यमेव भवति। तथा च तत्र हितग्रहणं स्वस्ति संघाय मा[2] भूत्। स्वस्ति प्रजाभ्यो भूयात्।

रुच्यर्थैकल्प्यर्थधारिभिः प्रेयविकारोत्तमर्णेषु ॥१।३।१४३॥ रुच्यर्थैः कल्प्यर्थैर्धारिणा च धातुना युक्तेऽप्रधाने यथाक्रमं प्रेये विकारे उत्तमर्णे च वर्तमानात् (शब्दरूपात्,) ङे भ्यां भ्यसित्येते प्रत्यया भवन्ति। रुच्यर्थैः प्रेयै.[3] प्रीयमाण इत्यर्थः। देवदत्ताय रोचते धर्मः। गुरुदत्ताय स्वदते मोदक.[4]। स्वाभिलाषं करोतीत्यर्थः। प्रेय इति किम्? देवदत्ताय रोचते मोदको माधुर्येण। सर्वेषामेतद्रोचते कथं वा तवेत्यत्र प्रतिभावेन[5] प्रेयस्-सम्बन्धमात्रविवक्षेति वा न भवति। कल्प्यर्थैर्विकारे। मूत्राय कल्पते यवागू। उच्चाराय संपद्यते यवान्नम्। श्लेष्मणे जायते दधि। तद्विकाररूपमापद्यत इत्यर्थः। विकार इति किम्? देवदत्तस्य संपद्यन्ते शाल्यः। अप्रधान इति किम्? मूत्रमिदं संपद्यते यवागूः। उच्चारोऽयं संपद्यते यवान्नम्। मूत्रं संपद्यते यवाग्वाः। अपाय-विवक्षाया पञ्चमी। धारिणोत्तमर्णे। देवदत्ताय शतं धारयति। जिनदत्ताय सहस्रं धारयति। उत्तमर्ण इति किम्? शतेन भवति ऋणेन उत्तमः। उत्तमर्णो धनिक उच्यते। अतएव निपातनात् पूर्वत्वम्।

प्रत्याङः श्रुवोऽभ्यर्थके ॥१।३।१४४॥ प्रति आङ् इत्येताभ्यां परेण श्रुणोतिना युक्तेऽप्रधाने-ऽभ्यर्थके वर्तमानात् (शब्दरूपात्) ङे भ्यां भ्यसित्येते प्रत्यया भवन्ति। देवदत्ताय[6] प्रतिशृणोति। गुरुदत्तायाशृणोति। अभ्युपगच्छ[7]तीत्यर्थः। प्रत्याङ इति किम्? देवदत्ताय गां प्रतिशृणोति। अभ्यर्थक इति किम्? देव-दत्ताय गां प्रतिशृणोति। देवदत्ताय गामाशृणोति। गवि मा भूत्।

प्रत्यनोर्गृणाख्यातरि ॥१।३।१४५॥ प्रति अनु इत्येताभ्यां परेण गृ शब्द इत्यनेन युक्तेऽप्रधान आख्यातरि अभ्यर्थके वर्तमानात् (शब्दरूपात्) ङे भ्यां भ्यसित्येते प्रत्यया भवन्ति। उपाध्यायाय प्रतिगृणाति। उपाध्यायायानुगृणाति। उपाध्यायेनोक्तमनुब्रवीति शंसन्तं वा तं प्रोत्साहयतीत्यर्थः। प्रत्यनोरिति किम्? उपाध्यायं गृणाति[8]। आख्यातरीति किम्? उपाध्यायाय मनसा प्रतिगृणाति। उपाध्यायाय मनसा अनुगृणाति। मनसि मा भूत्।

राधीक्ष्यो यद्दैवे ॥१।३।१४६॥ दैवं शुभाशुभमदृष्टं यत् सम्बन्धि दैवविषयायां क्रियायां राध्यति रीक्षतिश्च वर्तते तस्मिन् राधीक्षिभ्यां युक्तेऽप्रधाने वर्तमानात् (शब्दरूपात्) एकद्विबहुषु ङे भ्यां भ्यसित्येते प्रत्यया भवन्ति। देवदत्ताय राध्यति[9]। देवदत्तायेक्षते। तस्य दैवं निरूपयतीत्यर्थः। केषाञ्चित् राधीक्षावित्यर्थ-निर्देशस्ते राधयति, साधयति, पश्यति, जानीते इत्युदाहरन्ति। यद्ग्रहणं किम्। देवदत्तस्य शुभाशुभमीक्षते। शुभाशुभान्मा भूत्। देवदत्तात्तु योगाभावान्न भवति। दैवग्रहणं किम्? देवदत्तमीक्षते। केषाञ्चित् यस्मिन् विप्रकृष्य इति पाठः। ते लाभाय राध्यति। लाभायेक्षते। इत्यप्युदाहरन्ति।

उत्पातेन ज्ञाप्ये ॥१।३।१४७॥ उत्पातेन ज्ञाप्यमानेऽप्रधाने वर्तमानात् (शब्दरूपात्) ङेभ्यां-भ्यसो भवन्ति।

वाताय कपिला विद्युदातपायातिलोहिनी। पीता वर्षाय विज्ञेया दुर्भिक्षाय सिता भवेत्।

सा तं[10] ज्ञापयतीत्यर्थः। उत्पातेनेति किम्? देवदत्तस्येदं छत्रमायातम्। विद्धि देवदत्तम्।

श्लाघह्नुङ्स्थाशपां प्रयोज्ये ॥१।३।१४८॥ श्लाघ ह्नु ङ् स्था शप् इत्येतैर्युक्ते ज्ञाने प्रयोज्यो यो ज्ञाप्योऽर्थस्तस्मिन्नप्रधाने वर्तमानात् (शब्दरूपात्) ङेभ्यांभ्यसो भवन्ति। देवदत्ताय श्लाघते। देवदत्ताय ह्नुते। देवदत्ताय तिष्ठते। देवदत्ताय शपते। प्रयोज्य इति किम्? देवदत्तायात्मानं श्लाघते। देवदत्ताय

---

१. –हा। स्वधा। स्वधा। २. भूयात्, क० म० टि०। ३. –र्थैः प्रेये प्रीयमाण इ- क० म०। ४. –कः। तस्यानि- क० म०। ५. –भावेन क० म०। ६. प्रार्थनायां कर्ता सम्प्रदानम्– क० म० टि०। ७. पूर्वप्रार्थिर(च)ते अभ्युपगच्छतीत्यर्थः, क० म० टि०। ८. गृह्णाति, क०, म०। ९. मौहूर्तिकः, क० म० टि०। १०. तज्ज्ञाप– क० म०।

शतमपह्नुते ।[1] इत्यादौ मा भूत् । केचित् य(त्र)–आख्यायते तत्रेच्छन्ति तत्र प्रयोज्य इति न कर्तव्यम् ।

गह्लादिभिर्बहुलम् ॥१।३।१४९॥ गह्लादिभिर्धातुभिर्योगेऽप्रधाने वर्तमानात् (शब्दरूपात्) ङेभ्यांभ्यसो बहुलं भवन्ति । क्वचिन्नित्यम् । श्राद्धाय निगह्लते । युद्धाय सन्नह्यति । पत्ये शेते । देवदत्ताय कथयति । देवदत्तायोपदिशति । क्वचिन्न भवति । अन्यदेव भवति । मनसाऽपि निगह्लते ।[2] मनसा सन्नह्यति । क्वचित् विभाषा—देवदत्ताय धर्मं वूते । देवदत्ताय धर्मं शास्ति । देवदत्त धर्मं शास्ति । प्रणम्य शास्त्रे । प्रणम्य शास्तारम् ।

क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥

देवेभ्यश्च इत्यादिरस्यैव प्रपञ्चः । पशुना रुद्रं यजते[3] इति देवपूजाकर्मकरणयोर्यदा प्राप्ते एव द्वितीयातृतीये[4] पशुं रुद्राय ददातीति प्रतिपत्तावपि, अतो बाहुलकात् सिद्धिः ।

यदर्थम् ॥१।३।१५०॥ यत्प्रयोजनकं किंचिद् विवक्ष्यते तस्मिन्नप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) ङेभ्यांभ्यसो भवन्ति । रथाय दारु । कुण्डलाय हिरण्यम् । रन्धनाय स्थाली । अवहननाय उलूखलम् ।

परिक्रये करणे वा ॥१।३।१५१॥ वेतनादिना कियन्तं काले स्वीकारः परिक्रयः, तत्करणे (वर्तमानात् शब्दरूपात्) ङे भ्या भ्यसित्येते प्रत्यया वा भवन्ति । शताय परिक्रीणीते । शतेन परिक्रीणीते । सहस्राय परिक्रीणीते । सहस्रेण परिक्रीणीते । परिक्रय इति किम् ? शतेन क्रीणाति । करण इति किम् ? शताय परिक्रीतो मासम् । शतेन परिक्रयं करोति ।

ङसि भ्यां भ्यस् स्तोकाल्पकतिपयकृच्छ्राद्असत्त्वे ॥१।३।१५२॥ यतो द्रव्ये शब्दप्रवृत्तिः सपर्यायो गुणोऽसत्त्व तेनैव वा रूपेणाभिधीयमान द्रव्यादि तस्मिन् करणे स्तोक अल्प कतिपय कृच्छ्र इत्येतेभ्यः (शब्देभ्य) एकद्विबहुषु ङसि भ्या भ्यसित्येते प्रत्यया वा भवन्ति । स्तोकान्मुक्तः, स्तोकेन मुक्त. । अल्पान्मुक्तः । अल्पेन मुक्तः । कतिपयान्मुक्तः, कतिपयेन मुक्तः । कृच्छ्रान्मुक्तः, कृच्छ्रेण मुक्त. । असत्त्व इति किम् ? स्तोकेन विषेण हतः । अल्पेन शोधुना मत्त । कृच्छ्रेण भोजनेन निर्विण्णः । करण इति किम् ? क्रियाविशेषणे न भवति । स्तोक चलति । भ्या भ्यसित्युत्तरार्थमिह द्वित्वे बहुत्वे न सभवतः ।[5]

आरादर्थैः ॥१।३।१५३॥ आरादूदूरान्तिकयोः ।[6] तन्त्रेणोभयग्रहणं दूरार्थैरन्तिकार्थैश्च शब्दैर्युक्तादप्रधानात् (शब्दरूपात्) ङसि भ्या भ्यसित्येते प्रत्यया वा भवन्ति । दूरं ग्रामात्, दूरं ग्रामस्य, दूरं ग्रामाभ्याम्, दूरं ग्रामयो., दूरं ग्रामेभ्यः, दूर ग्रामाणाम् । विप्रकृष्टं ग्रामात्, विप्रकृष्टं ग्रामस्य । अन्तिकं ग्रामात्, अन्तिकं ग्रामस्य । अभ्याश ग्रामात्, अभ्याशं ग्रामस्य । आराच्छब्दयोगे दिक्छब्देत्यादिना नित्यमेव पञ्चमी भवति ।

हेतौ गुणेऽस्त्रियाम् ॥१।३।१५४॥ अस्त्रीलिङ्गे गुणे द्रव्याश्रिते[7] पर्यायहेतौ वर्तमानात् (शब्दरूपात्) वा ङसि भ्या भ्यसित्येते प्रत्यया भवन्ति । जाड्याद् बद्ध., जाड्येन बद्ध । पाण्डित्यान्मुक्त., पाण्डित्येन मुक्तः । मोहाद् बद्ध. ? मोहेन बद्ध । ज्ञानान्मुक्तः, ज्ञानेन मुक्त. । हेताविति किम् ? जाड्यस्यैतद्रूपम् । गुण इति किम् ? धनेन कुलम । अस्त्रियामिति किम् ? जडतया बद्धः । बुद्धया मुक्तः । प्रज्ञया मुक्त. । अस्त्यत्राग्निर्धूमात् । नास्त्यत्र घटोऽनुपलब्धे[8] । इत्यादौ नाग्न्यादेर्धूमादिर्हेतु. । कस्य तर्हि तज्ज्ञानस्य, तत्र प्रासादादप्रेक्षत इत्यादिवत् भवति ।

---

१. आत्मादौ, क० म० । २. गह्लते, क० म० । ३. कर्मसम्प्रदानयोः करणकर्मणि यजेः प्रयोगो भवतः, इति वर्द्धमानवृत्तौ सूत्रम् । क० म० टि० । ४ भवतः, क० म० टि० । ५. क्रियाविशेषणं नपुंसकं च स्तोकं पचति क्रियायाः साध्यत्वात्तद्विशेषणमपि तथा । तेन द्वितीया । असत्त्व कर्मः त्यर्थेऽपि तस्या नोक्तार्थत्वम् । तत्रौत्सर्गिकमेकवचनमनभिव्यक्तत्वाच्च नपुंसकत्वं न्यायसिद्धमिति वर्द्धमानीयवृत्तौ । क० म० टि० । ६. उपायेन– क० म० टि० । ७. पर्याये– क० म० । ८. नास्तीह क० म० ।

भ्रुणे ॥१।३।१५५॥ हेतौ भ्रुणेऽप्रधाने वर्तमानात् (शब्दरूपात्) तस्य इसि भ्यां भ्यसित्येते प्रत्यया भवन्ति । शताद् बद्धः । सहस्राद् बद्धः । हेताविति किम् ? शतेन बद्धः, शतेन बन्धितः । शतेन देवदत्तेन बन्धितः । कर्तरि प्रयोज्यप्रयोजके च तृतीया भवति, हेतुर्हि फलसाधनयोग्यः पदार्थः । कर्त्रादिभ्योऽन्यत्वेन [1]विवक्षिते योगविभागो नित्यार्थः ।

अपायेऽवधौ ॥१।३।१५६॥ अपायो विभागो विश्लेषस्तस्मिन् विषये निर्दिष्टे प्रतीयमाने वा योऽवधिरप्रधानं तस्मिन् (वर्तमानात् शब्दरूपात्) इसि भ्या भ्यसित्येते प्रत्यया भवन्ति । ग्रामावर्षति, ग्रामादागच्छति । पर्वतादवरोहति । [2]यवेभ्यो गां वारयति । [3]कूपादन्धं [4]प्रतिषेधति, निवर्तयतीत्यर्थः । कुसूलात् पचति, आगमात् शसति । ततो गृहीत्वेति प्रतीयते । बलाहकाद्विद्योतते ततो निस्सृत्य ज्योतिर्विद्योतते विद्योतमानं वा ततो [5]निर्वर्तीतीति । कुतो भवान् ? पाटलिपुत्रात् । कुतो भवानागच्छति ? पाटलिपुत्रादागच्छामीति । [6]गवीधूमतः [7]साङ्काश्यं चतुर्षु योजनेषु, ततो निस्सृत्य गतेषु भवतीति । [8]कार्तिक्याः [9]आग्रहायणी मासे । ततः प्रभृति मासे गते भवतीति । वृकेभ्यो बिभेति । दस्युभ्यस्त्रस्यति, चित्तसंक्षोभपूर्वकं ततो निवर्तत इति । बिभेतिहि भयपूर्विकाया निवृत्तौ वर्तते । चौरेभ्यस्त्रायते । दस्युभ्यो रक्षति । तदुपघातप्रकारेण ततो निवर्तयतीति । [10]शृङ्गाच्छरो जायते । बीजादङ्कुर उत्पद्यते । तस्मादात्मानं प्रतिलभमानो निस्सरतीति । हिमवतो गङ्गा प्रभवति । महाहिमवतो रोहितप्रभवति । तत्प्रथममुपलभ्यमाना ततो निस्सरतीति । [11]सन्ततत्वान्नात्यन्तायापक्रमः । [12]उपाध्यायादन्तर्धत्ते । उपाध्यायान्निलीयते । ततोऽदृश्यतयाऽपैतीति । अधर्माज्जुगुप्सते । अधर्मान्मीमांसते । अधर्माद्विरमति । धर्मात् प्रमाद्यति । धर्मान्मुह्यति । जुगुप्सादिपूर्वकं ततो भावेनापैतीति । भोजनात् पराजयते । अध्ययनात् पराभवति, भावेन ततो न्यूनीभूय [13]निवर्तत इति । माथुराः पाटलिपुत्रेभ्य आढ्यतराः । देवदत्ताज्जिनदत्तः पटुः । अयमस्मादधिकः । अयमस्मादूनः । माथुरादयः पाटलिपुत्रकादिभिराढ्यत्वादिना संसृष्टास्ततोऽतिशायनादिना धर्मेण विभक्ताः प्रतीयन्ते । विभागश्चापायः । अपायेऽवधिविवक्षायामेव । विवक्षान्तरे तु यथायोगं विभक्तयो भवन्ति । यवेषु गां वारयति । बलाहको विद्योतते । बलाहके विद्योतते । चौरेभ्यम् । चौरेभिभेति । चौराणां बिभेतीति । [14]शृङ्गं शरो जायते । अधर्मं जुगुप्सते । अधर्मेण जुगुप्सते । मौर्ख्येण प्रमाद्यति । भोजने पराजयते । शत्रून् पराजयते ।

आख्यातुर्युपयोगे ॥१।३।१५७॥ आख्याता प्रतिपादयिता, उपयोगो नियमपूर्वकं विद्याग्रहणम्, आख्यातरि वर्तमानात् (शब्दरूपात्) उपयोगे विषये इसि भ्या भ्यसित्येते प्रत्यया भवन्ति । उपाध्यायादधीते । उपाध्यायादागमयति । आचार्यच्छृणोति । आचार्यादधिगच्छति । आख्यातरीति किम् ? उपाध्यायाच्छास्त्रमागमयति । शास्त्रे न भवति । उपयोग इति किम् ? नटस्य शृणोति । ग्रन्थिकस्य शृणोति । अपायेऽवधावित्येव सिद्धे उपयोग इति वक्ष्यामीति सूत्रम् ।

आङ् ॥१।३।१५८॥ अवधाविति वर्तते । [15]आङ्योगेऽवधौ (वर्तमानात् शब्दरूपात्) इसि भ्यां भ्यसित्येते प्रत्यया भवन्ति । आपाटलिपुत्रात् वृष्टो देव । आगोदाभ्यां वृष्टो देवः । पाटलिपुत्रमवधीकृत्य तद्व्याप्त्या व्याप्य वा वृष्ट इत्यर्थः । आकुमारेभ्यो यशः शाकटायनस्य गतम् ।

---

१. विवक्ष्यते क० म० । २. यवान् रक्षति, गां वारयतीत्यर्थः, क० म० टि० । ३. ईप्सितं कर्मेदम् क० म० टि० । ४. धनरसमन्धं कूपं जलमसृतमित्यादि भट्टहलायुधः, क० म० टि० । ५. प्रतीयते—क० म० टि० । ६. गवेरीधुक् इत्ययं त्यो भवति, गम्यते गम्यते नानादिग्देशाभिजैरिति गवीधुका नगरी । अथवा गम्यते उपलभ्यते शरीरयात्रा अनेनेति गवीधुकं धान्यजातिः । उत्तरगवि विवक्षाऽस्ति, क० म० टि० । ७. पुरम् । अत्र योजनसंबन्धिगमनं संकाशस्य भावस्य लक्षणं भवतीति सप्तमी, क० म० टि० । ८. कार्तिकपौर्णमास्याः, क० म० टि० । ९. मार्गशीर्षपौर्णमासी, क० म० टि० । १०. अपृथग्भावेऽपि शृङ्गस्य शरजन्मन्यवधिभावो विवक्षितः, क० म० टि० । ११. अत्यर्थम् क० म० टि० । १२. अपायः, क० म० टि० । १३. मा क० म० टि० । १४. चौरेषु बिभेति म० । १५. अन्नाङ् मर्यादाभिविध्योः क० म० टि० ।

वर्ज्येऽपपरिणा ॥१।३।१५९॥ अप परि इत्येताभ्यां युक्ते वर्ज्येऽप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) ङसि भ्या भ्यसित्येते प्रत्यया भवन्ति । अप पाटलिपुत्राद् वृष्टो देवः । अप त्रिगर्तेभ्यो वृष्टो देवः । अप गोदाभ्यां वृष्टो देवः । परि पाटलिपुत्राद् वृष्टो देव. । परि गोदाभ्या वृष्टो देवः । परि त्रिगर्तेभ्यो वृष्टो देवः । त्रिगर्तान् वर्जयित्वा इत्यर्थः । वर्ज्ये इति किम् ? अपशब्दो देवदत्तस्य ।

प्रतिनिधिप्रतिदाने प्रतिना ॥१।३।१६०॥ प्रतिनिधौ प्रतिदाने च वर्तमानेन प्रतिना योगेऽप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) ङसि भ्यां भ्यसित्येते प्रत्यया भवन्ति । अत्र योगो यतः प्रतिनिधिर्यतश्च प्रतिदानं तस्य भवतीति ततो विधि । प्रद्युम्नो वासुदेवात् प्रति । वासुदेवस्य प्रतिनिधि —सदृश इत्यर्थ. । तिलेभ्यः प्रति माषान् प्रयच्छति । तिलान् गृहीत्वा माषान् ददातीत्यर्थः ।

स्थानिप्यकर्माधारे ॥१।३।१६१॥ स्था[1]निप्यादेशान्तेन युक्ते कर्मण्याधारे (वर्तमानात् शब्दरूपात्) ङसिभ्याभ्यसो भवन्ति । प्रासादात् प्रेक्षते । आसनात् प्रेक्षते । स्थानिग्रहणं किम् ? प्रासादमारुह्य प्रेक्षते । आसने उपविश्य प्रेक्षते ।[3] प्यग्रहणं किम् ? प्रविश पिण्डीम् । प्रविश तर्पणम् । वृक्षे शाखा । ग्रामे देवदत्त ।

दिक्छब्दान्यार्थारादबहिरितरैः ॥१।३।१६२॥ दिक्छब्दैरन्यार्थैरारादबहिष् इतर इत्येतैश्च शब्दैर्युक्तेऽप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) ङसि भ्या भ्यसित्येते प्रत्यया भवन्ति । दिक्शब्दः—प्रागग्रामात् । प्रत्यग् ग्रामात् । पूर्वो ग्रामात् । अपरो ग्रामात् ।[4] पूर्वो वसन्तात् । अपरो वसन्तात् । दिशि दृष्टाः शब्दा दिक्शब्दा इति । देशकालादिवृत्तावपि भवति—एतदर्थमेव च शब्दोपादानम् । अन्यथा हि दिग्वृत्तावेव स्यात् न कालादिवृत्तौ । स्यग्देवदत्तस्यावस्थित इति दिक्शब्दता नेति न भवति । अन्यार्थ.—अन्यो देवदत्तात् । भिन्नो देवदत्तात् । अर्थान्तरं देवदत्तात् । हिरुक् देवदत्तात् । आरात्—आराद् ग्रामात् । आरात् पर्वतात् । बहिष्—बहिर्ग्रामात् । बहिर्नगरात् । इतर—इतरो देवदत्तात्[5] । तस्य द्वितीय इत्यर्थः । उपलक्षितयोर्द्वयोरन्यतरवचन इतरशब्दो नान्यार्थ. । षष्ठ्यपवादोऽय योगः । आराच्छब्दस्य—आरादर्थैरिति विकल्पापवादः । जिनदत्तादन्योऽयम् । देव दत्तस्य छात्राणां पूर्वमामन्त्रयस्व, कायस्य पूर्वमित्यादौ प्रत्यासत्तेस्तत्सम्बन्धिकृतो योगो विज्ञायते इति न भवति ।

ङसोसाम् ॥१।३।१६३॥ अप्रधान इति वर्तते । अप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) एकद्विबहुषु यथासंख्यं ङस् ओस् आम् इत्येते प्रत्यया भवन्ति । अपवादविनिर्मुक्तोऽस्य विषय । स्वौजसेकद्विबहुवित्यस्यायमपवाद । आमन्त्र्य इत्यादि सर्वमप्यस्य राज्ञ. पुरुषः । पशो पाद. । देवदत्तस्य पुत्र. । चैत्रमैत्रयोर्माता । माषाणा राशि । वारोणा वीचयः । नटस्य शृणोति । ग्रन्थिकस्य शृणोति ।

स्तात्ता ॥१।३।१६४॥ स्तादिति परावरात् स्तात् इत्यारभ्य आ उपर्युपरिष्टात् इत्यतस्तकारेण प्रत्याहारः । स्तादित्येतत्प्रत्याहारगृहीतप्रत्ययान्तेन युक्तेऽप्रधाने वर्तमानात् (शब्दरूपात्) ङसोसाम् इत्येते प्रत्यया भवन्ति । परस्ताद् ग्रामस्य । अवरस्ताद् ग्रामस्य । दक्षिणतो ग्रामस्य । उत्तरतो ग्रामस्य । दक्षिणाद् ग्रामस्य । उत्तराद् ग्रामस्य । पश्चाद् ग्रामस्य । पुरो ग्रामस्य । पुरस्ताद् ग्रामस्य । उपरि ग्रामस्य । उपरिष्टाद् ग्रामस्य । षष्ठ्यपवादो योग ।

करणे ज्ञोऽज्ञाने ॥१।३।१६५॥ जानातेरज्ञानेऽर्थे वर्तमानस्य यत्करणं तस्मिन् (वर्तमानात् शब्दरूपात्) ङस् ओस् आम् इत्येते प्रत्यया भवन्ति । ज्ञानमवबोधः । सर्पिषो जानीते । मधुनो जानीते । सर्पिषा

---

१. इह अप परिवर्जने—क० म० टि० । २. यस्यार्थः प्रतीयते न च प्रयोगः स स्थानी—क० म० टि० । ३. अस्त्यत्राग्निर्धूमात् । नास्त्यत्र घटोऽनुपलब्धेः । धूममुपलभ्य अग्निरस्तीति प्रतिपत्तव्यम् । घटानुपलब्धिमुपलभ्य घटो नास्तीति प्रतिपत्तव्यम् । धूमादेर्हेतोः हेतौ वा पञ्चमी । चतुष्टयप्रपाद्वर्षात् हर्षादिति निर्देशात् । क० म० टि० । ४. पूर्वा क० म० । ५. इतरशब्दस्य अन्यार्थत्वात् सूत्रे इतरशब्दग्रहणमनर्थकम्—इत्याशङ्कायां व्याख्यानकारः परिहारमाह तस्येत्यादिना । क० म० टि० ।

करणभूतेन प्रवर्तते[1] इत्यर्थः । प्रवृत्तिरत्र जानातेरर्थे. । अथवा अज्ञानमिति विपर्ययज्ञानमुच्यते[2]—तत्र सर्पिषो रक्तः । प्रतिहतो वा तद्रूपेण सर्वं ज्ञेयं जानातीत्यर्थः । करण इति किम् ? तैलं सर्पिषो जानाति । अज्ञान इति किम् ? स्वरेण पुत्रं जानाति । तृतीयाबाधनार्थो योग. ।

कृत्कामुकस्यावुण्लक्षण्स्वार्थाव्ययैष्यद्गणैः कर्मकर्त्रोः ॥ १।३।१६६ ॥ वुणिति क्रियाया तदर्थायां वुण् लृट् चेति वुण्, लेति दशलकारा', क्तणिति क्तक्तवत्—इति क्तादारभ्य आ उकर्ण[3]ो णकारेण प्रत्याहारः । स्वार्थेति–दुःस्वीषतः कृच्छ्राकृच्छ्रे ख इति खः, अतोऽन' इत्यनश्च, अव्ययाः– क्त्वादयः, एष्यतीन्–गम्यादिर्वर्त्स्यतीति ऋणे इति णिन्, ध्यैयावश्यकादधमर्ण[6] इति—एतद्वर्जितो यः कृत्तद्धितस्य कामुकशब्दस्य च कर्मणि कर्तरि च (वर्तमानात् शब्दरूपात्)—एकद्विबहुषु यथासंख्यं डसोसामो भवन्ति । द्वितीयातृतीयापवादः । अपां स्रष्टा । पुरां भेत्ता । वर्षशतस्य पूरकः । पुत्रपौत्राणां दर्शकः । भवतः शायिका । भवतः आसिका । दास्याः कामुकः । कृत्कामुकस्येति किम् ? कृतपूर्वी कटम् । भुक्तपूर्वी ओदनम् । क्तणिति प्रतिषेधे प्राप्ते कामुका[7]दिग्रहणम् । वुणादिप्रतिषेधः किम् ? वुण्—एधानाहारको व्रजति । कटं कारको व्रजति । कट करिष्यन् । पटं हरिष्यन् । क्तण् क्तः[8]—कृतः कटो देवदत्तेन । कृतवतुः—कट कृतवान् देवदत्तः । शानः—लोकं पवमानः । नदमाध्मानः[9] । शतृ—अधीयन् पारायणम्, चौर द्विषन् । चौरस्य द्विषन्निति सम्बन्धविवक्षायाम् । तृ—वदिता[10] जनापवादान् । ष्णु—कन्यामलङ्करिष्णुः । ष्णुक्—रिपून् जिष्णु' । उः—ओदनं बुभुक्षुः । क्नु—मलं क्षिप्नुः । आर्—गुरून् बन्दारु. । रुः—धारुर्वत्सरो मातरम् । आलु—श्रद्धालुस्तत्त्वम् । इ—दधिश्चित्तम् । उकण्—ग्राममागामुक । स्वार्थ—सुकरः कटो भवता । सुज्ञानं तत्त्वं भवता । अव्यय—ओदनं भुक्त्वा—सक्तू[11]न् पायं पाय कटं कर्तुं गतः । एष्यतीन्[12]—ग्रामं गामी । ऋणेन्—शतं दायी । सहस्रं दायी । कारी मेसि कटम् । हारी मेसि भारम् । एष्यदृणग्रहणं किम् ? अवश्यंकारी कटकस्य[13] । कर्मकर्त्रोरिति किम् ? शस्त्रेण भेत्ता । साधु वक्ता । शोभनं पक्तेति क्रियाविशेषणं न कृदन्तक्रियायाः कर्म अपि तु सा क्रिया यस्यास्तस्या इति न भवति । केचित् क्रियाविशेषणात् प्रथमामेव मन्वते[14] ।

क्तस्य सदाधारे ॥१। ३ ।१६७॥ सति वर्तमाने य. क्तः मति-पूजार्थ-निच्छीत्यादिभ्यः क्त इति । आधारेऽधिकरणे च यः क्त गत्यकर्मण्याधारे चेति तदन्तस्य धातोः कर्मणि कर्तरि च (वर्तमानात् शब्दरूपात्) डसोसामो भवन्ति । सति क्तः—राज्ञां मतः[15] । राज्ञां पूजितः । कान्तो हरिश्चन्द्र इव प्रजानाम् । शीलितो देवदत्तेन । रक्षितो देवदत्तेनेति । भूतोऽयं क्तः । वर्तमानता प्रतीतिस्तु प्रकरणादिना । आधारे क्तः—इदमोदनस्य भुक्तम् । इद सक्तूनां पीतम् । इदमहेः सुप्तम् । इदमेषां भुक्तम् । इदमेषामासितम् । वाऽनाकस्य क्तेति विकल्पे क्तणिति प्रतिषेधे च प्राप्ते वचनम् ।

वाऽनाकस्य क्तक्त्यवद्विप्राप्तेः कर्तरि ॥१।३।१६८॥ ध्यबिति ध्यणितीत्यत. आरभ्यावदः सुपः क्यप् चेति क्यपः पकारेण प्रत्याहारः । द्वयोः कर्मकर्त्रो. षष्ठीप्राप्तिर्यस्य (कृतः) स द्विप्राप्तिः क्तः ध्यप् द्विप्राप्तिश्च यः कृत् निरनुबन्धा[16]ऽकाराकप्रत्ययवर्जितः तदन्तस्य कर्तरि (वर्तमानात् शब्दरूपात्)

---

१. यस्य सर्पिःप्रभिसङ्गाद् विना तेन भुजिक्रियायामभिलाषो भवति, तस्य भोजने प्रवृत्तिं प्रति सर्पी-रूपाय भावं प्रतिपद्य—क० म० टि० । २. सम्यग्ज्ञानकार्याकरणात् सर्पिषो जानीते । सर्पिषा मिथ्याज्ञान-गृहीतेन प्रवर्तते । भ्रान्तिज्ञाने सर्पिषोऽसतः करणत्वाभावात् । क० म० टि० । ३. उणो क० म० । ४. दुस्स्वीषतः । ५. -ध्यचाप-क० म० । ६. -काधमर्ण्यः क० म० । ७. -कग्रह- क० म० । ८. क्तेः म; तेः क० । ९. -ध्नो-क० म० टि० । १० -जनवादान् क० म० । ११. सक्त्वाम्पायं पायं–क० म० टि० । १२. एष्यदित्–क० म० । १३. कटस्य क० म० । १४. मन्वते– क० म० । १५. मतः पूजितसम्मते इति विश्वः क० म० टि० । १६. बन्धाकाराकप्रत्य– क० म० । गमेरिन्—इत्ययं स्मो भवति । गमिष्यति यास्यतीति । गामी-इति-औणादिकसूत्रम् । आडि णित् आडिवाचि गमेरित् णिच्च आगमिष्यतीति, आव्रजिष्यतीति, आगमिस्वपदार्थः इति औणादिकसूत्रम् ।

एकद्विबहुषु ङसोसामित्येते वा प्रत्यया भवन्ति । क्त—छात्रस्य हसितम् । छात्रेण हसितम् । मयूरस्य नृत्तम् । मयूरेण नृत्तम् । कोकिलस्य व्याहृतम् । कोकिलेन व्याहृतम् । ण्यप्—भवतः कार्यम्, भवता कार्यम् । भवतः कर्तव्यम्, भवता कर्तव्यम् । भवत. करणीयम्, भवता करणीयम् । भवतो जेयम्, भवता जेयम् । भवतः कृत्यम् भवता कृत्यम् । द्विप्राप्ते.—साधु खल्विदं शब्दानामनुशासनमाचार्यस्य आचार्येण वा । शोभनः सिद्धेर्विनिश्चयः शिवार्यस्य शिवार्येण वा । सङ्घो संग्रहाणा कृतिः । क्षमा श्रमणानां श्रमणैर्वा । अनाकस्येति किम् ? चिकीर्षा कटस्य देवदत्तस्य । भेदिका काष्ठानां देवदत्तस्य । द्विप्राप्तेरिति बहुव्रीहिविज्ञानं किम् ? आश्चर्यमोदनस्य च नाम पाकः अतिथिनां च प्रादुर्भावः । कर्तरीति किम् ? साधु खल्विदं शब्दानामनुशासनमाचार्येण । कर्मणि विकल्पो न भवति । अवृण्वतणित्येव—कृतः कटो देवदत्तेन । इदमेषां भुक्तमोदनस्य । नञ्भावे क्तो भ्यादिभ्य इति क्तः, तस्यैवाय विकल्पः । पूर्वेण नित्ये प्राप्ते विकल्पः ।

कर्मणि गुणे ॥१।३।१६६॥ वृणादिवर्जितस्य कृतो गुणकर्मणि (वर्तमानात् शब्दरूपात्) एकद्विबहुषु ङसोसामो वा भवन्ति । नेताश्वस्य स्नुघ्नस्य । नेताश्वस्य स्नुघ्नम् । कर्मणीति किम् ? भेदिका काष्ठाना देवदत्तस्य जिनदत्तस्य । गुण इति किम् ? नेताऽश्वस्य । कर्ता कटस्य । कर्मान्तरापेक्षं गुणत्वमप्रधानाधिकारात्—अतो द्विकर्मका इहोदाहरणम् । दुहि, याचि, रुधि, प्रच्छि भिक्षि, जि, ब्रू, हृ, शासि, चिञ्, जी, नी, कृञ्, कृषि, वहि, चोदि, दण्डि, णीञ् द्विकर्मकम् । द्विकर्मकाणा गुणमुख्यकर्मणोर्नामनी । पृथग्वाचके तत्र विरोधाभावात् षष्ठीद्वितीये तयोर्द्वयोरपि भवत —इति नित्ये प्राप्ते विकल्पः । लक्तध्यपूख्यार्थास्तु धातोरभेदात् तुल्यकक्ष्यत्वाभावाच्च युगपदभिधानान्मुख्य एव कर्मणि भवन्ति । दुह्यते गौः पय । नीयते ग्राममजेति । अत्र हि मुञ्चतः प्राप्नुवतश्च प्रेरणे गुणीभूतस्य यत्क्रियाया कर्म तदप्रधानं पयो ग्रामश्च प्रेरयितुर्गुणभूतस्य क्रियाया यत्कर्म तत्प्रधानं गोरजा च गा दोग्धि पय इति । गवा मोचयति पय ग्रामं प्रापयतीति एवमन्यत्रापि ।

न ण्यप. ॥१।३।१७०॥ ण्यवन्तस्य गुणकर्मणि (वर्तमानात् शब्दरूपात्) ङसोसामो न भवन्ति । नेतव्या ग्राममजा. । क्रष्टव्या ग्राम शाला । कर्मणीति किम् ? भेदयितव्यं काष्ठं देवदत्तस्य जिनदत्तस्य । गुण इति किम् ? गेयो माणवको गाथानाम् । प्रवचनीयो गुरुर्द्वादशाङ्गस्य ।

क्तेनो ङ्योस्सुप् ॥१।३।१७१॥ क्तान्तात् य इन् प्रत्ययस्तदन्तस्य कर्मण्यप्रधानेऽर्थे (वर्तमानात् शब्दरूपात्) एकद्विबहुषु ङि ओस् सुप् इत्येते प्रत्यया भवन्ति । अधीती व्याकरणे । आम्नाती द्वादशाङ्गे । परिगणिती वियद्गणिते । क्तेन इति किम् ? कट करोति । क्तग्रहणं किम् ? कृतपूर्वी कटम् । भुक्तपूर्वी ओदनम् । कृत पूर्वमनेन भुक्त पूर्वमनेनेति इन्, तदन्तस्य कर्मविशेषापेक्षाया कटमोदनमिति चोपादीयते तत्र क्तोऽनपेक्ष एव क्रिया तु वाक्यवत् परतन्त्रापि कर्मापेक्षते । इन्ग्रहण किम् ? उपश्लिष्टो गुरुं देवदत्तः । अधिष्ठितो ग्रामं जिनदत्त. । पकार सुबिति प्रत्याहारार्थ । द्वितीयाबाधनार्थं वचनम् ।

हेतौ कर्मणा ॥१।३।१७२॥ कर्मणा युक्तेऽप्रधाने हेतौ वर्तमानात् (शब्दरूपात्) ङि ओस् सुप् इत्येते प्रत्यया भवन्ति । कर्मण द्वीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम् । बालेषु चमरी हन्ति सीम्नि सीमलको हत: ॥ हेताविति किम् ? देवदत्तस्य पटं करोति । कर्मणेति किम् ? अन्नेन वसति । विद्यया वसति । तृतीयापवादो योग. ।

साधुनिपुणेनार्चायाम् ॥१।३।१७३॥ साधु निपुण इत्येताभ्या युक्तेऽप्रधानेऽर्थेऽर्चायां गम्यमानाया (वर्तमानात् शब्दरूपात्)—ङि ओस् सुप् इत्येते प्रत्यया भवन्ति । साधुर्देवदत्तो मातरि । निपुणो

---

१. चाप्रादु—क० म० । २. नीवह्योर्हरतेश्चापि मन्देर्दण्डयतेरपि । जयतेरपि मन्यन्ते कृषेः कर्मत्वं बुधाः ॥ क० म० टि० । ३. न योगान्सु—क० म० । ४. गुणभूतस्य क० म० । ५. -चिन्तुरगु—क० म० । ६. अजान्नयति—क० म० । ७. व्याकरणमधीतवानित्यर्थः, क० म० टि० ।

देवदत्तः[1] पितरि । असाधुर्देवदत्तो मातरीत्यत्रान्तरङ्गे साधुयोग एव सप्तमी नञा त्वमर्थसमासः । अर्चायामिति किम् ? साधुर्भृत्यो राज्ञः । तत्त्वाख्यानेन भवति । साधुर्देवदत्तो मातरम् अभि, मातरं प्रति, मातरं परि, मातरमन्वित्यत्रा[2]भ्यादिभिरेव सविषयो द्योतित इति सप्तमी न भवति । षष्ठीबाधनार्थो योग ।

स्वेशेऽधिना ॥१।३।१७४॥ अधि इत्यनेन योगे स्वे ईशितव्ये ईशितरि स्वामिनि चाप्रधानेऽर्थे वर्तमानात् (शब्दरूपात्) ङि ओस् सुप् इत्येते प्रत्यया भवन्ति । अधि. स्वस्वामिसम्बन्धं द्योतयति, तत्र यः स्वस्वामिनो यदप्रधानत्वेन विवक्ष्यते ततो भवन्ति । स्वे—[3]अधि[4]मगधेषु श्रेणिकः । अध्यवन्तीषु प्रद्योतः[5] । ईशे—अधि[6] श्रेणिके मगधाः । अधि प्रद्योतेऽवन्त्य· । षष्ठीबाधनार्थो योगः ।

उपेनाधिकिनि ॥१।३।१७५॥ उप इत्यधि[7]कादिक [8]सम्बन्धं द्योतयति यत्तेन युक्तेऽधिकिनि(वर्तमानात् शब्दरूपात्) ङि ओस् सुप् इत्येते प्रत्यया भवन्ति । उपखार्यां द्रोण. । द्रोणेनाधिका खारीत्यर्थ. । उपनिष्के कार्षापणम् । कार्षापणेनाधिको निष्क इत्यर्थः । उपेन इति किम् ? खार्या उपरि द्रोण । अधिकिनीति किम् ? अधिके मा भूत् ।

आधारे[9] ॥१।३।१७६॥ क्रियाश्रयस्य कर्तु. कर्मणो वा य आधारो[10]ऽधिकरणं तस्मिन् (वर्तमानात् शब्दरूपात्) ङि ओस् सुप् इत्येते प्रत्यया भवन्ति । आसने[11] आस्ते । स्थाल्यां पचति । गङ्गायां[12] घोषः । तिलेषु[13] तैलम् । आकाशे[14] शकुनय । गुरौ[15] वसति । कृष्णा[16] गोषु सम्पन्नक्षीरतमा । धावन्[17] यातेषु शीघ्रतम । कथं कृष्णा गत्वा सम्पन्नक्षीरतमेति षष्ठीसमुदायस्यैकदेशं प्रत्याधारभावविवक्षायां सप्तमी, सम्बन्धविवक्षाया तु षष्ठी भवति यथा वृक्षे शाखा, वृक्षस्य शाखेति । निर्धारण[18] तु कृष्णेत्यादेः पदान्तरात् ।

सुजर्थैः काले वा ॥१।३।१७७॥ सुजर्थो[19] येषा प्रत्ययाना[20] तदन्तैर्युक्ते काले आधारे[21] (वर्तमानात्

---

१. जिनदत्तः क० म० । २. वीप्स्यलक्षणेत्थंभवनेष्वभिना प्रतिपर्यनुभिरित्यभ्यादयः क० म० टि० । ३. पालनादिनिमित्तो वर्द्धनफलोऽत्र आधाराधेयभावोऽधिना व्यज्यते—इत्युभयत्र समिन्यायादिति वर्द्धमानीयवृत्तिः, क० म० टि० । ४. अयमस्य स्वामी, इदमस्य स्वमिति स्वस्वामिनोर्यः सम्बन्धस्तमधिद्योतयति । तत्र किञ्चिदनूद्य किञ्चिद्विधीयते । सत्यप्यधिना योगे युगपदप्रधानभावो नैवास्ति । विधेयं प्रधानं भवति, अनुवाद्यमप्रधानमिति । यत्तत्र अप्रधानतया विवक्ष्यते तत्र सप्तमी नेतरत्रेत्युभयत्र सप्तमी पर्यायेण भवति, न यौगपद्येन । अत्र मगधानामीश्वरः श्रेणिक इत्यर्थः । क० म० टि० । ५. राजा क० म० टि० । ६. श्रेणिकस्येशितव्या मगधा इत्यर्थः क० म० टि० । अधेः सुबर्थत्वाभावाच्छन्दप्रदेति समासो न भवति । ७. अधिकस्याध्यारोढुः, अधिकिनश्चाध्यारुह्यमाणस्य द्वयोरपि योगः । तत्राधिकेनैव प्रत्यया भवन्ति । अधिकसम्बन्धं च "पुष्पास्तु भूतेषु गतोऽहमेषु, पक्वेषु सर्वेष्वधुना गतोऽस्मि । विजृम्भमाणेषु सरोरुहेषु प्राप्ताङ्गना राजगृहात् स्वगेहम् ॥" क० म० टि० । ८. –धिकाधिकस–क० म० । ९. आधीयते कर्तृकर्मस्था क्रिया यस्मिन् स आधारः, क० म० टि० । १०. "क्रियां प्रति य आधारो धारणात् कर्तृकर्मणोः । करणादिक्रिया सा हि तत्त्वाधिकरणं स्मृतम् ॥" करणादिकृतिरित्यर्थः इति वर्धमानीये । क० म० टि० । ११. औपश्लेषिककर्तुराधारः । औपश्लेषिके कर्मण आधारः । "औपश्लेषिकवैषयिकव्यापकास्तिभेदवान् । चतुर्धाधार आख्यातो घटाकाशतिलावधि ॥" मूर्तयोः कठिनयोः, उपरि अधोभावः औपश्लेषिकः । मूर्तामूर्तयोः अयावद्द्रव्यभावित्वं वैषयिकम् । यावद्द्रव्यभावित्वं व्यापकम् । प्रत्यासत्तिः सामीप्यम् । क० म० टि० । १२. प्रत्यासत्तौ, क० म० टि० । १३. अभिव्याप्तौ, क० म० टि० । १४. वैषयिके, क० म० टि० । १५. उपचरिते, क० म० टि० । १६. निर्धारणे सप्तमी, क० म० टि० । १७. धावन्ध्वगेषु, क० म० । १८. जातिगुणक्रियादिभि• समुदायादेकदेशस्य पृथक्करणं निर्धारणम् । जातौ—पुरुषाणां तेषु क्षत्रियः शूरः । गुणे—गवां गोषु वा कृष्णा सम्पन्नक्षीरा । क्रियायाम्—गच्छतां तेषु वा धावन्तः शीघ्राः । द्रव्ये—यो देवदत्तो भवतां स आगच्छतु । इति वर्धमानीये । क० म० टि० । १९. सुचोऽर्थो—क० म० । २०. सुचोऽर्थो यारः क्रियाभ्यावृत्तिः, सुचा(ज)र्थप्रत्ययानामेवेत्याह । क० म० टि० । २१. -रे अप्रधाने क० म० ।

शब्दरूपात्)—ङि ओस् सुप् इत्येते प्रत्यया वा भवन्ति । द्विरह्नि भुङ्क्ते । मासे पञ्चकृत्वो भुङ्क्ते । मासस्य पञ्चकृत्वो भुङ्क्ते । बहुषाऽह्नि भुङ्क्ते । बहुषाऽह्नो भुङ्क्ते । सुजर्थैरिति किम् ? अह्नि भुङ्क्ते ।बहुव्रीह्यर्थग्रहणं किम् ? अप्रयोगे गम्यमानेऽर्थे मा भूत् । काल इति किम् ? द्विरह्नो भुङ्क्ते । आधार इति किम् ? द्विरह्नो भुङ्क्ते । नियमार्थो योगस्तत्र प्रत्युदाहरणं व्यवच्छेद्यम् ।

कुशलायुक्तेनासेवायाम् ॥१।३।१७८॥ कुशल[1] आयुक्त इत्येताभ्यां युक्तेऽप्रधाने आधारे आसेवाया तात्पर्ये गम्यमाने (वर्तमानात् शब्दरूपात्) ङि ओस् सुप् इत्येते वा प्रत्यया भवन्ति । कुशल[2]लो विद्याग्रहणे, कुशलो विद्याग्रहणस्य । आयुक्ता[3]स्तपश्चरणे, आयुक्ता[3]स्तपश्चरणस्य । आसेवायामिति किम् ? कुशलश्चित्रकर्मणि न च करोति । आयुक्तो गौः शकटे । आकृष्य युक्त इत्यर्थः । अनासेवायामेतदाधारस्य सामान्यरूपेणाविवक्षार्थं वचनम् ।

स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च ॥१।३।१७९॥ स्वामिन् ईश्वर अधिपति दायाद साक्षिन् प्रतिभू प्रसूत इत्येतैर्युक्तेऽप्रधाने (वर्तमानात् शब्दरूपात्)—वा ङि ओस् सुप् इत्येते प्रत्यया भवन्ति । गोषु स्वामी । गवा स्वामी । गोष्वीश्वरः । गवामीश्वरः । गोष्वधिपतिः । गवामधिपतिः । गोषु दायादः । गवा दायादः । गोषु साक्षी । गवां साक्षी । गोषु प्रतिभूः । गवा प्रतिभूः । गोषु प्रसूतः । गवा प्रसूतः । स्वामीश्वराधिपतीति पर्यायोपादानात् पर्यायान्तरयोगे न भवति । ग्रामस्य राजा । ग्रामस्य पतिः । सप्तम्यर्थं वचनम् । प्रसूतयोगे तु षष्ठ्यर्थमित्यन्ये । चकारो वेत्यस्यानुकर्षणार्थः ।

यद्भावो भावलक्षणम् ॥१।३।१८०॥ भावः क्रिया, प्रसिद्धं लक्षणमप्रसिद्धं लक्ष्यं यस्य सम्बन्धिना भावेन क्रियाया भावान्तरं लक्ष्यते तस्मिन्नप्रधाने ङि ओस् सुप् इत्येते प्रत्यया भवन्ति । गोषु[4] दुह्यमानासु गतः, दुग्धास्वागतः । नान्दीतुर्येषु वाद्यमानेषु गतः । देवार्चनाया क्रियमाणायामागतः । आस्रेषु[5] कलायमानेषु[6] गतः, पक्वेष्वागतः । कलायमानेष्विति जातेष्विति[7] गम्यते । गम्यमानमपि विभक्तेर्निमित्तं भवत्येव । यथा वृक्षे शाखा । ग्रामे देवदत्तः । प्रविश पिण्डीम् । प्रविश तर्पणमिति । [8]ऋद्धेषु भुज्यमानेषु दरिद्रा आसते, दरिद्रेष्वासीनेषु ऋद्धा[9] भुञ्जते । दरिद्रेषु भुज्यमानेषु ऋद्धा[10] आसते । अत्र यद्यपि कारकार्हाणां[11] कारकत्वमकारकार्हाणामकारकत्वं तद्विपर्यासश्च गम्यते (तथापि) भावो भावस्य लक्षणं भवत्येव । यद्ग्रहणं प्रकृत्यर्थम् । भावग्रहणं किम् ? जटाभिस्तस्य भोजनम् । भावलक्षणमिति किम् ? यस्य भोजनं स देवदत्तः । तृतीयापवादो योगः ।

त्रयी त्रयी विभक्तिः ॥१।३।१८१॥ य इमाः स्वौजसित्यादयः सप्त त्रय्य एव विभक्तयो विभागा अनुक्रान्तास्ताः प्रत्येकमिह विभक्तिशब्दवाच्या वेदितव्याः । विभक्तिप्रदेशः—यदा यद्वाक्यस्य वस्नसौ युष्मिभवतेरिति नियमार्थो योगः ।

प्रथमादिः ॥१।३।१८२॥ ताः सप्तविभक्तय इह प्रथमादिशब्दवाच्या वेदितव्याः । सु औ जसिति प्रथमा । अम् औट शसिति द्वितीया । टा भ्या भिसिति तृतीयेति प्रथमादिप्रदेशाः पदात्प्रथमाया वा इत्यादयः।[12] नियमार्थो योगः ।

षष्ठी चानादरे ॥१।३।१८३॥ यद्भावो भावलक्षण तस्मादनादरेऽज्ञाने गम्यमाने षष्ठीसप्तम्यौ

---

१. कुशलायुक्तशब्दौ निपुणव्यापृतपर्यायौ, क० म० टि० । २. तत्परो निपुण इत्यर्थः । क० म० टि० । ३. आयुक्त—क० म० । व्यापृतः, क० म० टि० । ४. अत्र गवां दोहेन भावेन कालतः प्रसिद्धेन, अप्रसिद्धदेवदत्तादेर्गमनं भावो लक्ष्यते इति दोहवति सप्तमी । क० म० टि० । ५. स्रे क० म० टि० । ६. भे क० म० टि० । ७. द्वे क० म० टि० । ८. ऋदन्तव्यभिसमृद्धे स्यात् सम्पन्नार्थेषु वाच्यमत् विश्वः, क० म० टि० । ९. द्वा क० म० टि० । १०. द्वा क० म० टि० । ११. कारकार्हाण इकारस्तत्त्वम्, क० म० टि० । १२. इत्येवमादयः क० म० ।

विभक्ती भवतः। रुदति लोके प्राव्राजीत्, रुदतो लोकस्य प्राव्राजीत्। क्रोशति बन्धुवर्गे प्राव्राजीत्। क्रोशतो बन्धुवर्गस्य प्राव्राजीत्। तस्मिन् क्रोशति तमनादृत्य प्राव्राजीदित्यर्थः। चकारः षष्ठीसमुच्चयार्थः।

गते स्थानिन्यध्वान्तेनैकः ॥१।३।१८४॥ कुतश्चित् परिगृहीतस्याध्वनोऽवसानमन्तो यद्भावो भावलक्षणं तस्यान्तेन युक्तस्याध्वन. स्थानिना गतशब्देन अवाच्ये भावे भावलक्षणे सति तेनान्तेनैवस्वभव्यवाचिनोऽन्तवाचिनैकार्थी[1] सामानाधिकरण्यं तद्विभक्तिस्तत्र भवतीत्यर्थः। गवीधूमत[2] साङ्काश्य चत्वारि योजनानि। चतुर्षु योजनेषु गतेषु भवतीत्यर्थः। लोकमध्यल्लोकान्त उपर्यधश्च सप्त रज्जूगमनन्ति। गत इति किम्? दग्धेषु लुप्तेष्वित्ति वा प्रतीतो मा भूत्। स्थानिनेति किम्? गवीधूमतः साङ्काश्य चतुर्षु योजनेषु गतेषु भवन्ति (भवति[3])। अध्वेति किम्? कार्तिक्या[4] आग्रहायणी मासे। अन्तेनेति किम्? अध्वनश्चतुर्षु योजनेषु भोजनम्। अभेदोपकारे[5] कालेऽपि स्यादिति वचनम्।

सप्तमी ॥१।३।१८५॥ यद्भावो भावलक्षणं तस्मादन्तेन युक्तादध्वन. स्थानिना गतशब्देन वाच्ये भावे भावलक्षणे सति सप्तमीविभक्तिर्भवति। गवीधूमत. साङ्काश्यं चतुर्षु योजनेषु। लोकमध्याल्लोकान्तम् उपर्यधश्च सप्त रज्जुत्वामनन्ति। एकत्वेन बाधा मा भूदित्यारम्भ।

कारकमध्येऽध्वकाले पञ्चमी च ॥१।३।१८६॥ क्रियाया निर्वर्तकं कारकं, द्वयोः कारकयोर्मध्ये योऽध्वा कालश्च तस्मिन्नप्रधाने वर्तमानात् (शब्दरूपात्) सप्तमी विभक्तिर्भवति। पक्षे पञ्चमी च। इह-स्थोऽयमिष्वास क्रोशो लक्ष्यं विध्यति। क्रोशाल्लक्ष्यं विध्यति। इह कर्तृकर्मणो कर्माधिकरणयोः कर्मापादा-नयोर्वा कारकयोर्मध्ये क्रोशोऽध्वा।[6] अद्य भुक्त्वाऽय मुनिर्द्वयहे भोक्ता। द्वयहाद्वा[7] भोक्ता। इह शक्तिः कारकमिति द्वयो भुजिक्रियाकर्तृशक्त्यो कर्त्रधिकरणयोर्मध्ये[8] द्वयहः काल.। कारकमध्य इति किम्? क्रोशस्य शेष.। दिवसस्य शेष.। कारकग्रहणमनयोर्ग्रामयोर्मध्ये क्रोशमस्वाप्सीत्। मध्यग्रहणं किम्? मासस्य द्वि-र्धीते। अध्वकाल इति किम्? इतो मुक्त शरः कुड्यस्य परतो लक्ष्ये पतति। चकार. पञ्चमीसमुच्चयार्थः। षष्ठी द्वितीयाबाधनार्थो योग।

चेष्टागत्याप्येऽनाक्रान्ते द्वितीयाचतुर्थ्यौ ॥१।३।१८७॥ चेष्टारूपाया गमनक्रियाया आप्ये कर्मण्यनाक्रान्ते कर्त्रनास्थितेऽसंप्राप्ते द्वितीयाचतुर्थ्यौ विभक्ती भवत.। ग्रामं गच्छति। ग्रामाय गच्छति। नगरं व्रजति। नगराय व्रजति। विप्रनष्ट. पन्थानं गच्छति। पथे गच्छति। चेष्टागत्याप्य इति किम्? ग्रामादा-गच्छति। चेष्टाग्रहणं किम्? मनसा पाटलिपुत्रं गच्छति। गतिग्रहणं किम्? ओदनं पचति। अनाक्रान्त इति किम्? स्त्रियं गच्छति। पन्थानं गच्छति। चतुर्थी वेत्यनुक्त्वा द्वितीयाग्रहणं षष्ठीबाधनार्थम्। ग्रामं गन्ता। ग्रामाय गन्ता।

तुल्यार्थैस्तृतीया ॥१।३।१८८॥ तुल्यार्थैर्युक्तेऽप्रधाने तृतीयाविभक्तिर्भवति। मात्रा तुल्यः। पित्रा समानः। गुरुणा[9] समानः। देवदत्तेन सदृक्। जिनदत्तेन सदृश। गुरुदत्तेन सदृक्ष। अर्थग्रहणं पर्यायार्थम्। उपमानोऽस्ति कृष्णस्य।[10] तुलानाऽस्ति कृष्णस्य।[11] उपमानं नास्ति देवदत्तस्येत्यत्रोपमादयो न तुल्यार्था इति न भवति। तथा गौरिव गवय। यथा गौस्तथा गवय[12] इत्यत्रापि।

---

१. कार्थी सा- क० म०। २. अपायेऽध्वाधिति पञ्चमी, ततो निःसृत्य गतेष्वित्ति प्रतीयते। क० म० टि०। ३. भवति, क० म०। ४. ततः प्रभृति मासेषु गतेषु भवतीति प्रतीयते—क० म० टि०। ५. -भवारे, क० म०। ६. शाङ्का, क० म०। ७. -हाद् भोक्ता, क० म०। ८. -गयोर्वा म- क० म०। ९. समः, क० म०। १०. उपमा नास्ति, कृ- क० म०। ११. तुला ना- क० म०। १२. इत्यपि, क० म०।

षष्ठी ॥१।३।१८९॥ तुल्यार्थैर्युक्तेऽप्रधाने षष्ठीविभक्तिर्भवति । मातुस्तुल्यः । पितुः समानः । देवदत्तस्य सदृशः । [1]तृतीयायामधिकस्य षष्ठीविधानं सप्तमीबाधनार्थम् । गवा तुल्यः स्वामी [2] । स्वामीश्वरेति सप्तमी न भवति । योगविभाग उत्तरार्थः ।

द्वितीया चैनेनानञ्चेः ॥ १।३।१९० ॥ अनञ्चेर्य एनप्रत्ययः तदन्तेन युक्ते (वर्तमानात् शब्दरूपात्) द्वितीया च षष्ठी च विभक्ती भवतः । पूर्वेण ग्रामम् । उत्तरेण ग्रामम् । पूर्वेण ग्रामस्य । उत्तरेण ग्रामस्य । अनञ्चेरिति किम् ? प्राक् ग्रामात् । प्रत्यक् ग्रामात् ।

पञ्चमी ऋते ॥ १।३।१९१ ॥ ऋतेशब्देन [3]योगेऽप्रधाने (वर्तमानात् शब्दरूपात्) द्वितीयापञ्चम्यौ विभक्ती भवतः । ऋते धर्मात् कुतः सुखम् । चित्रं यथा श्रियमृते । नह्यङ्ग विक्रियते [4]रोगमृते ।

पृथग्नाना तृतीया च ॥ १।३।१९२ ॥ पृथक् नाना इत्येताभ्यां युक्ते (वर्तमानात् शब्दरूपात्) प्रधाने तृतीयापञ्चम्यौ विभक्ती भवतः । पृथग् देवदत्तेन, पृथग्देवदत्तात् । नाना देवदत्तेन, नाना देवदत्तात् ।

विनेमास्तिस्रः ॥ १।३ १९३ ॥ विनाशब्देन युक्तेऽप्रधाने (वर्तमानात् शब्दरूपात्) इमा अनन्तरोक्तास्तिस्रस्तृतीयापञ्चमीद्वितीयाविभक्तयो भवन्ति । विना वातेन । विना वर्षेण । विना वातात् । विना वर्षात् । विना वातम् । विना वर्षम् । इमा इत्यनुकान्तप्रदर्शनार्थम् अन्यथा कास्तिस्र इति न ज्ञायेत । तिस्र इति किम् ? षष्ठी मा भूत् ।

सप्तमी चासत्त्वारादर्थात् ॥ १।३।१९४ ॥ द्रव्यं सत्त्वं ततोऽन्यदसत्त्वम् । आरात्, दूरान्तिकयोस्तन्त्रेणोभयग्रहणम्, असत्त्ववाचिनो दूरार्थात्, अन्तिकार्थाच्च शब्दात् सप्तमी इमाश्च तिस्र तृतीयापञ्चमीद्वितीयाविभक्तयो भवन्ति । दूरे ग्रामस्य, दूरेण ग्रामस्य, दूराद् ग्रामस्य, दूरं ग्रामस्य गच्छति । विप्रकृष्टे, विप्रकृष्टेन, विप्रकृष्टात्, विप्रकृष्टं, ग्रामस्य गच्छति । अन्तिके, अन्तिकेन, अन्तिकात्, अन्तिकं, ग्रामस्य गच्छति । अभ्याशे, अभ्याशेन, अभ्याशात्, अभ्याशं, ग्रामस्य गच्छति । असत्त्वग्रहण किम् ? दूरः पन्थाः, दूराय पन्थे [5], दूरस्य पथः स्वम् । आरादर्थग्रहणं किम् ? साधु पचति । स्वल्पं चर्चति [6] ।

हेतौ हेत्वर्थैः सर्वाः प्रायः ॥ १।३।१९५ ॥ हेतुर्निमित्तं कारणमिति पर्यायास्तदर्थैः शब्दैर्योगे हेतावप्रधाने (वर्तमानात् शब्दरूपात्) प्रायेण सर्वा विभक्तयो भवन्ति । धनेन हेतुना वसति, धनाय हेतवे वसति, धनाद्धेतोर्वसति, धनस्य हेतोर्वसति, धने हेतौ वसति । एवं धनेन निमित्तेन वसति, धनेन कारणेन वसति । कं हेतुं वसति, केन हेतुना वसति, कस्मै हेतवे वसति, कस्माद्धेतोर्वसति, कस्य हेतोर्वसति, कस्मिन् हेतौ वसति । किं प्रयोजनं वसति, केन प्रयोजनेन वसति, कस्मै प्रयोजनाय वसति, कस्मात् प्रयोजनात् वसति, कस्य प्रयोजनस्य वसति, कस्मिन् प्रयोजने वसति । एवं किं निमित्तं, केन निमित्तेन । हेताविति किम् ? कस्य हेतुः । हेत्वर्थैरिति किम् ? केन वसति ? धनेन वसति । प्रायः इति प्रयोगानुसारार्थम् ।

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने अमोघवृत्तौ प्रथमाध्यायस्य तृतीयः पादः समाप्तः ।

---

१. -तीयाम-क० म० । २. -मी गोभिस्तुल्यः स्वामी स्वा-क० म० । ३. -न युक्ते अ-क० म० । ४. -ते रोग- क० म० । ५. -थे देहि दू- क० म० । ६. स्पष्टं जल्पति, क० म० टि० ।

[चतुर्थः पादः]

लोऽन्ययुष्मदस्मासु तिप् तस् झि सिप् थस् थ मिप् वस् मस् ॥ १।४।१ ॥ एकद्विबहा-विति वर्तते । भावकर्मकर्तृषु वाच्येषु लडादयो दश लकारा विहितास्तेषा सामान्येन ल इति षष्ठी-निर्देशः । अन्ययुष्मदस्मदर्थेषु प्रत्येकमेकद्विबहुषु वर्तमानस्य धातोर्विहितस्य लकारस्य यथाक्रमं तिप् तस् झि सिप् थस् थ मिप् वस् मस् इत्येत आदेशा भवन्ति । अन्यत्वं युष्मदस्मदर्थेश्च सन्निधानात् । अन्यस्मिन्नेकस्मिन्नर्थे तिप् । अन्ययोर्द्वयोस्तस् । अन्येषु बहुषु झि । एवं युष्मदर्थेषु एकद्विबहुषु यथाक्रमं सिप् थस् थ । अस्मदर्थेषु मिप् वस् मस् । स पचति । भवान् पचति । तौ पचतः । भवन्तौ पचतः । ते पचन्ति । भवन्तः पचन्ति । त्वं पचसि । युवा पचथ । यूयं पचथ । अहं पचामि । आवा पचाव. । वयं पचामः । ल इति किम स दाता । त्वं दाता । अहं दाता । पचति । पचत. । पचन्ति । पचसि । पचथः । पचथ । पचामि । पचावः । पचाम. । इत्यन्ययुष्मदस्मदामप्रयोगेऽपि तदर्थ एव लार्थ इत्यादेशा. । स च त्वं च पचथः । स च अहं च पचावः । त्वं च अहं च पचावः । स च त्वं च अहं च पचामः । इति पराश्रय एवादेशो भवति शब्दरचविप्रतिषेधात् । एहि मन्ये रथेन यास्यसि । न हि यास्यसि । यातस्ते पितेति प्रहासेऽपि यथाप्राप्तमेव प्रतिपत्ति. । रथेन यास्यसीति भावगमनाभिधानात् प्रहासगतिः । अनेकस्मिन्नपि प्रत्येकमेव परिहास इत्यभिधानवशान्मन्य इत्येकवचनमेव । पकारः ल्यब्लाविस्यादर्थ' ।

तातां झ थासाथां ध्वमिड्वहि महिङ्ङिदिच्छीयसंक्षणवयस्कृनिविशः ॥१।४।२ ॥ ङकारेत इकारेतश्च धातोः शीयाच्च शदादेशात् सक्षणु अपस्कृ निविश इत्येतेभ्यश्च सोपसर्गेभ्यः पकारस्य लकारस्य एकद्विबहुषु अन्ययुष्मदस्मासु यथाक्रम त आताम् झ, थास् आथाम् ध्वम्, इल् वहि महिङ् इत्येते आदेशा भवन्ति । ङित् ह्नु ङ् — स ह्नुते । भवान् ह्नुते । तौ ह्नुवाते । भवन्तौ ह्नुवाते । ते ह्नुवते । भवन्तः ह्नुवते । त्व ह्नुषे । युवा ह्नुवाथे । यूयं ह्नुध्वे । अहं ह्नुवे । आवा ह्नुवहे । वयं ह्नुमहे । इदित्— एधि–एधते एधेते एधन्ते । एधसे एधेथे एधध्वे । एधे एधावहे एधामहे । चेति–चेतयते चेतयेते चेतयन्ते । गृहि– गृह्यते गृह्येते गृह्यन्ते । शीय—शीयते शीयेते शीयन्ते । संक्षणु—संक्षणुते संक्षणुवाते संक्षणुवते । अपस्कृ—अपस्किरते वृषभो हृष्ट । अपस्किरते कुक्कुटो भक्षार्थी[1] । अपस्किरते श्वा आश्रयार्थी । निविश—निविशते निविशेते निविशन्ते । विधानकाले परत्वाद्विकरणेन व्यवधानेऽपि भवति । शीयादिसाहचर्यात् विकरणे ङीदिति न भवति । अशिश्वियत् । अश्वत् । अश्वसीत् । शीये शीयभावी शीयः वचनाद्वा भवति । तदागमस्तदग्रहणेन गृह्यत इत्यङागमे सत्यपि भवति । समक्षुत । अपास्किरत । व्यविशत । आदेशोपादानात् प्रकृतेर्न भवति । शस्यति । अशस्यत् । विशिष्टोपसर्गोपादानादनुपसर्गादन्योपसर्गाच्च न भवति । क्ष्णौति । प्रक्ष्णौति । किरति । उपस्किरति । विशति । उपविशति । ससुट्कोपादानादसुट्काश्च न भवति । अपकिरति श्वा ओदनपिण्डमाशितः । इलिति लकारो रन्तो श्नेलोरिति विशेषणार्थः । ङकारः प्रत्याहारार्थ. ।

ऊह्यसोर्वोपसर्गात् ॥ १।४।३ ॥ उपसर्गात् पराभ्याम् ऊहि असू इत्येताभ्या परस्य लकारस्य एकद्विबहुषु अन्ययुष्मदस्मासु यथाक्रमं त आताम् झ थास् आथाम् ध्वम् इल् वहि महिङ्[2] इत्येते आदेशा भवन्ति वा । समूहति, समूहते । निरस्यति, निरस्यते । असू इत्यूकारानुबन्धोपादानमस्तिनिरासार्थम् । समस्ति । उपसर्गादिति किम् ? ऊहते । अस्यति ।

युजोऽनुदः ॥ १।४।४ ॥ अजन्तात् उद् इत्येतस्माच्चोपसर्गात् परात् युजृ योग इत्यतो लस्य पूर्ववत्सञ्ज्ञो भवन्ति । प्रयुङ्क्ते । नियुङ्क्ते[3] । अनुद इति किम् ? संयुनक्ति । निर्युनक्ति । दुर्युनक्ति ।

---

१. भक्ष्यार्थी क० म० । २. -हिङो भ–क० म० । ३. -क्ते उद्युङ्क्ते अ–क० म० ।

न यज्ञे तत्पात्रे ॥ १।४।५ ॥ पूर्वेण प्राप्ते प्रतिषिद्ध्यते । यज्ञे—यज्ञपात्रविषयात् युजेस्तङ् न भवति । द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति । यज्ञ इति किम् ? यज्ञपात्राणि रन्धन प्रयुङ्क्ते । तत्पात्र इति किम् ? यज्ञे मन्त्रं प्रयुङ्क्ते । तद्ग्रहणं किम् ? रन्धनानि पात्राणि यज्ञे प्रयुङ्क्ते । [1]अनन्तरनिषेधादयुजे समाधाविष्यस्येदिल्लक्षणस्तङ् भवत्येव । नास्यैतद्विषये प्रयोगोऽस्तीत्येके ।

परिव्यवात्क्रियः ॥ १।४।६ ॥ परि वि अव इत्येतेभ्य उपसर्गेभ्य. परात् क्रीणातेर्लकारस्य पूर्ववत्तङो भवन्ति । परिक्रीणीते । विक्रीणीते । अवक्रीणीते । उपरि क्रीणाति । गवि क्रीणाति । बहुविक्रीणाति[2] । वनमित्यत्रानर्थकत्वात् अयोगात् अनुपसर्गत्वाच्च न भवति । क्रिय अन्यत्र[3]—एव निर्देशात् प्रकृतिवदनुकरण इति सिद्धम् मुनी इत्याह । द्विश्चन्नीत्याहेति [4]परावरर्जरीत्यादौ वर्णमात्रस्यानुकरणं न साभिप्रेयस्य ।

परावेर्जेः ॥ १।४।७ ॥ परा वि इत्येताभ्यामुपसर्गाभ्यां पराजयतेर्लकारस्य पूर्ववत्तङो भवन्ति । पराजयते । विजयते । पराजयति सेना[5] । विजयति वनमित्ययोगादनुपसर्गत्वाच्च न भवति ।

कर्मणोद्गश्चरः ॥१।४।८॥ उत्पूर्वाच्चरे कर्मणा योगे सति लकारस्य पूर्ववत्तङो भवन्ति । ग्राममुच्चरते । सक्तूनुच्चरते । भक्षयतीत्यर्थ । गेहमुच्चरते । गुरुवचनमुच्चरते[6] । उत्क्रम्य गच्छतीत्यर्थ । अत्र चरिरुत्क्रमणाज्ञायां गतौ वर्तते । कर्मणेति किम् ? [7]धूममुच्चरति । [8]बाष्पमुच्चरति । उद्गच्छतीत्यर्थ. [9] । उद इति किम् ? चारी[10] चरति ।

समस्तृतीयया ॥१।४।९॥ संपूर्वाच्चरतेस्तृतीयान्तेन[11] योगे सति लकारस्य पूर्ववत्तङो भवन्ति । अश्वेन संचरते । रथेन सचरते । तृतीययेति किम् ? उभौ लोकौ संचरति ।

क्रीडोऽनुजे ॥१।४।१०॥ कूज शब्दनविशेषस्ततोऽन्यस्मिन् वर्तमानात् क्रीडते संपूर्वाल्लकारस्य पूर्ववत्तङो भवन्ति । संक्रीडते । अकूज इति किम् ? सक्रीडन्ति शकटानि । सम इति किम् ? क्रीडति ।

पर्यन्वाङ. ॥१।४।११॥ परि अनु आङ् इत्येतेभ्य उपसर्गेभ्यः परात् क्रीडतेर्लकारस्य पूर्ववत्तङो भवन्ति । परिक्रीडते । अनुक्रीडते । आक्रीडते । माणवकमनुक्रीडति इत्यत्र धातुनानोरयोगादनुपसर्गाच्च न भवति । माणवकेन सह क्रीडतीत्यर्थ ।

शपनाथशिक्षभुजादुपलम्भनाशीर्जिज्ञासात्राणे ॥१।४।१२॥ शप नाथ[12] शिक्ष भुज इत्येतेभ्यो यथासंख्यमुपलम्भन आशिषि जिज्ञासायामत्राणे च लकारस्य पूर्ववत्तङो भवन्ति । शप उपलम्भने । उपलम्भन प्रकाशनम् । देवदत्ताय शपते । जिनदत्ताय शपते । देवदत्तं प्रकाशयति—एवभूतोऽमाविति देवदत्तमाचष्ट इत्यर्थ. । अथवा स्वाभिप्रायस्य परत्राविष्करणमुपलम्भन शपथ । देवदत्ताय शपत इति वाचा मात्रादिशरीरस्पर्शनेन देवदत्ते स्वमभिप्रायमाविष्करोतीत्यर्थ. । प्रोषितस्य वा भावाभावयोरुपलब्धव्ययो कस्यचिदासेवनमुपलम्भनम् । देवदत्ताय शपत इति प्रोषिते देवदत्ते तस्य भावाभावयोरुपलब्धव्ययो. कंचिदासेवत इत्यर्थः । उपलम्भन इति किम् ? देवदत्त शपति । आक्रोशतीत्यर्थ । आशिषि नाथ । सर्पिषो नाथते, सर्पिर्मे भूयादित्याशास्त इत्यर्थ. । आशिषीति किम् ? मधु नाथति । माणवकमुपनाथति । याञ्चाया न भवति । ङित्त्व-

१. -न्तरस्य नि—क० म० । २. बहु वयोऽस्मिन्निति बसः । विशब्दोऽत्र पक्षिणि वर्तते । क० म० टि० । ३. इत्यत्र पु—क० म० । ४. -रावर्जेरि— क० म० । ५. ना बहु वि—क० म० । ६. अत्रोत्क्रमणात्मिकायां गतौ वर्तमानश्चरति गुरुवचनेन—क० म० टि० । ७. धूम उच्च—क० म० । ८. -प्प उच्च—क० म० । ९. उपरिष्टाद् गच्छतीत्यर्थः । नात्र किञ्चित्कर्म विवक्षितमिति अकर्मकत्वम् । क० म० टि० । १०. चारीति पशुभक्षणीयमित्यौणादिकः, क० म० टि० । ११. तृतीयेति तृतीयाविभक्तिर्गृह्यते तया चरतेरर्थद्वारको योगः । क० म० टि० । १२ ङित्त्वात् सिद्धे—आशिष्येन(व) नाथ आत्मनेपदम्, याजादिषु भा भूदिति यमा(नियमा)र्थम् । क० म० टि० ।

मनर्थकम् । शिक्षाजिज्ञासायां—विद्यामु शिक्षते । विद्याः शिक्षते । विद्याजिज्ञासितुमात्मनः शक्तिमिच्छतीत्यर्थः । जिज्ञासायामिति किम् ? भोक्तुं शिक्षति । शिक्षेति शक्ते. सनन्तस्येदं ग्रहणमकारान्तस्य न शिक्षि विद्योपादान [1]इत्येतस्य । भुजादत्राणे—ओदनं भुङ्क्ते । उपभुङ्क्ते । परिभुङ्क्ते । अत्राण इति किम् ? पृथिवी भुनक्ति । त्राणं पालनं तत्र प्रतिषेधे अन्यत्र सर्वत्र तङ् । तेन—'अम्बरीषश्च नाभागो बुभुजाते चिरं महीम्'इत्युपपन्नम् । नात्र हि पालन विवक्षितम् । किं तर्हि ? तदाश्रय उपकार. । अनेकार्थाश्च धातवो भवन्ति । उभयपदीनमेनमन्ये मन्यन्ते । भुजाविति साकारपाठस्योपादानात् 'भुजो कौटिल्ये' इत्येतस्मान्न भवति । निर्भुंजति पाणिम् । प्रतिभुजति वासासि ।

ह्वरो गतितांच्छील्ये ॥१।४।१३॥ तत् शीलमस्येति तच्छीलस्तद्भावस्तांच्छील्य तत् स भावता हरतेर्लकारस्य पूर्ववत्तङो भवन्ति गतेस्तांच्छील्ये गम्यमाने । पैतृकमश्वा अनुहरन्ते । मातृकं गावोऽनुहरन्ते । पितुरागत पैतृकम् । गमनं स्वभावतो गच्छन्ति पितृवत्[3] सन् मातृवच्च गमनमेषा स्वभावत एवेत्यर्थ' । गतौ तांच्छील्ये वेत्येके । उभयत्र तदेवोदाहरणम् । सामर्थ्य तु विभज्यते । गततांच्छील्य इति च पाठ. । विधयुक्तगतप्रकारा एकार्थाः प्रकारा तांच्छील्य इत्यर्थ. । तांच्छील्य इत्यनेन चोत्पत्ते. प्रभृत्या विनाशात् यदनुगतं सादृश्यं तत्र तद्भवति न च(भ)ण्डाद्यनुकारे तदेवोदाहारणम् । पैतृकमश्वा अनुहरन्त इति । पितुरागतं सादृश्य शीलयन्तीत्यर्थः ।

न्यस्संमाननाचार्यकभृत्युत्संजनज्ञानव्ययविगणने ॥१।४।१४॥ संमाननाचार्यकभृतिष्वर्थविशेषणेषु उत्संजनज्ञानव्ययविगणनेषु अर्थेषु[4] नी इत्येतस्माद्धातोर्लकारस्य पूर्ववत्तङो भवन्ति । संमाननं पूजन, तत्र नयते विद्वान् स्याद्वादे प्रमाणव्याहारवित्[5]—स्याद्वादे जीवादीन्पदार्थान् युक्तिभिः स्थिरीकृत्य संमानयन् शिष्यबुद्धि [6]प्रापयतीत्यर्थः । आचार्यस्य भावः कर्म वा आचार्यकं तत्र माणवकमुपनयते, स्वयमाचार्यो भवन् माणवकमात्मसमीपं यथाविधि प्रापयतीत्यर्थः । भृतिर्वेतनं, तत्र कर्मकरानुपनयते, भृतिदानेन कर्मकरानात्मसमीपे करोतीत्यर्थ । ऊर्ध्वं सजनम्[7]—उत्संजनम्, उत्क्षेपणम् । माणवकमुदानयते, उत्क्षिपति—उत्संगे करोतीत्यर्थ । ज्ञानं प्रमेयनिश्चय', तत्र नयते विद्वान् स्याद्वादे, तत्र प्रमेयं [8]निश्चिनोतीत्यर्थ' । धर्मादिषु विनियोगो व्यय, शत विनयते, सहस्रं विनयते, [9]धर्मव्ययार्थं शत विनियुक्त इत्यर्थः । ऋणादेर्निर्यातनं विगणनम्, माद्रा.[10] करं विनयन्ते, निर्यातयन्तीत्यर्थ । एतेष्विति किम् ? अजा नयति ग्रामम् ।

कर्तृस्थेऽतनाधाप्ये ॥१।४।१५॥ कर्तृस्थे अतनावशरीरे आप्ये कर्मणि सति नयतेर्लकारस्य तङो भवन्ति । क्रोधं विनयते । मन्यु विनयते । हर्ष विनयते, शमयतीत्यर्थ । कर्तृस्थ इति किम् ? देवदत्तो जिनदत्तस्य क्रोधं विनयति । अतनाविति किम् ? गर्दुं विनयति । पूजा विनयति । आप्य इति किम् ? प्रज्ञया विनयति । बुद्धया विनयति । क्रोधं विनयत इत्यादौ क्रोधापगमादेः क्रियाफलस्य कर्तृसमवायित्वात् सिद्धस्तङ्, तत्रेदं नियमार्थम् । प्रत्युदाहरण व्यवच्छेद्यम् ।

म्रियतेर्लुङ्लिङ्लेः ॥ १।४।१६ ॥ म्रियतेर्धातोर्लुङ् लिङ् लट् लङ् लेट् लेङ् इत्येतेषा लकाराणा तङो भवन्ति । अमृत । मृषीष्ट । म्रियते । अम्रियत । म्रियताम् । म्रियेत । लुङ्लिङ्लेरिति किम् ? ममार । मर्तासि । मरिष्यति । अमरिष्यत् । तिनिर्देशात् ममर्ति ।

कषो वा ॥ १।४।१७ ॥ कषन्ताल्लस्तङो वा भवन्ति । निद्रायति, निद्रायते । लोहितायति, लोहितायते । पटपटायति, पटपटायते ।

---

१. इत्यस्य– क० म० । २. शपनायेत्यादिसूत्रे –क० म० टि० । ३. पितृवन्मातृ– क० म० । ४. –नु अर्थे– क० म० । ५. व्यापार क० म० । ६. ते च बुद्धिभिः स्थाप्यमाना संमानिता पूजिता भवन्ति । क० म० टि० । ७. –जनम् । क० म० । ८. निश्चयं करोति क० म० टि० । ९. –र्थाय– क० म० । १०. मद्रदेशीया. पुरुषा. । क० म० टि० ।

लोः कृपः ॥१।४।१८॥ कृपेर्धातोर्लोरुकारानुबन्धस्य लकारस्य तङो वा भवन्ति । कल्प्ता, कल्पिता । कल्प्तासि, कल्पितासि । लोक[1] कल्पत्यन्, अकल्पिष्टेति लुङ्युत्तरेणापि सिद्धयति । लोरिति किम् ? कल्पते ।

द्युद्भ्यो लुङः ॥ १।४।१९ ॥ द्युतादिभ्यो लुङस्तङो वा भवन्ति । व्यद्युतत्, व्यद्योतिष्ट । अलुठत्, अलोठिष्ट । अक्षुभत्, अक्षोभिष्ट । अरुचत्, अरोचिष्ट । अश्वितत्, अश्वेतिष्ट । अमिधत्, अमेधिष्ट । अस्विदत्, अस्वेदिष्ट । अघुटत्, अघोटिष्ट । अरुदत्[2], अरोदिष्ट । अलुटत्, अलोटिष्ट । अक्षुभत्, अक्षोभिष्ट । अनभत्, अनभिष्ट । अतुभत्, अतोभिष्ट । व्यस्रभत्, व्यस्रंभिष्ट । अस्रसत्, अस्रंसिष्ट । अवृतत्, अवर्तिष्ट । अव्(ध)दत्, अव(धि)र्दिष्ट । अभ्रूदत्[3], अशर्दिष्ट । अस्यदत्, अस्यन्दिष्ट । [4]अक्लृप्त, अकल्पिष्ट । वृत्, लुङ इति किम् ? विद्योतिसे[5] ।

वृद्भ्यः सस्यात् ॥ १।४।२०॥ वृतादिभ्य परौ यौ सस्यौ प्रत्ययौ ताभ्या परस्य लस्तङो वा भवन्ति । विवृत्सति, विवर्तिषते । वर्त्स्यति, वर्तिष्यते । अवर्त्स्यत्, अवर्तिष्यत । विवृत्सति, विवर्धिषते । वर्त्स्यति, वर्धिष्यते । अवर्त्स्यत, अवर्धिष्यत । शिशृत्सति, शिशर्धिषते । शर्त्स्यति, शर्धिष्यते । अशर्त्स्यत्, अशर्धिष्यत । सिष्यन्त्सति, सिष्यन्धिषते । स्यन्त्स्यति, स्यन्दिष्यते । अस्यन्त्स्यत्, अस्यन्दिष्यते । चिक्लृप्सति, चिकल्पिषते । कल्प्स्यति, कल्पिष्यते । अकल्प्स्यत्, अकल्पिष्यत । वृतादय. पञ्च कृष्यन्ता । सस्यादिति किम् ? वर्तते ।

क्रमोऽनुपसर्गात् ॥ १।४।२१ ॥ अनुसर्गात् [6]क्रमधातोर्लकारस्य तङो वा भवन्ति । क्रमते, क्रामति । अनुपसर्गादिति किम् ? सङ्क्रामति ।

वृत्तिसर्गतायने ॥१।४।२२ ॥ वेति निवृत्तम् । वृत्तिरात्मयापनमप्रतिबन्धो वा । सर्गस्तात्पर्यमुत्साहो वा । तायनं संतापन.[7] पालनं वा । एतेष्वर्थेषु वर्तमानात् क्रमेर्धातोर्लकारस्य नित्य तङो भवन्ति । वृत्तौ—शास्त्रस्य क्रमते बुद्धि । स्याद्वादेऽस्य क्रमते बुद्धिः । वर्तते तत्रात्मानं यापयति न [8]हन्यते वेत्यर्थः । सर्गे—मूत्राय क्रमते । अर्थाय क्रमते । तदर्थं तत्परो भवत्युत्सहते वेत्यर्थ । अनुज्ञामन्ये मन्यन्ते । सर्ग इति सति सर्गो लक्ष्यते । तायते—क्रमन्तेऽस्मिन् योगा' । क्रमन्तेऽस्मिन् शास्त्राणि । सतन्यन्ते पाल्यन्ते वेत्यर्थः । स्फीततामन्ये तायनमाहु. ।

परोपात् ॥ १।४।२३ ॥ परा उप इत्येताभ्या परात् क्रमेर्धातोर्लकारस्य तङो भवन्ति । पराक्रमते । उपक्रमते । अवृत्यादयर्थ आरम्भ । अन्ये त्विह वृत्यादीनपेक्षन्ते । पूर्वत्र चानुपसर्गादिति तत्राय सोपसर्गार्थमारम्भो भवति ।

वेः पादविक्षेपे ॥ १।४।२४ ॥ विपूर्वात् पादविक्षेपे वर्तमानात् क्रमेर्लस्तङो भवन्ति । सुष्ठ विक्रमतेऽश्व. । पादविक्षेप इति किम् ? विक्रामति राजा—उत्सहते इत्यर्थ । विक्रामत्यजिनसन्धि । स्फुटतीत्यर्थ ।

प्रोपाभ्यां समर्थाभ्याम् ॥ १।४।२५ ॥ प्र उप इत्येताभ्या समर्थाभ्या समानार्थाभ्यां परात्क्रमतेर्लकारस्य तङो भवन्ति समानश्चार्थोऽनयोरादिकर्माङ्गीकरणं वा तेनादिकर्मण्यङ्गीकरणे च वर्तमानाभ्यां भवतीत्यर्थ । प्रक्रमते[9] भोक्तुम् । उपक्रमते भोक्तुम् । प्रारभत इत्यर्थ' । प्रक्रमते शुश्रूषाम् । उपक्रमते शुश्रूषाम् । अङ्गीकरोतीत्यर्थः । समर्थाभ्यामिति किम् ? पूर्वेद्युः प्रक्रामति । गच्छतीत्यर्थः । अपरेद्युः[10] प्रक्रामति । गच्छतीत्यर्थ' । आवृत्यादयर्थमुपग्रहणम् । ये तु [11]परोपादीत्यवृत्यादयर्थमाहुस्त इह पादविक्षेप इत्यपेक्षन्ते । [12]तेषामुपग्रहणं नियमार्थम् । पादविक्षेपे प्रेणतिमाणसमानार्थो (र्थो)देवोपाद् यथा स्यादिति (?)

---

१. लोलोकपक्लृपत् अ– म० टि० । अकृपक्लृपत्, क० टि० । २. अरुद(ट)त् । अरोदि(टि)ष्ट । क० म० । ३. भ्रुधुक् शब्दकुत्सायाम् । क० म० टि० । ४. अक्लृपत अ– क० म० । ५. विद्योतासे, क० म० । ६. -क्रमेर्धातो- क० म० । ७. -तानः, क० म० । ८. न प्रतिह- क० म० । ९. प्रक्रमः—स्यादुपक्रमः, क० म० टि० । १०. -युः उपक्रामति आत्म- क० म० । ११. -परो(रा)पा- । १२. -तेषामिहोप- क० म० ।

ज्योतिरुद्गतावाङः ॥१।४।२६॥ ज्योतिषां चन्द्रादीनामुद्गतौ वर्तमानादाङ्पूर्वात् क्रमेर्लकारस्य तङो भवन्ति । आक्रमते चन्द्रमाः । आक्रमते आदित्य. । आक्रमन्ते ज्योतींषि । उद्गच्छन्तीत्यर्थः । ज्योतिरुद्गताविति किम् ? आक्रमति माणवकः कुतपम(ब)पक्षमनातीत्यर्थः । ज्योतिर्ग्रहण किम् ? आक्रमति धूमः । उद्गतिग्रहण किम् ? नभः समाक्रामति, नष्टवर्त्मना [1]स्थितैकचक्रेण रथेन भास्करः व्याप्नोतीत्यर्थ.[2] ।

नुदाम्प्रच्छः ॥ १।४।२७ ॥ आङ्पूर्वेभ्यो नुदाम्प्रच्छिभ्यो लकारस्य तङो भवन्ति । आनुते शृगालः । धनमादत्ते । विद्यामादत्ते । आपृच्छते गुरून् । आपृच्छस्व प्रियसखम् । आङ् इति किम् ? नौति । प्रणौति । ददाति । प्रददाति । पृच्छति । सपृच्छति देवदत्तम् ।

गमेः प्रतीक्षायाम् ॥ १।४।२८ ॥ गमेर्यन्तादाङ्पूर्वात् प्रतीक्षाया[3] प्रतिपालने वर्तमानाल्लकारस्य तङो भवन्ति । आगमयते गुरुं, प्रतीक्षत इत्यर्थः । आगमयस्व तावत् । कचित् कालं प्रतीक्षस्वेत्यर्थः । प्रतीक्षायामिति किम् ? आगमयति विद्याम् ।

ह्वस्पर्धे ॥१।४।२९॥ ह्वः ह्वेङ्धातोराङ्पूर्वात् स्पर्धे(अर्थे) लकारस्य तङो भवन्ति । स्पर्धे शब्दो यदा सघर्षस्तदा धात्वर्थस्योपाधिनिर्देश. । यदा संघर्षपूर्वकमाह्वानं तदाऽर्थनिर्देश. । मल्लो मल्लमाह्वयते । स्पर्धमानस्तस्याह्वानं करोतीत्यर्थ. । स्पर्धे इति किम् ? गामाह्वयति ।

सन्निवेः ॥ १।४।३० ॥ सं नि वि इत्येवंपूर्वाद् ह्वयतेर्लकारस्य तङो[4] भवन्ति । संह्वयते । निह्वयते । विह्वयते ।

उपात् ॥१।४।३१ ॥ उपपूर्वात् ह्वयतेर्लस्तङो भवन्ति । उपह्वयते । उपह्वयेते । उपह्वयन्ते । योगविभाग उत्तरार्थ ।

यमो विवाहे ॥ १।४।३२ ॥ विवाहः पाणिग्रहणं—दारकर्म, विवाहे वर्तमानात् उपपूर्वाद् [5]यमेर्ल-(लकारस्य)स्तङो भवन्ति । भार्यामुपयच्छते[6] । विवाह इति किम् ? [7]शकटमुपयच्छति । स्वीकरोतीत्यर्थ. । शाट-कान्तमुपयच्छति । उपसंहतीत्यर्थः । देवदत्तो जिनदत्तस्य भार्यामुपयच्छति । उपपादयतीत्यर्थः ।

स्थः पथिमैत्रीदेवार्चासंगममन्त्रकरणे ॥ १।४।३३ ॥ पथि मैत्री देवार्चा संगम मन्त्रकरण-विषयादुपपूर्वात्तिष्ठतेर्लकारस्य तङो भवन्ति । पथि स्थोऽर्थ इति [8]धातुरूपे पथीत्युच्यते । मैत्र्युपस्थानस्य हेतोः प्रयोजनं वा । देवार्चा संगमो मन्त्रकरणश्च धातोरर्थाः । मन्त्रः करणं यस्य स मन्त्रकरणः । पथि—अयं पन्थाः[9] साकेतमुपतिष्ठते । मैत्र्या—रथिकानुपतिष्ठते । महामात्रानुपतिष्ठते । देवार्चायाम्—जिनेन्द्रमुपतिष्ठते[10] । संगमे—गङ्गा[11] यमुनामुपतिष्ठते । मन्त्रकरणे—जगत्या उपतिष्ठते । आग्नेय्या आग्नीन्द्रमुपतिष्ठते । एतेष्विति किम् ? एतदेवास्य कापेयं [12]यदर्कमुपतिष्ठति । मैत्र्यं[13] मित्रतया मित्रं वा कर्तुमाचरणमुच्यते । संगमस्तु विश्लेष. । मन्त्रग्रहणं किम् ? भर्तारमुपतिष्ठति यौवनेन । करणग्रहणं किम् ? शुचि विद्यामुपतिष्ठति ।

लिप्सौ वा ॥ १।४।३४ ॥ उपपूर्वात्तिष्ठतेर्लिप्सौ वर्तमानस्य लकारस्य तङो वा भवन्ति । भिक्षुर्गृहपतिकुलान्युपतिष्ठते, उपतिष्ठति वा । लिप्समान उपगच्छतीत्यर्थः ।

उदोऽनूर्ध्वे ॥ १।४।३५ ॥ अनूर्ध्वे य ईहश्चेष्टा व्यापारः परिस्पन्दस्तत्र वर्तमानादुत्पूर्वा-

---

१. स्थितस्यैक- क० म० । २. करैः, क० म० टि० । ३. 'प्रतीक्ष्यौ प्रतिपाल्यार्थौ', इति वैजयन्ती । क० म० टि० । ४. यमेर्लकारस्य तङो- क० म० । ५. -ते कन्यामुपयच्छते वि- क० म० । परिणयतीत्यर्थः, क० म० टि० । ६. शाटकमु- क० म० । ७. -रूपि पथीत्युच्यते, म० । -रूपि प- क० । ८ पन्थाः सुग्रमुपतिष्ठते सा- क० म० । ९. अर्चयतीत्यर्थः, क० म० टि० । १०. यमुना गङ्गामुप- क० म० । संगच्छ(ते)तीत्यर्थः । ११. यदुक्तमिति वा पाठः, क० म० टि० । १२. मैत्रीसङ्गमयोः को विशेषः—सङ्गमस्त्वपश्लेषः, तथथा गङ्गा यमुनामुपतिष्ठते । मैत्र्यां तु नाप्युपश्लेषणम्, सम्बन्धमात्रः(म्) क० म० टि० । १३. -मस्त्वपश्ले- क० म० ।

तिष्ठतेर्लकारस्य[1] तङो भवन्ति । शास्त्रे उपतिष्ठते[2] । घटते । तत्रोद्योगं करोतीत्यर्थः । अनूर्ध्वंह इति किम् ? अस्माद्ग्रामाच्छतमुत्तिष्ठति । उपपद्यत इत्यर्थ. । अनूर्ध्वंग्रहणं किम् ? आसनादुत्तिष्ठति ।

संविप्रावात् ॥ १।४।३६ ॥ सं वि प्र अव इत्येवंपूर्वात्तिष्ठते[3]र्लस्तङो भवन्ति । संतिष्ठते । वितिष्ठते । प्रतिष्ठते । अवतिष्ठते ।

स्थेयप्रकाशने ॥ १।४।३७ ॥ तिष्ठन्त्यस्मिन्निति स्थेय. । ह्रस्वशब्दोऽयं विवादपदे निर्णेता प्रमाणभूतः पुरुष उच्यते । स्थेयविषयाया क्रियाया[4] प्रकाशने च वर्तमानात्तिष्ठतेर्लस्तङो भवन्ति । त्वयि तिष्ठते[5] । संशय्य कर्णादिषु तिष्ठते यः । प्रमाणभूते निर्णयाय तिष्ठतीत्यर्थ । प्रकाशने–तिष्ठते कन्याच्छात्रेभ्यः । तिष्ठते वृषली ग्रामपुत्रेभ्य. । स्वाभिप्रायप्रकाशनाय तत्समर्थमाचरति—तत्समर्थाचरणेन वा स्वाभिप्रायं प्रकाशयतीत्यर्थ. ।

प्रतिज्ञाने ॥ १।४।३८ ॥ प्रतिज्ञानेऽभ्युपगमे वर्तमानात्तिष्ठतेर्लस्तङो भवन्ति । आपिशलिस्ति[6]शकारमुपतिष्ठते । [7]तदतदात्मकं तत्त्वमातिष्ठते । योगविभाग उत्तरार्थः ।

समो गिरात् ॥ १।४।३९ ॥ सम्पूर्वाद् गिरात् गिरतेर्धातोः प्रतिज्ञाने वर्तमानाल्लस्तङो भवन्ति । संगिरते[8] । प्रतिज्ञान इति किम् ? संगिरति ग्रासम् । गिरादिति शविकरणनिर्देशो गृणातिनिवृत्त्यर्थ ।

अवात् ॥ १।४।४० ॥ अवपूर्वाद् गिरतेर्लस्तङो भवन्ति । अवगिरते ।

सम्प्रतेर्ह्वोऽस्मृतौ ॥ १।४।४१ ॥ सम्प्रति इत्येवंपूर्वादस्मृतौ वर्तमानाज्ज्ञानातेर्लस्तङो भवन्ति । शतं संजानीते । शतेन संजानीते । शतं प्रतिजानीते । सहस्रं प्रतिजानीते । अस्मृताविति किम् ? मातरं सजानाति । स्मरतीत्यर्थ. ।

निह्नवे ॥ १।४।४२ ॥ निह्नवोऽपह्नु[9]तिरपलापस्तत्र वर्तमानाज्ज्ञानातेर्लस्तङो भवन्ति । [10]शतमुपजानीते । सहस्रमुपजानीते[10] । अपह्नुत इत्यर्थ ।

सनोऽनोः ॥ १।४।४३ ॥ सन्नन्ताज्ज्ञानातेर्लस्तङो भवन्ति न चेत् सोऽनोरुपसर्गात् परो भवति । धर्मं जिज्ञासते । अननोरिति किम् ? धर्ममनु जिज्ञासति । औषधस्यानुजिज्ञासत[11] इत्यकर्मके [12]प्राग्लडिति भवति ।

शुधोऽप्रत्याङ् ॥ १।४।४४ ॥ शुधेतेस्सन्नन्ताल्लस्तङो भवन्ति न चेत् स प्रत्याङ्भ्यामुपसर्गाभ्यां परो भवति । धर्मं शुश्रूषते । अप्रत्याङ इति किम् ? प्रतिशुश्रूषति[13] । देवदत्तं प्रति शुश्रूषत इत्यत्र योगाभावात् प्रतिषेधो न भवति ।

स्मृदृशः ॥ १।४।४५ ॥ स्मरतेर्दृशश्च सन्नन्ताल्लस्तङो भवन्ति । सुस्मूर्षते । विदृक्षते ।

प्राग्वत्[14] ॥ १।४।४६ ॥ सन प्राच. प्रकृतेर्लकारस्य यथा तङो भवन्ति तद्वत् सन्नन्तादपि लस्तङो भवन्ति । एदिधिषते । पिस्पर्धिषते । निरसिसिषति[15] । प्रयुयुक्षते । उपयुयुक्षते । अथ प्रकृतेर्नास्ति प्रत्ययान्तादपि नास्ति । द्वन्द्व यज्ञपात्राणि प्रयुयुक्षति । शिशत्सतीत्यत्र च शीयादेशात्तङ् न प्रकृतेरिति न भवति । लग्रहणं लसामान्यकार्यातिदेशार्थम् । श्वा सुमूर्षति । श्वा असुमूर्षीत् । तिङादेरनुबन्धकरणसामर्थ्यात् तितिक्षत इत्यादौ प्राग्लडिति[16] भवति ।

---

१. -तेर्लस्त- क० म० । २. -ते चरणे उत्तिष्ठते च- क० म० । ३. -तेर्लकारस्य त- क० म० । ४. अनेकार्थत्वाद्धातूनां तिष्ठतेरर्थप्रकाशनमित्यभिप्रायः । क० म० टि० । ५. -ते मयि तिष्ठते सं- क० म० । ६. -लिरस्ति- क० म० । ७. त(स)दत्व(स)दात्म- क० म० । ८. -ते परलोकं संगिरते प्र- क० म० । ९. -तमप- क० म० । १०. -शमप-, क० म० । ११. -ज्ञासत, क० म० । १२. -ग्लदिति, क० म० । १३. -ति आसुश्रूषति वे- क० म० । १४. प्राग्ववत्, क० म० । १५. -ति निरसिसिषते, प्र- क० म० । १६. प्राग्ल्वदिति, क० म० ।

आमः कृञः ॥ १।४।४७ ॥ आमः कृञ परस्य लकारस्य प्रायः प्रकृतेर्लकारस्येव तङो भवन्ति। ईहांचक्रे। ईक्षांचक्रे। समूहांचक्रे। समूहांचकार[1]। आम इति किम्? ईहते, करोति। कृञ इति किम्? ईक्षांबभूव। इक्षामास। प्राग्वदिति[2] किम्? उदुम्बांचकार। उदुम्बांचकार।

न ॥ १।४।४८ ॥ आमः परात् कृञो लस्तङो न भवन्ति। उदुम्बांचकार। उदुम्बांचकार। त्रिदिति फलेशे प्राप्तिः प्रतिषिध्यते।

गन्धनावक्षेपसेवासाहसप्रतियत्नप्रकथाऽन्ययेषु ॥ १।४।४९ ॥ गन्धनादिष्वर्थेषु वर्तमानात् कृञो लस्तङो भवन्ति। गन्धनमुपकारात्मकं सूचनम्। तथ्येनातथ्येन वा गुणेन वा प्रकाशनम्। प्रोत्साहनादिकमन्ये प्राहुः। तत्र उत्कुरुते। उदाकुरुते। अद्याकुरुते सूचयतीत्यर्थः। अक्षेपवर्णमवक्षेपः—कुत्सनं भर्त्सनं वा। दुर्वृत्तानवकुरुते,—कुत्सयतीत्यर्थः। श्येनो वर्तिकामवकुरुते भर्त्सयतीत्यर्थः। सेवाऽनुवृत्तिः—गणकान् प्रकुरुते। महामात्रान् प्रकुरुते। सेवत इत्यर्थः। सहसा प्रवृत्तिः साहसं साहसिकं कर्म। परिवारान्[3] प्रकुरुते। तेषु सहसा वर्तत इत्यर्थः। सतो गुणाधानं प्रतियत्नः। एधोदकस्योपस्कुरुते। काण्डगुणस्योपस्कुरुते। सतस्तस्य प्रकर्षाया व्यापत्तये वा किंचित् करोतीत्यर्थः। प्रकर्षेण कथनं कथनप्रारम्भो वा प्रकथा। जनवादान् प्रकुरुते। प्रकर्षेण कथयति कथयितुं वा प्रारभत इत्यर्थः। धर्माद्यर्थं विनियोगो व्यय। शतं प्रकुरुते। सहस्रं प्रकुरुते। धर्मादिष्वर्थं विनियुङ्क्त इत्यर्थः।

प्रसहनेऽधेः ॥ १।४।५० ॥ अधिपूर्वात् प्रसहनेऽर्थे वर्तमानात् कृञो लस्तङो भवन्ति। प्रसहनमभिभवोऽपराजयो वा। शत्रूनधिकुरुते। तमधिचक्रे[4]। तं प्रसेहे। तमभिबभूव। तेन वा न पराजित इत्यर्थः। प्रसहन इति किम्? अधिकरोति। अधेरिति किम्? शत्रून् प्रकरोति।

दीप्तिज्ञानेहाविमत्युपसंभाषोपमन्त्रणे वदः ॥ १।४।५१ ॥ दीप्तिज्ञानेहाविमतिषु विशेषणे उपसंभाषायामुपमन्त्रणे चार्थे वर्तमानात् वदतेर्लकारस्य तङो भवन्ति। दीप्तौ—वदते विद्वान्। स्याद्वादे। दीप्यमानो वदतीत्यर्थः। वदन् दीप्यत इत्येके। ज्ञाने—वदते विद्वान् स्याद्वादे। ज्ञात्वा वदतीत्यर्थः[5]। ईहा चेष्टा यत्न उत्साहस्तत्र—श्रुते वदते। तपसि वदते। तद्विषयमुत्साहं वदति। वाचाऽविष्करोतीत्यर्थः। नानामतिर्विमतिस्तत्र—गेहे विवदन्ते। क्षेत्रे विवदन्ते। विमत्या किंचिद्भाषन्त इत्यर्थः। उपसंभाषा—उपसान्त्वनमुपालम्भो वा—कर्मकरानुपवदते। उपसान्त्वयति, उपालभते वेत्यर्थः। उपमन्त्रणं रहस्युपच्छन्दनम्। कुलभार्यामुपवदते। परदारानुपवदते। उपच्छन्दयतीत्यर्थः। दीप्त्यादयः सर्वे धातोरर्था एवेत्येके। एतेष्विति किम्? देवदत्तो वदति।

व्यक्तवाचां सहोक्तौ ॥ १।४।५२ ॥ व्यक्ता वाग्येषां ते व्यक्तवाचः, यस्यां वाचि व्यक्ता वर्णा अर्थो वा गृह्यते सा व्यक्ता(वाग्)—व्यक्तवाचां सहोक्तौ संभूयोच्चारणे वदेर्लकारस्य तङो भवन्ति। संप्रवदन्ते ग्राम्याः। संप्रवदन्ते जनाः। व्यक्तवाचामिति किम्? संप्रवदन्ति कुक्कुटाः[6]।

विप्रलापे वा ॥ १।४।५३ ॥ (वि) विरुद्धः प्रलापो विप्रलापः। विप्रलापयुक्तायां[7] व्यक्तवाचि सहोक्तौ वदतेर्लकारस्य तङो वा भवन्ति। विप्रवदन्ते मौहूर्ताः। विप्रवदन्ति मौहूर्ताः। विप्रवदन्ते भिषजः। विप्रवदन्ति भिषजः। परस्परप्रतिषेधेन युगपत्प्रलपन्तीत्यर्थः। विप्रलाप इति किम्? संप्रवदन्ते वैयाकरणाः। व्यक्तवाचामिति किम्? विप्रवदन्ति शकुनयः। सहोक्ताविति किम्? मौहूर्ता मौहूर्तेन सह क्रमेण विप्रवदति।

---

१. उद्ग्रसो वेत्यादिना वा तङ्। क० म० टि०। २. प्राग्वदि- क० म०। ३. -नमप- क० म०। ४. परदारान् क० म०। ५. तं हाधि- क० म०। ६. -प्तौ दीप्तौ व- क० म०। ७. -र्थः वदितुं जानातीत्येके ई- क० म०। ८. भद्रे! भजस्व मामिदं ते स्यामिति एवमभीष्टार्थं प्रापयतीत्यर्थः, क० म०। ९. -टाः शुकसारिकादयः केषांचिद् व्यक्तवाचः। अपरेषां न। सहोक्ताविति किम्? ऋषिर्वदति। क० म०। १०. -लापात्मिकायां व्यक्तवाचां स- क० म०।

कर्मण्यसत्यर्थोः ॥ १।४।५४ ॥ व्यक्तवाचामिति वर्तते । अनूपसर्गाद्दृशेर्व्यक्तवाचां संबन्धिनो लकारस्य तङो भवन्ति कर्मण्यसति । अनुवदते देवदत्तो जिनदत्तस्य, यथा जिनदत्तो वदति तथा देवदत्तो वदति । जिनदत्तेन वा पूर्वमुक्ते पश्चाद् देवदत्तो वदतीत्यर्थः । अनुः सादृश्ये पश्चादर्थे वा । कर्मण्यसतीति किम् ? जिनदत्तेनोक्तमनुवदति देवदत्तः । पुनर्वदतीत्यर्थः । व्यक्तवाचामिति किम् ? अनुवदति वीणा ।

ज्ञोपस्थः ॥ १।४।५५ ॥ ज्ञा इत्येतस्मादुपपूर्वाच्च तिष्ठतेः कर्मण्यसति लस्तङो भवन्ति । सर्पिषो जानीते । ओषधस्य जानीते । तेनोपायेन प्रवर्तत इत्यर्थः । [1]यावद्भुक्तमुपतिष्ठते । यावदोदनमुपतिष्ठते । योगे—उपतिष्ठते । ज्ञानमूलस्य[2] ज्ञेयेषूपतिष्ठते । कर्मण्यसतीति किम् ? स्वरेण पुत्रं जानाति । राजानमुपतिष्ठति ।

समोऽर्तिस्वरतिभ्रुदृशिवद्गमपृच्छृच्छः ॥ १।४।५६ ॥ सम्पूर्वेभ्योऽर्तिस्वरतिभ्यां भ्रु दृ शिवद् गम प्रच्छि ऋच्छ इत्येतेभ्यश्च धातुभ्यो लस्तङो भवन्ति कर्मण्यसति । समियूते । समरिष्यते । संस्वरते । संभ्रुणुते । संपश्यते । संवित्ते । संगच्छते । संपृच्छते । समृच्छते । समृच्छिष्यते । कर्मण्यसतीति किम् ? रूपं संपश्यति । अर्तीत्यादिर्जुहोत्यादिश्च गृह्यते । विदि नित्यमतङ् । प्राप्तिमद्भिरर्त्यादिभि. साहचर्याद्वित्तिर्गृह्यते न विन्दतिः ।

वेः कृञः शब्दे चानाशे ॥ १।४।५७ ॥ विपूर्वात् करोतेरनाशेऽर्थे वर्तमानाल्लकारस्य तङो भवन्ति कर्मण्यसति शब्दे च कर्मणि । कर्मण्यसति विकुर्वते सैन्धवाः । साध्वदिताः[3] शोभनं फलन्तीत्यर्थः । ओदनस्य पूर्णाध्छात्रा विकुर्वते । निष्फलं चेष्टन्त इत्यर्थः । शब्दे—विकुरुते क्रोष्टा । स्वरान् विकुरुते ध्वाक्षः । स्वरान् नानोत्पादयतीत्यर्थः । शब्दे चेति किम् ? विकरोति पयः । अनाश इति किम् ? विकरोत्यध्वाय विकरोति शब्दं विनाशयतीत्यर्थः ।

यङ्ञ्नः स्वेऽङ्गे चाहः ॥१।४।५८॥ आङ्पूर्वाद्यमेर्हन्तेश्च लस्तङो भवन्ति कर्मण्यसति स्वे आत्मीये चाङ्गे कर्तुः कर्मणि । कर्मण्यसति–आयच्छते । आहते[4] । स्वेऽङ्गे–आयच्छते पाणिम् । आहते शिरः । स्वेऽङ्गे चेति किम् ? आयच्छति रज्जुम् । आहन्ति वृषलम् । स्व इति किम् ? आयच्छति पादौ देवदत्तः । आहन्ति शिरो देवदत्तस्य । अङ्ग इति किम् ? स्वामायच्छति रज्जुम् । स्वं पुत्रमाहन्ति । स्वाङ्ग इति समासे पारिभाषिकप्रतिपत्तिः स्यादिरयसमासः चकारोऽसतीत्यस्याभिसंबन्धार्थः ।

व्युदस्तपः ॥१।५।५९॥ वि उत् इत्येवंपूर्वात् तपेर्लस्तङो भवन्ति । कर्मण्यसति स्वाङ्गे च कर्तुः कर्मणि । वितपते[5] राजा । दीप्यते इत्यर्थः । स्वेऽङ्गे–वितपते पाणिम् । उत्तपते पाणिम् । वितपते पृष्ठम् । उत्तपते पृष्ठम् । तापयतीत्यर्थः । व्युद इति किम् ? निष्टपति, स्वेऽङ्गे[6](स्वाङ्गे) इति किम् ? वितपति पृथिवीं सविता । संतापयतीत्यर्थः । उत्तपति सुवर्णं सुवर्णकारः । एव इति किम् ? उत्तपति पृष्ठं देवदत्तस्य । अङ्ग इति किम् ? स्वं सुवर्णमुत्तपति ।

न प्राणिन्यणिजो णिजन्तस्य ॥१।४।६०॥ प्राणिकर्तृविषयेऽर्थे वर्तमानादणिजन्ताद्धातोर्यो णिच् तदन्तात् परस्य लकारस्य तस्याणिजोऽणिजन्तप्रकृतेर्धातोः कर्मण्यसति तङो न भवन्ति । आस्ते देवदत्तः । आसयति देवदत्तम् । शेते देवदत्तः । शाययति देवदत्तम् । प्राणिनीति किम् ? शुष्यन्ति व्रीहयः । शोषयति व्रीहीन् । पतति कुसूल. । पातयति कुसूलम् । अणिज इति किम् ? आरोपयमाणं प्रयोजयति–आरोपयते । अकारः किम् ? चेतयमानं प्रयोजयति चेतयति । अत्र तङ. प्रतिषेधो भवत्येव । णिज इति किम् ? आस्ते ।

---

१. भोजने सन्निधीयत इत्यर्थः । क० म० टि० । २. ज्ञानमस्य क० म० । ३. साधुदान्ता (साध्वदन्ता) शोभनं दलन्तीत्यर्थः क० म० । ४. ताडयतीत्यर्थः, क० म० टि० । ५. -ते उत्तपते रा-, क० म० । ६. -ङ्गे चेति— क० म० ।

धीते । अकारः किम् ? चेतयते । अनुबन्धोऽनुचयते[1] देवदत्तमिति सकर्मकार्थः स्यात् । स्वार्थिको णिजिति[2] चिति प्राणिनि भवति तस्येत्यणिअर्थमन्यथा णिच एव कर्माभावः स्यात् । तत्रारोहयते हस्ती स्वयमेवेत्यत्र प्रतिषेधः स्यात् । नासयति देवदत्तमिति । कर्मण्यसतीति किम् ? कटं कुर्वाणं प्रयोजयति । कट कारयते । फलेशे कर्तरि प्राप्ति. प्रतिषिध्यते ।

अनात्मन्यनाध्याने[3] ॥ १।४।६१ ॥ अणिजो णिजन्तस्य कर्मणीति वर्तते । अणिजन्ताद्धातोर्यो णिच् तदन्तात् परस्य लकारस्य तस्य णिच्प्रकृतेरणिच[4] स्तद्वृत्तिसमुदायिनो[5] धातोः कर्मणि कर्तरि वर्तमानस्य तङो भवन्ति न चेत् तत्कर्मात्मा भवति । स च णिच् प्रकृतिर्धात्वर्थाराध्याने स्मृतौ वर्तते । आरोहन्ति हस्तिनं हस्तिपकाः । आरोहयते हस्ती स्वयमेव । पश्यन्ति भृत्याः राजानम् । दर्शयते भृत्यान् राजा स्वयमेव । अनात्मनीति किम् ? हन्त्यात्मानं घातयत्यात्मा । आरोहयत्यात्मानं हस्ती । अनाध्यान इति किम् ? स्मरति वनगुल्मं कोकिलः । स्मारयत्येनं वनगुल्मः । अणिज इति किम् ? आरोहन्ति हस्तिनं हस्तिपकाः । आरोहयति हस्तिपकान् महामात्र. । आरोहयन्ति महामात्रेण हस्तिपकाः स्वयमेव । अकारः किम् ? गुणयति गणं गोपालकः । गुणयते गण. स्वयमेव । णिच इति किम् ? आरुह्यमाणो हस्ती स्थलमारोहति । तस्येति किम् ? आरुह्यमाणो हस्ती स्थलमारोहयति । कर्मणीति किम् ? लुनाति दात्रेण । लावयति दात्रं स्वयमेव । आरोहन्ति हस्तिन हस्तिपकाः । आरोहयत्येनं महामात्रं इत्यत्र न तत्कर्मणि लकारो वर्तते इति न भवति । अफलेशे कर्तरि–कर्तृस्थक्रियार्थं वचनम् ।

भीष्मिल्यां षाकारे ॥ १।४।६२ ॥ णिच इति वर्तते । भीष्मिली इत्येतेषां धातूनां षाकारे यस्मिन्नर्थे एतेषां[9] षकार आकारश्च क्रियते तस्मिन् वर्तमानाना णिजो लकारस्य तङो भवन्ति । षकारो भिय —आकारत्रयाणाम् । मुण्डो भीषयते । जटिलो[10] भीषयते । मुण्डो भापयते । जटिलो भापयते । मुण्डो विस्मापयते । जटिलो विस्मापयते । जटाभिरालापयते । कस्त्वामुल्लापयते । श्येनो वर्तिकामुपलापयते[11] । भीष्मिल्यामिति किम् ? अन्नं साधयति । विद्यां साधयति । ली इति लीनातिलीयत्योरुभयोरपि ग्रहणं बहुवचननिर्देशात् । षाकार इति किम् ? कुञ्चिकया भाययति । रूपेण विस्माययति । घृत विलीनयति । विलापयति विलालयति । निलापयति । प्रयोक्तृतो भयविस्मययोर्भीस्मिङोः षाकारो लियस्तु पूजाप्रलम्भाभिभवेष्वर्थोपादान आकार इति ततोऽन्यत्र न भवति ।

गृधिवञ्च्योर्विप्रलम्भे[12] ॥ १।४।६३ ॥ गृधिवञ्चोर्ण्यन्तयोर्विप्रलम्भेऽर्थे वर्तमानयोर्लस्तङो भवन्ति । विप्रलम्भनं विप्रलम्भः । विसंवादनं मिथ्याफलाख्यानम् । माणवकं गर्धयते । माणवकं वञ्चयते । प्रतारयतीत्यर्थः । विप्रलम्भ इति किम् ? श्वानं गर्धयति । काक्षामस्योत्पादयतीत्यर्थ. । अहिं वञ्चयति । गमयतीत्यर्थः । विना निर्देशः सुदुर्ग्रः उपसर्गादेवेति नियमार्थः ।

मिथ्या कृञोऽभ्यासे ॥ १।४।६४ ॥ मिथ्याशब्देन योगे करोतेर्ण्यन्तस्य लस्तङो भवन्ति अभ्यासे । अभ्यासः पुन. पुनः क्रियाया आवृत्तिः । मिथ्याकारणायाः–पदं मिथ्या कारयते । सूत्रं मिथ्या कारयते । सोपचारं[13] पुन. पुनरुच्चारयति । पाठयतीत्यर्थः । मिथ्येति किम् ? पदं सुष्ठु कारयति । कृञ इति किम् ? पद मिथ्या वाचयति । अभ्यास इति किम् ? पदं मिथ्या कारयति सकृत् ।

धेट्पाहमायमायस्परिमुहरुचिनृतिवद्यस्वल्यर्थेभ्यः प्रभुसुबुधयुक्तशक्तयः फलेशे

---

१. -नुचेतय- क० म० । २. णिजिरिति क० म० । ३. -नाध्याने क० म० । ४. णिजन्तैकदेश-त्वेनावस्थितस्य— क० म० टि० । ५. समवायि- क० म० टि० । ६. गण- क० म० । ७. गणय- क० म० । ८. 'महामात्रास्तत्प्रधाना' इति वैजयन्ती । क० म० टि० । ९. -र्षां णौ ष- क० म० । १०. 'जटिलस्तु जटाचुन्दे जटिलममिलकौचयौ' विश्वः । ११. -कामप- क० म० । १२. -वञ्चोर्वि- क० म० । १३. लक्षणेन विस्पष्टं मुहुर्मुहुरभ्यासस्यतीत्यर्थः क० म० टि० ।

[1]पाय्यादृगते तु वा ॥ १।४।६५ ॥ घेट् पा अद् दम् आयम् आयस् परिमुह रुचि नृति वद वसि–इत्येतेभ्यः चल्यन्तेभ्योऽङ्प्रभृतिभ्यश्च धातुभ्यः. परस्य णिजो लकारस्य फलेशे तत्क्रिया फलस्वामिनि कर्तरि वर्तमानस्य तङो भवन्ति । पदान्तरात्तु प्रतीते फलेशत्वे वा भवन्ति । स च फलेशो यत्फलं क्रियायाः पाकादेरोदनादिप्रधानं यदर्थः स क्रियाप्रारम्भः तस्येशो यस्य तत्फलभावस्वेनाध्यवसीयते स विज्ञायते न कर्मकरादि.[2] । घेट्–धाययते शिशुम् । पा–पाययते[3] देवदत्तम् । अद्–आदयते देवदत्तेन । दम्–दमयते हस्तिनम् । आयम्–आयामयते सर्पम् । आयस्–आयासयते देवदत्तम् । परिमुह–परिमोहयते देवदत्तम् । रुचि–रोचयते देवदत्तम् । नृति–नर्तयते देवदत्तम् । वद्–वादयते देवदत्तम् । वसि–वासयते देवदत्तम् । [4]चल्यर्थादिवर्जितेभ्य.–कटं कारयते । ओदनं पाचयते । पदाद्गते तु वा–स्वं पुत्रं धापयते । स्वं पुत्रं धापयति । स्वं पुत्रं पाययते । स्वं पुत्रं पाययति । घेटादिग्रहणमचल्यर्थमिति च न प्राणिन्यणिज इति च प्रतिषेधे प्राप्ते पा इति पिबतेर्ग्रहणं पातेस्तु पाति देवदत्तो नोदास्ते पालयति देवदत्तमित्येव भवति । वसीति वसतेर्ग्रहणम् । वस्तेस्तु वस्ते देवदत्तो न नग्नः । वासयति देवदत्तमित्येव भवति । [5]चल्यर्थादिप्रतिषेधः किम् ? चल्यर्थे–चलयति शाखाम् । कम्पयति शाखाम् । गमयति ग्राम देवदत्तम् । चल्यर्थाश्चलनार्थाः । अद्यर्थे–निगारयति ग्रासं देवदत्तम् । अभ्यवहारयति ओदनं देवदत्तम् । ग्रासयति रसम् । आशयति । भोजयति । द्रङ्–सूत्रमध्यापयति । प्रु–प्रावयति राज्यम् । प्रापयतीत्यर्थः । द्रु–द्रावयत्ययः । विलाययतीत्यर्थः । स्रु–स्रावयति कुण्डिकाम् । स्पन्दयतीत्यर्थः । बुध–बोधयति पद्मम् । बोधयति शास्त्र देवदत्तम् । युध्–योधयति काष्ठम् । योधयत्यूर्ध्वम्[6] । नश्–नाशयति दुःखम् । जन्–जनयति सुखम् । प्रुद्रुस्रूणामचलनार्थार्थं ग्रहणम् । चल्यद्यर्थादीनामप्राणिकर्तृकार्थं सकर्मकार्थं च । फलेश इति किम् ? पाचयति नियोगी । वस्तुतः फलेशेऽपि तदविवक्षायामपि न भवति पदाद्गते तु वेति पदान्तरेण द्योतिते फलेशे तङ् न प्राप्नोति इति प्रापणार्थम् । कदाचिदेकेनार्थे द्योत्यते कदाचित् द्वाभ्या यथा अवि कवि इति पदान्तरेऽपि द्योतते प्राप्नोतीति प्रतिपत्तौ[7] निवृत्त्यर्थम् । अथ पदान्तरात् फलेशप्रतिपत्तौ[8] लकारेण सामान्यविशेष-विवक्षेति विकल्पसिद्धिविस्पष्टार्थम् । तुशब्दो वाक्यभेदार्थः । घेटादीना विध्यर्थं चल्यादीना प्रतिषेधार्थं चेदं वचनम् । कारयते पाचयते इति जित्त्वादेव सिद्धम् । चोरयति चिन्तयतीति णिचि अकाराभावान्न भवति ।

अभिविदपपवदानुपसर्गज्ञः ॥१।४।६६॥ अभिः इदितः अपपूर्वस्य वदेरनुपसर्गस्य च जानातेर्धातोर्लकारस्य फलेशे कर्तरि वर्तमानस्य तङो भवन्ति पदाद् गते तु वा । अभित्–डुकृञ्–कुरुते । डुधाञ्–धत्ते । इदित् यजि–यजते । डुपचिष्–पचते । लक्षि–लक्षयते । अपवद–धनकामो न्यायमपवदते । अनुपसर्गज्ञः–तत्त्वं जानीते । पदाद्गते–स्वं दानं दत्ते । स्वं दानं ददाति । स्वं कटं करोति । स्वं कटं कुरुते । स्वमोदनं पचते । स्वमोदनं पचति । अपपूर्वग्रहण किम् ? वदति । अनुपसर्गग्रहण किम् ? स्वर्गं प्रजानाति । पन्थानं प्रजानाति । फलेश इति किम् ? यजन्ति याजका । पचन्ति भक्तकराः । कुर्वन्ति कर्मकरा. । याजकादिलभ्यं दक्षिणादि न क्रियाजन्यं फलं क्रियायाः पूर्वं सह च भावात् तत्र तदीशः क्रियाफलेशः ।

यमः समुदाङोऽग्रन्थे ॥१।४।६७॥ सम् उत् आङ् इत्येतेभ्यः परस्य यमेर्लकारस्य फलेशे कर्तरि वर्तमानस्य तङो भवन्ति अग्रन्थे । ग्रन्थविषयश्चेत् प्रयोगो न भवति । पदाद् गते तु वा । संयच्छते व्रीहीन् । उद्यच्छते भारम् । आयच्छते रज्जुम् । पदाद्गते–स्वान् व्रीहीन् संयच्छति । स्वान् व्रीहीन् संयच्छते । समुदाङ इति किम् ? नियच्छति वाचम् । आङ्ग्रहणम् इहास्वाङ्गकर्मकार्थम् । अग्रन्थ इति किम् ? उद्यच्छति चिकित्सितं चिकित्सिते ग्रन्थे । उद्यमं करोतीत्यर्थः । फलेश इति किम् ? संयच्छति[9] व्रीहीन् ।

न पर्याङ्ध्येरमः ॥१।४।६८॥ परि आङ् वि इत्येतेभ्यः परस्य रमेर्लकारस्य तङो न भवन्ति । इदिति

---

१. -शे पदा- क० म० । २. "इमे च पुरुषापातगृध्राणो विद्रवन्त्यरम् । भवन्तः सारमेयाश्च मीषयन्तेतरामिमे ॥" क० म० टि० । ३. पापयते—क० म० । ४. -ल्यर्था- क० म० । ५. चल्यर्था- क० म० । ६. -स्यूर्मिम्- क० म० । ७. प्रतीतौ क० म० । ८. -च्छतीति क० म० ।

प्राप्तिः प्रतिषिध्यते । परिरमति । आरमति । विरमति । पर्याङ्भ्यामिति किम् ? रमते । अभिरमते ।

उपात् ॥१।४।६९॥ उपपूर्वात् रमेर्लस्तङो न भवन्ति । उपरमति देवदत्तम् । उपरमयतीत्यर्थः । योगविभाग उत्तरार्थः ।

वाऽकर्मकात् ॥१।४।७०॥ अकर्मकाद् उपपूर्वाद् रमेर्लस्तङो वा न भवन्ति । उपरमति संतापः । उपरमते संतापः । उपरमत्यवद्यात् । उपरमतेऽवद्यात् ।

व्यादाञोऽपराङ्क्षे ॥१।४।७१॥ व्याङ्पूर्वस्य दाञो लकारस्य तङो न भवन्ति । अपराङ्क्षे पराङ्क्षविषयश्चेत् स व्यादान् न भवति पराङ्क्षकर्मकश्चेन्न भवतीत्यर्थः । नुदान्–प्रच्छः । डीदिति च प्राप्तिः । व्याददाति मुखं व्याघ्रः । कुलं व्याददाति । विपादिका व्याददाति । व्याग्रहणं किम् ? दत्ते । आदत्ते । विदत्ते । अपराङ्क्षे[1] इति किम् ? व्याददते पिपीलिका पतङ्गमुखम् । अकारो[2] देङ्निवृत्त्यर्थः ।

परानोः कुः ॥१।४।७२॥ परा अनु इत्येवंपूर्वस्य कुः कृञो लस्तङो न भवन्ति । पराकरोति । अनुकरोति । गन्धनादौ फलेशे प्राप्ति. ।

प्रत्यत्यभेः क्षिपः ॥१।४।७३॥ प्रति अति अभि इत्येवम्पूर्वस्य क्षिपेर्लस्तङो न भवन्ति । प्रतिक्षिपति । अतिक्षिपति । अभिक्षिपति । इदित्त्वात् प्राप्तिः ।

प्राद्वहः ॥१।४।७४॥ प्रपूर्वस्य वहतेर्लस्तङो न भवन्ति । प्रवहति । प्रवहतः । प्रवहन्ति । इदित्त्वात्प्राप्तिः ।

परेर्मृषश्च ॥१।४।७५॥ परिपूर्वस्य मृषेर्वहेश्च लस्तङो न भवन्ति । परिमृष्यति । परिवहति । इदित्त्वात् प्राप्ति. । वेषाचिच्चकारो नेत्यस्यानुकर्षणार्थः ।

व्यतिहृतेऽगतिहिंसाशब्दे हृवहश्चापरस्परान्योऽन्येतरेतरे॥१।४।७६॥ नेति निवृत्तम् । परस्परसंबन्धिहरणं व्यतिहारः । इतरसंबन्धिन इतरेणेतरसबन्धिनश्चेतरेण ग्रहणं तस्य कर्मव्यतिहृतं तस्मिन् गतिहिंसाशब्दवर्जितेऽर्थे वर्तमानस्य हरतेर्वहतेरन्यस्य च धातोर्लः कर्तरि वर्तमानस्य तङो भवन्ति । परस्पर अन्योऽन्य इतरेतर इत्येतस्मिन्नसति । व्यतिलुनते । व्यतिपुनते । व्यतिभवते ग्रामनगरयोः । व्यतिभवते सेनानाम् । व्यतिसंप्रहरन्ते राजानः । व्यतिवहन्ते नद्यः । व्यतिहृत इति किम् ? लुनन्ति । ततः संप्रहरिष्यन्तौ दृष्टौ[3] कर्णधनञ्जयौ । वहन्ति नद्यः । अगतिहिंसाशब्द इति किम् ? व्यतिगच्छन्ति । व्यतिघ्नन्ति । व्यतिहसन्ति । व्यतिजल्पन्ति । हृवहिग्रहणं प्रतिषेधार्थं चशब्दो धात्वन्तरार्थ । अपरस्पराऽन्योऽन्येतरेतर इति किम् ? परस्परस्य व्यतिलुनन्ति । अन्योऽन्यस्य व्यतिलुनन्ति । इतरेतरस्य व्यतिलुनन्ति । क्रिया[4]व्यतिहारो व्यतिनैनं[5] द्योतित इति परस्परादिभिस्तत्कर्माभिसंबध्यते । परस्परस्य केदारमिति ।

कर्मभावे ॥१।४।७७॥ कर्मणि भावे च यो लकारस्तस्य तङो भवन्ति । कर्मणि—क्रियते कटो देवदत्तेन । ह्रियते भारो देवदत्तेन । भावे—भूयते देवदत्तेन । सुप्यते देवदत्तेन । कर्मभावयोरनेन विधानात् कर्तरि गतः सर्वो विधिः ।

माङ्लटश्शापेऽतङ् तङ्वच्छत्रानशौ ॥१।४।७८॥ माङो यो लट् शापे धातोर्माङा योग आक्षेपे यो लडित्यर्थः तस्य लः स्थानेऽतङ् तङ्वत् शत्रानशावादेशौ भवतः । यतः कुतश्चिच्चेन केनचिद्विशेषणेन यथा कथंचिदतङ् तङ् वा भवति । ततो धातोस्तेन विशेषणेण तथा नित्यमनित्यं वा शत्रानशौ भवतः इत्यर्थः । अतङ्वच्छता भवति । तङ्वदानश् । मा जीवन् यः परावज्ञादुःखदग्धोऽपि जीवति । मा पचन् । मा पचमानः । अत एवादेशवचनादेतस्मिन् विषये लडपि विज्ञायते । अतङ् तङ्वदिति नियमार्थम् ।

---

१. परसंबन्धिना मुखेन सदा सकर्मको भवति तदैव तङ् न भवतीत्यर्थः,— क० म० टि० । -स्वाङ्कर्मके न भवति चेत् । २. देङ् रक्षणे— क० म० टि० । ३. दृष्टा क- क० म० । ४. क्रियाया व्य- क० म० । ५. -नैव यो- क० म० ।

सल्लृङ्वर्त्स्यत्यद्यतनीवत् वा ऽनिटौ ॥१।४।७९॥ सति भवति वर्तमाने धात्वर्थे द्योत्ये यो लट् तस्य वर्त्स्यति भविष्यति यो लृट् तस्य च लः स्थानेऽतङ् तद्वच्छानशौ वा भवतः। अनिटौ न चेत्तिङ्वत्त्वो योगे प्रयुज्यते। यान् यान्तौ यान्तः। शयानः शयानौ शयानाः। निरस्यत्। निरस्यमानः। पचन्। पचमानः। पचन्तरः। पचन्तमः। लृटः सल्वपि—यास्यन्। यास्यन्तौ। यास्यन्तः। शयिष्यमाणः। शयिष्यमाणौ। शयिष्यमाणाः। पक्ष्यन्। पक्ष्यमाणः। पक्ष्यन्तरः। पक्ष्यन्तम। वाववचनात् तिङोऽपि—याति। याति। आस्ते। शेते। निरस्यति। निरस्यते। पचति। पचते। पचतितराम्। पचतितमाम्। यास्यति। शयिष्यते। पक्ष्यति, पक्ष्यते। पक्ष्यतितराम्। पक्ष्यतितमाम्। पचन्तम्। पचमानम्। पचता। पचमानेन। पचन्ते। पचमानाय। पचतः। पचमानात्। पचतः। पचमानस्य। पचति। पचमाने। हे पचन्। हे पचमान। तिष्ठन् मूत्रयति। गच्छन् भक्षयति। शयाना वर्द्धते दूर्वा, आसीनं वर्द्धते बिसम्[1]। तिष्ठन्तोऽनुशासति गणकाः। शयाना भुञ्जते युवानः। अर्जयन् वसति। अधीयानो वसति। कौर्वत। पाचतः। वैक्षमाणिः। कुर्वद्भक्तिः। पचमानभक्तिरित्यत्राप्रथमासमानाधिकरणादौ तिङः सम्बन्धायोगान्नित्यावेवादेशौ। सल्लङ्वर्त्स्यदग्रहणं किम्? वसन्तीह पुराच्छात्रा। अभिजानासि देवदत्त काश्मीरेषु वत्स्यामः। अनिताविति किम्? हन्तीति पलायते। वर्षतीति धावति। करिष्यतीति[2] व्रजति। हरिष्यामीति व्रजति।

लिटः क्वसुकानौ ॥१।४।८०॥ लिटो लः स्थानेऽतङ् तद्वत् क्वसुकानौ आदेशौ वा भवतः। जग्मिवान् संयुगे। तस्थिवान् सः। जघ्निवान् अन्धकारम्। पेचिवान्। पेचान.। तितीर्वान्। [3]तितिराणः। पुपूर्वान्। पुपुराणः। आजोवान्। सस्वजानः। वाग्रहणात्तिङोऽपि भवन्ति—जगाम। जघान। तस्थौ। ततार।

श्वाप्वस्त्वोऽनुवचश्च कर्तरि भूते ॥१।४।८१॥ श्वि इग् वस् सद् इत्येतेभ्योऽनुपूर्वाच्च वचेः परस्य भूते सामान्ये द्योत्ये कर्तरि वर्तमानस्य लिटोऽतङ् तद्वत् क्वसुकानौ आदेशौ वा भवतः। श्वादिभ्यः क्वसुः, अनुवचः कानः, एवमर्थः, एवं पृथङ्निर्देशः श्वि–शुश्रुवान्। उपशुश्रुवान्। इण्–ईयिवान्। समीयिवान्। उपेयिवान्। द्विर्वचनवत् इङपि द्विर्वचन एकादेशे कृते एकाजेव धातुरिति नित्यस्तः परत्वादिटि कृतेऽत्र द्विर्वचनम्। वस्–ऊषिवान्। अनूषिवान्। सद्–आसेदिवान्। उपसेदिवान्। अनुवचः कानः–अनूचानः[4]। अनूचानौ। कर्तरीति किम्? अनुक्तमित्येवान्यत्र कानो भावकर्मणोरपि प्राप्नोति। क्वसुस्तु अतङ् तद्वदिति नियमान्न प्राप्नोति अत एव च सम्पूर्वात् श्रुवोऽकर्मकात् व्यतिहृते च कर्तर्यपि क्वसुर्न भवति। भूतग्रहणं भूतसामान्यप्रतिपत्त्यर्थम् नाभूतेरिहस्ति तत्र च अतएव वचनादादेशपक्षे लिडनुमीयते। तदभावे लुङ्। अश्रौषीत्। अगात्। अवात्सीत्। उपासदत्। अन्वबोचत्। अनद्यतनस्यार्थप्रकरणादिनिरपेक्षं नैतेभ्यः प्रतिपत्तिरस्ति भूतसामान्येऽपि वृत्तेरर्थप्रकरणाद्यपेक्षायां च सामान्यशब्दानामपि विशेषे वृत्तिरस्तीति न तत्र यत्न. क्रियते।

अनाश्वान् ॥१।४।८२॥ अनाश्वानिति अश् भोजन इत्येतस्माच्चानुपूर्वात् कर्तरि भूते लिटः क्वसुरादेश इडभावश्च निपात्यते[5]। अनाश्वान्। अनाश्वांसौ। अनाश्वांसः।

दयायासश्रासगुर्विजादेर्नेकाचोऽनृच्छ्रर्णोरां कृञ्वस्लिट्चानु ॥१।४।८३॥ दय अय आस् कास् इत्येतेभ्यो गुरुरिजादिर्येषां तेभ्योऽनेकाच्भ्यश्च धातुभ्यः ऋच्छति-ऊर्णोतिवर्जितेभ्यः परस्य लिटोऽमादेशो वा भवति तस्य चामो लिङन्ताः कृञ्वस्तयोऽनु पश्चादनन्तरं प्रयुज्यन्ते। दयांचक्रे। दयांबभूव। दयामास। पलायांचक्रे[6]। पलायांबभूव। पलायामास। आसांचक्रे। आसांबभूव। आसामास। कासांचक्रे। कासांबभूव। कासामास। गुर्विजादेः—ईक्षांचक्रे। ईक्षांबभूव। ईक्षामास। उज्झांचकार। उज्झांबभूव। उज्झामास। उच्छांचकार। उच्छांबभूव। उच्छामास। व्युच्छांचकार। व्युच्छांबभूव।

---

१. बिसम् ता०। २. करिष्यामीति ता०। ३. तितिराणः ता०। ४. "अनूचानः प्रवचने साङ्गे-ऽधीतिः गणिश्च सः।" इति अभिधानचिन्तामणिः। क० म० टि०। ५. अप्राप्तप्रापणार्थं प्राप्तप्रतिषेधार्थं च निपातनम्। क० म० टि०। ६. रौ क्रोऽयौ इति रस्य कः। आमः कृञः। क० म० टि०।

व्युच्छमास । एषांचक्रे । एषांबभूव । एषामास । गुरुग्रहणं किम् ? इयेष । इङ्ग्रहणं किम् ? आनर्च । आदिग्रहणं किम् ? निनाय । लुलाव । ईङ्–आयांचक्रे । आयांबभूव । आयामासे । व्यपदेशिवद्भावाद्भवति । अनेकाच:–चुलुम्पाचकार । चुलुम्पांबभूव । चुलुम्पामास । दरिद्रांचकार । दरिद्रांबभूव । दरिद्रामास । चकासाचकार । चकासांबभूव । चकासामास । बुभूषांचकार । बुभूषांबभूव । बुभूषामास । लोलूयांचकार[1] । लोलूयाबभूव । लोलूयामास । केचिदिह प्रत्ययग्रहणमपि कुर्वन्ति तेषां गौरिव चकार । गवांचकार । गवाबभूव । गवामास । तदपरे नेच्छन्ति । लिङ्निमित्तात् गुणिजादेरनेकाचश्च सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति न भवति । ईषतु: । ईषु: । बिभेद । चिच्छेद । अनूच्छूर्णोरिति किम् ? आनर्च । प्रोर्णुनाव । कृञ्वस्ग्रहणं धात्वन्तरव्युदासार्थम् । लिङ्ग्रहणं प्रत्ययान्तरव्युदासार्थम् । अनुग्रहणं पूर्वव्यवहितव्युदासार्थम् ।

जाग्रुषस्समिन्धो वा ॥ १।४।८४ ॥ जागृ उष समिन्धा इत्येतेभ्य: परस्य लिट आमादेशो वा भवति, कृञ्वस्तिलिट् चास्यानुप्रयुज्यते । जागराचकार । जागराबभूव । जागरामास । जजागार । ओषांचकार । ओषांबभूव । ओषामास । उवोष । समिन्धांचक्रे । समिन्धांबभूव । समिन्धामास । समीधे । सम्ग्रहणं किम् ? इन्धांचक्रे । प्रेन्धाचक्रे । केचिदिन्धिरुपसर्गेणार्थं न लभत इत्याहु: । तेषां सम्ग्रहणमुपसर्गोपलक्षणार्थं द्रष्टव्यम् ।

भीह्रीभृहुः श्लुव्वत् ॥ १।४।८५ ॥ भी ह्री भृ हु इत्येतेभ्यो लिट आमादेशो भवति स च श्लुव्वत् भवति । कृञ्वस्ति लिट् चास्यानुप्रयुज्यते । बिभयांचकार । बिभयांबभूव । बिभयामास । बिभय । जिह्रयांचकार । जिह्रयांबभूव । जिह्रयामास । जिह्राय । बिभरांचकार । बिभरांबभूव । बिभरामास । बभार । जुहवांचकार । जुहवांबभूव । जुहवामास । जुहाव । जुहवांचक्रे । जुहुवे ।

विदाल्लिट् ॥ १।४।८६ ॥ विद् ज्ञान इत्यतो धातोर्लिट आमादेशो वा भवति स च कित् कृञ्वस्तिलिट् चास्यानु प्रयुज्यते । विदांचकार । विदांबभूव । विदामास । विवेद । आम्ये च प्राप्नोतीति किद्वचनम् । विदाल्किद्वचनात् पूर्वयोगयोर्विभागाच्चामि स्थानिवद्भावेन लिट्कार्थं द्विर्वचनं किद्भावश्च न भवति । अज्झिर्देशोऽदाद्यर्थ: ।

लेट: कृ लेट् ॥१।४।८७॥ विदाल्लेट आमादेशो वा भवति स च कित् लेडन्तश्चास्य कृञनुप्रयुज्यते । विदांकरोतु । वेत्तु । विदांकुरुताम् । वित्ताम् । विदांकुर्वन्तु । विदन्तु । कृग्रहणं म्वस्तिव्युदासार्थम् ।

झोऽन्तः ॥ १।४।८८ ॥ धातोरादेशस्यावयवझकारस्य अन्तेत्ययमादेशो भवति । भवन्ति । अदन्ति । एधन्ते । वर्द्धन्ते । अकार उच्चारणार्थ: । झ इति किम् ? उज्झिता । चरन्त:[2] । वेशन्त: । जयन्त इत्यौणादिक: ।

द्व्युक्ते अक्षपञ्चतोऽत् ॥१।४।८९॥ द्वे उक्ती यस्य स द्व्युक्ति: । द्विरुक्त इत्यर्थ: । पञ्चवर्ग: पञ्चत् । अक्षाणां पञ्चत् अक्षपञ्चत् अक्षादिपञ्चकमित्यर्थ: । द्विरुक्ताऽक्षादिभ्यश्च पञ्चभ्य: परस्य आदेशावयवझकारस्य अदित्ययमादेशो भवति । अन्तापवाद: । ददति । दधति । ददतु । दधतु । जक्षति । जक्षतु । जाग्रति । जाग्रतु । दरिद्रति । दरिद्रतु । चकासति । चकासतु । शासति । शासतु ।

तङोऽनतः ॥१।४।९०॥ तङो झकारस्यानत: अनकारादुत्तरस्य अत् इत्ययमादेशो भवति । चिन्वते । चिन्वताम् । अचिन्वत । लुनते । लुनताम् । अलुनत । तङ इति किम् ? चिन्वन्ति । सुन्वन्ति । अनत इति किम् ? व्यवन्ते । प्लवन्ते ।

शीङोरत् ॥१।४।९१॥ शीङ: परस्य तङो झकारस्य रत् इत्ययमादेशो भवति । शेरते । शेरताम् । अशेरत ।

---

१. लोलूयाञ्चक्रे क० म० । २. अरन्त: क० म० ।

वेत्तेर्वा ॥१।४।९२॥ वेत्तेः परस्य तङो झकारस्य रवादेशो वा भवति । संविद्रते । संविद्रताम् । समविद्रत । संविदते । संविदताम् । समविदत । तङ इति किम् ? विदन्ति । वेत्तेरित्यादिकस्य ह्रहृणाद्रौधादिकस्य न भवति । विन्दे । विन्दाते । विन्दते ।

यटितः ॥१।४।९३॥ तङ इति ल इति च वर्तते । धातोर्विहितस्य टितो लकारस्य यस्तङ् तस्य एकारादेशो भवति । पचते । पचन्ते । पचध्वे । पचे । पचामहे । टित इति किम् ? अपचत । अपचन्त । तङ इति किम् ? पचति । पचतः । पचमान ।

वह्यामो गेश् ॥१।४।९४॥ टितो लकारस्य तङो वहेरिकारस्य आमश्च गेश् इत्ययमादेशो भवति । पचावहे इति पचेते इति पचेथे इत्यादि गकारो गित्कार्यार्थ. । शकारः आमः सर्वादेशार्थः । अतएव वह्याम इति इकार प्रश्लिष्यते ।

थासस्से ॥१।४।९५॥ टितो लकारस्य थासः से इत्ययमादेशो भवति । पचसे । पेचिषे । पक्तासे । पक्ष्यसे ।

लोराझाड्ढ्वारौरस् ॥१।४।९६॥ लोष्टितो लकारस्य लुट आदेशस्य तङः आझात् त आता झ इत्येतेषा यथाक्रमं ढा रौ रस् इत्येत आदेशा भवन्ति । एधिता । एधितारौ । एधितारः । लोरिति किम् ? एधते । आझादिति किम् ? एधितासे । टित इति किम् ? ऐधिष्ट । तङ इति किम् ? भवितासि । ढकारो ढित्कार्यार्थः । तेन तास आकारादारभ्य लुक् ।

भेः ॥१।४।९७॥ आ इति वर्तते । लोष्टितो लकारस्य लुट आझेरादेशस्य ति तस् झि इत्येतेषा यथाक्रमं ढा रौ रस् इत्येत आदेशा भवन्ति । भविता । भवितारौ । भवितारः । लोरिति किम् ? भवति । टित इति किम् ? अभूत् ।

लिटस्तझस्थैशिरे ॥१।४।९८॥ लिडादेशयोस्त झ इत्येतयोः एश् इरे इत्येतौ यथासंख्यमादेशौ भवत. । पेचे । पेचिरे । जग्मे ग्रामः । जग्मिरे ग्रामाः ।

णमेरौ शातः ॥१।४।९९॥ आकारान्ताद्धातोर्लिटो णश् मिपो रौशादेशो भवति । ददौ । तस्थौ सः । सुप्तोऽहं किल ययौ । पपौ । आ इति किम् ? जगाम मोक्षं भगवान् युगंधरः । सुप्तोऽहं किल विललाप । विललप । मत्तोऽहं किल विरराम[1] । विररम । मिग्रहणमशर्थं शकारो मेः सर्वादेशार्थः ।

मिपोऽश् ॥१।४।१००॥ धातोर्लिटो मिप अशित्ययमादेशो भवति । णशोऽपवादः । वचनात् सोऽपि भवति । एवं चायं विकल्पः सुप्तोऽह्म किल विललप । विललाप । चकर । चकार । लुलव । लुलाव । शकारः सर्वादेशार्थः ।

अतकाण्णशतुसुस्थाथुसझञभ्वमाः ॥१।४।१०१॥ लिटोऽतङा नवानां यथासंख्यं णश् अतुस् उस् थ अथुस् अश् णश् व म इत्येते नवादेशा भवन्ति । पपाच । पेचतुः । पेचुः । पपक्थ । पेचथुः । पेच । पपाच(पपच) । पेचिव । पेचिम । णकारो णित्कार्यार्थ. । शकारः सर्वादेशार्थः ।

विदो लटो वा ॥१।४।१०२॥ विदोऽदादेर्धातोः परस्य लटोऽतङो नवाना यथासंख्यं णशादयो नवादेशा वा भवन्ति । वेद । विदतुः । विदुः । वेत्थ । विदथुः । विद । वेद । विद्व । विद्म । न भवन्ति वा । वेत्ति । वित्तः । विदन्ति । वेत्सि । वित्थः । वित्थ । वेद्मि । विद्वः । विद्मः । लट इति किम् ? विवेद । विविदतुः । विविदुः । विवेदिथ । विविदथुः । विविद । विवेद । विविदिव । विविदिम । लिटो नित्यमेव भवन्ति । अतङामिति किम् ? विन्ते[2] । विन्दाते । विन्दते । विन्दति[3] । विन्दतः । विन्दन्ति । इत्यत्र क्ना[4] व्यवधानान्न भवति ।

---

१. मः ता० । २. विदि विचारणे रौधादिकः । क० म० टि० । ३. विद्ऌ लाभे इति तुदादिः । विपादिस्वाद्लुम् । क० म० टि० । ४. 'तुन्नयः क्नाः' क० म० टि० ।

शतुः क्वसुः ॥१।४।१०३॥ विदोर्लटः शतु: क्वसुरादेशो भवति वा। तत्त्वं विद्वान्। तत्त्वं विदन्। विद्वान् साधुः। ककारः सजूरहस्सोऽतिप्यक्वस्लंसुध्वंसो रिरिति सामान्यग्रहणार्थः। उकारस्तदविघातार्थः।

ब्रुवस्तिप्पञ्चतो णशपञ्चत् ब्रुवश्चाहः ॥१।४।१०४॥ ब्रूतो लटः तिप् तस् झि सिप् थस् इत्येतेषां पञ्चाना यथासंख्यं णश् अतुस् उस् थ अथुस् इत्येते पञ्चादेशा भवन्ति तत्सन्नियोगे च ब्रुवः आहादेशो भवति। आह। आहतुः। आहुः। आत्थ। आहथु.। न वा भवन्ति-ब्रवीति। ब्रूतः। ब्रुवन्ति। ब्रवीषि। ब्रूथः। तिप्पञ्चतः इति स्थान्यर्थमन्यथाऽनन्तरस्य शतुरेव स्यात्। व्यवहितापेक्षया[1] चातङा नवानामपि स्यात्। णशपञ्चदित्यादेशार्थमन्यथानन्तरः क्वसुः स्याद् व्यवहितापेक्षायां च णशादयो नवापीति पञ्च स्युः। ब्रुव इति पुनर्ग्रहणमाह[2] स्तिप्पञ्चदादेशत्वनिवृत्त्यर्थम्। अन्यथा तस्य स्थानित्वेन प्रतीतत्वात् तस्यैवायमप्यादेशो विज्ञायते। पृथङ्निर्देशश्च णशपञ्चतो यथासंख्यार्थः स्यात्।

पर्ङितो लुक् ॥१।४।१०५॥ ङितो लकारस्यातङ एरिकारस्यान्तस्य[3] लुग्भवति। अपचत्। अपचन्। अपचः। ङित इति किम्? पचति। अतङामिति किम्? अपचे। अपचावहि। अपचामहि। इकारान्तस्य[4] विज्ञानाद् बहिरङ्गत्वाच्चेह न भवति। अरुदिताम्। अरुदित।

आद्विषो झेर्जुस् वा ॥१।४।१०६॥ आकारान्ताद् द्विषश्च धातोः परस्य ङिल्लादेशस्य झेर्जुसादेशो वा भवति। अपु., अपान्। अयु', अयान्। अद्विषुः। अद्विषन्। द्विषिसाहचर्यादा इति धातुविज्ञानाद् आकार(रे) लोपाच्च क्ङोणन् इत्यत्र न भवति। अजानन्नित्यत्र व्यवधानाद् अददुः। अदधुरित्यत्र परत्वाच्च नित्य एव विधिः। जुसेति जकारो 'जुस्वक्येडर्' इति विशेषणार्थः।

सिविदज्झेरभ्वः ॥१।४।१०७॥ सिप्रत्ययाद्विदः अज्झेश्च धातोः परस्य ङिल्लादेशस्य झेर्नित्यं जुसादेशो भवति अभ्वः न चेत् स सिर्भुवः परो भवति। सेः—अकार्षुः। अहार्षुः। अदु। अधुः। अपुः। अस्थु'। अगुः। विद —अविदु.। अज्झे —अददु.। अदधु.। अबिभयुः। अजिह्रयुः। अजक्षुः। अजागरुः। अदरिद्रु.। अचकासु'। अशासुः। अभ्व इति किम्? अभूवन्। अभ्व इति सिविदज्झेरित्यस्य व्यधिकरणं विशेषणम्। नज्झेरित्यस्येत्यबोभवुरित्यत्र जुस् भवत्येव।

लेलेः ॥ १।४।१०८ ॥ ङितो लकारस्य लेर्लेङो लेर्लिङश्च झेर्जुसादेशो भवति। पचेयुः। पक्ष्यासुः।

ङ्याट् क्यासट् ॥ १।४।१०९ ॥ लेङादेशस्य लिङादेशस्य चातङा यथासङ्ख्यं ङ्याट् क्यासट् इत्येतावागमौ भवतः। टीयोऽपवाद'। लेङ'—यजेत्। यजेताम्। यजेयुः। पक्ष्यात्। जागृयात्। लिङः—इज्यात्। इज्यास्ताम्। इज्यासु'। उच्यात्। जागर्यात्। ङित्कितोर्यत्रि किजां कर्तरि[5] च विशेषः। इदमेव च ङित्त्वं लिङ्मकारगतं ङित्त्वं तदादेशङित्कार्याय न भवतीति। अचिनवम्। असुनवम्।

रम्मौ भेलोः ॥ १।४।११० ॥ ङितो लकारस्य लेलेः झ इल् इत्येतयोर्यथासङ्ख्यं रन् अत् इत्येतावादेशौ भवतः। पचेरन्। पक्षीरन्। पचेय। पक्षीय। स्थान्यादेशयोर्यथासंख्यं लेलेस्तु वचनभेदान्न भवति।

टीय् ॥ १।४।१११ ॥ लेङ (लेङादेशस्य) लिङादेशस्य (च) तङः टीयागमो भवति। पचेत। पचेयाताम्। पचेरन्। ह्वृ॒वीति। ह्वृ॒वीयाताम्। ह्वृ॒वीरन्। लिङः सटा सहोत्तरत्रोदाहरिष्यामः।

सट स्थीयां लिङ. ॥ १।४।११२ ॥ लिङादेशस्य तकारथकारयोरीयश्च सडागमो भवति। पक्षीष्ट। पक्षीयास्ताम्। पक्षीष्ठाः। पक्षीयास्थाम्। कृषीष्ट। कृषीयास्ताम्। कृषीष्ठाः। कृषीयास्थाम्। लिङ इति किम्? पचेत। पचेयाताम्। पचेथाः। पचेयाथाम्। स्थीयामिति किम्? कृषीरन्। कृषीध्वम्। कृषीय। कृषीवहि। कृषीमहि।

---

१. -क्षेत्रायां चा- क० म०। २. आदेशस्य क० म० टि०। ३. -रिकारान्तस्य(रस्य) क० म०। ४. -त्वविज्ञा- क० म०। ५. अवुः। (अपुः)। अवान् (अपान्) क० म०। ६. जागर्यरि ता०।

तस्थस्थमिपस्मस्तांतंतवमां लेटश्च ॥ १।४।११३ ॥ ङितो लेटश्च सकारस्य तस् थस् थ वस् मस् मि इत्येतेषां यथासंख्यं ताम् तम् त व म आमित्येते आदेशा भवन्ति । ङितः—अपचताम् । अपचतम् । अपचत । अपचाव । अपचाम । अपचम् । अपक्षताम् । अपाक्तम् । अपाक्त । अपाक्ष्व । अपाक्ष्म । अपाक्षम् । लेटः—पचताम् । पचतम् । पचत । पचाव । पचाम । लेटो मेत्यादेशानां बाध्यत इति न भवति चकारो ङितोऽनुकर्षणार्थः ।

सीय्येर्युट्यास् ॥ १।४।११४ ॥ लेटः सि इ मि ए इत्येतेषां यथासंख्यं हि उ नि आम् इत्येते आदेशा भवन्ति । लुनीहि । पुनीहि । पचतु । पचन्तु । पचानि । पठानि । पचताम् । पचेताम् । पचन्ताम् । पचेथाम् । हिन्योरिकारस्योच्चारणसामर्थ्यादुत्वं न भवति ।

म्वेनादेष्टाप् ॥ १।४।११५ ॥ मकारादेर्वकारादेरेकारादेर्नकारादेश्च लेडादेशस्य टापा(बा)गमो भवति । मादे.—करवाम । करवामहै । वादेः—करवाव । करवावहै । एकारादे.—करवै । तनवै । नादेः—करवाणि । तनवानि । टकारो देशविध्यर्थ । पकारः पित्कार्यार्थ. ।

एतोऽगैप् ॥ १।४।११६ ॥ लेडादेशस्य म्वेनादेरेकारस्य ऐबादेशो भवति । आमपवादः । अग्—अगकारानुबन्धकः—करवै । करवावहै । करवामहै । चिनवै । चिनवावहै । चिनवामहै । नादेरेकाराभावादनुदाहरणम् । पचेताम् । पचेथाम् । पचावेदम् । पचामेदमित्यत्रासिद्ध बहिरङ्गमन्तरङ्ग इति न भवति । अगिति किम् ? पचावहायावाम् । पकार इलर्थ.[2] । तत्र हि परत्वादैत्वे टाप् न स्यात् ।

स्वो थाम् ॥१।४।११७॥ लेडादेशस्य सकारवकाराभ्यां परस्यैकारस्य यथाक्रमं व अम् इत्येतावादेशौ भवतः । पचस्व । पचध्वम् । कुरुष्व । कुरुध्वम् ।

भृशादौ हिः ॥१।४।११८॥ भृशादौ भृशाभीक्ष्ण्ये प्रचये च यो लेट् तदादेशस्य हिरादेशो भवति । लुनीहि लुनीहीति लुनाति । लुनीहि लुनीहीति लुनीतः । लुनीहि लुनीहीति लुनन्ति[3] । व्रीहीन् वप लुनीहि पुनीहीति, यतते । व्रीहीन् वप लुनीहि पुनीहीति, यतेते । व्रीहीन् वप लुनीहि पुनीहीति, यतन्ते । एवं सर्ववचनानाम् । लेट इति किम् ? व्रीहीन् वपति । लुनाति । पुनातीति, यतते । अधीष्वमधीष्वमित्यधीष्वमित्यत्र ध्वमोहाभावः[4] । स्वर्धेतिह्यविधानात् विज्ञायते ।

थस्य वा ॥१।४।११९॥ भृशादौ लेटस्थस्य हिरादेशो वा भवति । लुनीहि लुनीहीत्येवं यूयं लुनीथ । लुनीत पुनीतेति यूयं लुनीथ । व्रीहीन् वप लुनीहि पुनीहीति यूयं यतेथे । व्रीहीन् वप लुनीत पुनीतेति यूयं यतध्वे ।

ध्वेरुस्वः ॥१।४।१२०॥ भृशादौ लेटो ध्वेः स्वादेशो वा भवति । अधीष्व अधीष्वेति यूयमधीध्वे । अधीष्वमधीष्वमित्येवं यूयमधीध्वे । सूत्राण्यधीष्व निर्युक्तीरधीष्व भाष्याण्यधीष्वेत्येवं यूयमधीध्वे । सूत्राण्यधीध्वं निर्युक्तीरधीध्वं भाष्याण्यधीध्वमित्यधीध्वे ।

तङः ॥१।४।१२१॥ वेति निवृत्तम् । भृशादौ लेटस्तङः स्वादेशो भवति । हेरपवादः । अधीष्व अधीष्वेत्यधीते । अधीष्व अधीष्वेत्यधीयाते । अधीष्व अधीष्वेत्यधीयते । सूत्राण्यधीष्व निर्युक्तीरधीष्व भाष्याण्यधीष्वेत्यधीते । अधीयाते । अधीयते ।

तुह्योस्तातङाऽऽशिषि ॥१।४।१२२॥ आशिषि तुह्योस्तातादेशो भवति वा । जीवतु भवान् । जीवताद् भवान् । जीव त्वम् । जीवतात् त्वम् । आशिषि किम् ? जीवतु । जीव ।

हि चाप् ॥१।४।१२३॥ हि च ताच्चादेशः । अयं[5] पित्र भवति । स्थानिवद्भावेन प्राप्तं पित्त्वं प्रतिषिध्यते । कुरु लुनीहि लुनीहीति लुनाति कुरुतात्(मृ ता०) अत्रापित्त्वे उत्वे त्वैङभावः ।

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने वृत्तौ प्रथमस्याध्यायस्य चतुर्थः पादः समाप्तः अध्यायश्च प्रथमः ॥

---

१. स्या त० । २. इकादेशौकारस्थानेन परत्वादैकाराल्ल टाविति यावत् । क० म० टि० । ३. प्रचये-क०-म० टि० । ४. मो ह्यभावः- क० म० । ५. स्वः ध्वेर्वेति- क० म० । ६. आशिषीति किम्-क० म० । ७. आः आप् मि- क० म० ।

द्वितीयोऽध्यायः

[प्रथमः पादः]

सुप्सुपा समासो बहुलम् ॥२।१।१॥ सुबन्तं सुबन्तेन सह समाससंज्ञं भवति बहुलम्। विस्पष्टः[1] पटुः—विस्पष्टपटु. । विस्पष्टलवणम् । व्यक्तपटु । व्यक्तलवणम् । सुबिति किम् ? चरन्ति गावो यस्य । सुपेति किम् ? देवदत्तः पचति । बहुलमिति किम् ? प्रयोगानुसरणार्थम् । बहुलग्रहणात्[2] क्वचिदसुपाऽपि समस्यते । भास्यर्कः[3] नभः । अनुव्यचलत् । अधिकारश्चायम् । द्वन्द्वः[4] समासोक्तौ, इति यावत् । समासप्रदेशा.—षष्ठीतौ समास इत्येवमादयः ।

सुज्वार्थे सङ्ख्या सङ्ख्यया सङ्ख्येये बहुव्रीहिः ॥२।१।२॥ वार. सुचोऽर्थः । विकल्पः संशयो वा वाऽर्थस्तत्र सङ्ख्यावाचि सुबन्तं सङ्ख्यया सङ्ख्यावाचिना सङ्ख्येये वर्तमानेन सुबन्तेन सह समास[5]संज्ञं भवति बहुव्रीहिसंज्ञं च । द्विर्दश द्विदशाः[6] । त्रिदशा.[7] । द्विविंशा. । त्रिविंशा । द्वौ वा त्रयो वा द्वित्राः[8] । त्रिचतुराः । पञ्चषाः । अष्टदशा. । सुज्वार्थ इति किम् ? द्वावेव न त्रय. । सङ्ख्येति किम् ? गावो वा दश वा अश्वा वा दश वा । सङ्ख्ययेति किम् ? त्रयो वा गावो वा चत्वारो वा गावो वा । सङ्ख्येय इति किम् ? द्विविंशतिर्गवाम् । बहुव्रीहिप्रदेशाः सन्नन्बहुव्रीहेरित्यादय.[9] ।

आसन्नादूराधिकाभ्यर्धार्धादिडद्द्वितीयाद्यन्यार्थे ॥ २।१।३ ॥ डदिति डप्रत्ययादारभ्या द्वित्रेस्त्रियदिति तकारेण प्रत्याहारः । तस्यार्धादीति विशेषणम् । आसन्न अदूर अधिक अभ्यर्ध इत्येतानि अर्धपूर्वपदानि च डदन्तानि सुबन्तानि सङ्ख्यावाचि[10] सुबन्तेन सह समस्यन्ते । सङ्ख्येये द्वितीयाद्यस्तस्यान्यस्य पदस्यार्थेऽभिधेये[11] समासो बहुव्रीहिसंज्ञो भवति । आसन्ना दश येषा त आसन्नदशाः नवैकादश वा । एवमासन्नविंशाः । आसन्नत्रिंशाः । अदूरदशाः[12] । अदूरत्रिंशाः । अधिका दश येषु ते अधिकदशा.—एकादशादयः । अधिकत्वं दशानामे[13]कत्वाद्यपेक्षम् । अवयवेन विग्रहः समुदाय. समासार्थः । एवमधिकविंशाः । अधिकत्रिंशा. । अभ्यर्धा विंशतिर्येषा तेऽभ्यर्धविंशाः । त्रिंशदित्यर्थः । एवमभ्यर्धत्रिंशाः । अभ्यर्धचत्वारिंशाः । अर्धपञ्चमविंशतयो येषा ते अर्धपञ्चमविंशाः । नवतिरित्यर्थः । एवमर्धचतुर्थविंशा. । अर्धतृतीयविंशा. । आसन्नादिग्रहण किम् ? सन्निकृष्टा दश येषां ते सन्निकृष्टदशान. । इतोऽर्धादिविशेषणं किम् ? पञ्चमी विंशतिर्येषां ते पञ्चमीविंशतयः । ऊनपञ्चमा विंशतयो येषा ते ऊनपञ्चमविंशतयः । डदिति किम् ? अर्धद्वया विंशतिर्येषां ते अर्धद्वयविंशतय. । पूर्वेण सुज्वार्थे समास इति अभ्यर्धाऽर्धादि डद्ग्रहणं सङ्ख्या संज्ञा चानयोर्द्वित्वर्था[14] । द्वितीयाद्यन्यार्थ इति

---

१. विस्पष्ट पटुः—विस्पष्टपटुः क० म० । पटुः क्षेत्रं लोचरते—इत्यभिधानम्। क० म० टि०। २. -दसुबप्यसुपा क० म० । ३. -त्यर्कनभव. म० । ४. सहोक्ताविति क० म० । ५. योगे—ऐकपद्यमेकविभक्तिकं तं चैवमादिकं समासस्य प्रयोजनम् । क० म० टि० । ६. द्विशब्दात् कालाध्वनोर्व्याप्तावित्यौट् । आभ्यां वर्तमानक्रियया सम्बन्ध्यमानो हि कालो वार इत्युच्यते । स कालोऽनेन द्विशब्देन संख्यायते । अत्र भवति क्रियाभ्यावृत्तिः दशभावो हि द्विरावर्तते । धात्वर्थस्य यौगपद्येन वृत्तिर्या वारः । तत्र कर्मणीत्यौट् भवति । प्रतीयमानं कृत्वेऽपि क्रियापेक्षया कर्मत्वात् । द्वौ वारौ भवन्तीति विग्रहः । क० म० टि० । ७. त्रीन् वारान् दश इति विग्रहः—क० म० टि० । ८. "द्वित्रा द्वौ वा त्रयो वा स्यादेवं त्रिचतुरा अपि । चतुःपञ्चा पञ्चषाश्च षट्सप्ताश्चाश्च लक्षिताः ॥" इति वैजयन्ती । क० म० टि० । ९. -रित्येवमादयः क० म० । १०. -वाचिना सु- क० म० । ११. -ये स च समा- क० म० । १२. -शाः अदूरत्रिंशाः । अ- क० म० । १३. -मेकाद्य- क० म० । १४. द्विगुसमास क० म० ।

किम् ? आसन्ना दश । अधिका दशभिः । अधिका षष्टिर्वर्षाण्यस्येत्यधिकषष्टिवर्षः । अधिकषष्टिशब्दयोर्न भवति । अधिका षष्टिर्वर्षाणामस्येति सङ्ख्याने वाक्यमेव । बाहुलकात् । सङ्ख्येय इति सङ्ख्याविशेषणाद् वा एकार्थं चेत्येव सिद्धे प्रतिपदविधानात् प्रमाणीसङ्ख्याङ्गे इत्यनेतत्सम्प्रत्ययार्थं वचनम् ।

अव्ययम् ॥२।१।४॥ अव्ययं सुबन्तं संख्यात्रादिना सुबन्तेन सह समस्यते द्वितीयाद्यन्यपदार्थे सङ्गच्छेयेऽभिधेये स च समासो बहुव्रीहिसंज्ञो भवति । अधिकमुपगता. समीपे दश येषा ते—उपदशा· । नवैकादश वा । एवमुपविंशः । उपत्रिंशा· । इदमपि प्रमाणीसङ्ख्याङ्गे इत्यत्र सम्प्रेत्ययार्थम् । योगविभाग उत्तरार्थः ।

एकार्थं च ॥२।१।५॥ एकः, समानः, अर्थो द्रव्यम्—अधिकरणं यस्य तदेकार्थम् । समानाधिकरणमव्ययं च सुबन्तं सुबन्तेन सह द्वितीयाद्यन्तस्यान्यस्य पदस्यार्थे बहुलं समस्यते स च समासो बहुव्रीहिसंज्ञो भवति । प्राप्तमुदकं यं स प्राप्तोदको ग्रामः । ऊढो रथो येन स ऊढरथोऽनड्वान् । उपहृतो बलिर्यस्मै सोपहृतबलिर्यक्षो । उद्धृतमोदनं यस्याः सोद्धृतौदना स्थाली । चित्रा गावो यस्य स चित्रगुर्देवदत्तः । सुवर्णमलङ्कारो यस्य स सुवर्णालङ्कारः । केशाश्चूडाया यस्य स केशचूड । अविद्यमानः पुत्रो यस्य सोऽविद्यमानपुत्रः । अविद्यमानभार्यः । प्रपतितानि पर्णानि यस्य स प्रपतितपर्णः । प्रपतितपलाशः । ऊर्ध्वं तृतीयं येषा ते ऊर्ध्वतृतीया द्रोणाः । असिद्वितीयः सहायो यस्य सोऽसिद्वितीय. । सङ्कर्षणद्वितीयः । वीराः पुरुषा. यस्मिन् स वीरपुरुषको ग्रामः । अव्ययम्—उच्चैर्मुखं यस्य स उच्चैर्मुख· । नीचैर्मुख. । नास्ति पुत्रो यस्य सोऽपुत्रः । अभार्यो देवदत्तः । प्रपतितानि पर्णानि यस्य स प्रपर्ण. । प्रपलाशो वृक्ष· । अस्ति क्षीरं यस्याः साऽस्तिक्षीरा गौः । सह पुत्रो यस्य येन वा स सपुत्र । आगतभार्य । सलोमकः । सपक्षक । सकर्मक· । तद्वानित्यर्थः । सुप्सुपेत्यस्य द्वयोः परिसमाप्तावपि धर्मादिस्त्रपदादिति लिङ्गाद् बहूनामप्ययं समासः । लोहितस्तक्षकः प्रियो यस्य स लोहिततक्षकप्रिय. । कार्तवीर्यार्जुनप्रिय. । अव्ययग्रहणमनेकार्थार्थम् । एकार्थमिति किम् ? पञ्चभिर्भुक्तमस्य । द्वितीयाद्यन्यार्थ इति किम् ? वृष्टे देवे गतः । यथा मे माता तथा मे पिता । सुस्नातं भोः । अर्थग्रहणं लिङ्गसङ्ख्याविभक्त्यर्थम् । अन्यथा द्वितीयाद्यन्यस्मिन्निति तदन्ते विज्ञायमानेऽपि पदस्य विभक्त्यर्थप्रधानत्वात् तत्र समस्येत । बहुलमित्यधिकारात् पञ्च भुक्तवन्तो यस्य । सहैव दशभिः पुत्रैर्भारं वहति गर्दभी । अमा, सार्धम्, सत्रा, साकम्—पुत्रा अस्येत्यत्र न भवति । क्वचिदन्यत्रापि भवति । करे कृतं येन स कृतकरः । कण्ठे कालो यस्य स कण्ठेकाल. । उरसिलोमा । क्वचिन्नित्यः समासः । प्रपर्ण· । प्रपलाशः । सुमुखी कन्या । कुशीलः पुरुषः । उष्ट्रस्य मुखमिव मुखमस्य स उष्ट्रमुखः । खरमुख. । पितु. स्थानमिव स्थानं यस्य स पितृस्थानः । गुरुस्थान इत्यादौ वृत्तौ, उष्ट्रादिपदमुष्ट्रमुखादितुल्ये वर्तत इति समानाधिकरणानामेव समास· ।

मिथो ग्रहणे प्रहरणे च सरूपं युद्धेऽव्ययीभावः ॥२।१।६॥ मिथोऽन्योऽन्यं गृह्णन्ति यस्मिन् येन वाऽन्योऽन्यं प्रहरन्ति तत्र प्रवर्तमानं समानश्रुतिकं सुबन्तं तत्रैव प्रवर्तमानेन सुबन्तेन सह समस्यते द्वितीयाद्यन्यार्थे युद्धेऽभिधेये । स च समासोऽव्ययीभावसंज्ञो भवति । केशाश्च केशाश्चान्योऽन्यस्य ग्रहणं यस्मिन् युद्धे तत्केशाकेशि । कचाकचि । दण्डाश्च दण्डाश्चान्योऽन्यस्य प्रहरणं यस्मिन् युद्धे तद् दण्डादण्डि । मुसलामुसलि । मुष्टामुष्टि । यष्टायष्टि । अस्यसि वर्तते । मिथ इति किम् ? केशाश्च केशाश्च ग्रहणं युद्धेऽस्य । ग्रहणे प्रहरणे इति किम् ? रथश्च रथश्च मिथो लङ्घनमस्मिन् युद्धे । करणाधिकरणाश्रयण किम् ? भटस्य च भटस्य ग्रहणमस्मिन् युद्धे । अममासकरणं पृथक्समासप्रतिपत्त्यर्थम् । इह न भवति—हस्तश्च हस्तश्चान्यस्य ग्रहणं प्रहरणं चास्मिन् युद्धे । सरूपमिति किम् ? केशाश्च कचाश्च मिथोग्रहणमस्मिन् युद्धे । युद्ध इति किम् ? हस्तश्च हस्तश्चान्योऽन्यस्य ग्रहणमस्मिन् सख्ये । अव्ययीभावप्रदेशाः अव्ययीभावस्येत्येवमादयः ।

नदीभिर्नाम्नि ॥२।१।७॥ नदीवाचिभिः सुबन्तैः सुबन्तं द्वितीयाद्यन्यार्थे संज्ञायां विषये समस्यते । स च सरूपो (समासो)ऽव्ययीभावसंज्ञो भवति । उन्मत्ता गङ्गा यस्मिंस्तद् उन्मत्तगङ्गम् । लोहितगङ्गम् ।

---

१. मिश्रप्रवृत्तिनिवृत्तयोः शब्दयोरेकाधिकरणे समावेशः समानाधिकरणम् , क० म० टि० । २. -ौ यस्य क० म० । ३. -अर्धं तृ- क० म० । । ४. अर्धतृ- क० म० । ५. धर्मादिस्त्रुपदा -क० । ६. -वादन्या- क० म० । ७. सामानाधिकरण्येऽपि क० म० टि० । ८. -णे चेति क० म० ।

तूष्णींगङ्गम्। शनैर्गङ्गम्। इमानि देशनामानि। नदीभिरिति किम्? अर्ककीर्तिः। चन्द्रकीर्तिः। नाम्नीति किम्? शीघ्रगङ्गो देशः। द्वितीयाद्यन्यार्थ इति किम्? कृष्णवेणा।

सङ्ख्या वंश्येन पूर्वपदार्थे ॥२।१।८॥ वंशे[1] भवो वंश्य आद्यः प्रथमः कारणपुरुषः। सङ्ख्यावाचि-सुबन्तं नदीवाचिभिर्वंश्यवाचिभिश्च सुबन्तैः सह समस्यते पूर्वपदार्थेऽभिधेयेऽव्ययीभावश्च समासो भवति। नदीभिः—सप्तगङ्ग.[2]। सप्तगङ्गम्। द्वियमुनम्। पञ्चनदम्। सप्तगोदावरम्[3]। वंश्यैः—द्वौ मुनी वंश्यौ व्याकरणस्य द्विमुनि व्याकरणम्[4]। त्रिमुनि व्याकरणम्[5]। सप्तकाशि। त्रिकोसलमस्य राज्यस्य। एकविंशतिभारद्वाजमस्य-कुलस्य। पूर्वपदार्थ इति किम्? द्वे इरावत्यावस्मिन् स द्वीरावतीको देशः। सप्तानां गोदावरीणां समाहारः सप्तगोदावरि। एका नदी, एकनदी। अन्यान्यपदाद्यर्थं यथायथं बहुव्रीह्यादयः समासा भवन्ति। द्विमुनि व्याकर-णम्। त्रिमुनि व्याकरणमिति विद्यया तद्वतामभेदविवक्षाया भवति।

पारे मध्येऽन्तः षष्ठ्या ॥२।१।९॥ पारे मध्ये अन्तरित्येतानि सुबन्तानि षष्ठ्यन्तेन सह समस्यन्ते पूर्वपदार्थेऽभिधेये स च समासोऽव्ययीभावसंज्ञो भवति। तत्सन्नियोगे च पारे मध्य इति एकारान्तत्वं निपात्यते गङ्गायाः पारं—पारेगङ्गम्। पारेसमुद्रम्। मध्यं गङ्गायाः—मध्येगङ्गम्। मध्येसमुद्रम्। गिरेरन्तः—अन्त-र्गिरम्। अन्तर्गिरि। पूर्वपदार्थ इति किम्? गङ्गापारम्। गङ्गामध्यम्। षष्ठ्येति किम्? शोभनं पारम्।

यावद्यधारणे ॥२।१।१०॥ अवधारणमियत्ता परिच्छेदस्तस्मिन् गम्यमाने यावदित्येतत् सुबन्तं सुबन्तेन सह समस्यते पूर्वपदार्थेऽभिधेये स च समासोऽव्ययीभावसंज्ञो भवति। यावन्त्यमत्राणि। यावदमत्रम्। यावानोदनो यावदोदनम्। यावानवकाशो यावदवकाशमतिथीन् भोजय। यावन्त्यमत्राणि तावन्त इति निश्चितपरिमाणेनामत्रादिनातिथिपरिमाणमिहावधार्यते। यावदिति किम्? तावन्त्यमत्राणि। अवधारण इति किम्? यावद्दत्तं तावद्भुक्तं नावधारयामि कियन्मया भुक्तमिति।

बहिःपर्यपाङ्च् ॥२।१।११॥ बहिस् परि अप आङ् अच् इत्येतानि सुबन्तानि सुबन्तेन सह समस्यन्ते पूर्वपदार्थेऽभिधेये स च समासोऽव्ययीभावसंज्ञो भवति। बहिर्ग्रामात्। बहिर्ग्रामम्। परिव्रिगर्तेभ्यः। परिव्रिगर्तं वृष्टो देवः। अपव्रिगर्तेभ्य.। अपव्रिगर्तम्। आ पाटलिपुत्रादापाटलिपुत्रं वृष्टो देवः। प्राग्ग्रामात्। प्राग्ग्रामम्। प्रत्यग्ग्रामात्। प्रत्यग्ग्रामम्। अवाग्ग्रामात्। अवाग्ग्रामम्। उदग्ग्रामात्। उदग्ग्रामम्। अपगतः शाखाया अपशाख इत्यत्र सुपः प्रतिपदविहितस्य ग्रहणान्न भवति।

लक्षणेनाभिप्रत्याभिमुख्ये ॥२।१।१२॥ अभि प्रति इत्येते सुबन्ते शब्दरूपे आभिमुख्ये वर्तमानेन[6] लक्षणवाचिना सुबन्तेन सह समस्येते पूर्वपदार्थेऽभिधेये स च समासोऽव्ययीभावसंज्ञो भवति। अग्निमभि। अभ्यग्नि। अभ्यरण्यम्। अग्नि प्रति प्रत्यग्नि। प्रत्यरण्य शलभाः पतन्ति। लक्षणेनेति किम्? साधुर्देवदत्तो मातरमभि[7]। मातरं प्रति। अभिप्रतीति किम्? येनाग्निस्तेन गतः। आभिमुख्य इति किम्? वृक्षं प्रति विद्योतते विद्युत्। पूर्वपदार्थ इति किम्? अभ्यङ्का गाव.[8]।

दैर्घ्येऽनुः ॥२।१।१३॥ अनु इत्येतत्सुबन्तं दैर्घ्ये आयामविषये यल्लक्षणं तद्वाचिना सुबन्तेन सह समस्यते पूर्वपदार्थेऽभिधेये स च समासोऽव्ययीभावसंज्ञो भवति। गङ्गामनु। अनुगङ्गं[9] वाराणसी। अनुयमुनं

---

१. विद्यया जन्मना वा प्राणिनामेकरूपः सन्तानो वंशः। क० म० टि०। २. -गङ्गाः स- क० म०। ३. °वरम्। एकनदम्। वंश्यैः क० म०। ४. -णस्य क० म०। ५. निश्चित— क० म० टि०। ६. -माने लक्षण क० म०। ७. इत्थंभवने द्वितीया। भाविनि च प्रतिपर्यनुभिरिति द्वितीया— क० म० टि०। ८. अभ्यङ्का गावः— क० म०। ९. अत्राप्युपचारेणायामवाचित्वादनुरेवायामशब्देनोक्तः— अनुगङ्गं वाराणसीति। यद्यपि गङ्गावाराणस्यालाभे अस्थायामवत्यौ तथाप्यायामवत्तया प्रसिद्धत्वाद्गङ्गै-वात्र लक्षणम्, नहि वाराणसी। प्रसिद्धं हि लक्षणं भवति, नाप्रसिद्धम्। तस्माद्गङ्गयैव समासो भवति।' न वाराणस्या। यमुनायामेन मथुरायामो लक्ष्यत इति यमुनया लक्षणभूतयेति वेशिता तं तस्माच्चस्याया-मवाच्यथमनुशब्दः तेन लक्षणभूतेन समस्यते। यमुनायामवाच्यनुशब्दो न यमुनायामस्यायामोऽपरोऽस्ति। तस्माद्यमुनायामेनेति हेतावियं तृतीया। यमुनायामेन हेतुना तद्वत्या यमुनया लक्षणभूतया करणभावमा-पन्नया मथुरायामो लक्ष्यत इत्ययमत्रार्थो वेदितव्यः। क० म० टि०।

मथुरा[1] । अनुगङ्गमागात् । अनुयमुनमायात् । दैर्घ्ये इति किम् ? वृक्षमनु विद्योतते । लक्षणेनेति किम् ? वाराणस्या माभूत् ।

समीपे ॥२।१।१४॥ अनु इत्येतत् सुबन्तं समीपेऽर्थे वर्तमानमर्थात् समीपवाचिना सुबन्तेन सह समस्यते पूर्वपदार्थेऽभिधेयेऽव्ययीभावश्च समासो भवति । वनस्यानु अनुवनम् । अनुग्रामम् । [2]अन्त इत्येव सिद्धे वाक्यार्थं वचनम् ।

तिष्ठद्गुप्रभृतयः ॥२।१।१५॥ तिष्ठद्गु इत्येवमादयः समासा अव्ययीभावसंज्ञा भवन्ति यथायोगं पूर्वपदार्थेऽभिधेये । तिष्ठद्गु । वहद्गु । पूर्वपदार्थ इति किम् ? समा भूमि: । समभूमिः । विषमैर्व्यवहारः । तिष्ठद्गु । वहद्गु । आयतिगवम् । एते काले वर्तन्ते । खलेयवम् । खलेवुसम् । लूनयवम् । लूयमानयवम् । पूतयवम् । पूतमानयवम् । संहृतयवम् । संहृतवुसम् । एते प्रथमान्ता काले देशे चेत्येके । समभूमि । समं भूमि । सम पदाति । समं पदाति । समयक्षम् । समानतीर्थम् । समानतीरम् । अधोनाभम् । सुषमम् । विषमम् । निष्यमम् । दुष्यमम् । अपरसमम् । आयतिसमम् । पुण्यसमम् । पापसमम् । एकान्तम् । प्राङ्गम् । प्राञ्चम् । प्ररथम् । प्रमृगम् । प्रदक्षिणम् । अपदक्षिणम् । सम्प्रति । असम्प्रति । इज्–दण्डादण्डि । मुसलामुसलि । द्विदण्डि । द्विमुसलि । इति तिष्ठद्गवादिः । इजः तिष्ठद्गवादिषु पाठ इज् युद्ध इत्यस्य वृत्यन्तप्रतिषेधार्थः । द्विपदाद्यादेरव्ययीभावार्थश्च । तिष्ठद्गवादिराकृतिगणः । तेन प्रसव्यम् । अपसव्यमित्यादि सिद्धम् । यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धं वेदितव्यम्, अतएव पदान्तरेण समासाभावश्च—परमतिष्ठद्गु ।

नित्यं प्रतिनाऽल्पे ॥२।१।१६॥ अल्पेऽर्थे वर्तमानेन प्रतिशब्देन सुपा सुबन्तं नित्यं समस्यते अव्ययीभावश्च समासो भवति । अल्पः सूप इति सूपप्रति । शाकप्रति । नित्यग्रहणं वाक्यनिवृत्त्यर्थम् । तेनान्यत्र ग्रहणं वृत्तिविषयं च भवति । अल्प इति किम् ? वृक्षं प्रति विद्योतते ।

परिणाऽक्षशलाकासङ्ख्या द्यूतेऽजये ॥२।१।१७॥ अक्ष शलाका इत्येते सङ्ख्यावाचि च सुबन्तं परिणा सुबन्तेन सह नित्यं समस्यते । स च समासोऽव्ययीभावसंज्ञो भवति द्यूतविषयेऽजये द्योत्ये । अक्षेणैकेन न तथा वृत्तं यथा जये अक्षपरि । शलाकापरि । एकेनाक्षेण न तथा वृत्तं यथा जये—एकपरि । द्विपरि । त्रिपरि । चतुष्परि । परिणेति किम् ? सुबन्तमात्रेण मा भूत् । अक्षेति[3] किम् ? प्रासकेन[4] न तथा वृत्तम् । अक्षशलाकयोरेकस्यैवान्यथाभावे अजयेऽपि तद्व्यवहार इत्येकवचनान्तयोरेव समासः । द्यूत इति किम् ? अक्षेण रथस्य न तथा वृत्तम् । अजय इति किम् ? पञ्चपरीति मा भूत् । पञ्चकानामद्यूतम्[5] । पञ्चभिरक्षैः[6] शलाकाभिर्वा दीव्य(व्य)ते । तत्र यदा पञ्चापि एकरूपा भवन्त्युता(त्ता)ना अवताना वा तदा पातयितुर्जयः । अन्यथा विघातस्तत्रायं समासो न जये ।

शब्दप्रथासम्पत्तसमृद्धिव्यृद्धयर्थाभावात्ययासम्मतिसुप्पश्चाद्युगपद्यथासदृक्सादृश्या-न्तेऽव्ययम् ॥२।१।१८॥ शब्दप्रथादावर्थे वर्तमानमव्ययं सुबन्तं सुबन्तेन सह नित्यं समस्यते पूर्वपदार्थेऽभिधेये स च समासोऽव्ययीभावसंज्ञो भवति । शब्दस्य प्रथा प्रकर्षेण ख्यातिः । इति शिवार्यम् । तच्छिवार्यम् । अहो शिवार्यं वर्तते । शिवार्यशब्दो लोके सुष्ठु प्रथत इत्यर्थः । सम्पदन्यूनत्वम् । क्षत्रस्य सम्पत्तक्षत्रम् । यदूनां संवृत[7](?)सुविहितानाम् । समृद्धि[8]राधिक्यम् । मद्राणां समृद्धिः–सुमद्रम् । सुमगधम् । व्यृद्धिः–ऋद्धेरभावः–मक्षिकाणां व्यृद्धिर्दुर्गुल्विकम् । दुर्वचनम् । अर्थाभावः—धर्मिणोऽसत्त्वम् । मक्षिकाणामभावो निर्मक्षिकम् । अमक्षिकम् । उन्मशकम् । निर्यातम् । विहिंसम् । अर्थग्रहणाद्धर्माभावे न भवति । न भवति ब्राह्मणः । अत्ययोऽतीतत्वमतिक्रमः । शीतस्यात्ययो निशीतम् । निहिंसम् । उत्तृणम् । अतृणम् । निस्तृणम् । विशीते याहि । विहिंसे याहि । सविटीकमधीते ।

---

१. मथुरा क० म० । २. शब्दप्रथेति वक्ष्यमाणसूत्रे वर्तमानेनान्ते इत्यनेनैव सिद्धे सत्यपि समीपे इति सूत्रारम्भः । पक्षे वाक्यार्थं वनस्यानु । क० म० टि० । ३. अक्षादिति किम् क० म० । ४. प्रासकेक० म० । ५. अजये कितवव्यव- क० म० । ६. 'द्यूतोऽक्षिणामक्षवति तज्ज्ञेदाः पञ्चकादयः ।' इति वैजयन्ती । क० म० टि । ७. 'अक्षपञ्चिकाख्यैः द्यूतसाधनभूतैः कवचैः' क० म० टि० । ८. वृत्तस्य सम्पत्, क० म० टि० । ९. -ऋद्धेरा– क० म० ।

[1]असम्प्रत्युपभोगादेर्वर्तमानकालप्रतिषेधः । तैसूक्स्यायमकाल इति अतितैसूकम् । अत्याम्रम् । तिसूका नाम ग्रामः । तत्र भवं तैसूकमाच्छादनम् । सुबर्थे—स्त्रीषु इति अधिस्त्रि । अग्निकुमारि । पदचादर्थे–रथानां पश्चाद्वर्तनु-रथम् । पादातम् । युगपदर्थे—युगपच्चक्रेण चक्रे वा देहि सचक्रं देहि । समरं[2] प्राज । यथार्थे—योग्य-तायाम्—रूपस्य योग्यमनुरूपं सुरूपो वहति । वीप्सायाम्—अर्थमर्थं प्रति प्रत्यर्थम् । प्रतिपर्यायम् । भागिनि च प्रतिपर्यनुभिरिति द्वितीयाविधानाद् वाक्यमपि भवति । पदार्थानतिवृत्तौ—ज्येष्ठानामनतिवृत्त्या अनुज्येष्ठं भवतः प्रविशन्तु । अनुवृद्धं साधूनर्चय । सादृश्ये—शीलस्य सादृश्यं सशीलमनयोः । सवृत्तमनयोः । सदृक् सदृशः । सदृशो देवदत्तेन सदेवदत्तम् । सदृग्ग्रहणं किमर्थम् ? न यथेत्येव सिद्धं गुणभूतेऽपि सादृश्ये यथा स्यात् । साकल्यमनवशेषः । सतृणमभ्यवहरति । सतुषमभ्यवहरति । न किंचिदभ्यवहार्यं परिहरति (तीत्यर्थः) । अन्तः—समीपमवसानं च । कुम्भस्य समीपमुपकुम्भम् । उपाचार्यम् । षड्जीवनिकायमन्त कृत्वा सषड्जीवनिकायमधीते । सपिण्डेषण-मधीते । शब्दप्रथादिग्रहणं किम् ? प्लक्षो वा न्यग्रोधो वा । अव्ययमिति किम् ? समीपं कुम्भस्य । पूर्वपदार्थमिति किम् ? सुमद्राः । सुमगधाः । सच्छात्रः, सपुत्र आगतः । समृद्धौ साकल्ये च इति च प्राप्नोति ।

यथाथाः ॥२।१।१९॥ यथेत्येतदथाप्रत्ययान्तमव्युत्पन्नमव्ययं सुबन्तेन सह नित्यं समस्यते पूर्वपदार्थेऽ-भिधेये स च समासोऽव्ययीभावसंज्ञो भवति । रूपस्य योग्यं यथारूपम् । सुरूपो वहति[3] । सूत्रमनतिवृत्त्या यथासूत्रम् । यथामार्गम् । ये ये वृद्धा यथावृद्धमभ्यर्चय । अथा इति किम् ? यथा जिनदत्तस्तथा गुरुदत्तः । प्रकारे था । यथेति पूर्वेण सिद्धे थानिषेधार्थं वचनम् ।

तिदुस्स्वत्याङ्कवभ्यस्तत्पुरुषः ॥२।१।२०॥ तिसञ्ज्ञानि दुस् सु अति आङ् कु इत्येतानि चाव्ययानि सुबन्तानि सुबन्तेन सह समस्यन्ते स च समासोऽव्ययीभावलक्षणरहितस्तत्पुरुषसंज्ञो भवति । ति—प्रगत्य । पटापटाकृत्य । ऊरीकृत्य । दुस्—निन्दितः पुरुषो दुष्पुरुषः । दूराजः । दुर्वृत्तम् । सुशोभनः पुरुषः सुपुरुषः । सुराजा । सुवृत्तम् । अति—अतिपुरुषः । अतिराजा । अतिवृत्तम् । सुसाहचर्यादतिरिह पूजायां समस्यते । इह न भवति अतिसिक्त्वा । अतिस्तुत्वा । अतिवृद्धं तु कुरून् महद्बलमत्रातिक्रमेऽतिस्तत्रापि समस्यते एवेत्येकः[4] । आङ्—ईषत् पिङ्गलः, आपिङ्गलः । आकडारः । कु—पापः पुरुषः कुपुरुषः । कुराजा । ईषदुष्णं कोष्णम् । कामधुरम् । दुस्स्वत्याङ्ग्रहणमत्यर्थम् । तित्वे तु[5] तीत्येव सिद्धम् । अन्य इति किम् ? निन्दितः पुरुषो यस्य, स दुष्पुरुषकः । अत्र बहुव्रीहित्वात् कञ्भवति । मद्राणां समृद्धिः, सुमद्रम् । गन्धिकानां व्यृद्धिः, दुर्गन्धिकम् । अत्राव्ययीभावत्वादम् । अव्ययमिति किम् ? कुविशाला पृथ्वीत्यर्थः. तत्पुरुषप्रदेशा गोस्तत्पुरुषादित्येवमादयः ।

गतादिषु प्रादयः ॥२।१।२१॥ प्र इत्येवमादि सुबन्तं गतादावर्थे वर्तमानं सुबन्तेन सह समस्यते स च समासोऽन्यस्तत्पुरुषसंज्ञो भवति । प्रगत आचार्यः प्राचार्यः । प्रान्तेवासी प्रवासी । प्रकृष्टो वीरः प्रवीरः । सङ्कतोऽर्थः समर्थः । अतिक्रान्तः सद्वामतिसद्वः । उद्गतो वेलाम् उद्वेलः । अवकृष्टः कोकिलया अव-कोकिलः । परिणद्धो वीरुद्भिः परिवीरुत् । सन्नद्धो वर्मणा संवर्मा । परिग्लानोऽध्ययनाय पर्यध्ययनः । उद्गतः सङ्ग्रामाय उत्सङ्ग्रामः । निष्क्रान्तः कौशाम्ब्या[6] निष्कौशाम्बः । निर्वाराणसिः । अपगतः शाखायाः अपशाखः । अपशालः । अन्तर्गतोऽङ्गुल्याः अन्तरङ्गुलो नखः । उरसि प्रतिष्ठितं प्रत्युरसम् । गतादिष्विति किम् ? अति सिक्त्वा । अतिस्तुत्वा । वृक्षं प्रति विद्योतते । साधुर्देवदत्तो मातरं प्रति । अन्य[7] इति किम् ? प्राचार्यको देशः ।

स्वकृताभ्युक्तम् ॥२।१।२२॥ स्वाश्रयः कृत् स्वकृत्, असिना पञ्चम्येकवचनान्तेनाभिहितमभ्युक्तम् । यस्मात्परादाङ्गतोः यः [8]कृद्विहितस्तदन्तं सुबन्तं तेन स्वकृदन्तेन सुपा सह नित्यं समस्यते । तत्पुरुषश्च समासो भवति । कर्मणोऽण्—कुम्भकारः । नगरकारः । स्वकृतेति किम् ? पदाद्वाक्यस्य वस्नसौ युष्मिष्यते ।

---

१. -प्रतीत्यु- क० म० । २. सधुरं, क० म० । ३. परिणवति क० म० टि० । ४. -त्येके, क० म० । ५. -त्वे हि ती- क० म० । ६. कौशाम्ब्या निष्कौशाम्बिः । क० म० । ७. अन्यत- इति क० म० । ८. यद् कृद्वि- क० म० ।

धर्मो वो रक्षतु । धर्मो नो रक्षतु । स्वग्रहणं किम् ? कुम्भं कृत्वा । कुम्भं कृतवान् । नगरं कृतवान् । अस्युक्तमिति किम् ? निषेधेऽलंखलौ कृत्वा । खलु कृत्वा ।

टा ॥२।१।२३॥ नित्यमिति निवृत्तम् । टा तृतीयैकवचनान्तेनोक्तः स्वकृता समस्यते वा स च समासस्तत्पुरुषसंज्ञो भवति । तृतीयोपदेशः[1] । मूलकोपदंशं भुङ्क्ते । कृत्योऽव्ययेनानिष्ठोक्तौ णम्[2] कृत्वा—ब्राह्मण कन्या ते गर्भिणी जाता किं तर्हि कृपलोच्चैः[3] कृताचक्षे उच्चैः कृताचक्षे ।

नञ् ॥२।१।२४॥ नञित्येतत्सुबन्तं सुपा सह समस्यते वा स च समासस्तत्पुरुषसंज्ञो भवति । न गौः अगौः । अनश्वः । अनेकः । अवर्षः । अनुच्चैः । असर्वस्मै । अशनि. । वर्तमानतद्भाव उत्तरपदार्थः पर्युदासेन नञ्समासार्थः । प्रसज्यप्रतिषेधे नञ् पदान्तरसंबन्ध्युत्तरपदं वाक्यवत् स्वार्थ एव,[4] अप्रयोगेऽपि यथाऽभिधानं बहुलाधिकारात् समासः । अन्यमेव[5] न विद्यन्ते मक्षिका यस्मिन् सोऽमक्षिकः । अमशको देशः । मक्षिकाणामभावोऽमक्षिकम् । अमशकम् । नकारो निषेधप्रतिपत्तिनिवृत्यर्थः । नेति ह्युच्यमाने पूर्वस्योत्तरस्य वा विधेर्निषेधो विज्ञायेत ।

पूर्वापराधरोत्तरमंशिनाऽभिन्नेन ॥२।१।२५॥ अंशोऽवयव एकदेशस्तद्वान् अंशी । पूर्व अपर अधर उत्तर[6] इत्येताभ्यंशवाचीनि सुबन्तान्यंशिवाचिना सुबन्तेन सह समस्यन्ते वा स तत्पुरुषश्च[7] समासो भवति । षष्ठीसमासापवादः । अभिन्नेन न चेत् सोऽंशी भिन्नः । पूर्वं कायस्य पूर्वकायः[8] । अपरकायः । अधरकायः । उत्तरकायः । पूर्वादिग्रहणं किम्? दक्षिणं कायस्य । सङ्ख्याविसायादह्नस्याह्न् ह्नौ, इति लिङ्गादह्नोऽन्यदंशवाचि[9] सुबन्तं समस्यत इति । मध्याह्नः । सायाह्नः । इति सिद्धम् । अंशिनेति किम् ? पूर्वं नाभेः[10] कायस्य । अभिन्नेनेति किम् ? पूर्वं[11] छात्राणामामन्त्रयस्व—प्रसज्यप्रतिषेधादिह न भवति । पूर्वं पाणिपादस्य—समाहारस्याप्यैकत्वेऽपि पाणिः पाद इति भिन्नः ।

समेऽर्धम् ॥२।१।२६॥ अर्धशब्दः प्रविभागे वर्तते । तस्य सम इति विशेषणं समप्रविभागे वर्तमानमर्धमित्येतत्सुबन्तं[12] शब्दरूपमंशवाच्यंशिवाचिना सुबन्तेन सह समस्यते वा स तत्पुरुषसमासो भवति । षष्ठीसमासापवादः । न चेत् सोंऽशी भिन्नः । अर्धं पिप्पल्याः अर्धपिप्पली[13] । अर्धकोशातकी । अर्धखट्वा । सम इति किम् ? ग्रामार्धो देशः । ग्रामार्धं क्षेत्रम् । दन्तार्धमस्योत्तरितं बभूव । समः प्रविभागः । येनेदमर्धमित्यादिष्टलिङ्गं नपुंसकमन्यत्रैकदेशेऽभिधेये लिङ्गं तत्रावयववत्पुल्लिङ्गम् । समप्रविभागेऽपि षष्ठीसमासः । अर्धपिप्पलीति विशेषणसमास इत्येके । अंशिनेति किम् ? अर्धं पिप्पलो देवदत्तस्य । देवदत्तेन समासो न भवति । अभिन्नेनेति किम् ? अर्धं पिप्पलीनामर्धपिप्पल्य इत्येकशेषेऽर्धप्रचयोऽयं पिप्पलीप्रचये ह्येकवचनं स्यात् ।

द्वित्रिचतुर्दड्ढा ॥२।१।२७॥ द्वि त्रि चतुर् इत्येतेभ्यो यो डत् तदन्तं सुबन्तं शब्दरूपमंशवाच्यंशिवाचिना सुबन्तेन सह समस्यते स तत्पुरुषश्च समासो भवति न चेत् सोंऽशी भिन्नः । द्वितीय भिक्षायाः,

---

१. खमुञ्विधायकं सूत्रम्– क० म० टि० । २. णङ् क्त्वा– क० म० । ३. कृत्वा ता चक्षे– क० म० । ४. अयोगेऽपि– क० म० । ५. अन्यानन्य इत्येव म० । अनन्य इत्येव क० । ६. संख्यया दंशवाचीनीति गम्यन्ते । यदि हि पूर्वादीनि अंशवाचीनि न स्युः उत्तरपदस्यांशित्वं न गम्यते । अंशिना अंशोनापेक्षत्वात् । तस्मात्सामान्येनोक्ता अपि पूर्वादयः सामर्थ्यादंशवचनानि समस्यन्त इति गम्यते- क० म० टि० । ७. अंशिनेति वचनात् पूर्वादयोंऽशवचनादाश्रीयन्ते तत्रावयवी सम्बन्धेंऽशिनः षष्ठ्यामुपजातायां षष्ठीसमासः प्राप्नोतीति– क० म० टि० । ८. अत्र काय एकदेशे । एकं चाव्ययमेकसंख्यायुक्तत्वात्– क० म० टि० । ९. -त्यदप्यंश- क० म० । १०. नाभेरिति दिग्योगलक्षणा पञ्चमी । नाभेरधरिष्ठाद् यत् पूर्वं कायस्येत्यर्थो विवक्षितः । तेनात्र नाभिरंशीत्येतद्वाची नाभिशब्दः पञ्चम्यन्तो न समस्यते । यस्तु, अत्रांशी तद्वाचिनस्तु कायशब्दस्य भवत्येव समासः । सत्यपि कायशब्दस्य सापेक्षत्वे कायपूर्वस्य च प्राधान्यात् । प्राधान्यस्य सापेक्षस्यापि समासो भवतीति ज्ञापितत्वात्– क० म० टि० । ११. एकदेशिनश्छात्रा इति न भवति समासः क० म० टि० । १२. अर्द्धमित्ये- क० म० । १३. परवल्लिङ्गं द्वन्द्वतत्पुरुषे । क० म० टि० ।

द्वितीयभिक्षा । भिक्षाद्वितीयं वा[1] । एवं तृतीयभिक्षा । भिक्षातृतीयं वा । चतुर्थभिक्षा । भिक्षाचतुर्थं वा । तुरीयभिक्षा । भिक्षातुरीयं वा । तुर्यभिक्षा । भिक्षातुर्यं वा । वा[2]ग्रहणं षष्ठीसमासप्रापणार्थम् । असमासो नित्याधिकाराभावेनैव सिद्धः । तेनेह डदिति षष्ठीसमासप्रतिषेधो न भवति । द्वित्रिचतुरिति किम् ? पञ्चमी भिक्षायाः । डदिति किम् ? द्वौ भिक्षायाः । अंशिनेति किम् ? द्वितीयं भिक्षाया भिक्षुकस्य[3] । भिक्षुकेण समासो भवति । अभिन्नेनेति किम् ? द्वितीयं भिक्षाणाम् ।

कालो द्विगौ च मेयैः ॥२।१।२८॥ कालो मुहूर्तादिः । कालवाचि सुबन्तं केवलं द्विगौ च विषये वर्तमानं मेयवाचिना सुबन्तेन सह समस्यते वा (स) तत्पुरुषश्च समासो भवति । मासो[4] जातस्य मासजातः । मासजातौ । मासजाताः । स्त्री—मासजाता । संवत्सरजातः । संवत्सरजातौ । संवत्सरजाताः । स्त्री—संवत्सरजाता । मासमृतः । संवत्सरमृतः । द्विगौ द्वेऽहनी जातस्य द्व्यह्नजातः । विग्रहे यद्यपि जातादिकालविशेषणं स्वभावात् समासो जातादिप्रधानस्तेन समासस्य लिङ्गं संख्या च तदीयमेव भवति पूर्वपदार्थसम्बन्धः समासेऽन्तर्भूतोऽन्यत्र विभक्तिः । जातादिश्च मेयत्व जन्मादेः प्रभृति सत्सम्बन्ध्या(धा) दिव्यगतिपरिच्छेदात् । काल इति किम् ? द्रोणो धान्यस्य । द्विगुग्रहणं त्रिपदसमासार्थम् । अन्यथा सुप्सुपेति, अन्यवृत्तेर्द्वयोरेव स्यात् । तत्र तस्य परिसमासे कथ द्व्यहजात[5], त्र्यहजात[6] । समाहारद्विगोर्जातेन समासः । चकार केवलार्थ । मेयैरिति किम् ? मासो देवदत्तस्य । षष्ठीसमासापवादो योगः ।

स्वयं सामि कृतेन ॥२।१।२९॥ स्वयं सामि इत्येतौ सुबन्तौ कृतप्रत्ययान्तेन सुपा सह समस्येते वा स तत्पुरुषश्च समासो भवति । स्वयं धौतौ पादौ । स्वयं विलीनमाज्यम्[7] । सामिकृतम् । सामिभुक्तम्[8] । समास एकार्थे [9]स्त सुबिति । स्वायन्धौति[9] । [10]सामिकृतिरित्यादि सिद्धम् । कृतेनेति किम् ? स्वयं कृत्वा । सामि कृत्वा ।

द्वितीया खट्वा क्षेपे ॥२।१।३०॥ खट्वा इत्येतद् द्वितीयान्तं कृतान्तेन सुपा सह समस्यते क्षेपे निन्दाया गम्यमानायां स च समासस्तत्पुरुषसंज्ञो भवति । क्षेप[11] समासार्थो न वाक्येन गम्यत इति नित्य एवायं समासः । खट्वाऽरूढ । खट्वया[12] प्लुतो जाल्मः । उत्पथप्रस्थित एवमुच्यते । अधीत्य गुरुभिरनुज्ञातेन खट्वा[13] रोढव्या । यस्त्वेवमन्यथा[14] खट्वारोहणं तदुत्पथप्रस्थानम् । उपलक्षणं चेह खट्वाऽऽरोहणमुत्पथप्रस्थानस्य । क्षेप इति किम् ? खट्वामारूढः[15] । द्वितीयाग्रहणमुत्तरार्थम् । इह हि क्षेप इत्येव व्यवस्था लभ्यते ।

कालः ॥२।१।३१॥ कालवाचि द्वितीयान्तं कृतान्तेन सुपा सह समस्यते वा स च समासस्तत्पुरुषसंज्ञो भवति । अह अतिसृता अहरतिसृता मुहूर्ताः । रात्रिसंक्रान्ताः । रात्र्यारूढा । षण्मुहूर्तादिचरा चरा उच्यन्ते । मासं प्रमितः मासप्रमितश्चन्द्रमाः[16] । मासं प्रमातुमारब्धः प्रतिपच्चन्द्र[17] उच्यते । अव्याप्त्यर्थं वचनम् ।

व्याप्तौ ॥२।१।३२॥ वर्तनेति निवृत्तम् । व्याप्तौ या द्वितीया तदन्तः कालवाचिशब्दो व्यापकवाचिना सुपा सह समस्यते स तत्पुरुषश्च समासो भवति । मुहूर्तं सुख मुहूर्तसुखम् । मुहूर्तरमणीयः । सर्वरात्रकल्याणी । सर्वरात्रशोभना । काल इति किम् ? क्रोशं कुटिला नदी ।

---

१. भिक्षाया द्वितीयो भाग इत्यर्थः । क० म० टि० । २. -हणमिह ष– क० मं० । ३. न ह्यसावंशी, किं तर्हि ? स्वामी– क० म० टि० । ४. द्व्योरह्नोः समाहारे समासो द्व्यह्नः । द्विगोरन्-ह्नोऽट् समासान्तः– क० म० टि० । ५. जात इति कथं स्यादिति चेत् समा- क० म० । ६. शीर्णं स्यामं सृतं पक्वं विलीनं विस्रुतं द्रुतम् । –अभिधानम् । क० म० टि० । ७. भक्तम्–क० म० । ८. ऐकार्थ्ये स्तः- म० । ऐकार्थ्ये वतः- क० । ९. स्वयन्धौतस्यापत्यं पुमान् स्वायन्धौति - क० म० टि० । १०. अत इञ्- क० म० टि० । ११ 'क्षेपो विलम्बे निन्दायां हेलाप्रेरणकत्थने' इति विश्वः- क० टि० । १२. खट्वार्थ्ये- क० म० । १३. खट्वास्ति कोऽप्यर्थ इत्यामर्षोत्पत्त्यर्थं क्षिप्या इति खट्वा, आक्षेपिकासनम् । खट्विका- क० म० टि० । १४. अननुज्ञातेनापि खट्वाया आरोहणे- क० म० टि० । १५. खट्वामारूढोऽन्यांपक्षीऽन्यपथति- क० मं० टि० । १६. चन्द्रमाः चन्द्रो मासनिशाकरौ– अभिधानम् क० टि० । १७. चन्द्रो मासो मीयतेऽनेनेति कर्त्रीण वीक्ष्यते क० मं० टि० ।

श्रितादिभिः ॥२।१।३३॥ द्वितीयाया यः सुप् तदन्तं श्रितादिभिः सुबन्तैः सह वा समस्यते स तत्पुरुषश्च समासो भवति । धर्मं श्रितः धर्मश्रितः । श्रीश्रितः । दुःखातीतः । नरकपतितः । श्रित, अतीत, गत, अत्यस्त, प्राप्त, आपन्न, गमिन्, गामिन् इति श्रितादयः । बहुवचनादाकृतिगणोऽयम् । तेन तत्त्वबुभुत्सुः । ओदनबुभुक्षुरित्यादि सिद्धं भवति ।

प्राप्तापन्नं तया च ॥२।१।३४॥ प्राप्त आपन्न इत्येतौ सुबन्तौ तया द्वितीयान्तेन सह वा समस्येते स च समासस्तत्पुरुषसंज्ञो भवति । तत्सन्नियोगे च तयोरकारादेशः । प्राप्तो जीविकां प्राप्तजीविकः । आपन्नजीविकः । प्राप्तगवः । आपन्नगवः । [1]प्राप्तजीविका । आपन्नजीविका । प्राप्तगवी । आपन्नगवी । गोस्तत्पुरुषादित्यट् । अङ्वचनं स्त्रीलिङ्गार्थम् । श्रितादित्वादनयोर्द्वितीयायाः पूर्वेण सूचतत्वात् पूर्वत्वे प्राप्ते पक्षे परत्वार्थं वचनम् ।

ईषद्गुणवचनैः ॥२।१।३५॥ ईषदित्येतत् सुबन्तमल्पार्थे वर्तते तद्गुणवचनैः सुबन्तैः सह समस्यते वा स तत्पुरुषश्च समासो भवति । यैर्गुण उक्तस्तै गुणवचनाः । ये गुणे वर्तितवाद्द्रव्ये वर्तन्ते । ईषदल्पं(:) पिङ्गलः ईषत्पिङ्गलः । ईषद्विकटः । ईषदुष्णः । ईषद्रक्तः । ईषत्कडारः । गुणवचनैरिति किम् ? ईषद्भुक्तम् । ईषद्गार्ग्यः । समासे समुदायात्तद्धितोत्पत्ति । ईषत्पिङ्गलस्येदम् ऐषत्पिङ्गलम् ।

तृतीया तत्कृतैः ॥२।१।३६॥ तृतीयान्तं तत्कृतैः तृतीयान्तार्थकृतैर्गुणवचनैः सह समस्यते वा स तत्पुरुषश्च समासो भवति । शङ्कुलया कृतः खण्डः[2] शङ्कुलाखण्डो देवदत्तः । गिरिणा काणो गिरिकाणः । क्षारेण शुक्लः क्षारशुक्लः । कृतार्थो वृत्तावन्तर्भूतो न प्रयुज्यते । तत्कृतैरिति किम् ? अक्ष्णा काणः । पादेन खञ्जः । शङ्कुलया हेतुना खण्डः । गुणवचनैरिति किम् ? [3]गोभिर्धनवान् । धान्येन धनवान् । वचनग्रहणं किम् ? गुण एव ये वर्तन्ते तैर्मा भूत् । घृतेन पाटवम् । विद्यया धार्ष्ट्यम् । अत्रापि समासमपरे मन्यन्ते ।

साधनं कृता ॥२।१।३७॥ साधनं कारकं [4]क्रियानिर्वर्तकं तदिह कर्ता करणं च तद्वाचि तृतीयान्तं कृत्प्रत्ययान्तेन सुबन्तेन सह समस्यते वा स तत्पुरुषश्च समासो भवति । आत्मना कृतम् आत्मकृतम् । परकृतम् । दात्रेण लूनम् दात्रलूनम् । परशुच्छिन्नम् । देवदत्तेन नखनिभिन्नम् । कृतसंज्ञि कारकस्यापि किं विशेषणम् । काकपेया[5] नदी । एवं नाम पूर्णेत्यर्थः । इक्षुलेह्यः कूपः । एवं नामासन्नोदक इत्यर्थः । कण्टकसञ्चेद्य ओदनः । एवं नाम विशद इत्यर्थः । [6]शष्पच्छेद्यानि तृणानि । एवं नाम मृदुनीत्यर्थः । कुक्कुटसम्पात्या ग्रामाः । एवं नामासन्ना इत्यर्थः । अधिकार्थवचनेष्यया[7] समासमाहुः । अन्यत्रापि दृश्यते—बुसोच्छेद्यम्[8] । तृणोच्छेद्यम् । घनघात्यः । तद्बहुलाधिकारादेव व्यवस्था । साधनमिति किम् ? विद्ययोषितः । अग्निनोषितः । तेन हेतुनेत्यर्थः । पुत्रेण गतः । छात्रेणागतः । तेन सहेत्यर्थः । कृतेति किम् ? गोभिर्धनवान् । धान्येन धनवान् । दात्रेण [9]लूनवान् । परशुनाच्छिन्नवान् । दात्रेण कृत्वा । परशुनाच्छित्त्वा । काकेन[10] [11]पातव्यः,—इत्यनभिधानाद् बहुलाधिकाराद्वा न भवति ।

पूर्वाद्यनार्थैः ॥२।१।३८॥ पूर्व इत्येवमादिभिः ऊनार्थैश्च सुबन्तैस्तृतीयान्तं समस्यते वा तत्पुरुषश्च समासो भवति । मासेन पूर्वः मासपूर्वः । संवत्सरपूर्वः । मासावरः । संवत्सरावरः । विद्यासदृशः । भोजनसदृशः । विद्यासमः । भोजनसमः । ऊनार्थे—माषोनम् । कार्षापणोनम् । माषविकलम् । कार्षापणविकलम् । पूर्वादियोगे हेतौ तृतीया । पूर्व, अवर, सदृश, सम,[12] विकल, निपुण, मिश्र, श्लक्ष्ण इति पूर्वादयः । आकृति-

---

१. -गावः प्राप्ता जीविकां प्रा- क० म० । २. 'अर्धे गुडविकारे च खण्डोऽस्त्री खण्डिते त्रिषु' इति ध्वनिमञ्जरी—क० म० टि० । ३. -भिर्वपापान् क० म० । होवान् क० म० टि० । ४. -याया नि- क० म० । ५. कर्तरि क० म० टि० । ६. शष्प क० म० । उच्छ्वासवातः क० म० टि० । ७. -ने शया स- क० म० । ८. -सोपेक्ष्यम् (पेक्ष्यम्) तृणोपेक्ष्यम् क० म० । ९. करणे क० म० टि० । १०. काकैः क० म० । ११. -व्यः इत्यभिलेतव्या इ- क० म० । १२. सम, कलह, नि- क०, म० ।

गणोऽयं तेन धान्येनार्थः धान्यार्थ., हिरण्यार्थ· । धान्यार्थी । हिरण्यार्थी । आत्मना पञ्चमः । आत्मना षष्ठः । एकेन[1] द्रव्यत्वादित्यादि सिद्धं भवति ।

चतुर्थी प्रकृतिस्वार्थार्थादिभिः ॥२।१।३९॥ स्वार्थेत्यर्थविशेषणं प्रकृति· परिणामिद्रव्यं तद्वाचिना सुबन्तेन अर्थाद्विकृतिवाचिस्वार्थेन चतुर्थ्यर्थाभिधायिना अर्थशब्देन तदादिभिरन्यैः[2] सुबन्तै· सह चतुर्थ्यन्त समस्यते वा स तत्पुरुषश्च समासो भवति । रथाय दारु रथदारु । कुण्डलहिरण्यम् । स्वार्थार्थम्—पित्रे इदम्[3] पित्र्यर्थम् । श्रच(स्त्र्य)र्थम् । मदर्थम् । उदकार्थो वीवधः । अर्थशब्देन नित्यसमास एवायं वाक्ये हि चतुर्थ्या[4]तदर्थस्योक्तत्वादप्रयोगः । समासस्तु वचनाद्भवति । तदादि—कुबेरबलिः । महाराजबलि. । प्रजाहितम् । लोकहितम् । चतुर्थीति किम् ? कुण्डल हिरण्यस्य । प्रकृत्यादिग्रहणं किम् ? रन्धनाय स्थाली । अवहननायोलूखलम् । स्वार्थेत्यर्थविशेषणं किम् ? पित्रेऽर्थः । मात्रेऽर्थ. । धनमित्यर्थः । अर्थ, बलि, सुख, हित, रक्षित इत्यर्थादयः । आकृतिगणोऽयम् । तेन अश्वेभ्यो घासः अश्वघास. । शश्वू इनम्[5] वासभवनलमुरं (?) हस्तिविदेत्यादि[6] सिद्धं भवति ।

तयाऽलम् ॥२।१।४०॥ तया चतुर्थ्यन्तेन अलमित्येतत् सुबन्तं समस्यते वा स तत्पुरुषश्च समासो भवति । अलं जीविकायै अलंजीविक. । अलकुमारिः । तयेति किम् ? अलमतिप्रसङ्गेन ।

पञ्चमी भयादिभिः ॥२।१।४१॥ पञ्चम्यन्तं भयादिभिः सुबन्तै. सह समस्यते वा स तत्पुरुषश्च समासो भवति । वृकाद्भयम्, वृकभयम् । चौराद्भयम्, चौरभयम् । भय[7], भीति, भी, निर्गत, जुगुप्सा, अपेत, अपोढ, मुक्त, पतित, अपत्रस्त इति भयादयः । बहुलाधिकारादिह न भवति—प्रासादात् पतित. । भोजनात्(द्) अपत्रस्त । आकृतिगणोऽय तेन[8] परस्पर इत्यादि[9] सिद्ध भवति ।

क्तेनासत्त्वे ॥२।१।४२॥ असत्त्वे वर्तमाना या पञ्चमी तदन्तं क्तप्रत्ययान्तेन सुपा सह समस्यते वा स तत्पुरुषश्च समासो भवति । स्तोकान्मुक्त. । अल्पान्मुक्तः । कतिपयान्मुक्तः । कृच्छ्रान्मुक्तः । दूरादागतः । विप्रकृष्टादागत· । अन्तिकादागत । अभ्याशादागत. । नोत्तरपदे सत्त्व इति श्लुग्न[10] भवति । क्तेनेति किम् ? स्तोकान्मोक्षः । असत्त्व इति किम् ? स्तोकाद्वर्द्धितम् । अल्पात् प्रवृद्धम् । स्तोकान्मुक्तिः[11] । स्तोकाद् द्रव्यादित्यर्थः । समासेऽत्र समुदायात्तद्धितोत्पत्तिः ।

षष्ठ्ययत्नात् ॥२।१।४३॥ षष्ठ्यन्तं सुबन्तेन सह समस्यते वा स तत्पुरुषश्च समासो भवति । अयत्नात् । इसोसामिति षष्ठ्याः कर्मादौ द्वितीयादिकेऽपवादे सति न विनिमेयशूतपणमित्यादेर्यत्नाद्विशेषे चेत् सा न प्रापिता भवति । राज्ञः पुरुष. राजपुरुष· । ब्राह्मणकम्बलः । राजगोक्षीरम्[12] । राजगव्याः क्षीरं राजगविक्षीरम् । देवदत्तस्य यो गुरुस्तस्य कुलम् देवदत्तस्य गुरुकुलम् । एवं देवदत्तस्य दासभार्या, ऋद्धस्य राज्ञ पुरुष इत्यादौ सापेक्षस्यागमकत्वात् समासो न भवति । उद्दालकपुष्पभञ्जिका । वारणपुष्पप्रचायिकेत्यादौ नित्यः समास. । संज्ञा ह्येषा क्रीडायाः । न च संज्ञा वाक्येन गम्यते । अयत्नादिति किम् ? शतस्य शूतम् । शतस्य शूतो देवदत्तः । सर्पिषो ज्ञानम् । मधुनो ज्ञानम् । कटकरणस्यायुक्त । रुदतः प्रव्रजित. । गोस्वामी

---

१. एकेन द्रव्यत्व(त्त)स्यादेकद्रव्यत्व(त्त)स्यादि क० म० । २ -भिश्चान्यैः— । ३. नित्यमर्थेनेदमर्थे— क० म० टि० । ४. चतुर्थ्यन्तमिदमर्थेनार्थशब्देन सह नित्यं समस्यते इति वर्द्धमानीयेन— इदमर्थोऽर्थशब्दः क० म० टि० । ५. शश्वू इत्यमरवासभवनलमुरं क० म० । ६. आदिशब्देनात्मनेपदं परस्मैपदं पादाभ्यां क्रियते पादहारकौ माघ इत्यादयः क० म० टि० । ७. भय, भीत, भीति, भी- क० म० । ८. तेन तादपि परस्तपर इत्यादि क० म० । ९. आदिशब्देन द्वीपान्तरासेयात् लवङ्गपुष्पैरीभास्वद्भावाद्गतेन स्थानभ्रष्ट इति च क० म० टि० । १०. तुङ्गपीनकठिनस्तनान्तरे कान्तदत्तमनवलानलक्षत आवृणोति विवृणोति वीक्षते कृच्छ्रलब्धमपि निर्धनो धनमित्यत्र लुप्तिसमासः कथमिति चेत्; न; तृतीयासमासत्वात् । पञ्चम्यन्तत्वे समासो न भवतीत्यर्थः । क० म० टि० । ११. अत इम् क० म० टि० । १२. राज्ञो गोक्षीरं राज- क० म० ।

पृथिवीश्वरः । विद्यादायाद इति स्वामीश्वराधिपेषु षष्ठ्यवरनसिद्धा सप्तमी पक्षे प्राप्यत इति समासः । सङ्घस्य भद्रं भूयात् । शासनस्य भद्रं भूयादिति । भद्रायुष्यक्षेमसुखार्थहितार्थहितैराशिषि षष्ठया अर्थादौ—अर्थ, बलि, हित, सुख, रक्षितेति सुखग्रहणादसमास , अन्यथा हि प्रजासुखमित्यत्रेनैव सिद्धत्वात् तत्र सुखग्रहणमनर्थकं स्यात् धर्मानुस्मरणमर्थानुचिन्तनमिति कृद्योगे षष्ठी सा च न कर्तरीति[1] प्रतिषेधात् समस्यते, कृत्यादिवर्जमर्थमात्रापेक्षस्य बहुधा सुबन्तेनायोगादसमासे धर्माश्रितादौ वचनात् समासं पक्षमाश्रापि प्रतिपद्येतेत्यस्यादित्यनुवाद' ।

याजकादिभिः ॥२।१।४४॥ याजक इत्येवमादिभिः शब्दैः षष्ठ्यन्तं समस्यते वा स तत्पुरुषश्च समासो भवति । ब्राह्मणाना याजकः ब्राह्मणयाजक. । साधुपूजकः । कर्मणि त्रा चेति प्रतिषेधवचनम् । याजक, पूजक, परिचा(वा)रक, परिवेषक, स्नापक, अध्यापक, उच्छादक, वर्तक, उद्वर्तक, होतृ, भर्तृ इति याजकादिः । आकृतिगणोऽयं तेन तत्प्रयोजको हेतुश्चेत्यादि सिद्धं भवति ।

[2]पत्तिरथं गणकेन ॥२।१।४५॥ पत्ति रथ इत्येतौ षष्ठ्यन्तौ गणकेन सुबन्तेन सह समस्यते वा स तत्पुरुषश्च समासो भवति । पत्तीना गणकः पत्तिगणक । रथगणक. । पत्तिरथमिति किम् ? कार्षापणाना गणकः । कर्मणि त्रा चेति प्रतिषेधे वचनम् ।

वुनाजीवे ॥२।१।४६॥ वुप्रत्ययान्तेन सुपा सह षष्ठी समस्यते स तत्पुरुषश्च समासो भवति आजीवे गम्यमाने । आजीवः समासार्थो न वाक्येन गम्यत इति नित्यमसास एवायम् । दन्तलेखक. । नखलेखकः । अवस्करसूदक' । रमणीयकारक. । दन्तलेखनादिरस्याजीवो जीविकेति गम्यते । आजीव इति किम् ? ओदनस्य भोजकः । पयस पायक. । कर्मणि त्रा चेति प्रतिषेधे वचनम् ।

न कर्तरि ॥२।१।४७॥ कर्तुर्या (कर्तरि या) षष्ठी सा वुप्रत्ययान्तेन न समस्यते । भवत आसिका । भवतः शायिका । भवतोऽप्रगामिका । कर्तरीति किम् ? इक्षुभक्षिकां मे धारयसि । पयःपायिका मे धार्यसि ।

कर्मणि त्रा च ॥२।१।४८॥ कर्तरीति वर्तते । तदिह वोर्विशेषणम् । कर्तरि विहितो यो वुप्रत्ययस्तृप्रत्ययश्च तदन्तेन सुपा कर्मणि षष्ठी न समस्यते । ओदनस्य भोजक' । सक्तूना पायक. । अपा स्रष्टा । पुरा भेत्ता । कर्मणीति किम्[3] ? जनि कर्ता गुणो गुणिविशेषकः । कर्तरीति किम् ? इक्षुभक्षिका मे धारयसि । पयःपायिकां मे धारयसि । भूभर्ता[4] वज्रभर्तेति भर्तृशब्दोऽयं पतिपर्यायस्तेन स्वस्वामिसम्बन्धेन षष्ठी याजकादिभिरिति वा समासः । क्रियाशब्देन तु[5] नैव भवति ।

तृतीयायाम् ॥२।१।४९॥ कर्तरि तृतीयायां सत्या कर्मणि षष्ठी न समस्यते । आश्चर्यो गवां

---

१. -रीत्यादि प्र- क० म० । २. नोतृज्भ्यां कर्तरीति प्रतिषेधवचनम्— क० म० टि० । ३. ननु कों नु षष्ठीसमासप्रतिषेधविषयः । विशेषविहितः षष्ठीसमासप्रतिषेधे सम्बन्धषष्ठीसमासः केन वार्यते ? तथैव सद्व्यवहारेषु बहुलमुपलभ्यते । यथापि पूजायामपि राजपूजित इति कर्तरि विहिताभ्यामपि तृच्कभ्यां यथा नदी गतार्थदन्तप्रमाणम् । इतरकारकप्रयोक्तृत्वं क्रियालोपप्रयोक्तृत्वं नरकश्चाटुकारकः । पुंल्लिंगेषु इकारवाचकाः शब्दाः इत्यादयः तद्धा कर्म अविशेषवाचकतादुपसर्जनस्येति वार्तिकम् । गुणो गुणिविशेषक इति भाष्यम् । अथ विशेषप्रतिषेध एवंविधविषये, अन्यथानुपपत्तिति प्रतिषेधं निदर्शयति । यद्येवं तर्हि धर्माय जिज्ञासेति तादर्थ्यविकारे षष्ठीसमासप्रतिषेधमपि विदधीत । सत्यमेतेषां सूत्राणां स्वरविज्ञानमात्रमुपयोगो दर्शितो वाक्यपदीये । हरिणेति—"लौकिकव्यवहारेषु यथेष्टं चेष्टनां जनः । वैदिकेषु च मार्गेषु विशेषेभ्यः प्रवर्तताम् ॥ इति पाणिनिसूत्राणामर्थवत्त्वमसौ यतः । जनि कर्तुरिति ब्रूते तत्प्रयोजक इत्यपि ॥" कथं तर्हि जनि कर्तुः प्रकृतिरित्यादि कैश्चित्समास आश्रितस्तत्रोच्यते । वेदाङ्गे वेदवत्सूत्रं कर्तव्यमिति पाणिनिः । एवंकारमुपाकृत्यो दृवं मतुदिभिः परैः ॥ इति वर्धमानीयवृत्तौ प्रोक्तं विज्ञातव्यम् । क० म० टि० । ४. भुवो भर्ता क्षितेः पोषक इत्यर्थः । क० म० टि० । ५. तु न भवत्येव क० म० ।

द्रोहोऽगोपकेन । साध्विदं शब्दानामनुशासनमाचार्येण । तृतीयासामिति किम् ? साध्विदं शब्दानामनुशासनमाचार्यस्य । साध्वी कटचिकित्सा देवदत्तस्य । कर्तरीति किम् ? साध्विदं शब्दानामनुशासनमाचार्यस्य नः पुण्येन । कर्मणीति किम् ? देवदत्तकृतो जिनदत्तेन आश्चर्यमद्य नः कृटः करणं देवदत्तेन । ओदनस्य पाक इत्यत्राधोगात्र भवति ।

तृतीयार्थव्ययनिर्धार्यैरुच्छ्रानशमतिपूजार्थारक्तैः ॥२।१।५०॥ तृप्तार्थैरव्ययैर्निर्धार्यवाचिभिर्उदन्तैः शत्रन्तैरानशन्तैः मतिपूजार्थेति मत्वर्थे[2] स्तात्पूजार्थे[3] च (?) वर्तमाने यः कृतः, गत्यकर्मण्याधारे च आदाविति चाधारे यः कृतस्तदन्तेश्च सुबन्तैः षष्ठी न समस्यते । तृप्तार्थ—फलानां तृप्तः । फलानां सुहितः । सक्तूना पूर्णः । ओदनस्याशितः । अव्यय—राज्ञः साक्षात् । ग्रामस्य पुरस्तात् । देवदत्तस्य कृत्वा । जिनदत्तस्य प्रकृत्य । अव्ययीभावस्याप्यन्वर्थविज्ञानादयं प्रतिषेध इष्यते । देवदत्तस्योपस्कुम्भमित्येके । निर्धार्य—गवां कृष्णा सम्पन्नक्षीरतमा । मनुष्याणा क्षत्रियः शूरतम । ममुदायादसाधारणेन धर्मेण बुद्धया पृथक्क्रियमाण एकदेशो निर्धार्यः । डतृ—तीर्थकराणा षोडश[4] । चक्रधराणां पञ्चमः शान्तिः(नाथः) । छात्राणा द्वितीयः । छात्राणा तृतीय. । शतृ—देवदत्तस्य पक्ष्यन्[5] । रामस्य द्विषन् । आनश्—देवदत्तस्य पचमानः । देवदत्तस्य पक्ष्यमाणः । मति कृतः—राज्ञा मतः । राज्ञामिष्ट. । राज्ञा बुद्धः । राज्ञा ज्ञातः । राज्ञां विदितः । पूजायां राज्ञा पूजित । राज्ञामर्चित. । आधारक्तः—इदमहैः सृप्तम् । इदमेषां यातम् । इदमेषां शयितम् । इदमेषा भुक्तम् । इदं सक्तूना पीतम् । एतैरिति किम् ? ब्राह्मणकर्तव्यम् । इक्षमन्नस्चनः । फलशातनः । राज्ञः पाटलिपुत्रकस्य सर्वगुप्तस्याचार्यस्येत्यत्र बाह्यार्थापेक्षा षष्ठीत्यसामर्थ्यान्न भवति ।

गुणैरस्वस्थैः ॥२।१।५१॥ अस्वस्थैर्गुणैः[6] सह षष्ठ्यन्तं न समस्यते । ये स्वात्मन्येवाधितिष्ठन्ति न विशेष्यात्मनि न तल्लिङ्गसङ्ख्यं कदाचिदनुविधन्ति[7] ते स्वस्थाः । काकस्य काण्र्यम् । बलाकाया: शौक्ल्यम् । वृषलस्य धार्ष्टर्यम् । कण्टकस्य तैक्ष्ण्यम् । अत्र काण्र्यादेर्गुणस्य कृष्णः काक इत्यादौ[8] अस्वास्क्यमुपलभ्यते । देवदत्तस्य शुक्ला । देवदत्तस्य कृष्णा । पटस्य शुक्लः । कम्बलस्य कृष्णः । घृतस्य तीव्र । चन्दनस्य मृदुः । अत्र दन्ता वर्णो गन्ध इत्यर्थः । प्रकरणाद्वाऽपेक्ष्यस्य निर्ज्ञाने य इमे शुक्लास्ते देवदत्तस्येति सामर्थ्योपपत्तेः समासः प्राप्नोति । गुणैरिति किम् ? राजपुरुष । अस्वस्थैरिति किम् ? घटवर्णः । कन्यारूपम् । चन्दनगन्धः । कपित्थरसः । स्तनस्पर्शः । गोविंशति । गोत्रिंशत् । गोशतम् । गोसहस्रम् । न वा समाहारैकत्वादित्यादि[9]-बहुलाधिकारात् ।

सप्तमी शौण्डादिभिः ॥२।१।५२॥ सप्तम्यन्तं शौण्डादिभिः सुबन्तैः सह समस्यते वा स तत्पुरुषश्च समासो भवति । अक्षेषु प्रसक्तः शौण्डः[10] अक्षशौण्डः । युद्धशौण्डः । शौण्डशब्द इह गौणो व्यसनिनि वर्तते वृत्तौ प्रसक्तिक्रियया अन्तर्भाव. । पानशौण्ड. । अक्षधूर्त. । शौण्ड, धूर्त, कितव, सव्याल, सव्य, आय, सव्यान, सभीष्ण, अन्तर्, अजिन, पटु, पण्डित, कुशल, चपल, निपुण इति शौण्डादिराकृतिगणः । तेन काम्पिल्यसिद्धः । आतपशुष्कः । स्थालिपक्व , चक्रबन्ध इत्यादि सिद्धं भवति ।

नाम्नि ॥२।१।५३॥ नाम्नि संज्ञायां विषये सप्तम्यन्तं सुपा सह समस्यते स तत्पुरुषश्च समासो भवति । पूर्वोत्तरपदसमुदाय. सज्ञा । नित्यसमासोऽयम् । न हि वाक्येन संज्ञा गम्यते । अरण्येतिलकाः । अरण्ये-

---

१. द्रोहोऽगोपालकेन– क० म० । २. -र्थात् क० म० । ३. र्थाच्च क० म० । ४. कथं 'तान्युच्छ-पञ्चाशिवसैकतानि' ? सत्यम् ; पूरणेनैवेत्यवधारणं द्रष्टव्यम् । इह तु पूरः । क० म० टि० । ५. पचत् क० म० । ६ गुणेऽत्र भावप्रत्ययवचाच्च: । तथा चान्द्रसूत्रं न निर्धार्य पूरणभावकृत्याद्यैरिति वचनाच्चे क० म० टि० । ७. -विदन्ति क० म० । ८. नात्र काण्र्यादेर्गुणस्य तारतम्यं प्रतीयते, कृष्णः काक इति यथा । क० म० टि० । ९. आदिशब्देन बुद्धिकौशलजन्यकार्यं, कर्णपाठ्यम्, अर्थगौरवं, शब्दलाघवमित्यादि । क० म० टि० । १०. शौण्ड इव अक्ष- क० म० ।

माषकाः । कूपे[1]पिशाचिका । वनेवल्वजकाः । वनेकीश(कशे)रकाः । वनेहरिद्रका । पूर्वाह्णे[2]स्फोटिकाः । अपराह्णे[2]स्फोटिकाः । हलत. सप्तम्या इति ङ्लुगभावः ।

व्यवावश्यके ॥२।१।५४॥ व्यप्प्रत्याहारगृहीतप्रत्ययान्तेन सुबन्तेन सप्तम्यन्तं समस्यते आवश्यकेऽवश्यम्भाविनियोगे गम्यमाने स च समासस्तत्पुरुषसंज्ञो भवति । आवश्यकं समासार्थो न वाक्येन गम्यत इति नित्यसमास एवायम् । मासेऽवश्यं देयं मासदेयम् । संवत्सरदेयम् । पूर्वाह्णेगेयम् । प्रातरध्येयम् । ग्रामदेयम् । नगरदेयम् । आवश्यक इति किम् ? मासे देया भिक्षा । व्यपायप्रत्ययेनैव समासमाहु. । अन्यत्रापि दृश्यते सवत्सरकर्तव्यमिति(एषा)तद्बाहुलकादेव व्यवस्था ।

तत्राहोरात्रांशं क्तेन ॥२।१।५५॥ तत्रेत्येतद्ग्रहरवयववाचि रात्र्यवयववाचि च सप्तम्यन्तं सुबन्तं क्तान्तेन सुपा सह समस्यते वा स तत्पुरुषश्च समासो भवति । तत्रकृतम् । तत्रभुक्तम् । पूर्वाह्णेकृतम् । पूर्वाह्णकृतम् । अपराह्णकृतम् । मध्याह्नकृतम् । पूर्वरात्रकृतम् । अपररात्रकृतम् । तत्राहोरात्राशमिति किम् ? घटे कृतम् । अहोरात्रग्रहणं किम् ? शुक्लपक्षे कृतम् । पक्षे(क्षो) मासाशः । अंशग्रहण किम् ? अह्नि भुक्तम् । रात्रौ नृत्तम् । क्तेनेति किम् ? तत्र भोक्ता । पूर्वाह्णे भोक्ता ।

काकादिभिश्च क्षेपे ॥२।१।५६॥ काकप्रकारै (सुबन्तैः) क्तान्तेन(च) सुपा सह सप्तम्यन्तं समस्यते क्षेपे गम्यमाने स तत्पुरुषश्च समासो भवति । तीर्थकाकः । नगरवायस. । शारकाकः । तीर्थकुक्कुटः । तीर्थशृगाल.[3] । तीर्थश्वा । तीर्थसारमेयः । अन[4]वस्थित एवमुच्यते क्तेन—अवतप्ते नकुलस्थितम् । कार्येष्वनवस्थितत्वमुच्यते । भस्मनि हुतम् । प्रदा[5](वा)हे मूत्रितम् । उदकेऽवशीर्णम् । निष्फलं कृतमुच्यते सर्वत्रात्रोपमानात् क्रेय. (?) क्षेप । काकादिभिरिति किम् ? क्तेनैकेनैव स्यात् । चकार. किम् ? काकादिभिरेव स्यात् । क्षेप इति किम् ? तीर्थे काकस्तिष्ठति । अत्र भिन्नपदत्वम् ।

पात्रेसमितादयः ॥२।१।५७॥ पात्रेसमितादयः सप्तमीतत्पुरुषे[6] निपात्यन्ते क्षेपे गम्यमाने । पात्रेसमिताः । पात्रेबहुला. । अत्र पात्र एव समिता नान्यत्र कार्य इत्यवधारणात् क्षेपः । उदुम्बर[7]मशकः । उदुम्बरकृमि । कूपकच्छपः[8] । अवट[9]कच्छपः । कूपमण्डूकः । कुम्ममण्डूकः । उदपानमण्डूकः । नागरकाकः । आखनिकबकः । अत्रोपमया[10]क्षेप । मातरिपुरुष. । अत्र प्रतिषिद्धसेवनेन पिण्डीशूरः । गेहेक्ष्वेली । गेहेमेली । गेहेनर्दी । गेहेनदी । गेहेविचिति[11]। गेहेऽवजिती । गेहेव्याल: । गर्भेदृप्त· । गर्भेतृप्त. । गर्भेधीर. । गर्भेदू(शू)र. । गोष्ठेशूरः । गोष्ठेक्षेरी[12] । गोष्ठेऽविजितो । गोष्ठेपटु· । गोष्ठेपण्डित· । गोष्ठेप्रगल्भ. । कर्णेटिरिटिरिः[13] । कर्णेचुरुचुरु[14] । अत्र निरीहतया क्षेप. । निपातनात् सप्तम्या अलुक् । अत एव[15] परमा. पात्रेसमिताः, इति पदान्तरेणासमासः । आकृतिगणोऽयम् । एवमर्थमेव बहुवचनम् । पात्रेसमितादीना पूर्वेण सिद्धानामिहोपादानं पदान्तरेण समासप्रतिषेधार्थम् ।

विशेषणं व्यभिचार्येकार्थे कर्मधारयश्च ॥२।१।५८॥ भेदकं[16] विशेषणम्, भेद्यं विशेष्यम्,

---

१. केण्डुकः प्रावृषः स्त्री तु कूपे पिशाचिका । मण्डूकपर्यायः । क० म० टि० । २. स्फोटकाः (स्फाटिकाः) क० म० । ३. एतैः सदृशो दुष्ट उच्यते क० म० टि० । ४. तीर्थे, गुरुकुले, अन्यत्र वा—अनवस्थितः क० म० टि० । ५. प्रवाहे क० म० । ६. -पुरुषा नि । ७. यस्तत्रावरुद्धो न क्वचिद्गच्छति स तमेवं विशिष्टमवस्थानं मन्यते । नास्मात्परमस्तीति । सोऽयमदृष्टविस्तार उच्यते । एवं विशेषेष्वपि ऊह्यम् । क० म० टि० । ८. अल्पदृश्येवमुच्यते । क० म० टि० । ९. अवटः स्यात्प्रहावपि । क० म० टि० । १०. एत्य खनति— आवृणाति जलचरानिति आखनिकः । जलचरः खगः क० म० टि० । ११. गेहेविजिति । गेहेविचिति ।क० म० । १२. क्षेली क० म० । १३. टिरिटिरीति गत्यलंकरणम्, क० म० टि० । १४. चुरुचुरिति वाक्या(धान्या)लंकरणम् क० म० टि० । १५. एव च प-क० म० । १६. भेदकमिति यत्सामान्याकारेण प्रकृतमनेकप्रकारवद्वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्यैकत्र प्रकारे व्यवस्थापयति तन्नेदकम् । भेद्यमिति यदनेकप्रकारवद्वस्तु प्रकारान्तरेभ्यो व्यवच्छिद्यैकत्र प्रकारे व्यवस्थाप्यते तन्नेद्यम् । क० म० टि० ।

तत्र चान्यत्र च [1]संचरद्व्यभिचारि तद्विशेषणवाचि, एकार्थं समानाधिकरणं सुबन्तं विशेष्यवाचिना सुबन्तेन सह समस्यते वा स च समासस्तत्पुरुषसंज्ञः कर्मधारयसंज्ञश्च भवति । नीलमुत्पलम् नीलोत्पलम् । कृष्णतिलाः । पुङ्गवः । मोषकगवी । खञ्जकुण्ड(टः) । कुण्ड(ट)खञ्ज· । पूर्वा सा–उत्तरा च सा पूर्वोत्तरा, उत्तरपूर्वा वा विदिक् । दक्षिणपूर्वा पूर्वदक्षिणा वा विदिक् । नीलोत्पलादिषु उत्पलादिर्जातिशब्दो विशेष्यस्यैव निपातः । खञ्जकुण्डादौ[2] अनियम. । विशेषणमिति किम् ? लोहितस्तक्षकः । व्यभिचारीति किम् ? तक्षकः सर्पः । बहुलाधिकारात्[3] क्वचिद् व्यभिचारेऽपि भवति । पृथिवीद्रव्यम् । अपद्रव्यम् । आम्रवृक्षः । शिंशिपावृक्षः । मेरुपर्वत इति । क्वचिद् व्यभिचारेऽपि न भवति । रामो जामदग्न्यः । अर्जुनः कार्तवीर्यः । संज्ञायां नित्यः । कृष्णसर्प । लोहितादिः । गौरखुरा[4] । लोहितशालयः । एकार्थमिति किम् ? जातस्योक्षा जातोक्षा । वृद्धोक्षा । चकारस्तत्पुरुषकर्मधारयसंज्ञयो समावेशार्थः । कर्मधारयश्चेत्यधिकारः आम्रयूरव्यंसकादय इति । कर्मधारयप्रदेशाः कडारादयः कर्मधारय इत्यादयः ।

पूर्वकालैकसर्वजरत्पुराणनवकेवलम् ॥२।१।५९॥ पूर्वः कालो यस्यार्थस्य(स) पूर्वकालः, तद्वाचि[5] एक सर्व जरत् पुराण नव केवल इत्येतानि चैकार्थानि सुबन्तानि सुबन्तेन सह समस्यन्ते वा स च समासस्तत्पुरुषसंज्ञः कर्मधारयसंज्ञश्च भवति । पूर्वकालः, अपरकालेन, पूर्वं स्नातः पश्चादनुलिप्तः स्नातानुलिप्त.[6] । कृष्णमथीकृतम् । दग्धप्ररूढम् । एकः शुक्ल. एकशुक्लः । पूर्वशुक्लः । जरद्वैयाकरणः । पुराणवैयाकरण· । नववैयाकरण । केवलवैयाकरणः । केवलजरत् । केवलपुराणम् । एकार्थमिति किम् ? स्नात्वाऽनुलिप्तः । स्नात्वेति अमत्ववाचिनो नानुलिप्तपदेनैकार्थम् । पूर्वपदत्वव्यवस्थापनार्थं[7] वचनम् ।

दिगधिकं संज्ञातद्धितोत्तरपदे ॥२।१।६०॥ दिग्वाचि अधिक इत्येतच्च सुबन्तमेकार्थं सुबन्तेन सह समस्यते[8] संज्ञाया तद्धिते प्रत्यये विषयभूते, उत्तरपदे च परे स च समासस्तत्पुरुषसंज्ञो भवति कर्मधारयसंज्ञश्च । दक्षिणा कोश(स)लाः दक्षिणकोश(स)ला. । उत्तरकोश(स)लाः । दक्षिणपाञ्चालाः[9] । समास. संज्ञा न वाच्यं, तत्र नित्यः समासः, पूर्वोत्तरपदविभागप्रदर्शनार्थं तु विग्रहवाक्यम् । तद्धिते—दक्षिणस्या शालाया भवः दाक्षिणशाल. । औत्तरशालः । अधिकया षष्ट्या क्रीतः, अधिकां षष्टिं भूतो भावी वा आधिकषाष्टिकः । आधिकसाप्ततिक । अयमपि नित्य समास । न हि तद्धिते वाक्यमस्ति । उत्तरपदे—दक्षिणशालाप्रिय. । उत्तरशालाप्रियः । दक्षिणगवधनः । उत्तरगवधन. । अधिकगवधन. । तत्पुरुषलक्षणो गोशब्दादट् । उत्तरपदेऽपि नित्यः समासः । वेति (?) स्वाभाविकयोर्व्यपेक्षैकार्थिभावयोर्निबन्धनम् । न च त्रयाणामेकार्थिभावे द्वयापेक्षा[10] सम्भवति । संज्ञादिग्रहणं किम् ? उत्तरवृक्षः[11] । विशेषणमित्येव सिद्धे नियमार्थं वचनम् ।

सङ्ख्यासमाहारे च द्विगुश्चानाम्ययम् ॥२।१।६१॥ अनेकस्य कथञ्चिदेकत्वं समाहारः, सङ्ख्या सुबन्तमेकार्थं सुबन्तेन सह संज्ञायां तद्धिते प्रत्यये विषयभूते उत्तरपदे परे समाहारे चाभिधेये स च समासस्तत्पुरुषसंज्ञ. कर्मधारयसंज्ञो द्विगुसंज्ञकश्च भवति । न चेत् समाहारो नाम्नि संज्ञाया भवति ।

---

१. सम्भवद्व्यभिचारी क० म० । २. "काणः कुण्डस्तथा मुण्डो दुर्भगो बधिरः कुब्जिः ।" इति सिद्धान्तसारः क० म० टि० । ३. "ननु नाम गुणो नीलमुत्पलं जातिरिष्यते । द्रव्यं तदाश्रयोऽप्यन्य-दित्येकाश्रयता कुतः ।" तन्न यावद्द्रव्यं तदात्मैव जातिर्दृष्टेति तद्गुनेकरणक । द्रव्याविधायिता सिद्धिर-नेकान्ताधिकारकः ॥ तद्द्वारैव विशेष्यत्वं जातेर्नीलत्वमित्यपि । वृत्तिरेकाश्रयापि स्यादन्यथा तदसम्भवः ।" इति जैनेन्द्रचिन्तामणौ । क० म० टि० । ४. -खराः क० म० । ५. अत्र कुतः पुनरयम् अनुक्तो विशेषो लभ्यते । सम्बन्धिशब्दत्वात् । पूर्वकालशब्दस्य न ह्यनपेक्षा परं कालं पूर्वकालः सम्भवति । अतः पूर्वकालपरिग्रहे कृते अपरकालपरिग्रहः कृतो भवति । क० म० टि० । ६. अत्र 'स्नात' शब्दः स्नानेन निमित्तेन प्रयुक्तः । अनुलेपनशब्दस्तु अनुलेपनेनेति तयोश्चैकत्र प्रवृत्तिरित्यस्ति समानाधिकरण्यम् । क० म० टि० । ७. -वस्थार्थं क० म० । ८. -स्यते वा सं- क० म० । ९. पञ्चाला क० म० । १०. द्वयो व्यपेक्षा क० । द्वयोपेक्षा म० । ११. -वृक्षाः । क० म० ।

संज्ञायां—पञ्चाग्राः । दशाग्राः । पञ्चवटाः । दशवटाः । पञ्चऋष(र्ष)यः । सप्तऋष(र्ष)यः । दशार्हाः । तद्धिते—पञ्चनापितिः[1] । पञ्चकपालः । पञ्चखनीनः । अध्यर्धकंसः[2] । अध्यर्धशूर्पाः । अर्धपञ्चशूर्पः । अर्धतृतीयशूर्पः । उत्तरपदे—पञ्चगवधनः । दशगवधनः । पञ्चना[3]मप्रियः । दशना[3]मप्रियः । द्व्यङ्गुलजातः । त्र्यङ्गुलजातः । समाहारे—पञ्चपूली । दशपूली । पञ्चराजी । दशराजी । षण्णगरी । दशग्रामी । पञ्चगवम् । दशगवम् । समाहारे चेति किम् ? अष्टौ प्रवचनमातरः । एकशाटीति—शाटीशब्देन पूर्वकालैकेति समासः । शाटशब्देन तु अनभिधानाद् एकशब्दो न समस्यते । एका[4]पूपीति समाहारः । एकस्याप्यनेकपर्यायोपनिपातिनोऽनेकार्थोपपत्तेः समाहारोपपत्तिः । द्विगुश्चेति चकारः, तत्पुरुषकर्मधारयसंज्ञासमुच्चयार्थः । अनाम्नीति किम् ? पञ्चऋषीणामिदं पञ्चर्षम् । अत्र लुप्तिगोरिति श्लुक् स्यात् । अनाम्नीति द्विगुसंज्ञा वार्यते । अयं ग्रहणमुत्तरत्र द्विगुश्चेत्यस्यानुवृत्त्यर्थम् । द्विगुप्रदेशात्( ) द्विगोरित्येवमादयः ।

निन्द्योऽपापाणकेन ॥२।१।६२॥ निन्द्यः कुत्स्यः । निन्द्यवाचि सुबन्तमेकार्थं पाप अणक इत्येतद्वर्जितेन निन्दनवाचिना सुबन्तेन सह समस्यते वा स च समासस्तत्पुरुषसंज्ञः कर्मधारयसंज्ञश्च भवति । खसूची—निष्प्रतिभो वैयाकरण वैयाकरणखसूची[5] । याज्ञिककितवः[6] । मीमांसकदुर्दुरुटकः[7] । क्षत्रियभीरुः । भिक्षुविटः । छान्दसवठरः । निन्द्य इति किम् ? वैयाकरणश्चोरः । प्रत्ययोत्पत्तः[8] शब्दप्रवृत्ति[9]निन्दायामयं समास इष्यते । न च चौरत्वेन वैयाकरणत्वं निन्द्यते । किं तर्हि ? तदाश्रयो द्रव्यम् । वैयाकरणत्वं तु तदुपलक्षणमात्रम् । अपापाणके नेति किम् ? पापकुलालः । पापनापितः । अणककुलालः । अणकनापितः । विशेष्य[10]पूर्वनिपातार्थं वचनम् ।

गौणस्तेन ॥२।१।६३॥ अन्यत्र प्रसिद्धोऽन्यत्र गुणेन प्रवर्तमानो गौणः । गौणशब्द एकार्थो येन गुणेन स प्रवर्तते तत्सामान्यनिमित्तेन सुबन्तेन सह समस्यते वा स तत्पुरुषश्च समासो भवति । शस्त्रीव[11] शस्त्री, शस्त्री चासौ श्यामा च शस्त्रीश्यामा देवदत्ता । शस्त्रीव श्यामेत्यर्थः । एवं शरकाण्डगौरी । न्यग्रोधपरिमण्डला । सिंहशूरः । तित्तिरीकलमाषी । कुम्भकपालकोहिनी । कुमुदश्येनी । हंसगद्गदा । मृगचपला । गौण इति किम् ? देवदत्ता श्यामा । तेनेति किम् ? अग्निर्माणवकः । गौर्वाहीकः । फलास्तण्डुलाः । पर्वता बलाहकाः । गौणस्तेनेति नियमार्थं वचनम् ।

व्याघ्रादिभिर्गौणैस्तदनुक्तौ ॥२।१।६४॥ एकार्थं सुबन्तं व्याघ्रादिभिर्गौणैः सुबन्तैः सह समस्यते वा स तत्पुरुषश्च समासो भवति येन गुणेन[12] व्याघ्रादयः प्रवर्तन्ते स चेद्गुणः[13] शब्देन न प्रतिपाद्यते । व्याघ्र इव व्याघ्रः पुरुषः पुरुषव्याघ्रः । एवं पुरुषसिंहः । पुरुषवृषभः । गौणैरिति किम् ? वृषभो सिंह इव वृषभसिंहः । वृषभशब्दस्य परनिपातो न भवति । तदनुक्ताविति किम् ? पुरुषव्याघ्रः शूर इति मा भूत् । व्याघ्र, सिंह, वृषभ, महिष, चन्दन, वृक, वराह, हस्ति, कुञ्जर, रुरु, पुण्डरीक, कुञ्चा, पलाविका इति व्याघ्रादिः । बहुवचनादाकृतिगणोऽयम् । तेन वाग्वज्रः । मुखपद्मम् । पाणिपल्लवम् । करकिसलयम् । पार्थिवचन्द्रः । वानरश्वेत्यादि सिद्धं भवति ।

---

१. -तिः पाञ्चनापितिः. प- क० म० । २. 'कांस्यं कंसोऽस्त्रियाम्' क० म० टि० । ३. -नाव- क० म० । ४. प्यापानपात्रे आढे केयं वैजयन्ती क० म० टि० । ५. वैयाकरणश्चासौ खसूचिश्चेति विग्रहः । यः पृष्टः सन् खं सूचयति निरीक्षते निष्प्रतिभो भवति स एवमुच्यते । क० म० टि० । ६. कितव इव कितवः । यथैव हि कितवः किं तवास्तीति धनमेव वीक्ष्यमाणो द्यूते प्रवर्तते न तस्य जात्याद्यपेक्षते तथा याज्ञिकोऽपि याजने प्रवर्तमानो यस्तृष्णया याज्यस्य धन-सत्तामात्रमपेक्षते न च यागार्हताम् । स याज्ञिककितव इत्युच्यते । क० म० टि० । ७. मीमांसाशास्त्रमध्ययनफलमनवाप्य नास्तिको जात इति प्रतीयते- क० म० टि० । ८. प्रत्यासत्तेः क० म० । ९. -त्तिनिमित्तनि- क० म० । १०. -व्यस्य पू- क० म० । ११. 'शस्त्रलोहास्त्रयो शस्त्री छुरिकायां च विश्रुता' इति विश्वः । १२. गुणेन ते व्या- क० म० । १३. गुणशब्देन क० म० ।

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीरम् ॥२।१।६५॥ पूर्व अपर प्रथम चरम जघन्य समान मध्य मध्यम वीर इत्येतानि सुबन्तानि एकार्थानि सुबन्तेन सह समस्यन्ते वा स तत्पुरुषश्च समासो भवति। पूर्वः पुरुष. पूर्वपुरुषः। अपरपुरुषः। प्रथमपुरुषः। चरमपुरुष[1]। जघन्यपुरुषः। समानपुरुषः। मध्यपुरुषः। मध्यमपुरुषः। वीरपुरुषः। [2]विशेषणमित्येव। एकवीरः, अत्र हि सङ्ख्यान्तरादवच्छिन्नं वीरत्वमसाधारणं प्रतीयते। विशेषणं व्यभिचारीत्यस्यायं प्रपञ्चः पूर्वपदत्वव्यवस्थार्थम्। पूर्वपटुः। पूर्वजरन्। वीरपूर्वः।

श्रेण्यादिः कृतादिभिश्च्वौ ॥२।१।६६॥ श्रेणी इत्येवमादि सुबन्तमेकार्थं कृतादिभिः सुबन्तैः सह च्व्यर्थे गम्यमाने समस्यते वा स तत्पुरुषश्च समासो भवति। अश्रेणय श्रेणय कृताः श्रेणिकृताः पुरुषाः। एवं मूककृताः। पूगकृताः। श्रेणिमताः। श्रेणिमिताः। श्रेणीभूताः। च्वाविति किम्? श्रेणयः कृताः। किंचित्, च्व्यन्तानां च्व्यर्थस्य च्विनैवोक्तत्वात्[2] नित्यमेव समासो भवति। च्व्यर्थे हि अयं समासः श्रेणीकृताः। ऊरीकृताः। श्रेणि, ऊर[3], पूग, कुन्दुम[4], राशि, विचय, विशिष, निधन, कृपण, इन्द्र, देव, मुण्ड, भूत, श्रमण, वदान्य, अध्यापक, ब्राह्मण, क्षत्रिय, पटु, पण्डित, कुशल, चपल, निपुण इति श्रेण्यादिः। कृत, मत[5], मित, भूत, उप्त, समाज्ञात, समाम्नात, समाख्यात, संभावित, अवधारित, अवकल्पित, निराकृत, उत्कृत[6], उपाकृत, अपकृत इति कृतादिः। बहुवचनादाकृतिगणोऽयं तेन श्रेण्या स्थिता, श्रेण्या भूताः, श्रेण्यवबद्धा इत्यादि सिद्धम्। श्रेणिकृत[7] इत्यादौ क्रियाकारकसंबन्धो न विशेषणविशेष्यभाव इति वचनम्।

क्तक्तवादिभिन्नैः ॥२।१।६७॥ क्तान्तमेकार्थं सुबन्तं नञ् प्रकारैरेव भिन्नैः सुबन्तैः सह समस्यते वा स तत्पुरुषश्च समासो भवति। कृताकृतम्[8]। भुक्ताभुक्तम्। अशितानशितम्। कृष्टाकृशितम्। पूतापवितम्। शाताशितम्। छाताछितम्। कृतापकृतम्। भुक्तविभुक्तम्। पीतावपीतम्। नानिटेटि(ङि)ति वचनाद्विकारागमावभेदकौ। क्तमिति किम्? कर्तव्यमकर्तव्यं च। नञादिभिन्नैरिति किम्? कृतं प्रकृतम्। अवधारणं किम्? सिद्धं चाभुक्तं च। कृत चाविहित च। कृत चाकर्तव्य च। गतश्च प्राप्तः। अगतश्चाज्ञातः। अत्र प्रकृतिरर्थः, प्रत्ययश्च भिन्नः, पूर्वनिपातव्यवस्थार्थं वचनम्।

नानिटेट् ॥२।१।६८॥ नञादिभिन्नेन क्तान्तेनानिटा इट् क्तान्तं सेट्(ण्)न समस्यते। पूर्वेण प्राप्ते प्रतिषेधः। क्लेशिताक्लिष्टे[9]। पवितापूतमिति मा भूत्। इड्ग्रहणमर्थभेदाहेतोरागमस्य विकारस्य चोपलक्षणम्। तेन—अनशिताशितम्। शिताशातम्। छिनाच्छातमिति न भवति। क्त्वान्तमिति समासे क्तोत्तरपदीति असत्त्वाद्भवति। अनिटेति किम्? अशितानशितेन [10]जीवति शीताशीतम्। छिताछितम्। इडिति किम्? कृताकृतम्। शाताशातम्। छाताछातम्।

सन्महत्परमोत्तमोत्कृष्टं पूजायाम् ॥२।१।६९॥ सत् महत् परम उत्तम उत्कृष्ट इत्येतानि सुबन्तान्येकार्थानि सुबन्तेन सह समस्यन्ते वा पूजायां गम्यमानायां स तत्पुरुषश्च समासो भवति। (सन् पुरुष इति) सत्पुरुषः। महापुरुषः। परमपुरुषः। उत्तमपुरुषः। उत्कृष्टपुरुषः। पूजायामिति किम्? सन् जीवः। सन् [10]परो लोकः। उत्कृष्टा गौः [11]पूजायामर्थ[12] पूर्वनिपातव्यवस्थार्थं वचनम्।

वृन्दारकनागकुञ्जरैः ॥२।१।७०॥ वृन्दारक नाग कुञ्जर इत्येतैः सुबन्तैः सह सुबन्तमेकार्थं समस्यते वा पूजायां गम्यमानाया स च समासस्तत्पुरुषसंज्ञो भवति। गौर्वृन्दारक इव गोवृन्दारक.[13]। अश्व-

---

१. विशेषमित्ये- क० म०। २. -त्वात् तिति नि- क० म०। ङाच्छाय्यैत्यादिना तिः। तिदुस्त्वत्येदिना सः। क० म० टि०। ३. ऊरु क० म०। ४. कुदुम क० म०। ५. नत क० म०। ६. उपकृत, म०। ७. श्रेणीकृता इ- क० म०। ८. कृतञ्च तदकृतञ्चेति। कथं पुनरेकं वस्तु कृतं स्यादकृतं च? अवयवधर्मेण समुदायस्य तथा व्यपदेशात् दोषः कृतभागसंबन्धात् कृतम्, अकृतसंभागसंबन्धादकृतम्। अथवा यदर्थं कृतं तत्राऽसमर्थत्वादकृतमित्युच्यते। यथा वा पुत्रकार्याक्षमत्वात्पुत्र एवापुत्र इति। क० म० टि०। ९. -क्लिष्टम्। क० म०। १०. परलोकः म०। ११. गौः कर्दमात् क० म०। १२. र्थं निपातार्थं— क० म०। १३. -क इव गोवृन्दारकः। क० म०।

वृन्दारकः । गौर्गव इव गोनागः । अश्वनागः । गौः कुञ्जर इव गोकुञ्जरः । अश्वकुञ्जरः । पूजायामिति किम् ? सुसीमा नागः । सुसीमा स्फटा । देवदत्तो नाग इव मूर्खः । नात्र नागशब्दः पूजां गमयति । व्याघ्रादेराकृतिगणत्वात् सिद्धे पूजार्थं गुणोक्त्यर्थं[1] वचनम् । गोनागो बलवान् ।

कतरकतमं जातिप्रश्ने ॥२।१।७१॥ कतर कतम इत्येतौ सुबन्तावेकार्थौ सुबन्तेन समस्येते वा जातिप्रश्ने गम्यमाने स तत्पुरुषश्च समासो भवति । कतरो गार्ग्यः कतरगार्ग्यः । कतमो गार्ग्यः कतमगार्ग्यः । कतरः करः कतरकरः । कतरकलापः[2] । कतरवाजसनेयी । कतमः कठः कतमकठः । [3]कतमकलापः । कतमवाजसनेयी । जातिप्रश्न इति किम् ? कतरो भवतोर्देवदत्तः । कतमो भवता देवदत्तः । प्रश्नेऽयं समासः । नात्र गार्ग्यादिविशेषेऽवस्थेति वचनम् जातिप्रश्न एवेति नियमार्थं च ।

किं क्षेपे ॥२।१।७२॥ किमित्येतत्सुबन्तं सुबन्तेन सह समस्यते वा क्षेपे गम्यमाने स तत्पुरुषश्च समासो भवति । (कुत्सितो राजेति किंराजा) स किंराजा यो न रक्षति, स किंसखा योऽभिद्रुह्यति । स किंवैयाकरणो यः शब्दं न वूते । स किंगौर्यो न वहति । सर्वत्रात्र तत्कार्याभावात् क्षेपः । क्षेप इति किम् ? को राजा पाटलिपुत्रे ?

पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्या[4]यकधूर्त[5]प्रशंसारूढर्जातिः ॥२।१।७३॥ पोटा युवति स्तोक कतिपय गृष्टि धेनु वशा वेहत् बष्कयणी प्रवक्तृ श्रोत्रिय अध्यापक[6] धूर्त इत्येतै. प्रशंसारूढैश्च सुबन्तै. सह जातिवाचि सुबन्तमेकार्थं समस्यते वा स च समासस्तत्पुरुषसंज्ञः कर्मधारयसंज्ञश्च भवति । पोटा—(इभ्या पोटेति) इभ्यपोटा । आर्यपोटा । पुरुषवेषधारिणी स्त्री पोटा । गर्भ एव[7] दास्यं गता युवतिः—(इभ्या युवतिरिति) इभ्ययुवतिः । क्षत्रिययुवतिः । नागयुवतिः । वृन्दारकयुवतिः । स्तोक—अग्निस्तोकम् । विषस्तोकम् । कतिपय—दधिकतिपयम् । उदश्वित्कतिपयम् । गृष्टि—गोगृष्टिः । अजागृष्टिः । गृष्टि—सकृत्प्रसूता (गोगृष्टिः) (अजगृष्टिः), धेनु. नवप्रसूता । गोधेनुः । अजधेनुः । वशा—गोवशा । अजवशा । वशा वन्ध्या । वेहत्—गोवेहत् । अजवेहत् । वेहद् गर्भधारिणी । बष्कयणी—गोबष्कयणी । अजबष्कयणी । बष्कयेण वृद्धवत्सेन या दुह्यते सा बष्कयणी । वेहद्वहति या गर्भं वशा या नोपजायते । सकृत्प्रसूता गृष्टिः स्याद् बष्कयस्त्वेकहायनः ॥ प्रवक्तृ—कठप्रवक्ता । कलापप्रवक्ता । श्रोत्रिय—कठ[8]श्रोत्रियः । [9]कलापश्रोत्रियः । अध्यापक—कठाध्यापक[9] । [9]कलापाध्यापक.[10] । धूर्त—कठधूर्तः । [10]कलापधूर्तः । [11]धूर्तग्रहणमनिन्द्यार्थम् । [12]प्रशंसारूढा मतल्लिकाद्य आविष्टलिङ्गास्तैः । गौर्मतल्लिका गोमतल्लिका । अश्वमतल्लिका । गोमयूचिका । अश्वमयूचिका । गोप्रकाण्डकम् । अश्वप्रकाण्डकम् । गोकुमारी । अश्वकुमारी । गोतल्लजिका[13] । अश्वतल्लजिका । रूढग्रहणादिह न भवति । गौः रमणीया । गौः शोभना । जातिरिति किम् ? देवदत्ता पोटा । जातेर्विशेषस्य पूर्वनिपातार्थं[14] वचनम् ।

---

१. क्त्यर्थं च वच- क० म० । २. कतरकालापः, क० म० । ३. कतमकालापः क० म० । ४. अध्यायक क० म० । ५. अध्यायक क० म० । ६. एव वा दासङ्गना यु- क० म० । ७. करभोक० म० । ८. कालाप- क० म० । ९. अध्यायक क० म० । १०. कालाप क० म० । ११. अथ धूर्तग्रहणं किमर्थम् ? यावता कुत्साशब्दोऽयम्, तत्र कुत्सितादीहि निन्द्येत्येवमादि सिद्धमित्यत आह—धूर्तग्रहणमनिन्द्यार्थमिति । शब्दप्रवृत्तिनिमित्तस्य कुत्सायां कुत्सितानिन्द्येत्यादिना समासो विहितः । अर्थं तु पुनर्जातेः स्वयमकुत्सितायां धूर्तसंबन्धे विवक्षिते समासो विज्ञायते न कुत्सायाम् । क० म० टि० । १२. त्रिप्रकारा हि प्रशंसाशब्दाः—केचिज्जातिशब्दाः परवादार्थे प्रयुज्यमानाः प्रशंसामाचक्षते, सिंहदेवदत्त इति । केचिद् गुणशब्दाः गुणसंबन्धेन वर्तमानाः प्रशंसावचना भवन्ति । रमणीयो ग्रामः । शोभनः पाकः इति । केचिद् रूढिशब्दाः मतल्लिकादयः । तेषां प्रशंसैव । तदिह रूढवचनग्रहणात् प्रशंसायामेव वर्तन्ते । प्रशस्ता गौः गौर्मतल्लिका । गोमतल्लिका । प्रशस्ता गौरित्यर्थः । क० म० टि० । १३. गोतल्लजिका, अश्वतल्लजिका क० म० । १४. -पातनार्थं क० म० ।

चतुष्पाद्गर्भिण्या ॥२।१।७४॥ [1]चतुष्पाज्जातिस्तद्वति सुबन्तमेकार्थं गर्भिणीशब्देन सुपा सह समस्यते वा स तत्पुरुषश्च समासो भवति। गौः गर्भिणी गोगर्भिणी। एवमजगर्भिणी। अश्वगर्भिणी। चतुष्पादिति किम् ? ब्राह्मणीगर्भिणी। जातिरिति किम् ? कालाक्षी गर्भिणी। स्वस्तिमती गर्भिणी। कालाक्षी स्वस्तिमतीति[2] संज्ञाशब्दाविमौ।

खलतिजरत्पलितवलितैर्युवा[3] ॥२।१।७५॥ युवशब्दः समानाधिकरणः खलति जरत् पलित वलित[4] इत्येतैः सह समस्यते वा। स तत्पुरुषश्च समासो भवति। युवा खलतिः युवखलतिः। एवं युवजरत्। युवपलितः। युववलितः। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति तेन युवतिः खलतिः युवखलतिः। युवजरती। युवपलिता। युववलिता। खलत्यादीना पूर्वत्वप्रतिषेधार्थं वचनम्। अपरे युवत्वस्य खलतीत्वादेश्च न परस्परस्य विशेषणविशेष्यभावः। द्रव्यं ह्याश्रयाश्रयी विशेष्यते, अतो न विशेषणं व्यभिचारीति समास इत्यारम्भः। खञ्जकुण्डः[5]। कुण्डखञ्जः इति मयूरव्यंसकादिः। अविहितलक्षणो[6] हि तत्पुरुषः शिष्टैः प्रयुज्यमानो मयूरव्यंसकादिरित्याश्रीयते। [7]नीलोत्पलमित्यादौ तु नीलाद्युत्पलादेर्द्रव्यस्याश्रयस्यैव विशेष्यस्य विशेषणं जातिर्हि द्रव्यान्न पृथगाश्रीयते अन्यथा[8] पूर्वोत्तरपदनियमः[9] स्यादित्याहुः[10]।

ध्यप्तुल्याख्यमजात्या ॥२।१।७६॥ ध्यप्प्रत्याहारगृहीतप्रत्ययान्तं तुल्यपर्यायं च सुबन्तमजातिवाचिना सुबन्तेन सह समस्यते वा स तत्पुरुषश्च समासो भवति। (भोज्य तदुष्णं चेति) भोज्योष्णम्। भोज्यलवणम्। पानीयशीतं जलम्। हरणीयपूर्णो घटः। भृत्यभरणीयः। एकोऽत्र व्यवहार्थिऽन्यः शक्यार्थे। तुल्याख्य—तुल्यश्वेत। तुल्यमहान्। सदृशश्वेतः। सदृशमहान्। सदृक्श्वेतः। सदृङ्महान्। अजात्येति किम् ? भोज्य ओदनः। तुल्यो वैश्य। [11]शीतपानीयमित्यत्र पानीयशब्दस्य जातिवाचिनो विशेषणसमास। जात्या[12] समासस्य अजात्या पूर्वत्वस्य च प्रतिषेधार्थं वचनम्।

वर्णैर्वर्ण ॥२।१।७७॥ वर्णविशेषवाचि विशेषणं सुबन्तमेकार्थं वर्णविशेषवाचिना विशेष्येण सुबन्तेन सह समस्यते वा स तत्पुरुषश्च समासो भवति। शुक्लकृष्ण। रोहितपाण्डु। शुक्लबभ्रु। हरितबभ्रुः। कृष्णसारङ्ग। लोहितसारङ्ग। कृष्णशबल। लोहितशबलः। कृष्णकल्माषः। लोहितकल्माष। इह विशेषणं सूक्तमिति न सारङ्गादेः पूर्वनिपातः। शुक्लादीनामवयवद्वारेण समुदाये वर्तमानाना मुख्यं सामानाधिकरण्यमिति वचनम्। शुक्लकृष्णाद्यर्थाना परस्परस्य विशेषणविशेष्यभावो नास्ति इति वचनमित्यपरे।

कुमारः श्रमणादिना ॥२।१।७८॥ कुमार इत्येतत्सुबन्त विशेषण श्रमणादिभिः सुबन्तैः सह समस्यते वा स तत्पुरुषश्च समासो भवति। कुमारी श्रमणा कुमारश्रमणा। कुमारप्रव्रजिता। कुमारतापसी। कुमारोऽध्यापकः[13] कुमारीऽध्यापकः। कुमार्यध्यापिका कुमारीऽध्यापिका। कुमाराभिरूपकः। कुमाराभिरूपिका। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणं भवति, तस्य च श्रमणादीना स्त्रीलिङ्गाना पाठो लिङ्गमन्यथा कुमारशब्दस्योपात्तस्य श्रमणादिभिः स्त्रीलिङ्गै सामानाधिकरण्यं न संगच्छेत। कुमारशब्दस्य पूर्वतत्त्वार्थं[14] वचनम्। श्रमणा, प्रव्रजिता, तापसी, कुरुटा, गर्भिणी, बन्धकी, दासी, अध्यापक, अभिरूपक, मृदु, पटु, पण्डित, कुशल, चपल, निपुण इति श्रमणादि।

मयूरव्यंसकादयः ॥२।१।७९॥ मयूरव्यंसकादयस्तत्पुरुषसमासा निपात्यन्ते। व्यंसको मयूरः

---

१. -ष्पाद्या जाति- क. म०। २. -मतीति च सं- क० म०। ३. -लिनैर्यु- क० म०। ४. वलिन इ- क० म०। ५. कुण्टः। कुण्टखञ्जः क० म०। ६. -लक्षणे हि क० म०। ७. नीलोत्पलादौ तु क० म०। ८. पृथक्त्वे द्वयोर्विशेषणत्वे विशेषणविशेष्यत्वाभावे। क० म० टि०। ९. -पदानियमः क० म०। १०. कुण्टखण्डादिवत् पूर्वोत्तरानियमः क० म० टि०। ११. "पात्रभेदेऽम्भसि पानीयं जलमात्रे च कीर्तितम्" क० म० टि०। १२. जातिर्जात्या समस्यते। नरसिंह बकटिट्टिभ इति वर्द्धमानीये। क० म० टि०। १३. -ध्यापकः क० म०। १४. पूर्वत्वार्थं क० म०।

मयूरव्यंसकः । विसृष्टौ[1] विलुप्तौ वांऽशोऽस्येति व्यंसः, तत्तुल्यो व्यंसकः[2], व्यंसयति छलयतीति वा व्यंसकः, एवं [3]छात्रव्यंसकः, मुण्डः कर्मोज· कर्मोजमुण्डः । यवनमुण्ड । अत्र विशेष्यं पूर्वम् । एहि ईडे स्वो इति यस्मिन् कर्मणि वर्तते तदेहीडम् । एहि यवं वर्तते एहि वाणिजेति यस्यां (क्रियायां) सा एहिवाणिजा । अपेहिवाणिजा । प्रेहिवाणिजा । अपेहिद्वितीया । अपेहिप्रपूसा । अपेहि प्रकसं दूरमिति यस्यां सा अपेहिप्रकसा । एमि[4] स्वागतमिति यस्या सा [5]एमिस्वागता । प्रोह्ल कटमिति यस्यां सा प्रोह्लकटा । प्रोह्लकपर्दा । उद्वमचूला । आहरचेला । आहरवसना । आहरविततां । [6]भिन्नलवणा । पचलवणा । ह्रायन्तस्येति भावप्रधानाः समासाः कृन्धि विक्षिणीहीति यस्या सा कृन्धिविक्षिणा । उद्वरोत्सृजा । उद्वरोत्सृजा । उद्वमविरमा । उद्वपनिवसा । उत्पतनिपता । उत्पचनिपचा । आख्यातमाख्यातेन क्रियासातत्ये इति[7] समासः[8] असातत्यार्थ[9]मेषां पाठः । उदक् च वाक्[10] च उच्चावचम् । उच्चैश्च नीचैश्च उच्चनीचम् । आचितं चोपचितं च आचोपचम् । आचितं च पराचितं च आचपराचम् । निश्चितं च प्रचितं च निश्चप्रचम् । न किंचन आकिंचनम् । स्नात्वाकालकः । पीत्वास्थिरक· । भुक्त्वासुहित· । प्रोष्य[11] पापीयान् । उत्पतत्यया[12] कला निपत्यलोहिणी[13] । अत्र [14]परकालक्रियाभावेऽपि क्त्वा निपात्यते । निषण्णा श्यामा जाता निषण्णश्यामा । अद्यपञ्चमी । इहपञ्चमी । अद्यद्वितीया । इहद्वितीया । [15]इहैकपद्यं हि कर्मणा बहुलमाभीक्ष्ण्ये कर्तरि चाभिदधाति । जहि चोरमित्याभीक्ष्ण्यमाह । जहिजोड:[16] । उज्जहिजोड । उज्जहिस्तम्ब. । बहुलवचनान्न भवति । पचौदनम् । आख्यातमाख्यातेन क्रियासातत्ये । अश्नीत पिबतेति सततं (यत्र) वर्तते इति[17] अश्नीतपिबता । अश्नीतपचता । पचतभुञ्जता । खादतमोदना । खादाचामा । आहरनिवपा । आवपनिष्कषा[18] । पचप्रकला वर्तते । गतप्रत्यागतादय· । गतं च तत् प्रत्यागतं च तत् गतप्रत्यागतम् । पातानुपातम्[19] । महान्क्रय: । अल्पाक्रयिका । क्रयावयव: क्रय: । क्रयिकावयव: क्रयिका । क्रयश्चासौ क्रयिका च क्रयाक्रयिका समुदाय: । एवं घटाघटिका[20] । फलाफलिका । मानामानिका । अत्र व्यवस्थिते पूर्वोत्तरपदसमास. । शाकपार्थिवादय· । शाकभोजी पार्थिव: शाकपार्थिव: । कुतपवाम: सौश्रुत· कुतपमोश्रुत· । अजापण्यस्तौल्वलि. अजातौल्वलि: । यष्टिप्रचारणो मौद्गल्य: यष्टिमौद्गल्य. । घृतप्रधानो[21] राटि. घृतराटि । ओदनपाणिनि: । दध्युपसिक्त: ओदन: दध्योदन: । घृतौदन: । गुडसम्मिश्रा धाना गुडधाना: । गुडपृथुका: । अश्वयुक्तो रथ: अश्वरथ: । दधिपूर्णो घट: दधिघट: । अत्र शाकपार्थिवादिपूर्वोत्तरपदलोप. । वृत्तौ शाकादि.[22] शाकभोज्यादौ तत्परे वर्तते इति । विशेषणसमासा इत्यपरे । यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धम् । बहुवचनादाकृतिगणोऽयं तेन विस्पष्ट पटु: विस्पष्टपटु· । पुना राजा पुनाराज: । पुनर्गव: । पदाभ्यां ह्रियते पादहारक । गले चोप्यत इति गलेचोपक । इत्यादि[23] विरहिनलक्षणस्तत्पुरुष. शिष्टै. प्रयुज्यमानो मयूरव्यसकादिरिति साधुर्मन्तव्य: । निपातनादेव मयूरव्यंसकादीना (समास:) अत: परमो मयूरव्यंसक इति पदान्तरेण समासो न भवति ।

---

१. विप्लुतौ विसृष्टौ वा अंसौ अस्येति क० म० । २. तुल्ये कः संज्ञाप्रकृत्योरिति कः । क० म० टि० । ३. छात्र इव व्यंसक छात्रव्यंसकः । तद्वान् । पापो धूर्तस्तु व्यंसकः । क० म० टि० । ४. एहि स्वा– क० म० । ५. एहि स्वा– क० म० । ६. भिन्धिल- क० म० । ७. इति क्रियासातत्ये स- क० म० । ८. अहो पुरुष इति यस्यां क्रियायां सा अहो पुरुषिका, अहं पूर्व इति यस्यां सा अहम्पूर्विका । एवम् अहम्प्रथमिका । अहमहमिति यस्यां सा । अहमहमिका । इति वर्द्धमानीयवृत्तौ । क० म० टि० । ९. -स्यार्थं पुनां– क० म० । १०. उदक् च अवाक् च उच्चा- क० म० । ११. प्राप्यपापीयान् क० म० । १२. उत्पत्यपाकला क० म० । १३. निपत्यरोहिणी क० म० । १४. अत्र अपर–क० म० । १५. अत्रैक-क० म० । १६. जहिजोड । क० म० । १७. वर्तते अश्नी- क० म० । १८. आवपनिष्करा क० म० । १९. यातानुयातम् क० म० । २०. घाटाघटिका क० म० । २१. रौडिः घृतरौडिः क० म० । २२. शाकादि शा- क० म० । २३. सायंदोहः । प्रातर्दोहः पुनर्दोहः । सायमाशः । प्रातराशः । "कल्पबतः प्रातराशः सायमाशो दिनान्तभुक् ।" इति वैजयन्ती । क० म० टि० ।

द्वन्द्वः सहोक्तौ ॥२।१।८०॥ सुबन्तं सुबन्तेन सह सहवचने समस्यते स च समासः द्वन्द्वसंज्ञो भवति । (प्लक्षश्च न्यग्रोधश्चेति) प्लक्षन्यग्रोधौ । धवाश्वकर्णौ । वन्तोऽम् । वाक्त्वचम्[1] । लघु व्यजाद्यदल्वाजर्ध्य-मेकमित्येकग्रहणाद्बहूनामपि द्वन्द्वो भवति । होतृपोतृनेष्टोद्गातारः, द्वयोर्द्वन्द्वे हि होतापोतानेष्टोद्गातार इत्येव स्यात् । इह वृत्तिपदैः प्रत्येकमुत्तरपदेन समुदायेन वा तदर्थानां पदान्तरवत्युगपत्प्रत्यायनं सहोक्तिः, अन्यथा वाक्यवत् तद्वचनैकयोगक्षेमनियमायोगात्तेषां सह क्रियाविसंबन्धस्य वाऽभिधानं[2] समाहारेऽपि सहोक्तिरस्त्येव सहोच्यमानानां समाहरणात् । सहोक्ताविति किम् ? प्लक्षश्च न्यग्रोधश्च । अहरहर्नयमानो गामश्वं पुरुषं पशुम् । वैवस्वतो न तृप्यति सुरया इव दुर्मतिः । देवदत्तं भोजय गुरुदत्तं च, एकविंशतिरित्यादि सङ्ख्यांबद्धो[3] विंशत्यादिवत्, निमित्तानुविधानेन सङ्ख्येयमाचष्टे इति, एकवचनान्तो भवति । समाहारे चानवतेरिति[4] स्त्रीलिङ्गो भवति । द्वन्द्वप्रदेशाः, द्वन्द्व इत्यादयः ।

समानामेकः ॥२।१।८१॥ समाना तुल्याना[5] शब्दानामर्थस्य सहवचने तेषामेक एव प्रयोक्तव्यः । बहुवचनमतन्त्रम्[6] । वक्रश्च कुटिलश्च वक्रौ[7] कुटिलौ वा । सितश्च श्वेतश्च[8] शुक्लश्च सिताः, शुक्लाः श्वेता वा । समानामिति किम् ? प्लक्षन्यग्रोधौ । धवखदिरौ । धवखदिरपलाशाः । सहोक्ताविति किम् ? वक्रश्च कुटिलश्च । द्वन्द्वापवादोऽयमारम्भः । वक्रश्च कुटिलश्चेत्यसहोक्तावपि समानस्यापि शब्दान्तरस्य प्रयोग स्यात् ।

सुप्यसंख्येयः ॥२।१।८२॥ सुपि सर्वत्र ये शब्दाः समाना एकरूपा भवन्ति तेषा सहवचन एक एव प्रयोक्तव्य, संख्येयवाचि शब्दरूपं वर्जयित्वा । अक्षश्च शकटाक्षः अक्षश्च देवनाक्षः । अक्षश्च[11] भीतकाक्षः अक्षाः । एवं पादश्च पादश्च पादश्च पादा । माषश्च[12] माषश्च माषश्च माषाः । श्येनी च श्येनी च श्येन्यौ । हरिणी च हरिणी च हरिण्यौ । रोहिणी च रोहिणी च रोहिण्यौ । वृक्षश्च वृक्षश्च वृक्षौ । वृक्षश्च वृक्षश्च वृक्षश्च वृक्षाः[13] । सुपीति[14] किम् ? मातृमातारौ । जनयित्रीवाचिनो मातरौ, धान्यमातृवाचिनो मातरौ, इत्यादिरूपं भिद्यते । यत्र तु न भिद्यते तत्र[15] मातृभ्या मातृभिरित्येके । यत्र यस्मिन् सुपि ये शब्दाः समाना एकरूपा भवन्ति तस्मिन् सुपि तेषा सहवचन एक एव प्रयोक्तव्य. इत्यर्थः । असंख्येय इति किम् ? एकश्च एकश्च द्वौ च द्वौ च अत्रैक-शेषो न भवति । द्वन्द्वोऽपि न भवति अनभिधानात् । विंशतिश्च विंशतिश्च[16] विंशतिश्चेत्यत्र संख्यावाचित्वा-देकशेषः । पूर्व[17] समासार्थमिदं तु सरूपार्थम् ।

त्यदादिः ॥२।१।८३॥ त्यदादिनाऽन्येन च त्यदादेः सहवचने त्यदादिरेव एक. प्रयुज्यते । सा च देवदत्तश्च तौ । अयं च देवदत्तश्च इमौ । त्यदादीना मिथो यत् यत्पर तत्तदेवैकं प्रयुज्यते स च त्वं च युवाम्, त्वं च भवांश्च भवन्तौ । भवांश्च अहं च आवाम् । पुम्पुंसकतो लिङ्गम् । सा च देवदत्तश्च तौ । सा च कुण्डं च ते[18] । द्वन्द्वविशेषणे द्वन्द्वलिङ्गमेव । स च कुक्कुटश्च[19] कुक्कुटौ तौ, सा च मयूरी च कुक्कुटमयूर्यौ ते । तत्पुरुषविशेषणेऽभेदोपक्रम एव अर्धपिप्पल्यौ ते इति । भेदोपक्रमे त्वर्धं च तत्पिप्पल्याः अर्धपिप्पली सेति नात्रैकशेषः[20] ।

---

१ चुटुवहः समाहारे इत्यस्समासान्तः क० म० टि० । २. -धानसमाहा- क० म० । ३. -संख्या-द्वन्द्वो विं- क० म० । ४ संख्यार्थे द्विबहुत्वे स्तः तासु चानवतेः स्त्रियामित्यमरः । क० म० । ५. तुल्यार्थानां क० म० । ६. अप्रधानम् 'तन्त्रं प्रधाने सिद्धान्ते' इति नामलिङ्गानुशासनम् । क० म० टि० । ७. विरूपैकशेषः क० म० टि० । ८. सितश्च शुक्लश्च श्वेतश्च । क० म० । ९. विमक्तिमकृत्वैव द्वन्द्वापवादेऽन्यशेषः क्रियते । प्रयुक्तशब्दोऽप्रयुज्यमानानां शब्दानामर्थमाचष्टे । अन्यथा सहोक्त्यनुपपत्तेः क० म० टि । १०. देवानक्षः क० म० । ११. अक्षश्च विभी- क० म० । १२. भ्रम । क० म० टि० । १३. सरूपैकशेषः । क० म० टि० । १४. सुपि एकरूपैर्भवितव्यमिति नियमः कथमित्यर्थः । क० म० टि० । १५. तत्र भवत्येव मातृ- क० म० । १६. संख्यार्थे द्विबहुत्वे स्तः । क० म० टि० । १७. समासार्थमिदम्—क० म० । १८. ते महति स च कुण्डं च ते । तच्च देवदत्तश्च ते । द्वन्द्व- क० म० । १९. कुक्कुटः सा च मयूरी कु- क० म० । २०. सेति न तत्रैकशेषः क० म० ।

भ्रातृपुत्राः स्वसृदुहितृभिः ॥२।१।८४॥ भ्रातर्यस्य स्वसर्येन सहवचने भ्रात्यर्थः पुत्रार्थस्य दुहितर्येन पुत्रार्थ एकः शब्दः प्रयुज्यते। भ्राता च स्वसा च भ्रातरौ। सोदर्यश्च स्वसा च सोदर्यौ। भ्राता च भगिनी च भ्रातरौ। पुत्रश्च दुहिता च पुत्रौ। सुतश्च दुहिता च सुतौ। पुत्रश्च सुता च पुत्रौ। बहुवचनं पर्यायार्थम्।

पिता मात्रा वा ॥२।१।८५॥ पितृशब्दस्य मातृशब्देन सहवचने पितृशब्द एको वा प्रयुज्यते। माता च पिता च पितरौ मातापितरौ वा।

श्वसुरः श्वश्रूभ्याम् ॥२।१।८६॥ श्वसुरशब्दस्य श्वश्रूशब्देन सहवचने श्वसुरशब्द एव एकः प्रयुज्यते वा। श्वश्रूश्च श्वसुरश्च श्वसुरौ। श्वश्रूश्वसुरौ वा। द्विवचनं जातौ विकल्पार्थम्। अन्यथा हि श्वयोगे सावकाशो विकल्पो नान्यार्थे स्त्रियेति परत्वात् नित्यविधिना बाध्येत।

वृद्धो यूनाऽनन्यार्थप्रकृतौ ॥२।१।८७॥ वृद्धस्य यूना सहवचने वृद्धे वाच्ये वा एकः शब्दः प्रयुज्यते न चेत् वृद्धाद् यूनो युवत्वादन्योऽर्थो भिन्नोऽन्या च प्रकृतिर्भवति। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। वात्स्यश्च वात्स्यायनश्च वात्स्यौ। दाक्षिश्च दाक्षायणिश्च दाक्षी। औपगवश्च औपगविश्च औपगवौ। वृद्ध इति किम्? गर्गगार्ग्यायणौ, गार्गिगार्ग्यायणौ। यूनेति किम्? गर्गगार्ग्यौ, गार्गिगार्ग्यौ। अनन्यार्थप्रकृताविति किम्? भागवित्तिभागवित्तिनौ। अत्र गर्हः सौवीरत्वं चान्योऽर्थः। वात्स्यायनशौनकायनौ। अत्रान्या प्रकृतिः।

पुरुषः ॥२।१।८८॥ वृद्धस्त्रिया यूना सहवचने वृद्धवाच्येक. प्रयुज्यते सा च वृद्धा स्त्री पुरुष. पुरुष इव भवति। पुरुषस्यातिदेशोऽयं स्त्र्यर्थस्येति स्त्रीपुंसान्यत्वेऽपि तदेकप्रयोगो विज्ञायते। गार्गी च गार्ग्यायणश्च गार्ग्यौ। वात्सी च वात्स्यायनश्च वात्स्यौ। दाक्षी च दाक्षायणश्च दाक्षी। औपगवी च औपगविश्च औपगवौ। अर्थातिदेशाद् गार्गी च गार्ग्यायणी च गर्गा इति यञः ष्लुक्। गर्गानिति नन्त, पुंस इति नत्वम्। इमौ गार्ग्यावित्यनुप्रयोगस्यापि पुंस्त्वम्। पुमानित्यनुक्त्वा पुरुष इत्युपादानमुत्तरत्रापि प्रतिपत्त्यर्थम्।

स्त्रिया ॥२।१।८९॥ पुरुषस्य पुंसः प्राणिनः स्त्रिया सहवचने पुरुषवाच्ये वा एकः प्रयुज्यते अनन्यार्थप्रकृतौ न चेत् पुरुषात् स्त्रिया स्त्रीत्वादन्योऽर्थः प्रकृतिश्चान्या भवति। ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ। कुक्कुटश्च कुक्कुटी च कुक्कुटौ। मयूरश्च मयूरी च मयूरौ। कारकश्च कारिका च कारकौ। गोमांश्च गोमती च गोमन्तौ। पटुश्च पट्वी च पटू। गौश्चायं गौश्चेयम् इमौ गावौ। पुरुष इति प्राणिग्रहण किम्? तीरं नदनदीपतेः। घटघटीशरावोदञ्चनानाम्। अनन्यार्थप्रकृताविति किम्? गणकगणक्यौ। इन्द्रेन्द्राण्यौ। अत्र धयोगोऽन्योऽर्थः। द्रुणिकच्छपौ। हंसवाटराटरे। ऋश्यरोहितौ। अत्र प्रकृतिः। ब्राह्मणवत्सा ब्राह्मणीवत्सौ। अनार्थश्च विशेषणम्।

---

१. श्वशुरः क० म०। २. श्वशुरश्च श्वश्रूश्च श्वशुरौ क० म०। ३. "वृद्धशब्द पूर्वाचार्याणां संज्ञा गोत्रस्यापत्यमन्तर्हितं वृद्धमिति"—क० म० टि०। ४. "युवशब्दो यद्यपि लोके प्रथमे वयसि तथापि वंशे ज्यायसि भ्रातरि च जीवति सति युवेति परिभाषावशादपत्ये यो वर्तते स एव लभ्यते न तस्साहचर्याद्वृद्धशब्दस्यापि अपत्यार्थवृत्तेरेव युक्त ग्रहणमिति गोत्रग्रहणं तु न कृतम्"– क० म० टि०। ५. च परमा प्र- क० म०। ६. भागवित्तिभागवित्तिकौ क० म०। ७. वृद्धा या यूना- क० म०। "स्त्रियाः" क० म० टि०। ८. वाच्ये वैकः प्र- क० म०। ९. "गर्गान् पश्य इत्यत्र" क० म० टि०। १०. "पुमान् स्त्री चेति" क० म० टि०। ११. -त्र प्राणिप्रति- क० म०। १२. "जातियोगलक्षणम्" क० म० टि०। १३. "कारकः कर्तरि प्रोक्तः कर्मादावपि कारकम्। इति विश्वः।" क० म० टि०। १४. "अत्र नदनदीशब्दयोः घटघटीशब्दयोरेकदेशे प्राप्ते ग्रहणान्न भवतीत्यर्थः।" क० म० टि०। १५. "पुंयोगलक्षणम्" क० म० टि०। १६. "मराका मन्दसानाश्च क्षीराशा वाटराटराः। इत्यमरकोशः।" क० म० टि०। १७. "स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः। इत्यमरः।" क० म० टि०।

ग्राम्यद्विखुरसंघेऽशिशौ स्त्रीप्रायः ॥२।१।९०॥ ग्राम्या ये द्विखुराः पशवस्तेषां संघेऽशिशावतरुणसंबन्धिनी स्त्रीपुंसयोः सहवचने प्रायः स्त्रीवाच्येव एकः प्रयुज्यतेऽनन्यार्थप्रकृतौ न चेत् पुरुषात् स्त्रियाः स्त्रीत्वादन्योऽर्थः प्रकृतिश्चान्या भवति । गावश्चेमे गावश्चेमाः इमा गावः । अजाश्चेमे अजाश्चेमाः इमा अजाः । ग्राम्यग्रहणं किम् ? उरवश्चेमे उरवश्चेमाः इमे उरवः । पृषताश्च पृषत्यश्च पृषताः । द्विखुरग्रहणं किम् ? अश्वाश्चेमे अश्वाश्चेमाः इमे अश्वाः । गर्दभाश्च गर्दभ्यश्च गर्दभाः । मनुष्यश्च मनुष्याश्च मनुष्याः । पक्षिणश्च पक्षिण्यश्च पक्षिणः । संघ इति किम् ? गौश्चायं गौश्चेयम् इमौ गावौ । अशिशाविति किम् ? वत्साश्चेमे वत्साश्चेमाः इमे वत्साः । बर्कराश्चेमे बर्कर्यश्चेमाः इमे बर्कराः । प्राय इति किम् ? उष्ट्राश्चेमे उष्ट्रयश्चेमाः इमे उष्ट्राः । छागाश्चेमे छाग्यश्चेमाः इमे छागाः । अनन्यार्थप्रकृताविति किम् ? गोबलीवर्दम् ।

नपुंसकमन्येनैकं च वा ॥२।१।९१॥ नपुंसकशब्दरूपमन्येनानपुंसकेन सहोक्तावेकं प्रयुज्यतेऽनन्यार्थप्रकृतौ च न चेत्, अनपुंसकात् नपुंसकस्य नपुंसकत्वादनन्यार्थोऽन्या च प्रकृतिर्भवति तच्चैकं प्रयुज्यमानमेककमेकार्थं वा भवति । शुक्लश्च वस्त्रं शुक्लश्च कम्बलः ते इमे शुक्ले तदिदं शुक्लं वा । शुक्लं च वस्त्रं शुक्ला च बृहतिका ते इमे शुक्ले तदिदं शुक्लं वा । शुक्लं च वस्त्रं शुक्लश्च कम्बलः शुक्ला च बृहतिका तानीमानि शुक्लानि तदिदं शुक्लं वा । नपुंसकमिति किम् ? स्त्रीपुंसयोरपि प्रयोगः स्यात् । अन्येनेति किम् ? शुक्लं च शुक्लं च शुक्ले । शुक्लानि । एवं चेति न भवति । अनन्यार्थप्रकृताविति किम् ? कृष्णश्च कम्बलः शुक्लं च वस्त्रं ते कृष्णशुक्ले । हिमहिमान्यौ । अरण्यारण्यान्यौ । हिमारण्यां दुरावित्यर्थभेदः ।

पुण्यार्थात् पुनर्वसुर्ज्योतिषि ॥२।१।९२॥ पुण्यार्थात् शब्दाज्ज्योतिषि वर्तमानात् परः पुनर्वसुशब्दो ज्योतिष्येव वर्तमानः सहोक्तौ विषये द्वयर्थः सन् नित्यमेकः एकार्थो भवति । उदितौ पुष्यपुनर्वसू । तिष्यपुनर्वसू । सिध्यपुनर्वसू । पुण्यार्थादिति किम् ? आर्द्रापुनर्वसवः । अर्थग्रहणं पर्यायार्थम् । पुनर्वसुरिति किम् ? पुष्यमघाः । ज्योतिषीति किम् ? पुष्यपुनर्वसवो माणवकाः । बहवः पुनर्वसवो गताः । सहोक्ताविति किम् ? पुष्यपुनर्वसू येषां ते इमे पुष्यपुनर्वसवः उन्मुग्धाः ।

द्वन्द्वो वा ॥२।१।९३॥ द्वन्द्वसमास एकार्थो वा भवति । देवदत्तजिनदत्तम् । देवदत्तजिनदत्तौ । वधूवरम् । वधूवरौ । तिष्यपुनर्वसु । तिष्यपुनर्वसू । ब्राह्मणक्षत्रियम् । ब्राह्मणक्षत्रियाः । वात्रशालङ्कायनम् । वात्रशालङ्कायनाः । स्थावरजंगमम् । स्थावरजंगमाः । द्वन्द्वार्थस्यैकत्वात् तत्समानाधिकरणस्याप्येकत्वम् । वधूवरमिदम् । द्वन्द्व इति किम् ? वृक्षश्च वृक्षश्च वृक्षौ ।

विरोध्यद्रव्यमभेदे ॥२।१।९४॥ विरोधि यदद्रव्यं गुणाद्याधारो न भवति तदवयवो द्वन्द्व एकार्थो वा भवति अभेदेन चेद् भिन्नोऽन्योऽवयवो भवति । सुखदुःखम् । सुखदुःखे । शीतोष्णम् । शीतोष्णे । जीवितमरणम् । जीवितमरणे । लाभालाभम् । लाभालाभौ । संयोगविभागम् । संयोगविभागौ । विरोधीति किम् ? रूपरसगन्धस्पर्शाः । कामक्रोधौ मनुष्याणां खादितारौ वृकाविव । अद्रव्यमिति किम् ? सुखदुःखादिमौ ग्रामौ । शीतोष्णे इमे उदके । अभेद इति किम् ? बुद्धि-सुख-दुःखेच्छा-द्वेष-प्रयत्न-धर्माधर्मसंस्काराः । बुद्धि-सुखदुःखानि । पूर्वेणैव सिद्धे सर्वमिदं विकल्पानुक्रमणं नियमार्थम् । तत्र प्रत्युदाहरणं व्यवच्छेद्यम् ।

अश्ववडवपूर्वापराधरोत्तराः ॥२।१।९५॥ अश्ववडव पूर्वापर अधरोत्तर इत्येते द्वन्द्वा एकार्थो वा भवन्त्यभेदे । अश्ववडवम् । अश्ववडवौ । पूर्वापरम् । पूर्वापरे । अधरोत्तरम् । अधरोत्तरे । अश्ववडवेत्यत एव निपातनाद् आटोद् निवृत्तिः ।

---

१. नपुंसकं शब्द- क० म० । २. समुदायवाची क० म० टि० । ३. एकाभिधेयम्– क० म० टि० । ४. अनिष्टापादनमेतत्– क० म० टि० । ५. एकं चेति– क० म० । ६. तिष्यः-एकः, पुनर्वसू द्वौ, एतेषां द्वन्द्वो यद्यपि तत्र बहुवचने प्राप्ते द्विवचनं विधीयते, क० म० टि० । ७. बहवः पुष्यपुनर्वसवो गता क० म० । ८. द्वन्द्वसमासः– क० म० । ९. वात्रवशा- क० म० । १०. वात्रवशा- क० म० ।

पशुव्यञ्जनानि ॥२।१।९६॥ पश्ववयवो व्यञ्जनावयवश्च द्वन्द्व एकार्थो वा भवत्यभेदे। पशु-गोमहिषम्। गोमहिषौ। वृष्णिस्तम्बम्। वृष्णिस्तम्बौ। महाचोरभ्रम्। महाचोरभ्रौ। व्यञ्जनम्—दधिघृतम्। दधिघृते। शाकसूपम्। शाकसूपौ। बहुवचनं पशुद्वन्द्वे सेनाङ्गैकत्ववाधनार्थम्। हस्त्यश्वम्। हस्त्यश्वाः। अत्र बहुवचनं शाकाशमिति नित्यवैरेषु नित्य एव विधिः। अश्वमहिषम्। अभेद इति किम्? गोनरौ। दधित्वारिणी।

तरुतृणधान्यमृगपक्षिबह्वर्थांशः ॥२।१।९७॥ बह्वोऽर्था अभिधेया येषां ते बह्वर्थाः (ते) अंशा अवयवा यस्य स (बह्वर्थांशः) तर्ववयवः[1] तृणावयवो धान्यावयवो मृगावयवः पक्ष्यवयवश्च द्वन्द्व एकार्थो वा भवत्यभेदे। तरु-प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधम्। प्लक्षन्यग्रोधौ। धवाश्वकर्णम्। धवाश्वकर्णौ। तृण-कुशकाशम्। कुशकाशौ। शरशीर्यम्। शरशीर्यौ। धान्य-व्रीहियवम्। व्रीहियवौ। तिलमाषम्। तिलमाषौ। मृग-रुरुपृषतम्। रुरुपृषतौ। न्यङ्कुसूकरम्। न्यङ्कुसूकरौ। पक्षि-हंसचक्रवाकम्। हंसचक्रवाकौ। तित्तिरिकपिञ्जलम्। तित्तिरिकपिञ्जलौ। बह्वर्थांश इति किम्? प्लक्षश्च न्यग्रोधश्च। प्लक्षन्यग्रोधौ। अर्थग्रहणं किम्? द्रुमवयवस्य न स्यात्। इह च स्याद् धवश्च खदिरश्च पलाशश्च धवखदिरपलाशा। अंशग्रहणं किम्? धवश्च खदिरश्च पलाशश्च धवखदिरपलाशाः। अत्र च[2] स्यात्। इह च स्यात्। प्लक्षौ च न्यग्रोधौ च प्लक्षन्यग्रोधाः। अभेद इति किम्? गोपृषताः। प्लक्षयवाः। मृगाणां पशुत्वात् पूर्वेणैव सिद्धे इहोपादानममृगैरेव[3] बह्वर्थांशत्वे चैकत्वाभावार्थम्।

सेनाङ्गक्षुद्रजन्तु ॥२।१।९८॥ वेति निवृत्तम्। सेनाया अङ्गान्यवयवाः क्षुद्रजन्तवोऽल्पकायाः प्राणिनः आनकुलं स्मर्यन्ते सेनाङ्गावयवः क्षुद्रजन्त्ववयवश्च बह्वर्थांशो द्वन्द्व एकार्थो भवत्यभेदे। सेनाङ्गम्—अश्वश्च[4] रथश्च अश्वरथम्। रथिकाश्वारोहम्। क्षुद्रजन्तु—यूकालिक्षम्। यूकामत्कुणम्। दंशमशकम्। शतसूत्पादकम्। कीटपिपीलिकम्। बह्वर्थांश इति किम्? अश्वरथौ। अभेद इति किम्? हस्तिमशकाः।

फलं जातिः ॥२।१।९९॥ फलं या जातिस्तदवयवो बह्वर्थांशो द्वन्द्व एकार्थो भवत्यभेदे। बदराणि च आमलकानि च बदरामलकम्[5]। फलमिति किम्? ब्राह्मणक्षत्रियाः। जातिरिति किम्? द्रव्यपरचोदनायां मा भूत्। एतानि बदरामलकानि तिष्ठन्ति। बह्वर्थांश इति किम्? बदरं च आमलकं च बदरामलके। अभेद इति किम्? बदरशृगालाः।

शेषोऽप्राणी ॥२।१।१००॥ बह्वर्थांश इति निवृत्तम्। शेषो व्यञ्जनादिभ्यो योऽन्यः अप्राणी प्राणिवर्जिता द्रव्यजातिस्तदर्थो द्वन्द्व एकार्थो भवत्यभेदे। आराशस्त्री(स्त्रि) धानाशष्कुलि। युगवरत्रम्। कुण्डबदरम्। शेष इति किम्? दधिघृते। प्लक्षन्यग्रोधौ। कुशकाशौ। व्रीहियवौ। अप्राणीति किम्? ब्राह्मणक्षत्रिय-विट्शूद्राः। अप्राणीति पर्युदासेन द्रव्यजात्याश्रयणादिह न भवति रूप-रस-गन्ध-स्पर्शाः। उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि। जातिरिति नन्दकपाञ्चजन्यौ। जातिपरिचोदनायामयमेकवद्भावः। अत्र[6] न भवति—इमौ[7] आराशस्त्र्यौ तिष्ठतः। अभेद इति किम्? बदरशृगालौ।

प्राणितूर्याङ्गम् ॥२।१।१०१॥ अङ्गशब्दः प्रत्येकं परिसमाप्यते। प्राण्यङ्गावयवस्तूर्याङ्गावयवश्च द्वन्द्व एकार्थो भवत्यभेदे। [8]शङ्खशाङ्खिकादिसमुदायस्तूर्यम्। अङ्गमवयवः। प्राण्यङ्गे-दन्तोष्ठम्। पाणिपादम्। शिरोग्रीवम्। कर्णनासिकम्। तूर्याङ्गे—इदं शङ्खपटहम्। इदं भेरीमृदङ्गम्। मादङ्गिकवैणविकम्[9]। वीणावादकपरिवादकम्। अभेद इति किम्? पाणिगृध्नी। पाणिपटही।

चरणं स्थेणोर्लुङ्यनुवादे ॥२।१।१०२॥ चरणशब्दो [10]वेदशाखानिमित्तकस्तदध्यायिषु पुरुषेषु

---

१. तर्वाद्यवयवः, क० म०। २. अत्र स्यात् क० म०। ३. -मृगैरबह्वर्थांशत्वे- क० म०। ४. अश्वाश्च रथाश्च(इति)- क० म०। ५. -मलकम्, कुवलामलकम्, फल- क० म०। ६. इह न क० म०। ७. इमे, आरा- क० म०। ८. "स्याच्छाङ्खिकः" इत्यमरः। क० म० टि०। ९. -ङ्खिकपाणविकम्। क० म०। १०. कठादिप्रोक्ताध्ययनविशेषः शाखा। यदा तु तत्र चरणशब्दो वर्तते तदा जातिरप्राणिनामित्येव सिद्धः। [यदा शाखानिमित्तकः पूर्वेषु वर्तते तदा प्राणिनामिति प्रतिषेधाच्च सिध्यतीति इदमारभ्यते। क० म० टि०।

वर्तते । प्रमाणान्तरप्रतिपन्नस्यार्थस्य शब्देन संकीर्तनमनुवादः । [1]यज्ञकर्मण्यशंसितानुशंसनमित्येके । अनुकरणमित्यन्ये । लुङ्परयोः स्था इण् इत्येतयोर्भवत्कर्तृचरणं तदवयवो द्वन्द्वोऽनुवादविषय एकार्थो भवत्यभेदे । उदगात्कठकलापम्[2] । प्रत्यष्ठात्कठकौथुमम् । उदगान्मोदपैप्पलादम् । प्रत्यष्ठान्मोदपैप्पलादम् । चरणमिति किम् ? उदगुर्वत्सबाजाः । स्थेणोरिति किम् ? अनन्दिषुः कठकलापाः[3] । अन्वशंसिषुः कठकौथुमाः । लुङोति किम् ? उद्गन्ति कठकलापाः[4] । प्रतितिष्ठन्ति कठकौथुमाः । अनुवाद इति किम् ? उदगुः कठकलापाः[5] । प्रत्यष्ठुः कठकौथुमाः ।

नित्यवैरा वैरे ॥२।१।१०३॥ नित्यं सदा वैर[6] येषां ते (नित्यवैराः) तदवयवो द्वन्द्वो वा[7] एकार्थो भवत्यभेदे । देवासुरम् । अहिनकुलम् । मार्जारमूषकम् । श्वशृगालम् । श्ववराहम् । अश्वमहिषम् । काकोलूकम् । जातिनिबन्धनिमित्ता वैरमुच्यते । वर्तिपदार्थस्तस्योपलक्षणम् । नित्यवैरा इति किम् ? गोपालशालङ्कायनाः । एषामर्थान्तरकृतं वैरम् । वैर इति किम् ? देवासुरैरमृतमम्बुनिधेर्मथ्ये । दक्षिणाद्वा[8] गमनं प्रशस्तं श्वशृगालयोर्विद्यते लोके औत्पत्तिको विरोधः यथा मार्जारमूषकयोः । [10]श्वचाण्डालविसहास्ते इति गवाश्वादिः ।

पाश्यशूद्रानपुंसकाध्वर्युक्रत्वधीत्यासन्नविलिङ्गनदीपूर्वशगवाश्वादि ॥२।१।१०४॥ पाश्यशूद्रा[11] अनपुंसकाध्वर्युक्रतुः अधीत्यासन्नो विलिङ्गनदी विलिङ्गपुरं विलिङ्गदेशो गवाश्वादिश्च द्वन्द्व एकार्थो भवत्यभेदे । तत्र पाश्यशूद्राः[12] येषां भुक्तं पात्रं संस्कारेण शुद्ध्यति ते पात्रमर्हन्तीति पाश्याः । तच्छूद्रावयवः[13]—तक्षायस्कारम् । [9]रजकतन्तुवायम् । कुलालचक्रकम्[14] । किञ्चिन्धगञ्चिकम् । शाकयवनम् । पाश्यग्रहणं किम् ? [15]चाण्डालमृतपाः । शूद्रग्रहणं किम् ? ब्राह्मणक्षत्रियाः । अनपुंसकाध्वर्युक्रतुः—अध्वर्यवो यजुःशाखाविदस्तेषां क्रतुर्यस्य[16] यजुःशाखासु विधानम्[17] । अनपुंसकलिङ्गो योऽध्वर्युक्रतुर्नपुंसकलिङ्गं न भवति तदवयवः—अर्काश्वमेधम् । साङ्गातिरात्रम्[18] । पौण्डरीकातिरात्रम् । अर्कादयः पुंल्लिङ्गाः । अनपुंसकग्रहणं किम् ? गवामयनादित्यानामयने । प्रसज्यप्रतिषेधः किम् ? राजसूयं वाजपेयं च राजसूयवाजपेये इमौ क्रतू[19] पुंल्लिङ्गावपि । अध्वर्युग्रहणं किम् ? [20]इषुकज्जौ । उद्भिद्बलभिदौ । एते ह्यध्वर्यवः सामवेदविहितावयः ।[21] क्रतुः सोमयागः । इह न भवति । [22]दर्शपौर्णमासौ । अधीत्यासन्नः अधीत्यासन्नपाठेन । अधिप्रकृष्टस्तदवयवः पदमधीयानः पदकः । क्रममधीयानः क्रमकः । पदकश्च क्रमकश्च पदकक्रमकम् । पदाध्ययनानन्तरं तस्यैवानतिभिन्नं क्रमाध्ययनमित्यासत्तिः । एवं क्रमकवार्तिके[23] । चर्चापारक्षण्डिकम् । अधीतग्रहणं किम् ? पितापुत्रौ । आवृधदरिद्रौ । आसन्नग्रहणं किम् ? याज्ञिकवैयाकरणौ । विलिङ्गनदी विरुद्धं भिन्नं लिङ्गं

---

१. यज्ञयज्ञकर्म- क० म० । २. कठकालापम् क० म० । कठेन प्रोक्तमधीयत इति कठात्प्रोक्तार्थे अण् तस्य लुक् ततः तदधीते तद्वेत्यण् । तस्य प्रोक्तात्लुक् । कलापिनोऽप्येवम् । कठाश्च कालापाश्चेति विग्रहः । क० म० टि० । ३. कठकालापा. क० म० । ४. -कालापा. क० म० । ५. कालापाः क० म० । अवगतस्यैव प्राक् प्रमाणान्तरेण शब्देनार्थं प्रत्यायनमर्थस्य प्रश्ने च प्रतिवचने चोपदेशः । स यदा भवति तदा प्रत्युदाहरणं उदगुरिति । प्रथमत एवोपदेश इत्यर्थः क० म० टि० । ६. वैरो ये- क० म० । ७. -द्वो वैक एका- क० म० । ८. -वद्गुनि- क० म० । ९. दक्षिणाद्वामगमनं क० म० । १०. श्वचण्डालं सहास्ते क० म० । ११. -शूद्र अन- क० म० । १२. -शूद्रः पूर्वं- क० म० । १३. तच्छूद्रावयः तक्षा- क० म० । १४. कुलालचक्रकम् । १५. चण्डाल- क० म० । १६. यजुर्वेदः क० म० टि० । १७. सोऽध्वर्युक्रतुरित्यर्थः । अध्वर्युशब्दाद्युष्मदस्मदविधिशब्देनोच्यते । क० म० टि० । १८. साङ्गश्च अतिरात्रश्च साङ्गातिरात्रम् । क० म० टि० । १९. तत्र यदा नपुंसकलिङ्गौ प्रयुज्येते तदेतत् प्रत्युदाहरणम् । क० म० टि० । २०. इषुवज्रा- क० म० । इषुभक्षयोऽध्वर्युक्रतवो न भवन्ति । न हि तेषामध्वर्युवेदे विधानम् । किं तर्हि सामवेदे—क० म० टि० । २१. विहिताः, क्रतु- क० म० । २२. दर्शपौर्णमासाविति क्रतुशब्दः सोमयागेषु रूढः । यत्र यत्र सोमयागं विहितं ते ते सोमयागाः । तेष्वेव क्रतुशब्दो रूढो न दर्शपौर्णमासौ सोमयागौ । क० म० टि० । २३. वार्तिकं च- क० म० ।

यासां ता नद्योऽवयवाः अस्य सः[1]। गङ्गा च शोणश्च गङ्गाशोणम्। विपाट् च चक्रभिच्च विपाट्चक्रभिदम्। विपाट् स्त्री। चक्रभिन्नपुंसकम्। विलिङ्गग्रहणं किम्? गङ्गायमुने। नदीग्रहणं किम्? कैलासगन्धमादने। विलिङ्गपुरम्—विलिङ्गपुरावयवः। मथुरापाटलिपुत्रम्। काञ्चीकुसुमपुरम्। विलिङ्गग्रहणं किम्? मथुरावाराणस्यौ। पुरां देशत्वे तद्ग्रहणं ग्रामावयवनिषेधार्थम्। आम्रवतं[2] च शालूकिनी च [3]आम्रवच्छालूकिन्यौ ग्रामौ। पर्णिनी च चित्रभद्रं च पर्णिनीचित्रभद्रे ग्रामौ। [4]शौर्यं नगरं केतवना च ग्रामः शौर्यकेतवने। विलिङ्गदेशावयव.—कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम्। कुरुकुरुजाङ्गलम्। देशो जनपदः। विलिङ्गग्रहणं किम्? मद्राश्च केकयाश्च मद्रकेकयाः। गवाश्ववादिः—गवाश्वम्। गवैलकम्। गवाविकम्। अजैलकम्। अजाविकम्। कुब्जवाहनम्। कुब्जकैरातकम्। पुत्रपौत्रम्। [5]श्ववाण्डालम्। स्त्रीकुमारम्। दासीमाणवकम्। शाटीपिच्छिकम्। उष्ट्रखरम्। मूत्रशकृत्। मूत्रपुरीषम्। यकृन्मेदम्। मांसशोणितम्। दर्भशरम्। दर्भपूतिकम्। अर्जुनपुरुषम्। तृणोलपम्। कुटीकूटम्। [6]दासीदासम्। भागवतीभागवतम्। अत्र स्त्रियेत्येक[7]प्रयोगाभावो निपातनात्। यद्योच्चारितरूपग्रहणादिह न भवति—गोऽश्वौ, गो अश्वौ। गोऽविकौ, गो अविकौ।

न दधिपयआदिः ॥२।१।१०५॥ दधिपयआदिर्द्वन्द्व एकार्थो न भवति। दधिपयसी। सर्पिर्मधुनी। मधुसर्पिषी। ब्रह्मप्रजापती। शिववैश्रवणौ। स्कन्दविशाखौ। परिजाकोशिकौ। प्रवर्ग्योपसदौ। शुक्लकृष्णे। ब्रह्मबार्हिषी। निपातनाद् दीर्घः। ऋक्सामे। वाङ्मनसे। अनयोरकारान्तत्वम्। याज्यानुवाक्ये। दीक्षातपसी। मेधातपसी। अध्ययनतपसी। श्रद्धातपसी। श्रद्धामेधे। उलूखलमुसले। आश्वयुजाने।

संख्याने ॥२।१।१०६॥ वर्तिपदार्थानां संख्याने इयत्ता परिच्छेदे द्वन्द्व एकार्थो न भवति। दश हस्त्यश्वाः। शत यूकालिक्षाः। बहवः पाणिपादाः। कति मार्दङ्गिक[8]वैणविकाः। तावन्तो गवाश्वाः। एतावन्तो गवाविकाः।

वाऽन्तिके ॥२।१।१०७॥ संख्यानस्यान्तिके समीपे द्वन्द्व एकार्थो वा भवति। [9]उपदशं हस्त्यश्वम्। उपदशा हस्त्यश्वाः। उपदशाय हस्त्यश्वाय। उपदशेभ्यो हस्त्यश्वेभ्यः। द्वन्द्वार्थस्यैकत्वाद् अनुप्रयोगस्यापि बहुत्वाहेरेकवचनम्। अव्ययीभावस्य त्वनुप्रयोगे। उपदशं[10] हस्त्यश्वाः। उपदशं हस्त्यश्वायेति भवति।

सूर्क पूर्वम् ॥२।१।१०८॥ समासविधाने सुना प्रथमान्तेन निर्दिष्टं पूर्वं प्रयोक्तव्यम्। द्वितीया—[11]कृष्णश्चित्र(श्रि)तः। तृतीया—शङ्कुलाखण्डः। राजपुरुषकम्बलौ राज्ञः पुरुषः राजपुरुषः। राजपुरुष[12] इत्यनुगमः। राज्ञः पुरुषस्य कम्बल इति वा विगृह्यमाणे समानाधिकरणे षष्ठ्यौ स्यातामिति राजपुरुषयोः स्वस्वामिभावो न प्रतीयते[13] बाह्यापेक्षा च पुरुषे षष्ठी, तदनपेक्षो राजपुरुषसमासः सा तत्रासिद्धा भवति। वृत्तिवाक्ययोश्चोपसर्जनपूर्वत्वे सत्यभिन्नोऽर्थः। सूक्तं पूर्वमिति च कृतं भवति। प्रधानपूर्वत्वे त्वर्थो भिद्यते, उपसर्जनषष्ठ्येव च सुपेत्यस्य प्रत्यासत्त्या षष्ठीति निर्दिश्यते, वाक्यवत् समासेऽप्यनियमः स्यादिति वचनम्।

राजदन्तादौ[14] ॥२।१।१०९॥ राजदन्तादौ समासगणेऽप्राप्तपूर्वनिपातं पूर्वं निपतति। दन्तानां राजा राजदन्तः। वनस्याग्रे अग्रेवणम्। पाठादलुक्। पूर्वं वासितं पश्चाल्लिप्तं लिप्तवासितम्। नग्नमुषितम्। अवक्लिन्नपक्वम्। सिक्तसम्मृष्टम्। भृष्टलुचितम्। अर्पितोप्तम्। उप्तगाढम्। उलूखलं च मुसलं च उलूखल-

---

१. [1]सः उभयश्च इरावती च उभयेरावती ग- क० म०। २. आम्रवं च क० म०। ३. -च्यवच्छा- क० म०। ४. शौर्यं च नगरं- क० म०। ५. श्ववाण्डा- क० म०। ६. [2]दासीदास्यतिकरविधौ पुष्यधन्वा मनोभूः औढ्राप्रौढ्यतिकरविधाविक्षुधन्वा मनोभूः। राज्ञीराजन्यतिकरविधौ हेमधन्वा मनोभूः दासीदासन्यतिकरविधौ दारुधन्वा मनोभूः॥ क० म० टि०। ७. एकशेष क० म० टि०। ८. -कपाण- क० म०। ९. अव्ययमिति समासः। प्रमाणीसङ्ख्याश्चः। क० म० टि०। १०. दशानां समीपमुपदशम्, शब्दप्रयेति समासः। अनः ५।१५१। क० म० टि०। ११. कल्पितः, क० म०। १२. -पुरुषकम्बल इ- क० म०। १३. -तीयेत वा- क० म०। १४. ऋणे अधमः अधमर्णः। एवम्, उत्तमर्णः। परशतम्, परस्सहस्रम्। क० म० टि०।

मुसले । तण्डुलकिण्वम् । आराटा[1]यनिचाग्नि । चित्ररथवह्नीकम् । स्नातकराजानौ । वैकारिमतरा[2]जवाजम् । गोपालिकाबालपूलासम् । कुरण्डस्थलपूलासम् । उशीरबीजशिञ्जास्थम् । दारजारौ । दारार्थम् । अवन्त्यस्मकम् । शूद्रार्यम् । चित्रास्वाती । भार्यापती । जायापती । जम्पती । दम्पती । जायाशब्दस्येह पाठाज् जम्भावदन्नावौ वा । स्वसृपती । पुत्रपती । पुत्रपशू । केशश्मश्रू । शिरोबिन्दुः ।

विशेषणसर्वादिसङ्ख्यं बहुव्रीहौ ॥२।१।११०॥ विशेषणं सर्वादिसङ्ख्यावाचि च शब्दरूपं बहुव्रीहौ समासे पूर्वं प्रयोक्तव्यम् । विशेषणम्—चित्रगुः । शबलगुः । कण्ठेकालः । उरसिरोमा[3] । उदरेमणिः । सर्वादि—सर्वशुक्लः । सर्वकृष्णः । विश्वदेवः । विश्वमित्रः । संख्या—द्विकृष्णः । त्रिकृष्णः । पंचरक्तः । बहुशतः । द्वयन्यः । त्र्यन्यः । बहुव्रीहाविति किम् ? उपसर्वम् । सूक्तमित्यनियमे नियमार्थं वचनम् ।

क्तः ॥२।१।१११॥ क्तप्रत्ययान्तं बहुव्रीहौ पूर्वं प्रयोक्तव्यम् । कृतः कटो येन कृतकटः । भिक्षितभिक्षः । कटी[4]कृतमनेन कटकृतः । कृतविश्वः[5] । कृतप्रियः । बहुवचनं प्रियार्थम् । क्तस्य पूर्वनिपातो विशेष्यार्थः स्पर्धार्थः प्रियार्थश्च ।

कालाकृतिसुखादिभ्यो वा ॥२।१।११२॥ कालवाचिन आकृतिजातिस्तद्वाचिनः सुखादिभ्यश्च शब्दरूपेभ्यः बहुव्रीहौ समासे क्तान्तं पूर्वं वा प्रयोक्तव्यम् । काल—मासयाता । यातमासा । संवत्सरयाता । यातसंवत्सरा । आकृति—शार्ङ्ग[6]रजग्घी । जग्धशार्ङ्गरा । पलाण्डुभक्षिती । भक्षितपलाण्डुः । सुखादि—सुखयाता । यातसुखा । दुःखयाता । यातदुःखा । जातिग्रहणमकृत्वा आकृतिग्रहणाद् आकृत्या संस्थानेन या व्यज्यते जातिः सेह विज्ञायते । इह न भवति । आहूतब्राह्मणः । सेवितक्षत्रियः । तर्पितदाक्षिः । प्रीणितकठ इत्येके । क्ता इति किम् ? बहुशार्ङ्गरः, बहुपलाण्डुदेशः, जातिपरत्वे आकृतिपूर्वनिपा[7]तो न व्यक्तिपरत्व इत्येके ।

प्रहर[8]णात् सप्तमी च ॥२।१।११३॥ प्रहरणवाचिनः सप्तम्यन्तं क्तान्तं च बहुव्रीहौ पूर्वं वा प्रयोक्तव्यम् । दण्डः पाणौ यस्य स दण्डपाणिः । पाणिदण्डः । वज्रहस्तः । हस्तवज्रः । अस्युद्यतः । उद्यतासिः । मुसलोद्यतः । उद्यतमुसलः । दर्भपवित्रपाणि । दर्भपवित्रं गङ्वाशनिष्टा[9]पातपरित्राणं प्रहरणमेव । दर्भपवित्रे पाणिर[10]स्येति वा । भार्यो[11]ढादिष्विति वा भवति ।

गङ्वादिभ्यः ॥२।१।११४॥ गङ्वादिभ्यः सप्तम्यन्तं बहुव्रीहौ पूर्वं वा प्रयोक्तव्यम् । गडुः कण्ठे यस्य स गडुकण्ठः । [12]अरुशिराः । बहेगडुः[13] ।

भार्योढादिषु ॥२।१।११५॥ भार्योढ इत्येवमादिषु बहुव्रीहिषु(ष्व)अप्राप्तपूर्वनिपातनं[14] निपतति वा । भार्योढः । ऊढभार्यः । अर्थगतः । गतार्थः । अग्न्याहितः । आहिताग्निः । पुत्रजातः । जातपुत्रः । दन्तजातः । जातदन्तः । श्मश्रुजातः । जातश्मश्रुः । शीर्षच्छिन्नः । छिन्नशीर्षः । तैलपीतः । पीततैलः । घृत[15]पीतः । पीतघृतः । भार्योढादिराकृतिगणः, तेन[16] सिद्धं पीतदधिः ।

प्रियः ॥२।१।११६॥ प्रियशब्दो बहुव्रीहौ समासे पूर्वं वा प्रयोक्तव्यः । प्रियगुडः । गुडप्रियः । प्रियविश्वः । विश्वप्रियः । प्रियहिः । हिप्रियः ।

---

१. आरट्वायनि- क० म० । २. -मतगाज- क० म० । ३. -सिकोमा क० म० । ४. कटे कृत- क० म० । ५. विश्वः । कृतश्रिकः कृत- क० म० । ६. 'शार्ङ्गं शृङ्गवेरकम्' क० म० टि० । ७. निपातनो न क० म० । ८. 'आयुधं च प्रहरणम्' इत्यभिधानात् । ९. -अनिष्टोपात- म० । १०. नेन्द्रादिभ्यः सप्तम्यन्तस्य पूर्वनिपातोऽस्ति । इन्दुः शेखरेऽस्य इन्दुशेखरः । कपिध्वजः । पद्मनाभः । पद्महस्तः । शङ्खपाणिरिति वर्द्धमानोपाध्यायः । क० म० टि० । ११. -दादिरिति वा म० । १२. गात्रजस्फोटः 'व्रणोऽस्त्रियामि(मी) मंसम्' क० म० टि० । १३. 'स्कन्धप्रदेशस्तु बहम्' क० म० टि० । १४. -पातं पूर्वं नि- क० म० । १५. 'कपिरपि च कापिशायनपरिपीतो वृश्चिकेन सन्दष्टः ।' इति प्रयोगः 'सुण्ठा तु सुरुस्वादुरसा कक्षा मधुरी कापिशायनम् ।' क० म० टि० । १६. तेन किं सिद्धम् ? दधिपीतः । पी- क० म० ।

कडारादयः कर्मधारये ॥२।१।११७॥ कडारादयः कर्मधारये समासे पूर्वं प्रयोक्तव्याः। कडार-जैमिनिः। जैमिनिकडारः। गडुलशाण्डिल्यः। शाण्डिल्यगडुलः। कूटदाक्षिः। दाक्षिकूटः। काणद्रोणः। द्रोणकाणः। खञ्जवात्स्यः। वात्स्यखञ्जः। कर्मधारय इति किम्? ईषत्कडारः। कडारादीनां गुणवचनत्वात् पक्षे परार्थं वचनम्। कडार, गडुल, कूट, काण, खञ्ज, कुण्ड[1], खेल, खलति, गौर, वृद्ध, भिक्षुक, पिङ्गल, तनु, बठर। कडारादिराकृतिगणः। बहुवचनमस्याकृतिगणतां द्योतयति।

धर्मार्थादिषु द्वन्द्वे ॥२।१।११८॥ धर्मार्थादिषु द्वन्द्वेषु अप्राप्तपूर्वनिपातनं पूर्वं वा निपतति। धर्मार्थौ। अर्थधर्मौ। कामार्थौ। अर्थकामौ। शब्दार्थौ। अर्थशब्दौ। सर्पिर्मधुनी। मधुसर्पिषी। आद्यन्तौ। अन्तादी। गुणवृद्धी। वृद्धिगुणौ। धर्मार्थादिराकृतिगणः।

लघुध्यजाद्यदल्पाजर्च्यमेकम् ॥२।१।११९॥ द्वन्द्वे समासे लघ्वक्षरं घिसंज्ञमजाद्यदन्तमल्पाच् अर्च्यं चैकं पूर्वं प्रयोक्तव्यम्। अर्च्यमभ्यर्हितम्। लघु—कुशकाशम्। शरशीर्यम्। तृणकाष्ठम्। घिः—अग्निधूमम्। वायुतोयम्। द्रोहियवौ। अजाद्यत्—अस्त्रशस्त्रम्। इन्द्रचन्द्रौ। ऋश्यरोहितौ। उष्ट्रखरम्। उष्ट्रशतम्। इन्द्राग्नी। इन्द्रवायू। अर्केन्द्रौ[2]। अल्पाच्—प्लक्षन्यग्रोधौ। धवखदिरौ। वाग्नी। वाय्वग्नी। वाग्वायू। वागर्थौ। धवाश्वकर्णौ। अर्च्यम्—श्रद्धामेधे। दीक्षातपसी। मातापितरौ। वधूवरौ। आहवनीयोत्करौ। वासुदेवार्जुनौ। स्पर्धे—परम्परम्। लघुध्यजाद्यदल्पाजर्च्यमिति[3] किम्? कुक्कुटमयूरौ। मयूरकुक्कुटौ। अध्येतृवेदितारौ[4]। अश्वार्कौ। ऋक्षाश्वौ। एकमिति किम्? अनेक[5] प्राप्तावेकस्य नियमः। अनियमः शेषे—गुरुरविभास्करतनयाः। रविभास्करतनयगुरवः। एतत् तु न भवति—भास्करतनयरविगुरव इति। एवम् अश्वरथेन्द्राः। शङ्खदुन्दुभिवीणाः। मृदङ्गशङ्खतुणवाः। धनपतिरामकेशवा इति। शङ्खरामशब्दयोरुत्तरेण वृत्तयो पूर्वेण वृत्तिः। द्वन्द्व इति किम्? विस्पष्टं पटुरिति विस्पष्टपटु।

वर्णो वर्णेनानुपूर्वम् ॥२।१।१२०॥ वर्णो वर्णेन सह द्वन्द्वे पूर्वं पूर्वं[6] प्रयोक्तव्यम्। ब्राह्मणक्षत्रियौ। क्षत्रियवैश्यौ। वैश्यशूद्रौ। ब्राह्मणक्षत्रियविट्शूद्राः। भीमसेनार्जुनौ। बलदेववासुदेवौ। युधिष्ठिरभीमसेनार्जुनाः। अनुग्रहणादेकमिति निवृत्तम्।

भं त्वेकसङ्ख्या च ॥२।१।१२१॥ भं नक्षत्रम् ऋतुश्च एकसङ्ख्या च सम[7] सङ्ख्याक्षरमनुपूर्वं पूर्वं[8] प्रयोक्तव्यम्। कृत्तिकारोहिण्यः। अश्विनीभरणीकृत्तिकाः। मृगशिरःपुनर्वसू। हेमन्तशिशिरौ। हेमन्तशिशिरवसन्ताः। एकसङ्ख्याजिति किम्? आर्द्रामृगशिरसी[9]। ग्रीष्मवसन्तौ।

सङ्ख्याऽल्पा समासे ॥२।१।१२२॥ समासे अल्पा सङ्ख्या महत्याः सङ्ख्यायाः पूर्वं प्रयोक्तव्याः। द्वित्राः[10]। त्रिचतुराः। द्विदशा। त्रिदशा। द्विशती। त्रिशती। त्रयोदश। चतुर्दश। अशीतिशतम्। नवतिशतम्। समासग्रहणं द्वन्द्वनिवृत्त्यर्थमुत्तरार्थं च।

---

१. कुण्ट क० म०। 'काणः कुण्टस्तथा मण्डो बधिरो दुर्भगः कुणिः।' इति सिद्धान्तसारे। क० म०टि०। २. अर्केन्दू क० म०। ३. -र्च्यमेकामिति क०म०। ४. -रौ। वेदिग्रभ्येतारौ। अथा-क०म० टि०। ५. एष चार्थो जातेः पदार्थस्य आश्रयणाल्लभ्यते व्यक्तौ हि पदार्थे प्रतिव्यक्तिशास्त्र(स्त्रा)प्रवृत्त्या भवितव्यमिति सर्वेषां नियमः स्यात्। आकृतौ पदार्थावेकं लक्षणं सकृत्प्रवर्तते। तेन चैकस्य पूर्वनिपातनेन जातिसंस्कृतिशेषाणामनियमो भवति। एवमुत्तरत्राप्येकस्य नियमः। अनियमः शेषे। क० म० टि०। ६. पूर्वः पूर्वं पूर्व- म०। ७. ऋतूनामानुपूर्व्यं प्रादुर्भावकृतं, नक्षत्राणामुदयकृतम्, ऋतुनक्षत्रमित्यत्रैव वर्णग्रहणं किमर्थं कृतमिति पर्यनुयोगमाशङ्क्याह—समेत्यादि वा पृथग्वचनः। अनुपूर्वं स्वनुलोमानां जन्मकृतम्। लौकिके व्यवहारे च प्रसिद्धम्। प्रसिद्धिश्च श्रुतिकृता, श्रुतौ हि पठ्यते मुखतो ब्राह्मणमसृजत्। बाहुभ्यां राजन्यम्। ऊरुभ्यां वैश्यं, पद्भ्यां शूद्रमिति। क० म० टि०। ८. -पूर्वं पूर्वं पूर्वं पूर्वं प्र- क० म०। ९. -सी, पुष्यपुनर्वसू श्री- क० म०। १०. 'द्वौ वा त्रयो वा द्वित्राः स्यात् पूर्वं त्रिचतुरा अपि। चतुःपञ्चाः पञ्चषाश्च षट्सप्ताश्च लक्षिताः॥" क० म० टि०।

स्यग्गोष्यतेऽनंशीयो बहुव्रीहेर्ह्रस्वः ॥२।१।१२३॥ स्यगुपसर्जनं यो गोशब्दो यश्च व्यप्रत्याहारगृहीतप्रत्ययमान्तस्तदन्तस्य समासस्य ह्रस्वादेशो भवति अनंशीयो बहुव्रीहेर्न चेद् असावंशी समासः। ईयसो यः व्यदीकारस्तदन्तश्च बहुव्रीहिर्भवति। चित्रा गावो यस्य स चित्रगुः। शबलगुः। पञ्चभिर्गोभिः क्रीतः पञ्चगुः। दशगुः। खट्वामतिक्रान्तः अतिखट्वः। अतिमालः। प्रिया[1] खट्वा यस्य सः प्रियखट्वः। प्रियमालः। कौशाम्ब्याः[2] निष्क्रान्तः निष्कौशाम्बिः[3]। निर्वाराणसिः। अतिब्रह्मबन्धुः। अतिदेवबन्धुः। अतिनक्षत्रमालः। बिस्तिलपीडनिः। स्यग्ग्रहणं किम्? सुगोः। अतिगोः। नक्षत्रमाला। राजकुमारी। गोष्यद्ग्रहणं किम्? अतितन्त्रीः। अतिलक्ष्मीः। अतिश्रीः। अतिभ्रूः। अनंशीयो बहुव्रीहेरिति किम्? अर्धपिप्पली। तुर्यभिक्षा। बहुश्रेयसी। विद्यमानप्रेयसी। बहुव्रीहेरिति किम्? निःश्रेयसिः। प्राप्तश्रेयसिः। अलंश्रेयसिः। तदन्तस्य समासस्येति किम्? गोकुलम्[4]। कन्यापुरम्। सुगोः पुत्रः। सुगोपुत्रः। राजकुमारीपुत्रः। पञ्चकुमार्यः प्रिया यस्य[5] (सः)पञ्चकुमारीप्रियः, इत्यत्र योऽयं प्रतिन्यङ्[6] प्रत्यासत्तेस्तदन्तस्य विज्ञानान्न भवति। बहुकुमारीका[7] ब्रह्मबधूक इत्यत्र परत्वाद् ह्रस्वादेशात् पूर्वं समासान्ते कृते व्यदन्तता नास्तीति न भवति। समासार्थाश्च समासान्तः। अतिखट्वाय। अतिखट्वार्थम्। अतिखट्वेन्द्रः। अतिखट्वेभ्य इत्यत्रासिद्धं बहिरङ्गमन्तरङ्गे।

अन्तः ॥२।१।१२४॥ समासस्येति वर्तते। समासस्यान्त इत्ययमधिकारः आपादपरिसमाप्तेः। यदित ऊर्ध्वमनुक्रमिष्यामः (तत्)समासस्यान्तः अवसानावयवो भवतीति वेदितव्यम्। समासान्तत्वप्रयोजनं बहुव्रीह्यव्ययीभावद्विगुद्वन्द्वसंज्ञाः। सुजम्भे सुजम्भानौ स्त्रियौ—अत्रातो बहुव्रीहिग्रहणेन ग्रहणाद्, आङचि[8] निषेधः[9]। उपधुरम्[10], उपशरदम्[11]—अत्रातोऽव्ययीभावग्रहणेन ग्रहणात् सुपोऽम्भावः। द्विधुरी। त्रिधुरी—अत्र द्विगुग्रहणेन ग्रहणाद् ङी। कोशनिषदिनी। तत्रोपानहिनी—अत्र द्वन्द्वग्रहणेन ग्रहणादिन्। तथा सुसङ्ख्याच्चाहस्त्यादेः पादस्य लुक्—व्याघ्रपाद्, सिंहपाद्—अत्रान्त इति वचनादन्तस्यैव[12] भवति अन्यथा पादस्यादेः स्यात्। समासस्येति किम्? ऋक्षव्यधूः पञ्चभूमयः।

न नञः ॥२।१।१२५॥ नञ्पूर्वात् समासाद् वक्ष्यमाणः समासान्तो न भवति। न ऋक् अनृक्। अराजा। असखा। अपन्थाः। अपथमिति पन्थशब्दस्य यथा कुपथम् नपथमिति[13] प्रतिपदोक्तसमासप्रतिपत्तेरिह प्रतिषेधो न भवति। न विद्यते धूरस्य इति अधुरं शकटम्। राज्ञामभावः अराजं वर्तते।

किमः क्षेपे ॥२।१।१२६॥ क्षेपे निन्दायां यः किंशब्दस्तस्मात् परे ये ऋगादयो यानुपादाय समासान्तो विधास्यते तदन्तात् समासाद् वक्ष्यमाणः समासान्तो न[14] भवति। सा किंधूर्या तथा गुर्वी। स किंगोर्यो न वहति। स किंराजा यो न रक्षति। स किंसखा योऽभिद्रुह्यति। किम इति किम्? कुराजः दुःखसुखि[15]। क्षेप इति किम्? कस्य राजा किंराजः। किंसखः। क्षेपग्रहणाल्लक्षणप्रतिपदोक्तपरिभाषा इह नास्तीति विज्ञायते। तेन—का धूरस्य शकटस्य यैवं गुर्वी। किंधूः शकटम्। किमक्षे ब्राह्मण इत्यत्रापि प्रतिषेधः।

प्राक्टात् स्वतेः पूजायाम् ॥२।१।१२७॥ पूजायां यौ सु अति इति ताभ्यां परे ये ऋगादयस्तदन्तात् समासाद् बहुव्रीहेः काष्ठे ट इति[16] प्रत्ययात् प्राग् यः समासान्तो वक्ष्यते स न भवति। सु–शोभना धूः

---

१. प्रिय(या) खट्वा यस्य स इति- क० म०। २. कौशाम्ब्या क० म०। निरादयो निर्गमनार्थे पञ्चम्या। निरादयः शब्दाः निर्गमनार्थैः पञ्चम्या सह यत्र समस्यन्ते स समासस्तत्पुरुषसञ्ज्ञो भवति कौशाम्ब्या निर्गतः (इति)- निष्कौशाम्बिरित्यादि सिद्धम्। क० म० टि०। ३. निष्कौशाम्बिः। क० म०। ४. कोकुलम्– क० म०। ५. प्रिया अस्य इति क० म०। ६. -न्यङ्प्रत्या- क० म०। ७. -रीको बहुब्रह्म- क० म०। ८. आङ् चि- क० म०। ९. निषेधो ऽ- क० म०। १०. 'धुरो यड्ढकञोः' क० म० टि०। ११. 'शरदादेरित्यतः' क० म० टि०। १२. -धस्यैव म- क० म०। १३. नञ्-व्ययासक्त्यायां ड इति- क० म० टि०। १४. -सान्तो भव- क० म०। १५. दुःखसखः- क० म०। १६. इति टप्रत्य- क० म०।

सुभूः । अतिभूः । सुराजा । अतिराजा । सुभूः शकटम् । अतिभूः शकटम् । प्राक् टादिति किम् ? स्वङ्गुकम् । अस्वङ्गुलं काष्ठम् । सुसक्थः । अतिसक्थः । स्वक्षः । अत्यक्षः । स्वतेरिति किम् ? परमधुरा । परमराजः । पूर्वायामिति किम् ? धुरमतिक्रान्तः अतिधुराः[1] । अतिराजः ।

बहोर्डे ॥२।१।१२८॥ डप्रसङ्गो यत्र ततो बह्वन्तात् समासात् समासान्तो ड: कच्च न भवति । आसन्नबहवः[2] । बहोरिति किम् ? द्विग्राः । उपदशाः । ड इति किम् ? प्रियबहुकः ।

कच्[3] नाम्नि ॥२।१।१२९॥ नाम्नि संज्ञायां विषये कच्[4] समासान्तो न भवति । बहुदेवदत्तः । विश्वदेवदत्तः । बहुविष्णुमित्रः । विश्वविष्णुमित्रः । विश्वदेवः । विश्वयशाः । पद्मश्रीः । श्वेताश्वतरिः । कजिति किम् ? श्रीपुरम्[5] । पिट्पुरम् ।

ईयसः ॥२।१।१३०॥ ईयसन्तात् समासात् कच्[6] समासान्तो न भवति । बहुश्रेयान् । बहुप्रेयान् । बहुश्रेयसी । विद्यमानप्रेयसी । विद्यमानश्रेयसी ।

सहात्तुल्ये ॥२।१।१३१॥ तुल्ययोगे यो वर्तते सहशब्दस्तदादेर्बहुव्रीहेः कच्[7] समासान्तो न भवति । तुल्ययोगो वर्तिपदार्थस्य वृत्त्यर्थेन सह क्रियादिना साधारणः सम्बन्धः । सपुत्रः आगतः । सपुत्रः स्थूलः । अत्र पितुः पुत्रस्य चागमेन स्थौल्येन च तुल्ययोगः । सहादिति किम् ? श्वेताश्वको देवदत्त आगतः । तुल्य इति किम् ? सह विद्यमानानि लोमानि यस्य (सः) सलोमकः । सपक्षकः । सकर्मकः ।

भ्रातुस्स्तुतौ ॥२।१।१३२॥ भ्रात्रन्तात् समासान्तात् कच्[8] समासान्तो न भवति स्तुतौ भ्रातुः समासान्तस्य[9] वा प्रशंसाया गम्यमानायाम् । सुभ्राता । कल्याणभ्राता । बहुभ्राता । प्रियभ्राता । भ्रातुरिति किम् ? सुमातृकः । स्तुताविति किम् ? दुर्भ्रातृकः । मूर्खभ्रातृकः ।

नाडीतन्त्र्याः स्वाङ्गे ॥२।१।१३३॥ स्वाङ्गे यौ नाडीतन्त्रीशब्दौ तदन्तात् समासात् कच्[10] समासान्तो न भवति । बहुनाडिः कायः । बहुतन्त्रीर्ग्रीवा । तन्त्रीर्धमनीः । ष्यदन्तो नेति ह्रस्वाभावः । स्वाङ्ग इति किम् ? बहुनाडीकः स्तम्भः । बहुतन्त्रीका वीणा । केचित् स्वमङ्गं स्वाङ्गमिति अन्यपदार्थैकदेशमाहुः तेषां बहुनाडिः स्तम्भः । बहुतन्त्रीर्वीणा । स्वाङ्गग्रहणादिह न भवति—बहुनाडीकः कुविन्दः[11] । बहुतन्त्रीको नटः ।

निष्प्रवाणिः ॥२।१।१३४॥ निष्प्रवाणिरिति कजभावो निपात्यते । प्रवाणि[12] स्तन्तुवायशलाका सा निर्गताऽस्मादिति निष्प्रवाणिः[13] पटः । निष्प्रवाणिः[14] कम्बलः, निष्पन्नो नव इति वाऽर्थः । ऊपतेऽस्यामिति वानिः, प्रस्ता वानिः प्रवाणिः, सा निर्गता तन्तुभ्योऽस्येति निष्प्रवाणिः । सदश इत्येके ।

इज् युद्धे ॥२।१।१३५॥ युद्धे यः समासो विहितस्तस्मादिज् समासान्तो भवति । केशाकेशि । दण्डादण्डि । मुसलामुसलि । मुष्टामुष्टि । अस्यसि । जकार आदिजन्तविशेषणार्थः ।

द्विदण्डयादिः ॥२।१।१३६॥ द्विदण्डीत्येवमादयः समासा इजन्ताः साधवो भवन्ति । द्वौ दण्डावस्मिन् प्रहरणे इति द्विदण्डि । द्विमुसलि । उभादन्ति । उभयदन्ति[15] । उभाबाहु । उभयबाहु[16] । प्रहरति उभौ हस्तावस्मिन् पाने उभाहस्ति । उभयाहस्ति । उभापाणि । उभयापाणि । उभाञ्जलि । उभयाञ्जलि । उभाकर्णि । उभयाकर्णि । शृणोति अन्तेवासोऽस्मिन्नन्तेवासि तिष्ठति । संहितानि पुच्छानि, अस्मिन् सरणे संहितपुच्छि धावति । एकः पादोऽस्मिन् गमने एकपदि । समानो पादावस्मिन् सपदि गच्छति । आख्य-

---

१. -धुरः, अति- क० म० । २. बहवः, उपबहवः, बहो– क० म० । ३. कच् नाम्नि क० म० । ४. कच् समा- क० म० । ५. कच्पूःपथ्यक्षोऽदित्यप्रत्ययः क० म० टि० । ६. कच्समासा- क० म० । ७. कच् समा- क० म० । ८. कच् समा- क० म० । ९. समासार्थस्य वा क० म० । १०. कच् समा- क० म० । ११. 'तन्तुवायः कुविन्दः स्यात्' क० म० टि० । १२. प्रवाणी तन्तु- क० म० । १३. 'अनाहृतं निष्प्रवाणिः, तन्त्रकं च नवाम्बरे ।' इत्यमरः- क० म० टि० । १४. -वाणिः- क- क० म० । १५. उभयादन्ति- क० म० । १६. उभयाबाहु- क० म० ।

पादौ—आम्रपदि शेते । प्रोह्यपादौ—प्रोह्यपदि हस्तिनं वाहयति । निकुम्भकर्णौ—निकुम्भकर्णि धावति । उभावाहतु उभयावाहतु इति इजः वक्तृचि स्यानिवद्भावाद् अव्ययीभावसंज्ञा । यदिह लक्षणे नानुपपन्नं तत्सर्वं निपातनात् सिद्धम् । क्रियाविशेषणाच्चान्यत्र न भवति । द्वौ दण्डावस्यां शालायां द्विदण्डा । द्विमुसला ।

खोऽपडक्षाशितङ्ग्वलंकर्मालंपुरुषात् ॥२।१।१३७॥ अपडक्ष, आशितङ्गु, अलंकर्म, अलंपुरुष इत्येतेभ्यः खः समासान्तो भवति । अदृश्यानि पडक्षीण्यस्य अपडक्षीणः । पितुः पितामहस्य पुत्रस्य वादृष्टोच्यते, अदृष्टानि अविद्यमानानि वा पडक्षीण्यस्यापडक्षीणो मन्त्रः । अपडक्षीणा क्रीडा । द्वाभ्यामर्द्धाभ्येत्यर्थः (? द्वाभ्यां प्रारब्धेत्यर्थः) अपडक्षीणः कन्दुको येन द्वौ क्रीडतः । न विद्यन्ते वा [2]पडक्षीण्यस्यापडक्षीणोऽमनस्कः । विचारेण विना प्रवर्तत इत्यर्थः । आशिता गावो यस्मिन् तदाशितङ्ग्वीनमरण्यम् । निपातनान्नम् । अलङ्कर्मणे अलङ्कर्मणः । [3]अलम्पुरुषेण[4] राज्ञाधीनमित्यधीनेन समासः, अस्ति चाधीनशब्दः, वाक्यं वक्तव्यधीनं हीति ।

खाऽञ्चोऽदिक्स्त्रियाम् ॥२।१।१३८॥ अञ्चत्यन्तात् समासात् खप्रत्ययो भवति वा न चेत् स दिक् (शब्दः)स्त्रियां वर्तते । प्राङ्—प्राचीनः । उदङ्—उदीचीनः । सम्यङ्—समीचीनः । अदिक्स्त्रियामिति किम् ? प्राची । उदीची दिक् । दिग्ग्रहणं किम् ? प्राचीना शाला । अर्वाचीना शाला । स्त्रीग्रहणं किम् ? प्राक्—प्राचीनं रमणीयम् । दिश्यपि क्लुगन्तं नपुंसकम् ।

ऋक्पूःपथ्यपोऽत् ॥२।१।१३९॥ ऋक् पुर् पथिन् अप् इत्येतदन्तात् समासादकारः समासान्तो भवति । अर्धर्चः । उप[5]र्चं । उच्चारितर्चं । श्रोपुरम् । पिष्टपुरम् । उपपुरम् । त्रिपुरम् । स्फीतपुरो देशः । जलपथः । स्थलपथः । उपपथम् । प्रतिपथम् । विशालमथं नगरम् । द्विर्गता आपोऽस्मिन् द्वीपे[6]म् । समीपम् । प्रतीपम् । बह्वपम्—तटाकम् । पुरपथं शब्दाभ्यां सिद्धे पुर् पथिन् इत्येतयोरुपादानमेतद्विषये तत्प्रयोगनिवृत्त्यर्थम् ।

धुरोऽनक्षस्य ॥२।१।१४०॥ या धूरक्षसम्बन्धिनी न भवति तदन्तात् समासादकारः समासान्तो भवति । राजधुरा । महाधुरं शकटम् । उपधुरम् । अनक्षस्येति किम् ? अक्षधूः । दृढधूरक्षः ।

सङ्ख्योदक्पाण्डुकृष्णाद्भूमेः ॥२।१।१४१॥ सङ्ख्यावाचिनः उदक् पाण्डु कृष्ण इत्येतेभ्यश्च शब्देभ्यः परो यो भूमिशब्दस्तदन्तात् समासान्तो भवति । द्वयोर्भूम्योः समाहारः द्विभूमम् । त्रिभूमम् । द्विभूमः प्रासादः । त्रिभूमः प्रासादः । उदीची भूमिः उदग्भू[7]मः । उदग्भूमो देशः । पाण्डुभूमम् । पाण्डु[8]भूमो देशः । कृष्णभूमम् । कृष्णभूमो देशः । एतेभ्य इति किम् ? सर्वभूमिः ।

उपसर्गादध्वनः ॥२।१।१४२॥ उपसर्गद्विहितयोगे यः प्रादिः उपसर्गसंज्ञां लभते तस्मात् परादध्वनः अत् समासान्तो भवति । प्रगतमध्वानं प्राध्वं शकटम् । प्राध्वो रथः । उपक्रान्तमध्वानमुपाध्वम् । निरध्वम् । अत्यध्वम् ।

प्रत्यन्ववात् सामलोम्नः ॥२।१।१४३॥ प्रति अनु अव इत्येतेभ्यः परौ यौ सामन् लोमन् इत्येतौ शब्दौ तदन्तात् समासाद् अत्समासान्तो भवति । प्रतिगतं साम प्रतिसामम् । प्रतिगतं सामानं यः (खः) प्रतिसामः । एवम् अनुसामम् । अनुसामः । प्रतिलोमम् । प्रतिलोमः । अनुलोमम् । अनुलोमः । अवलोमम् । अवलोमः । अव्ययीभावे तु परत्वाद् विकल्पः, साम साम प्रतिसाम । प्रतिसामम् । अनुसाम । अनुसामम् । प्रत्यन्ववादिति किम् ? निस्साम वचनम् । निर्लोमा पुत्रः । सामलोम्न इति किम् ? प्रतिकर्म ।

---

१. द्वाभ्यां सार्द्धाभ्येत्यर्थः अपड- क० म० । २. पडक्षाण्य- क० म० । ३. अलङ्कर्मणः, म० । ४. अलम्पुरुषीणः रा- क० म० । प्राचीनं प्राक् स्यूतं प्राङ्नरपाचीनमपाक् तथा । प्रत्यक् चैव प्रतीचीनमुदीचीनमुदक् तथा ॥' क० म० टि० । ५. उपार्धः क० म० । ६. द्वयन्तरुपसर्गादिदपोऽनात्, इति, अकारस्य ईकारः । क० म० टि० । ७. "घाटः पथश्च माथश्च" इति त्रिकाण्डशेषः । क० म० टि० । ८. उदग्भूमम्, उद्- क० म० । ९. 'कृष्णवत् कृष्णभूमः स्यात्, पाण्डुभूमवत् पाण्डुभूमः ।' इत्यभिधानचिन्तामणिः । क० म० टि० ।

प्रतेरुरसः सप्तम्याः ॥२।१।१४४॥ प्रतिशब्दात् परो य उरस्शब्दः सप्तम्यन्तस्तदन्तात् समासात् अत् समासान्तो भवति । प्रत्युरसं वर्तते । उरसि वर्तत इत्यर्थः । सुबर्थेऽव्ययीभावः । उरसि प्रतिष्ठितं प्रतिगतमुरः प्रत्युरः ।

समवान्धात्तमसः ॥२।१।१४५॥ सम अव अन्ध इत्येतेभ्यः परो यस्तमश्शब्दस्तदन्तात् समासाद् अत् समासान्तो भवति । सन्ततं तमः सन्ततं तमसा सन्ततं तमोऽस्मिन्निति वा सन्तमसम् । अवहीनं तमः, अवहीनं तमसा, अवहीनं तमोऽस्मिन्निति वा अवतमसम् । अन्धं करोतीत्यन्धम्, अन्धंतमः, अन्धंतमोऽस्मिन्, अन्धं च तमश्चेति वा अन्धतमसम् ।

तप्तान्ववाद्रहसः ॥२।१।१४६॥ तप्त अनु अव इत्येतत्पूर्वाद्रहसोऽत् समासान्तो भवति । तप्तं तप्तमय इवानधिगम्यं रहः तप्तरहसम् । तप्तं रहोऽस्येति तप्तरहसः । अनुगतं रहः अनुगतं रहसा वा अनुरहसम् । अनुगतं रहोऽस्येति अनुरहसः । अवहीनं रहः अवहीनं रहसा वा अवरहसम् । अवहीनं रहोऽस्येत्यवरहसम्[2] ।

ब्रह्महस्तिराजपत्यूद्वर्चसः ॥२।१।१४७॥ ब्रह्मन् हस्तिन् राजन् पत्य इत्येतेभ्यः परो यो वर्चश्शब्दस्तदन्तात् समासादत्समासान्तो भवति । ब्रह्मवर्चसम् । हस्तिवर्चसम् । राजवर्चसम् । पत्यवर्चसम् । एतेभ्य इति किम् ? नृपा. सोमार्कवर्चसः । त्विषि[3] मात्र डा वर्चस्वीति समासान्तविधेः क्वचिदनित्यत्वात् तत्र जीविकोपनिषदिवे ऋक्पूःपथ्यपोऽदिति निर्देशाद्विज्ञायते ।

अक्ष्णोऽप्राण्यङ्गे ॥२।१।१४८॥ अक्षिशब्दान्तात् ऊँसादत् समासान्तो भवति न चेत् सोऽक्षिशब्दः प्राण्यङ्गे वर्तते । लवणाक्षम् । पुष्कराक्षम् । कबराक्षम् । गवाक्षम्[4] । महिषाक्षो गुग्गुलु. । अप्राण्यङ्ग इति किम् ? अजाक्षी । उपाक्षी । वामाक्षी । परमाक्षी ।

संकटाभ्याम् ॥२।१।१४९॥ सम् कट इत्येतपूर्वादक्षिशब्दादत् समासान्तो भवति । समक्षम् । कटाक्षम् । प्राण्यङ्गार्थं वचनम् ।

प्रत्यनोरव्ययीभावात् ॥२।१।१५०॥ प्रति अनु इत्येतत्पूर्वो योऽक्षिशब्दस्तदन्तादव्ययीभावादत्समासान्तो भवति । प्रत्यक्षम् । अन्वक्षम् वर्तते । प्रत्यनोरिति किम् ? उपाक्षि वर्तते । अव्ययीभावादिति किम् ? प्रतिगतेऽक्षिणी(अस्येति)प्रत्यक्षिर्देवदत्तः ।

शरदादेः ॥२।१।१५१॥ शरदादन्तादव्ययीभावादत्समासान्तो भवति । उपशरदम् । प्रतिशरदम् । उपत्य[5]दम् । शरद्, त्यद्, तद्, यद्, किंयद्, हिरुक्, हिमवत्, सदस्, अनस्, मनस्, विपाश्, दिश्, दृश्, विश्, उपानह्, अनडुह्[6], दिक्, इति शरदादिः । अत्र जयन्तपाठो नित्यार्थः[7] ।

जरायाश्च जस् ॥२।१।१५२॥ जराशब्दान्तादव्ययीभावादत् समासान्तो भवति ङसिस्थयोर्जादेशश्च । उपजरसम् । प्रतिजरसम् । ङकारोऽस्यादेशार्थः ।

अनः ॥२।१।१५३॥ अन्नन्तादव्ययीभावादत्समासान्तो भवति । उपराजम् । प्रतिराजम् । उपतक्षम् । प्रतितक्षम् । अध्यात्मम् । प्रत्यात्मम् ।

नपुंसकाद्वा ॥२।१।१५४॥ यदन्नन्तं नपुंसकं तदन्तादव्ययीभावादत्समासान्तो भवति वा । उपचर्म । उपचर्मम् । प्रतिकर्म । प्रतिकर्म[8] । प्रतिसाम । प्रतिसाममम् । अनुलोम । अनुलोमं वर्तते । पूर्वेण नित्ये प्राप्ते विकल्पः ।

---

१. अन्धं तमस्त्वपीत्यमरः, क० म० टि० । २. -वरहसः, क० म० । ३. त्विषिमान् राजवर्च-स्विति समा- क० म० । ४. -वाक्षम्, व्याघ्राक्षम्, महिषा- क० म० । ५. उपत्यदम्, प्रतित्यदं वर्तत, क० म० । ६. -डुह्, चतुर्, दिव्, इति क० म० । ७. अन्यत्र जयन्ते गिरिनदीति सूत्रेण विकल्पः । क० म० टि० । ८. -त्यर्थं चादेशः । क० म० ।

गिरिनदीपौर्णमास्याग्रहायणीजयः ॥२।१।१५५॥ गिरि नदी पौर्णमासी आग्रहायणी इत्येतच्छब्दान्ताज्जयन्ताच्चाव्ययीभावाद्टच्समासान्तो भवति । गिरेरन्तः अन्तगिरम् । अन्तगिरि । गिरेः समीपम् उपगिरम् । उपगिरि । उपनदम् । उपनदि । उपपौर्णमासम् । उपपौर्णमासि । उपाग्रहायणम् । उपाग्रहायणि । उपदृषदम् । उपदृषद् । उपसमिधम् । उपसमित् । उपककुभम् । उपककुप् ।

सङ्ख्याया नदीगोदावर्याः ॥२।१।१५६॥ वेति निवृत्तम् । सङ्ख्यावाचिनः परो यो नदीगोदावरीशब्दो तदन्ताद्व्ययीभावादत्समासान्तो भवति । पञ्चनदम् । सप्तनदम् । द्विगोदावरम् । त्रिगोदावरम् । सप्तगोदावरम् । सङ्ख्याया इति किम् ? उपनदि । अव्ययीभावादिति किम् ? एकनदी । [1]सर्वमेकनदीतीरे । इह नदीग्रहणं नित्यार्थम् ।

सरजसोपशुनानुगवम् ॥२।१।१५७॥ सरजस उपशुन अनुगव इत्येतेऽव्ययीभावा अदन्ता निपात्यन्ते । सह रजसा सरजसमभ्यवहरति । साकल्येऽव्ययीभावः । शुनः समीपमुपशुनं तिष्ठति । निपातदेवोऽश् । आयतौ । गवामन्वायतं यानमनुगवम् । दैर्घ्येऽनुरित्यव्ययीभावः, दैर्घ्यादन्यत्र न भवति । गवां पश्चादनुगु यानम् ।

जातमहद्वृद्धादुक्षणः कर्मधारयात् ॥२।१।१५८॥ जात महत् वृद्ध इत्येतेभ्यः परो य उक्षन् शब्दस्तदन्तात् कर्मधारयात्[3] समासान्तोऽच्प्रत्ययो भवति । जात उक्षा जातोक्षः । महोक्षः । वृद्धोक्षः । जातमहद्वृद्धादिति किम् ? परमोक्षा । उत्तमोक्षा । उक्षण इति किम् ? महाश्मश्रुः । कर्मधारयादिति किम् ? जातस्योक्षा जातोक्षा । महदुक्षा । वृद्धोक्षा ।

स्त्रियाः पुंसो द्वन्द्वाच्च ॥२।१।१५९॥ स्त्री इत्येतस्मात् परो यः पुंस[4] इति शब्दस्तदन्ताद् द्वन्द्वादत् समासान्तो भवति । चकारात्कर्मधारयाच्च । स्त्री च पुमाश्च स्त्रीपुंसम् । स्त्रीपुंसौ । स्त्रीपुंसाः विस्मयं गताः । कर्मधारयात्—स्त्रीभूत्वा पुमान् जातः स्त्रीपुंसः शिखण्डी । स्त्रीपुंसं विद्धि राक्षसम् । द्वन्द्वाच्चेति किम् ? स्त्रियाः पुमान् स्त्रीपुमान् ।

धेन्वनड्दुहर्ग्यजुषाहोरात्रमक्तंदिवरात्रिदिवाहर्दिधोर्वष्ठीवपदष्ठीवाक्षिभ्रुवदारगवम् ॥२।१।१६०॥ धेन्वनड्दुहादयो द्वन्द्वा अ[5]प्रत्ययान्ता निपात्यन्ते । धेनुश्च अनड्वाश्च धेन्वनड्दुहौ । धेन्वनड्दुहाः[6] । असमाहारार्थं धेन्वनड्दुहग्रहणम् । समाहारे तु उत्तरेण सिद्धम् । ऋक् च यजुश्च ऋग्यजुषम् । अहश्च रात्रिश्च अहोरात्रः । पुण्याविमावहोरात्रौ । नक्तं च दिवा च नक्तन्दिवम् । रात्रिश्च दिवा च रात्रिन्दिवम् । रात्रिं दिवाऽन्यत्र च पश्यसि तुल्यकालम् । निपातनान्मम् । अहश्च दिवा च अहर्दिवम् । अहरहरित्यर्थः । वीप्सायां द्वन्द्वोऽस्मादेव निपातनात् । अहर्निशमित्यर्थ इत्यपरे । अत्र समासेऽन्यतरः किल रात्रिवचनः । ऊरू च अष्ठीवन्तौ च ऊर्ष्ठीवम् । अन्त्याजादिलोपो निपातनात् । पादौ च अष्ठीवन्तौ च पदष्ठीवम् । अत्र पद्भावश्च । अक्षिणी च भ्रुवौ च अक्षिभ्रुवम् । दाराश्च गावश्च दारगवम् । अत एव निपातनादुपादेशोऽक्षिदारशब्दयोश्च पूर्वनिपातः । द्वन्द्वादिति किम् ? धेनोरनड्वान् धेन्वनड्वान् । ऋग्यजुर्यस्य स ऋग्यजुः । ऋक्सामवाङ्मनसयोरकारान्तत्वं दधिपयआदिषु तथा पाठात् ।

चुदषहः समाहारे ॥२।१।१६१॥ चवर्गदकारषकारहकारान्ताद् द्वन्द्वात् समाहारे वर्तमानादत् समासान्तो भवति । वाक्च त्वक् च अनयोः समाहार इति वाक्त्वचम् । वाक्समुच्छम्[7] । श्रीलुजम् । वाग्दृषदम् । सम्यद्विषदम् । वाक्स्विषम् । वाग्विप्रुषम् । छत्रोपानहम् । गोगोदुहम् । चुदषह इति किम् ? दृषद् च समिच्च दृषत्समिधा । समाहार इति किम् ? प्रावृट्शरद्भ्याम् । द्वन्द्वादिति किम् ? पञ्चवाक् ।

---

१. -नदीतरे क० म० । २. 'आयतिर्दीर्घतायां स्यात्प्रभूतागामिकालयोः' इति वैजयन्ती क० म० टि० । ३. -वाद्दत्समासान्तो भ- क० म० । ४. पुंसु, इति क० म० । ५. अत्प्रत्य- क० म० । ६. समाहाराप्रधानमिदम्, क० म० टि० ।

द्विगोरक्षोऽट् ॥२।१।१६२॥ अन्नन्तादहन्शब्दाच्च द्विगोः समाहारे वर्तमानाद्[1] समासान्तो भवति । (पञ्च तक्षाणः समाहृता इति) पञ्चतक्षी । पञ्चतक्षम् । दशाक्षी । दशाक्षम् । द्व्यहः । त्र्यहः । अह्नोऽस्वा टीति पर्युदासादकारस्य लुग् न भवति । द्विगोरिति किम् ? समाहृतास्तक्षाणः सन्तक्षाणः । समाहारः । समाहार इति किम् ? द्वाभ्यामुक्षाभ्यां क्रीतः द्व्युक्षा । त्र्युक्षा । द्वयोरह्नोर्भवः द्व्यह्नः । त्र्यह्नः । अह्न इदमहविधानं समाहारेऽह्नादेशबाधनार्थम् ।

द्वित्रेरायुषः ॥२।१।१६३॥ द्वि त्रि इत्येताभ्यां परो य आयुःशब्दस्तदन्ताद् द्विगोः समाहारे वर्तमानाद् समासान्तो भवति । द्वयोरायुषोः समाहारः द्व्यायुषम् । त्र्यायुषम् । द्वित्रेरिति किम् ? चतुरायुः । समाहार इति किम् ? द्व्यायुः प्रियः । त्र्यायुः प्रियः ।

अञ्जलेश्चालुचः ॥२।१।१६४॥ द्वित्रिभ्यां परो योऽञ्जलिशब्दस्तदन्ताद् द्विगोरट् समासान्तो भवति न चेत् स द्विगुस्तद्धितलुगन्तो भवति । द्वयोरञ्जल्योः समाहारः द्व्यञ्जलम् । त्र्यञ्जलम् । द्वाभ्यामञ्जलिभ्यामागतम् द्व्यञ्जलमयम् । द्व्यञ्जलरूप्यम् । त्र्यञ्जलमयम् । त्र्यञ्जलरूप्यम् । द्वावञ्जली प्रयौ यस्य स द्व्यञ्जलिप्रियः[2] । द्व्यञ्जलिप्रिय इत्येके[3] तेषामुत्तरे[4] वा ग्रहणमिहापि सम्बद्ध्यते । चकारो द्वित्रेरित्यस्यानुकर्षणार्थः । अलुच इति किम् ? द्वाभ्यामञ्जलिभ्यां क्रीतः द्व्यञ्जलिः । त्र्यञ्जलिः । द्विगोरिति किम् ? द्वयोरञ्जलिः द्व्यञ्जलिः । त्र्यञ्जलिः ।

खार्या वा ॥२।१।१६५॥ खारीशब्दान्ताद् द्विगोरलुचोऽट् समासान्तो भवति वा । द्विखारम् । द्विखारी । पिञ्चखारम् । पञ्चखारी । द्विखारमयम् । द्विखारीमयम् । पञ्चखारीरूप्यम् । पञ्चखारीरूप्यम् । द्विखारप्रियः । द्विखारीप्रियः । पञ्चखारधनः । पञ्चखारीधनः । अत्र लुच्यविशेषः । तत्र[5] लुच्यगोणीसूतच्योः च्यत इति लुचि पुन्नपुंसकयोर्द्विखारः । द्विखारम् । स्त्रियां द्विगोरितीकारे द्विखारी । द्विगोरिति किम् ? उपखारी । अधिखारी ।

अर्धाच्च ॥२।१।१६६॥ अर्धशब्दात् परो यः खारीशब्दस्तदन्तात् समासादलुचोऽट् समासान्तो वा भवति । समेऽर्धमित्यर्धशब्दस्य यः प्रतिपदं समासस्तत्र[6] विधिः । अर्धं खार्याः अर्धखारम् । अर्धखारी । योगविभाग उत्तरसूत्रेऽर्धाच्च द्विगोश्चेत्युभयोपस्थानार्थः ।

नावः ॥२।१।१६७॥ वेति निवृत्तम् । अर्धशब्दात् परो यो नौशब्दस्तदन्तात् समासाद्द्विगोश्च नौशब्दादलुचोऽट् समासान्तो भवति । अर्धं नावः अर्धनावम् । अर्धनावी । द्विगोः—द्विनावम् । पञ्चनावम् । द्विनावमयम् । पञ्चनावमयम् । द्विनावरूप्यम् । द्विनावप्रिय । द्विनावधनः । अलुच इति किम् ? द्वाभ्यां नौभ्यां क्रीतः द्विनौः । पञ्चनौः । अर्धाच्चेति किम् ? राजनौः । परमनौः । टकारो ङ्यर्थः । अर्धनावम् । अर्धनावीति हि स्त्रीनपुंसकयोर्दृश्यते ।

गोस्तत्पुरुषात् ॥२।१।१६८॥ गोशब्दान्तात् तत्पुरुषादलुचोऽट् समासान्तो भवति । राजगवः । राजगवी । पुङ्गवः । स्त्रीगवी । अतिगवः । अतिगवी । पञ्चगवम् । दशगवम् । पञ्चगवमयम् । पञ्चगवरूप्यम् । पञ्चगवप्रियः । तत्पुरुषादिति किम् ? चित्रगुः । शबलगुः । अलुच इति किम् ? पञ्चभिः गोभिः क्रीतः पञ्चगुः । दशगुः ।

राजन्[7] सखेः ॥२।१।१६९॥ अलुच इति निवृत्तम् । राजन् सखि इत्येतदन्तात् तत्पुरुषाद् समासान्तो भवति । देवराजः । महाराजः । अतिराजः । पञ्चानां राज्ञां समाहारः पञ्चराजी । दशराजी । दशभिः राजभिः क्रीतो दशराजः । दशराजी । एवं राजसखः । महासखः । अतिसखः । अतिसखी ।

---

१. अह्नोऽस्वादिति- क० म० । २. -यः, त्र्यञ्जलप्रियः, द्वा- क० म० । ३. इत्यप्येके, क० म० । ४. -मुत्तरं वा- क० म० । ५. तत्र हि लु- क० म० । ६. तत्राद्विधिः क० म० । ७. सखे क० म० ।

पञ्चसखम् । दशसखम् । पञ्चसखः । दशसखी । पञ्चसखप्रियः । मद्राणां राज्ञो मद्रराज्ञो[1] । कश्मीरराज्ञो । विशाराज्ञीति राजन्निति नकारान्तोपदेशादनकारान्ते न भवति । प्रधानस्त्रीङद्भ्योऽबिति विपि[2] ङद्बृतद्धित-कोपास्याख्या इति निषेधार्थं[3] तत्समासान्ते पुम्भावाभावे ज्ञापक न भवति ।

ग्रामकौटात्तक्षणः ॥२।१।१७०॥ ग्राम कोट इत्येताभ्यां परो यस्तक्षन्शब्दस्तदन्तात् तत्पुरुषादट् समासान्तो भवति । ग्रामस्य तक्षा ग्रामतक्षः । ग्रामभृत. साधारणस्तक्षोच्यते । कुटी–शाला[4] अस्या भवः कौटः । कौटस्तक्षा कौटतक्षः । स्वापणशालाया यः कर्म करोति स्वतन्त्रोऽप्रतिबद्ध इत्यर्थः । ग्रामकौटादिति किम् ? राजतक्षा ।

राष्ट्राख्याद्ब्रह्मणः ॥२।१।१७१॥ राष्ट्रवाचिनः परो यो ब्रह्मन्शब्दस्तदन्तात्तत्पुरुषादट् समासान्तो भवति । सुराष्ट्रेषु ब्रह्मा सुराष्ट्रब्रह्मः । यः सुराष्ट्रेषु वसति सौराष्ट्रको ब्राह्मण इत्यर्थः । एवमवन्तिब्रह्मः । काशीब्रह्मः । राष्ट्राख्यादिति किम् ? देवब्रह्मा नारदः । आख्यग्रहणं राष्ट्रवाच्यर्थम् ।

कुमहतो वा ॥२।१।१७२॥ कु महत् इत्येताभ्या परो यो ब्रह्मन्शब्दस्तदन्तात् तत्पुरुषादट् समासान्तो वा भवति । पापो[5] ब्रह्मा कुब्रह्मः, कुब्रह्मा । महान् ब्रह्मा महाब्रह्म. । महाब्रह्मा । महाब्राह्मण इत्यर्थः ।

शुनोऽतेः ॥२।१।१७३॥ अतिशब्दात् परो यः श्वन्शब्दस्तदन्तात् तत्पुरुषादट् समासान्तो भवति । श्वानमतिक्रान्तोऽतिश्वो वराहः जवनः । अतिश्वः सेवकः–स्वामिभक्तः । अतिश्वी सेवा । नीचा ।

गौणात् ॥२।१।१७४॥ गुणेन य शब्दः प्रसिद्धाद्विषयादन्यत्र विषयान्तरे तत्सदृशे वर्तते ततः परो यः श्वन्शब्दस्तदन्तात् तत्पुरुषादट् समासान्तो भवति । व्याघ्र इव व्याघ्रः श्वा व्याघ्रश्वः । व्याघ्रादिभिर्गौणैस्तदनुक्ताविति समासः । अत एव वचनात् श्वशब्दस्य परनिपातः । एवं सिंहश्वः । वृकश्व. । पुरुषश्वः । गौणादिति पूर्वपदविज्ञानादिह न भवति—वानरः श्वेव वानरश्वा । गौणोऽयं श्वा तदन्तादट् व्याघ्र. श्वेव व्याघ्रश्वः[6] । वृकश्वः । पुरुषश्वः । गौणादिति वचनादिह न भवति, कालकः श्वा कालकश्वा समासान्तो विधिरनित्य इति वानरश्वेत्यत्र न भवतीत्येके ।

अप्राणिनि ॥२।१।१७५॥ अप्राणिनि यो गौणः श्वन्शब्दस्तदन्तात् तत्पुरुषादट् समासान्तो भवति । श्वेव श्वा आकर्षः[7] श्वा इति आकर्षश्वः । फलकश्वः । शकटश्वः । अप्राणिनीति किम् ? कालकः[8] श्वेव कालकश्वा । गौणादिति किम् ? आकर्षे[9] श्वा आकर्षश्वा । कुक्कुरवच्छारेऽपि[10] श्वशब्दो रूढो न गौणः । तत्राप्युपमानादेवेत्याकर्षश्व इत्येव भवतीत्येके । केचित् तु गौणादिति[11] नापेक्षन्ते । अपरे गौणादप्राणिनीत्येकमेव[12] योगमधीयते । तेषा व्याघ्रश्व इत्यादि न भवति ।

मृगोत्तरपूर्वाच्च सक्थ्नः ॥२।१।१७६॥ मृग उत्तर पूर्व इत्येतेभ्यो गौणाच्च शब्दात् परो यः सक्थिशब्दस्तदन्तात् तत्पुरुषादट् समासान्तो भवति । मृगस्य सक्थि मृगसक्थम् । उत्तरं सक्थि सक्थि[13] उत्तरं वा, उत्तरसक्थम् । एवं पूर्वसक्थम् । गौणात्–फलकमिव फलकं, फलकं सक्थि फलकसक्थम् । मृगपूर्वोत्तरपूर्वाच्च सक्थ्नोऽट् । चकारात्कुटसक्थमित्येके ।

---

१. नृषुगिधन्व इत्यादिना ङी । क० म० टि० । २. विपि स्वङद्बृतद्धित- क० म० । ३. तत्समा- क० म० । ४. शाला, तस्यां- क० म० । ५. 'पापकुत्सेषदर्थे कुः' इति नामालिङ्गानुशासनम्- क० म० टि० । ६. -श्वः, एवं सिंहश्वः, वृक- क० म० । ७. आकर्षश्वा आ- क० म० । "शूतेऽक्षे शारिफलके-ष्वाकर्षोऽक्षाक्षमिञ्जिये ।" इत्यमरः, क० म० टि० । ८. 'अथ स्यान्निक्रोडः कालकोऽस्त्रियाम् ?' क० म० टि० । ९. आकर्षशब्दोऽत्र शारिवाचकः, क० म० टि० । १०. शारशब्दः शारिवाचकः, तथा प्रयोगः-"काक-काश्वा सह वहुकः क्रीडति प्राणिसारैः ।" इति विदग्धचूडामणिः । क० म० टि० । ११. -दि विनापेक्षन्ते । क० म० । १२. नीतीत्ये- क० म० । १३. सक्थ्न उत्तरं क० म० ।

सरोऽनोऽश्मायसो जातिनाम्नोः ॥२।१।१७७॥ सरस् अनस् अश्मन् अयस् इत्येतदन्तात् तत्पुरुषाद् समासान्तो भवति जातावभिधेयायां नाम्नि च विषये सम्भवतो विशेषणम्। अल्पसरसम्। मण्डूकसरसम्। एवंनामनी सरसी। मण्डूकसरसीति[1] जातावित्येके। उपानसमित्यन्यविशेषस्य संज्ञा। महानसं पाकस्थानम्। राज्ञ उपस्थानमित्येके। गोनसं जातिः। अमृताश्म.। स्थूलाश्मः। पिण्डाश्मः। कनकाश्मः। अश्मजातिविशेषा एते। पिण्डाश्म इति नामेत्येके। कालायसम्। लोहितायसम्। तीक्ष्णायसम्। अयोजातिविशेषा एते। लोहितायसमिति नामेत्येके। जातिनाम्नोरिति किम्? परमसरः। परमानः।

उरसोऽग्रे ॥२।१।१७८॥ अग्रं मुखं प्रधानं वा तत्र वर्तमानो यः उरश्शब्दस्तदन्तात् तत्पुरुषाद् समासान्तो भवति। अश्वा उरः अश्वोरसम् दृश्यते। अश्वाः सेनामुखमित्यर्थः। अश्वानामुरः अश्वोरसं वर्जयेत्। अश्वानां मुखमग्रदेशमित्यर्थः(श इत्यर्थ.)। अश्वोरसं वल्गति। अश्वानां प्रधानमित्यर्थः। एवं रथोरसम्। हस्त्युरसम्। अग्र इति किम्? अश्वोरस्यावर्तः।

अह्नः ॥२।१।१७९॥ अहन्शब्दान्तात् तत्पुरुषाद् समासान्तो भवति। परमाहः। उत्तराहः। एकाहम्। पुण्याहम्। [2]सुदिनाहम्।

सङ्ख्याताद्वाऽह्नश्च ॥२।१।१८०॥ सङ्ख्याशब्दात् परो योऽहन्शब्दस्तदन्तात् तत्पुरुषाद् समासान्तो भवति तस्य चाहन्शब्दस्य वाऽह्नादेशो भवति। सङ्ख्यातमहः सङ्ख्याताह्नः, सङ्ख्याताहः। अह्नादेशार्थं वचनमट् तु सिद्ध'। चकार उत्तरत्राह्नादेशस्याट् सन्नियोगशिष्टार्थः। अन्यथा हि अटोऽपवादो विज्ञायेत। तथा च स्त्रियामीकारो न स्यात्।

सङ्ख्याऽव्ययसर्वांशात् ॥२।१।१८१॥ सङ्ख्याशब्देभ्योऽव्ययवेभ्य· सर्वशब्दादंश एकदेशस्तद्वाचिभ्यश्च परो योऽहन्शब्दस्तदन्तात् तत्पुरुषाद् समासान्तो भवति तस्य चाहन्शब्दस्य नित्यमह्नादेशो भवति। द्वयोरह्नोर्भव. द्वयह्नः पटः। द्वयह्नी अष्टका। एवं त्र्यह्नः, त्र्यह्नी। द्वेऽहनी प्रिये यस्य स द्वयह्नप्रियः। त्र्यह्नप्रियः। द्वेऽहनी जातस्य द्वयह्नजात.। त्र्यह्नजातः। अत्ययम्। अत्यह्नः। अत्यह्नी कथा। निरह्नः, निरह्नी वेला। सर्वः–सर्वाह्नः। अंशात्-पूर्वाह्न। अपराह्नः। मध्याह्नः। सायाह्न'।

पुण्यवर्षादीर्घसङ्ख्यातैकाच्चाद्रात्रेः ॥२।१।१८२॥ पुण्य वर्षा दीर्घ सङ्ख्यात एक इत्येतेभ्यः शब्देभ्यश्चकारात् सङ्ख्यादिभ्यश्च परो यो रात्रिशब्दस्तदन्तात् तत्पुरुषाद् समासान्तो भवति। पुण्या रात्रिः पुण्यरात्र.। वर्षारात्रः। दीर्घरात्रः। सङ्ख्यातरात्र। एकरात्रः। सङ्ख्यायाः–द्वयोः रात्र्योः समाहारः द्विरात्रः। त्रिरात्र.। द्वयो रात्र्योर्भवः द्विरात्र.। द्विरात्रा। त्रिरात्रः। त्रिरात्रा। द्विरात्रप्रियः। त्रिरात्रप्रिय'। द्विरात्रजातः। त्रिरात्रजात.। अव्ययात्–अतिरात्रः। अतिरात्रा। नीरात्रः, नीरात्रा। सर्वात्–सर्वरात्रः। अंशात्–पूर्वरात्रः। अपररात्र.। अर्धरात्रः। द्वितीयरात्र। एकग्रहणं सङ्ख्याग्रहणेनानेकस्याग्रहणार्थम्। तेन पूर्वस्य सूत्रस्य (?) अग्रहणम्। एकमहः एकाहम्। अटि प्रकृतेऽद्ग्रहणं स्त्रियां ङ्यभावार्थम्।

श्वश्रेयसश्वोवसीयस-निश्रेयस-पुरुषायुष-गोष्ठश्व-द्विस्तावा-त्रिस्तावाः ॥२।१।१८३॥ श्वःश्रेयसादयोऽप्रत्ययान्तास्तत्पुरुषा निपात्यन्ते। यदिह लक्षणेनानुपपन्नं तत्सर्वं निपातनात् सिद्धम्। शोभनं श्रेयः श्वःश्रेयसम्। श्वोवसीयसमित्यस्यैव(अयम्)पर्याय.। आशीर्विषयेऽनयोः प्रयोगः। श्वश्रेयसं ते भूयात्। श्वोवसीयस ते भूयात्। निश्चित श्रेयो निःश्रेयसमनर्थरहितं कल्याणमित्यर्थः। पुरुषस्यायुः पुरुषायुषम्। गोष्ठे श्वा गोष्ठश्व.[4]। द्विस्तावती, द्विस्तावा। त्रिस्तावती, त्रिस्तावा। वेद्यामनयोः प्रयोगः। द्विस्तावा वेदिः[5]। त्रिस्तावा वेदिः। प्रकृतिवेद्या द्विगुणा त्रिगुणा च विकृतौ वेदिरेवमुच्यते अन्यत्रापि दृश्यते द्विस्तावोऽग्निः।

---

१ -सीमिति क० म०। २. 'सुदिनं शोभनार्थे स्याद् दुर्दिनं तद्विपर्यये।' इत्यभिधानम्। क० म० टि०। ३. -ओऽत्र- क० म०। ४. -नुपपन्नं क० म०। ५. "गोष्ठश्वस्तु स यो द्वेष्टि स्थाने श्व इव स्थितः पुमान्" इत्यभिधानचिन्तामणिः क० म० टि०। ६. "वेदिरकृत्रिमुष्ट्रायां भुवेऽलङ्कृतभूतले" इति विश्वः। क० म० टि०।

नञव्ययात् संख्याया ङः ॥२।१।१८४॥ [1]नञव्ययाच्च परो यः संख्याशब्दस्तदन्तात् तत्पुरुषाद् ङः समासान्तो भवति । न दश अदशाः । अनवाः[2] । न्यूना दशेत्यर्थः । नञ्पूर्वोऽयं वैकल्ये दृश्यते । निर्गतस्त्रिंशतोऽङ्गुलिभ्यः निस्त्रिंशः[3] खड्गः । त्रिंशतो निर्गतानि वर्षाणि निस्त्रिंशान्यहानि । निश्चत्वारिंशानि । ङकारोऽन्त्यादिलोपार्थः । नञव्ययादिति किम् ? गोत्रिंशत् । गोचत्वारिंशत् । नञ्ग्रहणं न नञ् इति प्रतिषेधनिवृत्त्यर्थम् । सङ्ख्याया इति किम् ? निश् शकुत् । तत्पुरुषादिति किम् ? न विद्यन्ते त्रयो यस्य(सः) अत्रिः । शोभनास्त्रयो यस्य(सः)सुत्रिः । निर्गतास्त्रिंशदस्य निस्त्रिंशत् ।

सङ्ख्याऽव्ययादङ्गुलेः ॥२।१।१८५॥ सङ्ख्याया अव्ययाच्च परो योऽङ्गुलिशब्दस्तदन्तात् तत्पुरुषात्[4] समासान्तो ङो भवति । द्व्यङ्गुलम् । त्र्यङ्गुलम् । द्व्यङ्गुलप्रियः । त्र्यङ्गुलप्रियः । निरङ्गुलम् अत्यङ्गुलम् । तत्पुरुषादिति किम् ? पञ्चाङ्गुलिर्हस्तः । अनङ्गुलिः पुरुषः ।

बहुव्रीहेः काष्ठे टः ॥२।१।१८६॥ अङ्गुल्यन्ताद्बहुव्रीहेः काष्ठे वर्तमानाट् टः समासान्तो भवति द्वे अङ्गुली यस्य (तत्) द्व्यङ्गुलम् । त्र्यङ्गुलम् । चतुरङ्गुलम् । पञ्चाङ्गुलम् । धान्यानां कण्टकानां च निक्षेपणं काष्ठमुच्यते । दीर्घाङ्गुली । तीक्ष्णाङ्गुली यष्टिः । बहुव्रीहेरिति किम् ? उपाङ्गुलिः । परमाङ्गुलिः अत्यङ्गुला यष्टि । आत्माङ्गुलम् । प्रमाणाङ्गुलम् । उत्सेधाङ्गुलमिति प्रमाणाङ्गुलशब्दः[5] प्रकृत्यन्तरम् काष्ठ इति किम् ? पञ्चाङ्गुलिर्हस्तः । टकारः स्त्रियामीकारार्थः ।

सक्थ्यक्ष्णः स्वाङ्गे ॥२।१।१८७॥ स्वाङ्गवाची यः सक्थिशब्दोऽक्षिशब्दश्च तदन्ताद्बहुव्रीहेष्टः समासान्तो भवति । दीर्घसक्थः । दीर्घसक्थी । गौरसक्थी । गौरसक्थः । विशालाक्षः । विशालाक्षी । कमलाक्षः कमलाक्षी । सक्थ्यक्ष्ण इति किम् ? सबाहुः । दीर्घजानुः । स्वाङ्ग इति किम् ? दीर्घसक्थि शकटम् । स्थूलाक्षिरिक्षु । बहुव्रीहेरिति किम् ? परमसक्थि । उत्तमसक्थि । वामाक्षि । दक्षिणाक्षि ।

द्वित्रे मूर्ध्नो वा ॥२।१।१८८॥ द्वि त्रि इत्येताभ्यां परो यो मूर्धन्शब्दस्तदन्ताद्बहुव्रीहेष्टः समासान्तो भवति वा । द्विमूर्धा, द्विमूर्धः । त्रिमूर्धा, त्रिमूर्धः ।

प्रमाणीसङ्ख्याऽङ्गः ॥२।१।१८९॥ प्रमाणीशब्दान्तात् सङ्ख्यावाचिशब्दान्ताच्च बहुव्रीहेर्ङ समासान्तो भवति । स्त्रीप्रमाणी येषां ते स्त्रीप्रमाणाः । भार्याप्रमाणाः कुटुम्बिनः[6] । कल्याणं[7] प्रमाण्यस्य(सः) कल्याणप्रमाणः । सङ्ख्याया.–द्वित्राः । पञ्चषाः । द्विदशाः । त्रिदशाः । आसन्नदशाः । उपदशाः । उपगणाः[8] सङ्ख्यान्तस्य प्रतिपदोक्तस्य विज्ञानादिह न भवति । अत्रि. । सुत्रिः । प्रियपञ्चानः ।

त्रिचतुरोपचतुराचतुरविचतुरसुचतुरसुप्रातसुश्वसुदिवैणिपदाजपदप्रोष्ठपदचतुरश्रशारिकुक्षाः ॥२।१।१९०॥ त्रिचतुरादयो बहुव्रीहयो ङप्रत्ययान्ता निपात्यन्ते । सर्वमलाक्षणिकं निपातनात् सिद्धम् त्रयो वा चत्वारो वा त्रिचतुराः । चत्वारः समीपे येषां ते उपचतुराः । अदृश्यमानानि–अविद्यमानानि चत्वारि यस्य स अचतुरः । विदृश्यानि विगतानि वा चत्वारि यस्य स विचतुरः । सुदृश्यानि शोभनानि वा चत्वारि यस्य स सुचतुरः । (सु)शोभनं कर्म प्रातरस्येति सुप्रातः । (सु)शोभनं कर्म श्वोऽस्येति सुश्वः । (सु)शोभनं कर्म दिवाऽस्येति सुदिवः । एण्या इव पादावस्येति एणीपदः । पादशब्दस्य पद्भावः । एवमजपदः । प्रोष्ठपदः प्रोष्ठो गौरुच्यते । चतस्रोऽस्रयो[10]ऽस्येति चतुरस्रः । शारेरिव कुक्षिरस्येति शारिकुक्षः । निपातनाद्विषयव्यवस्था इह न भवति त्रयश्चत्वारोऽस्येति त्रिचत्वारुन्मुखः । उपगताश्चत्वारो येन(स)उपचत्वाः ।

---

१. नञः अव्यया- क० म० । २. -वाः न्यूना नव न्यूना दशेत्यर्थः । क० म० । ३. निस्त्रिंश इव खड्ग इव । निस्त्रिंशः खड्गः । क० म० टि० । ४. -त् ङस्समासान्तो भवति । क० म० ५. शब्दान्तरम् क० म० टि० । ६. किम् ? सुबाहुः । क० म० । ७. गृहस्थाः । "-प्रायेण गृहिणीनेत्रा कन्यार्थेषु कुटुम्बिनः" कुमारसम्भवः क० म० टि० । ८. कल्याणी प्रमा- क० म० । ९. 'बहु गणं भेदे इति संख्यात्वम्- क० म० टि० । १०. "अणिरस्रिः तथा कोटिरस्रः कोणश्च कथ्यते ।" इति हलायुध क० म० टि० ।

प्रधानस्त्री ङद्भ्योऽप् ॥२।१।१९१॥ समासेनाभिधीयमानोऽर्थः प्रधानं या स्त्री तदर्थाभिधायी यो[1] ङप्रत्ययान्तस्तदन्ताद्बहुव्रीहेरप् समासान्तो भवति । कल्याणी पञ्चमी रात्रिर्यासां रात्रीणां ताः कल्याणीपञ्चमा रात्रयः । अत्र रात्रयः समासार्थः । तासु पञ्चम्यपि रात्रित्वेनानुप्रविष्टेति प्रधानम् । एवं कल्याणीषष्ठा भार्याः । कल्याणीतुर्याः । कल्याणीतुरीयाः । कल्याणीद्वितीयाः कन्याः । बहुवचनात्कज् वाध्यते । प्रधानग्रहणं किम् ? कल्याणपञ्चमीकः पक्षः । स्त्रीग्रहणं किम् ? कल्याणपञ्चमका दिवसाः । कल्याणद्वितीयकान्यहानि । ङद्ग्रहणं किम् ? द्वितीय[2]कल्याणीका भार्याः । पकार. पिति तद्धित इति पुम्भावार्थः । तेनेह[3] स्त्रीत्वे निवृत्तिः काम्यत इति तत्र स्त्रियामुच्यमानः पुम्भावो न भवति ।

अन्तर्बहिर्भ्यां[4] लोम्नः ॥२।१।१९२॥ अन्तर् बहिस् इत्येताभ्यां परो यो लोमन्शब्दस्तदन्ताद् बहुव्रीहेरप् समासान्तो भवति । अन्तर्लोमानि यस्य स अन्तर्लोमः । बहिर्लोम. प्रावारः[5] ।

नञ्बहोर्ऋचो माणवचरणे ॥२।१।१९३॥ नञ् बहु इत्येताभ्यामुत्तरो य ऋक्शब्दस्तदन्ताद्बहुव्रीहेरप् समासान्तो भवति यथासङ्ख्यं माणवे चरणे च वाच्ये । न विद्यन्ते ऋचोऽस्य अनृचो माणवकः । बह्वृचो ब्राह्मणः । माणवचरण इति किम्[6] ? बह्वृक्कं सूक्तम् । ऋक्पूरूध्पथामानक्षेत्येव सिद्धे नियमार्थं वचनम् ।

भान्नेतुः ॥२।१।१९४॥ भान्नक्षत्रवाचिनः परो यो नेतृशब्दस्तदन्ताद्बहुव्रीहेरप्समासान्तो भवति । मृगो नेता आसा रात्रीणा(ता)मृगनेत्रा रात्रय. । पुष्यनेत्राः । भादिति किम् ? चैत्रनेतृकाः । नेत्रेण[7] सिद्धे नेत्रक[8] प्रयोगनिवृत्त्यर्थं वचनम् ।

नाभेर्नाम्नि ॥२।१।१९५॥ नाभ्यन्ताद्बहुव्रीहेरप्समासान्तो भवति नाम्नि संज्ञाया विषये । अवन्तः समुदायो नाम । (हिरण्यं नाभौ यस्य स)हिरण्यनाभ । पद्मनाभ. । ऊर्णनाभ.[9] । वज्रनाभ. । नाम्नीति किम् ? विकसितवारिजनाभि । अधोनाभं प्रहसितवानिति[10] । अव्ययीभावोऽयं निष्ठादिषु[11] तथा पाठात् सिद्धः ।

नञ् दुस्सोः सक्थिहलेर्वा ॥२।१।१९६॥ नञ् दुस् सु इत्येतेभ्यः परो यौ सक्थि-हलिशब्दौ तदन्ताद् बहुव्रीहेरप् समासान्तो वा भवति । न विद्यते सक्थ्यस्य(स)असक्थः, असक्थिः । दुस्सक्थः, दुस्सक्थिः । सुसक्थ , सुसक्थि. । अहलः, अहलिः । दुर्हलः, दुर्हलिः । सुहलः, सुहलि. । नञ्दुस्सोरिति किम् ? गौरसक्थी स्त्री । दीर्घसक्थि शकटम् । बहुहलिः पुरुष. । हलशब्दः प्रकृत्यन्तरमस्ति । तत्र हले समासान्तविधानं कज्बाधनार्थम् । तेन अहलक इति न भवति ।

अस्प्रजायाः ॥२।१।१९७॥ नञादिभ्य. परो यः प्रजाशब्दस्तदन्ताद्बहुव्रीहेरस् समासान्तो भवति । न विद्यते प्रजाऽस्येति अप्रजाः[12] । सुप्रजाः[13] । सुप्रजसः ।

अल्पाच्च मेधायाः ॥२।१।१९८॥ नञादिभ्योऽल्पशब्दाच्च परो यो मेधाशब्दस्तदन्ताद्बहुव्रीहेरस्समासान्तो भवति । न विद्यते मेधाऽस्येत्यमेधा । दुर्मेधाः । सुमेधा. । अल्पमेधा. । अल्पमेधसौ । अल्पमेधस. । मन्दाच्च मन्दमेधस इत्येके[14] ।

धर्मादन् द्विपदात् ॥२।१।१९९॥ धर्मशब्दान्ताद् द्विपदबहुव्रीहेरन् समासान्तो भवति । साधूनामिव धर्मोऽस्य(स.)साधुधर्मा । क्षत्रियधर्मा । अनन्तो धर्मोऽस्य(स·)अनन्तधर्मा । विनाशधर्मा । धर्मादिति किम् ?

---

१. यो ङप्रत्य- क० म० । २. द्वितीया कल्या- क० म० । ३. कल्याणीपञ्चमेत्यत्र कल्याणीशब्द इकारान्तो न जिप्रत्ययान्तः । कल्याणपञ्चमीक इत्यत्र विशेष्यवशाज् जिप्रत्ययान्तः । क० म० टि० । ४. कम्बलः । "कम्बलः पटबद्धश्चेन्महावृष्टिनिवारणम् । स एव विपरीतश्चेन्महावृष्टिनिवारणम् ॥" क० म० टि० । ५. किम् ? अनृकं साम व- क० म० । ६. नेत्रशब्देन- क० म० टि० । ७. नेतृक क० म० । ८. ऊर्णानां संस्थानं नाभौ यस्य इति पिति तद्धिते । क० म० टि० । ९. -नित्यव्ययी- क० म० । १०. तिष्ठद्गवादि- क० म० । ११. -जाः दुष्प्रजाः, सु- क० म० । १२. -जाः सुप्रजसौ सुप्रजसः क० म० । १३. पूज्यपादस्वामिनः, महोपाध्यायवर्द्धमानश्च तथा च तत्सूत्रम्- मन्दादुपाच्च मेधाया इति- क० म० टि० ।

कम्बकर्णः । द्विपदादिति किम् ? परमः स्वो धर्मोऽस्य(सः)परमस्वधर्मः[1] । कृतः सर्वधर्मो येन सः कृतसर्वधर्मः । धर्मान्ते[2] द्विपदेऽपि बहुव्रीहौ प्रत्यासत्तेर्बहुव्रीहेर्धर्मावयवविज्ञानान्न भवति ।

सुहरिततृणसोमाज्जम्भात् ॥२।१।२००॥ सु हरित तृण सोम इत्येतेभ्यः परो यो जम्भशब्दस्तदन्ताद्बहुव्रीहेरत् समासान्तो भवति । (सु)शोभनो जम्भोऽस्य सुजम्भा । हरितजम्भा । तृणजम्भा । सोमजम्भा[3] । सुहरिततृणसोमादिति किम् ? चारुजम्भः । पतितजम्भः । जम्भशब्दोऽम्यवहार्यवचनः[4] दंष्ट्रावचनो वा ।

लुब्धेन दक्षिणेर्मा ॥२।१।२०१॥ दक्षिणेर्मेति बहुव्रीहेरन्नन्तो निपात्यते लुब्धेन व्याधेन योगे । दक्षिणमङ्गमीर्मं बहुव्रणं वाऽस्येति दक्षिणेर्मा[5] मृगः । वेद्धुकामस्य व्याधस्य दक्षिणभाग बहुकृत्यव्यधनसुखं स्थितः । व्याधेन वा दक्षिणभागे कृतव्रण उच्यते । लुब्धेनेति किम् ? दक्षिणेर्मं शकटम् । दक्षिणेर्मः पशुः ।

जातेश्छस्सामान्यवति ॥२।१।२०२॥ जातिशब्दान्ताद्बहुव्रीहेश्छस्समासान्तो भवति सामान्यवति सामान्याश्रयेऽन्यपदार्थे । ब्राह्मणे[6] जातिरस्य ब्राह्मणजातीयः । क्षत्रियजातीयः । सुजातीयः । दुर्जातीयः । नानाजातीयः । किंजातीयो भवान् । सामान्यवतीति किम् ? बहुजातिर्ग्रामः । अत्र ग्रामे न सामान्यवाक् । किं तर्हि ? तदधिष्ठानाः पुरुषाः । अजातीया इत्यत्र सामान्यवानेवान्यपदार्थः । प्रतिषेधस्तु नञर्थः । सामान्यग्रहणं किम् ? 'दुर्जाति. सूतपुत्रस्य तथा दुश्शासनस्य च ।' अत्र जाति[7]शब्दो जन्मपर्यायः । न सामान्यमर्थः । पितेव स्थानीय. पितृस्थानीय. । स्थीयतेऽस्मिन्निति स्थानीयः यथास्थानं[8] दुर्गमिति भवतीति स्थानान्ताद्विभाषा स्थानेनेति चेदिति नारभ्यते ।

भृतिप्रत्ययान्मासाट्टः ॥२।१।२०३॥ भृतौ वर्तमानाद्यः प्रत्ययो विहितस्तदन्तात् परो यो मासशब्दस्तदन्तात् बहुव्रीहेष्टः समासान्तो भवति । पञ्चभृतिरस्य पञ्चक., पञ्चको मासोऽस्य पञ्चकमासिकः । सप्तकमासिक[10] । त्रिंशकमासिकः । शत्यमासिक । शतिकमासिकः कर्मकरः । भृतिप्रत्ययादिति किम् ? सुमासकः । भृतिग्रहणं किम् ? वर्षासु भवो वार्षिकः । वार्षिको मासोऽस्य वार्षिकमासिकः । प्रत्ययग्रहणं किम् । भृतिर्मासोऽस्य भृतिमासकः । मासादिति किम् ? पञ्चको दिवसोऽस्य पञ्चकदिवसः ।

सुत्पूतिसुरभेर्गन्धाद्विद्गुणे ॥२।१।२०४॥ सु उत् पूति सुरभि इत्येतेभ्यः परो यो गन्धशब्दो गुणे वर्तते तदन्ताद् बहुव्रीहेरित् समासान्तो भवति । (सु)शोभनो गन्धो गुणो[11]ऽस्येति सुगन्धिः । उद्गतो गन्धोऽस्य उद्गन्धिः । पूतिर्गन्धोऽस्य पूतिगन्धि· । सुरभिगन्धि. । सुत्पूतिसुरभेरिति किम् ? तीव्रगन्धो हिङ्गुः । उग्रगन्धा वचा । गन्धादिति किम् ? सुरसः । गुण इति किम् ? शोभना गन्धाः कुष्ठतगरादयो यस्य स सुगन्ध आपणिकः[12] । इदिति तकारो निर्देशार्थः ।

---

१. धर्मो यस्य(सः)- क० म० । २. धर्मान्तेऽत् द्विप- क० म० । ३. 'मृगकजङ्गकजम्भरसोम्मुख' इति धर्मशर्माभ्युदये । क० म० टि० । ४. दन्तपक्षे तृणमिव जम्भः जम्भा वाऽस्य(सः) तृणजम्भा । सोमश्चन्द्रस्तद्वज्जम्भो जम्भा वाऽस्य(सः) सोमजम्भ इति महोपाध्यायवर्द्धमानः । क० म० टि० । ५. "जम्भो दैत्यान्तरे दन्ते जम्भीरे भक्षणेऽपि च" इति विश्वः । क० म० टि० । ६. "दक्षिणाल्लुब्धयोगाद्दक्षिणेर्मा कुरङ्गकः ॥" क० म० टि० । ७. ब्राह्मणो जा- क० म० । अनेकासु करकलापादिष्वक्तिषु अनुवृत्तत्वाद् ब्राह्मणशब्दो जातिशब्दः । क० म० टि० । ८. जातिस्सामान्यजन्मनोरिति वर्णसम्भूतिर्जातिः । क० म० टि० । ९. स्थानीयं दु- क० म० । १०. -कः । त्रिंशकमासिकः । त्रिं क० म० । ११. गुणोऽत्र स्वाभाविको गृह्यते तेनागन्तुकश्चेद् गुणस्तर्हि विकल्पः, तदुक्तं महोपाध्यायवर्द्धमानेन- आगन्तोर्वा स्वादिभ्यः परस्यागन्तोः कन्धस्य हृद्वा न भवति । आगन्तुराहार्यः सुगन्धिः सुगन्ध इति वेति । क० म० टि० । १२. द्रव्यस्वामिनि न भवति गान्धिकः- क० म० टि० ।

वाऽल्पे ॥२।१।२०५॥ [2]अल्पेऽर्थे यो गन्धशब्दस्तदन्ताद्बहुव्रीहेरित् समासान्तो वा भवति । घृतस्य गन्धः[3] स्तोकं मात्राऽस्मिन्निति घृतगन्धिरोदनः । सूपगन्धिः । सूपगन्ध ओदनः । अन्नगन्धि, अन्नगन्धं भोजनम् । बहुवचनादसामानाधिकरण्येऽपि बहुव्रीहिः ।

खोपमानात् ॥२।१।२०६॥ उपमानात् परो यो गन्धशब्दस्तदन्ताद्बहुव्रीहेर्वेत्समासान्तो भवति । पद्मस्येव गन्धोऽस्येति[4] पद्मगन्धिः, पद्मगन्धः, उत्पलगन्धिः, उत्पलगन्धः । पुनर्वाग्रहणमुत्तरत्र वाऽधिकार-निवृत्त्यर्थम् ।

सुसङ्ख्याबाहस्त्यादेः पादस्य लुक् ॥२।१।२०७॥ सु इत्यत. सङ्ख्यावाचिनो हस्त्यादि-वर्जिताच्चोपमानवाचिनः शब्दात् परो यः पादशब्दस्तदन्तस्य बहुव्रीहेर्लुक् समासान्तो भवति । सु-शोभनौ पादावस्येति सुपात् । सङ्ख्या-द्वौ पादावस्येति द्विपात् । त्रिपाद् । चतुःपाद् । उपमानात्-व्याघ्रस्येव पादावस्येति व्याघ्रपाद् । सिंहपाद् । भृक्षपाद् । वृक्षपाद् । सुसङ्ख्याच्चेति किम् ? चारुपादः । अहस्त्यादेरिति किम् ? हस्तिपादः । कपोतपादः । पादस्येति किम् ? सुमुखः । चतुर्मुखः । व्याघ्रमुखः । हस्तिन्, कटोल, कटोलक, कण्टोल, कण्टोलक, गण्डोल, गण्डोलक, महेला, दासी, गणिका, कुसूल इति हस्त्यादि. ।

वयसि दन्तस्य दत् ॥२।१।२०८॥ सुसङ्ख्यादिति वर्तते । सुशब्दात् सङ्ख्यावाचिनश्च परो यो दन्तशब्दस्तस्य बहुव्रीहेरवयवस्य दत्[5] इत्ययमादेशः समासान्तो भवति वयसि गम्यमाने । सुशोभनाः सुजाताः समस्ता दन्ता अस्येति सुदन् कुमारः । सुदती कुमारी । द्वौ दन्तावस्य द्विदन् बालः । चतुर्दन् । षोडन्[6] । वयसीति किम् ? सुदन्तो दाक्षिणात्यः । चतुर्दन्त ऐरावतः । अत्र वयो नास्ति । अनुवृत्तिसामर्थ्यादवयव-स्यापीति केचित् ।

स्त्रियां नाम्नि ॥२।१।२०९॥ स्त्रीलिङ्गे नाम्नि संज्ञायां विषये बहुव्रीहेर्दन्तस्य दत् इत्ययमादेशो भवति समासान्तः । अय इव दन्ता अस्या अयोदती । बालदती । परशुदती । एवंनामा काचित् । स्त्रियामिति किम् ? वज्रदन्त. । नागदन्तकः । नाम्नीति किम् ? समदन्ती । स्निग्धदन्ती । असमास[7] उत्तरत्र नाम्नीति एतावदनुवृत्त्यर्थः ।

श्यावारोकाद्वा ॥२।१।२१०॥ श्यावा रोक इत्येताभ्या परो यो दन्तशब्दस्तदन्तस्य बहुव्रीहेरवयवस्य दत् इत्ययमादेशः समासान्तो भवति वा नाम्नि संज्ञाया विषये । श्यावा[8] दन्ता अस्येति श्यावदन्, श्यावदन्त. । अरोकदन्,[9] अरोकदन्तः । नाम्नीति किम् ? श्यावदन्तः । अरोकदन्त· । अरोको[10] निर्दीप्तः । निश्छिद्रता इत्येके ।

अग्रान्तशुद्धशुभ्रवृषवराहाहिमूषिकात् ॥२।१।२११॥ अग्रशब्दान्ताच्छब्दरूपात् शुद्ध शुभ्र वराह अहि मूषिक इत्येतेभ्यश्च परो यो दन्तशब्दस्तस्य बहुव्रीहेरवयवस्य दत् इत्ययमादेशो भवति वा । कुड्मलाग्रमिव दन्ता अस्य कुड्मलाग्रदन् । शिखराग्रमिव दन्ता अस्येति शिखराग्रदन् । कुड्मलाग्रदन्तः । शिखरा-ग्रदन्तः । शुद्धा दन्ता अस्य शुद्धदन्, शुद्धदन्त. । शुभ्रदन्, शुभ्रदन्त । वृषस्येव दन्ता अस्य वृषदन्, वृषदन्तः । वराहदन्, वराहदन्तः । अहिदन्, अहिदन्तः । मूषिकदन्, मूषिकदन्त. । योगविभागान्नाम्नीति निवृत्तम् ।

पूर्णाल्लुक्काकुदस्य ॥२।१।२१२॥ पूर्णशब्दात् परो य. काकुदशब्दस्तदन्तस्य बहुव्रीहेर्लुक् समासान्तो भवति वा । पूर्णं काकुदं[11] तालुस्य पूर्णकाकुद्, पूर्णकाकुदः । पूर्णादिति किम् ? रक्तकाकुदः ।

---

१. जसः शि । तात्पर्यवृत्ति- क० म० टि० । २. 'गन्धो गन्धोपले मोदे लेशे सम्बन्धिगर्वयोः ।' इति विश्वः । क० म० टि० । ३. गन्धस्तोकं- क० म० । ४. पद्मस्य गन्ध इव गन्धोऽस्येत्यर्थः, क० म० टि० । ५ दत्- क० म० । ६. एकादशेत्यादिना निपातनमेतत्, क० म० टि० । ७ स्त्रियां नाम्नीति सूत्रे क० म० टि० । ८. श्यामसिताकारा- क० म० टि० । ९. अरोका निर्दीप्तयः "निष्प्रभे विगतारोकौ" इत्यमरः । क० म० टि० । १०. "रोको दीप्तौ बिले रोकं नौकाक्षपणभेदयोः" इति विश्वः । क० म० टि० । ११. "तालु तु काकुदम्" इत्यमरः, क० म० टि० ।

व्युदः ॥२।१।२१३॥ वि उत् इत्येताभ्यां परो यः काकुदशब्दस्तदन्तस्य बहुव्रीहेर्नित्यं लुक्समासान्तो भवति । विगतं काकुदमस्य विकाकुद् । उद्गत काकुदमस्य उत्काकुद् । योगविभागो नित्यार्थः ।

त्रेः ककुदस्याद्रौ ॥२।१।२१४॥ त्रिशब्दात् परो यः ककुदशब्दस्तदन्तस्य बहुव्रीहेरद्रौ वर्तमानस्य लुक्समासान्तो भवति । त्रीणि [1]ककुदानि ककुदाकाराणि शिखराणि यस्य स त्रिककुदद्रिः । त्रेरिति किम् ? उत्ककुदोऽद्रिः । ककुदस्येति किम् ? त्रिकूटोऽद्रिः । अद्राविति किम् ? त्रिककुदोऽन्यः ।

अवस्थायाम् ॥२।१।२१५॥ ककुदान्तस्य बहुव्रीहेरवस्थायां गम्यमानायां लुक्समासान्तो भवति । असञ्जातं ककुदमस्यासञ्जातककुद् । बाल इत्यर्थः । पूर्णककुद् । युवेत्यर्थः । सन्नककुद् । कृश इत्यर्थः । यष्टिककुद् । स्थूल इत्यर्थ. । पन्नककुद् । वृद्ध इत्यर्थः । स्थूलककुद् । बलवानित्यर्थ. । अवस्थायामिति किम् ? श्वेतककुदः ।

जायाया जानिः ॥२।१।२१६॥ बहुव्रीहेरवयवस्य जायाशब्दस्य जानिरादेशः समासान्तो भवति । युवतिर्जाया भार्या अस्य युवजानिः । [2]वधूजानिः । प्रियजानिः । शोभनजानिः ।

धनुर्नाम्नि ॥२।१।२१७॥ नियमार्थमिदम् । धनुःशब्दोऽपि बहुव्रीहेरवयवः समासान्तो नाम्न्येव प्रयोक्तव्यः । शतं धनूंष्यस्य शतधनु. । दृढधनुः । नाम्नीति किम् ? शार्ङ्गधन्वा । गाण्डीवधन्वा । धनुःपर्यायो धन्वन्शब्दः शब्दान्तरमस्ति । नाम्न्येवेति नियमान्नाम्नि शब्दान्तरस्यापि प्रयोगः । विपरीतस्तु [3]नियमो न भवति । नाम्नि कजः प्रतिषेधात् ।

खरखुराग्रस् नासिकायाः ॥२।१।२१८॥ खर खुर इत्येताभ्यां परस्य नासिकाशब्दस्य बहुव्रीह्यवयवस्य नस् इत्ययमादेश समासान्तो भवति नाम्नि संज्ञायां विषये । खरस्येव नासिका अस्य खरणाः । खुर इव नासिका अस्य खुरणा· । नाम्नीति किम् ? खरनासिकः । खुरनासिक. । खरादिभ्य इत्येके । तत्र शितीनाः । अहिनाः । अर्चनाः ।

नसोऽस्थूलाच्च ॥२।१।२१९॥ स्थूलवर्जितात् पूर्वपदात् खरखुरशब्दाभ्यां (च) परस्य नासिकाशब्दस्य बहुव्रीह्यवयवस्य नाम्नि नस इत्ययमादेशः समासान्तो भवति । द्रु इव नासिका अस्य द्रुणसः । बाघ्रीणसः । गोरिव नासिका अस्य गोनसः । खरणसः । खुरणसः । अस्थूलादिति किम् ? स्थूलनासिकः । चकारः पूर्वेणास्य बाधानिवृत्त्यर्थः । नाम्नीति किम् ? दीर्घनासिकः । तुङ्गनासिकः ।

उपसर्गात् ॥२।१।२२०॥ धातुयोगे यः प्राविरुपसर्गसंज्ञो भवति तस्मात् परस्य नासिकाशब्दस्य बहुव्रीह्यवयवस्य नस इत्ययमादेशः समासान्तो भवति । उद्गता नासिका अस्य उन्नसं मुखम् । प्रणता प्रवृद्धा वा नासिका अस्य प्रणसं मुखम् । असंज्ञार्थं वचनम् ।

वेः खुखभ्राः ॥२।१।२२१॥ उपसर्गाद् विशब्दात् परस्य नासिकाशब्दस्य बहुव्रीह्यवयवस्य खु खू भ्र इत्येत आदेशाः समासान्ता भवन्ति । विगता नासिकाऽस्य विखुः । विखूः । विभ्रः । उपसर्गादिति किम् ? वेः पक्षिण इव नासिकाऽस्य विनासिकः ।

सम्प्राज्ञानोर्ज्ञुज्ञौ ॥२।१।२२२॥ सम् प्र इत्येताभ्यां परस्य जानुशब्दस्य बहुव्रीह्यवयवस्य प्रत्येकं ज्ञु ज्ञ इत्येतावादेशौ समासान्तौ भवतः । सङ्गते जानुनी यस्य स संज्ञुः । संज्ञः [4] । प्रणते प्रवृद्धे वा जानुनी अस्य प्रज्ञुः । प्रज्ञः । सम्प्रादिति किम् ? विजानुः । वचनभेदाद् यथासंख्याभावः ।

---

१. हंसकूटस्तु ककुदः, क० म० टि० । २. वधोढा- क० म० टि० । ३. धनुश्शब्दनियमो नास्ति- क० म० टि० । ४. सम्यक्संगः संगतजानुकः क० म० टि० ।

ऊर्ध्वात् ॥२।१।२२३॥ ऊर्ध्वशब्दात् परस्य जानुशब्दस्य बहुव्रीह्यवयवस्य वा ञु ञ इत्येतावादेशौ समासान्तौ भवतः। ऊर्ध्वे जानुनी अस्य ऊर्ध्वञुः। ऊर्ध्वञः। ऊर्ध्वजानुकः। ऊर्ध्वजानु.।

सुहृद्दुर्हृन्मित्रामित्रे ॥२।१।२२४॥ सुहृद् दुर्हृद् इति सुपूर्वस्य दु पूर्वस्य च हृदयशब्दस्य बहुव्रीह्यवयवस्य यथाक्रमं मित्रे सख्यौ अमित्रे शत्रौ चाभिधेये हृद् इत्ययमादेशो निपात्यते। (सु सुष्ठु हृदयं यस्येति) सुहृन्मित्रम्। (दुर् दुष्टं हृदयं यस्येति) दुर्हृदमित्रम्। मित्रामित्रे इति किम्? सु शोभनं हृदय यस्य (सः) सुहृदयः कारुणिकः। दुर्-पापं हृदयं यस्य स दुर्हृदय. क्रूर।

स्त्रियामूधसोऽनङ् ॥२।१।२२५॥ स्त्रिया वर्तमानस्य बहुव्रीहेरूधस् शब्दस्य नकारादेशः समासान्तो भवति। ङकार आदेशत्वाभिव्यक्त्यर्थः। कुण्डमिवोधोऽस्या कुण्डोध्नी। घटोध्नी। पीवरमूधोऽस्याः पीवरोध्नी। महोध्नी गौ। स्त्रियामिति किम्? महोधा. पर्जन्यः। बहुव्रीहेरिति किम्? ऊधः प्राप्ता प्राप्तोधाः गौः।

इनः कच् ॥२।१।२२६॥ इन्नन्ताद्बहुव्रीहेः स्त्रिया वर्तमानात् कच्प्रत्ययः समासान्तो भवति। बहवो दण्डिनोऽस्या· बहुदण्डिका। बहुवाग्मिका। बहुस्वामिका। बहुरामभरविका शाला। स्त्रियामिति किम्? (बहवो दण्डिनो यस्मिन् स·) बहुदण्डी, बहुदण्डिको ग्रामः। चकारो 'न कच्' इति विशेषणार्थः।

उरःप्रभृत्यप्तृन्नित्याटः ॥२।१।२२७॥ उरस् इत्येवमाद्यन्तादृकारान्तात्रिन्यमाडागमो यस्मात्तदन्ताच्च बहुव्रीहेः कच् समासान्तो भवति। व्यूढमुरोऽस्य व्यूढोरस्क·। बहुसर्पिष्क। ऋन.–बहुकर्तृक·। बहुहर्तृक। नित्याट —बहुकुमारीकः। ब्रह्मबन्धूक। नित्यग्रहणं किम्? पृथुश्री.। पृथुश्रीकः। अम्बभूः। अम्बभूक। (लम्बभूः। लम्बभूक·) पूर्वत्र स्त्रियामिति योगविभाग·। उरस्, सर्पिस्, उपानह्, दधि, मधु, शालि, पुमान्, अनड्वान्, पय·, गोः, अक्षि इत्युर·प्रभृतिः। [२]अत्र पूमानित्यादीनामेकवचनान्तानां पाठ.। तेन वचनान्तरे[३] ङीषात् सिद्धनन्दिन. इति विकल्पो भवति। द्विपुमान्। द्विपुस्कः। बहुलक्ष्मी., बहुलक्ष्मीक। क्वचित्तल्लक्ष्मीदरीति च प्रातिपदिके पठन्ति। नित्याट इत्येव सिद्धे [४]तुल्ययोगेऽपि कजर्थम्। सलक्ष्मीको विनाशित.। सदरीकः [५]स्नात·। [६]लक्ष्मीपाठः [७]कुन्नित्यादौ विधिरय न भवति। बहुतन्त्रीः, बहुतन्त्रीकः, इत्येवमर्थ इत्येके।

नञोऽर्थात् ॥२।१।२२८॥ नञ. परो याऽर्थशब्दस्तदन्ताद् बहुव्रीहे. कच् समासान्तो भवति। न विद्यतेऽर्थोऽस्य अनर्थकम्। नञ इति किम्? अपार्थम्, अपार्थकम्।

शेषात् सिद्धनन्दिनः ॥२।१।२२९॥ यस्य समासान्त प्रत्यय आदेशो वा न विहितस्तस्माच्छेषाद् बहुव्रीहेः कच् समासान्तो भवति सिद्धनन्दिन आचार्यस्य। (बह्वय खट्वा यस्य सः) बहुखट्वकः, बहुखट्वः। बहुमालकः। बहुमालः। शेषादिति किम्? प्रियपथ। प्रियमधुर। व्याघ्रात्। सिंहपात्। अमति शेषग्रहणे पक्षे परत्वात् कच् स्यात्। सिद्धनन्दिन आचार्यस्य ग्रहणं विकल्पार्थम्।

इति श्रुतकेवलिदेशीयाचार्यस्य शाकटायनस्य महाश्रमणसङ्घाधिपतेः कृतौ शब्दानुशासने वृत्तौ द्वितीयस्याध्यायस्य प्रथमः पादः [८]समाप्तिमगमत् ॥२।१॥

---

१. लक्ष्मिः क० म०। २. उरःप्रभृतिगणे क० म० टि०। ३. द्विवचनबहुवचनयोः क० म० टि०। ४. तद्गणे समानयोगे क० म० टि०। ५. इयात: क० म०। ६. औणादिकग्रहणात्तृणीकारान्ता ना न भवतीत्यर्थः क० म० टि०। ७. कुन्नित्याटोऽयं विधिर्न भवति क० म०। ८. "समाप्तिमगमत्" इति क० म० पुस्तके नास्ति।

[द्वितीयः पादः]

प्रत्ययस्य च सुपः श्लुक् ॥२।२।१॥ समासस्येति वर्तते । समासस्य प्रत्ययस्य च निमित्तस्य सुपः श्लुग्भवति । (चित्रा गावो यस्य सः) चित्रगुः । शबलगुः । चित्र अस् गो अस् इति स्थिते तस्य समाससंज्ञाया सत्या समासावयवस्य सुपः श्लुक् । उपगोरपत्यमौपगवः । कापटवः । उपगु अस् इति स्थिते तद्धितप्रत्ययान्तावयवस्य श्लुक् । पुत्रमिच्छत्यात्मन. पुत्रकाम्यति । वस्त्रकाम्यति । पुत्र अस् काम्य स्थिते [1]धातुप्रत्ययान्तावयवस्य श्लुक् । समासप्रत्ययान्ताभ्या तूत्पन्नस्य सुप. श्लुग्भवति । अव्ययीभावस्येत्यारम्भात् प्रत्ययस्येति च सुपोऽन्यः प्रत्ययः परिगृह्यते । चकारः [2]समासार्थः । अस्य योगस्य अव्ययस्येत्यत्राकृत्वेह पृथगारम्भः [3]श्लुचः प्रतिषेधे प्राप्त्यन्तरानुमानबाधनार्थः । [4] अन्यथा [5] हि [6] विश्लेषे भा(षा)सर्वविषयं [7] प्रस्थन्तरमनुमीयेत ।

नोत्तरपदेऽस्त्वे ॥२।२।२॥ [8]वतेनोऽस्त्व इति यः समास उक्तस्तदवयवस्य सुपः [9]पञ्चम्याम् उत्तरपदे न [10] श्लुग्भवति । स्तोकान्मुक्त· । अल्पान्मुक्तः । कतिपयान्मुक्त. । कृच्छ्रान्मुक्तः । आरादागतः । अन्तिकादागत । उत्तरपद इति किम्? स्तोकान्मुक्ति । उत्तरार्थं च । असत्व इति किम्? स्तोकभयम् । स्तोकापेतः ।

खितीच एकाचोऽमः ॥२।२।३॥ इजन्तादेकाचः परस्यामः खिदन्त उत्तरपदे श्लुग्न भवति । रायम्मन्य· । नावम्मन्यः । गाम्मन्या [11] । नरम्मन्य· । स्त्रीम्मन्यः । स्त्रियम्मन्यः । श्रियम्मन्यः । भ्रुवम्मन्य. । श्रियम्मन्यं कुलमित्यत्र श्रीशब्द [12] कुलेऽपि वर्तमान. स्वलिङ्गं न जहाति । वाक्यविदिति नपुंसकश्लुग्भवति । अन्ये मन्यन्तेऽत्र विषयपरित्यक्तस्वलिङ्ग. कुले वर्तते यथा प्रष्टादयः स्त्रियाम् तत्र नपुंसकश्लुचि स्त्रीम्मन्यमिति भवितव्यम् । वृत्तिश्लुचश्चार्थं प्रतिषेधो न नपुंसकश्लुचः । खीति किम् ? [13] स्त्रीमानी । इच इति किम् ? ज्ञमन्य. । क्षमन्यः । वाङ्मन्य । एकाच इति किम् ? कालीमन्या. । हरिणीमन्या । पञ्चकेऽपि प्रातिपदिकार्थे अम श्लुक् प्रतिषेधादिह षष्ठी न भवति ।

ओजोऽञ्जस्सहोऽम्भस्तपसष्टः ॥२।२।४॥ ओजम् अञ्जस् सहस् अम्भस् तपस् इत्येतेभ्यः परस्य टस्तृतीयैकवचनस्योत्तरपदे परे श्लुग्न भवति । ओजसाकृतम् । अञ्जसाकृतम् । सहसाकृतम् । अम्भसाकृतम् । तपसाकृतम् । तपसाप्राप्तम् । तमस इत्येकेषा पाठ । तेषां तमसाकृतम् । ट इति किम् ? ओजसो भावः ओजोभाव. ।

ङत्यात्मनः ॥२।२।५॥ आत्मन्शब्दात् परस्य टो ङदन्त उत्तरपदे परे श्लुग्न भवति । आत्मनापञ्चमः । आत्मनाषष्ठ । पूर्वादित्वात् समास. । जनार्दन स्वात्मचतुर्थ एवेति आत्मा चतुर्थोऽस्येति बहुव्रीहिः ।

मनस आज्ञायिनि ॥२।२।६॥ मनश्शब्दात् परस्य (टः) आज्ञायिन्नित्येतस्मिन्नुत्तरपदे परे श्लुग्न भवति । मनसा आज्ञातु शीलमस्येति मनसाज्ञायी । मनसश्चाज्ञायिनीत्येकेषा तत्रात्मनाज्ञायी ।

नाम्नि ॥२।२।७॥ मनश्शब्दात् परस्य (ट.) उत्तरपदे परे नाम्नि संज्ञाया विषये श्लुग्न भवति ।

---

१. कृतधातुरूपकाम्यप्रत्ययावयवस्य क० म० टि० । २. समासशब्दानुकर्षणार्थः क० म० टि० । ३. अव्ययीभावस्य प्रत्ययस्य सुपः श्लुगिति सूत्रे कृते समाससुपोऽपि नात इति श्लुचः प्रतिषेधे प्राप्ते-ऽमादिकम् (अम् पञ्चम्याः) प्राप्त्यन्तरं प्राप्नोति । अव्ययीभावेन सह पाठान्यथानुपपत्तेरित्यनुमानम् । तस्मा भूदिति-पृथग्यारम्भः क० म० टि० । ४. बाधार्थः क० म० । ५. पृथगारम्भाभावे- क० म० टि० । ६. हि विभाषा सर्व- क० म० । तृतीया वा समस्या- क० म० टि० । ७. -यं प्राप्त्यन्त- क० म० । अम्पञ्चम्याः क० म० टि । ८. फेनाप्रस्त्वं- क० म० । ९. पञ्चम्या ङ- क० म० । १०. -पदे श्लुग्न भवति, क० म० टि० । ११. गाम्मन्यः क० म० । कर्तुस्त्वः क० म० टि० । १२. कुलं कर्तृ । तथा च श्रीशब्देन न वा भवितव्यमिति चेत्; न; आरोपात् । क० म० टि० । १३. ह्रस्वः अनव्यवस्याजन्तस्य खिदन्त उत्तरपदे ह्रस्वादेशोः भवति क० म० टि० ।

पूर्वोत्तर[1]समुदायो नाम मनसा गुप्ता मनसा सङ्गता। एवं नामा कार्यित्।

ङेर्य्याकरणे ॥२।२।८॥ ङेश्चतुर्थ्येकवचनस्योत्तरपदे परे श्लुग्न भवति व्याकरणविषये नाम्नि, येन नाम्ना व्याकरण[2] व्यवह्रियते। परस्मैपदम्। परस्मैभाषः। आत्मनेपदम्। आत्मनेभाष । चिरन्तनेषु व्याकरणेषु संज्ञा एताः। ङेरिति किम्? सर्वेषा नाम सर्वनाम। तद्धित इति निपातनात् सिद्धम्। व्याकरण इति किम्? परहितः।

हलतः सप्तम्याः ॥२।२।९॥ हलन्ताददन्ताच्च परस्याः सप्तम्या उत्तरपदे परे श्लुग्न भवति नाम्नि संज्ञायां विषये। त्वचिसारः[3]। दृषदिमाषकः। अरण्येतिलकाः। अरण्येमाषकाः। वनेकशेरुका। वनेहरिद्रकाः। पूर्वाह्णेस्फाटिकाः। कूपेपिशाचिकाः। हल इति किम्? नदीकुक्कुटिकाः। भूमिपाशः। सप्तम्या इति किम्? उन्मत्ता गङ्गाऽस्मिन्नुन्मत्तगङ्गं नाम देशः। वृत्तावुपसर्जनपदार्थाना प्रातिपदिकाक्षिप्तैव संख्या न पृथग्विभक्तेर्विशेषः प्रतीयते सा चेह सर्वभेदानुगुणा अभेदैकत्वलक्षणेत्येकवचनं न्याय्यम्। तत्र [4]पूर्वपदैकवचनोपादानमेव कर्तव्यमुच्यते अक्षादीनि बहुत्वमाक्षिपन्तीति ततो बहुवचनेन भवितव्यमिति सप्तमीग्रहणम्। नाम्नीति किम्? अक्षशौण्डः।

कारे प्राचां हलि ॥२।२।१०॥ रक्षार्थं प्रजाना राज्ञे धर्म्यं देयं कारः[5]। हलन्तादकारान्ताच्च परस्याः सप्तम्या हलादावुत्तरपदे परे प्राचा देशे य. कारस्तस्मिन् विषये श्लुग्न भवति। दृषदि[6] घातव्यो माषक. दृषदिमाषकः। एवं समिधिमाषकः[7]। स्तूपेशाणः। मुकुटेकार्षापण । हलेद्विपदिका। हलेत्रिपदिका। वृत्तौ वीप्सायाः दार्न ओस्य (?) चान्तर्भाव। कार इति किम्? अभ्याहितपशु । कारादन्यदेतद्रूपम्। प्राचामिति किम्? यूथपशु । यूथवृषः। हलीति किम्? अविकटो[8] गणः। हल इति किम्? जङ्घाकार्षापणः। महिषीकार्षापण । नधीदोहः। पूर्वसूत्रे नाम्नीति लोके रूढो विज्ञायते। दृषदिमाषकादयश्च साम्प्रतिकाः कारा: न तदस्येत्यारम्भ समासोऽत्र एव निषेधात् नियमार्थं वा तत्र त्रिभिर्नियमैरभ्याहितपशुरित्यादिर्व्यवच्छिद्यते।

मध्यान्ताद् गुरौ ॥२।२।११॥ नाम्नीति निवृत्तम्। मध्य अन्त इत्येताभ्या परस्या सप्तम्या गुरुशब्द उत्तरपदे परे श्लुग्न भवति। मध्येगुरुः। अन्तेगुरु.।

अकामेऽमूर्धमस्तकात् स्वाङ्गात् ॥२।२।१२॥ मूर्धमस्तकशब्दवर्जितात् स्वाङ्गवाचिनो हलन्तात् शब्दरूपात् परस्याः सप्तम्या कामशब्दवर्जित उत्तरपदे परे श्लुग्न भवति। उरसिलोमा। शिरसिशिखः। कण्ठेकालः। वहेगडुः। [10]पुत्रेबलिः। [11]उदरेमणिः। अकाम इति किम्? [12]मुखे कामोऽस्य [13]मुखकामः। अमूर्धमस्तकादिति किम्? मूर्धशिखः। मस्तकशिख.। स्वाङ्गादिति किम्? अक्षशौण्डः। [14]सुखपुरुषा शाला। हल इति किम्? अङ्गुलित्रणम्। जङ्घाबलिः।

बन्धे घञि वा ॥२।२।१३॥ हलन्तात् परस्याः सप्तम्या घञन्ते बध्नातावुत्तरपदे परे श्लुग्भवति वा। हस्तबन्धः। हस्ते बन्धोऽस्येति हस्तेबन्धः। हस्तबन्धः। चक्रेबन्ध.। चक्रबन्ध.। घञीति किम्? अन्यत्र श्लुगेव भवति। हस्तबन्धनम्। चक्रबन्धनम्। हस्तबन्धः। चक्रबन्ध.। बध्नातीति बन्धः। एवत्र च। हल इति किम्? गुप्तिं[15]बन्धः, कारावन्धः। स्वाङ्गादस्वाङ्गाद्वाऽयं विकल्पः।

---

१. -त्तरपदसमु- क० म०। २. -करणे व्यव- क० म०। ३. नाम्नीति समासः। क० म० टि०। ४. पूर्वपदेक- क० म०। ५. कारसिद्धायवड्भागाः हेमचन्द्रकोशव्याख्याने क० म० टि०। ६. दृणाति चूर्णयति आत्मतलगतं पेष्यद्रव्यमिति दृषत् अथवा दीर्यते पेष्यते पेषणीयं तत्रेति दृषत् पेषणी। क० म० टि०। ७. गुञ्जाभिः सप्तभिर्माषः शाणो माषचतुष्टयम्। शाणौ द्वौ वटकः कोलस्तौ द्वौ कर्ष उदुम्बरः॥ कक्षं पाणितलं ज्ञेयं सुवर्णं कवलग्रहः। पिचुमीडालपदकं शुक्तिः पाणितलद्वयम्॥ क० म० टि०। ८. दानस्य चा- क० म०। ९. -कटो रणः क० म०। १०. पुत्रेबलिः क० म०। ११. उदकेरमणि क० म०। उपस्थे योदकं प्रोक्तं भगमध्यगुडो मणिः। म० म० टि०। १२. मुखे कामो क० म०। १३. मुखकामः क० म०। १४. मुखपुरुषा क० म०। १५. गुप्तिं कारागृहे प्रोक्ता क० म० टि०।

तत्पुरुषे कृति बहुलम् ॥२।२।१४॥ हलदन्तात् परस्या· सप्तम्या: कृदन्त उत्तरपदे तत्पुरुषे समासे बहुलं श्लुग्न भवति । स्तम्बेरम: । कर्णेजप: । भस्मनिहुतम् । भस्मनिमीढम्[1] । प्रवाहेमूत्रितम्, उदकेविशीर्णम् । अवतप्तेनकुलस्थितम् । क्वचित् प्रतिषेधो न भवति । मद्रचर: । ग्रामकार: । क्वचिद् विकल्प: । सरसीरुहम्, सरोरुहम् । क्वचिदन्यदेव । हृदयं स्पृशतीति हृदिस्पृक् । दिविस्पृक् । द्वितीयार्थे सप्तमी ।

क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।
विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति ॥

तत्पुरुष इति किम् ? धन्वनि कारकोऽस्य स धन्वकारक: । कृतीति किम् ? अक्षशौण्ड: । हल इति किम् ? कुरुचर: । रात्रिचर: । नदीचर: ।

ययोनिमतिचरजेऽप: ॥२।२।१५॥ अप इत्येतस्मात् परस्या: सप्तम्या यप्रत्यये योनिमति चरज इत्येतेषु चोत्तरपदेषु श्लुग्(न)भवति । अप्सुभव: । अप्सुभव्य । अप्सुयोनि: । अप्सुमत. । अप्सुचर: । अप्सुज: ।

द्युप्रावृड्वर्षाशरत्कालाज्जे ॥२।२।१६॥ दिव् प्रावृष् वर्षा शरत् काल इत्येतेभ्य: परस्या: सप्तम्या ज इत्येतस्मिन्नुत्तरपदे श्लुग्न भवति । दिविज: । प्रावृषिज:[2] । वर्षासुज: । शरदिज. । कालेज. ।

क्षरवरशरवर्षाद्वा ॥२।२।१७॥ क्षर वर शर वर्ष इत्येतेभ्य: परस्या: सप्तम्या ज उत्तरपदे श्लुग्वा न भवति । क्षरेज , क्षरज. । वरेज:, वरज: । शरेज., शरज. । वर्षेज:, वर्षज: ।

शयवासिवासेऽकालात् ॥२।२।१८॥ अकालवाचिन. शरत्काल[3] इत्येतेभ्य· परस्या: सप्तम्या: शय वासिन् वास इत्येतेषूत्तरपदेषु वा श्लुग्न भवति । बिलेशय:, बिलशय. । वनेवासी, वनवासी । ग्रामेवास:, ग्रामवास. । अकालादिति किम् ? पूर्वाह्णशय. । अपराह्णशय: । हलत इत्येव । गुहाशय: । भूमिशय: ।

कालाद् ङतनट्काले ॥२।२।१९॥ हलदन्तात् कालवाचिन. परस्या: सप्तम्या: ङे तरे तमे च तनटि च प्रत्ययेषु कालशयशब्दे चोत्तरपदे परत श्लुग्वा भवति । [4]पूर्वाह्णेतरे । अपराह्णेतराम् । अपराह्णतरे । पूर्वाह्णेनमाम् । पूर्वाह्णतमे । अपाह्णेतमाम् । अपराह्णेतमे[5] । पूर्वाह्णेतन , पूर्वाह्णतन: । अपराह्णेतन:, अपराह्णतन: । पूर्वाह्णेकाले, पूर्वाह्णकाले । अपराह्णेकाले, अपराह्णकाले । कालादिति किम् ? शुक्लतरे । कालादिति स्वरूपग्रहणं न भवति तनटयसम्भवात् । ङतनट्काल इति किम् ? मध्याह्नकल्पे । तनँडिति टकार: प्रत्ययाभिव्यक्त्यर्थ: । उत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययमात्रस्य ग्रहणम् । [6]तनङन्तस्य कृदन्त[7] इत्यग्रहणात् । हलत इति किम् । रात्रितरायाम् ।

नेन्सिद्धस्थे ॥२।२।२०॥ इन्नन्तं सिद्धस्थ इत्येतयोश्चोत्तरपदयो पञ्चम्या:[8] श्लुग्न न भवति । भवत्येवेत्यर्थ· । स्थण्डिलवर्ती । स्थण्डिलशायी । साङ्काश्यसिद्ध. । समस्थ: । विषमस्थ: । परमकारके । उत्तरकारके । इति । समन्तात् सप्तमीतत्पुरुष इति च कृति या सप्तमी कृत्रिमित्तायां सप्तम्या. श्लुक्प्रतिषेध: ययोनिमतिचरजेऽप इत्यादि विधिविकल्प. [9]प्रतिषेधानुक्रमणं तत्पुरुषे कृति बहुलमित्यस्यैव प्रपञ्च: । ते त्रै विधय: सुसङ्गृहीता भवन्ति तेषा[10] लक्षणं प्रपञ्चश्च ।

ब्राह्मणाच्छंसिपुंसानुजजनुषान्धगोपुवरिवोदासदेवानांप्रियाः ॥२।२।२१॥ ब्राह्मणाच्छंस्यादयोऽकृतविभक्तिश्लुका[11] निपात्यन्ते । ब्राह्मणाद् ग्रन्याद् गृहीत्वा शंसतीति ब्राह्मणाच्छंसी ऋत्वि-

---

१. मीढं तु मूत्रिते क० म० टि० । २. 'स्यात् केष्वृकः प्रावृषिजः' क० म० टि० । ३. -नः परस्याः क० म० । ४. भवति । पूर्वाह्णेतराम् । पूर्वाह्णेतरे । क० म० । ५. -राह्णतमे क० म० । ६. -हणम् । न तदन्तस्य क० म० । ७. कृदन्ते वामं रात्रेऽतीत्यत्र क० म० टि० । ८. -दयो सप्तम्या क० म० । ९. -त्यप्रति- क० म० । १०. -न्ति येषां क० म० । ११. श्लुक्का नि- क० म० ।

विशेष उच्यते अत्र पञ्चम्याः श्लुगभाव. । पुंसा अनुजा पुंसानुजा कन्या । जनुषा जन्मना अन्धः जनुषान्धः । अविकृताक्षो जात्यन्ध उच्यते । अत्र तृतीयाया (श्लुगभावः)। अन्यस्य[1] श्लुगभवत्येव । पुमासमनुजाता पुमनुजा । गोषु[2] अप्सु चरतीति गोषुचर. । अत्र सप्तम्याः[3] । दिवः दासः दिवोदासः । दिवोदास नामा कश्चित् (पुरुष.) । देवानां प्रियः, अत्र षष्ठ्याः निपातन प्रसिद्धयुपसङ्ग्रहार्थम् ।

षष्ठ्या आक्रोशे ॥२।२।२२॥ हलतः कृतीति च निवृत्तम् । आक्रोशे गम्यमाने षष्ठ्या उत्तरपदे श्लुग्न भवति । चोरस्यकुलम् । दासस्यभार्या । दास्याःपतिः । अन्यत्र चौरकुलम् । दासकुलम् । तत्त्वाख्याने न भवति ।

पुत्रे वा ॥२।२।२३॥ आक्रोशे[4] गम्यमाने पुत्रशब्दे उत्तरपदे षष्ठ्याः श्लुग्वा न भवति । दास्याः पुत्रो दासीपुत्रः । वृषल्या.[5] पुत्रो वृषलीपुत्रः । आक्रोश इति किम् ? दासीपुत्रः । पूर्वेण नित्ये प्रतिषेधे प्राप्ते विकल्पः ।

वाग्दिक्पश्यतो युक्तिदण्डहरे ॥२।२।२४॥ वाक् दिक् पश्यत् इत्येतेभ्य. परस्या. षष्ठ्या यथाक्रमं युक्तिदण्डहरेषूत्तरपदेषु श्लुग्न भवति । वाचोयुक्तिः । दिशोदण्डः । पश्यतोहरः[6] । पश्यत इत्यनादरे षष्ठी । पश्यन्तमनादृत्य हर्ता पश्यतोहर[7] उच्यते । आमुष्यपुत्रिका । आमुष्यकुलिकेत्यत्र[8] वुञि चोरादौ तथा पाठादश्लुक् । आमुष्यायण[9] इति फणि नडादिषु तथा पाठात् ।

शेफपुच्छलाङ्गूलेषु नाम्नि शुनः ॥२।२।२५॥ श्वन्शब्दात् परस्याः षष्ठ्याः शेफ पुच्छ लाङ्गूल इत्येतेषूत्तरपदेषु नाम्नि सज्ञायां विषये श्लुग्न भवति । शुनश्शेफः । शुन पुच्छ. । शुनोलाङ्गूल । नाम्नीति किम् ? श्वशेफ । श्वपुच्छम् । श्वलाङ्गूलम् । एके शेफपुच्छलाङ्गूलेष्विति विभज्य सिंहस्य शेफ । सिंहस्य लाङ्गूलम् । सिंहस्य पुच्छमित्युदाहरन्ति ।

गोष्पदं सेवितप्रमाणे ॥२।२।२६॥ गोष्पदमिति षष्ठ्या. श्लुगभाव षत्व च निपात्यते सेविते प्रमाणे चार्थे । गोष्पदो देश । यत्र गाव: पश्यन्ते स गोभि. सवितो ग्रामसमीपादिदेश उच्यते । [11]प्रमाणं गोष्पदपूर वृष्टो देव. । गोष्पदमात्रं क्षेत्रम् । अत्र गोष्पदमन्यस्येयत्ता परिच्छेत्तुमुपादीयमानं प्रमाण भवति । सेवितप्रमाणे इति किम् ? गोपदम् ।

असेविते ऽगोष्पदम् ॥२।२।२७॥ न विद्यते सेवितं सेवनं यस्मिन् तदसेवितं तस्मिन्नगोष्पदमिति निपात्यते । अगोष्पदेश्वरण्येषु विश्वासमुपजग्मिवान् । कतिचिदगोष्पदकाननोत्काराभिः गोष्पदप्रतिषेधादगोष्पदे विज्ञायमाने यत्र गवा प्रसङ्गो न ताभिः सेवितस्तत्र स्यात् । यथा अशुक्ल इति यत्र शुक्लगुणप्रसङ्ग. स उच्यते । नात्माऽकाशादि यत्र च गवामत्यन्तासम्भवस्तत्र न स्यात् तत्र यथा स्यादित्येवमर्थमिद वचनम् ।

ऋतां विद्यायोनिसम्बन्धे ॥२।२।२८॥ ऋकारान्ताना विद्याकृते योनिकृते च सम्बन्धे निमित्ते सति प्रवर्तमानाना सम्बन्धिन्याः षष्ठ्या विद्यायोनिसम्बन्धनिमित्त एवोत्तरपदे श्लुग्न भवति । होतु पुत्र. । होतुरन्तेवासी । पितु पुत्र. । पितुरन्तेवासी । ऋतामिति किम् ? आचार्यपुत्र । मातुलान्तेवासी । बहु-

---

१ अन्यस्यास्तु श्लुग् क० म० । २. गोशब्दस्य प्रत्यर्थवाचकम् । क० म० टि० । ३ श्लुगभावः क० म० टि० । ४. "शापोऽधिक्षेप आक्रोशः कारणं स्याद्विरूक्षणम् ।" इत्यभिधानम् । क० म० टि० । ५. दासीपर्यायः अथवा 'वृषली कन्यका वन्ध्या, म्रियमाणसुतासु च ।' क० म० टि० । ६. 'यः पश्यतो हरेदर्थं स चौरः पश्यतोहरः ।' इत्यभिधानचिन्तामणिः । ७. "वणिग्भ्य परे न सन्ति पश्यतोहराः" इति नीतिवाक्यामृते । क० म० टि० । ८. स्वमामुष्यायणः किं न किं तेनामुष्यपुत्रिका । येनैवमुक्तसो भूत्वा यास्यसन्कृत्य मद्विधान् ॥ इति पूर्वपुराणे । क० म० टि० । ९. -किकेति वुञि चो- क० म० । १०. "आमुष्यायण उत्पन्नो यः प्रख्यातकुलात् पितुः ॥" इत्यभिधानम् । क० म० टि० । ११. प्रमाणगो- क० म० ।

वचनं विद्यासम्बन्धस्य विद्यासम्बन्धे, योनिसम्बन्धस्य योनिसम्बन्धे, इति यथासंख्यप्रतिपत्त्युदासार्थम्[1], अत एव च विद्यायोनिसम्बन्ध इति, उभयविशेषणम्। षष्ठ्युत्तरार्था। विद्यायोनिसम्बन्ध इति किम्? भर्तृगृहम्। पूर्वपदविशेषणं किम्? भर्तृशिष्यः। भर्तृपुत्रः। उत्तरपदविशेषणं किम्? होतृधनम्। पितृधनम्। पितृगृहम्।

स्वस्रादेर्वा ॥२।२।२९॥ विद्यायोनिसम्बन्धे वर्तमानानामृकारान्तानां षष्ठ्याः स्वसृ पति इत्येतच्छब्दयोर्योनिसम्बन्धनिमित्तयोरुत्तरपदयोः[2] इलुग्वा न भवति[3]। होतुःस्वसा होतृस्वसा। पितुःस्वसा, पितृस्वसा[4]। मातुःस्वसा, मातृस्वसा। दुहितुःपतिः, दुहितृपतिः। ननान्दुःपति[5], ननान्दृपतिः। विद्यायोनिसम्बन्ध इति किम्? भर्तृस्वसा। होतृपतिः। पूर्वेण नित्ये प्रतिषेधे प्राप्ते विकल्पः।

मातरपितरं द्वन्द्वे वा ॥२।२।३०॥ मातृपितृशब्दयोः पूर्वोत्तरपदयोर्द्वन्द्वे मातरपितर इति ऋकारस्य अरभावो निपात्यते। माता च पिता च मातरपितरौ। मातरपितराभ्याम्। मातरपितरयोः। मातापितरौ। मातापितृभ्याम्। मातापित्रोः। शब्दरूपानपेक्षो[6] नपुंसके वचननिर्देश उत्तरपदस्य अरभावाभिव्यक्त्यर्थः। इह वाग्रहणादुत्तरत्र वेति नास्ति।

आङ् ॥२।२।३१॥ विद्यायोनिसम्बन्धे निमित्ते सति प्रवर्तमानानामृकारान्तानां यो द्वन्द्वस्तत्रोत्तरपदे परे पूर्वस्य आङ् आकारादेशो भवति। ङकार आदेशार्थः। होता च पोता च होतापोतारौ। नेष्टोद्गातारौ। प्रशास्ताप्रतिहर्तारौ। मातापितरौ[7]। यातानान्दारौ। होता च पोता च नेष्टा च उद्गाता च होतृपोतृनेष्टोद्गातारः[8]। ऋतामिति किम्? गुरुशिष्यौ। द्वन्द्वविशेषणं किम्? पितृपितामहौ[10]। विद्यायोनिसम्बन्धनिमित्त इति किम्? कर्तृकारयितारौ। विद्यायोनिभ्यां सम्बन्ध ऋतामेव मिथो विज्ञायते इतीह न भवति—देवदत्तस्य स्वसृदुहितरौ। देवदत्तस्य पितृभ्रातरावित्यत्र यद्यपि भ्राता देवदत्तस्य भ्राता भवन् पितरमपेक्षते तज्जनितस्य तथाभावात्, पिता तु पिता भवन् न भ्रातरमपेक्षते होतापोतारौ, मातापितरावित्यत्र तु होत्रादयस्तथा भवन्तः[11] परस्परमपेक्षन्ते स्वकर्मणि योगे प्रजनने च सहितानामेव प्रवृत्तेस्तत्कर्मनिमित्तश्च तेषां तथा व्यपदेशः। स्वसादुहितराविति केचित्।

पुत्रे ॥२।२।३२॥ विद्यायोनिसम्बन्धे निमित्ते सति प्रवर्तमानानां यो द्वन्द्वस्तत्र पुत्रशब्द उत्तरपदे ऋकारान्तानामाकार आदेशो भवति। पितापुत्रौ। मातापुत्रौ।

इन्द्रासोमादिषु देवतानाम् ॥२।२।३३॥ इन्द्रासोम इत्येवमादिषु देवतावाचिषु द्वन्द्वेषूत्तरपदे पूर्वपदस्याऽकारो भवति। इन्द्रश्च सोमश्च इन्द्रासोमौ। अग्नावरुणौ। इन्द्रापूषणौ। इन्द्राबृहस्पती। मित्रावरुणौ। सूर्याचन्द्रमसौ। शुनासीरौ[12]। अग्नामरुतौ। अग्नेन्द्रौ। अग्नाविष्णू। इन्द्रासोमादिष्विति किम्? ब्रह्मप्रजापती। शिववैश्रवणौ। स्कन्दविशाखौ। अग्निवायू। वाय्वग्नी। इन्द्रवायू। विष्णुशक्रौ। सूर्यचन्द्रौ। दिवाकरनिशाकरौ। आदिशब्दः प्रकारार्थस्तद्द्योतनार्थं बहुवचनम्। उत्तरपदे परे दृश्यमानाकारत्वं प्रकारः। देवतानामिति किम्? इन्द्रसोमौ माणवकौ।

---

१. -पत्तिव्युदासार्थम् क० म०। २. "स्वस्रीयो भागिनेयः स्याज्जामाता दुहितुः पतिः।" इति नामलिङ्गानुशासनम्। क० म० टि०। ३. -स्येतयो- क० म०। ४. पितृष्वसा क० म०। ५. 'ननान्दा तु स्वसा पत्युः' क० म० टि०। ६. रूपापेक्षो क० म०। ७. -रौ। मातादुहितरौ वा- क० म०। ८. -तारः। अन्त्यमुत्तरपदमिति नेष्टुद्गकारः होता च पोता च नेष्टोद्गातारौ च होतृपोतानेष्टोद्गातारः। होतापोतारौ च नेष्टोद्गातारौ च होतापोतानेष्टोद्गातार आता- क० म०। ९. ऋकारान्तानां यो द्वन्द्व इति ङकारं विशेषणम्' क० म० टि०। १०. अत्र पितामहशब्दस्य अकारान्तत्वादतो द्वन्द्वो न भवति। क० म० टि०। ११. होता भवन् पोता भवन् इति वक्तव्यम्। क० म० टि०। १२. शुनाशीरौ- क० म०। शुनाशीर इति च विदग्धचूडामणाविन्द्रपर्याये' क० म० टि०।

सोमवरुणेऽग्नेरीः ॥२।२।३४॥ अग्निशब्दस्य सोम वरुण इत्येतयोरुत्तरपदयोर्देवतानां द्वन्द्वे ईकारादेशो भवति । अग्नीषोमौ । अग्नीवरुणौ । सोमेत्यत एव निपातनादग्नेरीकारे सोमशब्दस्य विभक्तिर्विज्ञायते । सोमवरुण इति किम् ? अग्निवायू । देवतानामिति किम् ? अग्निसोमौ माणवकौ ।

नात्यविष्णिवन्द्रे ॥२।२।३५॥ अग्निशब्दस्य अति [1]आदेरकारे विषयभूते विष्णु इन्द्र इत्येतद्वर्जिते उत्तरपदे आकारेकारौ न भवतः । अग्निमारुतं कर्म । अग्निवारुणी अनड्वाही । अविष्णिवन्द्रग्रहणाद् आकारस्याप्ययं प्रतिषेधः । आतीति किम् ? अग्नामरुतौ । अग्निवरुणौ । आतीत्यादेराकारोऽस्य[2] गृह्यते नान्तस्य[3] प्रतिषेध्यत्वात् । अविष्णिवन्द्र इति किम् ? आग्नावैष्णवम् । आग्नीन्द्रम् ।

उषासोषसः ॥२।२।३६॥ उषस् इत्येतस्योत्तरपदे परे देवताद्वन्द्वे उषासा इत्ययमादेशो भवति । उषश्च[4] सूर्यश्च उषासासूर्यम् । उषासानक्तम् । उषासानक्तेन । नक्तशब्दोऽकारान्तोऽप्यस्त्यनव्ययम् ।

दिवो द्यावा ॥२।२।३७॥ दिव् इत्येतस्योत्तरपदे परे देवताद्वन्द्वे द्यावा इत्ययमादेशो भवति । द्यावाक्षे[5] । द्यावाक्षमे । द्यावाभूमी । द्यावानक्ते ।

दिवस्पृथिव्यां वा ॥२।२।३८॥ दिव् इत्येतस्य पृथिवी इत्येतस्मिन्नुत्तरपदे परे देवताद्वन्द्वे दिवस् इत्ययमादेशो भवति । दिवस्पृथिव्यौ । द्यावापृथिव्यौ । [6]सकारनिर्देशाद्रित्वं न भवति । दिवः पृथिव्यामिति पाठः । तत्र दिव.पृथिव्यौ ।

वर्चस्कादिष्ववस्कारादयः[7] ॥२।२।३९॥ वर्चस्कादिष्वर्थेष्ववस्कारादय.[8] शब्दा· सषान्तपूर्वपदाः साधवो वेदितव्या । आदिशब्दो प्रकारार्थो । अवस्कीर्यत इत्यवस्करः । वर्चस्कमङ्गमलम्, [9]तत्सम्बन्धाद्देशोऽपि अवस्करः । एवमपस्करो [10]रथाङ्गम् । कुस्तुम्बुरुरोषधिः[11] । जाति· । [12]अवरस्परा क्रियासातत्ये । आस्पर्द[13] प्रतिष्ठा । [14]आश्चर्यमद्भुतम् । प्रतिष्कशो वार्तापुरुषः, सहायः पुरोयायी, प्रतिगन्ता वा । प्रस्कण्वो[15] ऋषिः । हरिश्चन्द्रो[16] ऋषिः । मा क्रियते प्रतिषिध्यतेऽनेनेति [17]मस्करो वेणुर्दण्डो वा माकरणशीलः । मस्करी परिव्राजक· । स ह्येव साहमाकृषत कर्माणि शान्तिर्वः श्रेयसीति । [18]काश्मीर नगरम् । [19]अस्तुरं नगरम् । कारस्करो[20] वृक्ष.। पारस्करो देशः। करस्करो वृक्षो गिरिश्च। रथस्या नदी [21]। निष्कुरं प्रहरणम्। [22]किष्कुप्रमाणम्। किष्किन्धः पर्वत· । किष्किन्धा गुहा[23] । आस्कन्धं नगरम् । तस्करश्चौरः। बृहस्पतिर्देवता । वनस्पतिर्वृक्षो[24] वृक्षः । प्रायश्चित्तम् । प्रायश्चित्तिः । अतिभाशोधनम्[25] । शतात्पराणि अधिकानि परश्शतानि[26] । परशब्देन समानार्थः । परश्शब्दः सान्त इत्येके । राजदन्तादित्वात् पूर्वनिपातः ।

---

१. आदेराकारे क० म० । "आदैचोऽवादेरित्यादितद्धिताकारे" क० म० टि० । २. कारो गृह्य- क० म० । ३. -स्य तस्य प्रति- क० म० । ४. 'उषा स्याद्रजनीशेषे आप इत्यपि दृश्यते ।' इति रभसः । क० म० टि० । ५ -वाक्षमे । क० म० । ६ -कारस्याधिकारनिर्दे- क० म० । ७. -वस्करा- क० म० । ८. -वस्कराद्- क० म० । ९. -त्यन्धात्तद्देशो- क० म० । "देवासुरमनुष्येषु न तं पश्यामि पूरुषम् । जघनावस्करि स्त्रीणां यस्य नोपहतं मनः ॥" क० म० टि० । १०. रथाङ्गम्, क० म० । ११. -धविजातिः, क० म० । १२. अपस्प- क० म० । "कर्म क्रिया तत्सातत्ये गम्ये स्युरपरस्परा." इत्यमरः । अपरे च परे च अपरस्परे इति । अपरस्परा इति सर्वादिर्विकल्पः ।" क० म० टि० । १३. "प्रतिष्ठा कुत्स्यमास्पदम्" क० म० टि० । १४. "सकारे पश्चात् व्युत्क्रमः" क० म० टि० । १५. -स्कण्व ऋषिः, क० म० । १६. -श्चन्द्र ऋषिः, क० म० । १७. मस्करो क० म० । १८. कास्तीरं क० म० । १९. अजस्तुदं क० म० । २०. "काञ्जीरः" क० म० टि० । २१. रथस्का नदी । क० म० । २२. किष्कीप्रमा- क० म० । २३. किष्किन्धगु- क० म० । २४. -तिरुच्यो क० म० । २५. अतिचारशो- क० म० । २६. परश्शताधास्ते येषां परा सङ्ख्या शताधिका । क० म० टि० ।

सर्वादिः सर्वोऽसुपि पुमान् ॥२।२।४०॥ सर्वादि सर्वोऽसुपि पुमान् भवति पुंशब्दस्येव तस्य रूपं भवतीत्यर्थः, न चेत् ततः सुप्परो भवति । सर्वासा प्रिय. सर्वप्रिय· । भवत्याः पुत्रो भवत्पुत्रः । एकस्याः क्षीरम् एकक्षीरम् । एकस्या आगते एकरूप्यम् । एकमयम् । तया प्रकृत्या तथा । यथा । तस्या वेलायां तदा । तर्हि । सर्वमिच्छति सर्वकाम्यति । भवत्काम्यति । एककाम्यति । सर्विका भार्याऽस्य सर्वकभार्य. । विश्वकभार्यः । सर्वा प्रियाऽस्य सर्वप्रियः । सर्वमनोज्ञः । सर्वादिरिति किम् ? कन्यापुरम् । कुमारीनिवासः । सर्व इति प्रतिषेधविषयेऽपि यथा स्यादिति । असुपीति किम् ? सर्वस्यै दक्षिणपूर्वस्यै । अत एव इह उत्तरपद इति नास्ति ।

मानिस्त्र्येकार्थयोः स्त्र्यन्यतोऽनूः ॥२।२।४१॥ अन्यतो विशेष्यवशाद् य· शब्द. स्त्रीलिङ्गः, अनूः, उप्रत्ययान्तो न भवति स मानिन् इत्येतस्मिन् स्त्रीलिङ्गे चैकार्थे समानाधिकरण उत्तरपदे परे पुमान्[1] पुल्लिङ्गो भवति । पुंशब्दस्येव तस्य रूपं भवतीत्यर्थ । दर्शनीयमानी अयमस्या. । दर्शनीयमानिनी इयमस्याः । शोभना भार्याऽस्य शोभनभार्यः । प्रसूतभार्य. । प्रजातभार्यः । गर्भभार्य । पटुभार्य· । श्वेतभार्यः । युवजानि. । वर्तण्डवृन्दारिका । वातण्ड्यवृन्दारिका । अङ्ग्वो[2]वृन्दारिका [3]अङ्ग्यवृन्दारिका । गर्गवृन्दारिका । कपोतपाका वृन्दारिका कपोतपाकवृन्दारिका[4] । इडिविडा वृन्दारिका । ऐडविडा वृन्दारिका । पट्वीमृद्व्यौ भार्यौ यस्य पट्वीमृदुभार्य. । द्वन्द्वपदाना परस्परार्थं सङ्क्रमान्मृदुश्च[5]र्स्योत्तरेण सामानाधिकरण्यं पूर्वस्य तु व्यवधानान्न भवति । मानिन्स्त्र्येकार्थयोरिति किम् ? कल्याण्या· वस्त्रं कल्याणीवस्त्रम् । मानिन्ग्रहणमस्त्र्य[6]र्थसमासाधिकरणार्थं च । स्त्रीग्रहणं किम् ? कल्याणी प्रधानमेषा कल्याणीप्रधानाः । कल्याणीप्रमाणाः । एकार्थग्रहणं किम् ? कल्याण्या माता कल्याणीमाता । स्त्रीति किम् ? ग्रामणीकुलम् । ग्रामणी दृष्टिरस्य ग्रामणीदृष्टिः । अन्यत इति किम् ? [10]दृणीभार्य । द्रोणीभार्य· । अत्रार्थतः शब्दतश्चासन्नौ कच्छपद्रोणशब्दौ प्राप्नुतः । अनूरिति किम् ? ब्रह्मबन्धुमानी । ब्रह्मबन्धूभार्य । [11]ब्रह्मबन्धूदारिका ।

पिति तद्धिते ॥२।२।४२॥ अन्यतः स्त्र्यनू. पिति तद्धिते प्रत्यये परत· पुमान् भवति । पथ्य[12]— अजायै हितम् अजथ्यं यूथम् । अजथ्या यूथिका । अरट्[13]—दर्शनीयचरी । प्तस्—ब्रह्मीभ्यः बहुत. । त्रप्—ब्रह्मीषु बहुत्र । पाशप्—दर्शनीयपाशा । तमप्—दर्शनीयतमा । तरप्—दर्शनीयतरा । रूपप्—दर्शनीयरूपा । कल्पप्—दर्शनीयकल्पा । देश्यप्—दर्शनीयदेश्या । कुत्सितादौ कप्—दारदिका । अप्—कल्याणीपञ्चमा रात्रयः । [14]अपि समाप्तान्ते कृते पञ्चमीशब्दस्य पुम्भावे सति स्त्र्युत्तरपदं नास्ति इति पूर्वपदस्य पुम्भावाभाव· । पितीति किम् ? पट्वीरूप्यम् । पट्वीमयम् । पटुजातीया । पटुदेशीयेत्यरि[15]र्दृग्रहणाद्भवति । तद्धित इति किम् ? पटुषु[16](पट्वीषु) । ब्रह्मीषु । कुमारायतेः कुमारी । एनो एतायते । श्वेनी श्वेतायते इति क्यङिति पित्करणसामर्थ्याद्भवति । प्रिलुक्[17] गतगता पञ्चवर्गो दशवर्ग इति च ।

जातिश्च व्यञ्जिय ॥२।२।४३॥ अन्यतः स्त्र्यनूर्जातिश्चान्या च णावजादौ यकारादौ च तद्धिते विषयभूत उत्पत्स्यमाने तद्विवक्षायामेव पुमान् भवति । णौ—एनीमाचष्टे एतयति । श्वेतयति । पट्वीमाचष्टे पटयति । लघयति । अचि—गार्ग्यायण्याः अपत्यं गार्गो गार्गिको जाल्मः । हस्तिनीनां समूहो हास्तिकम् । अति-

---

१. भाषितपुंस्कः । "यस्मिन्भिन्नमुपादाय पुंसि लिङ्गे (शब्दः) प्रवर्तते । क्लीववृत्तौ तदेव स्यात् तद्धि भाषितपुंस्कम् ॥" क० म० टि० । २. "वाङ् इलक्ष्णं च रुचिरं प्रशस्तं हृद्यवल्गुरम् । दर्शनीयं मनोज्ञं च चित्तपर्यायहारि च ॥" इति धनञ्जयः । क० म० टि० । ३. 'जातापत्या प्रजाता च प्रसूता च प्रसूतिका ।' इत्यमरः क० म० टि० । ४. आङ्ग्यो वृ- क० म० । ५. अङ्ग्यवृ- क० म० । ६. पाक्यवृ- क० म० । ७. -का कौञ्जायन्यवृन्दारिका इडि- क० म० । ८. मृदुशब्दस्यो- क० म० । ९. -र्थसमा- क० म० । १०. 'दृणी कच्छपिकायां च अलाबोप्यामुदाहृता ।' इति विश्वः । क० म० टि० । ११ -न्यू-वृन्दारिका- क० म० । १२. -ति प्थ्य अ- क० म० । १३. प्यरट्- क० म० । १४. प्राप्तये- क० म० । १५. नाजादेरुत्तद्धितौऽरक्विकारेऽरिस्त्वार्थे इति- क० म० टि० । १६. सुपि विषयेऽपि तद्धितप्रत्ययो न भवति, क० म० टि० । १७. प्लुक्- क० म० ।

शयेन पट्वी पटिष्ठा । पटीयसी । यि–एत्या साधु एत्यः । इयेत्य· । शेन्या भाव इयैत्यम् । लौहित्यम् । जाति-ग्रहणं जातिप्रतिषेधनिवृत्त्यर्थम् । सति तस्मिंश्चकारोऽन्यार्थ· कर्तव्य । अकृते हि जातेरेव पुम्भावः स्यात् । व्यज्योति किम् ? कठीरूप्यम् । कठीमयम् । पट्वीरूप्यम् । पट्वीमयम् । सापत्न इति सपत्नशब्दस्य सपत्नी-शब्दस्य वा 'सपत्न्यादौ' इति निपातनान्नकारस्यानिवृत्ति । कौण्डिन्य इति कौण्डिन्यागस्त्ययोरिति निपात-नात् । व्यज्योति विषयसप्तम्याश्रयणं किम् ? पट्व्या· भावः पाटवम् । मार्दवम् । अत्र प्रत्ययोत्पत्तेः पूर्वमेव पुम्भावे 'लघ्वादेरिकः' इति अण् भवति । णिग्रहणमतद्धितार्थम् । तद्धित इति किम् ? एन्य· । एनीयति ।

ढेऽग्निः ॥२।२।४४॥ अन्यतः स्त्र्यनू. ढप्रत्ययेऽग्निरेव पुमान् भवति । अग्नायी देवताऽस्य आग्नेयः स्थालीपाक[1] । पूर्वेण सिद्धे नियमार्थं वचनम् । इह न भवति–इयेन्या अपत्यं श्यैनेयो रौहिणेय· ।

गुणस्त्वते ॥२।२।४५॥ अन्यतः स्त्र्यनूर्गुणवचन[2] शब्दस्त्वत इत्येतयोः परतः पुमान् भवति । पट्व्या· भाव पटुत्वम्, पटुता । श्येत्या भाव श्येतत्वं, श्येतता[3] । गुण इति किम् ? कठीत्वम, कठीता । त्वत इति किम् ? पट्वीरूप्यम् । पट्वीमयम् ।

बह्वल्पार्थैः शसि ॥२।२।४६॥ बह्वर्थोऽल्पार्थश्च शब्द शसि तद्धिते पुमान् भवति । बह्वीभ्यो देहि बहूनो देहि । अल्पाभ्या देहि अल्पशो देहि ।

मृगक्षीरादिषु ॥२।२।४७॥ मृगक्षीरादिषु समासेषु यत्पूर्वपद तदनेकार्थेऽस्त्र्यर्थे चोत्तरपदे पुमान् भवति । मृग्या. क्षीर मृगक्षीरम् । मृगपदम् । मृगशाव । कर्कट्या[4] अण्ड कर्कटाण्डम् । मयूराण्डम् । काका-ण्डम् । काकशाव. । मृगक्षीरादय प्रयोगतोऽनुसर्तव्याः । मृगक्षीरादिषु स्त्रीपूर्वपद विवक्षितत्वात् सिद्धम् । वाचनिके तु पुम्भाव एकान्तेन स्त्रीशब्दस्य निवर्तितत्वात्, यत्रापि विशिष्टलिङ्गशब्दसम्बन्धत्वेनार्थित्वं तत्रापि निवृत्ति प्राप्नोति । मृग्या इव न [5]मृगम्येत्येके ।

नाजारैच् तद्धितोऽरक्तविकारेऽरित्स्वार्थे ॥२।२।४८॥ अच स्थाने, आर, ऐच् च कृतो यस्मिन् तद्धिते तदन्तःशब्दोऽन्यत स्त्र्यनू अरिति अस्वार्थे च मानिस्त्र्येकार्थे उत्तरपदे परे न पुमान् भवति, न चेत् सोऽजारैच् तद्धितो रक्तविकारे चार्थे विहितो भवति । माधुरीमानी[6] । कार्तवीर्यीमानी[7] । वैदिशीमानी[8] । स्त्रौघ्नीमानी[9] । माधुरीभार्य । माधुरीपाशा । मधुरीयते । अजारैजिति किम् ? शोभनतरभार्य । अर्धप्रस्थ-भार्य· । [10]अर्धप्रस्थे भवा अर्धप्रस्थी । अजग्रहण किम् ? वैयाकरणभार्यः[11] । तावद्भार्य । आरैज्ग्रहणं किम् ?

---

१ चरुस्थालीं समुद्धृत्य हस्ताभ्यामनलाग्रत· । त्रिरावृत्य क्षणं धृत्वा तत्स्थाने स्थापयेत्पुनः । एवमग्निमुखं कुर्यात स्थालीपाकान्तमुत्तमम् । यद्वोपलिप्तभूमध्यस्थण्डिलेऽग्निपुरं लिखेत् । तत्राग्निकुण्डले चुल्ल्यां स्थाली सजलतण्डुलाम् । आरोप्य पक्वस्थाली ता चुल्लीं चान्यत्र विन्यसेत् ॥ क० म० टि० । २. चन्द्रमुख्याश्चन्द्रमुखत्वम् । एवम् "कामिनां मण्डनश्रीर्व्रजति च सफलत्वं वल्लभालोकनेन, सैन्या (न्य) स्त्रियामनुपभोगनिरर्थकत्व मिथ्यापवादमभृजं वननिम्नगानाम् । वर्मौ बहुच्छत्रतया पिनाकिनी व्याकोशकोकनदता दधतो नलिन्यः ॥ इयेष सा कर्तुमबन्ध्यरूपतां सा मुमोच इति हु स्वशीलताम् । वदङ्गनारूपसरूपतायाः निरीक्ष्य मेने शरद कृतार्थताम् ॥ वपुरन्वलिप्तपरिरम्भत्वसुखव्यवधानमीलुकतया न वधूः ।, भर्तुविप्रकृतापि रोषणतया मा स्म प्रतीपं गमः ।, शिष्यतां निधुवनोपदेशिनः शङ्करस्य रहसि प्रपन्नया । शिक्षितं युवतिनैपुणं तया यत्तदेव गुरुदक्षिणीकृतम् ॥ बद्धकोपविकृता अपि रामा शान्ततामतितरामुपनिन्ये । तुल्यतामधुमदो दधिनानामतिसुरभिरभाजिपुष्प ।, स्त्रियमतनु तत पुत्र सन्तान इति जातिसंज्ञायास्तु व्यावृत्तिः । कठीत्वं गार्गीत्वं रूपवतीत्वम् इति वर्द्धमानवृत्तौ । ३. स्यात्कुलीरः कर्कटक·, इत्यमरः । क० म० टि० । ४. मृगस्येतास्त्येके- क० म० । ५. आ क० म० टि० । ६. कार्तवीर्यमानी- क० म० । आर- क० म० टि० । ७. ऐच् । इकारस्यैकार.- क० म० टि० । ८. उकारस्यौकारः, क० म० टि० । ९. भवे इत्यण् परिमाणस्यानतोऽर्धाद्वादेरित्यारैज् विकल्पः- क० म० टि० । १०. अस्वे पदेऽजष्टैच् इति यति यकारस्यारैच्- क० म० टि० ।

धन्यभार्यः । तद्धित इति किम् ? कुम्भकारभार्यः । अरक्तविकार इति किम् ? काषायबृहतिका[1] । लोहेषुकः । कषायेण रक्ता काषायी । लोहस्य विकारः लोही । अरित्स्वार्थ इति किम् ? जातीयर्—माथुरजातीया । देशीयर्—माथुरदेशीया । इदमेवारिद्ग्रहणं ज्ञापकमिति पुम्भावो भवतीति [2]माथुरवृन्दारिका[2] ।

ङद्भुतद्धितकोपान्त्याख्याः ॥२।२।४९॥ ङत् पूरणप्रत्ययान्तम् । वास्तद्धितस्य च प्रत्ययस्य यः ककारस्तदुपान्त्यम्,ख्यासज्ञा च अरिति अस्वार्थे च मानिस्थ्येकार्थे पुमान् न भवति । पञ्चमीमानी । द्वितीयामानी । पञ्चमीभार्य । द्वितीयाभार्य । पञ्चमीपाशा । द्वितीयापाशा । पञ्चमीयते । षष्ठीयते । कारिकामानी । हारिकामानी । कारिकाभार्यः । हारिकाभार्य. । कारिकापाशा । हारिकापाशा । कारिकायते । हारिकायते । विलेपिकाया धर्म वैलेपिकम् । मद्रिकामानी । लाक्षिकीमानी । मद्रिकाभार्य. । लाक्षिकीबृहतिक. । मद्रिकापाशा । लाक्षिकीपाशा । मद्रिकायते । लाक्षिकीयते । आख्या—दत्तामानी । गुप्तामानी । दत्ताभार्य । गुप्ताभार्य । दत्तापाशा । गुप्तापाशा । वुनद्धितविशेषण किम् ? पाकभार्यः । मूकभाय । जल्पा कभार्य. । जागरूकभार्यः । अरित्स्वार्थ इति किम् ? पञ्चमजातीया । पञ्चमदेशीया । पञ्चमवृन्दारिका । द्वितीयवृन्दारिका । कारकजातीया । कारकदेशीया । कारकवृन्दारिका । हारकवृन्दारिका । मद्रकजातीया । मद्रकदेशीया । मद्रकवृन्दारिका । लाक्षिकवृन्दारिका । दत्तजातीया । दत्तदेशीया । दत्तवृन्दारिका । गुप्तवृन्दारिका ।

स्वाङ्गजातिश्चामानिनि ॥२।२।५०॥ स्वाङ्गान्ताद् य ईकारो विहितस्तदन्तं जातिवाचि चान्यत. स्त्र्यनू मानिन्वर्जितेऽरित्स्वार्थे पुमान्न भवति । दीर्घकेशीभार्य. । तनुगात्रीभार्य । दीर्घकेशीपाशा । तनुगात्रीपाशा । दीर्घकेशीयते । तनुगात्रीयते । जाति –कठीभार्य. । बह्वृचीभाय । शूद्राभार्य । क्षत्रियाभाय । कठीपाशा । बह्वृचीपाशा । शूद्रापाशा । क्षत्रियापाशा । कठीयते । बह्वृचीयत । "आकृतिग्रहणा[4] जातिर्लिङ्गा च यदानवन्ति[5] । अर्जन्मा नाशमर्थानां सामान्यमपरे विदु. ॥" अत्र यथापूर्व जातिलक्षण तथा—कुमारीभाय । किशोरीभाय. । यथा तूत्तर तथा–कुमारभार्य. । किशोरभाय । स्वाङ्गग्रहण किम् ? पटुभायः । ईद्ग्रहण किम् ? सकेशभार्यः । अकेशभार्यः । असमासोऽमन्देहार्थः । समासे हि ईदिति किम् ? जातेर्विशेषणमुत्स्वाङ्गस्य विशेष्यमाहास्वित् तृतीय पृथगेवेति सन्दिह्येत । अमानीति किम् ? दीर्घकेशमानी । कठमानिनी । अरित्स्वार्थ इति किम् ? दीर्घकेशजातीया । दीर्घकेशदेशीया[10] । दीर्घकेशवृन्दारिका । कठवृन्दारिका ।

प्रियादौ ॥२।२।५१॥ अन्यत स्त्र्यनू. प्रियादावस्वार्थ उत्तरपदे पुमान्न भवति । कल्याणीप्रिय । कल्याणीमनोज्ञ.[11] । कथ दृढभक्ति. ? दृढं भक्तिरस्येति नपुंसकमत्र पूर्वपदम् । अस्वार्थ इति किम् ? कल्याण[12]-प्रिया । कल्याणमनोज्ञा[13] । भक्ति, कल्याणी, सुभगा, दुर्भगा, सचिवा, स्वा, कान्ता, क्षान्ता, समा, चपला, दुहितृ, वामना इति प्रियादिः ।

रूपकल्पड्गोत्रमतहतचेलड्ग्रुवे ह्रस्वश्च धोगितः ॥२।२।५२॥ ङगितोऽन्यतः स्त्रिया रूप कल्प इत्येतयोर्डे तरप् तमपोश्च प्रत्यययो. गोत्र मत हत चेलट्(ड्) ध्रुव इत्येतेषु स्त्रीलिङ्गेष्वेकार्थेषु समानाधिकरणेषु परत पुम्भावो ह्रस्वश्चादेशो वा भवत । विद्वद्रूपा[14], विदुषीरूपा । विद्वत्कल्पा[15], विदुषीकल्पा ।

---

१. द्वौ प्रावारौत्तरासङ्गौ समौ बृहतिका तथा । इत्यमर.- क० म० टि० । २ माथुरी चासौ वृन्दारिकेति कर्मधारयत्वात्स्वार्थत्वम्– क० म० टि० । ३. -का वैदेशीवृन्दारिका- क० म० । ४ जल्पाकभार्यः- क० म० । ५. "आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्वभाक् । सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह"- क० म० टि० । ६. सदृशपरिणामस्तिर्यक्खण्डमुण्डादिषु गोत्ववत्- क० म० टि० । ७. अनुवृत्तप्रत्ययहेतुः- क० म० टि० । ८. आजन्म- क० म० । ९. ऊर्ध्वतासामान्या क० म० टि० । १०. -शीया । कठजातीया । कठदेशीया । दीर्घ क० म० । ११. नोज्ञः । कल्याणीभक्तिः । क– क० म० । १२. कल्याणी (चासौ) प्रिया(चेति) कल्याणप्रिया, अन्यथा कल्याणीप्रिय इति स्यात् क० म० टि० । १३ -नोज्ञा । प्रियमनोज्ञा । म- क० म० । १४ -व्रूपा । विदुषिरूपा । विदु- क० म० । १५. -ल्पा । विदुषिकल्पा । विदु- क० म० ।

विद्वत्तमा[1], विदुषीतमा। श्रेयस्तमा[2], श्रेयसीतमा। पचत्तमा[3], पचन्तीतमा। विद्वद्गोत्रा[4], विदुषिगोत्रा, विदुषीगोत्रा। विद्वन्मता, विदुषिमता, विदुषीमता। विद्वद्धता, विदुषिहता, विदुषीहता। विद्वच्चेली[5], विदुषिचेली, विदुषीचेली। विद्वद्ब्रुवा, विदुषिब्रुवा, विदुषीब्रुवा। रूपादिग्रहणं किम्? विद्वत्राशा। विद्वद्वृन्दारिका। ङरूपकल्पाः प्रत्यया: गोत्रादी[6]न्युत्तरपदानि तद्विभागार्थ एव ङस्य मध्ये क्षेप:। चेलडिति टकार इत् ङीप्रत्ययार्थः। ब्रुव इत्यस्मादेव निपातनात्। उगिदिति किम्? गौरीरूपा। प्राचीरूपा। धातुरुगिद्ग्रहणेन च गृह्यते। तथा च नृदुगिदञ्च इति अञ्चतिग्रहणम्। एकार्थ इति किम्? विदुष्या हता विदुषीहता। चकारः पुमानित्यस्यानुकर्षणार्थ।

ङथोऽनेकाचः ॥२।२।५३॥ अनेकाचो ङीप्रत्ययान्तस्यान्यत स्त्रिया रूपादिषु स्त्रीलिङ्गेष्वेकार्थेषु प्रत्ययोत्तरपदेषु परतः नित्यं ह्रस्वादेशो भवति। गौरिरूपा। गौरिकल्पा। नर्तकितरा। गौरितरा। गौरितमा। परस्वादनेन पुम्भावो बाध्यते। गौरिमात्रा[7]। गौरिमता। गौरिहता। गौरिचेली। गौरिब्रुवा। ङीड इति तकारादिङसंज्ञावितिः। इह न भवति। पटिष्ठा, पटीयसी। पटीशब्दस्यात्र जातिश्च व्यज्यीति पुम्भावः। ङय इति किम्? कारिकारूपा। हारिकारूपा। अनेकाच इति किम्? जङ्गितरा। राङ्गितरा[8]। अन्यत स्त्रिया इति किम्? आमलकितरा। एकार्थ इति किम्? गौर्या हता, गौरीहता। नित्याटो वेत्यस्याय पुरस्तादपकर्षः।

भोगवद्गौरिमतोर्नाम्नि ॥२।२।५४॥ भागवद्गौरिमतोर्नाम्नि सज्ञाया वर्तमानयोरङाप्रत्ययस्य रूपादिषु स्त्रीलिङ्गेष्वेकार्थेषु नित्य ह्रस्वादेशो भवति। [9]भोगवतिरूपा। भोगवतिकल्पा। गौरिमती(ति)तरा। गौरिमती(ति)तमा। नाम्नीति किम्? भोगवद्रूपा, भोगवतिरूपा, भोगवतीरूपा।

नित्याटो वा ॥२।२।५५॥ अनेकाचोऽन्यत स्त्रिया इति निवृत्तम्। सामान्येनैव विधानम्। नित्याट शब्दस्य रूपादिषु स्त्रीलिङ्गेष्वेकार्थेषु ह्रस्वादेशो वा भवति। अपवादविनिर्मुक्तोऽस्य विषय:। स्त्रिरूपा, स्त्रीरूपा। आमलकिकल्पा, आमलकीकल्पा। लक्ष्मितरा, लक्ष्मीतरा। तन्त्रितरा, तन्त्रीतरा। ब्रह्मबन्धुतरा, ब्रह्मबन्धूतरा। वामोरुतरा, वामोरूतरा। वामोरुगोत्रा, वामोरूगोत्रा। वामोरुमता, वामोरूमता। वामोरुहता, वामोरूहता। वामोरुचेली, वामोरूचेली। वामोरुब्रुवा, वामोरूब्रुवा। नित्याट इति किम्? कारिकारूपा। हारिकारूपा। नित्यग्रहण किम्? [10]श्रीरूपा। भ्रूरूपा। एकार्थ इति किम्? स्त्रिया हता स्त्रीहता।

मांस्पाकमांस्पचने ॥२।२।५६॥ [11]मास्पाक मास्पचन इति मासशब्दस्य पाक, पचन इत्येतयोरुत्तरपदयोर्लोपो लोपेरित्वाभावश्च निपात्यते। मासस्य पाकः मास्पाकः। मास्पचनम्। मासपाक। मासपचनम्।

दगर्थेऽन्यस्याषष्ठीतृतीयस्य ॥२।२।५७॥ अषष्ठ्यन्तस्यातृतीयान्तस्य चान्यशब्दस्यार्थशब्द उत्तरपदे नित्य दगागमो वा भवति। अन्यस्मै इदमन्यदर्थम्। अन्यार्थम्[12]। अन्यार्थ। अषष्ठीतृतीयस्येति किम्? अन्यस्यार्थ अन्यार्थ। अन्येनार्थ. अन्यार्थ.।

रागोत्सुकास्थितोत्थाशास्थाशिषि ॥२।२।५८॥ अषष्ठ्यन्तस्यातृतीयान्तस्य चान्यशब्दस्य राग उत्सुक आस्थित ऊति आशा आस्था आशिष इत्येतेषूत्तरपदेषु नित्य दगागमो भवति। अन्यो रागः अन्यद्रागः। अन्यदुत्सुक.। अन्यदास्थित.। अन्यदूति.। अन्यदाशा। अन्यदास्था। अन्यदाशीः। अषष्ठीतृतीयस्येति किम्? अन्यस्य राग अन्यरागः। अन्येनास्थितः अन्यास्थितः। यागविभागो नित्यार्थ।

---

१. -त्तमा। विदुषितमा। विदु- क० म०। २. -यस्तमा। श्रेयसितमा। श्रेय- क० म०। ३. -चत्तमा। पचन्तितमा। पच- क० म०। ४. गोत्रसमूहे मता गोत्रा क० म० टि०। ५. चेलो नीचेऽन्यवद्वैलं वसने गर्हितेऽन्यवत् क० म० टि०। ६. -दीत्युत्त- क० म०। ७. गौरिगोत्रा क० म०। ८. -ङ्गेतरा क० म०। ९. नदीनगर्योर्नागानां भोगवत्यथ सञ्ज्ञरे इत्यमर क० म० टि०। १०. जेषुजोक्षिया इति विकल्पितात्। क० म० टि०। ११. मांस्पाकं स्याम्मांस्पचनम्- इत्यभिधानचिन्तामणिः क० म० टि०। १२. -न्यार्थम्। अन्योऽर्थोऽस्य(इति) अन्यदर्थः। अन्या- क० म०।

छकारके ॥२।२।५९॥ अन्यशब्दस्य छप्रत्यये कारकशब्दे चोत्तरपदे दमागमो भवति । अन्यस्मै हितं अन्यदीयम् । तस्मै हित इति छः । अन्यस्येदमन्यदीयम् । गहादिपाठाच्छ. । अन्यस्य कारकमन्यत्कारकम् । योगविभागादषष्ठीतृतीयस्येति निवृत्तम् ।

नञोऽश् ॥२।२।६०॥ नञ उत्तरपदेऽशादेशो भवति । अहिंसा । अस्तेयम् । अमशकं वर्तते । अमक्षिकं वर्तते । अमशको देशः । अमक्षिको देशः । अकारो निपातस्य विस्पष्टप्रतिपत्त्यर्थः । शकारः सर्वादेशार्थः ।

तिङि क्षेपे ॥२।२।६१॥ तिङन्ते परत नञोऽशादेशो भवति क्षेपे निन्दाया विषये । अपचसि त्वं जाल्म । अकरोषि त्वं जाल्म । तिङीति किम् ? न पाचको जाल्मः । क्षेप इति किम् ? न पचति देवदत्तः । अनुत्तरपदार्थं वचनम् ।

एकादन्नादनौ ॥२।२।६२॥ एकशब्दादुत्तरस्य नञ उत्तरपदे अन्न अद्न इत्येतावादेशौ भवतः । एकेनोना विंशतिः एकान्नविंशतिः । एकादनविंशति । एकान्नत्रिंशत् । एकादनत्रिंशत् ।

वागोऽप्राणिनि ॥२।२।६३॥ अप्राणिनि अग इति वा निपात्यते । न गच्छन्तीत्यगाः पर्वताः । नगाः पर्वताः । अगा वृक्षाः । नगा वृक्षाः । अप्राणिनीति किम् ? [1]अगो वृषलः शीतेन । पूर्वेणादेशो नित्य. प्राप्तोऽनेन विकल्प्यते ।

अशोऽचि नट् ॥२।२।६४॥ नञोऽशादेशादजादावुत्तरपदे परे तस्योत्तरपदस्य नडागमो भवति । अनज । अनश्व । अश इति किम् ? नञ एव हि स्यात्तत्र द्वौ नकारौ श्रूयेयाताम् । अचीति किम् ? अहिंसा । टकार आदिविध्यर्थः । स [2]चादिरुत्तरपदस्य । अजादौ हि अशेव प्रतिषिध्येत । नभ्राट्नपान्नवेदानामत्या-नमुचिनकुलो[3] नपुसक नक्षत्रं नक्तो नागो नाग इति रूढिशब्दा. पृषोदरादिषु द्रष्टव्या· ।

विष्वग्देवसर्वादेर्डद्रिगञ्चि कौ ॥२।२।६५॥ विष्वक् देव इत्येतयो. सर्वादेश्चाञ्चतौ क्विप्रत्ययान्त उत्तरपदे डद्रिक् (ग्) इत्ययमागमो भवति । विष्वञ्चमञ्चति विष्वगञ्चति वा विष्वद्रयङ् । विष्वद्रयञ्चौ । विष्वद्रयञ्चः । विष्वद्रीचः । विष्वद्रीचा । विष्वद्रीचि । देवद्रयङ् । देवद्रयञ्चौ । देवद्रयञ्चः । देवद्रीचः । देवद्रीचा । देवद्रीचि । सर्वद्रयङ् । सर्वद्रयञ्चौ । सर्वद्रयञ्चः । सर्वद्रीच । सर्वद्रीचा । सर्वद्रीचि । तद्रयङ् । तद्रयञ्चौ । तद्रयञ्च । तद्रीच. । तद्रीचा । तद्रीचि[4] । कद्रयङ् । कद्रयञ्चौ । कद्रयञ्चः । कद्रीचः । कद्रीचा । कद्रीचि । विष्वगादेरिति किम् ? अश्वाचि । डद्रिगिति डकारो[5] देशविध्यर्थ. । अञ्चीति किम् ? विष्वग्युक् । क्वाविति किम् ? विष्वगञ्चनम् । धातुग्रहणे तदादिग्रहणं भवति ।

समसहस्य समिसध्रि ॥२।२।६६॥ सम् सह इत्येतयोरञ्चतौ क्विप्रत्ययान्त उत्तरपदे यथासख्यं समि सध्रि इत्येतावादेशौ भवतः । समञ्चतीति सम्यङ् । सम्यञ्चौ । सम्यञ्चः । समीच. । समीचा । समीचि । समीचीनः । सहाञ्चतीति सध्र्यङ् । सध्र्यञ्चौ । सध्र्यञ्चः । सध्राचः । सध्रीचा । सध्रीचि । सध्राचीनः । समसहस्येति किम् ? प्राङ् । प्राञ्चौ । [6]अञ्चतीति किम् ? [7]सयुक् । सहयुक् । क्वाविति किम् ? समञ्चनम् । सहाञ्चनम् ।

तिरसस्तिर्यं ॥२।२।६७॥ तिरस् इत्येतस्याञ्चतौ क्विप्रत्ययान्त[8] उत्तरपदे तिरि इत्ययमादेशो भवति । तिर. तिरस्को वा अञ्चति[9] तिर्यङ् । तिर्यञ्चौ । [10]तिर्यञ्च. । तिर्यग्भ्याम् । तिर्यग्भिः । ए इति किम् ? तिरश्चः । तिरश्चा । तिरश्चीति तिरश्चीनम् ।

---

१. न गच्छतीति- क० म० टि० । २. -दि उत्त- क० म० । ३. -लो नखो नपुं- क० म० । ४. तद्रीचि । अतद्रयक्, अतद्रयञ्चौ, अतद्रयञ्चः । अतद्रीचा । अतद्रीचि । कद्रयक्- क० म० । ५. -कारोऽन्त्याजादिलुगर्थः । डकारो दे- क० म० । ६. अञ्चीति किम् क० म० । ७. संयुक्- क० म० । ८. -न्ते एकार उत्तर- क० म० । ९. -ञ्चतीति- क० म० । १०. -ञ्चौ तिर्यग्भ्याम् । क० म० ।

लुग्ण्यप्यवश्यमः ॥२।२।६८॥ अवश्यमित्येतस्य ण्यबन्त उत्तरपदे लुग्भवति । [1]अवश्यभाव्या । अवश्यपाठ्यम् । अवश्यकर्तव्यम् । अवश्यहर्तव्यम् ।

तुमो मनस्कामे ॥२।२।६९॥ तुमन्तस्य मनस्काम इत्येतयोरुत्तरपदयोर्लुग्भवति । भोक्तुमनाः । भोक्तुकामः ।

समः ॥२।२।७०॥ सम् इत्येतस्य मनस्काम इत्येतयोरुत्तरपदयोर्लुग्भवति । समना. । सकाम. । इदं सहशब्देनापि सिद्धम् । एतत्समः प्रयोगनिवृत्त्यर्थं वचनम् । सम्मनीषेत्यादौ भावप्रत्यये वृद्धादौ तथा पाठादलेङ् योगविभाग उत्तरार्थः ।

हिततते वा ॥२।२।७१॥ सम् इत्येतस्य हित तत इत्येतयोरुत्तरपदयोर्लुग्भवति वा । संहितम् । संहितम् । सततम् । सन्ततम् । सातत्यमिति टधणिति नित्यमेव लुक् । व्यवस्थितविभाषेति [2]ज्ञानादनभिधानाद्वा न सतनात् टधण् ।

कृदन्ते वा मम् रात्रेः ॥२।२।७२॥ रात्रिशब्दस्य कृदन्त उत्तरपदे ममागमो भवति वा । रात्रिचरः रात्रिचर. । रात्रिमटः । रात्र्यटः । रात्रिकरणम् । रात्रिकरणम् । कृदन्त इति किम् ? रात्र्यं खरम् । रात्रिमन्य-[3]मरित्यत्र परत्वान्नित्यमेव मम् । अन्तग्रहणं किम् ? रात्रिश्चिवाचरति रात्रयिता । इदमेवान्तग्रहणं ज्ञापकमिह उत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययस्यैव ग्रहण न तदन्तस्येति ततङ् [4]तनङोन्यादौ प्रत्ययमात्रस्यैव ग्रहण खिती च इत्यादौ तु असम्भवात् तदन्तग्रहणम् । केचित् तीर्थकरः तीर्थकर. इत्यपीच्छन्ति तदर्थं कृदन्त वा मर्मिति योगविभाग. कर्तव्य ।

सत्यागदास्तोः कारे ॥२।२।७३॥ सत्य अगद अस्तु इत्येतेषा [5]कारशब्द उत्तरपदे नित्य ममागमो भवति । सत्यं करोति सत्यस्य कार इति वा [6]सत्यंकार. । एवमगदंकार. । अस्तुकार. । अस्त्विति निपातोऽभ्युपगम्यते ।

आष्ट्राग्न्योरिन्धे ॥२।२।७४॥ आष्ट्राग्निशब्दयोरिन्धशब्द उत्तरपदे ममागमो भवति । आष्ट्रमिन्धः । अग्निमिन्धः ।

भद्रोष्णयोः करणे ॥२।२।७५॥ भद्र उष्ण इत्येतयो. करणशब्द उत्तरपदे ममागमो भवति । भद्रं-करणम् । उष्णंकरणम् ।

लोकपृणमध्यन्दिनानभ्याशमित्यधेनुभव्याः ॥२।२।७६॥ लोकपृणादय कृतममागमा निपा-त्यन्ते । लोक पृणतीति लोकपृण । मध्य दिनस्य मध्यन्दिनम् । अनभ्याशमित्यस्यैत्यनभ्याशमित्य , दूरात्प-रिहर्तव्यमित्यर्थ । धेनुर्भव्या धेनुभव्या ।

गिलगिलगिलयोरचोऽगिलस्य ॥२।२।७७॥ अजन्तस्य गिलशब्दान्तवर्जितस्य गिल गिलगिल इत्येतयोरुत्तरपदयोर्ममागमा भवति । तिमिं गिलतीति तिमिङ्गिलः । तिमेर्गिलगिलः तिमिङ्गिलगिल. । गिलगिले गिलशब्दो नोत्तरपदमिति गिलगिलोपादानम् । अच इति किम् ? तद्गिल । अगिलस्येति किम् ? तिमिङ्गिलं गिलतीति तिमिङ्गिलगिल । गिलं गिलतीति गिलगिलः इत्यत्र गिलगिलेत्यतो निपातनादेव मम् न भवतीति अगिलस्येति गिलान्तस्य प्रतिषेध ।

खित्यरुद्विषतश्चानव्ययस्य ॥२।२।७८॥ अनव्ययस्याजन्तस्य अरुष द्विषत् इत्येतयोश्च खिदन्त उत्तरपदे ममागमो भवति । क्षेमंकर । मेधकरः । पण्डितंमन्यः । सुभगमन्यः । आढ्यंभविष्णु । सुभगंभविष्णुः ।

---

१. ओरावश्यके इति ण्यण् । क० म० टि० । २. -माषाविज्ञा- क० म० । अपवादविषयं परित्यज्य अन्यत्र वर्तमाना व्यवस्थितविभाषा । ३. -मरिरि- क० म० । ४. ततङ्तन- क० म० । ५. कार- क० म० । ६. "अस्तुङ्कारोऽभ्युपगमे, सत्यङ्कारः पणार्पणे ।" इति धनञ्जयः । क० म० टि० ।

आढ्यंकरणम् । सुभगंकरणम् । मितङ्गमः । विहङ्गम । अरुन्तुदः । द्विषन्तपः । खितीति किम् ? पण्डितमानी । सुभगमानी । अरुद्विषतश्चेति किम् ? विद्वन्मन्यः । विपश्चिन्मन्यः । अनव्ययस्येति किम् ? दोषामन्यमहः । दिवामन्या रात्रिः । एतदेवानव्ययग्रहणं ज्ञापकमिह खिदन्तग्रहणस्य ।

ह्रस्व. ॥२।२।७६॥ अनव्ययस्याजन्तस्य खिदन्त उत्तरपदे ह्रस्वादेशो भवति । कर्ममन्या । खट्वंमन्या[1] । हरिणिमन्या । परत्वात् पुम्भावो ह्रस्वेन बाध्यते मम् तु ह्रस्वे कृते भवति । अनव्ययस्येति किम् ? दोषामन्यमहः । दिवामन्या[2] रात्रिः । अच इति किम् ? विद्वन्मन्य । विपश्चिन्मन्य । चोर[3]कार स्यात् (?)

मालेषिकेष्टकस्यान्तस्य च भारितूलचिते ॥२।२।८०॥ माला इषीका इष्टका इत्येतेषां केवलानां पूर्वपदानां च यथासंख्यं भारि तूल चित इत्येतेषूत्तरपदेषु ह्रस्वादेशो भवति । मालभारि । मालभारिणी । उत्पलमालभारिणी कन्या । बलाकामालभारिणाम् । इषीकतूलम् । मुञ्जे[4]षीकतूलम् । [5]इष्टकचितम् । पक्वेष्टकचितम् । इदमेवान्तग्रहणं ज्ञापकं ग्रहणवता प्रातिपदिकेन तदन्तविधिरिति तेन दिग्घपादोपहतः । सौत्रनाडिरित्यादौ पदादेशादि न भवति ।

भ्रुवोऽच्च कुटिकुंसे ॥२।२।८१॥ भ्रू इत्येतस्य कुटि कुंस इत्येतयोरुत्तरपदयोर्ह्रस्व अदित्यय चादेशो भवति । भ्रुकुटि. । भ्रुकुंसः । भ्रकुटिः । भ्रकुंस ।

वेकोऽनीशूड्डीयुव्यञः ॥२।२।८२॥ अनव्ययस्येक उत्तरपदे ह्रस्वादेशो वा भवति स चेत् इक् ईशादेशो ङीप्रत्यय इयुवो स्थानी यञश्चादेशो न भवति । लक्ष्मिपुत्र, लक्ष्मीपुत्रः । ग्रामणिपुत्र., ग्रामणीपुत्र । ब्रह्मबन्धुपुत्र , ब्रह्मबन्धूपुत्र । खलपुपुत्र , खलपूपुत्र । इक इति किम् ? खट्वापाद । गोकुलम् । अनीशूड्डीयुव्यञ इति किम् ? ईश—कौमुदगन्धीबन्धुः । ङी—गार्गीपुत्रः । वात्मीपुत्र । इयुव—श्रीकुलम् । भ्रूकुलम् । यवक्रीकुलम् । कटप्रूकुलम् । [6]यञ्—इन्द्रहूपुत्रः[7] । शकटहूपुत्र । अनव्ययस्येति किम् ? काण्डीभूतम् । वृषलीभूतम् । ऊरीकृत्य । उररीकृत्य ।

ङ्याडो बहुलं नाम्नि ॥२।२।८३॥ इयन्तस्याडन्तस्य चोत्तरपदे बहुलं ह्रस्वो भवति नाम्नि संज्ञाया विषये । रेवतिमित्र. । [8]भरणिगुप्त । महित्रात । महिदत्तः । महिगुप्तः । शिलरहम् । शिलप्रस्थम् । क्वचिन्न भवति—फल्गुनीमित्र । नान्दीमुखम् । नान्दीतूर्यम् । नान्दीकरः । नान्दीघोष । महिषीफलम् । महिषीकरः । महीविशाल । लोमकागृहम् । लोमकाषण्ड[9] । गङ्गाद्वारम् । क्वचिद्विकल्पः । पृथिविदत्त , पृथिवीदत्तः । पृथिवीगुप्त, पृथिविगुप्तः । गङ्गमह , गङ्गामह । गङ्गदेवी, गङ्गादेवी । शिंशि[10]पस्थलम्, शिंशिपा[10]स्थलम् । ङ्याड इति किम् ? श्रीपुरम् । नाम्नीति किम् ? नदीस्रोत । खट्वापाद ।

स्त्वे ॥२।२।८४॥ ङ्याडोस्त्वप्रत्यये बहुलं ह्रस्वो भवति । रोहिण्या भाव रोहिणित्व रोहिणीत्वं वा । अजाया भावः अजत्वम्, अजात्वम् वा । ङ्याड इति किम् ? ग्रामणीत्वं सामह्रत्त्वम् ।

शुनो दीर्घः ॥२।२।८५॥ श्वन् इत्येतस्योत्तरपदे परे बहुलं दीर्घो भवति[11] । श्वादंष्ट्रा । श्वाकर्णः । श्वाकूर्दम्[12] । श्वावरोहम् । क्वचिन्न भवति—श्वफलः[13] । श्वमुखम् । क्वचिद्विकल्पः । श्वपदम्, श्वापदम् । श्वपुच्छम्, श्वापुच्छम् ।

वले ॥२।२।८६॥ वलप्रत्यये पूर्व[14]पदस्याद्यो बहुलं दीर्घो भवति । कृषीवलः । आमुनीतीवलः ।

---

१. -न्या- कालिमन्या हरि- क० म० । २. 'पूर्णेम्बुस्तु दिवामन्या'- इति विवृध० । क० म० टि० । ३. चोकारः क० म० । ४. मुञ्जेतिचीति वा पाठः । ५. उत्पलादौ- "इक्षोपलैरुपहिता स्वर्णेष्टकचिताश्च ताः । कायास्तिस्रश्च परीवाहयुक्ता वा निर्मलोदकाः" इति । क० म० टि० । ६ सम्प्रसारणम्– क० म० टि० । ७. इन्द्रं ह्वयतीति क० म० टि० । ८. मित्र इति रोहिणिमित्रः म- क० म० टि० । ९. -ण्डः । लेपिकागृहम् । लेपिकाषण्डः । गङ्गा- क० म० । १०. शिंशप क० म० । ११. -वति श्वादन्तः श्वादं- क० म० । १२. -कूर्दः श्वावराहम् । क० म० । १३. श्वफल्कः श्वसुखः क० म० । १४. पूर्वस्याद्यो क० म० ।

दन्तावलः । [1]पुत्रबलः । उत्सङ्गबलः । क्वचिन्न भवति । पितृबलः । मातृबलः । भ्रातृबलः । उत्साहबलः । प्रातिपदिके च न भवति । कायबलम् । नागबलः ।

आदिजन्ते ॥२।२।८७॥ इज्युढे इति य इच् तदन्त उत्तरपदे पूर्वपदस्याचो बहुलमाकारो दीर्घ आदेशो भवति । कवाकवि । केशाकेशि । दण्डादण्डि । मुसलामुसलि । यष्टायष्टि । क्वचिन्न भवति—अस्यसि । उत्तरपदाधिकारे प्रत्ययग्रहणे प्रत्ययस्यैव ग्रहणमित्यन्तग्रहणम् ।

अव्युपसर्गस्य च ॥२।२।८८॥ उपसर्गस्याजन्तस्य घञन्त उत्तरपदे परे बहुलं दीर्घो भवति । नीकलेदः । नीमेष[3] । नीमार्गः । क्वचिन्न भवति—[4]प्रवेशः । प्रहारः । निपातः । विषादः । क्वचिद्विकल्पः—प्रतिवेशः, प्रतीवेशः[5] । प्रतिहारः, प्रतीहारः । प्रतिबोधः, प्रतीबोधः । परिणामः, परीणामः । क्वचिद्विषयभेदेन-प्रासादो गृहम्, प्रसादोऽन्यः । प्राकारो वरणः, प्रकारोऽन्यः । अपामार्ग ओषधिः अपमार्गोऽन्यः । नीहारः स्तुषारः, निहारोऽन्यः । परीरोधः मृगावरोधः । परिरोधोऽन्यः । परीहारो देशानुग्रहः । परिहारोऽन्यः । वीतसः पक्षिबन्धनम् । वितसोऽन्यः । घञीति किम् ? अवसायः । अवहारः । णप्रत्ययोऽयम् । उपसर्गस्येति किम् ? बन्धनसारः[6] । खदिरसारः । मार्गमतिक्रान्तः अतिमार्गः । चकारो बहुलानुकर्षणार्थः । बहुलवचनात् क्वचिद्घञि अनुपसर्गस्यापि दीर्घः । दक्षिणापथः[7] । उत्तरापथः । अन्धतमसम्[8] । क्वचिद्विषयभेदेन । अधीदन्तः । अधीकर्णः । अधीकण्ठः । अधीपादः । एते आधिक्ये । अन्यत्र अधिदन्त इत्येव भवति । क्वचिदनुत्तरपदेऽपि विकल्पः । पुरुषः पूरुषः[9] । सदनं सादनम् । नरकं नारकम् । अतिशयनम् । अतिशायनम् । काशशब्दे च घञि विकल्पः निकाशो नीकाशः[10] । अजन्त उत्तरो विधिः ।

काशृतीकः ॥२।२।८९॥ इगन्तस्योपसर्गस्य काशशब्दे क्ति द्वितकारादौ चोत्तरपदे परतो नित्यं दीर्घो भवति । नीकाशत इति नीकाशः । वीकाशः । प्रतीकाशः । अनूकाशः । वीक्तम् । वीत्तम् । पचीत्तम्[11] । परीत्तवान् । परीत्तमः । प्रणीत्तमम् । काशक्तीति किम् ? सुदत्तम् । द्वितकारनिर्देशः किम् ? वितितम् । इक इति किम् ? प्रकाशः । प्रक्तः । प्रक्तवान् ।

नहिवृतिवृषिव्यधिसहितनिरुचि क्वौ तिकारकस्य ॥२।२।९०॥ अच इति वर्तते । नहिवृतिवृषिव्यधिसहितनिरुचिषु धातुषु क्विबन्तेषूत्तरपदेषु अ(ष्व)न्तरयं पूर्वपदस्य ते कारकस्य च दीर्घो भवति । नहि–उपानत् । परीणत् । वृति–उपावृत् । नीवृत् । वृषि–आवृट् । व्यधि–श्वावित् । मर्मावित् । हृदयावित् । सहि–श्लाघट् । तुरासट् । तनि–परीतत् । [12]रुचि–वीरुक् । अतीरुक् । [13]रुजतीति पाठः तत्र रुचिरुज्योर्विकल्पो भवति । तेन नीरुक् । अतीरुक् । अभीरुक् । इत्यपि भवति । क्वाविति किम् ? प्रणद(द्ध)म् । परिणद्धम् । अतः क्विग्रहणादन्यत्र धातुग्रहणे [14]तदादिविधिर्विज्ञायते । तेन अयस्कृतम्, अयस्कार इत्यत्र सिः सिद्धो भवति । अन्यथा हि अयस्कृत इत्यत्रैव स्यात् । तिकारकस्येति किम् ? पटुरुक् । तिग्मरुक् । तीव्ररुक् ।

चितेः कपि ॥२।२।९१॥ चितिशब्दस्य कपि परतः दीर्घो भवति । एकचितीक । द्विचितीकः । त्रिचितीकः ।

स्वचिह्नस्याविष्टाष्टपञ्चभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य कर्णे ॥२।२।९२॥ इदमस्य स्वमीप्सितव्यमिति येन चिह्नयते लक्ष्यते तत्स्वचिह्नं तद्वाचिनोऽजन्तस्य विष्ट अष्ट पञ्च भिन्न च्छिन्न च्छिद्र स्रुव

---

१. पुत्रबलः क० म० । २. पदे बहुलं क० म० । ३. नीमेदः । नी- क० म० । ४. निषादः क० म० । ५. 'नेपथ्ये गृहमात्रे च वेशो वेश्यागृहेऽपि च' इति रभसकोशः । क० म० टि० । ६. चन्दनसारः क० म० । ७. विन्ध्यात्तु दक्षिणो देशो दक्षिणापथसंज्ञितः । विन्ध्यात्तूत्तरो देश उत्तरापथसंज्ञितः ॥ इत्यभिधानम् । क० म० टि० । ८. -सम् । अन्धातमसम् क० म० । ९. पुरुषः(पूरुष) क० म० । १०. नीकाशा क० म० । ११. परीत्तम् क० म० । १२. नीरुक् क० म० । १३. रुजतीति वा पाठः क० म० । १४. तदादिर्विधि-क० म० ।

स्वस्तिक इत्येतद्वर्जितस्य कर्णशब्द उत्तरपदे दीर्घो भवति । दात्रमिव दात्रं, चिह्नं कर्णयोर्यस्य दात्रमिव वा कर्णौ यस्य(सः) दात्राकर्णः पशुः । एवं शष्कूकर्णः । द्विगुणाकर्णः । द्व्यङ्गुलाकर्णः । स्वचिह्नस्येति किम् ? शोभनकर्णः । स्वग्रहणं किम् ? लम्बकर्णः । अचिह्नकर्णो दृष्टः । चिह्नग्रहणं किम् ? वाहनस्य कर्णः वाहनकर्णः । अचिह्नादेरिति किम् ? चिह्नकर्णः । अङ्कर्णः । पञ्चकर्णः । भिन्नकर्णः । छिन्नकर्णः । छिद्रकर्णः । स्रुवकर्णः । स्वस्तिककर्णः । कर्ण इति किम् ? वक्रसक्थः[1] ।

हविर्युक्तेऽष्टनः कपालगवे ॥२।२।९३॥ अष्टन्शब्दस्य कपाल गव इत्येतयोरुत्तरपदयोः यथासंख्यं हविषि युक्ते चाभिधेये दीर्घो भवति । अष्टसु[2] कपालेषु संस्कृतमष्टाकपालं हविः । अष्टाभिर्गोभिर्युक्तमष्टागवं शकटम् । बहुव्रीहिद्विगुर्वाश्च समासः । तत्र द्विपदे बहुव्रीहावत एव[3] निपातनात् समासान्तः । त्रिपदे दीर्घेण युक्तोऽर्थोऽन्तभाक्[4] दीत इति युक्तशब्दो निवर्तते । द्विगौ तु–अभेदोपचाराद् युक्ताभिधानम् । हविर्युक्त इति किम् ? अष्टानां कपालानां समाहारः अष्टकपालम् । अष्टगुः । अष्टगवं वाऽन्यत् । कपालगव इति किम् ? अष्टपात्रं हविः । अष्टतुरगो रथः । कपालगव इत्युत्तरपदं गवेति कृतसमासान्तोपादानात्ततोऽहविर्युक्त इत्यर्थनिर्देशो भवति ।

नाम्नि ॥२।२।९४॥ अष्टन्शब्दस्योत्तरपदे दीर्घो भवति नाम्नि संज्ञायाम् । अष्टापदः कैलासः । अष्टावक्र. । अष्टाविटपो नाम कश्चित् ।

कोटराञ्जनादीनां वनगिरौ ॥२।२।९५॥ कोटरादीनामञ्जनादीनां च यथासङ्ख्यं वनशब्दे गिरिशब्दे चोत्तरपदे दीर्घो भवति नाम्नि संज्ञायाम् । कोटरावणम् । मिश्रकावणम् । सिप्रुकावणम् । पुरुगावणम्[5] । शारिकावणम् । अञ्जनागिरिः[6] । किंशुलकागिरि[7] । सल्वागिरिः । लोहितागिरिः । कुक्कुटागिरिः । कोटराञ्जनादीनामिति किम् ? असिपत्रवनम् । नन्दनवनम् । भद्रशालवनम् । कृष्णगिरिः । श्वेतगिरिः । नाम्नीति किम् ? कोटराणां वन कोटरवनम् । अञ्जनस्य गिरिः अञ्जनगिरिः । कोटर, मिश्रक, सिप्रुक, पुरुग[8], शारिक इति कोटरादि. । अञ्जन, खाञ्जन, किंशुलुक, सल्व, लोहित, कुक्कुट इति अञ्जनादिः । आकृतिगणोऽयम् । तेन नलागिरिरिति सिद्धम् ।

बह्वचश्शरादीनां मत्वन्तेऽजिरादेः ॥२।२।९६॥ बह्वचः शरादीनां च मतुबन्तेऽये परे दीर्घो भवति नाम्नि संज्ञायां विषये अजिरादीन् वर्जयित्वा । उदुम्बरावती । मशकावती । वीरणावती[9] । पुष्करावती । शरादेः–शरावती । अहीवती । बह्वचश्शरादीनामिति किम् ? व्रीहिमती[10] । इक्षुमती । मधुमती । अनजिरादेरिति किम् ? अजिरवती । खदिरवती । नाम्नीति किम् ? बलवती कन्या । शववती कन्या । शरवती तूणा । शर, अहि, कपि, मणि, मुनि, क्षुधि, वार्क्ष, वेट इति शरादिः । आकृतिगणोऽयम् । तेन आतावती । शोभावतीत्यादि सिद्धम् । अजिर, खदिर, स्थविर, खदुर, पुलिन, कारण्डव, चक्रवाक इत्यजिरादिः ।

वहेऽपील्वादिकः ॥२।२।९७॥ वहशब्द उत्तरपदेऽपील्वादेरिको दीर्घो भवति नाम्नि संज्ञायाम् । ऋषीवहम् । मुनीवहम् । कपीवहम् । एवं नामानि नगराणि । पीलवादिप्रतिषेधः किम् ? पीलुवहम् । चारुवहम् । इक इति किम् ? पिण्डवहम् ।

विश्वस्य नरे ॥२।२।९८॥ विश्वशब्दस्य नरशब्द उत्तरपदे नाम्नि दीर्घो भवति । विश्वानरो नाम कश्चित् । नर इति किम् ? विश्वसेनः । नाम्नीति किम् ? विश्वनरो राजा ।

---

१. वक्रशक्थः- क० म० । २. अष्टासु- क० म० । ३. एव गवेति निपा- क० म० । ४. अन्तर्भावित इति- क० म० । ५. -रिः खाञ्जनागिरिः- क० म० । ६. पुरग- क० म० । ७. वीरणावती- क० म० । ८. व्रीहिमती- क० म० । ९. बलवती- क० म० ।

ऋचौ मित्रे ॥२।२।९९॥ विश्वशब्दस्य मित्रशब्द उत्तरपदे नाम्नि दीर्घो भवति ऋचावभिधेये। विश्वामित्रो नाम ऋषिः। ऋचाविति किम्? विश्वमित्रो माणवकः। नाम्नीति किम्? विश्वमित्रो मुनिः। ऋचावरादेशो ह्रस्वो वा भवति इति मित्र इत्येवोत्तरपदं विज्ञायते।

वसुराटोः ॥२।२।१००॥ विश्वशब्दस्य वसु राट् इत्येतयोरुत्तरपदयोः दीर्घो भवति। विश्वावसुः। विश्वाराट्। विकृतिनिर्देशादिह न भवति। विश्वराजौ। विश्वराजः। योगविभागान्नाम्नीति निवृत्तम्।

एकादश षोडश षोडन् षोढा षड्ढा ॥२।२।१०१॥ एकादशादयः शब्दा. दशादिषूत्तरपदेषु कृतदीर्घत्वादयो निपात्यन्ते। एकोत्तरा दश, एकश्च दश(च)वा एकादश। अत्रैकशब्दस्योत्तरपदे दीर्घः। षडुत्तरा दश, षट् च दश च वा षोडश। अत्र षष उत्वं दकारस्य च डकारः। षट् दन्ता अस्य षोडन्। अत्र दन्तशब्दस्य दन्नादेशे कृते षोडन्निति प्रातिपदिकान्तरमन्यदेव निपात्यते। नकारान्तं राजेति यथा। तत षोडीयतीति सिद्धं भवतीत्येके। षड्भिः प्रकारैः षोढा। षड्ढा। अत्र धाप्रत्यये षषो वा ढत्वं धकारस्य नित्यं ष्टुत्वम्।

द्वाष्टा त्रयोऽनशीतौ प्राक् शतादबहुव्रीहौ ॥२।२।१०२॥ प्राक् शताद्या संख्याऽशीतिवर्जिता तस्यामुत्तरपदे द्वि अष्टन् त्रि इत्येतेषां द्वा अष्टा त्रयस् इत्येते यथासंख्यमादेशो निपात्यन्ते अबहुव्रीहौ समासे। द्वादश। द्वाविंशतिः। द्वात्रिंशत्। अष्टादश। अष्टाविंशतिः। अष्टात्रिंशत्। त्रयोदश। त्रयोविंशतिः। त्रयस्त्रिंशत्। अनाशीताविति किम्? द्व्यशीतिः[2]। प्राक् शतादिति किम्? द्विशतम्। त्रिशतम्। अष्टशतम्। त्रिसहस्रम्। अबहुव्रीहाविति किम्? द्वित्राः। अष्टदशाः। त्रिदशाः। द्व्याद्यबाधाया द्वादीनामिह पूर्वपदान्तरत्वविज्ञान उत्तरो विकल्पोऽनर्थकः स्यादिति द्व्याद्यादेशविज्ञानादिह न भवति। चतुर्दशाः। अनशीताविति पर्युदासात् प्राक् शतादित्यबधेश्च संख्यापरिग्रहादिह न भवति। द्वैमातुरः। त्रैमातुरः। आष्टमातुरः। द्विमुनि व्याकरणस्य। त्रिमुनि व्याकरणस्य।

चत्वारिंशदादौ वा ॥२।२।१०३॥ प्राक् शताद्या संख्याऽशीतिवर्जिता तस्यां चत्वारिंशदादावुत्तरपदे परे द्वि अष्टन् त्रि इत्येतेषां द्वा अष्टा त्रयस् इत्येत आदेशा वा भवन्ति अबहुव्रीहौ समासे। द्वौ च चत्वारिंशच्चेति द्विचत्वारिंशत्, द्वाचत्वारिंशत्,। द्विनवतिः, द्वानवतिः। अष्टचत्वारिंशत्, अष्टाचत्वारिंशत्। अष्टनवतिः, अष्टानवतिः। त्रिचत्वारिंशत्, त्रयश्चत्वारिंशत्। त्रिनवतिः, त्रयोनवतिः। पूर्वेण नित्ये प्राप्ते विकल्पः।

महतः करघासविशिष्टे डाः ॥२।२।१०४॥ महत् इत्येतस्य कर घास विशिष्ट इत्येतेषूत्तरपदेषु डा इत्ययमादेशो भवति वा। महतः करो महाकरः, महत्करः। कर[3] एव कार इति महाकारो महत्कारः। महाघासो महद्घासः। महाविशिष्टः, महद्विशिष्टः। महत इति किम्? राजकरः। करघासविशिष्ट इति किम्? महत्पुत्रः। डकार उत्तरार्थः। अनेकार्थ[4] इयं विभाषा। एकार्थे तु परत्वान्नित्य एव विधिर्भवति।

ङ्यः २।२।१०५॥ ङ्यन्तस्य महच्छब्दस्य करघासविशिष्टेषूत्तरपदेषु नित्यं डादेशो भवति। महत्याः करो महाकरः। महाघासः। महाविशिष्टः। ईकारस्य डादेशे कृते अद्रूपस्य लुक्। नित्यार्थं वचनम्।

जातीयैकार्थे ॥२।२।१०६॥ महच्छब्दस्य जातीये प्रत्यय एकार्थे चोत्तरपदे परतः डा इत्ययमादेशो भवति। (महाप्रकार इति) महाजातीयः। महाजातीया। वन्दे महाभागम्। (महाश्वासो मुनिश्चेति महामुनिस्तम्) महामुनिम्। महायशसम्। महावीरम्। महादेवी। महाद्युतिः। अमहान् महान् संपन्नो महद्भूतश्चन्द्रमा इत्यत्र च्व्यन्तस्य क्रियाविशेषणस्योर्यादिवदसत्त्ववाचित्वात् सत्त्ववाचिना भूतशब्देन चैकार्थ्याभावात् डादेशो न भवति। तथा च गोमतीभूता महाशूद्रीति पुम्भावो न भवति। महद्भूता प्रज्ञेति मृगक्षीरादिष्विति सिद्धम्। मृगक्षीरादिराकृतिगणः। महतीभूतेत्येव च केचिदिच्छन्ति।

---

१. -रपदादिषु कृ- क० म०। २. तिः। व्यशीतिः प्रा- क० म०। ३. सिद्धाथः- क० म० टि०। ४. असमानाधिकरणे क० म० टि०।

आ सर्वनाम्नः ॥२।२।१०७॥ यतु प्रत्यये दृग्दृश दृक्ष इत्येतेषूत्तरपदेषु पूर्वस्याकारादेशो भवति । (यत्परिमाणमस्येति) यावान् । तावान् । एतावान् । स इव दृश्यत इति तादृक् । तादृशः । तादृक्षः । (असाविव दृश्यत इति) अमूदृक् । अमूदृशः । अमूदृक्षः । (भवानिव दृश्यत इति) भवादृक् । भवादृशः । भवादृक्षः । (अन्य इव दृश्यत इति) अन्यादृक् । अन्यादृशः । अन्यादृक्षः । दृगिति[1] दृशसाहचर्यात्[2] वयबन्तस्य[3] ग्रहणं न क्विप. । तेनेह न भवति । त्रिरूपालिङ्गतो[4]ऽर्यदृक्[5] कुवलयदृशामिति ।

किमिदमः कीश् ॥२।२।१०८॥ किम् इदम् इत्येतयोः यतु दृक् दृश् दृक्ष इत्येतेषूत्तरपदेषु यथासङ्ख्यं कि ईश इत्येतावादेशौ भवतः । आत्वापवादः (किं परिमाणमस्येति) कियान्[6] । इयान् । (क इव दृश्यत इति) कीदृक् । कीदृशः । कीदृक्षः । (अयमिव दृश्यत इति) ईदृक् । ईदृशः । ईदृक्ष । ईशिति शकारः सर्वदेशार्थः ।

सस्समानस्य धर्मादिषु च ॥२।२।१०९॥ समान इत्येतस्य दृक् दृश् दृक्ष इत्येतेषु धर्मादिषु चोत्तरपदेषु स इत्ययमादेशो भवति । आत्वापवादः । (समाना दृगस्येति समानो दृश्यत इति) सदृक् । सदृशः । सदृक्षः । यतुर्नास्ति । (समानो धर्मोऽस्येति) सधर्मा । साधर्म्यम् । सपक्षः । सगन्धः । सदेशः । सकरः । धर्म, पक्ष, गन्ध, देश, कर, जातीय, ज्योतिष, जनपद, रात्रि, नाभि, नाम, गोत्र, रूप, स्थान, वर्ण, वयस्, वचन, बन्धु इति धर्मादयः । बहुवचनादाकृतिगणोऽयम् ।

सब्रह्मचारी ॥ २।२।११० ॥ सब्रह्मचारीति निपात्यते । समानो ब्रह्मचारी समाने ब्रह्मणि गुरुकुले व्रतचारीति वा सब्रह्मचारी । निपातनादेव व्रतशब्दस्यापि लोपः ।

सहस्याकालेऽव्ययीभावे ॥ २।२।१११ ॥ सह इत्येतस्याकालवाचिन्युत्तरपदेऽव्ययीभावे समासे स इत्ययमादेशो भवति । [7]सचक्रं देहि । सधुरं प्राज । [8]सचक्रं यदूनाम् । सवृत्तं मुहितानाम् । अकाल इति किम् ? सह पूर्वाह्णम् । सहापराह्णम् । अव्ययीभाव इति किम् ? सहयुध्वा । सहकृत्वा ।

ग्रन्थान्ताक्ष्याधिक्ष्या दृश्ये ॥ २।२।११२ ॥ सह इत्येतस्योत्तरपदे स इत्ययमादेशो भवति ग्रन्थान्ते, आख्यायाम्[9], आधिक्ष्ये, अदृश्ये च । ग्रन्थस्यान्तो ग्रन्थान्तः । [10]काष्ठामन्तं कृत्वा सकाष्ठं ज्योतिषमधीते । [11]सकलं, [12]समूहतं ग्रन्थम् । आख्या नाम तत्र सहाश्वत्थो यस्य येन वा तत् शा(सा)श्वत्थम् । सपलाशम् । सशिंशपम् । एवं नामानि वनानि । सरसा दूर्वा । [13]आधिक्ष्ये—समाषः कार्षापणः । माषाधिक इत्यर्थः । एवं सकाकिणिको[14] माषः[15] । सद्रोणा[16] खारी[17] । अदृश्ये—[18]अदृश्यार्थ उत्तरपदे । साक्षि[19] कपोतः । समुसलो व्रीहिकंसः । [20]सपिशाचो वात्या । सराक्षसिका शाला । ग्रन्थान्तेऽव्ययीभावः । शेषे [21]बहुव्रीहिः । तत्र ग्रन्थान्तग्रहणं कालार्थम् । शेषग्रहणं नित्यार्थम् ।

---

१. स्यदाद्यन्यसमानादृगौणादृशेराप्ये किकट्क्साः क० म० टि० । २. दृशदृक्षसाह- क० म० । ३. क्व्यन्तस्य- क० म० । ४. पञ्चधर्मत्व, सपक्षे सत्त्व, विपक्षाद्व्यावृत्ति क० म० टि० । ५. मन्वन् क्मिन्विच इत्यत्र चशब्दात् क्विप्- क० म० टि० । ६. यत्खिदं किमः धकारस्येय् क० म० टि० । ७. सचक्रं देहि राजेन्द्र । सधुरं प्राज सारथे इत्यार्षप्रयोगः क० म० टि० । ८. सक्षत्रं यदूनाम्, क० म० । ९. सुविदितानाम्, म० । १०. अष्टादशनिमेषास्तु काष्ठा, क० म० टि० । ११. त्रिंशत्तु ताः कलाः, क० म० टि० । १२. घटिकाद्वयम्–क० म० टि० । १३. अधिरूढाधिक, क० म० टि० । १४. काकिण्या अपि सङ्ग्रहो न विहितः क्षौरं यथा कार्यते चित्तक्षेपकृदस्त्रमात्रमपि वा तस्मिन्नये नाश्रितम् । हिंसाहेतुरहो जटाश्रयि तथा यूकाभिरार्यार्थनैर्वैराग्यादिविवर्धनाय यतिभिः केशेषु लोमः कृतः– क० म० टि० । काकिणी पणतुरीयांशे मानं दण्डे च काकिणी इति विश्वः । १५. मीयते ज्ञायते उपयुज्यते काकिणी अस्मिन्नेन वा इति माषः क० म० टि० । १६. चतुर्भिः कुडवैः प्रस्थः प्रस्थैस्तैराढकोऽन्वितः चतुर्भिराढकैर्द्रोणः, इत्यभिधानचिन्तामणिः क० म० टि० । १७. खारी षोडशभिश्च तैः इत्यभिधानचिन्तामणिः क० म० टि० । १८. अदृश्ये-अनुमेये- इत्यर्थः क० म० टि० । १९. साग्निः म० । २०. सपिशाचा, क० म० । २१. बहुव्रीहिविज्ञानात्सहचरतीति सहचरः, कुरण्डकः । सहदीव्यति सहदेवः कुरुः । सहदेवी-ओषधिः क० म० टि० ।

बाऽन्यार्थे ॥ २।२।११३ ॥ अन्यार्थेऽन्यपदार्थे समासे बहुव्रीहौ सहशब्दस्योत्तरपदे सादेशो वा भवति । [1]सपुत्रः, सहपुत्रः । सच्छात्रः, सहछात्रः । सशिष्यः, सहशिष्यः । अन्यार्थ इति किम् ?' सह-कृत्वा । सहयुध्वा ।

नाशिष्यगोवत्सहले ॥ २।२।११४ ॥ सहशब्दस्य गो वत्स हल इत्येतद्वर्जित उत्तरपद आशिषि गम्यमानायां[2] सादेशो न भवति । स्वस्ति भवते सहपुत्राय । स्वस्ति सहलोकाय राज्ञे । भद्रं सहसङ्घायाचार्याय । आशिषीति किम् ? सपुत्र आयातः । अगोवत्सहल इति किम् ?' स्वस्ति भवते सगवे, सवत्साय, सहलाय ।

बन्धौ व्यस्येश् ॥ २।२।११५ ॥ व्यस्य व्यादेशान्तस्य पूर्वपदस्य[3] बन्धुशब्द उत्तरपदेऽन्यार्थे बहुव्रीहौ समास ईशादेशो भवति । कारीषगन्ध्या बन्धुरस्य कारीषगन्धीबन्धुः । परमकारीषगन्धीबन्धुः । निर्दिश्य-मानस्यादेश इति व्यस्येश्, न सर्वस्य । उत्तरपद इति किम् ? [4]कारीषगन्ध्या बन्धुकुलः कारीषगन्धीबन्धुकुल इत्यत्र कारीषगन्धीबन्धु कुलम-येति विग्रहः ।

मातमातृमातृके वा ॥ २।२।११६ ॥ व्यादेशान्तस्य पूर्वपदस्य मात मातृ मातृक इत्येतेषूत्तरपदे-ष्वन्यार्थे समास ईशादेशो भवति वा[5] । कारीषगन्ध्या माता[6] यस्य स कारीषगन्धीमातः, कारीषगन्ध्यामातः । परमकारीषगन्धामातः, परमकारीषगन्ध्यामातः । कारीषगन्धीमाता, कारीषगन्ध्यामाता । कारीषगन्धी-मातृकः, कारीषगन्ध्यामातृकः । मातशब्दोपादानादिह मातृशब्दस्य मातादेशो विज्ञायते । पुत्रेऽहं मातुः कर्षोऽ-ङीति [7]मातेति विज्ञायमाने मातृकग्रहणेनैव गतत्वान्मातशब्दोपादानमनर्थकं स्यात् । मातृमातृकेति पृथगु-पादानादेवेह विषये पाक्षिक [8]कञ्विज्ञायते ।

पुत्रपत्योस्तत्पुरुषे ॥ २।२।११७ ॥ व्यादेशान्तस्य पूर्वपदस्य पुत्र पति इत्येतयोरुत्तरपदयो-स्तत्पुरुषे समास ईशादेशो भवति । कारीषगन्ध्याया पुत्रः कारीषगन्धीपुत्रः, कारीषगन्धीपतिः । परम-कारीषगन्धीपुत्रः । परमकारीषगन्धीपतिः । तत्पुरुष इति किम् ? कारीषगन्ध्यापतिर्ग्रामः ।

कोः कत्कचि ॥ २।२।११८ ॥ कुशब्दस्याजादावुत्तरपदे तत्पुरुषसमासे कदादेशो भवति । कुत्सित-मन्नं कदन्नम् । कदशनम् । कदजः । कदुष्ट्रः । अचीति किम् ? कुतृणम् । कथं [9]कत्तृणानि नाम तृणजातिरिति ? पृषोदरादित्वात् सिद्धम् । तत्पुरुष इति किम् ? कुष्ट्रो राजा ।

रथवदेषु ॥ २।२।११९ ॥ कुशब्दस्य रथ वद इत्येतयोरुत्तरपदयोः कदादेशो भवति । कुत्सितो रथः कद्रथः । कद्वदः । बहुवचनात्तत्पुरुष इति निवृत्तम् । कुत्सितो रथोऽस्य कद्रथः । कद्वदः ।

कत्त्रि ॥ २।२।१२० ॥ कुशब्दस्य किशब्दस्य वा त्रिशब्द उत्तरपदे कत्त्रीति कदादेशो निपात्यते । कुत्सितास्त्रयः के वा त्रयः कत्त्रयः । कुत्सितास्त्रयोऽस्य के वा त्रयोऽस्य कत्त्रिः ।

पुरुषे का वा ॥ २।२।१२१ ॥ कुशब्दस्य पुरुषशब्द उत्तरपदे परे का इत्ययमादेशो वा भवति । कु—निन्दितः पुरुषः कापुरुषः कुपुरुषो वा । कावचनं सगर्थम् । आकरोक्तौ हि ककाः इति प्राप्नोति ।

अल्पे ॥ २।२।१२२ ॥ ईषदर्थे वर्तमानस्य कुशब्दस्य नित्यं का इत्ययमादेशो भवति । कु ईषन्मधुरं कामधुरम् । कालवणम् । काम्लम् । कापुरुषः । ईषदर्थे [10]चादौ पुरुषे च परत्वादयमेव विधिः ।

पथ्यक्षयोः ॥ २।२।१२३ ॥ पथिन् अक्ष इत्येतयोरुत्तरपदयोः को. कादेशो भवति । कु कुत्सितः पन्थाः कापथम् । कापथो देशः । कु कुत्सितोऽक्षः काक्षः । कुत्सिते अक्षिणी अक्षाणि वा यस्य सः काक्षः[11] । पथेति पथिन्शब्दग्रहणात् तत्पर्यायेऽन्युत्पन्ने [12]पथशब्दे न भवति । कुपथं वनम् । अनीषदर्थं वचनम् ।

---

१. सह पुत्रो यस्य येन वा क० म० टि० । २. -नाशामन्यार्थे सादे- क० म० । ३. पूर्वशब्दस्य क० म० । ४. कारीष्यगन्ध्या क० म० । ५. अकाराम्तस्य क० म० टि० । ६. ऋकारान्तत्वेन विग्रहे कृते षष्ठ्यास्तमासकाले मातृशब्दस्य मात इत्ययमादेशः—क० म० टि० । ७. माते वि- क० म० टि० । ८. कप्रत्य विज्ञा— क० म० । ९. कर्तृणानि क० म० । १०. -यँऽजादौ पु— क० म० । ११. अपाङ्क्षीक्षितं काक्ष, कटाक्षोऽक्षिविकूणनं । क० म० टि० । १२. वाटः पथश्च मार्गश्च—क० म० टि० ।

काकवौ वोष्णे ॥ २।२।१२४ ॥ कुशब्दस्योष्णशब्द उत्तरपदे का कव इत्येतावादेशौ भवनो वा। कु ईषदुष्णं कुत्सितं वा कोष्णम्। कवोष्णम्। कदुष्णम्। आकारो [1]वर्णान्तरत्वात्सन्देहार्थम्(:)।

नस् नासिकायास्तस् क्षुद्रे ॥ २।२।१२५ ॥ नासिकाशब्दस्य तत्प्रत्यये क्षुद्रशब्दे चोत्तरपदे परे नसित्ययमादेशो भवति। नासिकायाः नस्तः। [2]नासिकायाः क्षुद्रः नःक्षुद्रः।

चेऽवर्णे ॥ २।२।१२६ ॥ नासिकाशब्दस्य ये प्रत्यये परे वर्णविवक्षेऽभिधेये नसादेशो भवति। नासिकायै हितं नासिकाया वा नस्यम्। य इति किम् ? नासिक्यं नगरम्। चातुरर्थिकोऽयं ण्यः। निरनुबन्धग्रहणे न सानुबन्धकस्य ग्रहणं भवति। अवर्ण इति किम् ? नासिक्यो वर्णः।

हृदयस्य हृद्याण्लास्ले ॥ २।२।१२७ ॥ हृदयशब्दस्य ये प्रत्यये अणि च लासशब्दे चोत्तरपदे परे हृद इत्ययमादेशो भवति। (हृदयस्य प्रियमिति) हृद्यम्। हार्दम्। हृल्लासः।

लेखे ॥ २।२।१२८ ॥ [3]अणन्ते लेखशब्द उत्तरपदे हृदयस्य हृदित्ययमादेशो भवति। हृदयं लिखतीति हृल्लेख। अणीति किम् ? हृदयस्य लेखः हृदयलेखः। यजन्ते न भवति। इदमेव लेख इति ज्ञापकम्-इहोत्तरपदाधिकारे प्रत्ययग्रहणे स्वरूपग्रहणमिति। यदि प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणं विज्ञायेत अणीत्येव सिद्धम्। खिति च इत्यादौ त्वसम्भवात्तदन्तविज्ञानम्। हृदयशब्दस्य [4]निवृत्त्यर्थो हृदादेशः। अन्यत्रोभयं प्रयुज्यते। सौहार्द्यम्, सौहृदम्। हृच्छोकः, हृदयशोकः। हृद्रोगः, हृदयरोगः। हृच्छङ्कः, हृदयशङ्कः। हृच्छूलम्, हृदयशूलम्। हृच्छल्यम्, हृदयशल्यम्।

पद्: पादस्याज्यातिगोपहते ॥२।२।१२९॥ पादशब्दस्य आजि अतिग उपहत इत्येतेषूत्तरपदेषु पद इत्ययमादेशो भवति। पादाभ्यां पादयोर्वा आजिः पद्याजिः। पादाभ्यामततीति पद्यातिः। पद्नः। पदोपहतः। पद इति शब्दान्तरमस्ति तत्र पादशब्दनिवृत्त्यर्थं वचनम्।

पत्काषिहिमहृतिषे ॥२।२।१३०॥ पादशब्दस्य काषिन्[5] हिम हृति इत्येतेषूत्तरपदेषु यप्रत्यये च परतः पद् इत्ययमादेशो भवति। पादौ कषतीत्येवंशीलः पत्काषी। पद्धिमम्। पद्धतिः। पादौ विध्यन्तीति पद्याः शर्कराः। पादयोर्भवाः पद्याः पांसवः। पादाभ्यां हितं पद्यमौषधम्। पाद्यमुदकमित्यत्र पाद्यार्घ्य इति निपातनान्न भवति। परमपत्काषिण इति कषि तु पूजायाम्। पादपूजायां तु परमपादकाषिण इत्येव भवति। आज्यादिषु करणभावः। प्राण्यङ्गस्यैवेति पूर्वत्र पादशब्दः प्राण्यङ्गवचनः स एवात्रापि इति पद्भावोऽपि प्राण्यङ्ग एव। मापादिसाहचर्याच्च मापपणपादाद्य इत्यत्र पादः परिमाणं गृह्यते। पादसम्बन्धिषु वा पद्भावः। मापपणपादाद्य इति च द्विगोरुच्यते[6] तस्मिन्न भवति। सिद्धपाद्यम्। त्रिपाद्यम्। अध्यर्धपाद्यम्।

शंस्यृचः ॥२।२।१३१॥ ऋचः सम्बन्धिनः पादस्य शस्प्रत्यये परे पदादेशो भवति। पादं पादं गायत्र्याः शंसति पच्छो गायत्रीं शंसति। [7]वृत्तौ वाक्ये गम्यमानस्य गायत्रीपादसम्बन्धस्य विनिवृत्तिः। शंसनक्रियायाश्च गायत्र्याः कर्मत्वं स्वभावात्। शसीति तद्धितस्य ग्रहणं न सुपः। सुप्(ब्)ग्रहणे सुप्प्रकरण एवं क्रियेत। ऋच इति किम् ? पादशः कार्षापणं ददाति। पादशः श्लोकं कथयति।

मिश्रशब्दघोषनिष्के वा ॥२।२।१३२॥ [8]पादशब्दस्य मिश्र शब्द घोष निष्क इत्येतेषूत्तरपदेषु पदादेशो भवति वा। पद्मिश्रः, पादमिश्रः। पच्छब्दः पादशब्दः। पद्घोषः, पादघोषः। पद्निष्कः, पादनिष्कः।

---

१. वर्णान्तरत्वात्सन्देहार्थम् क० म०। २. नासिकया—म०। ३. अण्सन्निधानाद्धेखशब्दोऽणन्तो गृह्यते। तेनेह न भवति। हृदयस्य लेखो। हृदयलेखः अणिति सिद्धे लेखग्रहणं ज्ञापकम्-उत्तरपदाधिकारे(प्रत्ययग्रहणे तदन्तग्रहणम्। क० म० टि०। ४. व्यतिषु—क० म०। ५. पत्काषिणो व्रजन्ति—क० म० टि०। ६.—ते इति त—क० म०। ७. वाक्यशब्दस्य गायत्र्याः पादसम्बन्धस्य वृत्तौ निवृत्तत्वात् स्वाभाविकमेव शंसनक्रियायां कर्मत्वं भवति। क० म० टि। ८. पादस्य—क० म०।

पूर्वे एकहल्युदकस्योदः ॥२।२।१३३॥ उदकशब्दस्य पूरयितव्यवाचिनि एकहलि असंयुक्तहकारे उत्तरपदे उद इत्ययमादेशो वा भवति । (उदकस्य कुम्भ इति) उदकुम्भः । उदककुम्भः । उदघटः । उदककटः । उदपात्रम् । उदकपात्रम् । उदभाजनम् । उदकभाजनम् । पूर्व इति किम् ? उदकपर्वतः । उदकदेशः । [1]एकहलीति किम् ? उदकामत्रम् । एकग्रहणं किम् ? उदकस्थालम् ।

मन्थौदनसक्तुबिन्दुवज्रवीवधभारहारगाहे ॥२।२।१३४॥ मन्थ ओदन सक्तु बिन्दु वज्र वीवध भार हार गाह इत्येतेषूत्तरपदेषु उदकशब्दस्य उद इत्ययमादेशो भवति वा । (उदकस्य मन्थ इति) उदमन्थ , उदकमन्थः । उदौदनः, उदकौदनः । उदसक्तवः, उदकसक्तवः । उदबिन्दु, उदकबिन्दु. । उदवज्रः, उदकवज्र. । [2]उदवीवध , उदकवीवधः । उदभार, उदकभारः । उदहारः, उदकहारः । उदगाह., उदकगाहः ।

धिपेषंवासवाहने ॥२।२।१३५॥ धि पेषं वास वाहन इत्येतेषूत्तरपदेषु उदकशब्दस्य उद इत्ययमादेशो नित्य भवति । उदकं धीयतेऽस्मिन्निति उदधिर्घटः । उदपेषं पिनष्टि । उदवासः । उदवाहनः । अत्रामार्थं वचनम् । नाम्न्युत्तरेणैव सिद्धम् । योगविभागो नित्यार्थ. ।

नाम्न्युत्तरपदस्य च ॥२।२।१३६॥ उदकस्य पूर्वपदस्य उत्तरपदस्य च नाम्नि सज्ञायाम् (विषये) उद इत्ययमादेशो भवति । उदपर्वतः । उदमेघो नाम कश्चित् । उत्तरपदस्य [3]लवणोदः । कालोद. । क्षीरोदः । एवं नामान. समुद्राः ।

प्लुग्वा ॥२।२।१३७॥ पूर्वपदस्योत्तरपदस्य च प्लुग्वा भवति । देवदत्तः, देवः, दत्तः । सत्यभामा, सत्या, भामा । शब्दसाम्येऽर्थे तत्प्रकरणादेर्विशेषोऽवसेय. ।

ह्रस्वान्तरुपसर्गादीदपोऽनात् ॥२।२।१३८॥ उत्तरपदस्येति वर्तते । द्विशब्दादन्त.शब्दादनवर्णान्तेभ्यश्चोपसर्गेभ्यः परस्य अप् इत्येतस्योत्तरपदस्य ईकारादेशो भवति । द्वीर्गता आपोऽस्मिन्निति द्वीपम् । अन्तरीपम् । नीपम् । वीपम् । प्रतीपम् । समीपम् । अनादीति किम् ? प्रापम् । परापम् । समापम् । प्रादिग्रहणमकृत्वोपसर्गग्रहण यो धातुयोग उपसर्गो भवति तदर्थम् । तेनेह न भवति । स्वापः । स्वाद्धि । सुनर्चायामुपसर्ग. ।

देशेऽनोरुः ॥२।२।१३९॥ अनुशब्दात् परस्य अप इत्येतस्योत्तरपदस्य उकारादेशो भवति देशेऽभिधेये । अनुगता आपोऽस्मिन्निति अनूपो देश. । देश इति किम् ? अन्वोपमन्यत् ।

दिक्शब्दात्तीरस्य तारो वा ॥२।२।१४०॥ दिग्वाचिन. शब्दात्परस्य तीर इत्येतस्योत्तरपदस्य तार इत्ययमादेशो वा भवति । (दक्षिणस्यास्तीरमिति) दक्षिणतारम्, दक्षिणतीरम् । उत्तरतारम्, उत्तरतीरम् । दिक्शब्दादिति किम् ? गङ्गातीरम् ।

मातृपितुस्स्वसुः षिः ॥२।२।१४१॥ मातृ पितृ इत्येताभ्या परस्य स्वसृ इत्येतस्योत्तरपदस्य षिरादेशो वा भवति । मातृष्वसा, मातुष्वसा, मातुष्वसा । मातुः स्वसा, मातुस्स्वसा । पितृष्वसा, पितुष्वसा । पितुः स्वसा, पितुस्स्वसा । स्वसृपत्योर्वेति ऌकार(ग) भवति । उरिति वचनादनृवर्णान्तत्वेऽयं विधिः । तत्र वचनप्रामाण्याद् विभक्त्या व्यवधानेऽपि भवति ।

उः ॥२।२।१४२॥ ऋवर्णान्ताभ्या मातृ पितृ इत्येताभ्या परस्य स्वसृ इत्येतस्योत्तरपदस्य नित्यं षिरादेशो भवति । मातृष्वसा । पितृष्वसा । योगविभागो नित्यार्थः ।

विकुशमिपरे स्थलम् ॥२।२।१४३॥ वि कु शमि परि इत्येतेभ्य परस्य स्थलेत्यस्योत्तरपदस्य थुलमिति निपात्यते । विष्टलम् । कुष्टलम् । शमिष्टलम् । शमिति ह्रस्वोच्चारणाद्धस्वादेशं दीर्घति । शमीस्थलम् । दीर्घादित्येके । परे परिष्टलम् । एतेभ्य इति किम् ? भूमिस्थलम् ।

---

१. हलीत्युत्तरपदस्य प्रत्युदाहरणम् क० म० टि० । २. वीवधो विवधेऽपि परिहारे द्वराभयोः इति विश्व । ३. तस्य प्रभेदाः क्षीरोदो लवणोदस्तथाऽपरे क० म० टि० ।

कपेर्गोत्रे ॥२।२।१४४॥ कपि इत्यतः परस्य स्थल इत्युत्तरपदस्य ष्ठलमिति षिनिपात्यते गोत्रेऽभिधेये । कपिष्ठलं गोत्राभिधानमेतत् । गोत्र इति किम् ? कपीनां स्थलम् कपिस्थलम् ।

गोऽम्बाम्बसव्यापद्विभूम्यग्निमद्रिपुद्रिशेकुशङ्कुकङ्कुबर्हिर्दिविपरमेष्ठः ॥ २।२।१४५ ॥ गो अम्बा अम्ब सव्य अप द्वि त्रि भूमि अग्नि मद्रि पुद्रि शेकु शङ्कु कु अङ्क बर्हिस दिवि परमे इत्येतेभ्यः परस्य स्थ इत्येतस्योत्तरपदस्य ष्ठ इति षिनिपात्यते । गोष्ठम् । अम्बाष्ठम्[1] । अम्बष्ठः । सव्यष्ठः । [अपष्ठः । द्विष्ठः[2] । त्रिष्ठः[3] । भूमिष्ठः[4] । अग्निष्ठः । मद्रिष्ठः । पुद्रिष्ठः । शेकुष्ठः । शङ्कुष्ठः[5] । कुष्ठः[6] । अङ्कुष्ठः[7] । बर्हिष्ठः । दिविष्ठः । परमेष्ठः । अतएव निपातनात् ष्टुत्व न भवति । तत्पुरुषे कृति बहुलमितीदं नेति सिद्धमिति प्रतिषिध्यते ।

प्रष्ठोऽग्रगामी ॥२।२।१४६॥ प्र इत्येतस्मात् परस्य स्थ इत्येतस्योत्तरपदस्य प्रष्ठ इति निपात्यते अग्रगामी चेद् अभिधेयो भवति । पष्ठोऽग्रगामी । प्रस्थोऽन्य[8] ।

ज्योतिरायुषष्टोमः ॥२।२।१४७॥ ज्योतिम् आयुस् इत्येताभ्यां परस्य स्तोम[9] इत्येतस्योत्तरपदस्य ष्टोम इति षिनिपात्यते । (ज्योतिषः स्तोम इति) ज्योतिष्टोम. । आयुष्टोमः ।

ष्टुब्ह्यग्नेः ॥२।२।१४८॥ अग्नि इत्येतस्मात् परयोः स्तुत[8] स्तोम इत्ययोरुत्तरपदयोः ष्टुत् ष्टोम् इति षिनिपात्यते । (अग्निं स्तौतीति) अग्निष्टुत् । अग्निष्टोमः ।

निर्दुरस्सेधसन्धिसाम्नाम् ॥२।२।१४९॥ निर् दुर् सु इत्येतेषा(म्यः) परेषां सेध सन्धि सामन् इत्येतेषामुत्तरपदानां निरादेशो भवति । वचनभेदाद्यथासंख्याभावः । निष्षेधः । दुष्षेधः । सुषेधः । निष्सन्धि[8] । दुष्सन्धिः । सुषन्धिः । निष्साम । दुष्साम । सुषाम ।

भ्रुरुष्ठानादिषु ॥२।२।१५०॥ भ्रुरुष्ठानादिषूत्तरपदस्य षिः साधुर्भवति । भ्रूणां स्थानं भ्रुरुष्ठानम् । अङ्गुलीनां सङ्गः अङ्गुलिषङ्गः । अङ्गुलिषङ्गा ववागूः । भ्रुरुष्ठान, अङ्गुलिषङ्ग, सर्वपरमेष्ठिन्, सुष्ठु, दुष्ठु, अपष्ठु, गौरीषवय, प्रतिष्ठिका, नौषेविका, दुन्दुभिषेवण । अविहितलक्षणो दृश्यमानः षिर्भ्रुरुष्ठानादिषु द्रष्टव्यः ।

निनद्याः स्नातेः कौशले ॥२।२।१५१॥ नि नदी इत्येताभ्यां परस्य स्नातेरुत्तरपदस्य षिरादेशो भवति कौशले नैपुण्येऽर्थे । निष्णः कटकरणे । निष्णातः कटकरणे । नदीष्णः प्रतरणे । नदीष्णातः प्रतरणे । कुशल इत्यर्थः । कौशल इति किम् ? निस्नातः । नदीस्नातः ।

प्रतेः ष्णातं सूत्रे ॥२।२।१५२॥ प्रतेः परस्य स्नात इत्येतस्योत्तरपदस्य ष्णातमिति षिनिपात्यते सूत्रे । प्रतिष्णातं सूत्रम् । शुद्धमित्यर्थः । सूत्र इति किम् ? [9]प्रतिस्नातमन्यत् प्रत्ययान्तोपादानं प्रत्ययान्तरनिवृत्त्यर्थम् ।

ष्णानं नाम्नि ॥२।२।१५३॥ प्रतेः परस्य स्नान इत्येतस्योत्तरपदस्य ष्णानमिति षिनिपात्यते सूत्रविषये नाम्नि । समुदायश्चेत् सूत्रस्य नाम भवतीत्यर्थः । प्रतिष्णानं सूत्रमित्यर्थः । नाम्नीति किम् ? प्रतिस्नानमन्यत् ।

विष्टारपङ्क्तिबृहतीनिष्टानं छन्दोवर्णे ॥२।२।१५४॥ विष्टारेति वि इत्येतस्मात् परस्य तार इत्येतस्योत्तरपदस्य षिर्निपात्यते छन्दसि छन्दोविषये नाम्नि चेदवयवत्वेन शब्दो वर्तते । अभिनिष्टानमिति अभिनिस् इत्येतस्मात् परस्य स्तान इत्येतस्य वर्णविषये नाम्नि । विष्टार(:) पङ्क्तिश्छन्दः । विष्टार(:) बृहतिका छन्दः । अभिनिष्टानो[10] वर्णः । विसर्जनीय उच्यते । छन्दोवर्ण इति किम् ? अन्यत्र विस्तारः । अभिनिस्तानः ।

---

१. अम्बाष्ठः म० । २. द्वयोस्तिष्ठतीति क० म० टि० । ३. त्रिषु तिष्ठतीति क० म० टि० । ४. भूमौ तिष्ठतीति क० म० टि० । ५. शङ्कौ तिष्ठतीति क० म० टि० । ६. कौ तिष्ठतीति क० म० टि० । ७. अङ्कौ तिष्ठतीति क० म० टि० । ८. स्तोमः स्तोत्रेऽध्वरे कृत्स्ने इत्यमरः क० म० टि० । ९. प्रतिस्नानमन्यत् क० म० । १०. अभिनिष्टानशब्दो विसर्जनीयेऽक्षरे सतः इति विश्वः । क० म० टि० ।

वृक्षासनं विष्टरः ॥२।२।१५५॥ वि इत्येतस्मात् परस्य स्तर इत्येतस्योत्तरपदस्य विष्टर इति नाम्नि विनिपात्यते । वृक्षः आसनं चेद्वाच्यं भवति । विष्टरो वृक्षः । विष्टरमासनम् । विस्तरोऽन्यः ।

युधि गवेः स्थिरः ॥२।२।१५६॥ युधि गवि इत्येताभ्यां परस्य स्थिर इत्येतस्योत्तरपदस्य स्थिर विनिपात्यते नाम्नि, समुदायश्चेन्नाम भवति । युधिष्ठिरः । गविष्ठिरः । युधि गवीत्यस्मादेव निपातनात् इक्प्रत्ययो न भवति ।

एत्यगः ॥२।२।१५७॥ अगकारान्तात्पूर्वपदात्परस्योत्तरपदसकारस्यैकारे परे षिरादेशो भवति नाम्नि, समुदायश्चेन्नाम भवति । श्रीषेणः । वारिषेणः । मातृषेणः । ए इति किम् ? हरिसिंहः । अग इति किम् ? विश्वसेनः । चर्त्वे कृतेऽपि षिर्न भवति । अन्यथा प्रतिषेधोऽनर्थकः स्यात् । ककारमनुपादाय गकारोपादानमुत्तरार्थम् । नाम्नीति किम् ? पृथुसेनो राजा ।

भाद्धा ॥२।२।१५८॥ नक्षत्रवाचिनोऽगकारान्तात्पूर्वपदात्परस्योत्तरपदसकारस्य एकारे परे षिरादेशो भवति नाम्नि । भरणीषेणः । भरणीसेनः । रोहिणीषेणः । रोहिणीसेनः । रेवतीषेणः । रेवतीसेनः । अग इति किम् ? अश्वयुक्सेनः । शतभिषक्सेनः ।

नोऽस्ते ॥२।२।१५९॥ अगकारान्तं यत्पूर्वपदमस्यन्तं तत्स्थात्परकाराद्रेफाच्च परस्योत्तरपदस्थस्य नकारस्य णकारादेशो भवति नाम्नि,[1] समुदायश्चेन्नाम भवति । खरणाः । खुरणाः । खरणसः । खुरणसः । द्रुणसः । ब्राध्नीणसः । शूर्पणखा । चन्द्रणखा । वारिवाहणः.[2] । नरवाहणः । असेरिति किम् ? सर्पिष्णानः । उत्तरार्थं च । अग इति किम् ? ऋगयनम् । नाम्नीति किम् ? मेषनासिकः । चर्मनासिक । नृनमनसः । सर्वनामेत्यादिषु क्षुम्नादीनामिति न भवति । पदं नाभिन्नमिति वचनं णत्वविधौ न वृत्त्यन्त इति नास्ति । तत्रेदमेव णत्वशासनलिङ्गम् ।

पुरगामिश्रकासिम्रकाशारिकाकोटराह्वणम् ॥२।२।१६०॥ पुरगा मिश्रका सिम्रका शारिका कोटर इत्येतेभ्यः परस्य वन इत्येतस्योत्तरपदस्य वणमिति णत्वं निपात्यते नाम्नि, समुदायश्चेन्नाम भवति । पुरगावणम् । मिश्रकावणम् । सिम्रकावणम् । (शारिकावणम्) । कोटरावणम् । एतेभ्य इति किम् ? कुबेरवनम् । शतपत्रवनम् । असिपत्रवनम् । नाम्नीति किम् ? शारिकाणां वनं शारिकावनम् । पूर्वेणैव सिद्धे नियमार्थं वचनम् । पुरगादीनां दीर्घोच्चारणादेतेभ्य एव वणमिति नियमः । न हि दीर्घान्तेभ्यः एतेभ्योऽन्यदुत्तरपदं सम्भवति, कोटराञ्जनादीनां वनगिरावितिं दीर्घविधानात् ।

प्राग्रेऽन्तर्निशराम्रखदिरकार्ष्यपीयुक्षेक्ष्वप्लक्षात् ॥ २।२।१६१ ॥ प्र अग्रे अन्तर् निम् शर आम्र खदिर कार्ष्य पीयुक्षा इक्षु प्लक्ष (इत्येतेभ्यो) वन इत्येतस्योत्तरपदस्य वणमिति णत्वं निपात्यते । प्रवणम् । अग्रेवणम् । अन्तर्वणम् । निर्वणम् । शरवणम् । आम्रवणम् । खदिरवणम् । कार्ष्यवणम् । पीयुक्षावणम् । इक्षुवणम्[3] । प्लक्षवणम् । योगविभागान्नाम्नीति निवृत्तम् । तेन सामान्येनेदं विधानम् ।

द्विज्यज्ञ्योऽनिरिकादिभ्यो वृक्षौषधिभ्यो वा ॥ २।२। १६२ ॥ द्व्यज्यस्त्र्यज्यश्च हरिकादिवर्जितेभ्यो वृक्षवाचिभ्य ओषधिवाचिभ्यश्च परस्य वन इत्येतस्योत्तरपदस्य वणमिति णत्वं निपात्यते वा । शिग्रुवणम् । शिग्रुवनम् । दारुवणम् । दारुवनम् । शिरीषवणम् । शिरीषवनम्[4] । अरूकवणम् । अरूकवनम् । ओषधिभ्य.—माषवणम् । माषवनम् । दूर्वावणम् । दूर्वावनम् । व्रीहिवणम् । व्रीहिवनम् । नीवारवणम् । नीवार-

---

१. पूर्वपदात्संज्ञायामग पूर्वपदस्थनिमित्तादगकारात्संज्ञायां णत्वं भवति । सूर्पणखा । स्वर्भानुरिति महोपाध्यायवर्धमानौषवृत्तौ । क० म० टि० । २. हरिवाहण क० म० । ३. इक्षुशाकटमिक्षूणां क्षेत्रमिक्षुवणं वनम् क० म० टि० । ४. नम् । बदरीवणम् । बदरीवनम् । करीरवणम् । करीरवनम् । अरू—क० म० ।

वनम् । कौशवनम् । कौद्रवनम् । वरकवनम् । वरकवनम् । प्रियङ्गुवनम् । प्रियङ्गवनम् । द्विप्यजस्य इति किम् ? देवदारुवनम् । भद्रदारुवनम् । कोरमाधवनम् । राजमाधवनम् । अनिरोकादिभ्य इति किम् ? इरीकावनम् । तिमिरवनम् । शमिरवनम् । कुबेरवनम् । हरिवनम् । कर्मारवनम् । वृक्षौषधिभ्य इति किम् ? शिंशपावनम् । किंशारीवनम् । बहुवचनाद्वाक्यसंज्ञयं न भवति । तद्व्यति (द्व्यति) बहुत्वप्रतिपत्त्यर्थम् । विशेषग्रहणमिष्यते । इह न भवति—द्रुमवनम् । वृक्षवनम् ।

फलो वनस्पतीज्ञेयो वृक्षाः पुष्पफलोपगाः ।
ओषध्यः फलपाकान्ता लता गुल्माश्च वीरुधः ॥

गिरिनदयादीनाम् ॥ २।२।१६३ ॥ गिरिनदयादीनां य उत्तरपदनकारस्तस्य णादेशो वा भवति । गिरिण्यौ, गिरिनद्यौ । गिरिणः, गिरिनः । गिरिणद्धः, गिरिनद्धः । चक्रणद्यौ, चक्रनद्यौ । चक्रणितम्बा, चक्रनितम्बा । चक्रणितम्बा, चक्रनितम्बा । तूर्यमाणः, तूर्यमानः । माषोण , माषोन । आग्रयिणः, आग्रयिनः । ऋगयनस्य बोद्धाऽध्येता वेति बोद्धृध्येत्रोरित्यण् । ऋगयनस्य व्याख्यानं तत्र भवो वेति वा शिक्षादेरचाणित्यण् ।

पाणं भावकरणे ॥ २।२।१६४ ॥ भावे करणे च यः पानशब्दस्तस्योत्तरपदस्य यो नकारः अस्यादेशान्तपूर्वपदस्थात् प्रात्परस्तस्य पाणमिति णत्वं वा निपात्यते । कषायस्य पानं कषायपाणम् , कषायपानम् । क्षीरपाणम्, क्षीरपानम् । सौवीरपाणम्, सौवीरपानम् । करणे—कषायपाण., कषायपानः कंसः । वारिपाण., वारिपानः कंसः । भावकरण इति किम् ? पीयतेऽस्मिन्निति पानः । क्षीरपानः यूपः । असेरिति किम् ? सर्पिष्पानम्, यजुष्पानम् ।

देशे ॥ २।२।१६५ ॥ पानशब्दस्योत्तरपदस्य पाणमिति णत्वं नित्यं निपात्यते असेर्देशे गम्यमाने । कषायपाणाः गान्धारयः । क्षीरपाणाः । शुक्लीराः । सुरापाणाः प्राच्याः । सौवीरपाणाः वाह्लीकाः । देशा देशस्था वा । देशस्थाभिधानेऽपि देशो गम्यते । असेरिति किम् ? सर्पिष्पाना । देश इति किम् ? दाक्षीपानम् । क्षीरपानाः गोपालकाः । योगविभागो नित्यार्थः ।

ग्रामाग्रण्योः ॥ २।२। १६६ ॥ ग्राम अग्र इत्येताभ्यां परस्य नी इत्यस्योत्तरपदस्य णीरिति णत्वं निपात्यते । ग्रामणी. । अग्रणीः ।

प्रणतः ॥ २।२। १६७ ॥ प्रादेः परस्य नस इति णत्वं निपात्यते । प्रणता प्रणद्धा वा नासिका यस्य स प्रणतः । प्रणतं मुखम् । निर्णतः । निर्णतं मुखम् ।

अतोऽह्नः ॥ २।२। १६८ ॥ अकारान्तपूर्वपदस्थात् प्रात्परस्य अह्न इत्येतस्योत्तरस्य अह्न इति णत्वं निपात्यते । पूर्वाह्णः । अपराह्णः । अत इति किम् ? निरह्नः । दुरह्न. । पराह्नः । अह्न इत्यकारान्तनिपातनादिह न भवति । दीर्घाह्नी शरत् ।

वयसि चतुस्त्रेर्हायणः ॥ २।२। १६९ ॥ चतुर् त्रि इत्येताभ्यां परस्य हायन इत्येतस्योत्तरपदस्य हायण इति णत्वं निपात्यते वयसि गम्यमाने । चतुर्हायणो वत्सः । चतुर्हायणी बडवा । त्रिहायणो वत्सः । त्रिहायणी बडवा । वयसीति किम् ? चतुर्हायना शाला । चतुस्त्रेरिति किम् ? सहस्रहायनः पुरुषः ।

---

१. कद्रु । उदुम्बरवनम् । कीर—क० म० । २. कोरदूषवनम् क० म० । ३. -आम्र पूर्वपद—क० म० । ४. ग्रामणी क्षीरपाणे पेयपानकसंज्ञिकादिभिरिति कषायः सकलरसः क० म० टि० । ५. पीयत इति पानम् , क्षीरं पानं येषां ते क्षीरपानाः क० म० टि० । ६. मल्लिकाकषायकः कंसः वारि कषायपानमाजमत्र दृश्यमिति पाठान्तरम्—क० म० टि० । कंसोऽस्त्री पानभाजनम् इत्यमरः क० म० टि० । ७. सुरापाणाः क० म० ।

वाह्याद्वाहणम् ॥ २।२। १७० ॥ वाह्यवाचि यत्पूर्वपदं तत्स्यात्प्रात् (तस्मात्) परस्य वाहन इत्येतस्योत्तरपदस्य वाहणमिति णत्वं निपात्यते । इक्षुवाहणम्[1] । शरवाहणम् । वाह्यादिति किम् ? दाक्षीणामीशिनव्यं[2] दाक्षीवाहनम् । नरा वाहनमस्य नरवाहन ।

क्त्वोऽनञः प्यः[3] ॥ २।२। १७१ ॥ नञ्वर्जितादव्ययात् पूर्वपदाद् यत्परमुत्तरपदं तदवयवस्य क्त्वाप्रत्ययस्य प्यादेशो भवति । प्रकृत्य । प्रहृत्य । उच्चैस्कृत्य । नानाकृत्य । अनञ इति किम् ? अकृत्वा । अहृत्वा । परमकृत्वा । उत्तमकृत्वा । अनञ इति नञ्सदृशमव्ययं गृह्यते इतीह नञोऽव्ययाच्च न भवति । स्त्र्येणीकृत्येत्यत्रानुबन्धाविधयादपूर्वपदत्वाच्च नञ्प्रतिषेधः । उत्तरपदस्येति किम् ? अलंकृत्वा । खलुकृत्वा । जग्धदः प्ये चेति प्यग्रहणादन्तरङ्गानपि विधीन् प्य बाधत इति प्रथाय, प्रदायेत्यादौ हित्वादि न भवति ।

पृषोदरादयः ॥ २।२। १७२ ॥ पृषोदर इत्येवंप्रकाराः शब्दाः अविहितलोपागमादेशवर्णविकाराः शिष्टैः प्रयुज्यमानाः साधवो वेदितव्याः । पृषदुदरमस्येति पृषोदरः । पृषति उद्वानं पृषोद्वानम् । अश्व इव तिष्ठतीति अश्वत्थः । कपिरिव तिष्ठतीति कपित्थः[4] । मह्या तिष्ठतीति महीत्थः । दधनि तिष्ठतीति दधीत्थः । पिशितमश्नातीति पिशाचः । मृदु(:)स्वनं लातीति मुषलः । वारिणो वाहको बलाहकः । ऊर्ध्वो कर्णोऽस्येत्युलूकः[5] । जीवस्य[6] मृतो जीमूतः । मेहनस्य[7] यस्य माला मेखला । मह्या रौतीति मयूरः । कौ जीर्यतीति कुञ्जरः । दिवि द्यौर्वा ओक एषामिति दिवौकसः । शवाना शयनं स्मशानम् । ब्रुवन्तोऽस्या सीदन्तीति ब्रुसी । ऊर्ध्वं खं बिलं वाऽस्येति उलूखलम्, उदूखलं वा । आश्या विषमस्येत्याशीविषः । बलिं[8] वर्धयतीति बलीवर्दः[9] । मह्या शेत इति महिषः । मनस[10] इष्टा मनीषा । बिलं दारयतीति बिडालः । मृदमालीयत इति मृणालः । असृगालीयत इति सृगालः । कृच्छ्रेण दास्यते निन्दितो दास इति वा दूदासः[11] । कृच्छ्रेण नाश्यते निन्दितो नाश इति वा दूणासः । कृच्छ्रेण दभ्यते निन्दितो दम्भ इति वा दूदभः[12] । दुष्टु ध्यायतीति दुध्यः । पुरो डाश्यत इति पुरोडाशः । अश्वस्याम्बा बडवा । शकन्ध्वादिषु[13] शकन्धुः । कर्कस्यान्धुः कर्कन्धुः । कुलमटतीति कुलटा । अवागटन्त्यस्मिन्नित्यवटः[14] इति पृषोदरादयः यथाशिष्टोपदेशमनुगन्तव्याः ।

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ[15] वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने वृत्तौ द्वितीयाध्यायस्य द्वितीयः पादः समाप्तः ।

---

१. उह्यतेऽनेनेति वाहनम् इक्षुवाहणं शकटम् । क० म० टि० । २. दाक्षीस्वामिकमित्यर्थः क० म०टि० । ३. आजो थो दस्य ढः । आजौ, परस्य दस्य ढादेशो भवति । आध्यायन्ति तमिति आद्यः क०म० टि० । ४. कपयस्तिष्ठन्त्यस्मिन्निति वा कपित्थः क० म० टि० । ५ उल्यकः क० म० । ६. जीवनस्य क० म० । जीवनं जलं तस्य मूत, पुटबन्धः जीमूतो मेघः । मूङ् मूत आतञ्चने ग्रन्थे, धान्यादीनां बन्धने तृणे इति वैजयन्ती क० म० टि० । ७. बिलं क० म० । ८. बृधु वृद्धाविति धातुस्मरणात् क० म० टि० । ९. मनस इष्ट इति मनीषी क० म० । १०. दुर उद्वासनासद्भावेषु तवर्गस्य टवर्गश्च । दुरादेस्तस्य दाशादिषूत्तरपदेषु उकाराम्तादेशः, उत्तरपदादेश्च तवर्गस्य टवर्गो भवति । कृच्छ्रेण दास्यते नाश्यते दभ्यते दूदासः । दूणापदूदभ इति महोपाध्यायवर्धमानमिश्रः । क० म० टि० । ११. दुष्ठ्याध्यायतीति क० म० । १२. बिटवर्गान् क० म० टि० । १३. वर्णनाशो वर्णस्य लोपः । यथा पृषोदर इत्यत्र तकारस्य । धातोस्तदर्थातिशयेन तेन विशिष्टेन प्रसिद्धेनार्थविशेषेण योगः सम्बन्धः । यथा मह्यां रौतीति मयूर इति विशिष्टेन रवणेन शिखिन्येव सम्भविना योगः । नहि मयूर इति यो यो मह्यां रौति स(स)सर्वं उच्यते । अपि तु कश्चिदेव । अतस्तद्गतमेव रवणमत्र रौतिराह—तदेतत्पञ्चविधं निरुक्तमुच्यते । निश्चयेन पृथक्कृत्य शब्दान्तरार्थात्स्वार्थेनोक्तं कर्म भावो वा तद्विधायकग्रन्थोऽपि निर्वचनरूप उपचारात्तिरुक्तं तस्यार्थे च निरुक्तम् । तेनेह पञ्चविधं निरुक्तम् । निरुक्तग्रन्थसाध्यमित्यर्थः । तदनेनैव सिद्धं प्रतिपत्तव्यम् । क० म० टि० ।

[तृतीयः पादः]

सम्भ्रमेऽसकृत् ॥ २।३।१ ॥ सम्भ्रमः आशु प्रतिपादने प्रयोक्तुस्त्वरणम्, तस्मिन् द्योत्ये यद् वर्तते पदं वाक्यं वा तदसकृदनेकवारं प्रयुज्यते । अहिरहिरहिः । बुध्यस्व बुध्यस्व बुध्यस्व । हस्त्यावच्छति हस्त्यावच्छति । लघु पलायध्वं लघु पलायध्वम् । सम्भ्रमादौ पदं वाक्यं वा वर्तते न तदवयव इति नासावसकृद् द्विर्वा भवति । तच्च पदं वाक्यं वा निष्पन्नं तत्र वर्तते नापरिनिष्पन्नमिति [1]अत्वादिषु कृतेषु तदसकृद् द्विर्वा भवति नाकृतेष्विति वेदितव्यम् । तेन द्रोग्धा, द्रोग्धा, द्रोढा, द्रोढा, इत्येव भवति । न द्रोग्धा द्रोढा द्रोढा द्रोग्धेति ।

भृशाभीक्ष्ण्याविच्छेदे प्राग्द्विः ॥ २।३।२ ॥ क्रियाया. साकल्यमवयवक्रियाणा कात्स्न्यं भृशार्थः । पौनःपुन्यमावृत्तिरामंस्य सातत्यम् । क्रियान्तरैरव्यवधानमविच्छेदः । एतेषु द्योत्येषु यत्पदं वाक्यं वा वर्तते तत्प्रागतिशायिकादे. पूर्वमेव द्विरुच्यते । भृशे—लुनीहि लुनीहीत्येवायं लुनाति । अभीष्वाभीष्वेत्येवायमधीते । आभीक्ष्ण्ये—भोजं भोजं व्रजति । भुक्त्वा भुक्त्वा व्रजति । अविच्छेदे—पचति पचति । प्रपचति प्रपचति । ब्रह्मचर्यं चरति चरति । एतेष्विति किम् ? लुनीहि । भुक्त्वा । व्रजति । पचति । यङ् भृशादावेवार्थ इति यङन्तं न तत्रैव द्विरुच्यते । अन्यत्र तु यङ्यन्यत्र द्विर्भवत्येव । [2]पापच्यते भृशमविच्छेदेन पचतीत्यर्थः । गेहानुप्रवेशमास्ते[3] इत्यादौ समासेनैवाभीक्ष्ण्यं बोध्या च गम्यते । प्रागिति किम् ? [4]पचति पचतितराम् । तिष्ठति । अत्र प्राग्ग्रहणात् पूर्वमेवातिशायिकाद्द्विर्वचनम् । अन्यथा ह्यनियमः स्यात् ।

नानावधारणानुपूर्व्या[5]धिक्ये ॥ २।३।३ ॥ नानाभूतानां भेदेनेयत्ता[6]वच्छेदो नानावधारणम् । क्रमानुल्लङ्घनमानुपूर्व्यम् । प्रकर्ष आधिक्यम् । एतेषु यद्वर्तते शब्दरूपं तद्द्विरुच्यते । नानावधारणे—अस्मात् कार्षापणादिह[7] भवद्भ्या मार्षं[8] माषं देहि, प्रत्येकं माषमात्रं दातव्यम्, नाधिकमित्यर्थ । अत्र कार्षापण-सम्बन्धिनो माषा न साकल्येन दित्सिता, इति न बोध्साऽस्ति । नानाग्रहणं किम् ? अस्मात्कार्षापणादिह भवद्-भ्यां माषं देहि । एकमेवेत्यर्थः । अवधारण इति किम् ? इह भवद्भ्या माषं देहि । द्वौ त्रीन् वा देहि । आनु-पूर्व्ये मूले मूले स्थूलाः । अग्रे अग्रे सूक्ष्माः । ज्येष्ठं ज्येष्ठमनुप्रवेशय । मूलाद्यानुपूर्व्येणैषा स्थौल्यादय इत्यर्थः । अत्र मूलादीनां स्थौल्यादीना चानेकरूपत्वात् सर्वकनीयसत्वाज्ज्येष्ठत्वाद्बोध्सा नास्ति । आधिक्ये—नमो नमः । अधिकं नम इत्यर्थः । कन्या दर्शनीया दर्शनीया । अहो दर्शनीया, अहो दर्शनीया । मह्यं रोचते मह्यं रोचते । एष तवाञ्जलिः, एष तवाञ्जलिः । योगविभागात्प्रागिति निवृत्तम् । तेन मह्यं रोचतेतरां मह्यं रोचतेतरा-मित्यपि भवति ।

डतरडतमौ समानां स्त्रीभावे ॥ २।३।४ समाना केनचिद्गुणेन तुल्यत्वेन सम्प्रधारिताना स्त्रीलिङ्गभावे डतरान्तं डतमान्तं च यद्वर्तते शब्दरूपं तद्द्विरुच्यते । उभाविमावाढ्यौ कतराकतराऽनयोराढ्यता किं वैकृता किं पौरुषकृतेत्यर्थः । कतमा कतमाऽनयोराढ्यता किं साधनसम्बन्धकृता उत रत्नसम्बन्धकृता । आहोस्विदुभयसम्बन्धकृतेत्यर्थः । एवं सर्वे इम आढ्याः कतरा कतरा, एषामाढ्यता । कतमा कतमा, एषामाढ्यता । सर्व इम आढ्या. यतरा यतरा—एषा विभूतिः ततरा ततरा वक्तव्या । यतमा यतमा, एषा ऽभ्यर्हतमा ततमा वक्तव्या । डतरडतमाविति किम् ? उभाविमावाढ्यौ काऽनयोराढ्यता । अन्यस्यापि दृश्यते । उभाविमावाढ्यौ कीदृशी कीदृशी अनयोराढ्यतेत्येके । समानमिति किम् ? आढ्यौऽयं कतरास्या-कृष्णा कतमास्याढ्यता । स्त्रीग्रहणं किम् ? उभाविमावाढ्यौ कतरोऽनयोर्विभवः । अत्रापि दृश्यत इत्येके । भाव-

---

१. ह्यस्त्वादिषु क० म० । २. पापच्यते पापच्यते क० म० । ३. गेहं गेहं प्रवेशमास्ते क० म० टि० । ४. मूलोदाहरणमेतत् न प्रत्युदाहरणम् । क० म० टि० । ५. नु पूर्व्या–क० म० । ६. -त्ता परि–क० म० । ७. कार्षापणः कर्षिकः स्यात् क० म० टि० । ८. मीयते ज्ञायते–उपयुक्तेऽनेनास्मिन्या काकणीचतुष्टयमिति माषः । क० म० टि० ।

ग्रहणं किम् ? उभाविमौ लक्ष्मीमन्तौ कतराऽनयोर्लक्ष्मीः । कतमाऽनयोर्लक्ष्मीः । कतराऽनयोराढ्यतेत्येवं प्राप्ते स्वार्थिकं द्विर्वचनम् ।

पूर्वप्रथमाद्यन्यतोऽतिशये ॥ २।३।५ ॥ पूर्वशब्दः प्रथमशब्दश्चान्यतोऽतिशये तरबर्थस्य प्रकर्षे द्योत्ये द्विरुच्यते । पूर्वं पूर्वं पुष्प्यन्ति । प्रथमं प्रथमं पच्यन्ते । अन्यैकयः पूर्वतरं पुष्प्यन्ति प्रथमतरं पच्यन्ते इति[1] । अन्यत इति किम् ? पूर्वतरं पुष्प्यन्ते । अत्र स्वव्यापारापेक्षोऽप्यतिशयो गम्यते । न तावदिमे क्रियान्तरिणः यावत्पुष्पिताः न तावदिमे पुष्पिताः यावत्पक्वा इति । अतिशय इति किम् ? पूर्वं प्रथमम् ।

प्रोपोत्संपादपूरणे ॥ २।३।६॥ प्र उप उत् सम् इत्येतानि शब्दरूपाणि द्विर्भवन्ति पादपूरणे पादस्थेद्द्विर्वचनेन पूर्यते । प्रप्रणम्य जिन भव्य. । समाश्रित्य तपः परम् । उपोपपद्यते श्रेयः । उदुद्गुत्पन्नमहोदयः । पादपूरण इति किम् ? प्रणम्य प्रतिपात्तार्हम् । इद छन्दसीति कश्चित् ।

स्वाम्यीप्येऽधोऽध्युपरि ॥ २।३।७ ॥ अधस् अधि उपरि इत्येतानि शब्दरूपाणि द्विर्भवन्ति स्वामीप्ये विवक्षिते । स्वामीप्यं प्रत्यासत्तिः, देशकृता कालकृता वा । अधोऽधो ग्रामम् । अध्यधि ग्रामम् । उपर्युपरि दुःखानि भवन्ति । स्वामीप्य इति किम् ? उपरि चन्द्रमाः । उपरि शिरसो घटः । इत्यत्रोत्तरावधेर्यत्नाद्यं विवक्षितं न स्वामीप्यमिति न भवति । स्वामीप्य इति वक्ष्यामीति सूत्रम् । हाधिक्समयानिकषोपर्युपर्यध्वोष इत्यतो[2] द्विर्वचनयतोर्वविशेषण स्यात् । यथायथमिति मकारान्तमव्ययम् । यथास्वमित्यर्थः । आधिक्यते इति यथास्वे यथाऽमिति नारभ्यते ।

वीप्सायाम् ॥ २।३।८ ॥ बहूना सजातीयानामर्थानां साकल्येन प्रत्येकं क्रियादिभिर्युगपत् प्रयोक्तुराप्तुमिच्छा वीप्सा, तस्या यद्वर्तते शब्दरूप तद्द्विरुच्यते । वृक्षं वृक्षं सिञ्चति । ग्रामो ग्रामो रमणीयः । योद्धा योद्धा क्षत्रिय. । ग्रामे ग्रामे पानीयम् । आढ्यतरमाढ्यतरमानय । कटकटश्चित । पृथक्संख्यानिवृत्तये बहुवचनम् । इह तु प्रत्यर्थं शब्दनिवेश इति[3] समासेनैव वीप्साया गतत्वाद्द्विर्वचनं न भवति । नानाव्यवहारणादिसूत्रे वीप्साग्रहणमकृत्वेह करणमुत्तरार्थम् ।

पृथ्लुक् चैकस्यादौ सुपः ॥ २।३।९ ॥ एकशब्दस्य वीप्साया द्विरुच्यमानस्यादौ या पूर्वोक्तिस्तस्य तस्य सुपः पृथ्लुग् भवति । एकैक । एक एक । एकैका । एकैकस्याम् । एकएका । एकएकस्याम् । एकैकस्याः । एकएकस्या. । शकार. सर्वादेशार्थ । पकार पुम्भावार्थ. । पित्त्वे हि पित्त्वानुबन्धकरणसामर्थ्यादतद्विधेऽपि पुम्भाव. । अभेदाश्रयणे सुपर इति न सर्वादि सव इति स्यात् । उत्तरार्थश्च चकार. । उत्तरत्र पृथ्लुक् द्विर्वचनयोः समुच्चयार्थ. । इह तु द्विर्वचनं पूर्वेणैव सिद्धम् । पृथ्लुङ् मात्रं विधीयते । आदाविति किम् ? उत्तरोक्तौ मा भूत् । सुप इति किम् ? एकस्यै[4] मा भूत् ।

द्वन्द्वं वा ॥ २।३।१० ॥ द्वन्द्वमिति वीप्साया द्विरुच्यमानस्य द्विशब्दस्यादौ सुप. पृथ्लुग् इकारस्य अम्भाव., उत्तरत्र अत्य सुपश्च अम्भावो वा निपात्यते । द्वन्द्व तिष्ठतः । द्वौ द्वौ तिष्ठतः । परस्परसाकल्यार्थोऽधो द्वन्द्व हीनानि । द्वाभ्यां द्वाभ्यां हीनानि । द्वन्द्व युद्धं वर्तते[5] द्वयोर्द्वयोर्वा युद्ध वर्तते । द्वन्द्वं कृतम्—द्वाभ्यां द्वाभ्यां कृतम् । द्वन्द्वं स्थितम्—द्वयोर्द्वयो स्थितम् ।

मर्यादोक्तिव्युत्क्रान्तियज्ञपात्रप्रयोगरहस्ये ॥ २।३।११ ॥ मर्यादोक्तिव्युत्क्रान्तिर्यज्ञपात्रप्रयोगो रहस्यमित्यतस्त्रयेषु द्विशब्दस्य द्विर्वचनमादौ सुप. पृथ्लुग् इकारस्याम्भाव उत्तरत्रात्यं सुपश्चाम्भावौ विध्यं निपात्यते । मर्यादोक्तौ—[6]आचतुरं द्वौमे पशवो द्वन्द्वं मिथुनायन्ते । माता पुत्रेण पौत्रेण तत्पुत्रेण च । मिथुनीभवन्तीत्यर्थः । उक्तिग्रहणं शब्दोपादाया मर्यादाया यथा स्यात् । प्रकरणादिगम्यायां मा भूदिति ।

---

१. इत्यर्थं क० म० । २. प्रतिपत्तौ क० म० । ३. संक्षेपेण क० म० टि० । ४. एकशब्दस्य प्रकृतेरित्यर्थः क० म० टि० । ५. समौ चात् क० म० टि० । ६. द्वयोर्द्वयोर्वर्तते क० म० टि० । ७. तदर्थं गुणं द्वन्द्वशब्दस्य वाच्यम् । इतरे विषयभूता. क० म० टि० । ८. चतुर्थं विहाय प्रथमाद्यन्तयोर्ग्रहणम् । क० म० टि० ।

व्युत्क्रान्तौ पृथगवस्थाने—द्वन्द्वं व्युत्क्रान्तः । द्वैरावेण पृथगवस्थित इत्यर्थः । वशाप्रप्रयोगे—द्वन्द्वं वशामाप्नोति ह्युवर्तित । रहस्ये—द्वन्द्वं मन्त्रयन्ते । द्वन्द्वं मन्त्रितेन रहस्येनेत्यर्थः । द्वन्द्वः समासः । [1]द्वन्द्वानि [2]सहन्त इति शब्दान्तरम् ।

लोकज्ञातेऽत्यन्तसाहचर्ये ॥ २।३।१२ ॥ लोकज्ञातेऽत्यन्तसाहचर्ये द्विरुच्यमानस्य द्वन्द्वमिति पूर्वपदस्य निपात्यते [3] । द्वन्द्वं नारदपर्वतौ । द्वन्द्वं रामकृष्णौ । द्वन्द्वं वसुदेवजासुदेवौ । लोकज्ञात इति किम् ? द्वौ देवदत्तजिनदत्तौ । अत्यन्तसाहचर्य इति किम् ? द्वौ युधिष्ठिरार्जुनौ । [4]द्वन्द्वमिति नपुंसकं वेदितव्यमनुप्रयोगे नपुंसकार्थम् ।

आबाधे ॥२।३।१३॥ आबाधः पीडाप्रयोक्तृधर्मस्तस्मिन् विषये वर्तमानं शब्दरूपं द्विरुच्यते तत्र चादौ पूर्वोक्तौ सुप. प्लुग् भवति । ऋक् ऋक् । पूः पूः । न न करोति । सु सुगतम् । गतगतः । नष्टनष्टः । गतगता । नष्टनष्टा । अष्टमी अष्टमी । ऋगादेर्द्विरुच्चारणाविना पीड्यमानः प्रयोक्ता एवं प्रयुङ्क्ते । अष्टमी अष्टमी इति इत्यादयुपम्भाव [5] ।

रिद्गुणः सदृशे वा ॥ २।३।१४ ॥ गुणशब्दो गुणे गुणिनि वा मुख्यसदृशे वर्तमानो वा द्विरुच्यते । तत्र चादौ पूर्वोक्तसुपः प्लुग्भवति, सा च प्लुग् रिद् भवति । शुक्लशुक्लं रूपमस्य । शुक्लशुक्लः पटः । पटुपटु. । पटुपटुर्वा । कालककालिका । शुक्लादिसदृशमपरिपूर्णगुणमेवमुच्यते । रिद्ग्रहणमरित्स्वार्थ इति पर्युदासार्थम् । गुण इति किम् ? [6]अग्निर्माणवकः । गौर्वाहीकः । सदृश इति किम् ? शुक्लः पटः । व्याघ्रग्रहणाज्जातीयरपि भवति । शुक्लजातीयः । पटुजातीयः ।

प्रियसुखे चाकृच्छ्रे ॥ २।३।१५ ॥ प्रियसुखशब्दावकृच्छ्रे क्लेशाभावेऽर्थे वा द्विरुच्येते, तत्र चादौ पूर्वोक्त. सुप· प्लुग् भवति । प्रियप्रियेण ददाति । सुखसुखेनाधीते । सुखेनाधीते । अक्लेशेनेत्यर्थः । चकारः प्लुक् च सुप इत्यस्यानुवर्षणार्थः । अकृच्छ्र इति किम् ? प्रियः [7]पुत्रः । सुखो रथः ।

वाक्यस्य परिवर्जने ॥ २।३।१६ ॥ वाक्यस्यावयवो यः परिशब्दः सः पदस्यावयवो न भवति स वर्जने वा द्विरुच्यते । परि परि त्रिगर्तेभ्यो वृष्टो देवः । परि त्रिगर्तेभ्यो वृष्टो देवः । परि परि सौवीरेभ्यः । परि सौवीरेभ्यः । परि परि सार्वसेनीभ्यः । परि सार्वसेनीभ्यः । वाक्यस्येति किम् ? परि त्रिगर्तं वृष्टो देवः । वाक्यस्यैवेत्यवधारणाद्विज्ञानात् पदावयवत्वं व्यवच्छिद्यते । परीति [8] किम् ? अप त्रिगर्तेभ्यो वृष्टो देवः । वर्जन इति किम् ? साधुर्देवदत्तो मातरं परि ।

आद्यामन्त्र्यं सम्मत्यसूयाकोपेऽवन्त्यस्य प्लुतः ॥ २।३।१७ ॥ आदाविति वर्तते । कार्येष्वाभिमुख्यं सम्मतिः पूजनं वा । परगुणानामसहनमसूया । कोपः क्रोधः । एतेष्वर्थेषु वर्तमानस्य वाक्यस्यादिभूतमामन्त्र्यमामन्त्रणार्थं पदं द्विरुच्यते तत्र च द्विर्वचने आदौ पूर्वोक्तो, अन्त्यस्य मध्येऽन्त्योऽच् प्लुतो वा भवति । सम्मतौ माणवका३ माणवक माणवक माणवक । अभिरूपका३ अभिरूपक अभिरूपक अभिरूपक । शोभनखट्वसि माणवक । राजा३न् राजन् राजन् राजन् । शोभनखट्वसि राजा । असूयायां माणवका३ माणवक माणवक माणवक । अभिरूपका३ अभिरूपक अभिरूपक रिक्तं ते आभिरूप्यम् । शक्तिके३ शक्तिके शक्तिके शक्तिके । यष्टिके३ यष्टिके यष्टिके यष्टिके रिक्ता ते शक्तिः । कुत्सनेऽप्यसूयाऽस्त्येव असूयन्नेव हि कुत्सयते ।

---

१. द्वन्द्व कलहवुग्मसमासादि द्विशब्दस्य निपात्यते । द्वन्द्वः कलहः । द्वन्द्वं युद्धम् । द्वन्द्वः समासः । द्वन्द्वानि सहते दुःखानि सहते इत्यर्थः । इति वर्द्धमानोपाध्यायः । क० म० टि० । २. सहते इति क० म० । ३. द्वन्द्वं सूर्याचन्द्रमसावित्यपि वर्द्धमानीयवृत्तौ क० म० टि० । ४. द्वन्द्वं इति क० म० । ५. यद्युत्तदिदितकोपा-व्याख्याः इति पुंवद्भावभाव्यः क० म० टि० । ६. माणवकेऽग्निभारोपो हि तद्भाव्यार्थो भवति । न च प्रधानम् । आरोपितस्याग्नेरप्रधानत्वात् । तत्र तदादेरिप्रधानभूत एव । गौणमुख्ययोः मुख्ये सम्प्रत्यय इति न्यायविरोधात् । इति तत्त्वार्थश्लोकवार्तिकालङ्कारे क० म० टि० । ७. अत्र कृच्छ्रविपर्यये प्रियसुखशब्दौ । किं तर्हि ? द्रव्ययोः सुखरथयोः क० म० टि० । ८. परीति क० म० ।

कोपे—माणवका३ माणवक माणवक । अविनीतका३ अविनीतक अविनीतक अविनीतक—इदानीं ज्ञास्यसि जाल्म । आदिग्रहणं किम् ? शोभनः खल्वसि माणवक । आमन्त्र्यमिति किम् ? उदारो देवदत्तः । सम्भ्रमसूयाकोप इति किम् ? देवदत्त गामभ्याज शुक्लाम् । अक्षिवति किम् ? हलन्तस्यापि यथा स्यात् । अन्त्य इति किम् ? आदिर्मध्यो वा मा भूत् । चकारः समुच्चयार्थः । अन्यथा प्लुत एव स्यात् न द्विर्वचनम् ।

भर्त्सनेऽन्यतरस्याम् ॥ २।३।१८ ॥ भर्त्सनं दण्डाविष्करणम्, तत्र वर्तमानस्य वाक्यस्यादिभूतमामन्त्र्यं पदं द्विरुच्यते तत्र चान्यतरस्यां पूर्वस्यामुत्तरस्या वा उक्तौ अक्षवन्त्योऽच् प्लुतो वा भवति । चोरा३ चोर चोर । चोरा३ चोर चोर । दस्यो३ दस्यो दस्यो, दस्यो३ दस्यो दस्यो घातयिष्यामि त्वा बन्धयिष्यामि त्वा ।

तिङोऽपेक्षस्याक्षेः ॥ २।३।१९ ॥ भर्त्सने वर्तमानस्य वाक्यस्याऽऽदौ वा मध्ये योऽन्त्योऽच् तिङन्तस्य पदस्यापेक्षस्य वाक्यान्तराकाङ्क्षस्य सम्बन्धी प्लुतो वा भवति, अक्ष इत्यनेन निपातेन[1] योगे सति । अक्ष कूजा३ इदानी ज्ञास्यसि जाल्म । अक्ष कूज इदानी ज्ञास्यसि जाल्म । अक्ष व्यावहारा३ इदानी ज्ञास्यसि जाल्म । अक्ष व्यावहार इदानी ज्ञास्यसि जाल्म । तिङ इति किम् ? अक्ष देवदत्त मिथ्या वदसि । अपेक्षस्येति किम् ? अक्ष पच । अक्ष सक्तून् पिब । अक्षेनेति किम् ? देवदत्त कूज इदानीं ज्ञास्यसि जाल्म । भर्त्सन इति किम् ? अक्षाधोष्व मोदकं ते दास्यामि ।

क्षियाशीः प्रैषे ॥ २।३।२० ॥ क्षिया[2] आचारभ्रंशः[3], आशी. प्रार्थनाविशेषः, प्रैषः अमत्कारपूर्विका व्यापारणा, एतेषु वर्तमानस्य वाक्यस्य योऽन्त्योऽच् वाक्यान्तराकाङ्क्षस्य तिङन्तस्य पदस्य सम्बन्धी(सः)प्लुतो वा भवति । क्षियायाम्—स्वयं रथेन यातीा३ उपाध्यायं पदाति गमयति । स्वयं रथेन याति उपाध्याय[4] पदाति गमयति । स्वयं ह्योदनं भुङ्क्तेा३ उपाध्यायं सक्तून् पाययति । स्वयं ह्योदनं भुङ्क्ते उपाध्यायं सक्तून् पाययति । आशिषि—पुत्राश्च लप्सीष्ठा३ धनं च तात । पुत्राश्च लप्सीष्ठा धनं च तात । प्रैषे—कटं च कुरु३ ग्रामं[5] च गच्छ । कटं च कुरु ग्रामं[6] च गच्छ । त्वं ह पूर्वं ग्रामं गच्छा३ देवदत्तो दक्षिणम् । त्वं ह पूर्वं गच्छ देवदत्तो दक्षिणम् । तिङ इति किम् ? भवता खलु कटः कर्तव्यः ग्रामश्च गन्तव्यः । अपेक्षस्येति किम् ? दीर्घं ते आयुरस्तु ।

ओमः प्रारम्भे ॥ २।३।२१ ॥ प्रारम्भे प्रणामादेरभ्याधाने[7] वर्तमानस्य ओशब्दस्य अक्षवन्त्योऽच् प्लुतो वा भवति । ओं३ ऋषभं पवित्रम् । ओ ऋषभं पवित्रम् । ओ३ अग्निमीडे पुरोहितम् । प्रारम्भ इति किम् ? ओं ददामि । अभ्युपगमे ।

प्रतिश्रवणनिगृह्यानुयोगे ॥ २।३।२२ ॥ प्रतिश्रवणं परोक्तस्याभ्युपगमः, स्वयं प्रतिज्ञानं श्रवणाभिमुख्यं च । निगृह्य स्वमतात्प्रच्याव्यानुयोगो निग्रहपदस्याविष्करणं निगृह्यानुयोगः, एतयोर्वर्तमानस्य वाक्यस्याक्षवन्त्योऽच् प्लुतो वा भवति । अभ्युपगमे—ग्राम्ये देहि भोः[8] हन्त ते ददामी३ । हन्त ते ददामि । स्वयं प्रतिज्ञाने । नित्यः शब्दो भवितुमर्हतीा३ । नित्यः शब्दो भवितुमर्हति । श्रवणाभिमुख्ये—भो देवदत्त किं भणसि[9]३ । निगृह्यानुयोगे—नित्यः शब्द इत्यात्था३ । नित्यः शब्द इत्यात्थ । नित्यः शब्द इति केनचित् प्रतिज्ञातं तमुपपत्तिभिर्निगृह्य साभ्यसूयकमेवमनुयुङ्क्ते : एवमद्य श्राद्धमित्यात्था३ । अद्य श्राद्धमित्यात्थ । अद्यामावास्येत्यात्था३ । अद्यामावास्येत्यात्थ ।

१. निपातनेन क० म० । २. क्षये क्षिया इत्यमरः क० म० टि० । ३. आचारभ्रंश इत्यर्थः । क० म० टि० । ४. -यमोद—क० म० । ५. अहेतुवादज्ञाप्येच्छाः३ हेतुवादं च तात । अहेतुवादं ज्ञाप्येच्छा हेतुवादं च तात·क० म० । अहेतुवाद—आगमवाद क० म० टि० । हेतुवाद—युक्तिवाद । वक्तव्यनाम्ने यद्धेतोः साध्यं तद्धेतुभाषितम् । आप्ते वक्तरि तद्वाक्यात्साध्यमागमसाधितम् । इत्यागमीमांसायाम् । क० म० टि० । ६ ग्रामं गच्छ क० म० । ७. स्यादभ्याधानमुद्घातस्त्वारम्भ इत्यमरः क० म० टि० । ८. स्वम् क० म० टि० । ९. 'भृञ् सहने' ए दादी अतो हेर्लुक् क० म० टि० ।

चितीवे ॥ २।३।२३ ॥ इवार्थे उपमायां वर्तमाने चिद् इत्येतस्मिन्निपाते प्रयुज्यमाने वाक्यस्याक्वन्त्योऽच् प्लुतो वा भवति। अग्निश्चिद्वूयाऽ३त्[1]। अग्निश्चिद्वूयात्[2]। अग्निरिवेत्यर्थः। राजाचिद्वूयाऽ३त्। राजाचिद्वूयात्। राजेवेत्यर्थः। चितीति किम्? अग्निरिव भूयात्। इवेति किम्? कथंचिदाहुः। अत्र चित् कुत्सार्थे चितोति रूपसत्ताश्रयणादश्रयोगे न भवति। अग्निर्माणवको भूयात्[3]।

पूर्वस्य विचारे ॥ २।३।२४ ॥ किमिदं स्यात्किमिदमिति तत्त्वविरूपणा विचारः, तत्र वर्तमानस्य पूर्वस्य वाक्यस्याऽक्वन्त्योऽच् प्लुतो वा भवति। अहिर्नू३ रज्जुर्नु। अहिर्नु रज्जुर्नु। स्थाणुर्नू३ पुरुषो नु। स्थाणुर्नु पुरुषो नु। पूर्वस्येति किम्? परस्य मा भूत्।

हेः प्रश्नाख्याने ॥ २।३।२५ ॥ प्रश्नस्याख्याने पृष्टप्रतिवचने वर्तमानस्य वाक्यस्य योऽक्वन्त्योऽच् हि इत्येतस्य निपातस्य[4] सम्बन्धी स प्लुतो वा भवति। अकार्षीः कटं देवदत्त? अकार्षं ह्री३। अकार्षं हि। अलावीः केदारं देवदत्त? अलाविषं ह्री३। अलाविषं हि। हेरिति किम्? अकार्षीः कटं देवदत्त? करोमि ननु। प्रश्नग्रहणं किम्? कटं देवदत्त अकार्षं हि। प्रश्नपूर्वकं न भवति। आख्यानग्रहणं किम्? देवदत्तं कटमकार्षीर्हि। उत्तरेण सिद्धे नियमार्थं वचनम्।

प्रश्ने च प्रतिपदम् ॥ २।३।२६ ॥ प्रश्ने प्रश्नाख्याने च वर्तमानस्य वाक्यस्य सम्बन्धिनः तदवयवस्य पदस्याक्वन्त्योऽच् प्लुतो वा भवति। प्रश्ने—अगमाऽ३: पूर्वाऽ३न् ग्रामाऽ३न् देवदत्ताऽ३। अगमः पूर्वान् ग्रामान् देवदत्त। प्रश्नाख्याने—अगमाऽ३: पूर्वाऽ३न् ग्रामाऽ३न् देवदत्ताऽ३। अगमः पूर्वान् ग्रामान् देवदत्त। प्रश्ने चेति किम्? देवदत्त ग्रामं गच्छ। प्रतिपदमिति किम्? वाक्यस्यैवाक्वन्त्यः प्लवेत।

दूरादामन्त्र्यस्य गुरुर्वैकोऽनृत् ॥२।३।२७॥ वाक्यस्य योऽक्वन्त्योऽच् दूरादामन्त्र्यस्य सम्बन्धी, अनन्त्यो वा लुकारः ऋकारवर्जितश्च गुरुरेकस्तदामन्त्र्यस्यैव सम्बन्धी स प्लुतो वा भवति। आगच्छ भो माणवक वलकाऽ३। आगच्छ भो माणवक वलक। आगच्छ भोः वलृप्तशिखाऽ३। आगच्छ भो वलृप्तशिख। आगच्छ भोः वलृप्तशिख। सक्तून् पिब देवदत्ताऽ३। सक्तून् पिब देऽ३वदत्त। सक्तून् पिब देवदाऽ३त्त। सक्तून् पिब देवदत्त। पलायस्व देवदत्ताऽ३। पलायस्व देऽ३वदत्त। पलायस्व देवदाऽ३त्त। पलायस्व देवदत्त। दूरादिति किम्? शृणु देवदत्त। यत्र प्रकृतात् प्रयत्नात् प्रयत्नविशेष आश्रीयमाणे सन्देहो भवति श्रोष्यति न श्रोष्यतीति तद् दूरम्। आमन्त्र्यस्येति किम्? आगच्छतु देवदत्तः। प्रधाने कार्यसम्प्रत्ययादिह न भवति। आगच्छ भोः कपिलक माणव। माणवेति कपिलकेत्यस्य विशेषणम्। गुरुरिति किम्? लघुर्मा भूत्। वाग्रहणमक्वन्त्याचा सह गुरोरयोगपद्यार्थम्। एक इति अनेकस्य गुरोरयोगपद्यार्थम्। लुकारग्रहणमनृदिति प्रतिषेधनिवृत्त्यर्थम्। इदमेव ज्ञापकम् ऋवर्ण-लृवर्णयोरभेदेन सङ्ग्रहणस्य[5]। अनृदिति किम्? कृष्णमित्राऽ३। कृष्णमी३त्र। कृष्णमित्र। ऋकारस्य न भवति। तकारः किम्? मातृऽ३कारः। अनृदिति गुरुविशेष्यते नाक्वन्त्यः। तेनेह न भवति—आगच्छ भो भर्तृ३। वाक्यस्याक्वन्त्य इति च वचनादिह न भवति। देवदत्त अहो आगच्छ। अभिपूजिते प्लुतमेके प्राहुः। तदपरे नेच्छन्ति। अनुदात्तप्रश्नान्ताभिपूजितयोरिति नानेन प्लुतो विधीयते। किन्तु दूराद्[6] तादिविषयस्यानुदात्तत्वमात्रमित्याहुः।

हे हैचेवामेत्र ॥ २।३।२८ ॥ दूरादामन्त्र्यस्य सम्बन्धिनौ यौ हे-हैशब्दौ; कौ च तौ? यौ तदामन्त्रणे वर्तेते तयोः प्रयुज्यमानयोः तयोरेव[7] वाक्ये यत्र तत्रस्थयोरन्त्यः प्लुतो वा भवति। हे३ देवदत्त आगच्छ। हे देवदत्त। देवदत्त हे३। देवदत्त हे। है३ देवदत्त आगच्छ। है देवदत्त। देवदत्ता है ३, है देवदत्त। हे-है-

---

१. चिद्वूयाद् क० म०। २. चिद् वूयाद् क० म०। ३. भवात्। ४. निपातस्य म०। ५. सर्वादिपठितभवतुशब्दस्य सम्बोधन एव। तथापि एकवचनस्यैव ओरित्यादेशत्वाद्प्रधानत्वाद् स्वातन्त्र्याभावाद्वा तद्धर्मत्वाद्वा। क० म० टि०। ६. ग्रहणस्य क० सू०। ७. दूराद्भूतादि क० म०। ८. देवं क० म०।

भिन्नवचनकारणस्य भिन्नवाचार्थम् । एवमिति स्थाननिर्देशार्थम् । बहुवचनं ह + इ = हे ह + ए = है इति लाक्षणिकयोरपि ग्रहणार्थम् । एकारोऽन्यस्य प्लुतव्युदासार्थः । अत एव चैकारादत्र तत्रस्थयोः प्लुतो विज्ञायते ।

ओश्च प्रत्यभिवादे चास्त्रीशूद्रे ॥२।३।२९॥ यद(यौ)भिवाद्यमानौ गुरुः कुशलानुयोजनमाशिषं वा प्रयुङ्क्ते स प्रत्यभिवादः, तस्मिन्नस्त्रीशूद्रविषये वर्तमानस्य वाक्यस्य योऽवन्त्योऽच् ओश्शब्दस्य प्रधानस्य वाक्यस्य सम्बन्धी स प्लुतो वा भवति । अभिवादये देवदत्तोऽहं भोः आयुष्मानेधि भो३ः । आयुष्मानेधि भोः । आयुष्मानेधि देवदत्त भो३ः । आयुष्मानेधि देवदत्त भोः । आयुष्मानेधि देवदत्ता३ । आयुष्मानेधि देवदत्त । अभिवादये गार्ग्योऽहं भोः । आयुष्मानेधि गार्ग्या३ । आयुष्मानेधि गार्ग्य । कुशल्यसि गार्ग्या३ । कुशल्यसि गार्ग्य । भोश्चेति किम् ? देवदत्त कुशल्यसि । देवदत्त आयुष्मानेधि । भोग्रहणमप्रधानार्थम् । तस्मिन् क्रियमाणे । आमन्त्र्यार्थश्चकारः । प्रत्यभिवाद इति किम् ? स्थाली अहं भोः अभिवादये आयुष्मानेधि स्थाली३ अभिवादयिताऽऽह खरकुटीवत्र मम ईकारान्ता संज्ञा । का तर्हि ? दण्डीवन्नकारान्ता स प्रत्यभिवद्यते । आयुष्माने स्थाली३न् । सम्प्रत्याह—ईकारान्तैव मम संज्ञा स प्रत्युच्यते असूयकस्त्वमसि जाल्म न त्वं प्रत्यभिवादमर्हसि भिन्नस्त्व वृषलस्थाली । द्वितीयश्चकारो वेत्यस्यानुकर्षणार्थः । अस्त्रीशूद्र इति किम् ? गार्ग्यहं भोः अभिवादये । आयुष्मती भव गार्गि । तुषजकोऽहं भो', अभिवादये । कुशल्यसि तुषजक ।

पूजाविचारप्रश्ने चादिप्लुतः सन्धेयस्यैचः ॥२।३।३०॥ सन्धेय एच् यः क्वचिदच्छरो भवति तस्मिंश्च विकारमापद्यते तस्य वाक्यस्याश्वन्त्यस्य पूजायां विचारे प्रश्ने प्रत्यभिवादे च प्लुतो भवन् प्रत्यासत्या इकारपर उकारपरश्चाकारः प्लुतो भवति । पूजायां दूरादामन्त्र्यस्येति प्लुतः । शोभनः अल्वसि अग्निभूता३इ पटा३उ । विचारे[1]—वस्तव्यं किं निर्ग्रन्थस्य सागारिका[2]३इ उतानागारिके । प्रश्ने[3]—अगमा३ः पूर्वा३न् ग्रामा३न् अग्निभूता३इ पटा३उ इ अदास्तस्मा[4]३इ प्रत्यभिवादे । आयुष्मानेधग्निभूता३इ पटा३उ । आयुष्मन्तौ स्तः देवदत्तजिनदत्ता३उ । पूजाविचारप्रश्ने चेति किम् ? आगच्छ भोः, अग्निभूते३ । वाक्याश्वन्त्यस्य विज्ञानादिह न भवति । अगमा३ः पूर्वो३ ग्रामो३ देवदत्ता३ । सन्धेयस्येति किम् ? भद्रकोऽसि गौ[5]. । अपाक्षता[6]३मोदना३म् कन्ये[7]३ । अगमा३ः पूर्वा३न् ग्रामा३न् ह्यो३ भो३ः । एच इति किम् ? भद्रिकाऽसि कुमारी३ । प्लुतावैच इदुतावितिं नोच्यते, अन्यथैच एवाभावात् ।

क्षुभदबाफः प्रत्ययस्येयियेयीनायन् ॥२।३।३१॥ छकारादीनां वर्णानां प्रत्ययावयवाना यथासङ्ख्यमीयादय आदेशा भवन्ति । छस्य ईय्—स्वसुश्छः (स्वसुरपत्यं पुमानिति) स्वस्रीयः । घस्य इय्—"क्षत्राद्घः" क्षत्रियः । ढस्य एय्—"दितेश्च ढण्" दैतेयः । खस्य ईन्—"कुलात्खः" कुलीनः । फस्य आयन्—"नडादिभ्यः फण्" नाडायनः । चारायणः । "तिकादेः फ(फि)ञ्" तैकायनिः । कैतवायनिः । प्रत्ययस्येति किम् ? छिनत्ति । घूर्णते । ढौकते । [8]खनति । फक्कति । दध्नटादेशानादेशयोर्घविधिविशेषान्न भवति । ऊरुदघ्नम् । जानुदघ्नम् । षण्ढादयो व्युत्पन्नानि प्रातिपदिकानि ऋतेरीयङ्वचनं वा तिङ[10] वा धातुप्रत्ययानामीयादघादेशो भावस्य प्रत्ययविधौ छादयुच्चारणं लाघवार्थम् ।

इक् ठः ॥२।३।३२॥ प्रत्ययावयवस्य ठकारस्य इक् इत्ययमादेशो भवति । ककारोऽप्रयोगी न देशविध्यर्थः । नापि प्रत्याहारार्थः । "प्रावृषष्ठः" (प्रावृषि जात इति) प्रावृषिकः । ठण् । साक्षिकः । शालाकिकः । प्रत्ययग्रहणं किम् ? पठति । सठति । कर्मठ इति निपातनान्न भवति । योगविभाग उत्तरार्थः ।

---

१. पूर्वस्य विचार इति वा प्लुतः क० म० टि० । २ ठौऽगारान्तात् इति नित्यष्फे ठः । सहस्वैकवचनम् । इकारे परेऽकारः प्लुतो भवति । क० म० टि० । ३. प्रश्ने च प्रतिपदमिति सूत्रेण सर्वत्र प्लुतः । क० म० टि० । ४. तस्मै इत्यत्र तस्य ए इ विभिन्नैवं विधाय पश्चादेकारोऽपि अ इति विश्लेषणीयः । तत्र अकारस्य प्लुतः क० म० टि० । ५. अत्र पचिसर्जनीयपरत्वान्न सन्धेयः क० म० टि० । ६. लुचि मध्यमपुरुषद्विवचनम् क० म० टि० । ७. सम्बुद्धिद्विवचनम् क० म० टि० । ८. स्वसुश्च छः क० म० । ९. खनते क० म० । १०. तिङं क० म० ।

दोसिसुसुगशब्दकस्मात्तः कः ॥२।३।३३॥ दोस्शब्दाद् इस् उस् इत्येवमन्तादुपपदात् श(ष्ठ)ब्दकस्माच्छब्दवर्जिताच्च तकारान्तात्परस्य प्रत्ययावयवस्य ककारस्य ककारादेशो भवति । दोस्—दोर्भ्यां तरति दोष्कः । इस्—सर्पिष् पथ्यमस्य सार्पिष्कः । वाहिष्कः । उस्—धनुः प्रहरणमस्य धानुष्कः । बाधुष्कः । उक्—निषादकर्म्मा भवः नैषादकर्षुकः । शाबरजाम्बुकः । औष्ट्रक् । मातुरागतं मातृकम् । पैतृकम् । उष्ट्रण् । अशब्दकस्मात्त.—उदश्विता संस्कृतमौदश्वित्यम् । शकृता संस्कृतः शाकृत्कः । वाकृत्कः । शब्दक-स्मात्प्रतिषेधः किम् ? शब्दपूर्वं शाश्वतिकम् । आकस्मिकम् । आशिषा चरति आशिषिकः । उषायां चरति औषिकः इत्यत्र प्रतिषेधोतयोरिसुसोर्ग्रहणाच्च भवति । उसिति [2]वस्तेः विवपि रूपम् । [3]अधिपथ्यो गाधिपिक इत्यत्र लाभयत्वेन स्यानिवद्भावाभावान्न भवति ।

वोरकः ॥२।३।३४॥ वु इत्येतस्य प्रत्ययस्य अक इत्ययमादेशो भवति । औदर्गवकम् । कापटवकम् । कारकः । हारकः । छकारक इति निर्देशादयं धातुप्रत्ययस्यापि भवति । प्रत्ययस्येति किम् ? वुवूर्षते । प्रावु-वूर्षति । वुविधानं लाघवार्थम् ।

लुब्व्योर्वलटौ ॥२।३।३५॥ प्रत्यस्यावयवे कार्ये वलि क्वौ च परे वकारयकारयोर्लुब्भवति । (वस्य) । देदिवः । सेसिवः । अचेचिवः । दीदिवान् । दीदिवांसौ । दीदिवांसः । यस्य—ऊतम् । क्रूतम् । ग्लातम् । गोधेरः । पचेन्द् । क्नोपयति । ग्लापयति । कण्डूमिच्छतीति कण्डूयते: कण्डूः । कण्डुवौ । कण्डुवः । लोलूः । भोभूः । लून्युः । पून्युः । व्योरिति किम् ? पक्वः । वलाविति किम् ? लभ्यते । म्लाप्यते । अप्रयोगीत्स्विवविति विग्रहणं वृक्षव् करोतीत्यत्र विच् । प्रत्ययस्येति किम्? उदश्वकः । वकारोपदेशो वञ्चश्च वृश्चतीत्यादयर्थः स्यात्तत्र परिहारान्तरं वक्तव्यं भवति ।

ओदौतोऽवाव्यि ॥२।३।३६॥ ओकारौकारयोः स्थाने यकारादौ प्रत्यये परे अव् आव् इत्येतौ क्रमेणादेशौ भवतः । गव्यति । गव्यते । गव्यम् । लव्यम् । पव्यम् । नाव्यति । नाव्यते । नाव्यम् । ओदौत इति किम् ? रैयति । रैयते । यीति किम् ? गोकाम्यति । नौकाम्यति । प्रत्ययस्येति किम् ? गोयानम् । नौयानम् । गव्यूतिमात्रमध्वानं गत इति अध्वपरिमाणवृत्तिः पुषोदरादिः । उपोयते । औयत । क्रीयमाणिः । पीयमाणिः इत्यत्रासिद्धं बहिरङ्गमन्तरङ्ग इति न भवति ।

क्यच्व्यस्वक् सन्लालसायाम् ॥२।३।३७॥ क्यचि यिप्रत्यये परे पूर्वस्य असक् सक् इत्येतावाग-मौ भवतो लालसाया गम्यमानायाम् । लालसा जिघत्सा, भक्षणे वृद्धिः । दधीच्छति लालसया दध्यस्यति । मध्यस्यति । दधिस्यति । मधुस्यति । क्षीरस्यति । लवणस्यति । क्यचीति किम् ? काकायते लालसया । लालसायामिति किम् ? दधीयति । मधूयति । क्षीरीयति । लवणीयति ।

धूञश्वयोर्मैथुने ॥ २।३।३८ ॥ धूञ अश्व इत्येतयोर्मैथुने वर्तमानयोः क्यचि असक्सक्आगमौ भवतो लालसायां गम्यमानायाम् । अश्वस्यति गौः । अश्वस्यति वडवा । अश्ववृषावत्र मैथुने मनुष्यादावपि हि प्रयुज्येते । अश्वस्या धूञस्येति मैथुनेच्छापर्यायौ । मैथुन इति किम् ? धूनीयति । अश्वीयति ।

क्षुत्क्षुद्गर्धेऽशनायोदन्यधनायम् ॥ २।३।३९ ॥ अशनाय उदन्य धनाय इत्येते क्यजन्ता निपात्यन्ते यथासंख्यं क्षुत्क्षुद्गर्धेषु वाच्येषु । अशनायति । उदन्यति । धनायति । अशनायधनाययोरित्यापवादः । आद्यं निपात्यते । उदन्योदुदकस्योदन्भावः । क्षुत्क्षुद्गर्ध इति किम् ? अशनीयति । उदकीयति । धनीयति ।

च्वौ वाऽयामव्यवस्थेः ॥ २।३।४० ॥ अस्वार्थस्यानव्ययस्य च्वौ च क्यचि च परे ईकारादेशो भवति । शुक्लीकरोति । शुक्लीभवति । शुक्लीस्यात् । अट्वीकरोति । अट्वीभवति । अट्वीस्यात् । पुत्रीयति ।

---

१. संस्कृतः क० म० । २. वस्तेः क० म० । ३. अधिपथ्यं शकं पथ्यं यस्य सः क० म० टि० । ४. गोधोष्ट्र इत्यादिना सुन् क० म० टि० । ५. पा० सू० ५।१।९३। ग्रहादिपाठात्कः इति वक्तव्यात् क० म० टि० ।

ऋदीयति । अव्येति किम् ? पटूकरोति । पटूयति । अनव्ययस्येति किम् ? दोषाभूतमहः । दिवाभूता रात्रिः ।

चङ्यलेङ् कृति चर्वरीरीर्वौ ॥ २।३।४१ ॥ घीति[1] वर्तते । ऋकारस्य अवर्णस्य यङि लेङ् कृद्-वर्जिते च अकारादौ स्त्री च प्रत्यये परे यथासंख्यं रीरीर्वाऱादेशौ भवतः । ऋतः यङि—(पुनः पुनरतिशयेन वा करोतीति) चेक्रीयते । जेह्रीयते । अलेङ् कृति—पित्रीयति । पित्रीयते । मात्रीयति । मात्रीयते । पित्र्यम् । स्त्री—पित्रीकरोति । पित्रीभवति । पित्रीस्यात् । मात्रीकरोति । मात्रीभवति । मात्रीस्यात् । अवः—यङि—चेक्रीयते । तोष्टूयते । अलेङ् कृति—क्रीयात् । स्तूयात् । भृज्ञायते । सुज्ञायते । मन्तूयति । वल्गूयति । क्रीयते । स्तूयते । स्त्री—शुचीकरोति । शुचीभवति । शुचीस्यात् । पटूकरोति । पटूभवति । पटूस्यात् । ऋत्येतिङ्ग्रहणकारे रीभावापवादो यङ्ग्रहणं रीभावनार्थम् । लेङ्कृत्प्रतिषेधः किम् ? इयात् । चिनुयात् । गुयम् । ध्रुयम् । कुयम् । दित्स्यम् । त्रित्स्यम् । प्रचित्स्येत्यादौ परत्वादस्लु-गादि भवति ।

शिरसोऽप्ये तद्धिते शीर्षन् ॥ २।३।४२ ॥ शिरस इत्येतस्य व्यवर्जिते तद्धिते यिप्रत्यये परे शीर्षन् इत्ययमादेशो भवति । शीर्षण्यः स्वरः । शीर्षण्यो व्रणः । अप्य इति किम् ? हास्तिशीर्ष्या । पैलुशीर्ष्या । अत्र व्यशीर्षादेशयोः स्थानिवद्भावात् शीर्षन्नादेशः स्यात् । अत एव शिरस आदेशः प्रकृत्यवयवस्य हस्तिशीर्ष इत्यादौ विज्ञायते । तद्धित इति किम् ? शिरस्यति । शिरस्यते ।

केशे वा ॥२।३।४३॥ शिरस् इत्येतस्य केशविषये यिप्रत्यये तद्धिते परे शीर्षन्नादेशो वा भवति । (शिरसि भवा इति)—शीर्षण्याः केशाः । शिरस्याः केशाः ।

शीर्षोऽचि ॥२।३।४४॥ शिरस् इत्येतस्याजादौ प्रत्यये तद्धिते परे शीर्ष इत्ययमादेशो भवति । (हस्तिशिरसोऽयमिति)हास्तिशीर्षः । पैलुशीर्षः । मृगशिरसा चन्द्रोयेतेन युक्ता मार्गशीर्षी पौर्णमासी । स्थूलशिरस इदं स्थौलशीर्षम् । अचीति किम् ? शिरस्कल्पम्[2] । तद्धित इति किम् ? शिरसा ।

विन्मतोः श्लुक् णीष्ठेयस्सि ॥२।३।४५॥ विन् मत् इत्येतयोः प्रत्यययोः णि इष्ठ ईयस् इत्येतेषु परतः श्लुग्भवति । स्रग्विणमाचष्टे स्रजयति[3] । अयमेषां स्रग्विणां(अतिशयेन स्रग्वीति) स्रजिष्ठः । अयमनयोः स्रग्विणोः (अतिशयेन स्रग्वीति) स्रजीयान् । स्वग्वन्तमाचष्टे स्वचयति । अयमेषां स्वग्वतां(अतिशयेन स्वग्वानिति) स्वजिष्ठः । अयमनयोस्वग्वतोः(अतिशयेन स्वग्वानिति) स्वजीयान् । कुमुद्वन्तमाचष्टे कुमुदयति अयमेषां कुमुद्वतां (अतिशयेन कुमुद्वानिति) कुमुदिष्ठः । अयमनयोः कुमुद्वतोः(अतिशयेन कुमुद्वानिति) कुमुदीयान् । निर्दिश्यमानस्य प्रत्ययमात्रस्य श्लुक् । अत एव वचनादगुणवचनादपि इष्ठेयस्या ।

कन् वाऽल्पयूनोः ॥२।३।४६॥ अल्प युवन् इत्येतयोर्णीष्ठेयस्सु परतः कन् इत्ययमादेशो वा भवति । (अल्पमाचष्ट इति) कनयति । कनिष्ठः । कनीयान्[4] । अल्पयति । अल्पिष्ठः । अल्पीयान् । युवयति । यविष्ठः । यवीयान् । अल्पार्थं वा ग्रहणम् ।

प्रशस्य श्रः ॥२।३।४७॥ प्रशस्यशब्दस्य णीष्ठेयस्सु परतः श्र इत्ययमादेशो भवति । (प्रशस्यमा-चष्ट इति) श्रयति । श्रेष्ठः । श्रेयान् ।

वृद्धस्य च ज्यः ॥२।३।४८॥ वृद्धशब्दस्य प्रशस्यशब्दस्य च णीष्ठेयस्सु परतः ज्य इत्ययमादेशो भवति । (वृद्धं प्रशस्यं वाचष्ट इति) ज्यायति । ज्येष्ठः । ज्यायान्[5] ।

ज्यायान् ॥२।३।४९॥ ज्यायानिति ज्यादेशात्परस्य ईयस आकारादेशो निपात्यते । (अयमनयोरतिशये-न वृद्ध इति) ज्यायान् । ज्यायसी । ज्यायः ।

---

१. ओदीतोऽवाप्ये इत्यत्र क० म० टि० । २. शिरस्कल्पम् क० म० । ३. ऋन्नाजादेरिति लुचि प्राप्तायां नैकाच इति प्रतिषेधः क० म० टि० । ४. कनीयांस्तु युवाल्पयोः इत्यमरः क० म० टि० । ५. वृद्धमहत्त्वयोर्ज्यायान् इत्यमरः क० म० टि० ।

वर्षः ॥२।३।५०॥ वृद्धशब्दस्य णीष्ठेयस्सु परतः वर्ष इत्ययमादेशो भवति । (वृद्धमाचष्ट इति)वर्षयति । वर्षिष्ठः । वर्षीयान् । एवं वृद्धशब्दस्य द्वैरूप्यं भवति ।

बाढान्तिकयोः साधनेदौ ॥२।३।५१॥ बाढ अन्तिक इत्येतयोर्णीष्ठेयस्सु परतः साध नेद इत्येतावादेशौ भवतः । (बाढमाचष्ट इति)साधयति । साधिष्ठः । साधीयान् । (अन्तिकमाचष्ट इति)नेदयति । नेदिष्ठः । नेदीयान् ।

प्रियस्थिरस्फिरोरुगुरुबहुलतृप्रदीर्घवृन्दारकस्येमि च प्राप्तस्फावर्गबंहद्भ्राघ्रवृन्दम् ॥२।३।५२॥ प्रियादीनां णीष्ठेयस्सु इमनि च परतः यथासंख्यं प्रादय आदेशा भवन्ति । प्रियस्य प्रा–प्रापयति । प्रेष्ठः । प्रेयान् । प्रेमा । स्थिरस्य स्था–स्थापयति । स्थेष्ठः । स्थेयान् । स्थेमा । स्फिरस्य स्फा–स्फाययति । स्फेष्ठः । स्फेयान् । स्फेमा । उरोर्बर्–बरयति । बरिष्ठः । बरीयान् । बरिमा । गुरोर्गर्–गरयति । गरिष्ठः । गरीयान् । गरिमा । बहुलस्य बंहः–बंहयति । बंहिष्ठः । बंहीयान् । बंहिमा । तृप्रस्य त्रप्–त्रपयति । त्रपिष्ठः । त्रपीयान् । त्रपिमा । दीर्घस्य द्राघ्–द्राघयति । द्राघिष्ठ. । द्राघीयान् । द्राघिमा । वृन्दारकस्य वृन्द–वृन्दयति । वृन्दिष्ठः । वृन्दीयान् । वृन्दिमा । प्रियोरुगुरुबहुलशीर्षा. पञ्चैते पृथ्वादिषु पठ्यन्ते । तेनेतरेषां णीष्ठेयोऽर्थमेवोपादानम् । अन्ये दृढादिराकृतिगण इतीमार्थमपीति मन्यन्ते । तथा च प्रयोगः । बहो स्थेमा द्विषामिति ।

रः पृथुमृदुकृशभृशदृढपरिवृढस्थोः ॥२।३।५३॥ पृथु मृदु कृश भृश दृढ परिवृढ इत्येतेषामृकारस्य णीष्ठेयस्सु इमनि च परतः रशब्द आदेशो भवति । प्रथयति । प्रथिष्ठः । प्रथीयान् । प्रथिमा । म्रदयति । म्रदिष्ठः । म्रदीयान् । म्रदिमा । क्रशयति । क्रशिष्ठः । क्रशीयान् । क्रशिमा । भ्रशयति । भ्रशिष्ठः । भ्रशीयान् । भ्रशिमा । द्रढयति । द्रढिष्ठः । द्रढीयान् । द्रढिमा । परिव्रढयति । परिव्रढिष्ठः । परिव्रढीयान् । परिव्रढिमा । केचित् कृतेति पठित्वा व्रढयतीत्यादयपि उदाहरन्ति । एतेषामिति किम् ? म्रक्षयति । म्रक्षिष्ठः । म्रक्षीयान् । म्रक्षिमा । कृष्णयति । कृष्णिष्ठः । कृष्णीयान् । कृष्णिमा । अनृजीयान् । स्यृजीयान् । कृतयति । उरिति किम् ? सर्वस्य मा भूत् ।

बहोर्णीष्ठे भूय् ॥२।३।५४॥ बहु इत्येतस्य णीष्ठेयो भूय् इत्ययमादेशो भवति । भावापवादः । भूययति । भूयिष्ठः । भूयान् । बहोर्णौ । भावयतीति केचित् ।

भूर्लुक्चै ॥२।३।५५॥ बहु इत्येतस्य ईयसादिमनि च परतः भू इत्ययमादेशो भवति अनयोश्चेवर्णस्य लुग् भवति । भूयान् । भूयांसः । भूमा । भू ऊरित्यूकारप्रश्लेषाद्वादेशो न भवति । ऊरिति किम् ? अन्त्यस्य स्यात् ।

स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्रस्य ल्र्वादेरेङ् चेकः ॥२।३।५६॥ स्थूल दूर युवन् ह्रस्व क्षिप्र क्षुद्र इत्येतेषां णीष्ठेयस्सु इमनि च परतः लकाररेफवकारादेर्लुग्भवति एङ् चेकः । स्थूल–(स्थूलमाचष्ट इति) स्थवयति । स्थविष्ठः । स्थवीयान् । दूर–(दूरमाचष्ट इति) दविष्ठः । दवीयान् । युवन्–(युवानमाचष्ट इति) यवयति । यविष्ठः । यवीयान् । ह्रस्व–(ह्रस्वमाचष्ट इति) ह्रसयति । ह्रसिष्ठ. । ह्रसीयान् । ह्रसिमा । क्षिप्रः—(क्षिप्रमाचष्ट इति) क्षेपयति । क्षेपिष्ठः । क्षेपीयान् । क्षेपिमा । क्षुद–(क्षुद्रमाचष्ट इति) क्षोदयति । क्षोदिष्ठः । क्षोदीयान् । ह्रस्वक्षिप्रौ पृथ्वादि । येन नाप्राप्तिन्यायेनान्त्याज्झिलोपोऽनेन बाध्यत इति ल्र्वादेरित्युच्यते । इक इति किम् ? ह्रसयति । क्षिप्रक्षुद्रयोश्च पकारदकारयोर्न भवति ।

अन्त्याज्झेः ॥२।३।५७॥ तृप्रत्ययवन्तस्यान्त्याज्झकारस्यान्यवर्णस्य णीष्ठेयस्सु इमनि च परतो लुग्भवति । कर्तृमन्तमाचष्टे करयति । करिष्ठः । करीयान् । (पटुमाचष्ट इति) पटयति । पटिष्ठ. । पटीयान् । पटिमा ।

---

१. दुःखाद् क० अ० टि० । २. पृथ्वादिषा—क० अ० । ३. -मार्थिमामिति क० अ० । ४. बहोर्णौ क० अ० । ५. अवस्थयन्मुख इति प्राते क० अ० टि० ।

लघयति । लघिष्ठः । लघीयान् । लघिमा । विमलिमा । सम्मलिमा । (मातरमाचष्ट इति) मातयति । मातयिता । भातयति । इत्यत्रानर्थकेत्वात्[1] न भवति ।

नैकाचः ॥२।३।५८॥ एकाचः शब्दरूपस्य योऽन्त्याजादिरवयवस्तस्य णीष्ठेमस्सु इमनि च परतः लुग्न भवति । लघ्विष्यमाचष्टे लघयति । लघ्वितमः । लघिष्ठः । लघ्विवर । लघीयान् । लघ्वन्तमाचष्टे लघयति । लघिष्ठः । लघीयान् । एकाच इति किम् ? बसुमन्तमाचष्टे बसयति । बसिष्ठः । बसीयान् । इमनि चेति किम् ? श्रिये हितः श्रियः । श्रो देवताऽस्य श्रैः स्थालीपाकः । इयान् । कियान् । योगविभागादे[2]रित्यस्यापि प्रतिषेधः । श्रेष्ठ । श्रेयान् ।

दण्डिहस्तिनः फे ॥२।३।५९॥ दण्डिन् हस्तिन् इत्येतयोः फप्रत्यये परेऽन्त्याजादेर्लुग्भवति न । नोपदस्येति प्राप्तिः प्रतिषिध्यते । दण्डिनोऽपत्यं दाण्डिनायनः । हास्तिनायन. । फ इति किम् ? दण्डिना समूहो दाण्डम् । हास्तिकम् ।

वाशिजिह्माश्यश्वाथर्वयूनः फिढखठाके ॥ २।३।६० ॥ वाशिन् जिह्माशिन् अश्वन् अथर्वन् युवन् इत्येतेषां यथासंख्यं फि ढ ख ठ अक इत्येतेषु प्रत्ययेषु परतोऽन्त्याजादेर्लुग्न भवति । वाशिनोऽपत्यं वाशिनायनिः । दोर्वा वृद्धादिति फिञ् । जिह्माशिनोऽपत्यं जैह्माशनेयः । शुभ्रादित्वाद्ढण् । अश्वानमलं गामी(ति) अश्वनीनः । "अश्वानं यलौ" । अथर्वणो बोढाऽध्येता वा आथर्वणिकः । न्यायादित्वाट्ठण् । यूनो भावः यौवनिका[3] । चोरादित्वाद्वुल् । वाश्यादिग्रहणं किम् ? द्विवराजिका । फिढखठाक इति किम् ? युवा प्रयोजनमस्य यौविकम् ।

येनोऽटथे ॥ २।३।६१ ॥ अन् इत्येतदन्तस्य टघवर्जितयप्रत्ययेऽन्त्याजादेर्लुग्न भवति । सामनि साधुः सामन्यः । वेमन्यः । मूर्धनि भवः मूर्धन्यः । तक्नोऽपत्यं तात्क्ष्यः । कुर्वादेर्ल्यः अटचा इत्यतः सानुबन्धेऽपि प्रतिषेधः । य इति किम् ? [4]परमराजि. । अन इति किम् ? क्षत्रियेषु साधुः क्षत्र्य. । अटथ इति किम् ? राज्ञो भाव. कर्म वा राज्यम् ।

अणि ॥ २।३।६२ ॥ अन् इत्येतदन्तस्याणि तद्धितेऽन्त्याजादेर्लुग्न भवति । सुत्वनोऽपत्यं सौत्वनः । याज्ञवनः । साम देवताऽस्य सामनम् । वैमनम् । योगविभाग उत्तरार्थः ।

गाथिविदथिकेशिफणिगणिसंयोगादेरिनः ॥ २।३।६३ ॥ गाथिन् विदथिन् केशिन् फणिन् गणिन् इत्येतेषां संयोग आदिर्यस्य इनस्तदन्तस्य च अणि परेऽन्त्याजादेर्लुग्न भवति । गाथिनोऽपत्यं गाथिनः । वैदथिनः । कौशिनः । फाणिनः । गाणिन· । संयोगादेः—स्तार्क्ष्ण. । मार्द्रिणः । भार्द्रिणः । वार्क्षिण. । पार्क्षिणः । चाक्रिण· । गाथ्यादिग्रहणं किम् ? मेधाविनोऽपत्यं मैधावः । अपत्यार्थोऽयमारम्भ ।

अनपत्ये ॥ २।३।६४ ॥ इञन्तस्यानपत्येऽर्थे योऽण् तस्मिन् परतोऽन्त्याजादेर्लुग्न भवति । सांकोटिनम् । सारविणम् । साम्माजिनम् । गुणिन इदं गौणिनम् । मैधाविनम् । गर्भिणीना समूहो गार्भिणम् । अणीति किम् ? गर्भिणा समूहो गार्भम् । [5]दण्डिना समूहो दाण्डम् । [6]चक्रिणा चाक्रम् । अनपत्य इति किम् ? मैधावः ।

म्नोऽवर्मणः ॥ २।३।६५ ॥ मन् इत्येवमन्तस्याऽनपत्य एवाणि परतोऽन्त्याजादेर्लुग्न भवति वर्मन् शब्दं वर्जयित्वा । चर्मण.च्छन्नश्चार्मणो रथः । साम देवताऽस्य सामनम् । वैमनम् । अणीत्येव सिद्धे म्नोऽन-

---

१. ष्णुअ् स्निहादिभ्यश्च इति यत्प्रत्ययरहितत्वात् क० म० टि० । २. औत्सर्गिक कृत्स्नावयवस्तस्य क्रमः । ३. श्रो विद्वान् सोमजोऽपि च (सोमजो बुधः) क० म० टि० । ४. एतिति सूत्रेऽत्रापि क० म० टि० । ५. न गता यौवनिका ते क० म० टि० । ६. परमराजः क० म० । ७. सुत्वा स्वभिषवे कृते इत्यमरः । सुत्वा(कृताभिषेक इत्यर्थः)सुत्रामपूजित इत्यार्धधम् । क० म० टि० । ८. औत्सर्गिकदण्डिनौ क० म० टि० । ९. चक्री, कुलालवैकुण्ठकोहिग्रामजातिषु क० म० टि० ।

पत्यश्चेति नियमो नापत्य इति निषेधो बाऽयम् । तेन सुधाम्नोऽपत्यं सौधामः । मात्रसामः । भात्रसामः । म्न इति किम् ? सुत्वनोऽपत्यं सौत्वनः । याज्ञवनः । अवर्मण इति किम् ? चक्रवर्मणोऽपत्यं चाक्रवर्मणः ।

ब्राह्मम् ॥ २।३।६६ ॥ ब्राह्मिति ब्रह्मन्शब्दस्यानपत्येऽण्यन्त्याजादेर्लुग्निपात्यते । ब्रह्मण इदं ब्राह्ममस्त्रम् । ब्राह्मो मन्त्रः ।

जातौ ॥ २।३।६७ ॥ जातावभिधेयायां ब्राह्म इत्यनपत्ये एवाण्यन्त्याजादेर्लुग्निपात्यते । ब्राह्मी औषधिः । पूर्वेण सिद्धेऽनपत्य एवेति नियमो नापत्य इति प्रतिषेधो बाऽयम् । तेन ब्रह्मणोऽपत्यं ब्राह्मणः । अजातौ लुगेव—ब्राह्मणोऽपत्यं ब्राह्मो नारदः ।

औक्षम् ॥२।३।६८॥ औक्षमित्युक्षन्शब्दस्यानपत्येऽण्यन्त्यादेर्लुग्निपात्यते ? उक्ष्ण इदम् औक्षं पदम् । अनपत्य इति किम् ? उक्ष्णोऽपत्यमौक्ष्णः ।

सब्रह्मचारिपीठसर्पिकलापिकुथुमितैतलिजाजलिलाङ्गलिशिलालिशिखण्डिसूकरसक्थसुपर्वनोऽपदस्य ॥२।३।६९॥ सब्रह्मचारिन् पीठसर्पिन् कुथुमिन् तैतलिन् जाजलिन् लाङ्गलिन् शिलालिन् कलापिन् शिखण्डिन् सूकरसक्थन् सुपर्वन् इत्येतेषां नकारान्तानां बाऽपदसंज्ञानां तद्धिते परेऽन्त्याजादेर्लुग्भवति । सब्रह्मचारिण इमे साब्रह्मचारा. । पीठसर्पिण इमे पैठसर्पाः । कलापिना प्रोक्तमधीयानाः कालापाः । कुथुमिन इमे कौथुमा. । तैतली, जाजली, लाङ्गली चाचार्याः, तत्कृतोऽपि ग्रन्थ उपचारात्तच्छब्दैरभिधीयते । एते तैतलाः । जाजलाः । लाङ्गलाः । तस्येदं विवक्षायां तु च्छो भवति । शिलालिन इमे शैलालाः । शिखण्डिन इमे शैखण्डाः । सूकरसक्थनः इमे सौकरसक्थाः । सुपर्वणः सौपर्वा. । न.—द्व्यहः । अह्नः । उत्तमाहः । मेधाविनोऽपत्यं मैधावः । मायाव. । [1]और्वलोमिः । शारलोमिः । आग्निशर्मिः । हस्तिना समूहो हास्तिकः । सब्रह्मचार्यादिग्रहणं किम् ? (विद्युत इदमिति) वैद्युतं तेजः । न इत्येव सिद्धे सब्रह्मचार्यादिग्रहणं 'येऽनोऽटचे' इत्यादिप्रतिषेधबाधनार्थम् । अपदस्येति किम् ? मेधाविन्यं मेधाविमयम् । तद्धित इति किम् ? हस्तिना । हस्तिने ।

चर्मणुनः कोशसंकोचे ॥२।३।७०॥ चर्मन् श्वन् इत्येतयोरपदयोः क्रमेण कोशे संकोचे चार्थे तद्धिते परेऽन्त्याजादेर्लुग्भवति । चर्मणः कोशे—चार्मः कोशः । चर्मणोऽन्यः—शुनः संकोचे । शौनः संकोचः । शौवनोऽन्यः ।

विकारापत्येऽश्महितनाम्नो वा ॥२।३।७१॥ अश्मन् हितनामन् इत्येतयोरपदयोर्यथासंख्यं विकारेऽपत्ये चार्थे तद्धिते परेऽन्त्याजादेर्लुग्वा भवति । अश्मनो विकार आश्मः । आश्मनो वा । हितनाम्नोऽपत्यं हैतनामः, हैतनामनो वा । विकारापत्य इति किम् ? आश्मनः । हैतनामनः इत्येवान्यत्र । म्नोऽवर्मणे इति नियमान्नित्यं लुचि प्राप्तायां च विकल्पः ।

स्वरादीनाम् ॥२।३।७२॥ स्वर् इत्येवमादीनामपदसंज्ञानां तद्धिते परेऽन्त्याजादेर्लुग्भवति । स्वर्भवः सौवः । बाह्यः, बाह्लीकः । [2]सायम्प्रातिकः । पौनःपुनिकः । पौनःपुन्यम् । आदिशब्द इह प्रकारार्थः । येषामव्ययानां पदसंज्ञायां तद्धिते लुग्भवति त इह स्वरादयः । तेन आरातीयः । शाश्वतिकः । शाश्वतः । पार्थक्यमित्यादिषु न भवति ।

विंशतेस्तेर्डिति ॥२।३।७३॥ विंशतिशब्दस्यापदसंज्ञस्य यस्तिशब्दस्तस्य डिति तद्धिते परे लुग्भवति । आसन्ना विंशतिरेषां ते आसन्नविंशाः । विंशत्या क्रीतं विंशकम् । विंशतिरधिकाऽस्मिन् विंशं शतम् । विंशतेः पूरणो विंशः । एकविंशः । विंशतेरिति किम् ? एकसप्ततः । एकाशीतः । तेरिति किम् ? सर्वस्य स्यात् । तद्धित इति किम् ? विंशतौ ।

---

१. आह्वी कलोतवेला स्वात्यामूलकी च सुपर्वणा इति वैजयन्ती । क० म० टि० । २. औदलोमिः क० म० । ३. इष्यते क० म० ।

एः ॥२।३।७४॥ अश्च इश्च इति एः, तस्यावर्णान्तस्येवर्णान्तस्य चापदस्य तद्धिते परे लुग्भवति । अस्य दक्ष—दक्षस्यापत्यं पुमानिति दाक्षिः । प्लक्ष—प्लाक्षिः । व्याघ—वैघिः । बकाका—बकाकिः । एः—नाभिः-नाभेयः । निधिः—नैधेयः । श्येनी—श्यैनेयः । रोहिणी—रौहिणेयः । वत्सं प्रीणातीति वत्सप्रीः तदपत्यं वात्सप्रेयः । चतुष्पाट्ठण् । अपदस्येति किम् ? ऊर्णायुः । शुक्लतरः । शुक्लतमः । तद्धित इति किम् ? वृक्षनिष्यः ।

अह्नोऽखाटि ॥२।३।७५॥ अहन्नित्येतस्यापदस्य न अट् इत्येतद्वर्जिते तद्धिते परे यदवर्णं तस्य लुग्भवति । अह्ना निर्वृत्तम् आह्निकम् । अह्ना समूहः आह्नः । येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्याद्-इति नकारव्यवहितस्यैव लुगाह्नस्य । अखाटीति किम् ? द्वाभ्यामहोभ्यां निर्वृत्तः द्वाभ्यामहोभ्यामधीष्टः भृतः, द्वेऽहनी भूतो भावो वा द्व्यहीनः । व्यहीणः । अटि—परमाहः । उत्तमाहः । द्वयोरह्नोः समाहारः द्व्यहः । व्यहः ।

षन्हन्धृतराज्ञोऽणि ॥२।३।७६॥ षन् हन् इत्येतदन्तस्य धृतराजन्नित्येतस्य चापदस्याणि तद्धिते परे यदवर्णं तस्य लुग्भवति । पूषन्—पौष्णम् । तक्षन्—ताक्षणम् । भ्रूणहन्—भ्रौणहनम् । वृत्रहन्—वार्त्रहनम् । धृतराजन्—धार्तराज्ञः । एषामिति किम् ? सामनम् । दैमनेम् । अणीति किम् ? तक्षणोऽपत्यं ताक्षण्यः ।

तैषपौषं भात् ॥२।३।७७॥ तैष पौष इति तिष्य पुष्य इत्येतयोर्भादणि प्रतिपदं नक्षत्राद्यो विहितोऽण् गुरूदयाद्भाद्युक्तेऽहे चन्द्रापेतात्काले भर्तुः सन्ध्यादेरण् इति च तस्मिन्नणि यलुग्निपात्यते । तिष्येण गुरूदयेन युक्तः तैषः संवत्सरः । पुष्येण पौष संवत्सरः । तैषमहः । तैषी रात्रिः । पौषमहः । पौषी रात्रिः । तिष्ये जातः तैषः । पौषः । भादिति किम् ? तिष्यो देवताऽस्य तैष्यश्चरुः । पौष्यश्चरुः । नायं भादिति प्रतिपदं विहितः ।

विल्वकांछस्य ॥२।३।७८॥ विल्वक् इत्येवमादीनां सम्बन्धिनश्छ इत्येतस्यावयवस्य अपदस्यापदसम्बन्धिनस्तद्धिते पर लुग्भवति । विल्वा अस्यां सन्तीति विल्वकीया नदी, तस्यां भवः वैल्वकः । वेणुकीयाया भवः वैणुक । वैत्रकीयाया वैत्रकः । वैतसकीयायां वैतसकः । त्रिकीयायां त्रैकः । इक्षुकीयायामैक्षुकः । काष्ठकीयाया काष्ठुकः । कपोतकीयाया कापोतकः । क्रुञ्चकीयायां क्रौञ्चकः । तक्षकीयाया भवस्ताक्षकः । विल्वकामिति सककारनिर्देशात् नडादेश्चेति छे कृते ककारादूर्ध्वस्य छस्याऽन्तस्य सिद्धत्वादादेश्चापञ्चमीनिर्देशाच्च भवतीति सर्वस्य लुक् । क्रुञ्चा ह्रस्वत्वं तथा पाठात् । विल्वकामिति किम् ? वाडकीयः, प्लक्षकीयः । विल्वकादिर्नडाद्यन्तर्गणः । छस्येति किम् ? विल्वकादीनामेव स्यात् । तद्धित इति किम् ? विल्वकीयायाम् । अपदस्येति किम् ? विल्वकीयारूप्यम् । विल्वकीयामयम् ।

हलोपश्चिक्यानात्यापत्यस्य ॥२।३।७९॥ अपत्ये विहितस्य प्रत्ययस्यापदस्य यो यकारो हलः परस्तस्य च्वौ क्ये ऽनाति—अनाकारादौ च तद्धिते परे लुग्भवति । च्वौ—गार्गीभूतः । वात्सीभूतः । गार्गीयति । वात्सीयति । गार्गायते[3] । वात्सीयते । अनाति—गर्गाणां समूहो गार्गकम् । वात्सकम् । गर्गस्यायं गार्गीयः । वात्सीयः । हल इति किम् ? कारिकेयीभूतः । हारिकेयीभूतः । कारिकेयीयति । हारिकेयीयति । कारिकेयिः । हारिकेयि । य इति किम् ? शारद्वतायनीकः । च्विक्यानातीति किम् ? गार्ग्यायणः । वात्स्यायनः । अपदस्येति किम् ? सकाशेन निर्वृत्तं साकाश्यम्, तत्र भवः साकाश्यकः । व्योपान्त्यलक्षणो वुञ् ।

राजन्यमनुष्ययोर्नाके ॥२।३।८०॥ राजन्यमनुष्यशब्दयोर्यकारस्याके प्रत्यये परे लुग्न भवति । राजन्यकम् । मनुष्यकम् ।

ओर्डेऽकद्रवाः ॥२।३।८१॥ कद्रूशब्दवर्जितस्योवर्णान्तस्यापदस्य डे तद्धिते परे लुग्भवति । कमण्डल्वा अपत्यं कामण्डलेयः । भाद्रबाहेयः । शैतिबाहेयः । जम्ब्वा अपत्यं जाम्बवेयः । रैरवाश्रेयः । ओरिति किम् ? वैमात्रेयः । शुभ्रादिढण् । ड इति किम् ? माण्डव्यः । अकद्रवा इति किम् ? कादवेयः ।

---

१ ऊर्णा मेषादिलोम्नि स्यात् स्त्रिवल्लकजातीरिति षड्संज्ञा । क० म० टि० । २. दैमनम् क० म० । ३. गार्गायते । वात्सायते क० म० ।

अवयवयञ्युवः ॥२।३।८२॥ स्वयंभूशब्दवर्जितस्यापदस्यावर्णस्य तद्धिते परेऽवादेशो भवति। औपगवः। कापटवः। दाक्षायः। मानवायः। धैर्कण्यम्। दार्वपिण्यः[1]। अस्वयंभुव इति किम्? स्वायंभुवम्।

केकयमित्रयुप्रलयस्येण्यादेर्णिति ॥२।३।८३॥ केकय मित्रयु प्रलय इत्येतेषां णिति णिति च तद्धिते परे यकारादेः अवयवरूपस्य इय् इत्ययमादेशो भवति। केकयस्यापत्यं कैकेयः। राष्ट्रराज्ञः सरूपादित्यञ्। मित्रयोर्भावेन मैत्रेयिकया दक्षायते। गोत्रलक्षणो वुञ्। प्रलयादागतं प्रालेयमुदकम्। ञ्णिति किम्? केकयत्वम्।

आरैचोऽवादेः ॥२।३।८४॥ णिति णिति च तद्धिते परे यः पूर्वस्तदासन्नः प्रकृतिभागस्तस्यावां मध्ये य आदिरच् तस्य स्थाने आ आर् ऐच् ऐकार औकारश्चासन्ना आदेशा भवन्ति। णिति—दाक्षिः। प्लाक्षिः। कार्ष्णिः। नैयाकविः। पौलिः। णिति—कापटवः। भार्गवः। शैवः। औपगवः। श्रीर्देवताऽस्य श्रायः[3]। ह्रायः स्थालीपाकः। ञ्णितीति किम्? शाकुन्यः। आरैच् (इति किम्)? दार्वपिण्यः कार्पासः। तद्धित इति किम्? चिकर्षिकः। जिहर्षिकः। अक्षिवति हलामपरिग्रहार्थम्। तेन हलादेरपि भवति।

देविकाशिंशिपादीर्घसत्रश्रेयस्सां तत्प्राप्तेरः ॥२।३।८५॥ देविका शिंशपा दीर्घसत्र श्रेयस् इत्येतेषामवयवादेरचः तत्प्राप्तेस्तेषामारैचां प्राप्तिर्यस्यास्ति तस्य ञ्णिति तद्धिते निमित्ते आकारादेशो भवति। देविकायां भवं दाविकमुदकम्। देविका कूले भवा दाविकाकूलाः शालयः। पूर्वदेविका नाम प्राग्रामः, तत्र भवः पूर्वदाविकः पुरुषः। शिंशपाविकारः शांशपः स्तम्भः। शिंशपास्थले भवाः शाशपास्थला देवाः। पूर्वशिंशिपा नाम प्राग्रामः। पूर्वशांशपः पुत्रः। दीर्घसत्रे भवं दार्घसत्रम्। श्रेयोऽधिकृत्य कृतमिति श्रायसं द्वादशाङ्गम्। तत्प्राप्तेरिति किम्? सुदेविकायां भवः सौदेविकः। केवलपूर्वोत्तरपदभावार्थं वा प्राप्तिग्रहणमुत्तरार्थम्।

वहीनरस्यैत् ॥२।३।८६॥ वहीनरशब्दस्य ञ्णिति तद्धिते परेऽवामादेरचः स्थान ऐकार आदेशो भवति। वहीनरस्यापत्यं वैहीनरिः। वहीनरस्येदं वैहीनरम्।

पदे व्यष्टैच् ॥२।३।८७॥ ञ्णिति तद्धिते तत्प्राप्तेरिवर्णस्योवर्णस्य च स्थाने यो यकारवकारौ तयोः पदे परतष्टैजागमो भवति। उकारो देशविध्यर्थः। यकारस्यैकारः। वकारस्यौकारः। व्यसने भवं वैयसनम्। व्याकरणस्य वोढा अध्येता वा वैयाकरणः। न्यायस्य वोढाऽध्येता वेति नैयायिकः। न्यासस्य—नैयासिकः। स्वागमस्य सौवागमिकः। स्वरवस्यापत्यं सौवरवः। शिवाद्यण्। पूर्वव्यलिन्दे भवः पूर्वत्रैयलिन्दः। स्वाङ्गादेरारैज्वचनान्नेह न वृध्यन्त इत्यस्ति। परत्वान्नित्यत्वाच्चारैजादेशात् प्रथममेव टैच्। पद इति किम्? यत इमे याताः छात्राः। यत् इति इवः शाकपार्थिवम्। व्य इति किम्? वैकल्यम्। सौकर्यम्। तत्प्राप्तेरिति किम्? दाक्ष्यश्विः। माक्ष्यश्विः। द्वाभ्यामशीतिभ्यां निर्वृत्तः द्वाभ्यामशीतिभ्यामशीतौ भूतो द्वेऽशीतीभूतो भावी वा द्वाशीतिकः। प्राप्तिग्रहणं तदभावार्थम्। भावे हि यत इमे याताः वैयाकरणभार्या इति च सिद्धयति। प्राप्तिश्चाकारे यञादेशश्च वेदितव्यम्। कृते हि इवर्णोवर्णयोरभावान्नास्ति प्राप्तिः।

द्वारादेः ॥२।३।८८॥ द्वार इत्येवमादीनां यो यकारो वकारश्च तत्प्राप्तिमतोऽवादेः समीपे तस्य ञ्णिति तद्धिते टैजागमो भवति। द्वारे नियुक्तः दौवारिकः। द्वारपालस्यापत्यं दौवारपालिकः। स्वस्येदं सौवम्। स्वग्रामे भवः सौवग्रामिकः[4]। अध्यात्मादिठञ्। स्वाध्यायेन चरति सौवाध्यायिकः[5]। तत्प्राप्ते समीपस्येति किम्? व्यल्कशे भवः वैयल्कशः। वकारस्य टैच् न भवति। द्वार, स्व, स्वर, व्यल्कश, स्वस्ति, स्वर्, स्वस्, स्वाकृत, स्वादु, मृदु, स्वन् इति द्वारादिः।

न्यग्रोधस्य प्रकृतेः ॥२।३।८९॥ न्यग्रोधशब्दस्य प्रकृतिभूतस्य यो यकारः ञ्णिति तद्धिते तत्प्राप्तेराकारादिप्राप्तिमतोऽवाद्यादेरचः स्थाने समीपे वा तस्य टैजागमो भवति। न्यग्रोधस्य विकारो नैयग्रोधो दण्डः।

---

१. –ण्यः कार्पासः क० म०। २. अरदन्तात् क० म० टि०। ३. श्री अण् इत्यत्र ञ्णिति कृते श्रै अ इत्यत्र पूर्वोऽवयवश्चायाव इति आयि कृते आय इति स्यात्। क० म० टि०। ४. दधिश्रियोऽवः, मधुश्रियोऽवः इति अवयवशब्दौ अवूरवंशकादिसमासतः। अत इञ्। अत्र वकाराकारस्य प्राप्तिः। क० म० टि०। ५. तत्प्राप्तेराकारप्राप्ति –म०। ६. वाक्षण्यः क० म० टि०। ७. स्वाध्यायप्रवर्तकः क० म० टि०।

नैयग्रोधः कवयः । वकाराभावादौकारागमो न भवति । प्रकृतेरिति किम् ? न्यग्रोधमूले भवा इति न्यग्रोधमूलाः शाकयः । न्यग्रोधा अस्यां सन्तीति न्यग्रोधिका ऋष्यादीकः । न्यग्रोधिकायां भव इति न्यग्रोधिकः । न्यग्रोहतीति न्यग्रोध इति व्युत्पत्तिपक्षे नियमार्थम्, अव्युत्पत्तिपक्षे विध्यर्थमिदम् ।

अः स्वङ्गादेः॥२।३।४०॥ आरैच इति वर्तते । व्यतिहारे अः प्युक्त इति यो अः प्रत्ययस्तदन्तस्य स्वङ्गादेश्च ञिति तद्धिते परेऽवामादेरचः स्थाने आरैच आदेशा भवन्ति । ठैञपवादः । अस्य—व्यावक्रोशी । व्यावक्रेशी । व्यावचर्ची । व्यावहासी । स्वङ्गादेः—स्वङ्गस्यापत्यं स्वाङ्गिः । व्याङ्गिः[1] । स्वागतमित्याह स्वागतिकः । स्वध्वरेण चरति स्वाध्वरिकः । स्वपतौ साधुः स्वापतेयः । व्यवहारेण चरतीति व्यावहारिकः । स्वङ्ग, व्यङ्ग, व्यद, स्वागत, स्वध्वर, स्वपति, व्यवहार इति स्वङ्गादिः ।

श्वादेरौ ॥२।३।४१॥ श्वन्शब्द आदिरवयवो यस्य तस्य शब्दस्वरूपस्येकारादौ ञिति तद्धिते परेऽवामादेरचः स्थाने आकारादेशो भवति । ठैञपवादः । श्वभस्त्रस्यापत्यं श्वाभास्त्रिः । श्वादंष्टिः । श्वाशीर्षिः । श्वगणे चरति श्वागणिकः । श्वायूथिकः । आदिग्रहणं किम् ? श्वभिश्चरति शौविकः । औ इति किम् ? श्वहानस्येदं शौवहानम् । शौवभस्त्रम् । श्वदंष्ट्राविकारः शौदंष्ट्रो मणिः ।

इञः ॥२।३।४२॥ श्वादेरिञ्प्रत्ययान्तस्य ञ्णिति तद्धिते परेऽवामादेरचः स्थाने आकारादेशो भवति । ठैञपवादः । श्वाभस्त्रेरिदं श्वाभस्त्रम् ।श्वाकर्णम् । इकारादौ निमित्ते उच्यमानः पूर्वेणापवादोऽयत्र न प्राप्नोतीति इदं वचनम् ।

पदस्यानौ वा ॥२।३।४३॥ श्वादेः पदशब्दान्तस्य रूपस्याऽनिकारादौ ञ्णिति तद्धिते परेऽवामादेरचः स्थाने आकारादेशो वा भवति । ठैञपवादः । श्वपदस्येदं श्वापदम् । शौवापदम् । अन्नाणि सति दीर्घः । अनाविति किम् ? श्वपदैश्चरति श्वापदिकः । परत्वादनेन विकल्प्येत ।

प्रोष्ठभद्राज्जाते ॥२।३।४४॥ जातेऽर्थे ञ्णिति तद्धिते यः प्रकृतिभागस्तदवयवात् प्रोष्ठशब्दाद् भद्रशब्दाच्चोत्तरस्य पदशब्दस्याचामादेरचः स्थाने आकारादेशो भवति । प्रोष्ठपदासु जातः प्रोष्ठपादः । भद्रपादो माणवकः । जात इति किम् ? प्रोष्ठपदासु प्रोष्ठपदो मेघः ।

अंशादृतोः ॥२।३।४५॥ ञ्णिति तद्धिते यः प्रकृतिभागस्तदवयवादवयववाचिनः परस्य ऋतुवाचिनः शब्दरूपस्याऽचामादेरचः स्थाने आरैच आदेशा भवन्ति । पूर्वासु वर्षासु भवः पूर्ववार्षिकः । अपरवार्षिकः । वर्षाकालेभ्यष्ठण् । पूर्वशारदः । पूर्वनैदाघः । पूर्वहैमनः । अपरहैमनः । ऋत्वण् । अंशादिति किम् ? सुपर्वासु ऋत्वन्तरान्तरान्तरितासु भवः पूर्ववार्षिकः । ऋतोरिति किम् ? पौर्वफल्गुनः ।

सुसर्वार्धाद्राष्ट्रस्य ॥२।३।४६॥ सु सर्व अर्ध इत्येतेभ्यः[3] परस्य राष्ट्रवाचिनो ञ्णिति तद्धिते परेऽचामादेरारैचो भवन्ति । सुपाञ्चालेषु भवः सुपाञ्चालकः । सर्वपाञ्चालकः । अर्धपाञ्चालकः । सुमागधकः । सर्वमागधकः । अर्धमागधकः ।

दिशोऽमद्रस्य ॥२।३।४७॥ दिग्वाचिनः परस्य राष्ट्रवाचिनो मद्रशब्दवर्जितस्य ञ्णिति तद्धिते परेऽचामादेरारैचो भवन्ति । पूर्वपाञ्चालकः । दक्षिणपाञ्चालकः । उत्तरपाञ्चालकः । दिश इति किम् ? पौर्वपाञ्चालकः । अत्र पूर्वशब्दोऽवयवे वर्तते, न दिशि । अमद्रस्येति किम् ? पौर्वमद्रः ।

प्राग्ग्रामाणाम् ॥२।३।४८॥ प्राग्देशग्रामवाचिनां योऽवयवो दिक्शब्दस्ततः परस्यावयवस्य दिशः परेषां च प्राग्ग्रामवाचिनां ञ्णिति तद्धिते[4] परेऽचामादेरारैचो भवन्ति । पूर्वकृष्णमृत्तिका नाम ग्रामस्तत्र भवः पूर्वकार्ष्णमृत्तिकः । एवमपरकार्ष्णमृत्तिकः । पूर्वेषुकामशमी नाम ग्रामस्तत्र भवः पूर्वेषुकामशमः ।

---

१. –ङ्गि, व्यादिः, स्वा–क० म० । २. –स्य शब्दरूप –क० म० । ३. –भ्यः प्रकृत्यवयवेभ्यः पर–क० म० । ४. –ते अचा –क० म० । ५. –ते अचा –क० म० ।

पूर्वस्मिन् काम्यकुब्जे भवः पूर्वकाम्यकुब्जः । अपरकाम्यकुब्जः । पूर्वपाटलिपुत्रकः । अपरपाटलिपुत्रकः । ग्रामग्रहणेन नगरमपि गृह्यते । प्राग्ग्रहणं किम् ? पूर्वदेवदत्तः । अपरदेवदत्तः । देवदत्तं नाम बाह्लीकग्रामः ।

संख्याधिकाभ्यां वर्षस्याभाविनि ॥२।३।९९॥ संख्याया अधिकशब्दाच्चोत्तरपदस्य वर्षशब्दस्य ञ्णिति तद्धितेऽचामादेराकार आदेशो भवति । न चेत् स तद्धितो भावीत्यस्मिन्नर्थे विहितो भवति । द्वाभ्यां वर्षाभ्यां निर्वृत्तः, द्वाभ्या वर्षाभ्या भृतोऽधीष्टो द्वे वर्षे भूतो वा द्विवार्षिकः, त्रिवार्षिकः, अधिकवार्षिकः । अभाविनीति किम् ? द्वे वर्षे भावी द्वैवर्षिकः । त्रैवर्षिकं धान्यम् ।

मानसंवत्सरस्याशाणकुलिजस्यानाम्नि ॥ २।३।१०० ॥ मीयते परिच्छेद्यते येन तन्मानं संख्याया अधिकशब्दाच्च परस्य शाणकुलिजशब्दवर्जितस्य मानवाचिनः संवत्सरशब्दस्य च ञ्णिति तद्धिते परेऽचामादेरैच आदेशा भवन्ति, अनाम्नि असंज्ञाविषये । द्वौ कुडवौ प्रयोजनमस्य द्विकौडुविकः । त्रिकौडुविकः । द्वाभ्यां सुवर्णाभ्यां क्रीतं द्विसौवर्णिकम् । त्रिसौवर्णिकम् । द्विनैष्किकम् । त्रिनैष्किकम् । द्वाभ्या षष्टिभ्यां निर्वृत्तः, द्वाभ्यां षष्टिभ्यामधीष्टो भूतो द्वे षष्टी भूतो भावी वा द्विषाष्टिकः । त्रिषाष्टिकः । अधिकषाष्टिकः । अधिकसाप्ततिकः । द्विषष्ट्यादि संख्येये काले वर्तत इति कालाधिकारविहितः प्रत्ययः । द्वाभ्यां नवतिभ्यां क्रीतं द्विनवति तेन द्विनवत्या वा क्रीत द्विनावतिकम् । त्रिनावतिकम् । संवत्सरस्य—द्वाभ्यां संवत्सराभ्यामधीष्टो भूतो द्वौ संवत्सरौ भूतो भावी वा द्विसावत्सरिकः । त्रिसावत्सरिकः । अधिकसावत्सरिकः । वचनभेदान्न यथासंख्यं संवत्सरग्रहणात् कालो मानग्रहणेन न गृह्यते तेन द्वैसमीकः । द्वैरात्रिकः । त्रैरात्रिकः । अशाणकुलिजस्येति किम् ? द्वाभ्या शाणाभ्या क्रीतं द्वैशाणम् । त्रैशाणम् । द्वे कुलिजे पञ्चन् संभवन्नवपारन् वा द्वैकुलिजिकः । अनाम्नीति किम् ? पञ्चलोहित्य परिमाणमस्य पाञ्चलोहितिकम् । पाञ्चकपालिकम् । तद्धितान्तमिदं नाम ।

परिमाणस्यानतोऽर्धाद्वादेः ॥२।३।१०१॥ अर्धशब्दात् परस्य परिमाणवाचिनः कुडवादेश्च शब्दरूपस्य ञ्णिति तद्धितेऽचामादेरचोऽनतोऽनकारस्यारैच आदेशा भवन्ति । आदेः परिमाणात् पूर्वस्य त्वर्धशब्दस्य वा भवति । अर्धकुडुवेन क्रीतमर्धकौडुविकम् । आर्धकौडुविकम् । अर्धमौष्टिकम् । आर्धमौष्टिकम् । अर्धद्रौणिकम् । आर्धद्रौणिकम् । परिमाणस्येति किम् ? अर्धक्रोशः प्रयोजनमस्येति–आर्धक्रोशिकम् । अनत इति किम् ? अर्धप्रस्थिकम् । आर्धप्रस्थिकम् । अर्धकंसिकम् । आर्धकंसिकम् । अर्धचमसिकम् । आर्धचमसिकम् । आदिविकल्प उत्तरविध्यनपेक्ष एवेति भवति । तकारः किम् ? अर्धखार्या भवा अर्धखारी सा भार्या अस्य अर्धखारीभार्यः । यद्यत्रानत इति प्रतिषेधः स्यात् अयं तद्धितो नाजादैञ्निमित्त इति प्रतिषेधाभावात् पुम्भावः स्यात् । यथा अर्धप्रस्थभार्य इति ।

प्राद्वाहणस्य ढे ॥२।३।१०२॥ प्रशब्दात् परस्य वाहणशब्दस्य ढप्रत्यये ञ्णिति तद्धितेऽचामादेराकारादेशो भवति, आदे पूर्वस्य च प्रशब्दस्य वा भवति । प्रवाह्यतीति प्रवाहणः, प्रवाहणस्यापत्यं प्रवाहणेयः । प्रावाहणेयः । प्रवाहणेयी भार्यः । शुभ्रादिढण् । नाजादैञ् तद्धित इति पुम्भावप्रतिषेधः ।

ढस्य ॥२।३।१०३॥ ढप्रत्ययान्तावयवात् प्रशब्दात् परस्य वाहणशब्दस्य ञ्णिति तद्धितेऽचामादेराकार आदेशो भवति । आदेस्तु प्रशब्दस्य वा भवति । प्रवाहणेयस्यापत्यं प्रवाहणेयः । प्रवाहणेयस्येदं संघादि प्रवाहणेयकम् । बाह्यतद्धितनिमित्त आकारोढाश्रयेण विकल्पिनाऽशक्यो बाधयितुमित्यारम्भः ।

नञ्रश्वेश्वरक्षेत्रज्ञकुशलचपलनिपुणशुचेः ॥२।३।१०४॥ नञ् परेषां क्षेत्रज्ञ कुशल चपल निपुण शुचि इत्येतेषां प्रकृत्यवयवानां ञ्णिति तद्धितेऽचामादेराकार ऐच्च भवति आदेर्नञस्त्वाकारो वा भवति । अनैश्वर्यम् । आनैश्वर्यम् । अक्षेत्रज्ञम् । आक्षेत्रज्ञम् । राजादिटच्ण् । अकुशलस्येदमकौशलम् । आकौशलम् । अचापलम् । आचापलम् । अनैपुणम् । आनैपुणम् । अशुचेरिदम्, न विद्यते शुचिर्यस्येत्यशुचिः, अशुचेर्भाव इति

---

१. –त्तस्य वर्ष–क० म० । २. यथासंख्यं क० म० । ३. पञ्चन् क० म० । ४. –नस्त्वाचय– क० म० । ५. प्रवाहणेयिः । प्राबाहणेयः क० म० । ६. बाधितु—क० म० । ७. –मित्यस्यार—क० म० । ८. नैरात्म्यमित्यर्थः क० म० टि० । ९. अचापलम् । आचापलम् । क० म० ।

वा अक्षौचम् । आक्षौचम् । चकारो वेत्यस्यानुकर्षणार्थः । अयथातथ्यमिति समासात्प्रत्ययः । अयथातथ्यमिति प्रत्ययान्तेन समासः । एवमायथापूर्व्यम् । अयथापूर्व्यम् । यथा आचातुर्यम्, अचातुर्यम् । यथातथायथापूर्वयोः पर्यायेति आरभ्यते ।

अङ्गलधेनुवलजस्य चोत्तरपदस्य च ॥२।३।१०५॥ अङ्गल धेनु वलज इत्येवमन्तानां प्रकृतिभागानामादेः पूर्वपदस्याचामादेरारैच आदेशा भवन्ति, ञ्णिति तद्धित उत्तरपदस्य वा भवन्ति । कुरुजङ्गलेषु भवः कौरुजङ्गल । कौरुजाङ्गलः । वैश्वधैनवः । वैश्वधेनवः । सौवर्णवलजः । सौवर्णवालजः । पूर्वपदविकल्पार्थं वाग्रहणं निवृत्तम् । इदमुत्तरपदविकल्पार्थम् ।

हृन्मगसिन्धोः ॥२।३।१०६॥ आदेरुत्तरपदस्य चेति वर्तते । हृत् भग सिन्धु इत्येवमन्तानां प्रकृतिभागानां ञ्णिति तद्धित आदेः पूर्वपदस्योत्तरपदस्य च अच्वादेरारैच आदेशा भवन्ति । सुहृदः सुहृदस्य वा इदं सौहार्दं तस्य भावः कर्म वा सौहार्द्यम्[3] । सुभगस्य भावः सौभाग्यम् । सुभगाया अपत्यं सौभागिनेयः । दौर्भाग्यम् । दौर्भागिनेय· । सक्तुप्रधाना· सिन्धव· सक्तुसिन्धवस्तत्र भवः साक्तुसैन्धवः । पानसैन्धवः । लावणसैन्धवः । माहामैन्धवः । कच्छादित्वादण् ।

नगरस्य प्राक्षु ॥२।३।१०७॥ नगरान्तस्य प्रकृतिभागस्य प्राक्षु प्राग्देशेषु वर्तमानस्य ञ्णिति तद्धित आदेः पूर्वपदस्योत्तरपदस्य चाचामादेरारैचौ भवन्ति । सुह्मनगरे भवः सौह्मनागरः । पौण्ड्रनागरः । वाङ्गनागरः । वैराटनागरः । गैरिनागरः । प्राक्षित्रति किम् ? मदनगरं नामोदक्षु, तत्र भवः मादनगरः ।

अनुशतिकादीनाम् ॥२।३।१०८॥ अनुशतिक इत्येवमादीनां ञ्णिति तद्धिते पूर्वपदस्योत्तरपदस्य चाऽचामादेरारैच आदेशा भवन्ति । अनुशतिकस्येदमानुशतिकम् । अनुहोडेन चरति आनुहोडिकः । अनुशतिक, अनुहोड, असंवरण, अगारवेणु, असिहत्या, अस्यहत्स्य, अस्यहेति, द्व्योग, पुष्करसद्, अनुहत्, कुरुकत्, कुरुपञ्चाल, उदकशुद्ध, इहलोक, परलोक, सर्वपुरुष, सर्वभूमि, प्रयोग, परस्त्री, सूत्र, नट इति अनुशतिकादयः । बहुवचनादाकृतिगणोऽयम् । अभिगममर्हन्त्याभिगामिका गुणाः । अधिदेवे भवम् आधिदैविकं दुःखम् । चतस्र एव विद्याश्चातुर्वैद्यम् इत्यादि सिद्धं भवति ।

राजपौरुष्यम् ॥२।३।१०९॥ राजपौरुष्यमिति राजपुरुषशब्दस्य ट्यणि पूर्वोत्तरशब्दयोरारैच् निपात्यते । राजपुरुषस्य भावः कर्म वा राजपौरुष्यम् । प्रत्ययान्तरे त्वादेरेव राजपुरुषस्यापत्यं राजा पुरुषायणिः ।

देवताऽऽद्यादौ ॥२।३।११०॥ देवतार्थाना प्रकृतिभागानामाद्यवादौ ञ्णिति तद्धिते परत आदेः पूर्वपदस्योत्तरपदस्य चाद्यवादेरारैच आदेशा भवन्ति । अग्निश्च विष्णुश्च देवता अस्य आग्नाविष्णवम् । आग्निमारुतम् । आग्निवारुणम् । नात्यविष्णिवन्द्र इति आत्वेत्ययोनिपेधः । देवतेति किम् ? पैतापुत्रिका । आदाविति किम् ? स्कान्दविशाखम् । आह्मप्रजापत्यम् । इन्द्रासोमादिषु देवतानामित्यत्यतः प्रभृत्या दिवः पृथिव्या वेत्यतो विधिर्देवतादिः ।

नेन्द्रवरुणस्यात् ॥२।३।१११॥ अवर्णान्तात् पूर्वपदात् परस्येन्द्रशब्दस्य वरुणशब्दस्य चोत्तरपदस्य चाद्यवादेरारैच् न भवति । अग्नीन्द्रौ देवता अस्य आग्नेन्द्रम् । इन्द्रावरुणम् । मैत्रावरुणम् । आदिति किम् ? ऐन्द्राग्नम् । आग्निवरुणम् । आग्नेन्द्रमित्यत्र, इकारस्यैकारादेशेऽकारस्य च, एरिति लोपे सति, इन्द्रशब्देऽजेव नास्तीति, इन्द्रशब्दस्य आरैचोऽप्राप्ति· । तत्रेन्द्रग्रहणात्पूर्वं पूर्वोत्तरपदयोः कार्यं पश्चादेकारादेश इति ज्ञाप्यते न पूर्वपूर्वकारेशम इति त्यादिसिद्धं (?) भवति ।

---

१. –थापूर्व्यम् । क० म० । २. वलजे क्षेत्रपूर्वारे वलजा वल्गुदर्शना क० म० टि० । ३. –र्यम् । दौर्हार्द्यम् । क० म० । ४. –व्यसि —क० म० । ५. अस्यहत्स्य म० । ६. अनुहत्स् क० म० । ७. भवन्ति, आधिदैविकम्, आधिभौतिकं दुःखम् क० म० टि० । ८. –दौ विषये ञ्णि –क० म० । ९. –देकादेश इति क० म० । १०. पूर्वपूर्वकारेशम क० म० ।

औणहत्यधैवत्यसारवैश्वाकमैत्रेयहिरण्मयम् ॥२।३।११२॥ औणहत्यादयः शब्दा टयणादिप्रत्ययान्ताः कृततद्धितादयो निपात्यन्ते। भ्रूणघ्नो भावः कर्म वा भ्रौणहत्यम्। धीघ्नो धैवत्यम्। भ्रूणहन् धीवन् इत्येतयोष्ट्यणि तद्धर्म्यम्। सरय्वां भवं सारवमुदकम्। सरयूशब्दस्याण् अय इत्येतस्य लोपः। इक्ष्वाकोरपत्यमैक्ष्वाकः। इक्ष्वाकोरिदमैक्ष्वाकम्। इक्ष्वाकुशब्दस्य टयणि अणि च उकारलोपः। मित्रयोरपत्यं मैत्रेयः। मित्रयुशब्दस्य गृष्ट्यादिढणि युलोपश्च। अयं मित्रयुशब्दो भिदादिषु किं न पठ्यते? तथा चेयादेशेनैव सिद्धयति इति निपातनं न कर्तव्यं भवति यस्कादिषु च बहुषु श्लुणर्थं न पठितव्यं भवत्यन्य इत्येव सिद्धत्वादुच्यते अणि मित्रयूणां संघो मैत्रेयक इत्यत्र वुञं बाधित्वाऽण् स्यात्। हिरण्यस्य विकारः हिरण्मयम्। मयटि यशब्दलोपः।

वान्तमान्तितमान्तितोऽन्तियान्तिषद् ॥२।३।११३॥ अन्तमादयः शब्दास्तमादिषु कृततिकादिलोपादयो वा निपात्यन्ते। अयमेषामतिशयेनान्तिकः अन्तमः। अन्तितमः। अन्तिकतमः। अन्तिकशब्दस्य तमेतिकशब्दस्य च लोपो वा निपात्यते। अन्तमे इति सोसपभावश्च। अन्तिकादागच्छति, अन्तित आगच्छति। अन्तिकत आगच्छति। अत्रापादनलक्षणे तस्मिन् कशब्दस्य अन्तिके साधुः अन्तिमः अन्तिक्यः। अत्र यप्रत्यये इकारस्य वा लोपः। दीर्घनिवृत्तिश्च अन्तिके सीदतीति अन्तिषद्। अन्तिकषद्। अत्र टिसदि विवबन्ते कलोपः षत्वं च।

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने वृत्तौ
द्वितीयस्याध्यायस्य तृतीयः पादः समाप्तः।

■

[चतुर्थः पादः]

वाऽऽद्यात् ॥२।४।१॥ वा इति च आद्यादिति च द्वितयमधिक्रियते। तत्र वाऽधिकाराद्वक्ष्यमाणाः प्रत्यया विकल्प्यन्ते। तेन पक्षे यथाप्राप्तं वाक्यं समासश्च भवति। उपगोरपत्यम् उपगवस्यमिति। तद्धितस्योत्सर्गापवादविषये पीलामण्डूकाद्वेति क्वचिद्वाचनान्न भवति। समासार्थं द्वितीयं वाग्रहणमनुवर्तिष्यते। आद्यादित्यधिकारात् सूत्रे यत् पूर्वं निर्दिष्टं तत्प्रत्ययमुत्पादयति न परमिति। साऽस्य पौर्णमासी देवतेत्यादौ सेति प्रकृतिरस्येति प्रत्ययार्थो व्यवतिष्ठते। इन्द्रो देवताऽस्य ऐन्द्रं हविः। ऐन्द्रो मन्त्रः।

गोत्रोत्तरपदाद्गोत्रादेवा जिह्वाहरितकात्यात् ॥२।४।२॥ जिह्वाहरितयोर्जिह्वापूर्वपदो हरितपूर्वपदश्च कात्यो जिह्वाहरितकात्यः। जिह्वाकात्यहरितकात्यवर्जिताद् गोत्रोत्तरपदाद् यद्गोत्रमुत्तरपदं तस्मादेव वक्ष्यमाणः प्रत्ययो भवति। गोत्रमपत्यम्। कम्बलचारायणीयाः। घृतरौटीयाः। वृद्धान्तीयाः। वृद्ध-

---

१. तस्य भावस्तत्त्वम् क० म० टि०। २. तकारादेशस्त्वम् क० म० टि०। ३. ऐक्ष्वाकः काश्यपो ब्रह्मा गौतमो नाभिजोऽग्रजः, इति धनञ्जयः। क० म० टि०। ४. ग्रयणि क०। ग्र्यणि म०। ५. सगन्धो मित्रयुः सुहृत् इत्यभिधानम्। क० म० टि०। ६. अथ क० म० टि०। ७. अत्रि क० म०। ८. –स्य कशब्दस्य च म०। ९. तसि क० म०। १०. साध्यः म०। ११. विकल्प्यन्ते क० म०। १२. तद्धिता द्विप्रकाराः—प्रकृत्यर्थादर्थान्तरवृत्तयः स्वार्थिकाश्चेति। तत्राद्या द्विप्रकाराः—अनेकार्थाः प्रत्यर्थनियताश्चेति। अनेकार्था अणादयः। प्रत्यर्थनियता इमादयः। एकस्मिन्नेवार्थे वर्तमाना इत्यर्थः। स्वार्थिकाश्च द्विप्रकाराः, प्रकृत्यर्थविशेषद्योतिनः तावन्मात्रवृत्तयश्चेति। तत्राद्या द्विप्रकाराः, प्रातिपदिकार्थप्रधाना विभक्त्यर्थप्रधानाश्चेति। प्रातिपदिकार्थप्रधानाः प्वरवादयः। विभक्त्यर्थप्रधाना ह्यादयः। तावन्मात्रवृत्तयोऽपि पूर्ववद्द्विप्रकाराः। प्रातिपदिकार्थप्रधानष्ट्यणादयः। विभक्त्यर्थप्रधानाः पत्सादयः। प्रकृत्यर्था एव भवन्ति ये ते स्वार्थिकाः। क० म० टि०। १३. –यं वा वाग्र –क० म०। १४. देवा –क० म०। १५. दिव च –क० म०।

काश्यपीया: । दौरश्व: । पैङ्गलकाण्वा: । शकलादेर्वृद्धादि इत्यण् । अजिह्माहरितकात्यादिति किम् ? जिह्माचपला: कात्य: जिह्माकात्य: । हरितभक्ष: कात्य: हरितकात्य: । तयोरिमे जैह्माकाता: । हरितकाता: ।

गोर्योऽचि ॥२।४।३॥ गोशब्दादजादिप्रत्ययप्रसंगे यप्रत्ययो भवति इत्ययमधिकार: । गवि भवं गव्यम् । गो: स्वं गव्यम् । गौर्देवताऽस्य गव्यम् । गवा चरितव्यं गव्यम् । अचीति किम् ? गोरूप्यम् । गोमयम् ।

प्राग्जितादण् ॥२।४।४॥ प्राग्जितार्थाद्येऽर्थास्तेष्वण् प्रत्ययो वा भवति । अधिकार: परिभाषा विधिर्वाऽयम् । त्रिष्वपि पक्षेष्वपवादविषयं परिहृत्य वर्तते । उपगोरपत्यम् औपगव: । कापटव: । भिक्षाणां समूहो भैक्षम् । काकम् । कषायेण रक्तं काषायम् । हारिद्रम् । प्राग्जितादणित्युत्तरार्थम् । ठणादिवदणित्यधिकारेणाप्येतत्सिद्धम् ।

धनादे: पत्यु: ॥२।४।५॥ धन इत्येवमादिभ्यो य: पतिशब्दस्तदन्ताद्धनपति इत्येवमादे: प्राग्जितीयेऽर्थे अण् प्रत्ययो वा भवति । ञ्यञ्छापवाद: । धनपतेरपत्यं धानपत: । आश्वपत: । राष्ट्रपतेरिदं राष्ट्रपतम्, धान्यपतम् । प्राणपतम् । धन, अश्व, शत, गण, क्षेत्र, कुल, गृह, पशु, सभा, धन्वन्, राष्ट्र, धान्य, प्राण इति धनादि: ।

पत्युत्तरपदयमादित्यदित्यदितेर्ण्योऽणपवादे चास्वे ॥२।४।६॥ पतिशब्दोत्तरपदाद् यम आदित्य दिति अदिति इत्येतेभ्यश्च प्राग्जितीयेऽस्वे स्वर्वजितेऽर्थे पत्यादौ योऽणपवादस्तद्विषये च ण्यप्रत्ययो वा भवति । बृहस्पतेरपत्यं बार्हस्पत्य: । प्राजापत्य. । सैनापत्य: । बृहस्पतिर्देवताऽस्य बार्हस्पत्य: । यम—याम्यम् । आदित्य—आदित्यम् । दिति—दैत्यम् । दितेरपत्य दैत्य: । अदिति—अदितेरपत्यमादित्य. । अदितिर्देवताऽस्य आदित्यम् । अणपवादे च । वनस्पतीना समूहो वानस्पत्यम् । अत्र परत्वादवित्तलक्षणष्ठन् स्यात् । यमस्यापत्यं याम्य: । आदित्यस्यापत्यमादित्य । अत्र इञ्[1] स्यात् । ण्यो हि प्राग्जितीयमणं बाधित्वा सावकाश: । अणाग्रहणं किम् ? वास्तोष्पत्यभार्य: । असत्यण्ग्रहणे स्वापवादविषयेऽस्य समावेशे सति नारैञ् तद्धित इति पुम्भावनिषेधादाकारोऽपि श्रूयेत । अस्व इति किम् ? उष्ट्रपतिर्नाम वाहनं तस्य स्वम् औष्ट्रं वाहनादित्यम् । अकारस्य 'अश्वादेरारैच्' जिदार्षादणि त्रेरिति च प्रयोजनम् ।

बहिषष्टीकण् च ॥२।४।७॥ बहिस् इत्येतस्मात् प्राग्जितीयेऽर्थे टीकण् प्रत्ययो वा भवति चकाराञ् ञ्यश्च(श्वा) । बाह्य. । बाहीक । बाह्या । बाहीकी । टकारोऽडर्थ. । णकारो णित्कार्यार्थ. ।

कल्यग्नेर्ढण् ॥२।४।८॥ कलि अग्नि इत्येताभ्या प्राग्जितीयेऽर्थेऽणपवादविषये चास्वे ढण्प्रत्ययो वा भवति । कलिर्देवताऽस्येति कालेयम् । आग्नेयम् । कलौ भव कालेयम् । आग्नेयम् । कलेरागतं कालेयम् । आग्नेयम् । कले: स्वं कालेयम् । आग्नेयम् ।

पृथिव्या ञ्याञ् ॥२।४।९॥ पृथिवीशब्दात् प्राग्जीतीयेऽर्थेऽण्यपवादविषये चास्वे ञ्य अञ् इत्येतौ प्रत्ययौ वा भवत: । पृथिव्या अपत्यं, तत्र भवो वा पार्थिव: । पार्थिवा । पार्थिवी । ङी । बहुषु ल्लुक् । संघादिष्वणिति प्रयोजनमञ्विधानस्य ।

उत्सादेरञ् ॥२।४।१०॥ उत्स इत्येवमादिभ्य: शब्देभ्य प्राग्जितीयेऽर्थेऽणपवादविषये चास्वे अञ् प्रत्ययो वा भवति । अणस्तदपवादानां चापवाद: । उत्सस्येदम् औत्सम् । औदपानम् । अणपवादे च । उत्सस्यापत्यमौत्स:[2] । तरुण्या: त(ता)रुण: । तालुन: । पञ्चालेषु भव: पाञ्चाल: । अत्र इञ् ढण् युञ् च प्राप्नुवन्ति । कुरोरपत्यं कौरव्य इति ण्यविधौ कुरुशब्दोपादानस्यानवकाशत्वाद्भवति । कौरव इति[3] स्वर्थविवक्षायाम् । बष्कयादसमास इति बष्कयशब्दस्य समासे प्रतिषेधाद्युत्साद्यन्तस्यापि प्रत्यय । गोधेनुभ्य आगतं गौधेनवम् । मयड्ण्यौ न भवत: । द्विरञ्ग्रहणाद्योगविभागो गरीयान् । उत्स, उदपान, विकर, विनद, महानद, महानस, महाप्रपाण, तरुण, तलुन, धेनु, पंक्ति, जगती, त्रिष्टुप्, अनुष्टुप्, जनपद, भरत, उशीनर, ग्रीष्म, पीलु, कुण,

---

१. अस इञ् क० म० । २. –स्स: । औदपान: । क० म० । ३. –ति तु स्व –क० म० । ४. सम्बन्धविवक्षायाम् क० म० टि० ।

वृषदंश, भल्लकीय, रथन्तर, मध्यन्दिन, बृहत्, महत्, महिमन्, सत्वत्, कुरु, पञ्चाल, इन्द्रावसान, उष्णिह, ककुभ्, सुवर्ण इति उत्सादिः ।

बष्कयादसमासे ॥२।४।११॥ बष्कयशब्दादसमासे प्राग्जितीयेऽर्थेऽणपवादविषये चास्वेऽञ्प्रत्ययो वा भवति । बष्कयस्यापत्यं बाष्कयः । असमास इति किम् ? गौबष्कयिः ।

देवाद्यञ् च ॥२।४।१२॥ देवशब्दात् प्राग्जितीयेऽर्थेऽणपवादविषये चास्वे यञ् अञ् च वा भवतः । दैव्यम् । दैवम् । दैवी वाक् ।

स्थाम्नोऽत् ॥२।४।१३॥ स्थामन्शब्दात् प्राग्जितीयेऽर्थेऽत् इत्येष प्रत्ययो भवति । तकारो निर्देशार्थः । अश्वत्थाम्नोऽपत्यम् अश्वत्थामः ।

लोम्नोऽपत्येषु ॥२।४।१४॥ लोमन् इत्येवमन्ताच्छब्दरूपाद् अपत्येषु बहुष्वकारप्रत्ययो वा भवति । उडुलोम्नोऽपत्यानि बहूनि उडुलोमाः । शरलोमाः । उडुलोमैः । अपत्येष्विति बहुवचनं किम् ? औडुलोमिः । औडुलोमी । शारलोमिः । शारलोमी ।

श्लुग्द्विगोरलुचोऽनपत्येऽज्यादेः ॥२।४।१५॥ द्विगोर्लुगन्तात् परो यः प्राग्जितीयेऽपत्यव्रजितेऽर्थेऽजादिर्यकारादिश्च प्रत्ययस्तस्य श्लुग् भवति । पञ्चसु कपालेषु संस्कृतम् पञ्चकपाल्या वा पञ्चकपालम् । दशकपालम् । पञ्चेन्द्राण्यः । पञ्चेन्द्राणी देवताऽस्य पञ्चेन्द्रः । दशेन्द्रः । द्वयोरनुयोगयोर्द्व्यनुयोग्या वा बोद्धाऽभ्येता वा द्व्यनुयोग । यादे.—द्वयो रथयोर्द्विरथ्या वाऽयं द्विरथः । त्रिरथ. । "रथात् सादिश्च वो ढुञ्ञे यः" इति यः । द्विगोरिति किम् ? कैलासभक्षा.[2] । अलुच इति किम् ? पञ्चसु कपालेषु संस्कृतं पञ्चकपालं तस्येदं पाञ्चकपालम् । प्राग्जितादिति किम् ? द्वाभ्यामक्षाभ्यां दीव्यति द्वैयक्षिकः । त्रैयक्षिकः । द्वौ रथौ[3] वहति द्विरथः[4] । अनपत्य इति किम् ? द्वैदेवदत्तिः । पाञ्चनापितिः । अज्यादेरिति किम् ? पञ्चगर्गमयम् । पञ्चगर्गरूप्यम् ।

स्त्रीपुंसाट् ट्नञ्ञ्स्नञ्ञ्वतः ॥२।४।१६॥ स्त्री पुंस इत्येताभ्यां प्राग्वतो येऽर्था वक्ष्यन्ते तेष्वणपवादविषये चास्वे यथाक्रमं ट्नञ् ञ्स्नञ् इत्येतौ प्रत्ययौ वा भवतः । स्त्रिया अपत्यं स्त्रैणः[5] । पौंस्नः[6] । स्त्रिया इदं स्त्रैणम् । पौंस्नम् । स्त्रैणी । पौंस्नी । टकारो ञ्यर्थ. । प्राग्वत इति किम् ? स्त्रीवत् । पुंवत् । स्त्रीपुंसयोरञि नकि विधेयमाने नोऽदस्येति लुक् स्यात् । न चासति नकि लुबप्राप्तिरस्ति । स्त्रीशब्दस्य च परत्वादेङ् स्यात् । यथा श्रायः स्थालीपाक इति ।

त्वे वा ॥२।४।१७॥ स्त्रीपुंसाभ्यां त्वे त्वप्रत्ययविषये यथाक्रमं ट्नञ् ञ्स्नञ् इत्येतौ प्रत्ययौ वा भवत । स्त्रियो भावः स्त्रैणम् । स्त्रीत्वम् । पौंस्नम् । पुंस्त्वम् । इदं वाग्रहणं प्रत्ययविकल्पार्थं प्रकृतं तु वाक्यार्थम् ।

ञसोऽपत्ये ॥२।४।१८॥ अणादयोऽनुवर्तन्ते । ञसः षष्ठ्यन्तादपत्येऽर्थे यथाविहितमणादयः प्रत्यया भवन्ति । उपगोरपत्यमौपगवः । कापटवः । भानवः । श्यामगवः । धानपतः । औष्ट्रपत्यम् । औपगवी । औपगवौ । औरगवा । अपत्य इति प्रजननमात्रं विवक्षितम् । न लिङ्गसंख्यम् । तथा च बहुष्वस्त्रियामित्यादि । ञस इति किम् ? देवदत्तेऽपत्यम् । अपत्य इति किम् ? भानोरयं भानवीयः । श्यामगवीय. । स्वै इत्येव । अणादिसिद्धावपत्यविवक्षायां तदपवादबाधनार्थो योगः ।

---

१. द्व्यनुभोगः क० म० । २. कैलासा भक्षाः क० म० । कीलासे संस्कृताः कैलासाः, संस्कृते भक्षेनि सूत्रेणाण् । एवं भाण्ट्रापात्र इत्यादयः । तथा चोक्तम्—उत्तरपुराणे—"सागीचुल्लीगतस्थूलकिलास-घृतमध्यगान् । उष्णापूपान् समादाय भक्षयिष्यति बालकः ॥" क० म० टि० । ३. रथौ क० म० । ४. द्विरथ्यः क० म० । ५. स्त्रियः प्राधान्यात् क० म० टि० । ६. पुंसः प्राधान्यात् क० म० टि० । ७. सर्व एव हि पूर्वजा व्यवहितजनितेनापि पुत्रादिना नरके न पतन्तीत्याद्यप्रकृतीनां सर्वमपत्यं भवतीति वर्धमानसूरौ । अपत्यमिच्छन्ति तदेव साधवो न येन जातेन पतन्ति पूर्वजाः । इति स्वयाऽपत्यगुणैषिणा पतन्नुपेक्षणीयेन मयापि संस्कृता इति धर्मशर्माभ्युदये । क० म० टि० ।

आद्यात् ॥२।४।१९॥ पौत्राद्यपत्यं पूर्वेषामापरमप्रकृतेरपत्यं भवति । तत्र तत्सम्बन्धविवक्षायामनन्तरादिभ्योऽपि प्रत्ययः प्राप्नोति—इति नियमं आरभ्यते । अपत्ये य. प्रत्यय. स आद्यात् परमप्रकृतेरेव नानन्तरवृद्धयुवभ्यः । उपगोरपत्यं वृद्धमौपगवः । औपगवस्याप्यौपगवः । गर्गस्य गार्ग्यः । गार्गेरपि गार्ग्यः । गार्ग्यस्यापि गार्ग्यः । गार्गायणस्यापि गार्ग्यः । अनन्तरादयोऽपि परमप्रकृतिरूपेणैवापत्ये प्रत्ययमुत्पादयन्ति ।

वृद्धाद्यूनि ॥२।४।२०॥ यून्यपत्ये यः प्रत्ययः स आद्याद्वृद्धाद् प्रथमाद् यो वृद्धप्रत्ययस्तदन्ताद्भवति । आद्यादित्यस्यापवादो वृद्धादिति यूनि प्रकृतिर्विधीयते । उपगवस्यापत्यं युवा औपगविः । गार्ग्यस्यापत्यं युवा गार्ग्यायणः । नदस्यापत्यं युवा नादायनिः । यूनीति किम् ? औपगवः । नाद्यायनेः । आद्यादिति किम् ? औपगवेरपत्यं युवा औपगविः । गार्ग्यायणस्यापत्यं युवा गार्ग्यायणः । फणिञ् च न भवति ।

अत इञ् ॥२।४।२१॥ ङसोऽपत्य इति वर्तते । अकारान्तात् परो यो ङस् षष्ठो, तदन्तादपत्येऽर्थे इञ्प्रत्ययो भवति । अणोऽपवादः । दक्षस्यापत्यं दाक्षिः । प्लाक्षिः । आकम्पनि. । आश्वग्रीविः । कुत्सश्चरिः । मायूरिः । केन कापिञ्जलिः कृशः । तपरकरणं किम् ? शुभंयु कौलालपा इत्यतो मा भूत् । अपत्य इति किम् ? प्रदीयतां दाशरथाय मैथिली । अत्र दशरथस्याय दशरथस्तस्मै दाशरथायेति स्वत्वविवक्षा । अपत्यविवक्षाया दाशरथय इत्येव भवति । शैवस्यापत्यम् । सर्वेषामपत्यम् । कुचरस्यापत्यम् । वृद्धस्यापत्यम् । कारकस्यापत्यमित्यादिष्वनभिधानान्न भवति । अकारो ञित्कार्यार्थः ।

गोत्रे बह्वादिभ्यः ॥२।४।२२॥ स्वापत्यसन्तानस्य स्वव्यपदेशकारणमृषिरनृषिर्वा यः प्रथमपुरुषः तदपत्यं गोत्रम् । बाह्वादिभ्यः षष्ठ्यन्तेभ्यो गोत्रेऽपत्येऽर्थे इञ्प्रत्ययो भवति । बाहोरपत्यं बाहविः । औदञ्चि । इह—उदञ्चीति सर्वकारपाठान्नलोपाभावः । गार्ग्य गम्यन्ते । (?) गोत्र इति किम् ? योऽपत्ये बहुनामि तस्य बाहवः । सम्भवापेक्षं विशेषणम् । तेन पञ्चानामपत्यं पाञ्चिः । साप्तिः । आष्टिरिति भवति । अनकारान्तार्थो बाधकं बाधनार्थश्चारम्भ. । बाहु, उपबाकु, निबाकु, चाटाकु, उपबिन्दु, बाला, बलाका, वृकका, मूषिका, भगला, अगहा, दुवका, मुग्वी, मित्रा, पुष्करसद्, अनुरहत्, उदञ्, शिरम्, लोमन, देवशर्मन्, अग्निशर्मन्, कुनामन्, सुनामन्, पञ्चन्, सप्तन्, अष्टन्, स्वधावत्, मापशराविन्, क्षेमदृत्विन्, भृङ्गलसादि, खरसादिन्, नगरमर्दिन्, प्राकारमर्दिन्, अजीगर्तु, कृष्ण, युधिष्ठिर, अर्जुन, साम्पिगद, प्रद्युम्न, राम, संकर्षण, मध्यन्दिन, सत्यक—एते बाह्वादयः । आकृतिगणोऽयम् । तेन सख्युरपत्यं साख्विः । जङ्घाया जाङ्घ्यः (जाङ्घ्य.) संवेशिनः सावेशिः, विदस्य वैदिरित्यादि सिद्धं भवति । इत्त प्रभृति गोत्र इत्यधिकाराद्गोत्रे सम्भवति ततोऽन्यत्र प्रतिषेधो वेदितव्यः ।

वर्मणोऽचक्रात् ॥२।४।२३॥ चक्रवर्जितात् परो यो वर्मन्शब्दस्तदन्तादपत्येऽर्थे इञ्प्रत्ययो वा भवति । ऐन्द्रवर्मिः । अचक्रादिति किम् ? चाक्रवर्मणः ।

---

१. योऽपि व्यवहितेन जनित. सोऽपि प्रथमप्रकृतेरपत्यं भवत्येव । गर्गस्यापत्यं गार्ग्यः । तत्पुत्रोऽपि गार्ग्यः । सर्वस्मिन्व्यवहितजनितेऽपि वृद्धापत्ये गर्गशब्दाद् यत्रैव भवतीति प्रत्ययो निबध्यते । अथवा वृद्धाऽपत्ये विवक्षिते, एक एव शब्दः परमप्रकृतिः प्रत्ययमुत्पादयति प्रकृतिर्निबध्यते इति काशिकावृत्तावुक्तम् क० म० टि० । २. नादायनः । क० म० । ३ कुतश्चरति क० म० । ४. मैथिली क० म० । ५. शतस्यापत्यम् क० म० । ६. कुजरस्यापत्यम् क० म० । ७. राजपुरुषस्यापत्यं कापुरुषस्यापत्यं कार—क० म० । ८. हविः । औपवाकविः । औद्—क० म० । ९. सनका —क० म० । १०. ओत्र गम्यते क० म० । ११. अद्यत्वे क० म० । (बहुनामिधेयोऽद्यतनः, तस्यापत्यं बाहव इति जैनेन्द्रचिन्तामणिः क० म० टि०) । १२. यथासम्भवं च विशेषणमिदम् । तेनागोत्रेऽपीति वचनादिह न भवति, इति जैनेन्द्रचिन्तामणिः क० म० टि० । १३. बह्वादेरनदन्तार्थ इति यावत् क० म० टि० । १४. बाधके क० म० । १५. प्राला क० म० । १६. वृकला क० म० । १७. सुगृही क० म० । १८. शंखकतादिन् क० म० । १९. खरनादिन् क० म० । २०. जङ्घ्य. क० म० ।

अजादिभ्यो धेनोः ॥२।४।२४॥ अजादिभ्यः परो यो धेनुशब्दस्तदन्तादपत्येऽर्थे इञ्प्रत्ययो वा भवति। आजधेनविः। वाप्यधेनविः।

ब्राह्मणाद्वा ॥२।४।२५॥ ब्राह्मणशब्दात्परो यो धेनुशब्दस्तदन्तादपत्येऽर्थे इञ्प्रत्ययो वा भवति। ब्राह्मणधेनविः। ब्राह्मणधेनवः।

साम्भूय्याऽऽम्यामितौज्यौदिषाडिवाद्बलिः ॥२।४।२६॥ साम्भूयि आम्भि आमितौजि औदि षाडि, वाद्बलि इत्येते शब्दा अपत्येऽर्थे इञन्ता निपात्यन्ते। सम्भूयसोऽपत्यं साम्भूयिः। अम्भसः—आम्भिः। अमितौजसः अपत्यम् आमितौजिः। अत्र इञ् सलोपश्च निपात्यते। उदकस्यौदिः। अत्र इञ् कलोपश्च। षण्णां षाडिः। अत्र इञ् डत्वम्। वाग्वादस्यापत्यं वाद्बलिः। अत्रेञ् वाचो दस्यं बलभावश्चोत्तरपदस्य (निपात्यन्ते)।

सुधातृव्यासवरुटनिषादचण्डालबिम्बस्याकङ् च ॥२।४।२७॥ सुधातृ व्यास वरुट निषाद चण्डाल बिम्ब इत्येतेभ्योऽपत्येऽर्थे इञ्प्रत्ययो भवत्यकङ् चैषामन्तादेशः। सुधातुरपत्यं सौधातकिः। वैयासकिः, वारुटकिः, नैषादकि., चाण्डालकिः, बैम्बिकिः, सुधातृव्यासयोरणोऽपवादः। वरुटस्य कारिञ्यस्येञ् च विधेय शेषाणामस्त्येव।

पुनर्भूपुत्रदुहितृननान्दृभ्योऽनन्तरेऽञ् ॥२।४।२८॥ पुनर्भू पुत्र दुहितृ ननान्दृ इत्येतेभ्योऽनन्तरेऽपत्येऽञ्प्रत्ययो वा भवति। पौनर्भवः। पौनर्भवौ। पौनर्भवाः। पौत्रः। दौहित्रः। नामान्द्रः। अनन्तर इति किम्? वृद्धेऽञ् न भवति। अञ् ष्यङर्थः। अन्यत्र त्वत्राञ्यणि वा विशेषः। अगोत्रत्वाद् बहुषु न ष्फलुक्। सङ्घादिष्वण्। पौत्रादवृद्धत्वाद्द्व्यचोऽण इति यञ्च न भवति। केचिच्च पुनर्भव इति ष्फलुकमुदाहरन्ति।

पारशवः ॥२।४।२९॥ पारशव इति परस्त्रीशब्दस्यानन्तरेऽपत्येऽञ् परशुभावश्च निपात्यते। परस्त्रिया अनन्तरापत्यं पारशवः, परस्त्रीत्यमवर्णाया वर्तमानस्येदं निपातनम्। परस्त्रीत्यस्य तु पारस्त्रैणेय इति भवति, कल्याणादिपाठाड्ढक्ण्। अनुशतिकादित्वादुभयोः पदयोरार्द्धच्।

विदादेर्वृद्धेऽनृष्यानन्तर्ये ॥२।४।३०॥ विदादिभ्यो वृद्धेऽपत्येऽञ् प्रत्ययो भवति न चेद्वृद्धविषयमृषित्वस्यानन्तर्यमविच्छेदो गम्येत। विदस्यापत्यं वृद्ध वैदः। वैदौ। विदाः। और्वः। और्वौ। उर्वाः। वृद्ध इति किम्? विदस्यापत्यमनन्तरं वैदिः। अनृष्यानन्तर्य इति किम्? इन्द्रद्र्यः सप्तमः। काश्यपानां भारद्वाजानां कतमोऽसि त्वम्? काश्यपा.। भारद्वाजाः। नैरन्तर्येणापत्यापत्यवत्सम्बन्धे स्थिता वृद्धाः। अत्राणिति बहुषु लुक् स्यात्। कथं कौशिको विश्वामित्र इत्यञ्। एवं हि लौकिकः प्रवादः—विश्वामित्रस्तपस्तेपे नाऽनृषिः स्यामिति तत्रभवानृषि. सम्पन्नः। पुनस्तपस्तेपे। नाऽनृषेः पुत्रः स्यामिति गाधिरप्यृषिः सम्पन्नः, पुनस्तपस्तेपे। नानृषेः पौत्रः स्यामिति कुशिकोऽप्यृषिः सम्पन्न इति तदेतदृष्यानन्तर्यम्। अत्रापत्यापत्यवत् सम्बन्धमात्रं प्रतीयते तस्यानन्तर्यम्। विद, उर्व, कश्यप, कुशिक, भरद्वाज, उपमन्यु, किलात, केदर्भ, विश्वानर, ऋषिषेण, ऋतभाग, सुदाकु, पुदाकु, हर्यश्व, यियक, अपस्तम्भ, कुवाचर, शरद्वत्, शुनक, धेनु, गोपवन, शिग्रु, बिन्दु, ताजद, अश्वावतान, श्यामाक, श्यामान, श्यापर्ण, हरित, किंदास, वस्यस्क, अर्कलुश, वद्योग, वृष्णु, वृद्ध, प्रतिबोध, रथीतर, गविष्ठिर, निषाद, मधुर, इति विदादिः। मधुरशब्दस्य गोपवनादौ चैकेषां पाठोऽलुगर्थः। परो हरितादिरञ् इति फणर्थः। मठराश्वद्वित्यपि केचित् पठन्ति। माठर्यः।

कुञ्जादेर्ष्फः ॥२।४।३१॥ कुञ्जादेर्वृद्धेऽपत्ये ष्फ इत्ययं प्रत्ययो भवति। कुञ्जस्यापत्यं वृद्धं कौञ्जायन्यः। कौञ्जायन्यौ। कौञ्जायनाः। ब्राध्नायन्यः। ब्राध्नायन्यौ। ब्राध्नायनाः। अकारो व्रातष्फथस्त्रिया-

---

१. वाप्यधेनविः क० म०। २. विज च क० म०। ३. भवेत्पारशवः पारस्त्रैणे शूद्रासुतेऽपि च। शूद्रायां विप्रतनये शस्त्रे पारशवो नरे क० म० टि०। ४. –अनन्तरः क० म०। ५. –द्वाजाश्च विषयौ वैर –क० म०। ६. –स्वन्धेन स्थि––म०। ७. –आणि बहु––क० म०। ८. षिषु––क० म०। ९. ऋष्टिषेण क० म०। १०. पियक क० म०। ११. ताजम म०। १२. श्याम्याक म०। १३. मठाराद्वित्यपि क० म०।

मित्यत्र विशेषार्थं आरैबर्थश्च । वृद्ध इति किम् ? कुञ्जस्यापत्यमनन्तरं कौञ्जिः । कुञ्ज, ब्रध्न, शङ्ख, भस्मन्, गण, लोमन्, शटि[1], शुण्डा, शुभा, विपाश[2], स्कन्द, स्कम्भ इति कुञ्जादिः ।

नडादिभ्यः फण् ॥२।४।३२॥ नडादिभ्यो वृद्धेऽपत्ये फण्प्रत्ययो भवति । नडस्यापत्यं नाडायनः । चारायणः । वृद्ध इति किम् ? नाडिरनन्तरः । णकारो वृद्धसंज्ञार्थः । नड, चर, वक, कुञ्ज, इतिक, इतिश, उपक, अमक, सत्वल, वाज, व्यतिक, प्राण, नर, सायक, दास, मित्र, द्वीप, पिङ्गल, किङ्कर, कातर, काण्डेव[3], काश्यप, काश्य, गर्ग्य, अज, अमुष्य, लिगु, चित्र, कुमार, लोह, स्तम्ब, शिशिपा, अग्र, तृण, शकट, मिमन, जन, ऋच्, इन्धेन[4], अनन्धर, युगन्धर, हंसक, दण्डिन्, हस्तिन्, पञ्चाल, चमसिन, सुकृत्य, स्थिरक, ब्राह्मण, चटक[5], अश्वल, खरप, बदर, शोण, दुर्ग, आरोह, कामुक[6], ब्रह्मदत्त, उदुम्बर इति नडादिः । आकृतिगणः ।

यञिञः ॥२।४।३३॥ यञन्तादिञन्ताच्च वृद्धे वर्तमानाद् ङसोऽपत्ये यूनि फण् प्रत्ययो भवति । आद्याद् वृद्धाद्यूनोति वचनात् । गार्ग्यस्यापत्यं युवा गार्ग्यायणः । वात्स्यायनः । दाक्षायण. । प्लाक्षायणः[7] । तैलखलायनः । वृद्धवृत्तेरिञ् ग्रहणादिह न भवति । उदुम्बराणा राजा औदुम्बरि. तस्यापत्यमौदुम्बरः । औदुम्बरायणिः । गार्ग्या अपत्यं गार्ग्येयः, दाक्षेय इत्यत्र परत्वाड्ढणेव भवति ।

हरितादेरञः ॥२।४।३४॥ हरितादिर्विदाद्यन्तर्गणः । हरितादेरञन्ताद् वृद्धे वर्तमानादपत्ये यूनि फण् प्रत्ययो भवति । हरितस्यापत्यं युवा हारितायनः । कैन्दासायनः । हरितादेरिति किम् ? वैदस्यापत्यं युवा वैदः[8], इञः श्लुक् । अञ इति किम् ? हरितस्यापत्यं वृद्धं हारितिः[9] ।

क्रोष्टुशलङ्कोर्लुक् च ॥२।४।३५॥ क्रोष्टु[10] शलङ्कु इत्येताभ्यामपत्ये वृद्धे फण् भवति तयाश्चाञ्यस्य लुग् भवति । क्रौष्टायनः, शालङ्कायनः । पैलादिषु शालङ्किरिति पाठादिञपि भवति ।

शरद्वच्छुनकरणाग्निशर्मकृष्णदर्भाद् भृगुवत्सवशिष्ठवृषगणब्राह्मणाग्रायणे ॥२।४।३६॥ शरद्वत् शुनक रण अग्निशर्मन् कृष्ण दर्भ इत्येतेभ्यो ङसन्तेभ्यो यथाक्रमं भार्गवे वात्स्ये वासिष्ठे वार्षगण्ये ब्राह्मणे आग्रायणे च वृद्धेऽपत्ये फण् प्रत्ययो भवति । शारद्वतायनो भार्गवः । शारद्वतोऽन्यः । शौनकायनो वात्स्यः । शौनकोऽन्यः । राणायनो वासिष्ठः । राणिरन्य । आग्निशर्मायणो वार्षगण्यः । आग्निशर्मिरन्यः । काण्वायनो ब्राह्मणः । काण्विरन्यः । दार्भायण आग्रायणः । दार्भिरन्यः । शरद्वच्छुनको विदादौ ।

द्रोणपर्वतजीवन्ताद्वा ॥२।४।३७॥ द्रोण पर्वत जीवन्त इत्येतेभ्योऽपत्ये वृद्धे फण् वा भवति । द्रौणायनि. । द्रौणिः । पार्वतायनः, पार्वति. । जैवन्तायन, जैवन्तिः । वृद्ध इति किम्[12] ? द्रौणिरेवानन्तरः । द्रौणायनो द्रोणत. प्रतीतिरश्वत्थाग्नि । तस्मिन्नपेक्षायामसाधुरेव[13] तत परापेक्षा चेत् साधु, अध्यारोपो वा । एवं पाराशर्यो व्यास. । जामदग्न्यो राम इति ।

गर्गादेर्यञ् ॥२।४।३८॥ गर्ग इत्येवमादिभ्योऽपत्ये वृद्धे यञ् प्रत्ययो भवति । गार्ग्य । वात्स्यः । वृद्ध इति किम् ? गार्गिरनन्तरः । गोत्र इत्येव । गर्गो नाम कश्चित्तस्यापत्यं वृद्ध गार्गि. । अकारो ञित्कार्यार्थः । गर्ग, वत्स, राज, संकृति[14], अज, व्याघ्रपात्, पितृवर्ष, प्राचीनयोग, पुलस्ति, रेभ, अग्निरेश, शङ्ख, शर, धूम, अवट, नमस, धनंजय, वृक्ष, विश्वावसु, जरमान्, कुरुकत, अनडुह, लोहित, संशित,

---

१. –नन्तरः क० म० । २. षट क० म० । ३. विषाश क० म० । ४. काथल क० म० । ५. इन्ध क० म० । ६. चटका क० म० । ७. कामक क० म० । ८. –क्षायणः । औदुम्बरायणः । तैलख—क० म० । ९. वैद. क० म० । १० हारितः क० म० । ११. क्रोष्ट क० म० । १२. कथं द्रोणतः प्रत्ययोऽश्वत्थाग्नि द्रौणायन इति तस्मिन्नुपेक्षायामसाधुः । साधुरेवायम् । परद्रोणापेक्षायाम् । यदि वा शब्दसाम्यात् परद्रोणत्वं द्रोणे पितरि पुत्रे वाऽश्वत्थाग्नि पौत्राद्युपकारित्वात् प्रादिग्वमुपचर्यते । एवं पाराशर्यो जामदग्न्य इति जैनेन्द्रचिन्तामणिः क० म० टि० । १३. एव इति क० म० पुस्तकयोर्नास्ति । १४. सकृति क० म० ।

बभ्रु[1], बभ्रू, मन्थु, ग्रंथु, मन्थ्यु, बन्ध्यु[2], भ्रातृ[3], गोहृत्[4], जिगीषु, मनु, तन्तु, मनागीषुनु, कत्थक, वक्ष, तरुक्ष, तलुक्ष, तण्डिन्, मतण्ड, कपि, कत, शकल, कन्व, वामरथ, गौरव, गोकक्ष, कुण्डिनी, यज्ञवल्क, पर्णवल्क, अश्वमघात[5], शिरोहित, मृगयव, शण्डिका, मुद्गल, मुद्गर, पराशर, अनुकर्ण, अहिंडत, अश्वमेधक, शर्कराक्ष, पूतिमाष[6], स्थूरा, अररक्ता, पिङ्ग, कृष्ण, गोकुन्द, उलूक, तितिक्ष, मिर्ष, भिक्षज[7], मण्डित, दल्भ, विकिल, देवहा[8], इन्द्रहा, यज्ञहा, एकल, अम्बल, बृहदग्नि, अग्नवर्ण, सुलाग्नि[9], कुटिकु, उक्थ इति गर्गादिः ।

मधुबभ्रोर्ब्राह्मणकौशिके ॥२।४।३९॥ मधु बभ्रु इत्येताभ्यामपत्ये वृद्धे यञ्प्रत्ययो भवति यथासंख्यं ब्राह्मणे कौशिके च । माधव्यो ब्राह्मणः । माधवोऽन्यः । बाभ्रव्यः कौशिकः । बाभ्रवोऽन्यः । गर्गादौ बभ्रुपाठो लोहितादिकार्यार्थः । तत्रैव कौशिकग्रहणं न कृतम् । वैचित्र्यार्थमित्येके । गर्गादिर्यञ्ञे इत्यनित्यमिति[12] पृथगुच्यते । तेन पाराशर्यो व्यासः, जामदग्न्यो रामः, इत्यणन्तरेऽपि यञ्जित्यपरे । कौशिके यञि बभ्रोर्लोहितं द्वित्वमभ्युदासार्थम् । तेन कौशिकी बाभ्रवी, बाभ्रव्यायणो वा । अन्या बाभ्रव्यापत्येवेति केचित् ।

कपिबोधादाङ्गिरसे ॥२।४।४०॥ कपि बोध इत्येताभ्यामपत्ये वृद्ध आङ्गिरसे यञ्प्रत्ययो भवति । कपेरपत्यं वृद्धमाङ्गिरसः काप्यः । कौप्यः । अन्यः कापेयः । कपिशब्दो गर्गादिषु पठ्यते । तस्येञ्पादानं नित्यार्थम् । आङ्गिरस एव यञ् नान्यत्रेति । गणे तु लोहितादिकार्यार्थः । काप्यायनी ।

वतण्डात् ॥२।४।४१॥ वतण्डशब्दादपत्ये वृद्ध आङ्गिरसे यञ्प्रत्ययो भवति । वतण्डस्यापत्यं वृद्धमाङ्गिरसो वातण्ड्यः । आङ्गिरस इति किम्? वातण्ड्यः, वातण्डो वाऽन्यः । गर्गादिशिवादिपाठादन्यत्रोभयं भवति । इदं त्वाङ्गिरसेऽण्बाधनार्थम् । शिवादिपाठोऽप्यस्य वृद्ध एवाणित्वज्ञानार्थः । अन्यत्र हि ऋष्यित्वादेवाणा सिद्धम् ।

स्त्रियां इलुक् ॥२।४।४२॥ वतण्डशब्दादाङ्गिरसेऽपत्ये स्त्रिया यञ् इलुग्भवति । वतण्डस्यापत्यं स्त्री आङ्गिरसी वतण्डी । जातेरस्त्रीयेति ङी । आङ्गिरस इति किम्? अन्या वातण्ड्यायनी वातण्डी वा । गर्गादिपाठाच्चञि ङ्फट् । शिवादिपाठादणि ङी ।

अश्वादेः फञ् ॥२।४।४३॥ अश्वादिभ्यो वृद्धे फञ्प्रत्ययो भवति । अश्वस्य वृद्धापत्यं पुमानिति आश्वायनः । शाङ्ख्यायनः । वृद्ध इति किम्? आश्विः । गोत्र इत्येव । अश्वो नाम कश्चित्, तस्याश्विः । अकारो ञित्कार्यार्थः । अश्व, शङ्ख, जन, उत्स, ग्रीष्म, अर्जुन, चैत्य[13], अश्मन्[14], विद, कुकुटा[15], पुट, रोहिण, खर्जुल, भाटिक[16], भटक, मदित, प्राधृत, रामोदक्षान्ध, ग्रीवका, शकाण, गोलाङ्ग, अर्कश्वन, शुन, वन, पदचक्र, कुल, अविष्ठा, पाचित्र[17], गोमिन्, शाम, धूम्र, वाग्मिन्, विल्वतर, वतसनख, मद, अर्ह, वीक्ष, विशम्प[18], विशाल, गिरि, चपल, चुप, दासक, धार्योजात, शूद्रक, सुमनस्, आरव, किव, खिव, खदिर, इत्यश्वादिः । अत्र गोऽश्वादिः वृद्धकाण्डेऽन्यत्र च पठ्यते । तस्य सोऽपि भवति । अश्वशब्दादिदादिषु पाठादञ् । इह यञ् (फञ्) । आश्वः । आश्वायनः । शाङ्गशब्दाद्विदादिष्वञ् । कुञ्जादिषु ञ्फः । गर्गादिषु यञ् । इह फञ् । शाङ्गः । शाङ्ख्यः[19] । शाङ्खायनः । जनशब्दान्नडादिषु फञ् । इह फञ् । तत्र यूनि विशेषः । जानायनिः । जानायनो युवेति । उत्सग्रीष्मयोरुत्सादिषु पाठोऽनन्तरार्थोऽनपत्यार्थश्च । वृद्धे त्वयमेव । औत्सायनः । ग्रैष्मायणः । अर्जुनशब्दस्य शाङ्गादिष्वनन्तरार्थः । वृद्धे तु आर्जुनायनः[20] । चैत्येति चेलिशब्दो ञ्यन्तः । ततो यूनि प्रत्ययः । चैत्यायनो युवा ।

---

१. बभ्रु । बभ्रि । म—क० म० । २. मध्नु क० म० । ३. शम्भु क० म० । ४. लतु क० म० । ५. गूहक्षु क० म० । ६. अनवजात क० म० । ७. पूतिवापु क० म० । ८. विष क० म० । ९. -वज्र । भिक्षणज । मण्डित । द—क० म० । १०. देवहू । इन्द्रहू । यज्ञहू । क० म० । ११. सुलाग्निन क० म० । १२.—ग्रीह पू—क० म० । १३. चैत्य क० म० । १४. अश्मन् क० म० । १५. कुकुट क० म० । १६. भटिक क० म० । १७. पाचित्र क० म० । १८. विशम्पि म० । विशम्प क० । १९. शाङ्खायनः क० म० । २०. आर्जुनायः क० म० ।

षष्ठभरद्वाजात्रेयात्रेये ॥२।४।४४॥ षष्ठ भरद्वाज इत्येताभ्यामात्रेयेऽपत्ये फञ्प्रत्ययो भवति। षाष्ठायनः। भारद्वाजायनः। इति भवत्यात्रेयश्चेत्। षाष्ठिः, भारद्वाज इति चान्यः। भारद्वाजो विदादिः।

भर्गात्रैगर्तभारद्वाजे ॥२।४।४५॥ भर्ग आत्रेय इत्येताभ्यां यथाक्रमं त्रैगर्ते भारद्वाजे चापत्ये फञ्प्रत्ययो भवति। भर्गात् त्रैगर्ते वृद्धे प्रत्ययः। आत्रेयात्तु भारद्वाजे यूनि। आद्यादवृद्धाच्छूनीति वचनात् भार्गायणस्त्रैगर्तो वृद्धः। भार्गिरन्यः। आत्रेयायणो भारद्वाजो युवा। आत्रेयिरन्यः।

शिवाद्यृष्यन्धकवृष्णिकुरुभ्योऽपत्येऽण् ॥४।२।४६॥ शिवादिभ्यः ऋषि अन्धक वृष्णि कुरुभ्यश्चापत्येऽण्प्रत्ययो भवति। ऋषयो लौकिका वशिष्ठादयोऽपत्ययोगात्। अन्धका वृष्णयः। कुरवश्च प्रसिद्धाः। कुलाख्याः क्षत्रियाः। शिवादिभ्यः–शैवः। प्रौष्ठः। प्रौष्ठिकः। ऋषिभ्यः–वाशिष्ठः। वैश्वामित्रः। गौतमः। अन्धकेभ्यः–ह्वाफल्कः। ह्वैत्रकः। रान्ध्रसः। वृष्णिभ्यः–औदारः। प्रातिबाहतः। वाज्रः। वासुदेवः। आनिरुद्धः। कुरुभ्यः–नाकुलः। साहदेवः। दौःशासनेः। आत्रेयः। जातसेन्यः। जातसेनिः। औग्रसेन्यः। औग्रसेनिः। वैश्रवसेन्यः। वैश्रवसेनिः। भैमसेन्यः। भैमसेनिः। इत्यत्र परत्वाद्वृद्धण् ञ्येञौ च भवतः। दौर्योधनिरिति क्रियाशब्दत्वे। अपत्य इति च वृद्ध इत्यस्य निवृत्त्यर्थम्। अत इञित्यादेरपवादो योगः। शिव, प्रोष्ठक, प्रोषिक[1], वज्र[2], कुठार, अनभिमान, ककुत्स्थ, कौहद, कहूम, रोध, वलर, वतण्ड, तृण, कर्ण, क्षीर, ह्रद, आक, इन्द्र[3], गोपिल, कवलक, जटिलक[4], वधिरक, मञ्जीरक, वृष्णिक, खर्रचार[5], रेख, लेख, आरेखन[6], वर्तन, क्षपिटाक, वृक्षाक, नभाक, ऊर्णनाभ, सुपिष्ट, पिष्टु, मसुर, कर्ण, स्वदूर, क, यस्क, अह्न, द्रह्न, अयस्थूल[7], भलन्द, विरूपाक्ष, भूरिसन्धि, मुनिभूभृ[8], कुञ्चा, कोकिला, सपत्नी, अरत्कारु[9], उत्क्रेया, सुरोहिका, आर्ये, श्वेता, ऋषिषेण[10], गङ्गा[11], विपाश, तक्षन्–इति शिवादिः। अत्र विरू[12]पाक्षादिञपवादः। भूर्योर्ये[13] नामार्थः। श्वेत-शब्दाद्वृद्धण् ऋषिषेणस्य सेनान्तञ्येञो विदादिपाठाद्वृद्धेऽलेव भवति। आर्ष्टिषेण. पिता। आर्ष्टिषेणः पुत्रः। ऋषिषेणः[14]। गङ्गापाठः। शुभ्रादिढणा तिकादेः फिला च समावेशार्थः। गाङ्गः। गाङ्गेयः। गाङ्गायनिः। विपाश्पाठ[15] कुञ्जादिञ्ढेन। वैपाशः। वैपाशायन्यः। तक्षणः पाठः कुर्वादिञ्येन। ताक्षणः। ताक्षण्यः।

विकर्णच्छगलाद्वात्स्यात्रेये ॥२।४।४७॥ विकर्णच्छगल इत्येताभ्यां यथाक्रमं वात्स्य आत्रेये चापत्येऽण्प्रत्ययो भवति। वैकर्णो वात्स्यः। वैकर्णिरन्यः। छागल आत्रेयः। छागलिरन्यः।

शुङ्गाभ्यां भारद्वाजे ॥२।४।४८॥ शुङ्गशब्दात् पुंल्लिङ्गाच्च भारद्वाजेऽपत्येऽण्प्रत्ययो भवति। शुङ्गस्य शुङ्गाया वाऽपत्यं शौङ्गः भारद्वाजः। शौङ्गिः शौङ्गेयश्चान्यः। प्रातिपादिकग्रहणे लिङ्गविशिष्टस्य ग्रहणेऽपि परत्वाद्यञ् प्राप्नोति, तद्बाधनार्थं द्विवचनेन स्त्रीलिङ्गः शुङ्गाशब्द उपादीयते।

कन्यात्रिवेण्योः कनीनत्रिवेणौ[16] च ॥२।४।४९॥ कन्याशब्दात्त्रिवेणीशब्दाच्चापत्येऽण्प्रत्ययो भवति। कनीन त्रिवेणे[17] इत्येतौ च यथाक्रममादेशौ भवतः। कन्याया अपत्यं कानीनः। त्रिवेण्या अपत्यं त्रैवेणः[18]। चकारः सन्नियोगार्थ उत्तरयोरप्यनुवर्त्तते।

विश्रवसोऽनङ्लणौ ॥२।४।५०॥ विश्रवस् इत्येतस्मादपत्येऽण्प्रत्ययो भवति तत्सन्नियोगे चास्य नङ्लणादेशौ भवतः। विश्रवसोऽपत्यं वैश्रवणः। रावणः। इकारोऽन्तादेशार्थः। अण्सिद्ध एव। आदेशार्थं वचनम्।

---

१. वशिष्ठादयोऽपत्यसम्बन्धभाजो लौकिका गृह्यन्ते। न त्विह ब्रह्मचारिण इति त्रैमेन्द्रे क० म० टि०। २.—सनः। दौर्योधनः। आत्रे–क० म०। ३. प्रोष्ठ क० म०। ४. प्रोष्ठिक क० म०। ५. वण्ड। वज्र। क० म०। ६. द्रह्न क० म०। ७. जटिलक म०। ८. खआर क० म०। ९. आलेखन क० म०। १०. अयस्थूण क० म०। ११. भूनि भूमि क० म०। १२. जरत्कारु क० म०। १३. ऋष्टिषेण क० म०। १४. गङ्गविपाश क० म०। १५. न आ वि—क० म०। १६. भूर्योर्योनामार्थः क० म०। १७ ऋष्टिषेण—क० म०। १८. ऋष्टिषेणः क० म०। १९. विपाट् क० म०। २०. त्रिवणी क० म०। २१. त्रिवण क० म०। २२. त्रैवणः क० म०।

संख्यासम्मद्राभ्यामातुङुद् ॥२।४।५१॥ संख्यावाचिनः सम्मद्र इत्येताभ्यां च परो यो मातृशब्दस्तदन्तावपत्येऽण्प्रत्ययौ भवति डुरित्ययं चादेशो भवति । द्वयोर्मात्रोरपत्यं द्वैमातुरः । त्रैमातुरः । शतस्य माता शतमाता तस्या अपत्यं शातमातुरो भरतः । संगता माता सम्माता तस्या अपत्यं साम्मातुरः । भद्रमातुः । भाद्रमातुरः । संख्यासम्मद्रादिति किम् ? सौमात्रः । डकारोऽन्तादेशार्थः । अण्सिद्ध एवादेशार्थं वचनम् ।

नदीमानुषीनाम्नोऽदोः ॥२।४।५२॥ अनुसंज्ञकानदीनाम्नः मानुषीनाम्नश्चापत्येऽण्प्रत्ययो भवति । ढणोऽपवादः । यामुनः । ऐरावतः । उद्ध्यः[2] । वैतसः । पालशिराः[3] । नार्मदो नीलः । मानुषीनाम्नः—दैवदत्तः । सौदर्शनः । सौर्यारः[4] । स्वायम्भ्रुवः । चैत्रितः । मौक्षितः । नदीमानुषीग्रहणं किम् ? सौपर्णेयः । वैनतेयः । नामग्रहणं किम् ? शौभनेयः । अदोरिति किम् ? चान्द्रभागेयः । वायुवेगेयः ।

पीलामण्डूकाद्वा ॥२।४।५३॥ पीला मण्डूक इत्येताभ्यामपत्येऽण्प्रत्ययो भवति वा । पैलः । पैलेयः । माण्डूकः । माण्डूकी । पीलाशब्दाद् द्वयचकढणि, मण्डूकशब्दादिञि प्राप्ते वचनम् । वाग्रहणं मण्डूकस्येत्यर्थम् ।

दितेश्च ढण् ॥२।४।५४॥ दितिशब्दान्मण्डूकशब्दाच्चापत्ये ढण् वा भवति । दैतेयः । दैत्यः । माण्डूकेयः । माण्डूकिः । चकारो मण्डूकार्थम् । पीलाशब्दाद् द्वयचकढण्विकल्पादेव ढण्सिद्धः । बाऽनुवृत्तिर्दितेर्व्यर्था । व्याणपवादे चास्य इति इतोऽनिञो ढणो बाधायां वचनम् ।

व्यतः ॥२।४।५५॥ [5]व्यप्रत्ययान्तादपत्येऽर्थे ढण्प्रत्ययो भवति । चान्द्रमासेयः । वायुवेगेयः[6] । सौवर्णेयः । वैनतेय. । योगविभागो नित्यार्थः ।

द्व्यचोऽनद्याः ॥२।४।५६॥ द्व्यच. व्यदन्तादनदीवाचिनोऽपत्ये ढण्[7] भवति । नदीमानुषीनाम्नोऽदोरित्यणोऽपवादः । दत्ताया अपत्यं दात्तेयः । गौप्तेयः । अनद्या इति किम् ? सीताया अपत्यं सैतः । सन्ध्याया अपत्यं सान्ध्यः । वैण्यः[8] । रैवः[9] । शौद्धः[10] । कौलः[11] । माहः[12] ।

इतोऽनिञः ॥२।४।५७॥ इकाराद्यादनिञ. द्व्यच्कादपत्ये ढण्प्रत्ययो भवति । [13]दुर—दौरेयः । बलि—बालेयः[14] । नाभि—नाभेयः । अत्रि—आत्रेयः । अहि—आहेयः । इत इति किम् ? दाक्षिः । प्लाक्षिः । अनिञ इति किम् ? दाक्षायणः, प्लाक्षायणः । द्व्यच इति किम् ? मारीचः । आजवस्तेयः । शाकन्धेयः । पारिधेयः । आणिधेयः । इति शुभ्रादित्वात्सिद्धम् ।

शुभ्रादिभ्यः ॥२।४।५८॥ शुभ्र इत्येवमादिभ्यो ढण्प्रत्ययो भवति । यथायोगमिञादीनामपवादः । शौभ्रेयः । वैष्टपुरेयः । शुभ्र, विष्टपुर, विष्टर, ब्रह्मकृत, शतद्वार, [15]शताहर, शलाधिक, शालूक, कुकलास, प्रवाहण, भरण, भारत, भारम, कुदत्त[16], [17]कर्मार, इतर, अन्यतर, आलीढ, सुदत्त, [18]सवक्ष, तुद, श्वक, शाप, वाधन[19], शनल, खदूर, कुशन्ध, शुक्र, विप्र, वीजाश्व, अजिर, मवक्र, मखन्धु, मकण्टु[20], सुकण्डु[21], जिह्माशिन, अजिवस्ति, शकन्धि, परिधि, अणिधि, शलाका, भ्रूरेखा[22], भ्रूरोहिणी[23], विकसा,[24] गन्धपिङ्गला, मद्रो-

---

१. सत्यास्तु तनये साम्मातुरवद्भाद्रमातुरः इत्यभिधानचिन्तामणिः क० म० टि० । २. उद्ध्यः क० म० । ३. पलाशिराः क० म० । ४. सौतरः क० म० । ५. व्यप्रत्ययाद्गृहीतप्रत्यय—क० म० । ६. सौपर्णेयः क० म० । ७. ढण्प्रत्ययो भवति क० म० । ८. वेण्यः क० म० । (वेण्याया अपत्यम् क० म० टि०) । ९. रैवः । रैवः । (रिभाया अपत्यम् क० म० टि०) (रेवायाः क० म० टि०) १०. शुद्धायाः क० म० टि० । ११. कुलायाः क० म० टि० । १२. मद्राः क० म० टि० । १३. दुम क० म० । १४. -लेयः । निधि । नैधेयः । क० म० । १५. शताहक । धिक । क० म० । १६. कुदत्त क० म० । १७. कर्पूर क० म० । १८. सुदक्ष क० म० । १९. वादन क० म० । २०. -कण्टु । मपुण्टु । सुक—क० म० टि० । २१. -ण्डु । मृडण्डु । जिह्वा—क० म० । २२. भ्रुकेका क० म० । २३. -हिणी । रुक्मिणी क० म० । २४. कीकसा क० म० ।

न्यङ्का, कुमारिका, कुबेरिका, अम्बिका, अशोका, श्वश्रू, सुनामन्[1], विमातृ, विधवा, कद्रू, गोधा, [2]सुदामन इति बुध्नादिः। भवक्रान्तानामिञोऽपवादो ढण्। मनुष्यादीनां विमात्रन्तानामणः, विधवाया दूणः, कद्रूगोधयोरनुष्यादुञः, सुनाम्न इञ. समावेशार्थं पाठ । आकृतिगणोऽयम्। [3]तेनाङ्गेयः। माण्डवेयः, इत्यादि सिद्ध्यति[4]।

लक्ष्मणश्यामाद्वासिष्ठे ॥२।४।५९॥ लक्ष्मण श्याम इत्येताभ्यामपत्ये वासिष्ठे ढण्प्रत्ययो भवति। लाक्ष्मणेयो वासिष्ठः। लाक्ष्मणिरन्यः। श्यामेयो वासिष्ठः। श्यामायनोऽन्यः। अश्वादित्वात्फक्।

विकर्णकुषीतकात्काश्यपे ॥२।४।६०॥ विकर्ण कुषीतक इत्येताभ्यां काश्यपेऽपत्यविशेषे ढण्प्रत्ययो भवति। वैकर्णेयः काश्यपः। वैकर्णिरन्यः। कौषीतकेयः काश्यपः। कौषीतकिरन्यः।

भ्रौवेयः ॥२।४।६१॥ भ्रौवेय इति भ्रूशब्दस्य ढण्प्रत्ययोऽपत्ये वक्ष्यमाणो निपात्यते। भ्रूरपत्यं भ्रौवेयः।

कल्याण्यादेर्ढिन् च ॥२।४।६२॥ कल्याणी इत्येवमादीनामपत्ये ढण्प्रत्ययो भवति ढिन् इत्ययमादेशश्च। कल्याण्या अपत्यं काल्याणिनेयः। सुभगाया अपत्यं सौभागिनेयः। ढिन्निति ढकारोऽन्तादेशार्थः। कल्याणी, सुभगा, दुर्भगा, बन्धकी, जरती,[5] बलीवर्दी, ज्येष्ठा, कनिष्ठा, मध्यमा, परस्त्री, अनुभूष्टी, अनुदृष्टी इति कल्याण्यादिः। परस्त्र्यन्तानां ढिन् विधेयो ढण् सिद्ध एव व्यत इति विशेषयोरुभयम्।

कुलटाया वा ॥२।४।६३॥ [6]कुलेष्वटतीति कुलटा। अत एव निपातनात्स्त्रीरूपम्। कुलटाशब्दादपत्ये ढण् भवति ढिन्नादेशश्च वा भवति। ढण् सिद्धः। तत्सन्नियोगे ढिन्निहाभिधेयः। तस्मात् ढिन एव विकल्पो न ढण्। कुलटाया अपत्यं कौलटेय[7]। कौलटिनेयः। या तु कुलान्यटति शीलं भिनत्ति ततः परत्वात् क्षुद्रालक्षणो ढण् भवति। कौल्टेरः।

क्षुद्राभ्यो ढण् वा ॥२।४।६४॥ क्षुद्रा अकुलीनाः शीलहीना वाऽनियतपुंसकाः स्त्रियस्ताभ्योऽपत्येऽर्थे ढण्प्रत्ययो वा भवति। [8]ढणोऽपवादः। काणा[9]—काणेरः। काणेयः। दासी—दासेरः। दासेयः। नदी—नादेरः। नादेयः। कर्दना—कार्दनेरः। कार्दनेयः। पूर्णिका—पौर्णिकेरः। पौर्णिकेयः। वाग्रहणमुत्तरत्र वाधिकारनिवृत्त्यर्थम्।

गोधाया दुष्टे ॥२।४।६५॥ गोधाशब्दाद् दुष्टेऽपत्ये ढण्प्रत्ययो भवति। गौधेरो दुष्टः[10]। गौधेयोऽन्यः।

पण्डजण्डाच्चारण् ॥२।४।६६॥ पण्ड जण्ड इत्येताभ्यामपत्येऽर्थे आरण्प्रत्ययो भवति। चकाराद् गोधायाश्च। ढणोऽपवादः। वचनात्सोऽपि भवति। पाण्डारः। जाण्डारः। गौधारः। केषाञ्चिदनुक्तसमुच्चयार्थश्चकारः।

चटकादैरण् ॥२।४।६७॥ चटकशब्दादपत्येऽर्थे ऐरण्प्रत्ययो भवति। चटकस्यापत्यं चाटकैरः[11]। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि इति। चटकाया अपि चाटकैरः।

चटका ॥२।४।६८॥ चटकेति ऐरण्प्रत्ययस्य स्लुनिपात्यते। चटकस्यापत्यं स्त्री चटका। चटकेति जातिशब्दोऽस्त्येव। स्त्रियां प्रत्ययार्थवगमार्थं वचनम्।

---

१. सुदामन् क० म०। २. सुधामन् क० म०। ३. न गाङ्गेयः क० म०। ४. सिद्धम् क० म०। ५. जरती क० म०। ६. भिक्षागृहेषु क० म० टि०। ७. कौकटेरः कौलटेयो, भिक्षुकी तु सती यदि। तदा कौकटिनेयः स्यात् कौकटेयोऽपि चारमजे ॥ अभिधानचिन्तामणिः क० म० टि०। ८. कुलानि विटगृहाणि। अथ बान्धकिनेयः स्याद्बन्धुकश्चासतोसुतः। बन्धकी कुलटा सुप्ता पुमर्थं पुंश्चली तथा ॥ इत्यभिधानचिन्तामणिः क० म० टि०। ९. स्थूलन्ती क० म० टि०। १०. ढणपोऽपवादः क० म०। ११. काणः स्यादेकलोचनः अभिधानचिन्तामणिः क० म० टि०। १२. -रः। तेन पारस्कार इत्यपि सिद्धं भवति। क० म०। १३. पुमपत्ये चाटकैरः। स्त्यपत्ये चटकैव हि क० म० टि०।

वृष्ट्यादिभ्यश्चतुष्पाद्भ्यो ढक् ॥ २।४।६९ ॥ वृष्टि [1]इत्येवमादिभ्यश्चतुष्पाद्भ्यो[2]ऽभिधायिभ्यश्च शब्देभ्यो अपत्येऽर्थे ढक्प्रत्ययो भवति। अणादीनामपवादः। वार्ष्टेयः। हार्षेयः। चतुष्पाद्भ्यः—काम्बोजेय[3]ः। पौलिवाहेयः। वाडवाहेयः। आग्नेयः। वायवेयः। वाह्नेयः। वृष्टि, हृष्टि, हलि, वालि, विलि, कुक्षि, अजवस्ति, मित्रयु इति गृध्यादिः। गृष्टिशब्दस्याचतुष्पादर्थमुपादानम्। वकारो मित्कार्यार्थः। मैत्रेयः पिता। मैत्रेयः पुत्रः।

वाडवेयो वृषे ॥२।४।७०॥ वाडवेय इति वडवाशब्दाद् वृषे ढक् ढण् वा प्रत्ययो निपात्यते। वृषौ यो गर्भे बीज[4] निषिञ्चति। वडवाया वृषः, वाडवेयः। अपत्येऽणेव भवति। वाडवनिपातनं ढण्ढकोरुभयोरपि वृषे व्यवस्थापनार्थम्। अन्यवाडन्यतरोऽपत्ये प्रसज्येत।

भ्रातुर्व्यः ॥२।४।७१॥ भ्रातृ इत्येतस्मादपत्येऽर्थे व्यप्रत्ययो भवति। भ्रातुरपत्यं भ्रातृव्यः। [5]शत्रुरपि भ्रातृव्य उच्यते उपचारात्।

स्वसुश्छः ॥२।४।७२॥ स्वसृशब्दाद् भ्रातृशब्दाच्चापत्येऽर्थे छप्रत्ययो भवति। भ्रात्रीयः। स्वस्रीयः।

मातृपित्रादेर्ढणञ्छणौ ॥२।४।७३॥ मातृ पितृ इत्येतदादेर्यः स्वसृशब्दस्तदन्तान्मातृस्वसृशब्दात् पितृस्वसृशब्दाच्चापत्ये[6] ढण् छण् च प्रत्ययौ भवत। मातृष्वसेयः। पैतृष्वसेयः। मातृष्वस्रीयः। पैतृष्वस्रीयः। [7][8]टित्वाड्ढणि ऋकारस्य लुक्। वचनभेदाद्यायासंख्याभावः।

रेवत्यादेष्ठण् ॥२।४।७४॥ रेवतीत्येवमादिभ्योऽपत्ये ठण्प्रत्ययो भवति। ढणादीनामपवादः। रैवतिकः। आश्वपालिकः। रेवती, अश्वपाली, मृणिपाली[9], द्वारपाली, वृकज्ञिन्, वृकग्रह, दण्डग्रह, कर्णग्रह, कुक्कुटाक्ष। इति रेवत्यादि। द्वारपाल्यन्तानां ढणोऽपवादः। यदि मानुषीनामाणोऽपि[10], वृकवज्ञिनोऽण., शेषाणामिञः।

स्त्रीवृद्धाद् गर्हे णश्च ॥२।४।७५॥ स्त्रीलिङ्गाद् वृद्धापत्याभिधायिनः शब्दादपत्येऽञ्ढञ्ठञ्ठक्ठञ्ढकञ्ढण्ढञ्ढकञ्ढञ्ढकञ्ढञ्ढकञ

वृषसुधामयमुन्द्वात् फिञश्छक्च ॥२।४।७२॥ वृष सुधामन् यमुन्द इत्येतेभ्यः फिञन्तेभ्यः सौवीरेषु गृहे वर्तमानेभ्यो युन्यपत्ये छप्रत्ययो भवति ठण् च वा ; ताभ्यां मुक्तेऽण्प्रत्ययो भवति गर्हे गम्यमाने। वृषस्यापत्यं वार्षायणिः[1], तस्यापत्यं युवा गर्हितो वार्षायणीयः। वार्षायणिकः। वार्षायणिर्वा। अणः श्लुक्[2]। सौयामायनः, सौयामायनीयः, सौयामायनिकः, सौयामायनिर्वा। यामुन्दायनेः—यामुन्दायनीयः, यामुन्दायनिकः, यामुन्दायनिर्वा। फिञ इति किम्? वृषस्यापत्यं वार्षायणिः। गर्ह इति किम्? अन्यत्र वार्ष्यायणिः। सौयामायनिः। यामुन्दायनिः। युवेत्यणेव भवति।

कुर्वादेर्ण्यः ॥२।४।८०॥ सौवीरेषु गर्हितेति च निवृत्तम्। कुरु इत्येवमादिभ्योऽपत्येऽर्थे ण्यः प्रत्ययो भवति। कौरव्यः। शाकम्भव्यः। कुरु, शाकम्भु, पथिकारिन्, मतिमत्, पितृमत्, शलाका, केशिनी, कवि, हस्तिन्, पिण्डी, ऐन्द्रीताली, धानुजी, दामोष्किषी, गाणकारी, कैशोरी, कापिञ्जला, गर्गर, मङ्गुध, अधिमारक, चवदृक, कुटल, मुर, दर्भ, शूर्पणाय, ध्यावनाय, ध्यावरथ, ध्याप्रथ, सत्यङ्कार, बलभिकार, स्तद, शाक, इन, रथकार, नापित, तक्षन्, शुभ्र इति कुर्वादिः। पितृमदन्तानामणपवादो ण्यः। नादिद्विकुरुकोसलाजादञ्ण्यः इति कुरुशब्दस्य ण्य उच्यते। सक्षत्रियगोत्रात्ततोऽन्यत्रायम्। अयं चानयोर्विशेषः, तस्य बहुषु श्लुक्। कुरवः। तस्य नास्ति कौरव्याः। ततो यूनि तिकादिपाठात्फिञ्। कौरव्यायणिः। अतो नास्ति कौरव्यः। शलाकाकेशिन्योर्ढणः, मानुषीनामत्वेऽणोऽपि। केशिनीशब्दस्य स्त्रीलिङ्गपाठादेव पुम्भावो न भवति। कैशिन्यः। पुंल्लिङ्गनिवृत्त्यर्थस्तु स पाठो न भवति। गार्धि, विदधि[6], केशिन्यपत्ये ण्यन्ताजादेर्लुक् प्रतिषेधात्। कविहस्तिपिण्डीना ढणः, ऐन्द्रशाल्यादीना कापिञ्जलाद्यन्ताना फण्, गर्गरादीनामिञः, तक्षन्शब्दस्य शिवाद्यणः समावेशार्थः पाठः। शुभ्रस्य ढणः।

सम्राजः क्षत्रिये ॥२।४।८१॥ सम्राज इत्येतस्मात्क्षत्रियेऽपत्ये ण्यप्रत्ययो भवति। सम्राजोऽपत्यं साम्राज्यः क्षत्रियश्चेत्। अन्यत्राणेव भवति साम्राजः। अन्ये साम्राजिरित्याहुः। तत्र सम्राड् वाह्वादिषु द्रष्टव्यः।

कारिसेनान्तलक्ष्मणादिञ् च ॥२।४।८२॥ कारिणः कारवः, तद्वाचिभ्यः सेनशब्दान्तेभ्यो लक्ष्मणशब्दाच्चापत्य इञ्प्रत्ययो भवति ण्यश्च। कारिण्य.—तान्तुकार्य.। तान्तुवायिः। तौन्नवाय्यः। तौन्नवायिः। कौम्भकार्य्य.। कौम्भकारि.। रथकारनापिततक्षभ्यो ण्य एव नेञ् कुर्वादिपाठात्। सेनान्तेभ्यः—हारिषेण्यः। हारिषेणिः। वारिषेण्यः। वारिषेणि। लक्ष्मणात्—लाक्ष्मण्यः। लाक्ष्मणिः। जातसेनादिभ्योऽण्बाधनार्थं ण्यदन्तेभ्यो ढण्बाधनार्थञ्चेञ्ग्रहणम्। अन्यथा ण्य एव विकल्प्येत।

तिकादेः फिञ् ॥२।४।८३॥ तिक इत्येवमादिभ्योऽपत्ये फिञ्प्रत्ययो भवति। इञादेरपवादः। तैकायनिः। कैतवायनि.। तिक, कितव, संज्ञा, बाल, शिखा, उरस, शाट्य[8], सैन्धव, यामुन्य[9], रूप्य, ग्राम्य, नील, अमित्र, कुरु, देवर, तैतल, शताल[10], औरश, कौरव्य, खौरिक, खौलिक, चोपयत, चेतयत, शैकयत, क्षैतयत, द्व्यजातत्[11], चन्द्रमस्, शुभगङ्ग, वरेण्य, वण्डा, अरड्वा[12], वल्हाका, खल्यलोमका, उदन्य, यज्ञ इति तिकादिः। औरशशब्देन क्षत्रियप्रत्ययान्तेन साहचर्यात् कौरव्यशब्दः क्षत्रियप्रत्ययान्त एव फिञमुत्पादयति। अन्यत्र इञेव, तस्य च श्लुक्। कौरव्य. पिता। कौरव्य. पुत्र.। फिञस्त्वविप्रादिति श्लुग् नास्ति। विधानसामर्थ्यात्। कौरव्यः पिता। कौरव्यायणिः पुत्रः।

दगुकोसलकर्मारछागवृषाच्च ॥२।४।८४॥ दगु कोसल कर्मार छाग वृष इत्येतेभ्योऽपत्येऽर्थे फिञ्प्रत्ययो भवति यट् च चास्य फिञ् आगमो भवति। दगु—दागव्यायनिः। कोसल—कौसल्यायनिः। जनपदसमानशब्दात् क्षत्रियात् ण्य एव कौसल्य इति। कर्मार—कार्मारियायिः। छाग—छाग्यायनिः। वृष—वार्ष्यायणिः।

---

१. वार्ष्यायणिः क० म०। २.—क्। सौयामायनेः सौया—क० म०। ३. गर्हे वेति क० म०। ४. ऐन्द्रशाली क० म०। ५. कापिञ्जलादि क० म०। ६. विदधि क० म०। ७. तान्तुवार्यः क० म०। ८. शाट्य क० म०। ९. यमुन्द क० म०। १०. शैकाल क० म०। ११. द्वाजवत क० म०। १२. अरड्डा।

द्रुघणोऽञः ॥२।४।८५॥ अणन्ताद्द्रुघणोऽपत्ये फिञ्प्रत्ययो भवति। कर्तुरपत्यं पुमानिति कार्तः, तस्य कार्तायनिः। पौत्रायणिः। यास्कायनिः। लाह्यायनिः। द्रुघण इति किम्? औपगविः। कापटविः। अण इति किम्? दाक्षिः। दाक्षायणः। प्लाक्षिः। प्लाक्षायणः। वृद्धादेवायं विधिः। अवृद्धादुत्तरेण विकल्पः। अङ्गानां राजा—आङ्गः तस्य—आङ्गायनिः। आङ्गिः। वाङ्गायनिः। वाङ्गिः।

दोरीञ्वृद्धात् ॥२।४।८६॥ अवृद्धवाचिनो दुरंशावपत्येऽर्थे फिञ्प्रत्ययो वा भवति। आम्रगुप्तायनिः, आम्रगुप्तिः। शालगुप्तायनिः। शालगुप्तिः। वायुरथायनिः। वायुरथिः। पञ्चालानां राजा पञ्चालः। तस्यापत्यं पाञ्चालायनिः। पाञ्चालिः। नापितायनिः। नापित्यः। नापितशब्दस्येञ् नास्ति—तद्बाधनार्थं[2] कुर्वादिषु पठ्यते। दोरिति किम्? आकम्पनिः। आहवग्रीविः। अवृद्धाविति किम्? दाक्षायणः। प्लाक्षायणः।

पुत्रान्तात् ॥२।४।८७॥ पुत्रान्ताद्दोरपत्ये फिञ्प्रत्ययो भवति वा। गार्गीपुत्रायणिः। गार्गीपुत्रिः। वासवदत्तापुत्रायणिः। वासवदत्तापुत्रिः। पूर्वेणैव सिद्धे वचनमिदं क्रमभावार्थम्। उत्तरेण च कं विधीयते। एवं त्रैरूप्यं भवति।

काकलङ्काबाकिनगारेयकार्कटयचर्मिवर्मिणश्च कं च ॥२।४।८८॥ काक लङ्क[3] बाकिन गारेय कार्कटच चर्मिन् वर्मिन् इत्येतेभ्यः पुत्रान्ताच्च दोरपत्ये फिञ्प्रत्ययो वा भवति तत्सन्नियोगेन[4] कं चैषां काकादीनां क्रमागमो भवति। काककायनिः। काकिः। लाङ्काकायनिः। लाङ्केयः[5]। बाकिनकायनिः। बाकिनिः। गारेयकायनिः। गारेयिः। कार्कटचकायनिः। कार्कटचः। चार्मिकायणिः। चार्मिणः। वार्मिकायणिः। वार्मिणः। पुत्रान्ताद्[6] दोः—गार्गीपुत्रकायणिः। गार्गीपुत्रिः। कमिति मिदकारान्त आगमः। तेन चर्मिवर्मिणोर्णकारस्य लोपो भवति। कर्मि[7] तु पुम्भावो न सिध्यति। चर्मिण्या अपत्यं चार्मिकायणिः। वर्मिण्या[8] अपत्यं वार्मिकायणिः।

प्रायोऽदोः फिः ॥२।४।८९॥ अदुसंज्ञकादपत्ये फिञ्प्रत्ययो वा भवति प्रायः। ग्लुचुकायनिः। ग्लौचुकिः[9]। अहिचुम्बकायनिः। आहिचुम्बकिः। त्रिपुच्छायनिः। त्रैपुच्छिः। श्रिविजययनिः। श्रैविजयिः। प्राय इति किम्? क्वचिदभावार्थम्। दाक्षिः। प्लाक्षिः। अदोरिति किम्? औपगविः। रामदत्तिः। रामदत्तायनिः पिता। रामदत्तायनिः पुत्रः।

कुलात्स्वः ॥२।४।९०॥ कुलशब्दान्तात्केवलाच्च कुलशब्दादपत्ये स्वप्रत्ययो भवति। इञ्फिञ्फकोरिमामपवादः। कुलीनः। आढ्यकुलीनः। क्षत्रिय कुलीनः। बहुकुलीनः। उत्तरसूत्रे समासे प्रतिषेधादिह कुलान्तः केवलश्च गृह्यते।

ढक्रञ्यौ वाऽसमासे ॥२।४।९१॥ कुलशब्दान्तात्केवलाच्च कुलशब्दादपत्येऽर्थे ढक्रञ् य इत्येतौ प्रत्ययौ वा भवतः। ताभ्यां मुक्ते ढो भवति। न चेत्स कुलशब्दः समासे वर्तते। कौलेयकः। कुल्यः। कुलीनः। बहुकुलेयकः। बहुकुल्यः। बहुकुलीनः। असमास इति किम्? आढ्यकुलीनः। क्षत्रियकुलीनः।

दुष्कुलाड्ढक् ॥२।४।९२॥ दुष्कुलशब्दादपत्ये ढक्प्रत्ययो वा भवति। दौष्कुलेयः। दुष्कुलीनः। परमदुष्कुलीन इत्यत्र असाधारणविज्ञानादसमास इत्यधिकाराच्च न भवति। एवमुत्तरत्रापि।

महाकुलादञ्खञौ ॥२।४।९३॥ महाकुलशब्दादपत्येऽञ् खञ् इत्येतौ प्रत्ययौ वा भवतः, ताभ्यां मुक्ते ढो भवति। माहाकुलः। महाकुलीनः। महतः कुलं महत्कुलमित्यतो महाकुलशब्दो न भवति इति न भवति।

---

१. पाञ्चालः म०। २. –र्थं हि कुर्वा—क० म०। ३. कृ इति कटतीति कृकट, तस्यापत्यम्, कुर्वादित्वाञ्ञ्यः। क० म० टि०। ४. लङ्का रक्षःपुरी यास्का वाकिनी कुकटासु च इति विश्वः क० म० टि०। ५. योगे कं वै—क० म०। ६. लाङ्केयः- क० म०। ७. –त्रादोः—क० म०। ८. कर्टि तु—क० म०। ९. वर्मिण्या (अपत्यं पुमानिति) चार्मिकायणिरिति। १०. ग्लुचुकायनिः। ग्लौचुकिः। क० म०।

श्वशुरराज्ञः ॥२।४।९४॥ श्वशुरराजन्शब्दादपत्ये यः प्रत्ययो भवति । श्वैशुर्यः[1] ।

जातौ राज्ञः ॥२।४।९५॥ राजन्शब्दादपत्ये यप्रत्ययो भवति जातौ गम्यमानायाम् । राजन्यो भवति क्षत्रियजातिश्चेत् । राजनोऽन्यः ।

क्षत्राद्घः ॥२।४।९६॥ क्षत्रशब्दादपत्ये घप्रत्ययो भवति । क्षत्रियो जातिश्चेत् । क्षात्रिरन्यः[2] ।

मनोर्याणषक् च ॥२।४।९७॥ मनुशब्दादपत्ये जातौ य अण् इत्येतौ प्रत्ययौ भवतः । तत्सन्नियोगेन च मनुशब्दस्य षगागमो भवति । मनुष्याः । मानुषाः[3] । जाताविति किम् ? पालयामास लक्ष्मीवान् मानवो मानवीः प्रजाः । [4]मनुष्यमानुषशब्दाभ्यां सत्यसति चापत्येऽनभिधानादपत्येऽन्य पुनः प्रत्ययो न भवति । अपत्ये कुत्सिते मूढे, मनोरौत्सर्गिकोऽण् स्मृतः । नकारस्य च मूर्धन्यस्तेन सिध्यति माणवः[5] । तच्च वुञ् सिध्यदण्डमाणव इति निपातनात्सिद्धम् ।

राष्ट्रराज्ञः सरूपाद्राजापत्येऽञ् त्रिः ॥२।४।९८॥ क्षत्रियसरूपाज्जनपदशब्दाज्जनपदसरूपात्क्षत्रियशब्दाच्चयथासंख्यं राजनि रक्षितरि क्षत्रियेऽपत्ये चाभिधेयेऽञ्प्रत्ययो भवति । स च त्रिसंज्ञो भवति । विदेहानां राष्ट्रस्य राजा वैदेहः । वैदेहौ । विदेहाः । विदेहस्य राज्ञोऽपत्यं वैदेहः । वैदेहौ । विदेहाः । एवम् ऐक्ष्वाकः[6] । ऐक्ष्वाकौ । इक्ष्वाकवः । पाञ्चालः । पाञ्चालौ । पञ्चालाः । सरूपादिति किम् ? सुराष्ट्राणां राजा सौराष्ट्रकः । त्रिपृष्ठस्यापत्यं त्रैपृष्ठि. । दाशरथि. । त्रिप्रदेशो व्रेरतोऽप्राग्भगदिरित्यादि ।

गान्धारिशाल्वेयाभ्याम् ॥२।४।९९॥ गान्धारि शाल्वेय इत्येताभ्यां[7] राष्ट्रराजवाचिभ्यां सरूपाभ्यां राजन्यपत्ये चाञ् प्रत्ययो भवति त्रिसंज्ञश्च । वचनभेदाच्चयथासंख्याभावः । गान्धारीणां राजा गान्धारेरपत्यं [8]वा गान्धारः । गान्धारौ । गान्धारयः । शाल्वेय. । शाल्वेयौ । शाल्वेयाः । ञ्यञिञावनयोः प्रतिषेधमकृत्वाऽञ्वचनं पैलाद्यत्रिप्रादिति ञ्लुग्बाधनार्थम् ।

[9]पुरुहृयश्मगधकलिङ्गशूरमसादण् ॥२।४।१००॥ पुरुशब्दाद्हृयच्कात् मगध कलिङ्ग शूरमस इत्येतेभ्यश्च सरूपेभ्यो राष्ट्रवाचिभ्यो राजवाचिभ्यश्च राजापत्ययोरण् भवति त्रिसंज्ञः । पुरोरपत्यं पौरवः । पौरवौ । पुरवः । अङ्गानां राजा आङ्गः । आङ्गौ । अङ्गाः । एवं वाङ्गः । वाङ्गौ । वङ्गाः । सौह्यः । सौह्यौ । सुह्माः । पौण्ड्रः । पौण्ड्रौ । पुण्ड्राः । भागः । भागौ । भगाः । साल्वः । साल्वौ । सल्वाः । मागध । मागधौ । मगधाः । कलिङ्ग—कालिङ्गः । कालिङ्गौ । कलिङ्गाः । शौरमसः । शौरमसौ । शूरमसाः । पुरुग्रहणमराष्ट्रसरूपार्थम् । अस्ति राजा पुरुर्नाम न तु राष्ट्रं, तस्याण्विधानं बहुषु ञ्लुगर्थम् । अजासिद्धेऽणविधानं सङ्घाद्यण्बाधनार्थम् । पौरवम् । आङ्गवम् । वाङ्गवम् । मागधकम् । कालिङ्गकम् । शौरमसकम् ।

साल्वांशाश्मककलकूटप्रत्यग्रथादिञ् ॥२।४।१०१॥ साल्वो नाम जनपदस्तदंशास्तदवयवा उदुम्बरादयस्तेभ्योऽश्मक कलकूट प्रत्यग्रथ इत्येतेभ्यश्च राष्ट्रवाचिभ्यो राजवाचिभ्यश्च सरूपेभ्यो यथासंख्यं राजन्यपत्ये च इञ्प्रत्ययो भवति त्रिसंज्ञ. । साल्वांशः उदुम्बराणां राजा उदुम्बरस्यापत्यं [10]वा औदुम्बरिः । औदुम्बरी । उदुम्बराः । एवं तैलखलि[11] । तैलखली । तिलखलाः । माद्रकारिः । माद्रकारी । माद्रकाराः । यौगन्धरिः ।

---

१. श्वशुर्यौ देवरश्यालौ इत्यमरः क० म० । २. —न्यथा क० म० । ३. जातिमात्रं स्वविषये न पात्रादिन्यक्किरिति बहुवद् भवतीति जैनेन्द्रचिन्तामणिः । ४. सत्यसति चापत्येऽर्थेऽणि शब्दान्तादनभिधानाद् वा मानुषीमनुष्यशब्दाभ्यामपत्ये पुनरन्यस्त्यो न भवति क० म० टि० । ५. स्वाभाविकः क० म० टि० । ६. ष्यङ्कावण् । मानवो माणवक इति मनोरपत्ये कुत्सिते मूढे मलिम्लुचे इति वर्द्धमानीयवृत्तौ । क० म० टि० । ७. इक्ष्वाकोरिदमैक्ष्वाकमित्यणन्ताभिपातनम् । इक्ष्वाकुशब्दस्यानि सप्तुकारलोपः । सप्तकमिति चेत् ? भ्रूणहत्यादैवहत्यसारवैक्ष्वाकमैत्रेयहिरण्मयम् (भवति इति अकारलोपः) भ्रूणहत्यादयः शब्दाः अणादिप्रत्ययान्ताः कृततरबादयः (तकारादेशास्तम्) निपात्यन्ते । क० म० टि० । ८. ग्यां ह्रास्यां रा— क० म० । ९. दाधाघास—क० म० । १०. च क० म० । ११. हृषज्म—क० म० । १२. च, क० म० ।

गौवन्धरी । युवन्धराः । भौलिङ्गिः । भौलिङ्गी । भुलिङ्गाः । शारदण्डिः । शारदण्डी । शारदण्डाः । आजमीढिः । अजमीढाः । [1]आजक्रन्दिः । अजक्रन्दाः । बौधिः । बुधाः । अश्मक—आश्मकिः । अश्मकाः । कलकूट । काल-कूटिः । कलकूटाः । प्रत्यग्रथ—प्रात्यग्रथिः । प्रत्यग्रथाः । उदुम्बरास्तिलखला मद्रकारां युवन्धराः । भुलिङ्गाः शारदण्डाश्च साल्वांशा इति कीर्तिताः । अजमीढाश्च उदुम्बरादिविशेषाः, तेऽपि साल्वांशाः[2] । अश्मकादि-ग्रहणमसा[3]ल्वार्थम् ।

नादिद्विद्कुरुकोसलाजाद्ढ्यः ॥२।४।१०२॥ नकारादिभ्यो दुसंज्ञेभ्य इकारान्तेभ्यः कुरु कोसल अजाद इत्येतेभ्यश्च राष्ट्रवाचिभ्यो राजवाचिभ्यश्च सरूपेभ्यो यथासंख्यं राजन्यपत्ये च ढ्यप्रत्ययो भवति त्रिसंज्ञः । नादि—नैचक्यः । नैचकाः । नैचक्यः । निचखाः । नैच्यः । नैपाः । दु—नैश्यः । नैशाः । आम्बष्ठ्या । आम्बष्ठाः । सौवीर्यः । सौवीराः । काम्पिल्यः । काम्पिलाः । दार्व्यः । [4]दार्व्याः । इत्—आवन्त्यः । अवन्तयः । वासात्यः । वसातयः । कौन्त्यः । कुन्तयः । वैद्यः । विदयः । काश्यः । काशयः । कुरूणां राजा कुरोरपत्यं च कौरव्यः । कुरवः । एवं कोसल—कौसल्यः । कोसलाः । अजाद—आजाद्यः । अजादाः । तकारः किम् ? कुमारी नाम राष्ट्रं क्षत्रियाश्च ततोऽञ्येव कौमाराः ।

पाण्ड्यः ॥२।४।१०३॥ पाण्ड्य इति पाण्डुशब्दस्य ढ्यप्रत्ययो[5]कारलोपा[6] निपात्यन्ते । पाण्डूनां पाण्डोरपत्यं च पाण्ड्यः । पाण्ड्यौ । पाण्डवः । कथम् असिद्धितीयोऽनुससार [7]पाण्डवमिति ? राष्ट्रराज्ञ इति तस्य सरूपस्य क्षत्रियस्येदयो[8] जनपदः तदीश्वरश्च क्षत्रियो गृह्यते[9] । अत्र कुरवो जनपदस्तस्य राजा पाण्डु-रिति न भवति ।

शकादिभ्यो[10]ऽञ्च ञ्लुक् ॥२।४।१०४॥ शक इत्येवमादिभ्यः परस्य प्रत्ययस्य ञ्लुग्भवति । राष्ट्रराज्ञः सरूपाद्[11] ष्ट्राप्त्येऽञ्त्रिरित्यादिना विहितस्य ञेरयं ञ्लुग्विधिः । प्रकरणापेक्षणात् । शकानां राजा शकस्यापत्यं वा शकः । यवनः । [12]कुम्भोजः । चोलः । केरलः । आचारयः । विचारयः । उपचारयः । शकादयः प्रयोग-गम्याः ।

कुन्त्यवन्तेः स्त्रियाम् ॥२।४।१०५॥ कुन्ति अवन्ति इत्येताभ्यां परस्य ढ्यप्रत्ययस्य ञ्लुग् भवति स्त्रियामभिधेयायाम् । कुन्तीनां राज्ञी कुन्तेरपत्यं स्त्री च कुन्ती । अवन्ती । स्त्रियामिति किम् ? कौन्त्यः । आवन्त्यः । प्रकृतस्य ञ्लुग्विधानात्स्वार्थिकस्य ञेर्ण्यः[13] लोपो न भवति ।

कुरोर्वा ॥२।४।१०६॥ कुरुशब्दात्परस्य ढ्यस्य स्त्रियां ञ्लुग्वा भवति । कुरूणां राज्ञी कुरोरपत्यं च स्त्री कुरूः । कौरव्यायणी ।

ञेरतोऽप्राग्भर्गादेः ॥२।४।१०७॥ प्राचो भर्गादींश्च वर्जयित्वाऽन्यस्मात्परस्याकारस्य ञेः स्त्रियां ञ्लुग्भवति । शूरसेनानां राज्ञी शूरसेनस्यापत्यं वा स्त्री शूरसेनी । अपा[14]त्या, मद्री, दरदू, पर्श्वधः, शस्त्रजीवि-सङ्घः । ततः स्त्रियां स्वार्थिकोऽण् । एवं परशू रक्षाः आसुरी । ञेरिति किम् ? औपगवी । ञेरित्यत एव भिन्नप्रकरणस्यापि ञ्लुक् । अत इति किम् ? औदुम्बरी । अते[15] इत्यकारान्तग्रहणं न भवति । कुन्त्यवन्त्योः पृथक्ञ्लुग्वचनात्तेनेह न भवति । कौसल्या । आजाद्या । अप्राग्भर्गादेरिति किम् ? पाञ्चाली, वैदेही, आङ्गी, बाङ्गी, सौह्मी, पौण्ड्री, मागधी, कालिङ्गी, शौरमसी, पाञ्चालादयः प्राञ्चः । भर्गादेः—भार्गी, कारुषी,

---

१. आजक्रन्दिः । अजक्रन्दाः । क० म० । २. —क्षा एव । क० म० । ३. —मसाल्वांशार्थम् । क० म० । ४. दार्व्याः क० म० । ५. —त्यस्य अका—क० म० । ६. यो निपात्यते क० म० । ७. पाण्डवा यस्य दासा इति च क० म० टि० । ८. ईशितव्यः क० म० टि० । ९. —त्रे प्रत्यासत्तेः क० म० (तेनाऽऽजाने च क० म० टि०) । १०. —दिभ्यः ञ्लुक् क० म० । ११. —ष्ट्राजाद्य—क० म० । १२. कम्बोजः क० म० । १३. अञ्यडो न म० । ञ्यः ढो क० । १४. अपाञ्यानां राज्ञी, अपाञ्यस्यापत्यं स्त्री वेति अपाञ्या क० म० टि० । १५. अत इत्यौदुम्बरीग्रहणं माकारान्तस्य इति जैनेन्द्रन्यासकारः । क० म० टि० ।

कैकेयी, कर्ण, कुरुक्ष, केकय, कश्मीर, सत्व, कुरुपाल, उशीर, योधेय, शौक्रेय, लौक्रेय, [1]पूर्वेय, पार्तीय, उपाहिणेय, भिमर्त, भरत, उशीनर इति मर्गादिः। योधेयादिभ्यो हिलेयान्तेभ्यो स्वार्थिकेष्वणादिषु ञेः लुक् भवतीति विज्ञायते। योधेयीनां सङ्घादि योधेयमिति। सङ्घाद्यर्थं न प्रकृतस्यासक्तत्वात्। भरतोशीनर-शब्दावुत्सादिषु पठ्येते, तयोरिहोपादानात्सत्यण्यणपवादे चेत्यस्मिन्नुत्सादिभ्यं ञ्यादिष्वेव भवतीति ज्ञाप्यते। तेन भरतानां राजानो भरताः। उशीनरा इति। राज्ञि लुक् सिद्धा भवति। उत्सादिभ्यः स्वगोत्रस्यात्र ग्रहणम्।

बहुष्वस्त्रियाम् ॥२।४।१०८॥ ब्रुवन्तस्य बहुषु वर्तमानस्य यो त्रिः प्रत्ययस्तस्यास्त्रियां लुग्भवति। पञ्चबालस्यापत्यानि पुमांसो बहवो माणवका राजानो वा पञ्चबालाः। पुरुः। अङ्गाः। वङ्गाः। लौहित्यकः। लौहित्यौ। लौहित्यजाः। पञ्चालानां निवासः पञ्चालनिवासः। प्रिया वङ्गा यस्य स प्रियवङ्गः। अङ्गानतिक्रान्तोऽत्यङ्गः। पञ्चालेभ्य आगतं पञ्चालमयम्। पञ्चालरूप्यम्। लौहित्यरूप्यम्। लौहित्यमयम्। त्रेरित्यत्र विदेशस्थस्यापि त्रेः परिग्रहः। बहुष्विति किम्? पाञ्चालः। लौहित्यः। प्रियो वाङ्गो येषां ते प्रियवाङ्गाः इत्यत्रब्रुवन्तं बहुष्विति लुग् न भवति। प्रत्ययः प्रकृत्यादेरिति हि न समासो ब्रुवन्तो भवति। पञ्चबालस्यापत्यं (त्यानि) बहवो माणवकाः पञ्चबालाः इत्यत्र तु इञि लुप्ते ब्रुवन्तमेव बहुषु वर्तत इति लुक्। त्रेः प्रत्ययस्य बहुवृत्तेरिति तु विज्ञायमाने न स्यात्। अस्त्रियामिति किम्? पाञ्चाल्यः। लौहित्यस्त्रियः। पञ्चभिः पाञ्चालाभिः क्रीतः पञ्चपञ्चालः इत्यत्र ठणि पुंभावेन स्त्रीत्वनिवृत्तेः लुक्।

यस्कादेर्गोत्रे ॥२।४।१०९॥ यस्कादिभ्यो यः प्रत्ययो विहितस्तदन्तस्य बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानस्य यः स प्रत्ययस्तस्यास्त्रियां विषये लुग्भवति। यस्कस्यापत्यं यास्कः। यास्कौ। यस्काः। लाह्यः। लाह्यौ। लाह्याः। शिवाद्यण्। कम्बलहारस्यापत्यं काम्बलहारिः। काम्बलहारी। कम्बलहाराः। अत इञ्—पुष्करसदोऽपत्यं पौष्करसादिः। पौष्करसादी। पुष्करसदः। बाह्वादित्वादिञ्। खरपस्यापत्यं खारपायणः। खारपायणौ। खरपाः। नडादित्वात्फण्। भदिलस्यापत्यं भादिलायनः। भादिलायनौ। भदिलाः। अत्र[4] पक्ष्वादित्वात्फञ्। विश्रेरपत्यं वैश्रेयः। वैश्रेयौ। विश्रयः। गृष्ट्यादित्वाट्ठण् इति नेयम्। यस्कादेरिति किम्? उपगोरपत्यम् औपगवः। औपगवौ। उपगवाः। यास्कायनयः। लाह्यायनयः। गोत्र इति किम्? यास्काः छात्राः। यस्कप्रकृतयो यस्काः[5] इत्यत्र यद्यपि प्रत्ययो गोत्र उत्पन्नः, तदन्तं[6] गोत्रबहुत्वे। कथं तर्हि? [7]प्रकृतिस्विति न भवति। अस्त्रियामिति किम्? [8]यस्कयः स्त्रियः। यस्क, लाह्य, द्रह्य, अयस्थूण, तृण, कर्ण, भलन्दन, कल, बल, हाल, सदामत[10], अहियोग, कर्णोदक, पर्णोदक, पिण्डीजङ्घ, पिकसक्थ, रक्षोमुख, जङ्घोरथ, उत्कास, [11]कटक, [12]ग्रन्थ, विषपुट, उपरिमेखल, क्रोष्टुपाद, क्रोष्टुमाथ, शीर्षमाय, सुगल, कबक, पदकर्षक[13], पुष्करसद्, खरप, भदिल, भटक, भदित, भण्डिल[14], विश्रि, कुद्रि, अजवस्ति, मित्रयु[15] इति यस्कादि।

यञञोऽशोपधनादिभ्यापर्णान्तात् ॥२।४।११०॥ यञन्तस्याञन्तस्य बहुत्वविशिष्टे गोत्रे[16] वर्तमानस्य यः सप्रत्ययस्तस्यास्त्रियां लुग्भवति। शोपधनादिभ्यः ष्यापर्णान्तेभ्यो विहितं वर्जयित्वा। शोपधनादिः विद्यालक्षणः। गार्ग्यः। गार्ग्यौ। गर्गाः। वात्स्यः। वात्स्यौ। वत्साः। वैदः। वैदौ। विदाः। और्वः। और्वौ। उर्वाः। गर्गमयं गर्गरूप्यम्। अशोपधनादिभ्यापर्णान्तादिति किम्? गोपवनाः। शैग्रवाः। पैन्यवाः[17]। ताजमाः। आवशतानाः। श्यामाकाः। श्यापर्णाः। मठरशब्दमप्येके गोपवनादिषु पठन्ति। माठरा अश्वाः। आवशतान इति च केचिद्विच्छिद्योदाहरन्ति। गोपवनादिग्रहणं किम्? वैनवः। वैनवौ। वैनवाः[18]। ष्यापर्णान्तग्रहणं किम्? हारितः। हारितौ। हरिताः। कैन्दासः। कैन्दासौ। किन्दासाः। वैदस्य वैदयो वाऽपत्यं (त्यानि)

---

१. पूर्वेण तार्तीय क० म०। २. व्रुवनेव क० म०। ३. इत्यत्र गम्यन्तं क० म०। ४. पञ्चाल क० म०। ५. अश्वादि—क० म०। ६. यास्का क० म०। ७. तदन्तं न गोत्रबहु—म०। ८. प्रकृतिरिति—म०। ९. यास्कयः क० म०। १०. सदामतु क० म०। ११. कटुक क० म०। १२. ग्रन्थ क० म०। १३. पदकर्षक क० म०। १४. भण्डित क० म०। १५. मित्रयु क० म०। १६. गोत्रेऽर्थे वर्त—क० म०। १७. वैन्यवाः क० म०। १८. वेनवाः म०।

बह्वयो माणवकाः विदाः इत्यर्थेऽभि लुप्तेऽजन्तं बहुष्विति वक्तव्यम् । विदानामपत्यं माण्डवको वैदो वैदाभिरूपाऽजन्तं नेदमनी बहुष्विति वक्तव्यम् । पूर्वं नामार्थे चेत्यादयो विषयभूते भवति । विदानामपत्यं बह्वयो माणवका इत्यत्र अजन्तं बहुष्विति भवति । कण्वपत्रादिकृतयः काण्वायनो नैदमनी गोत्र इति वक्तव्यम् भवति । अस्त्रियामिति किम् ? गार्ग्यः । वैद्यः स्त्रियः । पञ्चभिर्गर्गैर्गिभिः क्रीतः पञ्चगर्गो वा दशगर्गो वा पट इत्यत्र ढैणि स्त्रीत्वनिवृत्तेः वक्तव्यम् । गोत्र इति किम् ? औत्साः छात्राः । उत्सादेरञ् । पैलगर्भाः । पीलुहाः । औत्साः । नानान्द्राः । पारशवाः । पुनर्भूपुत्रदौहित्रननान्दृभ्योऽनन्तरेऽञ् ।

कौण्डिन्याऽगस्त्ययोः कुण्डिनागस्ती च ॥२।४।११३॥ यञ इति वर्तते । कौण्डिन्य अगस्त्य इत्येतयोर्बहुत्वविशिष्टे गोत्रे वर्तमानयोर्यञोऽनन्तरे प्रत्ययस्यास्त्रियां वक्तव्यम् भवति । तयोश्च कुण्डिनागस्त्यशब्दयोः कुण्डिन अगस्ति इत्येतावादेशौ भवतः । आगस्त्यशब्दस्य ऋष्यणन्तत्वादञो न सम्भवतः । कौण्डिन्यः । कौण्डिन्यौ । कुण्डिनाः । आगस्त्यः । आगस्त्यौ । अगस्तयः । प्रत्ययान्तस्यानादेशकरणम् अगस्तीनामिमे आगस्तीया इत्येवमर्थम् । प्रत्ययान्तादेशे ह्याकारोऽनादेशश्च न स्यात् । प्रत्ययवक्तव्ये तु नाण्वेऽजोति वक्तव्यम् अन्यास्ती सिद्धौ भवतः । कुण्डिन्यामिति शेषः । निषिद्धायामपि हि वक्तव्ये शकलादित्वाद्वा भवितव्यम् । अस्त्रियामिति किम् ? कौण्डिन्यः । आगस्त्यः स्त्रियः ।

भृगुकुत्सवसिष्ठगोतमाङ्गिरोऽत्रेः ॥२।४।११२॥ भृगु कुत्स वसिष्ठ गोतम अङ्गिरस अत्रि इत्येतेभ्यो यः प्रत्ययस्तदन्तस्य बहुत्वविशिष्टे गोत्रेऽर्थे वर्तमानस्य यः प्रत्ययः तस्यास्त्रियां वक्तव्यम् भवति । भार्गवः । भार्गवौ । भृगवः । कौत्सः । कौत्सौ । कुत्साः । वासिष्ठः । वासिष्ठौ । वसिष्ठाः । गौतमः । गौतमौ । गोतमाः । आङ्गिरसः । आङ्गिरसौ । अङ्गिरसः । आत्रेयः । आत्रेयौ । अत्रयः । अस्त्रियामिति किम् ? भार्गव्यः कौत्स्यः स्त्रियः । गोत्र इति किम् ? भार्गवाश्छात्राः । भृग्वादीन् यस्कादिषु पठित्वेदं वचनम् । यत्रादिष्वनेकेषु षष्ठ्यास्तत्पुरुष इत्येवमर्थम् । अन्यथा भृगुकुलम्, भार्गवकुलमिति च न सिद्ध्येत् ।

बह्वचः प्राग्भरतेष्विञः ॥२।४।११३॥ बह्वचः प्रातिपदिकाद्य इञ्प्रत्ययस्तदन्तस्य बहुत्वविशिष्टेऽर्थे प्राग्गोत्रे च वर्तमानस्य य इञ्प्रत्ययस्तस्यास्त्रिया वक्तव्यम् भवति । शैरकलम्बिः । पाक्षागरिः । पाक्षागारी । पक्षागाराः । माण्डरेफणिः । माण्डरेफणी । मण्डरेफणाः । आसिबद्धकिः । आसिबद्धकी । असिबद्धकाः । भरतेषु—औद्दालकिः । उद्दालकाः । अत इञ् । यौधिष्ठिर—यौधिष्ठिरिः । यौधिष्ठिराः । आर्जुनः—आर्जुनिः । आर्जुनी । आर्जुनाः । बाह्वादीञ् । बह्वच इति किम् ? चैकयः । पौष्पयः । काशयः । वाशयः । प्राग्भरतेष्विति किम् ? बालाकयः । हास्तिदासयः । भरताः प्राच्या एव । एषा पृथगुपादानं प्राग्ग्रहणेनसङ्ग्रहणार्थम् । तेन आर्जुनिः पिता, आर्जुनायनः पुत्रः । औद्दालकिः पिता, औद्दालकायनिः पुत्रः । इति प्राक्षिञ इति वक्तव्यम् भवति । अपर आह प्राग्ग्रहणं भरत एव विशेषणम् । शैरकलम्बादयो वैश्याः प्राग्भरताः । युधिष्ठिरादयो राजानः उदग्भरताः । तत्र प्राग्ग्रहणादुदीच्यभरतेषु राजसु माभूत् । यौधिष्ठिरेयः । आर्जुनेयः । भरतग्रहणात्प्राच्येषु राजसु माभूत् । भारद्वाजस्य । भागविस्य इति । इञ इति किम् ? शान्तनवाः ।

द्वीपकादेः ॥२।४।११४॥ उपक इत्येवमादिभ्यो यः प्रत्ययस्तस्यास्त्रियां वा वक्तव्यम् भवति । उपकाः ।

---

१. वक्तव्यम् भवति म० । २. नामार्थे क० म० । ३. –ते न भव—क० म० । ४. –पा इत्यत्र मे—क० म० । ५. वक्तव्यम् म—म० । ६. ढणि क० म० । ७. कौण्डिन्या—क० म० । ८. –यनसौ क० म० । ९. –कारौदवादेशेऽञ क० म० । १०. –भिशेषः क० म० । ११. –ञिः । शैरकलम्बी । शीरकलम्बाः क० म० । १२. किः । आसिबद्धकी । असि—क० म० । १३. किः । औद्दालकी । उद्दा—क० म० । १४. यौधिष्ठिरी क० म० । १५. यौधिष्ठिराः क० म० । १६. आर्जुनी क० म० । १७. अर्जुना क० म० । १८. एव इति क० म० पुस्तके नास्ति । १९. यौधिष्ठिरयः म० । युधिष्ठिरयः क० । २०. आर्जुनयः क० म० । २१. अस्तदन्तस्य बहुत्वविशिष्टे गोत्रे वर्तमानस्य यः स प्रत्ययस्तस्या—क० म० ।

औपकायनाः । नडादिफण् । भ्राष्टकाः[1] । भ्राष्टकयः । कापिष्ठलाः[2] । कापिष्ठलयः । अत इञ् । सुपिष्ठाः[3] । सुपिष्ठाः[4] । पिष्ठाः[5] । पैष्टाः । शिवाद्यण् । करेलितयः । कारेलितयः । औत्सर्गिकोऽण् इति नेयम् । उपक, उपक, भृष्टक[6], कपिष्ठल, कृष्णाजिन, कृष्णसुन्दर, कृष्णपिङ्गल, वटारक[7], अरट्टक[8], अवल्गक, शुक्लाचल, पतञ्जल, मदक, कुशीतक, कशकुरस्न, मदाद्य[9], कलशीकण्ठ, दासकण्ठ[10], पिञ्जुलक, पिङ्गलक, जन्तुक, प्रतिलोम, अनुलोम, अपजग्ध, प्रतान, अनभिहित, सुपिष्ट, पिष्ट, मसुरकर्ण, कर्णक, पर्णक, जलदेजलक, वधिरक, करेरिति, खरीखन्, इत्युपकादिः ।

तिककितवादौ द्वन्द्वे ॥२।४।११५॥ तिककितवादिषु द्वन्द्ववृत्तेषु बहुषु गोत्रापत्येषु वर्तमानेषु तैकायनिकैतवायनीत्यादीनां यः स प्रत्ययस्तस्य स्त्रियां श्लुग्भवति । तैकायनयश्च कैतवायनयश्च तिककितवाः । तिकादिफिञ्[12] । अग्नि[13]वेशायनाश्च दासेरकयश्च अग्निवेशदासेरकाः । अग्निवेशो गर्गादिः । तस्य यञो वाऽन्येति प्राप्ते पाठः । औपकायनाश्च लामि[14]कायनाश्च उपकलमकाः । नडादिफण् । भ्राष्टकयश्च[15] कापिष्ठलयश्च भ्राष्टककापिष्ठलाः । अत इञ् । वाकनखयश्च श्वागुदयश्च परिणद्धयश्च वकनखश्वगुदपरिणद्धाः । अन्येषां वाकनखयश्च श्वागुदयश्च परिणद्धयश्चेति त्रिपदो द्वन्द्वः । एवं नेयम् । उपकलमकाः । भ्राष्टक[16]कापिष्ठलाः । कृष्णाजिनकृष्णसुन्दराः इत्येतेषामुपकादिषु पाठः, सोऽद्वन्द्वार्थः । द्वन्द्वेऽयमेव नित्यो विधिः । तिक, कितव, उब्ज, [17]कुकुम्भ, उर, शलङ्कट, आग्निवेश[18], दासेर[19]क, शाण्डिलक, शकुरस्न[20], उपकलमक, भृष्टक[21], कपिष्ठल, कृष्णाजिन, कृष्णसुन्दर, रन्धेर, भाण्डिरथ, पफक, उरक[22], वकनख, श्वगुद, परिणद्ध, लङ्क, शान्तमृग । इति तिककितवादिः ।

तथाऽऽद्यादेः ॥२।४।११६॥ द्वन्द्वे बहुष्वर्थेषु वर्तमानो[23] यो द्र्यादिः प्रत्ययस्तस्य तथा श्लुग्भवति । यथापूर्वं वार्कण्यश्च[24] लोहघ्वज्यश्च कौण्डीवृस्यश्च वृकलोहघ्वजकुण्डीवृसाः । अङ्गवङ्गसुह्माः, गर्गवत्सवाजाः, विदगर्गयस्काः । तथेति किम् ? [25]यास्कलाह्माश्छात्राः । गार्गीवात्सराजाः । शैग्रव[26]: औपगवाः । बालकिहास्तिदासयः, यस्कमण्डि[27]नागस्तयः । पतञ्जलकमन्दकाः । पातञ्जलकामन्दकायः । द्र्यादिग्रहणं गोत्राधिकारात् ।

यञाऽन्येन ॥ २।४।११७॥ द्र्यादेरन्येन सह द्र्यादीनां द्वन्द्वे बहुष्वर्थेषु वर्तमानो यो द्र्यादिः प्रत्ययस्तस्य तथा [28]श्लुग्भवति यथापूर्वम् । अङ्गवङ्गदाक्षयः । आङ्गवङ्गदाक्षयः । गर्गवत्सौपगवाः । गार्ग्यवत्सौ-[29]पगवाः । भृगुवत्साग्रायणाः । गार्ग्यकाश्यपगालवाः । पूर्वेण नित्ये प्राप्ते विकल्पार्थं वचनम् ।

यञादेर्द्व्यर्थेषु षष्ठ्यास्तत्पुरुषे ॥२।४।११८॥ षष्ठीतत्पुरुषे यत्पदं तस्या. षष्ठ्या विषये[30] एकस्मिंश्च वर्तते तस्य यः स यञादिः प्रत्ययस्तस्य तथा वा श्लुग् भवति यथापूर्वम् । गार्ग्यस्य गार्ग्ययोर्वा कुलं गर्गकुलम् । गार्ग्यकुलम् । विदकुलम् । वैदकुलम् । अगस्तिकुलम् । आगस्तिकुलम् । भृगुकुलम् । भार्गवकुलम् । यञादेरिति

---

१. भ्रष्टकाः । भ्रष्टकयः क० म० । २. कपिष्ठलाः क० म० । ३. सुपिष्टाः क० म० । ४. सौपिष्टाः क० म० । ५. पिष्टाः । पैष्टाः । क० म० । ६. भ्राष्टक क० म० । ७. वट्टारक क० म० । ८. अट्टक क० म० । ९. कशकुरस्न क० म० । १०. मदाद्य क० म० । ११. दामकण्ठ क० म० । १२. -ञ् । औब्जयश्च काकुभाश्च उब्जककुभाः, ककुभाच्छिखाद्यण् । औरसाश्चयश्च लाङ्गल्यश्च उरसलङ्कटाः । उरसान्तिकादिफिञ् । क० म० । १३. अग्निवेशाश्च दासेरकयश्च अग्निवेशदासेरकाः । अग्नि क० म० । १४. आमकायनाश्च उपक अमयकाः क० म० । १५. भ्राष्टकयश्च क० म० । १६. भ्रष्टकपिष्ठलाः क० म० । १७. ककुभ क० म० । १८. अग्निवेश क० म० । १९. दर्भरक क० म० । २०. शकुरस्न-क० म० । २१. भ्रष्टक क० म० । २२. तरक क० म० । २३. वर्तमाने क० म० । २४. वार्कण्यश्च क० म० । २५. आह्माश्छात्राः क० म० । २६. शैग्रवगौपवनाः क० म० । २७. कुण्डिना क० म० । २८. श्लुग्वा क० म० । २९. वत्स्यौ क० म० । ३०.-ये द्व्यीरेक—क० म० ।

किम् ? गार्ग्यकुलम् । यास्ककुलम् । द्व्येकेष्वित्येव किम्[1] ? देवदत्तगार्ग्यः । देवदत्तगार्ग्यौ । तत्पुरुष इति किम् ? गार्ग्यस्य समीपमुपगार्ग्यम् ।

गार्गवैदेभ्यि ॥२।४।११९॥ गोत्र इति वर्तते । यस्कादेर्गोत्र इत्यादिना या ष्फ्लुगुक्ता सोऽणर्थेऽप्रत्ययादौ प्राग्जितीयेऽर्थे यो विधीयते[2]ऽजादिस्तद्धितस्तद्विषये न भवति । गर्गाणां छात्रा गार्गीयाः । वात्सीयाः । आत्रेयीयाः । खरपायणीयाः । अणर्थ इति किम् ? गर्गेभ्यो हितं गर्गीयम्[3] । वत्सीयम् । अचीति किम् ? गर्गेभ्य आगतं गर्गमयम् । गर्गरूप्यम् । विदानामपत्यं युवा वैदः । वैदाविदत्र, इञि विषयभूते तेन प्रतिषेधः । इञन्तु ष्फ्लुचि सत्यामञन्तं न बहुष्विति ष्फ्लुचः प्राप्तिरेव नास्ति । यत्र त्वस्ति तत्र (तु) भवत्येव । विदानामपत्यं बहवो माणवकाः विदाः । अत्रीणां भारद्वाजानां च विवाहः, अत्रिभरद्वाजिका । वशिष्ठकश्यपिका । कुत्सकौशिकिका, भृग्वङ्गिरसिकेत्यत्र प्रत्यासत्तेर्लोपे प्रत्ययान्ताद् द्वितीयमाने प्रतिषेध इति ढ्रञ्ढाञ्न भवति । गर्गभार्गविकेति वा नियमार्थं विज्ञायते । गोत्र इति किम् ? कुवल्याः फलं कुवलम्, तस्येदं कौवलम् ।

गर्गभार्गविका ॥२।४।१२०॥ गर्गभार्गविकेत्यणो विवाहे [5]लुग्यर्थेऽजादौ प्रत्यये ष्फ्लुक्प्रतिषेधो निपात्यते । गर्गाणां भृगूनां च यूनां विवाहः, गर्गभार्गविका । अत्रिभरद्वाजिका । दिवदप्राप्तः प्रतिषेधो निपात्यते ।

यूनि ॥२।४।१२१॥ यून्यपत्ये विहितस्य प्रत्ययस्याणर्थेऽजादौ प्रत्यये विषयभूते विवक्षिते बुद्धिस्थेऽनुत्पन्न एव ष्फ्लुभवति । ष्फ्लुचि सत्यां यथायथं प्रत्यया भवन्ति । फाण्टाहृतस्यापत्यं फाण्टाहृतिः । फाण्टाहृतेरपत्यं फाण्टाहृतः । फाण्टाहृतिमिमताण्णश्चेति णः । फाण्टाहृतस्य स्व इति[6] विवक्षायां युवप्रत्ययस्य ष्फ्लुचि[7] संजातायाम्, इञन्तं प्रकृतिरूपं संपन्नम्[8] । तस्मात् इञ इण् भवति । फाण्टाहृताश्छात्राः । भगवित्तस्यापत्यं भागवित्तिः । भागवित्तेरपत्यं भागवित्तिकः । सौवीरठण् तस्य स्व इत्यर्थविवक्षायां पूर्ववत् ढ्-ठणिति वृत्ते अञ् । भागवित्ताश्छात्राः[9] । ष्फ्लुचुकस्यापत्यं ष्फ्लुचुकायनिः । फिः । ष्फ्लुचुकायनेरपत्यं ष्फ्लौचुकायनः । औत्सर्गिको[12] ढण् । ष्फ्लौचुकायनस्य स्व इति तस्मिन्निवृत्ते स एवाण् । ष्फ्लौचुकायनाश्छात्राः । अणर्थ इति किम् ? भागवित्तिकाय हितं भागवित्तिकीयम् । अचीति किम् ? फाण्टाहृतरूप्यम् ।

फण्फिञोर्वा ॥२।४।१२२॥ फणः फिञश्च युवप्रत्ययस्य, अणर्थ [13]अचा तद्धिते विवक्षिते ष्फ्लुग्वा भवति । गर्गस्यापत्यं गार्ग्यः । गार्ग्यस्यापत्यं गार्ग्यायणः । गार्ग्यायणस्य छात्रा गार्गीयाः, [14]गार्गायणीया वा । चिक्कुस्यापत्यं चैक्कुः, चिक्कोः (चैक्कोः) अपत्यं चैक्कायः(निः) । [15]चैक्कायस्य(नेः) छात्राः, चैक्कीयाः । चैक्कायनीया वा । फिञः खल्वपि यस्कस्यापत्यं यास्कः । शिवादिण् यास्कस्यापत्यं यास्कायनिः, द्व्यचोऽण्[16] इति फिञ् । यास्कायनेश्छात्रा यास्कीयाः[17] यास्कायनीया वा । पूर्वेण नित्ये प्राप्ते विकल्पः ।

ब्रीह्यः ॥२।४।१२३॥ त्रिसंज्ञो य इञ् तदन्तात्परस्य युवप्रत्ययस्य ष्फ्लुग्वा भवति । उदुम्बरस्यापत्यमौदुम्बरिः । औदुम्बरेरपत्यम् औदुम्बरिः । औदुम्बरायणो वा । त्रिग्रहणं किम् ? दाक्षिः पिता । दाक्षायणः पुत्रः ।

---

१. किम् ? गर्गाणां कुलम् गर्गकुलम् । षष्ठ्या इति किम् ? गार्ग्यहितम् । परमगार्ग्यः । तत्पुरुषस्य विशेषणं किम् ? अन्तर्गार्ग्यः । द्व्येकेष्वित्यस्य किम् ? देव—क० म० । २. तेऽजा—क० म० । ३. गार्गीयम् क० म० । ४. इञस्तु क० म० । ५. भरद्वाजानां च क० म० । ६. किशकिका क० म० । ७. उच्चणर्थे क० म० । ८. इत्यर्थविव—क० म० । ९. ष्फ्लुचि ष्फ्लुचि क० म० । १०. –मिति क० म० । ११. –इञाश्राः । यासुन्दस्यापत्यं यासुन्दायनिः । तिकादिफिञ् । यासुन्दायनेरपत्यं यासुन्दायनीयः । द्व्यसुयामयासुन्दादिफिञश्च । तस्य स्व इति पूर्ववच्छस्य ष्फ्लुचि यासुन्दायनीयाश्छात्राः । कपिञ्जलादस्यापत्यं कापिञ्जलादिः, कापिञ्जलादेरपत्यं कापिञ्जलायः । कुर्वादि ञः । कापिञ्जलायस्य स्व इति स्वस्य ष्फ्लुचिञ इण् । कापिञ्जलायाश्छात्राः । ष्फ्लुचुकस्यापत्यं ष्फ्लुचुकायनिः । फिः । १२. कोऽण् क० म० । १३. अजा क० म० । १४. गार्ग्यायणीया वा क० म० । १५. चैक्कायनीयस्य क० म० । १६. चाऽण द्—क० म० । १७. यास्काद्याः क० म० ।

अत इञ् । इञ इति किम् ? अङ्गस्यापत्यमाङ्गः । पुरद्वयमगधे[1]रित्यण् । अङ्गस्यापत्यमिति द्व्यचोऽण इति किम् । तस्योत्तरेण वलुक् । आङ्गः पिता । आङ्गः पुत्र. । पैलाद्यत्रिभ्रादिति नित्यं वलुचि प्राप्तावा[2]रम्भः ।

जिदृषार्षाद्विजोः ॥२।४।१२४॥ जित् आर्षश्च योऽपत्यप्रत्ययस्तदन्तात्परस्य युवप्रत्ययस्य अण इञश्च वलुग्भवति । वचनभेदाद्व्यासंख्याभावः । जितः—तिकस्यापत्यं तैकायनिः । फिञ् । तैकायनेरपत्य-मित्यण्, तस्य वलुक् । तैकायनिः पिता । तैकायनिः पुत्रः । विदस्यापत्यं वैदः विद्याद्यण् । वैदस्यापत्यम्, अत इञ् तस्य वलुक् । वैदः पिता । वैदः पुत्रः । कुरोरपत्यं कौरव्यः । कुर्वादिभ्यः, कौरव्यस्यापत्यमत इञ्, तस्य वलुक्, कौरव्यः पिता । कौरव्यः पुत्रः । क्षत्रियगोत्रवृत्तिविज्ञायते । ब्रह्म तु ब्राह्मणगोत्रवृत्तिरिति फिञ् न भवति आर्षात् । वासिष्ठः पिता । वासिष्ठः पुत्रः । ऋष्यण इञ् । आत्रेयः पिता । आत्रेयः पुत्रः । इतोऽनिजो ढण् इञ् । जिदार्षादिति किम् ? कुपादस्यापत्यं कौपादः । शिवाद्यण्, तस्यापत्यम्, कौपादिः । अणिञोरिति किम् ? दक्षस्यापत्यं दाक्षिः । दाक्षेरपत्यं दाक्षायणः ।

पैलाद्यत्रिभ्रात् ॥ २।४।१२५ ॥ पैलादिभ्योऽत्रिभ्रादब्राह्मणवाभिनश्च विहितस्य युवप्रत्ययस्य वलुग्भवति । पीलाया अपत्यं पैलः । पीलामण्डूकाद्वेत्यण् । पैलस्यापत्यमिति द्व्यचोऽण इति फिञ् । तस्य वलुक् । पैलः पिता । पैलः पुत्रः । शलङ्केरपत्यं शालङ्किः, बाह्वादीञ् तत एव पाठात् शलङ्कोभावः, शालङ्के-रपत्यमिति फण्, तस्य वलुक्, शालङ्किः पिता । शालङ्किः पुत्रः । अत्रिभ्रात्—अङ्गस्यापत्यमाङ्गः तस्यापत्यमिति फिञ् । आङ्गः पिता । आङ्गः पुत्रः । मगधस्यापत्यं मागधः, मागधस्यापत्यमिति इञ्, मागधः पिता । मागधः पुत्रः । श्वफल्कस्य श्वाफल्कः । अन्धकादण् । श्वाफल्कस्यापत्यमितोञ् तस्य वलुक् , श्वाफल्कः पिता । श्वाफल्कः पुत्रः । भाण्डीजङ्घः पिता । भाण्डीजङ्घः पुत्रः । कार्णलरिकिः पिता । कार्णलरिकिः पुत्रः । मायूरिः पिता । मायूरिः पुत्रः । कापिञ्जलिः पिता । कापिञ्जलिः पुत्रः । अत्रात इञः फण् । श्वशुर्यः पिता । श्वशुर्यः पुत्रः । कुलीनः पिता । कुलीनः पुत्रः । स्वस्रीयः पिता । स्वस्रीयः पुत्र. । पैल, शालङ्कि, शात्यंकि, सात्यंकाथि, औदन्नजि, औदभृञ्जि, औदमञ्जि, औदन्यी, औदञ्ची, औदमेधि, औदकशुद्धि, दैवस्थालि, राणि, राणेक्षिति, चोलिङ्गि, पैङ्गलादयनो, औवाहमानी, औञ्जहानि इति पैलादिः ।

प्राक्त्रिभ्यः ॥२।४।१२६॥ इञन्तात्प्राग्गोत्रादपत्ये वर्तमानात्परस्य युवप्रत्ययस्य वलुग्भवति । पाक्षागारिः पिता । पाक्षागारिः पुत्रः । माण्यरेफणिः पिता । माण्यरेफणिः पुत्रः । कैरकलम्बिः पिता । कैर[3]कलम्बिः पुत्रः । प्राक्त्रिति किम् ? दाक्षिः पिता । दाक्षायणः पुत्रः । इञ इति किम् ? राघविः पिता । राघविः पुत्रः ।

न तौल्वल्यादेः ॥२।४।१२७॥ तौल्वल्यादिभ्यः परस्य युवप्रत्ययस्य वलुग्न भवति । तौल्वलिः पिता । तौल्वलायनिः पुत्रः । दाक्षीपिः पिता । दाक्षीपायनः पुत्रः । दिक्षीपशब्दस्य अत एव निपातनादिञ्यक्षा-देराकारः । अपरे दक्षीप इति प्रकृत्यन्तरमाहुः । योगविभागाद् यस्कादिषु पुष्करसच्छब्दपाठाच्च तौल्व-क्याद्यवयस्येनश्च इञश्च बह्वचः प्राग्भरतेञ्त्रिभ्रः इति वलुगनेन प्रतिषिध्यते । तौल्वलिः । तौल्वली । तौल्वलयः । तौल्वलि, तैल्वलि, तैल्व[4]लकि [10]धारिणि, रामणि, दाक्षीपि, देवौति, दैवमति, दैवयनि, प्राटाहति, प्रदायति, [11]बाष्टुकि, आनुराहित, आवृति, आर्हिसि, [12]आसुरी, नैमिञी[13], नैमिशि, [14]असिद्धकि, आसिद्धासि, बाल्धकि, चैकि [15]पौष्की, पौष्करवी, वैरकि, वैलकि, वैहति, वैकर्णि, [16]कारेषुपालि, इति तौल्वल्यादिः ।

भिक्षादेश्च समूहे ॥२।४।१२८॥ ञस इति वर्तते । ञसः षष्ठ्यन्तात् भिक्षादेरन्यस्मात्तच्छब्दकात् समूहेऽर्थे यथाधिकृतं प्रत्यया भवन्ति । भिक्षाणां समूहो भैक्षम् । गाञ्जिकम् । यौवे[17]नम् ।

---

१. गधेरत्यण् म० । २.—त्र्यत्रिभ्रादि—क० म० । ३. विकल्पः क० म० । ४. अत एव क० म० । ५. भाण्डीजङ्घिः पिता भाण्डीजङ्घिः पुत्रः । क० म० । ६. शात्यंकि क० म० । ७. राहक्षिति क० म० । ८. कैरकलम्बिः पुत्रः क० म० । ९. तौल्वलायनः पुत्रः । तैल्वलायनिः पिता, तैल्वलायनः पुत्रः । दाक्षी—क० म० । १०. तैल्वलिकि क० म० । ११. धारिणि क० म० । १२. बाष्टुकि क० म० । १३. आसुरि क० म० । १४. भी । नैमिञ्की क० म० । १५. आसिद्धकि क० म० । १६. कारेषु-पालि क० म० । १७. यौवतम् क० म० ।

अण्यस्मात्—काकानां समूहः काकम् । गार्कम् । वात्सप्यम् । स्त्रैणम् । पौंस्नम् । पञ्चानां मूलानां समूहः इति पञ्चमूली इत्यत्र समूहः समाहार एव, स च समासार्थः, समासेनैव गत इति तद्धितो नोत्पद्यते । यद्युत्पद्येत को दोषः ? परिमाणादेव नुंच इति नियमाद् ङी न स्यात् । ङसँस्त्वे इत्यैषाणादिसिद्धौ समूहविवक्षायां तदन्तविधानार्थो योगः । भिक्षादेरणादन्तमचित्तठणो बाधनार्थम् । औलूनशब्दस्य नोक्तयुक्तः युवतिपाठः पुम्भावबाधनार्थः । भिक्षा, गर्भिणी, युवति, क्षेत्र, करीष, अङ्गार, भर्मन्[3], वर्मन्, पङ्क्ति, सङ्घ, अथर्वन्, दक्षिणा, खण्डिक, वरत्रा, युगँवस्त्र, हलबन्ध, औलूनय इति भिक्षादिः ।

क्षुद्रकमालवाच्छेलनास्त्रिञ् ॥२।४।१२९॥ क्षुद्रकमालवशब्दात् समूहे यथाविहितमण्प्रत्ययो भवति शैलाया नास्नि संज्ञायाम् । क्षुद्रकाश्च मालवाश्च क्षुद्रकमालवाः, तेषां समूहः क्षौद्रकमालवी । एवं नाम्नी कार्चित्शैला । शैलानाम्नीति किम् ? क्षौद्रकमालवकमन्यत् । गोत्रे[5] ऽप्रत्ययार्थं वचनम् । समूहाधिकारे हि तदन्तस्यापि ग्रहणम्, शैलीरनञ इति प्रतिषेधात् ।

गोत्रोक्षवत्सोष्ट्राजोरभ्रवृद्धमनुष्यराजन्यराजपुत्रराज्ञो वुञ् ॥२।४।१३०॥ स्वापत्यसन्तानस्य स्वव्यपदेशकारिणः प्रथमपुरुषस्यापत्यं गोत्रम् । गोत्रवाचिन्य उक्षादिभ्यश्च समूहे वुञ्प्रत्ययो भवति, अणोऽपवादः । गोत्रात्—उपगूना समूह इति औपगवकम् । कापटवकम् । गार्गकम् । वात्सकम् । गार्ग्यायणकम् वात्स्यायनकम् । उक्षन्—औक्षकम् । वत्स—वात्सकम् । उष्ट्र—औष्ट्रकम् । अज—आजकम् । उरभ्र—औरभ्रकम् । वृद्ध—वार्द्धकम् । मनुष्य—मानुष्यकम् । राजन्य—राजन्यकम् । राजपुत्र—राजपुत्रकम् । राजन्—राजकम् ।

केदाराण्ण्यश्च ॥२।४।१३१॥ केदारशब्दात्समूहेऽर्थे ण्यश्च वुञ् च प्रत्ययौ भवतः । अचित्तठणोऽपवादः । कैदार्यम् । केदारम् ।

कवचिहस्त्यचित्तात्त्व ठञ् ॥२।४।१३२॥ कवचिन् हस्तिन् इत्येताभ्यामचित्तवाचिन्यवयवे चकारात् केदाराच्च समूहे ठञ् भवति । कवचान्येषां सन्ति ते[6] कवचिनः, कवचिनां समूहः कावचिकम् । हास्तिकम् । अचित्तात्—आपूपिकम् । शाष्कुलिकम् । केदारात्—कैदारिकम् । एवं केदारशब्दस्य त्रैरूप्यं भवति । व्यवस्थ्यां बाधायां केदाराच्च ठञ्विधानम् ।

धेनोरनञः ॥२।४।१३३॥ धेनुशब्दात्समूहे ठञ्प्रत्ययो भवति न चेत्स धेनुशब्दो नञः परो भवति । धेनूनां समूहः धैनुकम् । अनञ इति किम् ? अधेनूनां समूहः आधेनवम् । धेनोरनञ इति प्रतिषेधो लिङ्गम्, समूहे तदन्तस्यापि भवतीति । तेन ब्राह्मणराजन्यकम् । क्षौद्रकमालवकम् । गौधेनुकम् ।

ब्राह्मणमाणववाडवाद्यः ॥२।४।१३४॥ ब्राह्मण माणव वाडव इत्येतेभ्यः समूहे यः प्रत्ययो भवति । ब्राह्मण्यम् । माणव्यम् । वाडव्यम् ।

गणिकाया ण्यः ॥२।४।१३५॥ गणिकाशब्दात्समूहे ण्यप्रत्ययो भवति । गाणिक्यम् । [10]ब्राह्मणराजशब्दाश्ववचनं पुम्भावार्थं ण्ये हि पुम्भावो न भवति । ब्राह्मण्यायात्रः । गाणिक्यायात्रः । ब्राह्मणाः प्रेक्षिताः अस्यां यात्रायां ब्राह्मण्या यात्रा, गाणिक्या यात्रेति, तयोः समूहश्च बहुष्विति प्रत्ययः ।

---

१. लुच क० म० । २. ङसस्त्व इ—क० म० । ३. चर्मन् क० म० । ४. युगवस्त्र क० म० । ५. एवमाद्या क० म० । ६. -मुण्वा—क० म० । ७. प्रकारौकादिभ्यस्तदन्तस्यान इष्यते । गोत्रवती पत्निगोत्रा स्यात् सगोत्रा भ्रातृजाः स्त्रुवाः इत्येकशब्दौ क० म० टि० । ८. औक्षिकम् क० म० । ९. -तीति क—क० म० । १०. ब्राह्मणादीनां वचनं क० म० । ११. प्रेक्षिताः क० म० ।

केशाद्वा ॥२।४।१३६॥ केशशब्दात्समूहे ष्यप्रत्ययो भवति वा । कैश्यं । कैशिकम् ।

खोऽश्वात् ॥२।४।१३७॥ अश्वशब्दात्समूहे छप्रत्ययो भवति वा । अश्वीयम् । आश्वम् ।

पार्श्वम् ॥२।४।१३७॥ पार्श्व इति पर्शुशब्दात्समूहे णस्प्रत्ययो निपात्यते । ठणोऽपवादः । पर्शूनां समूहः, पार्श्वम्[1] ।

पृष्ठ्यार्हौनौ क्रतौ ॥२।४।१३९॥ पृष्ठ्य, अर्हौन, इति पृष्ठशब्दात्, अर्हन्शब्दाच्च समूहे क्रतौ वाच्ये यथासंख्यं यस्नौ प्रत्ययौ निपात्येते । पृष्ठानां समूहः पृष्ठ्यः, षडहः । अर्हा महीनः । पृष्ठशब्दः अर्हन्पर्य्यायः । रथन्तरादिसामपर्याय इत्यन्ये । क्रताविति किम् ? अर्हां समूहः आर्हमन्यत् । ष्वादिभ्योऽण् इत्यण् ।

चरणाद्धर्मवत् ॥२।४।१४०॥ चरणं कठकलापादिः, तस्माद्यथाधर्मं प्रत्यया भवन्ति । वतिः सर्वसादृश्यार्थः । ते(न) याभ्यः प्रकृतिभ्यो यः प्रत्ययो यथाधर्मं भवति ताभ्य एव प्रकृतिभ्यः स एव प्रत्ययः तथैवेह भवति । कठानां समूहः काठकम्, कालापम्, छान्दोग्यम्, [3]चौर्यम्, बाह्वृच्यम्, आथर्वणम् ।

गोरथवातात्त्रकट्यौलौम् ॥२।४।१४१॥ गो रथ वात इत्येतेभ्यः समूहेऽर्थे यथासंख्यं त्र, कटर्च, ऊल, इत्येते प्रत्यया भवन्ति । गवां समूहः—गोत्रा[4] । रथकट्या[5] । वातूलम् ।

पाशादेश्च यः ॥२।४।१४२॥ पाशादिभ्यो गोरथादिशब्देभ्यश्च समूहेऽर्थे यः प्रत्ययो भवति, ठणोऽपवादः । पाशानां समूहः पाश्या । तृण्या । खल्या । गवां समूहो गव्या । रथ्या । वात्या । पाश, तृण, खल, घूम, अगार, पौटगल, पिटक, पिटाक, शर्कट, खल, हल, नल, वन—इति पाशादिः ।

ग्रामजनबन्धुगजसहायात्तल् ॥ २।४।१४३ ॥ ग्राम जन बन्धु गज सहाय इत्येतेभ्यः समूहेऽर्थे तल्प्रत्ययो भवति । ग्रामाणां समूहो ग्रामता । जनता । बन्धुता । गजता । सहायता । लकारः स्त्रीत्वार्थः ।

श्वबलादिभ्योऽञिन् ॥२।४।१४४॥ श्वन् खल इत्येवं प्रकारेभ्यः समूहे यथासंख्यमञिनौ प्रत्ययौ भवतः । प्रकृतिभेदोपादानाद्यथासंख्यम् । शुना समूहः शौवम् । अह्नामाह्नम् । दधिद्नां दाध्नम् । चक्रिणां चाक्रम् । युगानां यौगम् । नोऽपदस्येति लोपार्थं श्वादिभ्योऽञ्वचनम् । खलादिभ्यः । खलिनी । ऊकिनी । कुडुविनी[6] । एवं शब्दस्य पाशादित्वाद्यः, अयं च प्रत्यय इति द्वैरूप्यम् । श्वखलादयः प्रयोगगम्याः ।

पुरुषात्कृतहितवधविकारे च ढञ् ॥ २।४।१४५ ॥ पुरुषशब्दात्कृते हिते वधे विकारे चार्थे ढञ्प्रत्ययो भवति कृतादौ यथाभिधानं विभक्तियोगः । पुरुषाणा समूहः पौरुषेयम्[7] । पुरुषेण कृतः पौरुषेयो ग्रन्थः । पुरुषाय हितं पौरुषेयं मु[8]हूर्त्तं शासनम् (वा) । पुरुषस्य वधः पौरुषेयो वधः । पुरुषस्य विकारः पौरुषेयः ।

विकारे ॥ २।४।१४६ ॥ ञ इति वर्तते । षष्ठ्यन्ताद्विकारे यथाविहितं प्रत्ययो भवति । द्रव्यस्यावस्थान्तरं विकारः । भस्मनो विकारः भास्मनः । मौलिकः । [11]आर्द्धिः । [12]हाहालः । सैरः । बैद । वार्जः । नैगर्त्तः । शाङ्कवः ।

प्राण्योषधिवृक्षेभ्योऽवयवे च ॥ २। ४ । १४७ ॥ प्राण्योषधिवृक्षवाचिभ्यः षष्ठ्यन्तेभ्यः शब्देभ्योऽवयवे विकारे च यथाविहितं प्रत्ययो भवति । प्राणिभ्यः— कापोतं सक्थि । कापोतं मांसम् ।

---

१. पार्श्वः क० म० । २. काकापादिः क० म० । ३. चौक्थम् क० म० । ४. कठ्योक्थ क० म० । ५. कठ्य क० म० । ६. रथकठ्या क० म० । ७. रथवात त्र—क० म० । ८. शकटा क० म० । ९. कुडुमिनी म० । १०. चमार्हतम् क० म० । ११. आर्द्धिः क० म० । १२. हाकः क० म० ।

मायूरं सक्थि । मायूरं मांसम्[1] । आविकं मांसम् । अविशब्दादनभिधानान्न भवति । ओषधिभ्यः—दौर्वं काण्डम् । दौर्वं भस्म । मौर्वं काण्डम् । मौर्वं भस्म । वृक्षेभ्यः—कारीरं काण्डम् । कारीरं भस्म । वैल्वं काण्डम् । वैल्वं भस्म । प्राण्योषधिवृक्षेभ्य इति किम् ? पाटलीपुत्रस्यावयवः पाटलीपुत्रकः प्राकारः । पाटलीपुत्रकाः प्रासादाः । इत उत्तरं विकारे प्राण्योषधिवृक्षेभ्योऽवयवे चेति इयमप्यधिक्रियते । तेनोत्तरप्रत्ययाः प्राण्योषधिवृक्षेभ्योऽवयवविकारयोरन्येभ्यो विकार एव भवन्तीति वेदितव्यम् । वृक्षौषध्योः पृथगुपादानादिह शास्त्रे प्राणिग्रहणेन त्रसाना ग्रहणं विज्ञायते न स्थावराणाम् ।

तालाद्धनुषि ॥ २।४।१४८ ॥ तालशब्दाद् धनुषि विकारे यथाविहितमण्प्रत्ययो भवति । मैयटोऽपवादः । तालं धनुः । धनुषीति किम् ? तालमयमन्यत् ।

त्रपुजतोः षक् च ॥२।४।१४९॥ त्रपु जतु इत्येताभ्यां विकारेऽण्प्रत्ययो भवति षक् च तयोरागमः । त्रपुषो विकारः त्रापुषम् । जातुषम् । अण्सिद्धेः[2] । षगर्थं वचनम् । चकारः सन्नियोगार्थः ।

शम्या लक् ॥२।४।१५०॥ शमीशब्दाद् विकारेऽवयवे चाण्प्रत्ययो भवति लक् चास्यागमः । शामीलं भस्म । शामीला शाखा ।

परशव्यस्य यलुक् ॥२।४।१५१॥ परशव्यशब्दाद् विकारेऽण्प्रत्ययो भवति यशब्दस्य च तस्य लुग् भवति । परशव्यस्यायसो विकारः पारशवम् । अण्[3]सिद्धं यलुगर्थं वचनम् । एरिस्येवान्त्यलुक्सिद्धौ लुग्वचनादन्त्यभावेऽन्त्यमदेशस्येति यकारलुक्सिद्धौ यग्रहणाद्यशब्दस्यैव लुक् तेनोत्तरत्र परेऽपि इस्यस्याभावादेरिति इकारस्य लुग्भवति ।

कंसीयाड्ड्यः ॥२।४।१५२॥ कंसीयशब्दाद्विकारे ड्यप्रत्ययो भवति यशब्दस्य च तस्य लुग् भवति । कंसीयस्य विकारः काम्यम् ।

हेमार्थान्माने ॥२।४।१५३॥ हेमवाचिनः शब्दान्माने[4] यथाविहितमण्प्रत्ययो भवति । दुमयटोऽपवादः । हाटको निष्कः । हाटकं काषापणम्[5] । जातरूपो निष्कः । जातरूपं कार्षापणम्[6] । अर्थग्रहणं स्वरूपविधिव्युदासार्थम् । मान इति किम् ? हाटकमयी यष्टिः ।

द्रोर्घयः ॥२।४।१५४॥ द्रुशब्दान्माने विकारे च घयप्रत्ययो भवति । यस्यापवादः । द्रुघयं मानम् ।

पयोद्रोर्यः ॥२।४।१५५॥ पयस् द्रु इत्येताभ्यां विकारे यप्रत्ययो भवति । पयसोऽणोऽपवादः । द्रोरेकाञ्मयटः । पयसो विकारः पयस्यम्[7] । द्रोः दारुणो विकारो द्रव्यम् ।

एण्या ढञ् ॥२।४।१५६॥ एणीशब्दाद् विकारावयवयोर्ढञ्प्रत्ययो भवति । अणोऽपवादः । एण्या विकारो अवयवो वा ऐणेयं मासम् । ऐणेयी जङ्घा । ऐणमित्येणशब्दस्य भवति ।

कौशेयम् ॥२।४।१५७॥ कौशेयमिति कोशशब्दाद् विकारे ढञ्प्रत्ययो निपात्यते । कोशस्य विकारः कौशेयं वस्त्रम् । कौशेयं सूत्रम् । निपातनं रूढ्यर्थम् । तेन वस्त्रसूत्राभ्यामन्यत्र भस्मादौ न भवति ।

उष्ट्राद्वुञ् ॥२।४।१५८॥ उष्ट्रशब्दाद्विकारेऽवयवे च वुञ्प्रत्ययो भवति । अणोऽपवादः । उष्ट्रस्य उष्ट्रया अवयवो विकारो वा औष्ट्रकं मांसम् । औष्ट्र[10](ष्ट्रि)का जङ्घा ।

धोमोर्णात् ॥२।४।१५९॥ उमा ऊर्णा इत्येताभ्यां यथायोगं विकारावयवयोर्वा वुञ्प्रत्ययो भवति । उमा—अतसी, तस्या विकारोऽवयवो वा औमकम् । औमम् । ऊर्णाया विकार और्णकम् और्णं वा ।

---

१. आविकं सक्थि । आ—क० म० । २. दुमयटोऽपवादः । क० म० । ३. सिद्धम् क० म० ४. सिद्धः क० म० । ५. ईकारस्य क० म० । ६. माने विकारे क० म० । ७. निष्को वराहः । वराहोऽब्दे किरौ विष्णौ लाञ्छनेऽप्यभिधेयवत्सयोः इति त्रिकाण्डः क० म० टि० । ८. कार्षापणः कार्षिकः स्यात्कार्षिके तान्त्रिके पणः । इत्यमरः क० म० टि० । ९. पयस्यमाज्यं कृत्यादि, ब्रघ्नं दधिघनेतरत् क० म० टि० । १०. औष्ट्रिका क० म० ।

शतात् क्रीतवत् ॥२।४।१६०॥ मीयते परिच्छिद्यते येन तन्मानम्, इयत्तापरिच्छित्तिहेतुः संख्यादिरुच्यते। शतवाचिनः शब्दाद् विकारे क्रीतवत्प्रत्ययविधिर्भवति। शतस्य विकारः शत्यः। शतिकः। साहस्रः। नैष्किकः। अतिः सर्वविधिसादृश्यार्थम्। तेन फौलुगादपि भवति। द्विशतः। त्रिशतः। द्विसाहस्रः[2]। त्रिसाहस्रः। द्विनिष्कैः[3]। त्रिनिष्कः।

हेमादिभ्योऽञ् ॥२।४।१६१॥ हेमन इत्येवमादिभ्यो यथायोगं विकारावयवयोरर्थयोरञ्प्रत्ययो भवति। हेम्नो विकारः हैमं सारसनम्। हैमी यष्टिः। रजतस्य राजतः। हेमन्, उदुम्बर, निचुदार, कोहितक, त्रिशीतक, दण्डकार,[4] गविधु, पाटली[5], श्यामाक इति हेमादयः। हेमादिराकृतिगणः। हेम्नोऽण्बाधनार्थमञ्वचनम्। अणि[6] सति येऽनोऽये अनिति अन्त्याजादेर्लुक् न स्यात्। रजतादीनामयड्बाधनार्थम्। पाटलीश्याम (स्याम)[7]कपर्दिसंपटः।

वाऽभक्ष्याच्छादने मयट् ॥२।४।१६२॥ षष्ठ्यन्ताद् भक्ष्याच्छादनवर्जिते विकारेऽवयवे च यथायोगं मयट्प्रत्ययो भवति वा। भस्मनो विकारः भस्ममयम्। भास्मनम्। कपोतमयम्[8]। कापोतम्। दूर्वाया विकारोऽवयवो वा दूर्वामयं दौर्वं वा। शमीमयं शामीलम्[10]। अभक्ष्याच्छादन इति किम्? मौद्गः सूपः। कार्पासः प्रावारः[11]। भक्ष्याच्छादनयोर्मयडभावपक्षे च गतो विधिः सावकाश इति परत्वादनेन स्वविषये बाध्यते।

शराद्येकाचः ॥२।४।१६३॥ शरादिभ्य एकाच्भ्यश्च शब्देभ्यो यथायोगं भक्ष्याच्छादनवर्जिते विकारेऽवयवे च नित्यं मयट्प्रत्ययो भवति। अणोऽपवादः। शरमयम्। दर्भमयम्। एकाचः—मृन्मयम्। वाङ्मयम्[12]। शरदर्भ, कुटी, सोम, तृण, बल्वज इति शरादिः।

द्वेरप्राणिनः ॥२।४।१६४॥ दुसंज्ञकाद्प्राणिवाचिनो यथायोगं विकारावयवयोरभक्ष्याच्छादनयोर्मयट्प्रत्ययो भवति[13]। आम्रमयः। शालमयः। शाकमयम्। काशीमयम्। तन्मयम्। यन्मयम्। अप्राणिन इति किम्? श्वाविदो विकारोऽवयवो वा शौवाविदम्[14]। श्वाविन्मयम्। भासमयम्[15]।

गोव्रीहेः शकृत्पुरोडाशे ॥२।४।१६५॥ गो व्रीहि इत्येताभ्यां यथासंख्यं शकृति पुरोडाशे च मयट्प्रत्ययो भवति। अणो यस्य चापवादः। गोः शकृत् गोमयम्। व्रीहिमयः पुरोडाशः। शकृत्पुरोडाश इति किम्? अन्यद् गव्यम्, व्रैहम्। शकृद्गोविकारो[16] नावयवः। अतद्धर्मान्वयादनदेकदेशत्वाच्च। तत्र तस्य[17]स्वविषये गोर्मयड्विधानमिह शकृत्येव न विकारावयवयोरित्येवमर्थम्।

तिलयवपिष्टादन्नाम्नि ॥२।४।१६६॥ तिल यव पिष्ट इत्येतेभ्यो यथायोगं विकारावयवयोरनाम्नि मयट्प्रत्ययो भवति। तिलयवाभ्यामणोऽपवादः पिष्टान् कस्य। तिलमयम्। यवमयम्। पिष्टमयम्। अनाम्नीति किम्? तैलम्। यावकः। पिष्टिका।

पिष्टिकाद्धैयङ्गवीनम् ॥२।४।१६७॥ पिष्टिकेति पिष्टशब्दाद् विकारे कप्रत्ययः। हैयङ्गवीनमिति स्त्रोगोदोहशब्दाद् विकारे अञ्प्रत्ययः, प्रकृतेश्च हियङ्भावो निपात्यते। पिष्टस्य विकारः पिष्टिका। स्त्रोगोदोहस्य विकारः हैयङ्गवीनं घृतमुच्यते। घृतादन्यत्राणैव स्त्रौणोदोहं तक्रम्। अनाम्नि मयड्विधानात्पारिशेष्यादयं नाम्नि कः। तत्साहचर्याद् हैयङ्गवीनमिति नाम्न्येव।

---

१. फल्गुगादपि क० म०। २. द्विसाहस्रः। द्विसहस्रः। क० म०। ३. द्विनिष्कः। द्विनैष्किकः। क० म०। ४. कण्डकार क० म०। ५. कापटली क० म०। ६. हि क० म०। ७. अणिति क० म०। ८. -कपोर्षामपटः। ९. कपोतस्य विकारोऽवयवो वा कपो—क० म०। १०. शमीकम् क० म०। ११. उत्तरीयवस्त्रम् क० म० टि०। १२. -मम्। स्वङ्मयम् क० म०। १३. -यति। अणोऽपवादः। क० म०। १४. श्वाविदी क० म०। १५. शौवाविदम् क० म०। १६. -दुगोर्ण विका—क० म०। १७. स्वे क० म०।

नातोऽफलद्रुवयवात् ॥२।४।१६८॥ विकारेऽवयवे च य इमे प्रत्यया उक्ता अतएव तदन्तावयवफलवाचिनो द्रुवयवशब्दवर्जिताद् विकारावयवयोः प्रत्ययो न भवति । कपोतस्य विकारोऽवयवो वा कापोतम् । कापोतस्य विकारोऽवयवो वेति मयट्प्रत्ययो न भवति । विकारो मांसरक्तादिः । प्रकृतेर्विकृतेश्च विकारो भवति । अवयवावयवादिश्चाङ्गुल्यादिः समुदायस्यावयवस्य चावयवो भवति । तत्र विकारावयवाभ्यां प्रत्यये प्रतिषिद्धे प्रकृतिसमुदायाभ्यामेव प्रत्ययेन व्यपदेशो भवति । अफलद्रुवयवादिति किम् ? आमलकमयमस्ति । प्लाक्षमयम् । नैयग्रोधमयम् । द्रौवमयं शकलम् । गौमयं भस्मेति—गोमयस्य गोर्विकारावयवत्वाद् भवति ।

बहुलं ल्लुक् पुष्पमूले ॥२।४।१६९॥ विकारावयवयोर्विहितस्य प्रत्ययस्य पुष्पे मूले च विकारत्वावयवत्वयोश्चैव विवक्षिते बहुलं ल्लुग्भवति । मल्लिकाऽवयवो विकारो वा पुष्पं मल्लिका । यूथिका । नवमालिका । मालती । जातिः । पाटलम् । कुन्दम् । सिन्दुवारम् । कदम्बम् । करवीरम् । चम्पकम् । अशोकम् । विदार्या मूलं विदारी । अंशुमती । वृहती । बिसम् । मृणालम् । (क्वचित्) न भवति—बैल्वानि मूलानि । क्वचिदन्यत्रापि भवति—आमलकस्य विकारो वृक्ष आमलकी । बदरी । व्रीहीणां विकारः स्तम्बः व्रीहिः ।

फले ॥२।४।१७०॥ विकारेऽवयवे वा फले विवक्षिते प्रत्ययस्य ल्लुग्भवति । आमलक्या विकारोऽवयवो वा फलम् आमलकम् । बदरम् । कुवलम् । व्रीहिः । यवः । माषः । मुद्गः । गोधूमः । हरीतकी । पिप्पली । कोशातकी । कोषातकी । नखरजनी । शष्कुली । दाडी । दोडी । दडिदोडी । श्वेतपाकी । अर्जुनपाकी । कला । शाला । द्रप्स । गङ्गा । गङ्गारिका । कण्टकारिका । शेफालिका । ओषधिहरीतक्यादिभ्यः ल्लुचि प्रकृतिलिङ्गमेव । तत्र स्त्रिया पूर्वस्य व्यतः लुचि पुनः व्यत् । आमलकादीनि सन्ति प्रकृत्यन्तराणि । आमलक्यादिभ्यः प्रत्ययश्रुतिनिवृत्त्यर्थं ल्लुग्वचनम् ।

प्लक्षादेरण् ॥२।४।१७१॥ प्लक्ष इत्येवमादिभ्यो विकारेऽवयवे वा फले विवक्षितेऽण्प्रत्ययो भवति । मयटोऽपवादः । विधानसामर्थ्यादस्य न ल्लुग्भवति । प्लक्षस्य विकारोऽवयवो वा फलं प्लाक्षम् । नैयग्रोधम् । प्लक्ष, न्यग्रोध, अश्वत्थ, इङ्गुदी, सगु, वेणु, कक्कतु, बृहतीति प्लक्षादिः ।

जम्ब्वा वा ॥२।४।१७२॥ जम्बूशब्दाद् विकारेऽवयवे वा फले विवक्षितेऽण्प्रत्ययो भवति वा । पक्षे यथाप्राप्तम् । तस्य ल्लुग्भवति । जम्ब्वा विकारोऽवयवो वा फलं जाम्बवम् । जम्बु । जम्बूः । ल्लुचि जम्ब्वा । लिङ्गमुभयत्रापि भवति ।

बोद्धव्येत्रोः ॥२।४।१७३॥ ङस इति वर्तते । पठ्यन्ताद्बोद्धरि अध्येतरि च यथाविहितं प्रत्ययो भवति । निमित्तानां बोद्धा नैमित्तिकः । मौहूर्तिकः । औत्पातः । छन्दसोऽध्येता छान्दसः । व्याकरणस्य बोद्धाऽध्येता वा वैयाकरणः । षटस्य बोद्धा षटस्य बोद्धा इत्यज्ञानभिप्रायास भवति ।

न्यायादिभ्यष्ठक्लक्षणाञ्ञिकञ्याय्यायिकाकृञ् ॥२।४।१७४॥ न्यायादिभ्यः पदकल्पलक्षणशब्दान्तेभ्यः क्रतु-आख्यानाख्यायिकाकारिभ्यश्च पठ्यन्तेभ्यो बोद्धव्येत्रोर्ङस्प्रत्ययो भवति । न्यायस्य बोद्धाऽध्येता वा नैयायिकः । वैयासिकः । पदान्तात्—पौर्वपदिकः । औत्तरपदिकः । आनुपदिकः । बहुप्रत्ययपूर्वात्र भवति अनभिधानात् । मातृकल्पिकः । पाराञ्चरकल्पिकः । लक्षणान्तात्—गौलक्षणिकः । आश्वलक्षणिकः । आनुलक्षणिकः । सौलक्षणिकः । लाक्षणिक इति न्यायादित्वात्सिद्धम् । क्रतु—आग्निष्टोमिकः, वाजपेयः(यिकः) । ज्योतिष्टोमिकः । राजसूयिकः । आख्यान—पावक्लौतिकः । प्रैवङ्गुकः । आविमारकिकः । आख्यायिका—वासवदत्तिकः । सौमनोहरिकः । न्याय, न्यास, लोकायत, पुनरुक्त, परिषद्, चर्चा, क्रमेतर, लक्षण, संहिता, पदे-पदे, क्रम, सङ्घट्टा, सङ्घाटा, वृत्तिसंग्रह, गण, गुण, आयुर्वेद, इतिहास, पुराण, द्विपदा,

---

१. अत एतदन्ता—क० म० । २. -वयवा—क० म० । ३. वा क० म० । ४. तम्बो क० म० । ५. अम्बादिः क० म० । ६. -लुग्वचनमपि क० म० । ७. मौहूर्त क० म० । ८. औत्री छान्दसौपम्या क० म० टि० । ९. नैयासिकः क० म० । १०. -ल्पिकः । आनुकल्पिक. । क० म० । ११. आग्निष्टोमिकः क० म० ।

ज्योतिष, अनुसू, लक्ष्य, लक्षण, अनुलक्ष्य, सुलक्ष्य, वसन्त, वर्ष, शरद्, हेमन्त, शिशिर, प्रथमगुण, अनुगुण, चरमगुण, अथर्वन्, आथर्वण इति न्यायादिः ।

अकल्पात् सूत्रात् ॥२।४।१७५॥ कल्पशब्दवर्जितात्परो यः सूत्रशब्दस्तदन्ताद् बोद्धृध्येत्रोष्ठण्-प्रत्ययो भवति । वार्तिसूत्रिकः । साङ्ग्रहसूत्रिकः । अकल्पादिति किम् ? सौत्रः । काल्पसूत्रः ।

अधर्मक्षत्रसंसर्गाङ्गत्रेर्विद्या ॥२।४।१७६॥ धर्म क्षत्र संसर्ग अङ्ग त्रि इत्येतच्छब्दवर्जितात्परो यो विद्याशब्दस्तदन्तात्यष्ठघन्ताद् बोद्धृध्येत्रष्ठण्प्रत्ययो भवति । वायसविद्यिकः । सार्पविद्यिकः । अधर्मादिरिति किम् ? वैद्यः । धार्मविद्यः । क्षात्रविद्यः । सासर्गविद्यः । आङ्गविद्यः । त्रैविद्यः । [1]त्रिविधा विद्या त्रिविद्येति कर्मधारयात् प्रत्ययविधुतिः । तिसृणां विद्याना बोद्धेति द्विगोः ष्लुग्भवति—त्रिविद्यः ।

याज्ञिकौक्थिकलौकायतिकानुब्राह्मणी ॥२।४।१७७॥ याज्ञिकादय शब्दा बोद्धृध्येत्रोनिपात्यन्ते । याज्ञिकेति यज्ञशब्दाट्ठण् याज्ञिक्यशब्दाच्च ठण् इक्यलोपश्च निपात्यते । यज्ञस्य याज्ञिक्यस्य वा बोद्धाऽध्येता वा याज्ञिकः । औक्थिकेति उक्थशब्द. [2]साममु कढ.[3] । लोकायतिकेति ठणि इकारः । लोकायतिकस्य बोद्धाऽध्येता वा लौकायतिकः । लोकायतिक इति न्यायादिपाठात्सिद्धम् । अनुब्राह्मणोतीन् । अनुब्राह्मणं बोद्धाऽध्येता वा अनुब्राह्मणी । इन्निपातनमण्-बाधनार्थम् ।

शतषष्टेः षथष्ठट् ॥२।४।१७८॥ शत षष्टि इत्येताभ्या परो य. पथिन्शब्दस्तदन्तात् षष्ठघन्ताद् बोद्धृध्येत्रोष्ठट्प्रत्ययो भवति । शतपथिकः । शतपथिकी । षष्टिपथिकः । षष्टिपथिकी ।

पदोत्तरपदेभ्यष्ठः ॥२।४।१७९॥ पदशब्द उत्तरपदं यस्य तत. पदशब्दादुत्तरपदशब्दात्पदोत्तरपदशब्दाच्च बोद्धृध्येत्रोष्ठप्रत्ययो भवति । पूर्वपदिकः । उत्तरपदिकः[4] । एव पदोत्तरपदस्य द्वैरूप्यम्[5] । पदोत्तरपदात् पदोत्तरपदिकः । बहुवचनं सर्वभङ्गपरिग्रहार्थम्[6] ।

शिक्षामीमांसासामक्रमपदाद् वुच् ॥२।४।१८०॥ शिक्षा मीमासा सामन् क्रम पद इत्येतेभ्यः बोद्धृध्येत्रोवुच्प्रत्ययो भवति । शिक्षकः । मीमासकः । सामकः । क्रमकः । पदकः । चकारः सामान्यग्रहणविधातार्थ. । क इच्छापुस इति प्राप्नोतीति वुच्वचनम् ।

ससर्वादेः ष्लुक् ॥२।४।१८१॥ सादेः सर्वादेश्च बोद्धृध्येत्रोः प्रत्ययस्य ष्लुग्भवति । सवातिकः । सर्ववार्तिकः । ससंग्रह. । सर्ववेद. । सर्वतनुः[7] । सर्वविद्य. ।

संख्याकात्सूत्रे ॥२।४।१८२॥ संख्याया यः क प्रत्ययो विहितस्तदन्तात्यष्ठघन्तात्सूत्रे वर्तमानाद् बोद्धृध्येत्रो. प्रत्ययस्य ष्लुग्भवति । अष्टका आपिशलपाणिनीयाः, त्रिकाः[10] काशकृत्स्नाः, दशका उमास्वातीयाः, चतुष्का. शाकटायनीयाः । सख्याग्रहणं किम् ? माहावार्तिकाः । कालापकाः । कादिति किम् ? चातुष्टयाः ।

प्रोक्तात् ॥२।४।१८३॥ प्रोक्तप्रत्ययान्ताद्विहितस्य बोद्धृध्येतृप्रत्ययस्य ष्लुग्भवति । गौतमेन प्रोक्तं गौतमम्, तस्य बोद्धृध्येत्री वा गौतमा । सौधर्मा । आपिशला । पाणिनीया । आर्चोभिनः । वाज[11]सनेयिनः ।

वेदेब्राह्मणम् ॥२।४।१८४॥ प्रोक्तग्रहणमिहानुवृत्तं प्रथमान्तं विपरिणम्यते । प्रोक्तप्रत्ययान्तं वेदवाचि इनन्त च ब्राह्मणवाचि बोद्धृध्येत्रोरेव प्रयुज्यते । वेद—कठेन प्रोक्तस्य वेदस्य बोद्धारोऽध्येतारो वा काठाः । कालापा. । मौला.[12] । पैप्पलादाः । [13]आर्चोभिनः । वाजसनेयिनः । इन्—ब्राह्मणम्—ताण्डयेन प्रोक्तस्य

---

१. त्यवयवा क० म० । २. केपुचित्साममु क० म० । ३. -ढः । ततस्तादर्थ्यात्सद्व्याख्यानग्रन्थे औक्थिक्यार्थे वर्तमानाट्ठण् । औक्थिक्यशब्दाच्च ठण् इक्यलोपश्च निपात्यते । उक्थस्य औक्थिकस्य वा बोद्धाऽध्येता औक्थिकः । क० म० । ४. लोकायतस्य क० म० । ५. -दिकः । पूर्वपदिका । उत्तरपदिका । क० म० । ६. -दात् । पदात् । पदिकः । क० म० । ७. परिग्रहणार्थम् क० म० । ८. सर्वातनुः क० म० । ९. आपिशल क० म० । १०. त्रिः काकाशकृत्स्ना क० म० । ११. राजसनेयिन. क० म० । १२. मौदाः क० म० । १३. आर्चोभिनः क० म० ।

ब्राह्मणस्य बोढारोऽध्येतारो वा ताण्डिनः । भाल्लविनः । शाटायनिनः । ऐतरेयिणः । ब्राह्मणमिति किम् ? याज्ञवल्क्यानि ब्राह्मणानि । सौलभानि ब्राह्मणानि । ब्राह्मणमिति किम् ? पैङ्गो कल्पः । ब्राह्मणं वेद एव । न्येव सिद्धे नित्यस्तस्य नियमनिवृत्त्यर्थमिन्ब्राह्मणग्रहणम् । प्रोक्तानुवर्तनं किमर्थम् ? ऋचः यजूंषि सामानि मन्त्राः । बोढ्येतृभ्यामन्यत्रास्य प्रोक्तप्रत्ययान्तस्य पदस्य प्रयोगनिवृत्त्यर्थं वचनम् ।

मातृपितृभ्रातर्व्युलङ्व्यम् ॥२।४।१८५॥ षष्ठ्यन्ताभ्यां मातृ पितृ इत्येताभ्यां भ्रातर्य्यर्थे यथासंख्यं उलङ् व्य इत्येतौ प्रत्ययौ भवतः । मातुर्भ्राता मातुलः । पितुर्भ्राता पितृव्यः । डकारौ लुगर्थौ ।

पित्रोर्डामहट् ॥२।४।१८६॥ षष्ठ्यन्ताभ्यां मातृ पितृ इत्येताभ्यां मातापित्रोरभिधेययोर्डामहट्प्रत्ययौ भवति । मातुः पिता मातामहः । मातुर्माता मातामही । पितुः पिता पितामहः । पितामही । डिद्वित्वाभ्यां पित्रोरिति मातापित्रोरिति ज्ञायते । डकारौ लुगर्थौ । टकारौ ङ्यर्थौ ।

दुग्धेऽवेर्स्सोढदूसमरीसम् ॥२।४।१८७॥ ङस्यन्ताद्विशब्दाद्दुग्धेऽर्थे सोढ दूस मरीस इत्येते प्रत्यया भवन्ति । अवेर्दुग्धम् [1]अविसोढम् । अविदूसम् । अविमरीसम् ।

राष्ट्रेऽनक्षादिभ्यः ॥२।४।१८८॥ ङस इति वर्तते । राष्ट्रं जनपदः, विषयो देश इत्यर्थः । षष्ठ्यन्ताददक्षादिवर्जिताद्राष्ट्रेऽभिधेये यथाविहितमण्प्रत्ययो भवति । ईशितव्येऽयं प्रक्रमः । निवासे वक्ष्यते । द्विधा च राष्ट्रसम्बन्धो भवति । शिबीना राष्ट्रं शैबम् । उपुष्टाना राष्ट्रम्, औपुष्टम् । गान्धारीणा गान्धारम् । अनक्षादिभ्य इति किम् ? अक्षाना राष्ट्रं वक्षाना राष्ट्रमिति वाक्यमेव भवति । अक्ष, वक्ष, सुह्म, पुण्ड्र, इत्यक्षादयः प्रयोगगम्याः ।

भौरिक्यैषुकार्यादेर्विधभक्तम् ॥२।४।१८९॥ भौरिक्यादिभ्य ऐषुकार्यादिभ्यश्च राष्ट्रेऽभिधेये यथासङ्ख्यं विध भक्त इत्येतौ प्रत्ययौ भवतः । अणपवादः । भौरिकीणां राष्ट्रम् भौरिकिविधम् । भौलिकिविधम् । ऐषुकारीभक्तम् । सारस्यायनभक्तम् । भौरिकि, भौलिकि, वोपयत, चोदयत, वैदयत, चैकयत, शैकयत, क्षैतयत, काणेय, बालिकाज्य इति भौरिक्यादिः । ऐषुकारी, सारस्यायन, चान्द्रायण, तार्ष्यायण, द्वयाक्षायण, त्र्याक्षायण, औलायन, सौवीर, दासमित्रि, दासमित्रायण, शौद्रकायण, शायण्ड[2], शायण्डायन, खादायन, वैश्यधनव, वैश्यमाणव, वैश्यदेव, तुण्डदेव, शायण्डो इत्यैषुकार्यादिः ।

राजन्यादिभ्यो वुञ् ॥२।४।१९०॥ राजन्यादिभ्यो राष्ट्रेऽभिधेये वुञ्प्रत्ययो भवति । राजन्यानां राष्ट्रं राजन्यकम् । दैवयातवकम् । राजन्य, दैवयातव, आवृत, वात्रव, शालङ्कायन, बाभ्रव्य, जालन्धरायण, कौन्ताल, आत्मकामेय, अम्बरीपुत्र, बैल्वन, शैलूषज, उदुम्बर, तैतल, सम्प्रिय, दाक्षि, उर्णनाभ इति राजन्यादिः । आकृतिगणोऽयम् । तेन आर्जुनायनकम् । वैराटकम् । मालवकम् । त्रैगर्तकमित्यादि सिद्धं भवति । योगविभागोऽस्याकृतिगण[3]त्वाद्योतनार्थमुत्तरार्थश्च ।

वसातेर्वा ॥२।४।१९१॥ वसातिशब्दाद्राष्ट्रे वुञ्प्रत्ययो भवति वा । वसातीनां राष्ट्रं वासातकम् । वासातम् ।

निवासादूरभवाधिति देशे नाम्नि ॥२।४।१९२॥ ङस इति वर्तते । ङसः षष्ठ्यन्तान्निवासादूरभव इत्येतयोरर्थयोर्यथाविहितं प्रत्ययो भवति देशे नाम्नि, प्रत्ययान्तं चेद् देशस्य नामधेयं भवति । इतिकरणो विषयार्थः । तेनानुवृत्ते व्यवहारमनु[4]पतते नाम्नि विज्ञेयं न सङ्कीर्तते । निवसन्त्यस्मिन्निति निवासः, तत्र ऋजुनावो निवासः आर्जुनावम् । उपुष्टस्य निवासः औपुष्टम् । शकलायाः शाकलम् । अदूरे भवः अदूरभवः । तत्र वरणासाया अदूरभवा वारणासी नगरी । विदिशायां वैदिशं नगरम् । वैदिशो जनपदः । व्रीहिमत्या

---

१. "अविसोढाविदूसाविमरीसानि पचस्पतेः" इत्यमरः क० म० टि० । २. -यण्ड । शयाण्ड । शायाण्डायन । क० म० । ३. -त्वो—क० म० । ४. प्रत्याह्न क० म० । ५. -मनुपतते क० म० ।

वैहिमतम् । यवमतक यावमतम् । अङ्गानां निवासः आङ्गाः । वाङ्गाः । कलिङ्गाः । सुह्माः । मगधाः । पुण्ड्राः । कुलत्थाः । पञ्चालाः । मत्स्याः । वाराणानामदूरभवं नगरं वाराणाः नगरम् । शृङ्गिशात्कैलयोर्ग्रामः । गोधो ग्रामः अश्विन्धायनपर्वाः । शकण्डी, अलपदा, मथुरा, उज्जयिनी, गया, तक्षशिला, उरसा, बदरी, कुटुकबदरी, बालतिकं वनानीति प्रत्ययान्तं न देशनाम किंतर्हि ? प्रकृतिमात्रमिति न भवति ।

सोऽस्यास्ति ॥२।४।१९३॥ स इति प्रथमान्तादनेनेति सप्तम्यर्थे यथाविहितं प्रत्ययो भवति यः प्रथमान्तः स चेदस्तीति भवति । स इति लिङ्गसंख्यादिकमविवक्षितम् । प्रथमार्थमात्रं तु विवक्षितम् । देशो नाम्नि प्रत्ययान्तं चेद्देशस्य नाम भवति । इतिकरणो विवक्षार्थोऽनुवर्तत एव । उदुम्बरा अस्मिन् देशे सन्ति औदुम्बरं नगरम् । औदुम्बरो जनपदः । बाल्वजः पर्वतः ।

तेन निर्वृत्तं च ॥२।४।१९४॥ तेनेति तृतीयान्तान्निवृत्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति देशे नाम्नि प्रत्ययान्तं चेद्देशस्य नाम भवति । तेनेति कर्तरि हेतौ वा तृतीया । निर्वृत्तमिति कर्मणि कर्तरि वा क्तः । कुशाम्बेन निर्वृत्ता कौशाम्बी नगरी । ककन्देन निर्वृत्ता काकन्दी । मकन्देन माकन्दी । सगरैः सागरः । सहस्रेण निर्वृत्ता साहस्रा परिखा । चकारः चतुर्णां योगानामुत्तरत्रानुवृत्त्यर्थः । तेनोत्तरेऽपि प्रत्यया यथायोगं चतुर्ष्वर्थेषु भवन्ति ।

नद्यां मतुः ॥२।४।१९५॥ तस्य निवासस्तस्यादूरभवः सोऽस्यास्ति तेन निर्वृत्तं वेत्येतेष्वर्थेषु यथायोगं मतुप्रत्ययो भवति नद्या देशे नाम्नि, प्रत्ययान्तश्चेन्नदीविषयं देशस्य नामधेयं भवति । नदीनामेत्यर्थः । उदुम्बरावती । वर्णावती । मशकावती । पुष्कलावती । द्रुमवती । इक्षुमती । भागीरथेन निर्वृत्ता भागीरथी । भैमरथी । जाह्नवी । सौवास्तवीति । अमत्वन्तानि एतानि नदीनामानीति न भवति ।

मध्वादेः ॥२।४।१९६॥ मध्वादिभ्यो मतुप्रत्ययो भवति चातुरर्थिको देशे नाम्नि प्रत्ययान्तं चेद्देशस्य नाम भवति । मधुमान् । विसवान् । अनद्यर्थमारम्भः । मधु, विस, स्थाणु, उष्टि, इक्षु, वेणु, कुकुन्ध्य, शमी, शरीर, हिम, किशरा, शार्याण, भुवत्, यदि, किशरु, इष्टका, शुक्ति, आमुती, आसन्दी, शकली, वेद, पीड़ा, अक्षशिला, आमिषो इति मध्वादिः ।

कुमुदनडवेतसमहिषाड्डित् ॥२।४।१९७॥ कुमुद नड वेतस महिष इत्येतेभ्यो डित्प्रत्ययो भवति चातुरर्थिको देशे नाम्नि । कुमुद्वान् । नड्वान् । वेतस्वान् । महिषमान् नाम देशः तत्र भवा माहिष्मती नगरी । डित्त्वादन्त्यादादिलोपः ।

नडशाडाड्ड्वलः ॥२।४।१९८॥ नड शाड इत्येताभ्यां डिद् वलप्रत्ययो भवति । चातुरर्थिको देशे नाम्नि । नड्वलम् । शाड्वलम् ।

शिखायाः ॥२।४।१९९॥ योगविभागादुदिति निवृत्तम् । शिखाशब्दाद् वलप्रत्ययो भवति देशे नाम्नि चातुरर्थिकः । शिखावलं नाम नगरम् ।

शिरीषाड्ढकण् ॥२।४।२००॥ शिरीषशब्दाट्ठ कण् इत्येतौ प्रत्ययौ भवतः चातुरर्थिकौ देशे नाम्नि । शिरीषाणामदूरभवो ग्रामः शिरीषकः । शैरीषकः ।

शर्कराया ष्ठण् छण् च ॥२।४।२०१॥ शर्कराशब्दाद्ठ कण् ठण् छ अण् इत्येते प्रत्यया भवन्ति चातुरर्थिका देशे नाम्नि । शर्करा अस्मिन् ग्रामे सन्तीति शर्करिकः । शार्करिकः । शर्करीयः । शार्करः । शिरीषा. शर्करा इत्ययोगिकम् सोऽयमित्यभिसम्बन्धाद् वा ।

---

१. वराणानां क० म० । २. वराणाः क० म० । ३ शाल्मकलो क० म० । ४. -ष्ठाट्ठकण् क० म० । ५. -ऽष्टाट्ठकण् क० म० । ६. शर्करिका क० म० ।

रेवत्सेलं[1]युष्मच्चेष्यण्ढक्ण्फक्ण्फिञ्कक्छक्ष्यकक्कण्टकाेऽश्मप्रेक्षातृणकाशारीहण्यसुपन्थि-सुतङ्गमबलाहस्तिपथिकर्णोत्करनडकुशाश्वर्ष्यवराहकुसुदाश्वत्थादिभ्यः ॥२।४।२०२॥ अश्मा-दिभ्य एकान्नविंशतेर्गणेभ्यो यथासंख्यं रादय एकान्नविंशतिश्चातुरर्थिकाः प्रत्यया भवन्ति देशे नाग्नि। अश्मादे रः—अश्मरः। यूथरः। अश्मन्, यूथ, ऊध, यूथ, भील, गुद, वर्म, कूट, गुहा, वृन्द, नगर, काण्ड, शिखा इत्यश्मादिः। प्रेक्षादेरिन्—प्रेक्षी। फलकी। प्रेक्षा, फलका, वल्गका, भ्रुवका, धुवका, शिफका, न्यग्रोध, इष्कट, कण्टक[2], सङ्कट, गर्त, परिवाप, वृक, युवाप, कूप, हिरण्य इति प्रेक्षादिः। तृणादेः सः—तृणसा। नडसा। तृण, नद, वुस, पर्ण, वर्ण, वन, वराण, अर्ण, जिन, विल, पुल इति तृणादिः। काशादेरिलः—काशिलम्। वाशिलम्। काश, वाश, अश्वत्थ, पलाश, वर्बुल, शोपाल, पीयुक्षा, कपित्थ, बिल्व, कर्दम, नद, वन, तृण, कण्टक, गुहा इति काशादिः। अरीहणादेर्बुञ्—आरीहणकम्। खाण्टकवकम्। अरीहण, खण्ट, वुधण, खरदो, भूर्गल[3], अलन्दन, उलुन्द, खार्खुरायण, खानुरायण, कोष्टायन, रौद्रायण, भास्त्रायण, त्रैगर्त्तायन[4], रायस्पोष, विपथ, विपार्श्व, उद्दण्ड, ऐदायत, औम्बवति, शिंशपा, किरण, वीरण, धौमतापन, यज्ञदत्त, सुयज्ञ, बधिर इत्यरीहणादिः। सुपन्थ्यादेर्ण्यः—सौपन्थ्यम्। सांकाश्यम्। काम्पिल्यम्। सुपथः प्रत्ययेथोनटौ[5] निपातनात्। सुपन्थिन्, संकाश, कम्पिल, सुपर्य्यय, अश्मन्, नाथ, कूट, वदिसा[6], सृष्टि, आगस्त्य, शूर, चिरन्त, विकर, नासिका, प्रगदिन्, मगदिन्, कदीद, कदीप, चूडार, सदार, कोविदार—इति सुपन्थ्यादिः। सुतङ्गमादेरिञ्—सौतङ्गमिः। मौनिचित्तिः। सुतङ्गम, मुनिचित्त, महाचित्त, महापुत्र, शुकश्वेत, विश्वश्वन्, अर्जुन, अजिर, गदिक, विज, वाप, कर्ण इति सुतङ्गमादिः। बलादेर्यः—बल्यम्। वुल्यम्। बल, वुल, पुल[7], उल, कुल[8], नुल, नल, वन इति बलादिः। अहरादिभ्योऽञ्—आह्नम्। लौवम्। तेन निर्वृत्तेऽर्थे देशे नाग्नि करणायमहः शब्दादञ्त्रिशेषविहितत्वाद्बाधकः। अहन्, लोमन्, वेमन्, गङ्गा—इत्यहरादिराकृतिगणः। सख्यादेर्ढण्—साख्येय[9]। सखि, सखिदत्त, गोफिल[10], भल्ल, वक्र, चक्रवाक, छगल, अशोक, सीरक, सरक, चोर, वीर, सरस, समल इति सख्यादिः। पथ्यादेः फण्—पाथ्यायनः। पाक्षायणः। लैपायणः[11]। पथः प्रत्ययेथोनटौ निपातनात्। पथिन्, पक्ष, तुष, अण्डक, पीलिक, पाकखिल, अतिश्वा, कुम्भी, सीकर[12], लोमन्, लोमक, पुंसक, सकर्ण, सरक, सहक, सरस, समल इति पथ्यादिः। कर्णादेः फिञ्—कार्णयिनिः, वासिष्ठायनिः। कर्ण, वसिष्ठ, अर्कलाश[13], द्रुपद, आनुदुह्य, पाञ्चजन्य, स्फिग, कुलिश, आकनी, जित्वन्, चैत्र, आण्डीवत्, जीवन्—इति कर्णादिः। उत्करादेरछः—उत्करीयः, कङ्करीयः। उत्कर, सङ्कर, सम्पर, सम्पल, सम्फल, पिप्पल, मूल, अर्क, आत्मन्, सुवर्ण, सुपर्ण, पर्ण, हता[14], अंचिर[15], अग्नितिक, कितव, आतप, अनेक, पलाश, नैःनण[16], पिचुक, अश्वत्थ, काश, कुद्रा, भस्त्रा, विशाल, शाला, अरण्य, अजिन, आजान, खण्डा-जिन, चण्डण, उत्क्रोश, क्षान्ध, खण्ड, खदिर, गूर्पणाय, श्यावनाय, नैचाकव, नितान्त, वृक्ष, आर्द्रवृक्ष, इन्द्रवृक्ष, अग्निवृक्ष, वस्त्राणार्हा, अरिहणा, वातामर, विजिगीषा, संश्रव, रोहिष्यर्त, निचापक इत्युत्करादिः। नडादेरछः-नडकीयः। प्लक्षकीयः। नड, प्लक्ष, बल्व, वेणु, वेत्र, वेन[17], रात्रि, कार्ष्ण, कपोत, कुञ्च, तक्षन्—इति नडादिः। कुशाश्वादेरछण्—काशविंशीयः, आरिष्टीयः। कुशाश्व, अरिष्ट, अरिष्य, वैदव[18], विशाल, रोमक, लोमक, कवल, कूट, रोमश, वर्बुल, पूरग[19], सूकर, दूरक[20], पूरक, सन्दृश, पुरगा, सुख, धूम्र, विनत, विकुट्या, अमस्, इरम् अरस् औत्तल्य—इति कुशाश्वादिः। अहरुक्षादेः कः—अह्नायकः। न्यग्रोधकः। अहन, न्यग्रोध,

---

१. युष्मच्यो। २. कङ्कट क० म०। ३. अगल क० म०। ४. खानुरायण क०। ५. -यन। रैवत। राय—क० म०। ६. खार्क्षास्यम् क० म०। ७. मदा क० म०। ८. सुपर्वय क० म०। ९. मादिसा क० म०। १०. मुल क० म०। ११. वुल क० म०। १२. खाखिदत्तेयः क० म०। १३. वादव क० म०। १४. लौवायणः क० म०। १५. सीरक क० म०। १६. अर्कवृक्ष क० म०। १७. हृदा क०म०। १८. अञ्चिर क० म०। १९. नैर्ऋत क०। २०. वेमस। चि। क० म०। २१. वेत्र क० म०। २२. पूगर क० म०। २३. दूकर क० म०। २४. पूकर क०।

शर, निलिन, निर्वास, विनद्ध, निनद्ध, स्थूलबाहु, खदिर[3], विदग्ध, विजग्ध, विभग्न, विभक्त इति वराहादिः। कुमुदादेषुः—कुमुदिकम्। इक्कटिकम्। कुमुद, इक्कट, निर्यास, कण्डक, गर्त, परिवास, यवाप, कुप, विकङ्कत[5] अश्वत्थ, अश्वत्थ, न्यग्रोध इति कुमुदादिः। अश्वत्थादेष्ठण्—आश्वत्थिकम्। कौमुदिकम्। अश्वत्थ, कुमुद, गोमर, रथकार, दाधग्राम, पुंस्न[6], कुन्द, शाल्मलि, मुनि, स्थल, कुट, मुकु, कूर्णि इत्यश्वत्थादिः। इति करणाश्रया निदर्शनं, प्रत्ययव्यवस्थायामर्थप्रकृत्युपादानं प्रपञ्चार्थम्।

साऽस्य पौर्णमासी ॥२।४।२०३॥ [7]नाम्नीति वर्तते। सेति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति यत्तत्प्रथमान्तं पौर्णमासी चेद्[8] भवति, नाम्नि प्रत्ययान्तं चेन्नाम भवति। इतिकरणो विवक्षार्थः। तेन मासार्धमासयोरेव संवत्सरपर्वणोः प्रत्ययः। अस्येत्यवयवसम्बन्ध इह षष्ठी। पौषी पौर्णमासी अस्य मासस्य पौषो मासः। पौषोऽर्धमासः। माघो मासः। माघोऽर्धमासः। इह न भवति—पौषी पौर्णमासी—अस्य पञ्चरात्रस्य दशरात्रस्य भूतकमासस्य वा पौर्णमासीति—पूर्णो मासः मासो वाऽस्यां तिथौ। पूर्णमासा वा युक्ता तिथिरित्यत एव निपातनादण्। पूर्णमास इति वामा इति चन्द्रः।

आग्रहायण्यश्वत्थाट्ठक् ॥२।४।२०४॥ आग्रहायणी इत्येतस्मात् अश्वत्थ[10] इत्येतस्माच्च शब्दात्सेति प्रथमान्तादस्येति षष्ठ्यर्थे ठण्प्रत्ययो भवति। यत्तत्प्रथमान्तं पौर्णमासी चेत्सा भवति नाम्नि, प्रत्ययान्तं चेन्नाम भवति। आग्रहायणी पौर्णमासी अस्य आग्रहायणिको मासोऽर्धमासो वा। अश्वत्था पौर्णमासी अस्य आश्वत्थिको मासोऽर्धमासो वा। आग्रहायणी। मार्गशीर्षी। अश्वत्था। आश्वयुजी।

चैत्रीकार्तिकीफाल्गुनीश्रवणाद्वा ॥२।४।२०५॥ चैत्री कार्तिकी फाल्गुनी श्रवणा इत्येतेभ्यष्टण्-प्रत्ययो भवति वा साऽस्य पौर्णमासीति नाम्नीत्यस्मिन्विषये। चैत्री पौर्णमासी अस्य चैत्रिकः चैत्रो वा मासोऽर्धमासो वा। एवं कार्तिकिकः, कार्तिकः। फाल्गुनिकः, फाल्गुनः। श्रावणिकः, श्रावणः।

देवता ॥२।४।२०६॥ साऽस्येति वर्तते। सेति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति, यत्तत्प्रथमान्तं देवता चेत्सा भवति। अर्हन् देवताऽस्येति—आर्हतो जैनः, आग्नेयो ब्राह्मणः, ऐन्द्रं हविः, ऐन्द्रो मन्त्रः। बार्हस्पत्यश्चरुः।

पैङ्गाक्षिपुत्रादिशुक्राच्छघम् ॥२।४।२०७॥ पैङ्गाक्षिपुत्र इत्येवमादिभ्यः शुक्रशब्दाच्च यथासंख्यं छ घ इत्येतौ प्रत्ययौ भवतः साऽस्य देवतेत्यस्मिन् विषये। पैङ्गाक्षिपुत्रीयम्। तार्णबिन्दवीयम्। शुक्रात्—शुक्रीयं हविः। पैङ्गाक्षिपुत्रादयः प्रयोगगम्याः।

शतरुद्रापोनपादपान्नपातस्तृचातः ॥२।४।२०८॥ शतरुद्र, अपोनपात्, अपान्नपाद्, इत्येतेभ्यश्छ घ इत्येतौ प्रत्ययौ भवतः साऽस्य देवतेत्यस्मिन्विषये प्रत्ययसन्नियोगे चापोनपादन्नपातोरात् इत्येतस्य रूपस्य तृ इत्ययमादेशो भवति। शतरुद्रीयम्। शतरुद्रियम्। अपोन्नप्त्रीयम्। अपोन्नप्त्रियम्। अपान्नप्त्रीयम्, अपान्नप्त्रियम्।

महेन्द्राद् वा ॥२।४।२०९॥ महेन्द्रशब्दाच्छ घ इत्येतौ प्रत्ययौ वा भवतः साऽस्य देवतेत्यस्मिन्विषये, ताभ्यां मुक्तेऽण् भवति। महेन्द्रीयं, माहेन्द्रियं, माहेन्द्र हविः।

द्यावापृथिवीशुनासीराग्नीषोममरुत्वद्वास्तोष्पतिगृहमेधाच्छ्यौ ॥२।४।२१०॥ द्यावापृथिवी शुनासीर अग्नीषोम मरुत्वत् वास्तोष्पति गृहमेध इत्येतेभ्यश्छ य इत्येतौ प्रत्ययौ भवतः साऽस्य देवतेत्यस्मिन्विषये। द्यावापृथिव्यौ देवताऽस्य द्यावापृथिवीयम्, द्यावापृथिव्यम्। शुना वायुः, सीर आदित्यः,

---

१. निवात क० म०। २. परिगूढ। उपगूढ। उत्तराश्मन्। स्थूल— क० म०। ३. -दिर। आडु। अनडुह। परिवंश। खण्डु। वीरण। इति ऋश्यादिः। वराहादेः कण्। वाराहकम्। पाकाशकम्। वराह। पलाश विनद्ध। निनद्ध। स्थूलबाहु। खदिर। विदग्ध—क० म०। ४. कण्डक क० म०। ५. विकङ्कत क०। ६. पूस क० म०। ७. इति नाम्नी—क० म०। ८. चेत्सा क० म०। ९. इत्यभिति क० म०। १०. अश्वत्था क० म०।

ती देवताऽस्य शुनासीरीयम्। शुनासीर्यम्। अग्नीषोमौ देवताऽस्य अग्नीषोमीयम्। अग्नीषोम्यम्। मरुत्वान् देवताऽस्य मरुत्वतीयम्। मरुत्वत्यम्। वास्तोष्पतिर्देवताऽस्य वास्तोष्पतीयम्, वास्तोष्पत्यम्। वास्तोष्पतिरेव निपातनात् षष्ठ्या अलुक् पर्त्व च। गृहमेधो देवताऽस्य गृहमेधीयम्। गृहमेध्यम्।

वायूषःपितृतोर्यः ॥२।४।२११॥ वायु उषस् पितृ ऋतु इत्येतेभ्यो यः प्रत्ययो भवति साऽस्य देवतेत्यस्मिन् विषये। वायव्यम्[2]। उषस्यम्। पित्र्यम्। ऋतव्यम्।

कसोमाट्ट्यण् ॥२।४।२१२॥ कशब्दात् सोमशब्दाच्च साऽस्य देवतेत्यस्मिन्विषये टयण्प्रत्ययो भवति। टकारो ङ्यर्थः। को देवताऽस्येति कायं हविः। कायी इष्टिः। सौम्यम्। सौमी। एरिति लोपात्परत्वादकारः। कशब्दः प्रजापतेर्वाचकः।

महाराजप्रोष्ठपदाट्ठञ् ॥२।४।२१३॥ महाराज प्रोष्ठपद इत्येताभ्यां ठण् प्रत्ययो भवति[3] साऽस्य देवतेत्यस्मिन् विषये। महाराजो देवताऽस्य माहाराजिकम्। प्रोष्ठपदो देवताऽस्य प्रौष्ठपदिकम्।

कालाट्ठञवत् ॥२।४।२१४॥ कालविशेषवाचिभ्यः [4]पदेभ्यो भवेऽर्थे प्रत्यया भवन्ति [5]तदा साऽस्य देवतेत्यस्मिन्नपि विषये भवन्ति। वतिः सर्वसादृश्यार्थः, तेन याभ्यः प्रकृतिभ्यो येन विशेषेण ये प्रत्यया भवेऽर्थे भवन्ति ताभ्य एव प्रकृतिभ्यस्तेनैव विशेषेण त एव प्रत्यया इह भवन्ति। मासो देवताऽस्य मासिकम्। अर्द्धमासिकम्। सांवत्सरिकम्। वासन्तम्। प्रावृषेण्यम्।

आदेरिछन्दसः प्रगाथे ॥२।४।२१५॥ साऽस्येति प्रकृतिः, प्रत्ययार्थश्चानुवर्तते, तस्य विशेषणमेतत्। सेति प्रथमान्तादादिभूताच्छन्दसोऽस्येति षष्ठ्यर्थे प्रगाथेऽभिधेये यथाविहितं प्रत्ययो भवति। यत्र द्वे ऋचौ प्रगथ्येते न तिस्रः क्रियन्ते स मन्त्रः प्रगाथः। पङ्क्तिरादिरस्य प्रगाथस्य स पाङ्क्तः प्रगाथः। आनुष्टुभ[6]। आदेरिति किम्? अनुष्टब्मध्यमस्य प्रगाथस्य। छन्दस इति किम्? पदे[7] मा भूत्। [8]प्रगाथ इति किम्? पङ्क्तिरादिरस्यानुवाकस्य।

युद्धेऽर्थयोद्भृभ्यः ॥२।४।२१६॥ साऽस्येति प्रकृतिः प्रत्ययार्थश्चानुवर्तत एव। तस्येदं विशेषणं सेति प्रथमान्तादर्थवाचिनः योद्भृवाचिनश्चास्येति षष्ठ्यर्थे युद्धेऽभिधेये यथाविहितं प्रत्ययो भवति। अर्थः प्रयोजनं [9]प्रवृत्तिसाध्यं फलम्, ततः सुभद्रार्थः प्रयोजनमस्य सौभद्रं युद्धम्। सौतारं युद्धम्। अत्र सुभद्रादिशब्दस्तत्प्राप्तौ वर्तत इति प्रयोजनम्। योद्भृभ्यः—विद्याधरा मोद्धारोऽस्य [10]युद्धस्येति वैद्याधरं युद्धम्[11]। युद्ध इति किम्? सुभद्रा प्रयोजनमस्य दानस्य। [12]अर्थयोद्भृभ्य इति किम्? सुभद्राऽपेक्षिकाऽस्य युद्धस्य।

भावषष्ठोऽस्यां णः ॥२।४।२१७॥ भावे यो षष्ठ् तदन्तात् प्रथमान्तादस्यामिति सप्तम्यर्थे स्त्रीलिङ्गे णप्रत्ययो भवति। दण्डाघातोऽस्यां तिथौ दाण्डाघाता तिथिः। मुसलघातोऽस्यां भूमौ मौसलघाता भूमिः। भावग्रहणं किम्? प्राकारोऽस्याम्। प्रासादोऽस्याम्। षष्ठ इति किम्? दण्डपातनमस्याम्। मुसलपातनमस्याम्। स्त्रीलिङ्गग्रहणादिह न भवति। [13]दण्डघातोऽस्मिन् दिवसे। मुसलपातोऽस्मिन् दिवसे।

श्येनम्पातातैलम्पाते ॥२।४।२१८॥ श्येनम्पाता तैलम्पाता इति श्येनशब्दस्य तिलशब्दस्य च णप्रत्ययपरे [14]पातशब्दे परतो ममागमो निपात्यते। [15]प्रत्युपस्तु पूर्वेणैव सिद्धः। श्येनपातोऽस्यां वर्तते श्येनम्पाता। तिलपातोऽस्यां वर्तते तैलम्पाता।

प्रहरणात् क्रीडायां णः ॥२।४।२१९॥ प्रक्रियते येन तत् प्रहरणम्, तद्वाचिनः प्रथमान्तादस्यामिति सप्तम्यर्थे क्रीडायां णप्रत्ययो भवति। [16]दण्डः प्रहरणमस्यां क्रीडायां दाण्डा। [17]प्रोष्ठा। पादा क्रीडा। प्रहरणादिति

---

१. -स्ति एव क० म०। २. वायव्यम् क० म०। ३. साऽस्य म०। ४. -च्यः यथा भवे—म०। ५. तथा म०। ६. -मः। आनुष्टुभः। भा—म०। ७. पद्यामा म०। ८. प्रागाथ म०। ९. -स्तिः सा—म०। १०. -स्य वैद्या—म०। ११. -द्धम्। भारतं युद्धम्। म०। १२. अर्थं योद्भृभ्य म०। १३. दण्डपातो—म०। १४. पात म०। १५. प्रत्यवस्तु म०। १६. दण्डप्रह—म०। १७. प्रोष्ठा म०।

किम् ? माला भूषणमस्यां क्रीडायाम् । क्रीडायामिति किम् ? खड्गः प्रहरणमस्यां सेनायाम् । भावकर्मोऽस्यां च वृत्तौ यः । क्रीडायामित्यधिकारान्तरे समूहादिष्विवाचनन्तरो नानुवर्तते । यथाविहितमित्येव विज्ञायत इतीह नावश्यम् ।

द्वौ रागाङ्गे ॥२।४।२२०॥ रज्यते येन स [२]रागः कुसुम्भादिः, शुक्लस्य [३]रूपान्तरोपादानमिह [४]रञ्जर्थः । ट इति तृतीयान्ताद्रागवाचिनो [५] रक्तमित्येतस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । कुसुम्भेन रक्तं कौसुम्भं वस्त्रम् । कौङ्कुमम् । काषायम् । माञ्जिष्ठम् । हारिद्रम् । माहाराजतम् । रागादिति किम् ? देवदत्तेन रक्तम् । पाणिना रक्तम् । रागशब्देन प्रसिद्धा एव कुसुम्भादयो रागाः गृह्यन्ते इतीह च न भवति । कृष्णेन रक्तम् । पीतेन रक्तम् । एते हि वर्णा द्रव्यवृत्तयो न रागाख्या । काषायौ गर्दभस्य कर्णौ । हारिद्रौ कुक्कुटस्य पादाविति सादृश्याद्भवति ।

लाक्षारोचनाट्टण् ॥२।४।२२१॥ लाक्षा रोचना इत्येताभ्यां तृतीयान्ताभ्यां रक्तेऽर्थे ठण्प्रत्ययो भवति । लाक्षया रक्तं लाक्षिकम् । रौचनिकं वस्त्रम् ।

शकलकर्दमाड्ढा ॥२।४।२२२॥ शकल कर्दम इत्येताभ्यां तृतीयान्ताभ्यां रागवाचिभ्यां रक्तेऽर्थे ठण्प्रत्ययो भवति वा । शकलेन रक्तं शाकलिकम् । (शाकलम्) । कार्दमिकम् । कार्दमम् ।

नीलपीतकम् ॥२।४।२२३॥ नील पीतक इत्येतौ द्वौ शब्दौ रक्तेऽर्थे निपात्येते । नील्या रक्तं नीलं वस्त्रम् । पीतेन पीतकम् । पीतकेन वा पीतकम् । [६]नीलशब्दात् पीतकशब्दाच्चाकारप्रत्ययः । पीतशब्दात्कोऽणि वृत्त्यर्थं निपात्यते । पीतं पीतकमिति च कुसुम्भस्य प्रथमनिर्यास उच्यते ।

गुरूदयाद्भाद्युक्तेऽब्दे ॥२।४।२२४॥ ट इति वर्तते । गुरुर्बृहस्पतिरुदितो यस्मिन् भे नक्षत्रे तारकाविशेषे तद्वाचिनः ट इति तृतीयान्ताद् युक्तेऽर्थे यथाविहितं प्रत्ययो भवति [७] । पुष्येण बृहस्पत्युदयेन युक्तं पौषं वर्षम् । पौषः संवत्सरः । फाल्गुनं वर्षम् । फाल्गुनः संवत्सरः । गुरूदयादिति किम् ? शनैश्चरोदयेन पुष्येण युक्तं वर्षम् । अत्र न भवति । भादिति किम् ? बृहस्पत्युदयेन पूर्वरात्रेण युक्तं वर्षम् । अब्द इति किम् ? मासे दिवसे च न भवति ।

चन्द्रोपेतात्काले ॥२।४।२२५॥ ट इत्यनुवर्तते । चन्द्रेण यदुपेतं नक्षत्रं तद्वाचिनष्ट इति तृतीयान्ताद् युक्तेऽर्थे यथाविहितं प्रत्ययो भवति स चेद्युक्तोऽर्थः [८] कालो भवति । पुष्येण चन्द्रोपेतेन युक्तमहः पौषमहः । पौषी रात्रिः । पौषोऽहोरात्रः [९] । पौषः कालः । माघमहः । माघी रात्री । माघोऽहोरात्रः । माघः कालः । चन्द्रोपेतादिति किम् ? शुक्रोपेतेन पुष्येण युक्तः कालः । काल इति किम् ? चन्द्रोपेतेन पुष्येण युक्तो ग्रहः ।

श्लुगप्रयुक्ते ॥२।४।२२६॥ चन्द्रोपेतात् काल इति योऽण् प्रत्ययो विहितस्तस्य श्लुग् भवत्यप्रयुक्ते न चेत्तस्य कालस्य वाचकः कालशब्दोऽन्यः प्रयुज्येत । पुष्येण [१०]पायसमश्नीयात् । मघासु [११]पललोदनम् । अद्य पुष्यः । अद्य कृत्तिकाः । दिवा कृत्तिकाः । रात्रौ रोहिण्यः । अप्रयुक्त इति किम् ? पौषमहः । पौषी रात्रिः । पौषोऽहोरात्रः । पौषः कालः ।

द्वन्द्वाच्छः ॥२।४।२२७॥ चन्द्रोपेतं यद्भं नक्षत्रं तद् द्वन्द्वाट्ट इति तृतीयान्ताद् युक्ते काले छप्रत्ययो भवति । राधाऽनुराधाभिर्युक्तमहः राधानुराधीयमहः । अद्य राधानुराधीयम् । तिष्यपुनर्वसुभ्यां युक्तं तिष्य-

---

१. -त्विवान—म० । २. "रागोऽनुरागे मात्सर्ये गानाङ्गे रोचनादिषु" । म० टि० । ३. वर्णान्तरोपा—म० । ४. रञ्ज्यर्थः म० । ५. -द्रागविशेषवाचि—म० । ६. नीलीशब्दात् म० । ७. -ति । योऽसौ युक्तोऽर्थः स चेदब्दो वर्षं संवत्सरः स्यात् पुष्ये—म० । ८. -युक्तेऽर्थः म० । ९. भेन्यमहहृदयस्नुषाहोरात्रेत्यादिना निपातः । म० टि० । १०. क्षीरेयं पायसं प्रोक्तं परमान्नं च पायसम् इत्यभिधानात् । क० म० टि० । ११. पललं तिलचूर्णके क० म० टि० ।

पुनर्भवीयम् अह्नः । अद्य तिष्यपुनर्भवीयम् । घलुगप्रयुक्त इति घलुक् । चन्द्रोपेतात् काल इत्यौत्सर्गिकस्यैव च न अस्य तथा वासौ [1]तदनन्तरं क्रियते । अन्यथा हि छात्परात् क्रियेत [2] ।

श्रवणाश्वत्थाद्यान्नः [3] ॥२।४।२२८॥ चन्द्रोपेतनक्षत्रवाचिनः श्रवणशब्दादश्वत्थशब्दाच्च ट इति तृतीयान्ताद् युक्ते कालेऽकारप्रत्ययो णोऽपवादो भवति नाम्नि । प्रत्ययान्तं चेत्कस्यचित् कालविशेषस्य नाम भवति । श्रवणा रात्रिः । श्रवणा पौर्णमासी । श्रवणो मुहूर्तः । अश्वत्था रात्रिः । अश्वत्था पौर्णमासी । अश्वत्थो मुहूर्तः । सत्यपि योगे कालमात्रे वृत्त्यभावान्नामत्वम् । नाम्नीति किम् ? श्रावणमहः । श्रावणी रात्रिः । आश्वत्थमहः । आश्वत्थी रात्रिः ।

दृष्टे साम्नि ॥२।४।२२९॥ ट इति नाम्नीति [4] च वर्तते । दृष्ट [5]इत्यप्रत्ययार्थे । साम्नीति [6]विशेषणम् । ट इति तृतीयान्ताद् दृष्टे साम्नि यथाविहितं प्रत्ययो भवति । [7]साम्नि प्रत्ययान्तं चेत्साम्नो [8] नाम भवेत् । क्रुञ्चेन [9] दृष्टं क्रौञ्चं साम । मायूरम् । तैत्तिरम् । वासिष्ठम् । वैश्वामित्रम् । भार्गवीयम् । कालेयम् । आग्नेयम् । एवं नामानि सामानि ।

गोत्रादङ्कवत् ॥२।४।२३०॥ गोत्रवाचिनष्ट इति तृतीयान्ताद् दृष्टे साम्नि अङ्कवत् प्रत्ययो भवति । यथा तस्यायमङ्क इत्यत्र स्वे प्रत्ययो भवति । तथाऽत्रापीत्यर्थः । औपगवेन दृष्टे औपगवकं साम । कापटवकम् । वाहनवकम् ।

वामदेव्यम् ॥२।४।२३१॥ वामदेव्यमिति वामदेवशब्दात्तृतीयान्ताद् दृष्टे साम्नि यप्रत्ययो निपात्यते । वामदेवेन दृष्टं वामदेव्यं साम ।

जाते चाण् द्विर्डिद्वा ॥२।४।२३२॥ दृष्टे साम्नि तत्र जात इत्यस्मिन्नर्थे योऽण्प्रत्ययो द्विरुत्सर्गतः प्राप्तोऽपवादेन बाधितः पुनर्विधीयते स डिद्वा भवति । उशनसा दृष्टं साम औशनम् । औशनसम् । शतभिषजि जातः शातभिषः । [10]शातभिषजः । द्विरिति किम् ? हिमवति जातः हैमवतः । जातेऽण् [11] विशेषणम् । न दृष्टे साम्न्यणोऽसम्भवात् ।

छन्ने रथे ॥२।४।२३३॥ ट इति वर्तते । छन्न इति प्रत्ययान्तो [12] रथ इति तद्विशेषणम् । ट इति तृतीयान्तात् छन्ने रथे यथाविहितं प्रत्ययो भवति । वस्त्रेण छन्नो [13] वास्त्रो रथः । काम्बलः । चार्मणः । द्वैपेन चर्मणा द्वैपः । वैयाघ्रः । रथ इति किम् ? वस्त्रेण छन्नः कायः । छन्नं समन्ताद्वेष्टितं व्याप्तम् । तेनेह न भवति—पुत्रैः परिवृतो रथः ।

पाण्डुकम्बली ॥२।४।२३४॥ पाण्डुकम्बलीति पाण्डुकम्बलशब्दात्तृतीयान्ताच्छन्ने रथे इन् प्रत्ययो-ऽणोऽपवादो निपात्यते । पाण्डुकम्बलेन छन्नः पाण्डुकम्बली रथः ।

तत्रोद्धृतममत्रेभ्यः ॥२।४।२३५॥ तत्रेति सप्तम्यन्तादमत्रवाचिन उद्धृतमित्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । शरावेषूद्धृतः शरावः ओदनः । माल्लकः । [14]कार्परः । अमत्रेभ्य इति किम् ? पाण्यादुद्धृत ओदनः । बहुवचनं विशेषार्थम् ।

स्थण्डिले शेते व्रती ॥२।४।२३६॥ स्थण्डिलशब्दात् सप्तम्यन्ताच्छेत इत्यस्मिन्नर्थे यथाविहितं प्रत्ययो भवति । योऽसौ शेते स चेद् व्रती तत्र शप् [15] न भवत्यन्यत्र शयनान्निवृत्त इत्यर्थः । स्थण्डिल एव शेते स्थाण्डिलो भिक्षुः । व्रतीति किम् ? स्थण्डिले शेते बालः ।

---

१. तदन्तरं क० म० । २. क्रियेत क० म० । ३. -स्थाश्वाभ्यः क० म० । ४. -ग्नीति च व—क० म० । ५. इति प्रत्ययार्थः क० म० । ६. तद्विशेषणम् क० म० । ७. वाग्नि क० म० । ८. वेदविशेषस्य क० म० टि० । ९. क्रुञ्चिणा क० म० टि० । १०. शातभिषः क० म० । ११. -तेऽणेव वि—क० म० । १२. प्रत्ययार्थो क० म० । १३. -त्रो रथः वा—क० म० । १४. माल्लकः कार्परः क० । कर्परः स्यात्कपारे च शस्त्रभेदकदाहयोः । खर्परस्तत्करे भूर्ते भिक्षापात्रकपाकयोः । क० म० टि० । १५. शयनप्रतो क० म० ।

संस्कृते भक्षे ॥२।४।२३७॥ तत्रेति वर्तते। संस्कृत इति प्रत्ययार्थः। तस्य विशेषणं भक्ष इति। तत्रेति सप्तम्यन्तात्संस्कृते भक्षे यथाविहितं प्रत्ययो भवति। [1]सत उत्कर्षाधानं संस्कारः। [2]आढ्रे संस्कृता आढ्राः; अपूपाः। कैलासाः[3]। [4]पात्राः। भक्ष इति किम्? पुष्पफलके संस्कृतो मालागुणः।

शूल्योख्यक्षरेयदाधिकौदश्वित्कौदश्वितम् ॥२।४।२३८॥ शूल्यादयः शब्दा निपात्यन्ते तत्र संस्कृते भक्षे। शूल्योख्येति शूलोखाभ्यां यो निपात्यते। शूले संस्कृतं शूल्यं मांसम्। उखायां संस्कृतम् उख्यम्। उखा स्थाली। क्षैरेयम्, क्षीराद्ढण्। क्षीरे संस्कृतं क्षैरेयम्। क्षैरेयी यवागूः। दाधिकेति दध्नष्ठण्। दध्नि संस्कृतं दाधिकम्। औदश्वित्कौदश्वितेति उदश्वितष्ठण् वा। उदश्विति संस्कृतम् औदश्वित्कम्। औदश्वितम्।

क्वचित् ॥२।४।२३९॥ अपत्यादिभ्योऽन्यत्राप्यर्थे क्वचिद् यथाविहितं प्रत्ययो भवति। चक्षुषा गृह्यत इति चाक्षुषं रूपम्। श्रावणः शब्दः। दार्शनं स्पार्शनं च द्रव्यम्। रासनो रसः। दृषदि [5]पृष्टा दार्षदाः [6]सक्तवः। उलूखले क्षुण्णो यावकः[7]। औलूखलो यावकः। अश्वैरुह्यते आश्वो रथः। चतुर्भिरुह्यते चातुरं शकटम्। चतुर्दश्यां दृश्यते रक्षः चातुर्दशं रक्षः।

इति श्रुतकेवलिदेशीयाचार्यशाकटायनस्य कृतौ शब्दानुशासने वृत्तौ द्वितीयस्याध्यायस्य चतुर्थः पादः समाप्तोऽध्यायश्च द्वितीयः ॥२।४॥

■

तृतीयोऽध्यायः

[प्रथमः पादः]

नद्यादिराष्ट्रदूरोत्तराद्ढण्ढैत्याहञ् ॥३।१।१॥ प्राग्जितादिति वर्तते। प्राग्जिताद्यर्था वक्ष्यन्ते। तेषु नद्यादिभ्यः राष्ट्र दूर उत्तर इत्येतेभ्यश्च यथासंख्यं ढण् च एत्य आहञ् इत्येते प्रत्यया भवन्ति। अणाद्यपवादाः। नद्यादेर्ढण्। नद्यां जातो भवो वा नादेयः। माहेयः। राष्ट्राद्यः। राष्ट्रियः। दूरादेत्यः। दूरेत्यः। उत्तराद्याहञ्। औत्तराहः। औत्तराहा स्त्री। औत्तराही[8]त्यौत्तराहेत्यणि प्रकरणभेदेन वक्ष्यमाणेष्वर्थेषु विधानाद् गतेष्वणाद्यय एव भवन्ति। नदीनां समूहो नादिकम्। राष्ट्रस्यापत्यं राष्ट्रिः। नदी, मही, वाराणसी, श्रावस्ति, कोशाम्बी, वनकोशम्बी, वनवासी, काश्यपी[9]ठी, खादिरी, पूर्वनगरा[10], पावा, मावा, माल्वा, दार्वा, [11]सनकी इति नद्यादिः।

पारावारारपारेभ्यः खः ॥३।१।२॥ पार अवार पारावर अवारपार इत्येतेभ्यः प्राग्जितीये वक्ष्यमाणे कृताद्यर्थे खप्रत्ययो भवति। पारीणः। प्रावारीण. (अवारीणः)। पारावारीणः। अवारपारीणः। पारावाराच्च पारावाराच्चेत्येकशेषात् संघातस्य विगृहीतयोश्च ग्रहणम्।

ग्रामाद्यखञ् ॥३।१।३॥ ग्रामशब्दाच्च खञ् इत्येतौ प्रत्ययौ भवतः प्राग्जितीये वक्ष्यमाणे कृताद्यर्थे। ग्राम्यः। ग्रामीणः[12]। [13]ग्रामीणा भार्यः। अकारो नाजारैच् तद्धित इति पुम्भावप्रतिषेधार्थः।

---

१. सतो गुणस्य गुणान्तराधानं संस्कारः क० म० टि०। २. कुर्वेडम्बरीषं आढ्रो ना इति नामलिङ्गानुशासनम्। क० म० टि०। ३. साग्निचूर्णागतस्थूलकिलासधृतमध्यगात्। उष्णासूञ्छान् समादाय भक्षयिष्यति बालकः। इत्युत्तरपुराणे। क० म० टि०। ४. पत्रेषु पर्णेषु संस्कृताः क० म० टि०। ५. -कौदश्वित्कौदश्वितम् क० म० टि०। ६. -दश्विकौदश्वितेति उदश्वित''''उदश्वि''''श्वि''''श्वि क० म०। ७. पिष्टाः क० म०। ८. चक्षुष्या विम्बिका भूक्ति पुंस्किञ्जेऽपि च सक्तवः क० म० टि०। ९. यावके वलकुलमाषौ यावके तोयपर्णिका ॥ इति वैज० क० म० टि०। १०. -हीत्युत्तराहे भवेत्यणि प्रक—क० म०। ११. काशपडी क०। काशपरी म०। १२. पूर्वनगर म०। १३. सेनकी क० म०। १४. ग्रामीणस्तु ग्रामभवे ग्राम्यग्रामेयकावपि इत्यभिधानम् क० म० टि०। १५. ओषिलो निष्कमालाभिर्वलयैश्च परिष्कृताः। पश्यन्त्योऽस्य मनो जहुर्ग्रामीणाः संश्रिताकृतीः (ति) क० म० टि०।

कन्थादेश्च ढकञ् ॥३।१।४॥ कन्थि इत्येवमादिभ्यो ग्रामशब्दाच्च प्राग्जितीये कृताद्यर्थे ढकञ् प्रत्ययो भवति । कान्थेयकः । पौष्करेयकः । ग्रामात् ग्रामेयकः । एवं (च) ग्रामशब्दस्य भैरूप्यं भवति । कन्थि, पुष्कर, पुष्कल, डम्बि, कुण्डिना, नगर, महिष्मती, वर्मती इति कन्थादिः । नगरशब्दो महिष्मत्यादिसाहचर्यात् संज्ञा ढकञमुत्पादयति । अन्योऽणमेव ।

कुण्डघायाः यलुक् च ॥३।१।५॥ कुण्डघाशब्दात् कृताद्यर्थे ढकञ् प्रत्ययो भवति यकारस्य च लुग्भवति । कुण्डघायां भवः कौण्डेयकः । कौण्डेयक इति निपातनात्सिद्धे[2] लक्षणवचनादन्येषामपि ढकञ् यलुक् च विज्ञायते । तेन कुण्डघा[3] कौण्डेयकः । कुण्या कौणेयकः । [4]उन्य—औनेयकः । भण्डघा—भाण्डेयकः । ग्रामकुण्डघा—ग्रामकौण्डेयकः । तृण्या—तार्णेयकः । वन्या—वानेयकः । वल्या—वालेयकः । बुल्या[5]—बौलेयकः । मुल्या—मौलेयक इति ।

कुलकुक्षिग्रीवाच्छ्वास्यलङ्कारे ॥३।१।६॥ कुल कुक्षि ग्रीवा इत्येतेभ्यो यथासंख्यं श्वास्यलङ्कारविशिष्टे प्राग्जितीये कृताद्यर्थे ढकञ्प्रत्ययो भवति । अणोऽपवादः । कुले शुद्धान्वये जातो भवो वा कौलेयकः श्वा । कौलोऽन्यः । कुक्षि—कौक्षेयकोऽसिः । यः [6]कुंकु कुक्षि निर्जीर्णेनायसा कृतः । कौक्षोऽन्यः । ग्रीवा—[7]ग्रैवेयकोऽलङ्कारः । ग्रैवोऽन्यः ।

दक्षिणापश्चात्पुरसस्त्यण् ॥३।१।७॥ दक्षिणा पश्चात् पुरस् इत्येतेभ्यः प्राग्जितीये कृताद्यर्थे त्यण्प्रत्ययो भवति । दाक्षिणात्यः । पाश्चात्यः । पौरस्त्यः । पश्चात्पुरस्शब्दसाहचर्याद् दक्षिणा इति दिग्यर्थं[8] वा गृह्यते । तेनेह न भवति—दाक्षिणापि[9] जुहोति । अत्र दक्षिणाशब्दो गवादिवचनः ।

केहामातस्त्रात्यच् ॥३।१।८॥ [10]क्वादिभ्यस्तत्प्रत्ययान्तेभ्यश्च [11]प्राग्जितीयेऽर्थे त्यच् भवति । क्वत्यः । इहत्यः । अमात्यः । ततस्त्यः । यतस्त्यः । तत्रत्यः । यत्रत्यः । क्वेहेति विस्पष्टार्थः । चकारः त्यापदाक्षत इति त्यण्-त्यचोः सामान्यग्रहणार्थः । नित्यमिति नित्यं प्रतिनाऽल्प इति निपातनात्सिद्धम् ।

निस्तो गते ॥३।१।९॥ निस् इत्येतस्माद्गतेऽर्थे त्यच्प्रत्ययो भवति । निर्गतो निष्टयः । निर्गतो वर्णाश्रमादिभ्य इति निष्टयदचण्डालादिः ।

वैषमोह्यश्वस्तः ॥३।१।१०॥ ऐषमस् ह्यस् श्वस् इत्येतेभ्यः प्राग्जितीये कृताद्यर्थे त्यच्प्रत्ययो वा भवति । ऐषमस्त्यम् । ऐषमस्तनम् । ह्यस्त्यम् । ह्यस्तनम् । श्वस्त्यम् । श्वस्तनम् । शौवस्तिकम् ।

यूदक्प्रागवाक्[12] प्रतीचो यः॥३।१।११॥ दिव् उदच् प्राच्[13] अवाच् प्रत्यच् इत्येतेभ्यः प्राग्जितीये कृताद्यर्थे यप्रत्ययो भवति । दिव्यम् । उदीच्यम् । प्राच्यम् । [14]अवाच्यम् । प्रतीच्यम् । कालवाचिनस्त्वव्ययात्परस्त्वातनद् भवति । प्राक्तनः[15] ।

कन्थायाष्ठण् ॥३।१।१२॥ कन्थाशब्दात् प्राग्जितीये कृताद्यर्थे ठण्प्रत्ययो भवति । कान्थिकः ।

वर्णो वुञ् ॥३।१।१३॥ नदसमीपदेशो वर्णुस्तद्विषयार्थवाचिनः कन्थाशब्दात्प्राग्जितीये कृताद्यर्थे वुञ्प्रत्ययो भवति । ठणोऽपवादः । कान्थकः ।

बल्ह्यादिपर्दिकापिश्यात् ष्फट् ॥३।१।१४॥ बल्ही उदि पर्दि [16]कापिश्य इत्येतेभ्यः प्राग्जितीये कृताद्यर्थे ष्फट्प्रत्ययो भवति । [17]बाल्हायनः । बाल्हायनी । औदायनः । औदायनी । [18]पार्दायनी । [19]कापिश्यायनः । कापिश्यायनी द्राक्षा ।

---

१. कुण्ड्यां भवः कौण्डीयकः क० म० । २. दक्षाध्ये क० म० । ३. कुण्ड्या कौण्डेयकः क० म० । ४. उन्या औन्नेयकः क० म० । ५. बुल्या बौलेयकः क० म० । ६. कङ्कु—क० म० । ७. –ग्रीवाऽलङ्करणं सर्वं ग्रैवेयकमिति स्मृतम् इति वैज०—क० म० टि० । ८. दिगध्वर्थं क० म० । ९. दाक्षिणात्यि क० म० । १०. कहह अमा इत्येतेभ्यस्तत्प्रत्ययान्तेभ्यश्चप्रत्ययान्तेभ्यश्च प्राग्जि—क० म० । ११. ये कृताद्यर्थे त्य –क० म० । १२. –गपाक् क० म० । १३. अपाच् क० म० । १४. अपाच्यम् क० म० । १५. प्राक्तनम् क० म० । १६. कापिशी क० मे० । १७. बाल्हायनः क० म० । १८. पार्दायनः पार्दायनी क० म० । १९. कापिशायनं मधु । कापिशायनी द्राक्षा क० म० । सुरा स्वादुरसा कश्चा मधूली कापिशायनम् इत्यभिधानम् । मद्यम् क० म० टि० ।

रङ्कोः प्राणिनि वा ॥३।१।१५॥ रङ्कु शब्दात् प्राग्जितीये कृताद्यर्थे प्राणिनि ष्फट्प्रत्ययो भवति वा। राङ्कवायणो गौः। राङ्कवो गौः। प्राणिनीति किम्? राङ्कवः कम्बलः। मनुष्ये कच्छादिपाठाद्वुञ् भवति। कच्छादिषु रङ्कोः पाठोऽप्राण्यर्थो वुञर्थश्च स्यादतः प्राणिनि ष्फञोः बाधकः स्यादिति वा ग्रहणम्।

रूप्योत्तरपदादरण्याण्णः ॥३।१।१६॥ रूप्योत्तरपदादरण्यशब्दाच्च प्राग्जितीये कृताद्यर्थे णप्रत्ययो भवति। वार्करूप्यः। वार्करूप्या। शैविरूप्यः। शैविरूप्या। आरण्याः पशवः। आरण्याः सुमनसः। मणिरूप्यक इति दीर्घोपान्त्यलक्षणो वुञ् भवति। रूप्यान्तग्रहणं बहुपूर्वनिवृत्त्यर्थम्।

दिगादेरनाम्नः ३।१।१७॥ दिगादेर्दिक्पूर्वपदादनाम्नः प्राग्जितीये कृताद्यर्थे णप्रत्ययो भवति। पौर्वशालः। पौर्वशाला। आपरशालः। आपरशाला। अनाम्न इति किम्? पूर्वेषुकामशमी। अपरेषुकामशमी। पूर्वकार्ष्णमृत्तिकी। अपरकार्ष्णमृत्तिकी।

मद्रादञ् ॥३।१।१८॥ मद्रशब्दादिक्पूर्वात्प्राग्जितीये कृताद्यर्थे अञ्प्रत्ययो भवति। पौर्वमद्रः। पौर्वमद्री। आपरमद्रः। आपरमद्री। अञ्विधानं को वुञ् वा मा भूदिति। इदमेव[2] लिङ्गम् सुपर्वार्द्धदिक्शब्देभ्यो जनपदस्येत्यस्य। तेन सुपाञ्चालकः। सुमागध[3]। सर्वपाञ्चालकः। सर्वमागधः[4]। अर्धपाञ्चालकः। अर्द्धमागध[5]। पूर्वपाञ्चालकः। पूर्वमागधः[6]। इत्यादि सिद्धम्।

उदग्ग्रामाद्यकुल्लोम्नः ॥३।१।१९॥ उदीच्यग्रामवाचिनः यकुल्लोमन्शब्दात् प्राग्जितीये कृताद्यर्थेऽञ् प्रत्ययो भवति। याकुल्लोमः। उदग्ग्रामादिति किम्? अन्यस्मादणेव। याकुल्लोमनः। यकुल्लोम इति किम्? प्रैक्षिणः।

गोष्ठीतैकीगोमतीशूरसेनवाह्रीकात् ॥३।१।२०॥ गोष्ठी तैकी गोमती शूरसेन वाह्रीक इत्येतेभ्यः प्राग्जितीये कृताद्यर्थे अञ्प्रत्ययो भवति। गौष्ठः। तैकः। गौमतः। शौरसेनः। वाह्रीकः। गोष्ठीतैकीभ्यां वाह्रीकग्रामलक्षणयोः ठणिठयोः कोपान्त्यलक्षणस्य च छस्य गोमतीशब्दादिलक्षणस्य कुञः[7] वाह्रीकशब्दाच्छस्यापवादोऽयम्।

शकलादेर्वृद्धात् ॥३।१।२१॥ शकलादेर्वृद्धे यो यञ्प्रत्ययो विहितः तदन्तात् प्राग्जितीये कृताद्यर्थे अञ्प्रत्ययो भवति। छापवादः। शकलादिर्गर्गाद्यन्तर्गणः। शकलस्यापत्यं वृद्धं शाकल्यः, तस्य छात्राः शाकलाः। काण्डाः। वामरथाः। गोकक्षाः। वृद्धादिति किम्? शकला देवता अस्य शाकलः, तस्येदं शाकलीयकम्[9]। उत्तरार्थं च वृद्धग्रहणम्।

इञः ॥३।१।२२॥ वृद्धे य इञ् विहितस्तदन्तात्प्राग्जितीये कृताद्यर्थेऽञ्प्रत्ययो भवति। छापवादः। दक्षस्यापत्यं वृद्धं दाक्षिः। तस्य छात्रा दाक्षाः। प्लाक्षा। माहकाः। पान्नागाराः। वृद्धादिति किम्? सुतङ्गमेन निर्वृत्तः सौतङ्गमिः, तत्र जातो भवो वा सौतङ्गमीयकः। औपगवस्यापत्यं युवा औपगविः। तस्य छात्रा औपगवीयाः। शालङ्कायूनश्छात्राः शालङ्का इत्यत्र पैलादिपाठेन फणि लुप्ते यद्यपि ञ्यन्तं यूनि वर्तते तथापि इञ्वृद्धे इत्यञ् भवति।

न द्व्यचः प्राग्भरतेषु ॥३।१।२३॥ यद द्व्यच्कमिञन्तं प्राच्यगोत्रे भरतगोत्रे च वृद्धे वर्तते तस्मादञ् प्रत्ययो न भवति। पूर्वेण प्राप्तः प्रतिषिध्यते। प्राक्षु–चैकीयाः[10]। पौष्णीयाः[11]। भरतेषु–कौपीयाः। वाशीयाः। द्व्यच इति किम्? पाग्नागारः। मान्थरफणाः। प्राग्भरतेष्विति किम्? दाक्षाः। प्लाक्षाः। प्राग्ग्रहणेन भरतग्रहणं नेति भरतग्रहणम्।

---

१. -प्यान्ताग्र- क० म०। २. इदमेवं क० म०। ३. सुमागधकः क० म०। ४. सर्वमागधकः क० म०। ५. अर्धमागधकः क० म०। ६. पूर्वमागधक. क० म०। ७. ञः शूरसेनाद्राष्ट्रवुञः वाह्री—क० म०। ८. लादिर्गर्गा—क० म०। ९. –शाकलीयम् क० म०। १०. चैक्षीयाः म०। चिक्षस्यापत्यमत इञ् म० टि०। ११. पौष्पीयाः क० म०।

भवतष्ठण्कुञौ ॥३।१।२४॥ भवत् इत्येतस्मात्प्राग्जितीये कृताद्यर्थे ठण् कुञ् इत्येतौ प्रत्ययौ भवतः। छापवादः। भवतो भवत्या वा इदं भावत्कम्। भावत्की। भवदीयम्। सकारः सिद्धवत्कीति पदस्यार्थः। लक्षण-प्रतिपदोक्तयोः प्रतिपदोक्तपरिभाषया सर्वविरन्यस्य भवतः[1]। भावतः।

अनपरराज्ञोऽकञ्ञः ॥३।१।२५॥ अन पर राजन् इत्येतेभ्यः प्राग्जितीये कृताद्यर्थेऽवञ्छप्रत्ययौ भवति। अनकीयम्। परकीयम्। राजकीयम्। अकारः पुम्भावार्थः[2]। राज्ञः इदं राजकीयम्। वञ्छे हि पुम्भावो न स्यात्। इह केचित् स्व-देव-ग्रहणमपीच्छन्ति। स्वकीयम्। देवकीयम्।

दोश्छः ॥३।१।२६॥ दुसंज्ञकात् प्राग्जितीये कृताद्यर्थे छप्रत्ययो भवति। देवदत्तीयः। जिनदत्तीयः। तदीयः। यदीयः। गार्गीयः। वात्सीयः। शालीयः। मालीयः। मौनदीयः। भोजकनदीयः[3]।

उष्णादिभ्यः कालात् ॥३।१।२७॥ उष्णादिभ्यः परो यः कालशब्दस्तदन्तात्प्राग्जितीये कृताद्यर्थे ञ-प्रत्ययो भवति। उष्णकालीयम्। शीतकालीयम्। उष्णादयः शिष्टप्रयोगगम्याः।

व्यादिभ्यष्ठण्णिठौ ॥३।१।२८॥ वि इत्येवमादिभ्यः परो यः कालशब्दस्तदन्ताट्ठण् णिठ् इत्येतौ प्रत्ययौ भवतः प्राग्जितीये कृताद्यर्थे। इकारः उच्चारणार्थः। ठकार एवोभयत्रापि[4] विदेशोऽनुबन्धः। तत्र स्त्रियां विशेषः। वैकालिकः। वैकालिकी। वैकालिका। आनुकालिकी। आनुकालिका। ऐदंकालिकी। ऐदंकालिका। धौमकालिकी। धौमकालिका। आपत्कालिकी। आपत्कालिका। कै (की) पकालिकी। कै-(की) पकालिका। क्रोधकालिकी। क्रोधकालिका। और्ध्वकालिकी[5]। और्ध्वकालिका। पौर्वकालिकी। पौर्वकालिका। व्यादयः प्रयोगगम्याः।

काश्यादिवाह्लीकग्रामात् ॥३।१।२९॥ दोरिति वर्तते। काशि एवमादिभ्यो वाह्लीकदेशग्रामवाचिभ्यश्च दुसंज्ञेभ्यः प्राग्जितीये कृताद्यर्थे ठण्णिठौ प्रत्ययौ भवतः। वचनभेदाद्[6] यथासंख्याभावः। काशिकः। काशिकी। काशिका। चैदिकः। चैदिकी[7]। चैदिका। वाह्लीकग्रामेभ्यः—कारन्तयिकः। कारन्तयिकी। कारन्तयिका। शाकलिकः। शाकलिकी। शाकलिका। मान्थनिकः[8]। मान्थनिकी। मान्थनिका। आरात्कः। आरात्की। आरात्का। कास्तिरिकः। कास्तिरिकी। कास्तिरिका। सैपुरिकः। सैपुरिकी। सैपुरिका। स्कौनगरिकः। स्कौनगरिकी। स्कौनगरिका। नायिका[9]। वास्तुकः। वातानप्रस्थकः। नान्दीपुरुकः[10]। कौकुटी वहकः। दाशरूप्यकः। इति परत्वाट्ठण्वुणौ[11]। सौसुकीय इत्यत्र छोऽपवादः। कथं मौञ्जीयम्? मौञ्जं नाम वाह्लीकावधिरन्यदीयो न वाह्लीकग्रामः। दश द्वादश वा ग्रामा विशिष्टसन्निवेशावस्थाना मौञ्जेनामन[12] (क) ग्रामः राष्ट्रं वेत्येके। दोरिति किम्? देवदत्तं[13] वाह्लीकग्रामः—तत्र जातः दैवदत्तः। देवदत्तशब्दस्य काश्यादिषु पाठः प्राग्देशार्थः। तत्र हि दुसंज्ञा भवति। ये तु काश्यादिष्वे[14] त एव तेषां पाठसामर्थ्याद्भवति काशिशब्दश्चेदिसाहचर्याच्च[15] न पदे वर्तमान इति[16] न इमौ प्रत्ययावुत्पादयति। अन्यत्र काशीयाश्छात्राः। एवं देवदत्तीयाः। नाम दुरिति व्यवस्थितविभाषा। ठण्णिठधोर्णास्तौकै[17] हिरण्यकर्णीति[18] केषाञ्चिदेतावती प्रकृतिः। हैरण्य-[19] करणिकी। हैरण्यकरणिकः। हैरण्यकरणिका। अपरे[20] हिरण्येति प्रकृतिः। करणीति[21] प्रत्ययार्थविशेषणम्। हैरण्यकः। हैरण्यकी[22]। हैरण्यका। परवादिकरणमुच्यते (?) काशि, चेदि[23], देवदत्त[24], सायति[25], सांवाह,

---

१. अजेव म० टि०। २. जातेश्च व्यादिति पुम्भावः म० टि०। ३. भोजकटीयः क० म०। ४. भवत्वापि विदे क० म०। ५. ऊर्ध्वकालिकी। ऊर्ध्वकालिका। क० म०। ६. यथासङ्ख्याभावः क० म०। ७. वैदिकः। वैदिकी। वैदिका। क० म०। ८. मान्दविकः। मान्दविकी। मान्दविका क० म०। ९. नायिता क० म०। १०. नान्दीपुरकः क० म०। ११. वुणौ क० म०। १२. मौञ्जं नाम नामौ ग्रामना ग्रामो राष्ट्रं क० म०। १३. -दत्तं नाम वाही—क० म०। १४. -दिष्वेव पु—क० म०। १५. चाञ्जिगपदे वर्त्त—क० म०। १६. इमा क० म०। १७. -धोर्णास्तीत्येके क० म०। १८. हिरण्यकर्णेति क० म०। १९. हैरण्यकरणी क० म०। २०. अपरेषाम् क० म०। २१. करण इति क० म०। २२. हैरण्यिकी। हैरण्यिका म०। २३. चेदि क० म०। २४. देवदत्त क० म०। २५. सायति क० म०।

अच्युत, सौदत्त, शव, कुलाल, हस्तिकर्णके[1] नाम, (?) हिरण्यकरण, अरिन्दम, सर्वमित्र[2], क्षिप्रमित्र, छागमित्र[3], छात्रमित्र, शाबावतान[4], गौवाशन, तारङ्गि, युवराज, उपराज, देवराज इति काश्यादिः।

शौण्डीनरग्रामात् ॥३।१।३०॥ उशीनरेषु जनपदेषु यो ग्रामो दुसंज्ञस्तस्मात्प्राग्जितीये कृताद्यर्थे ठण्ठिठौ प्रत्ययौ[5] भवतः। आह्वाजालिकः। आह्वाजालिकी। आह्वाजालिका। आह्वाजालीयाः। सौदर्शनिकः। सौदर्शनिकी। सौदर्शनिका। सौदर्शनीयः।

वृजिमद्रादद्देशात्कः ॥३।१।३१॥ वृजिमद्रशब्दाभ्यां देशवाचिभ्यां प्राग्जितीये कृताद्यर्थे कप्रत्ययो भवति। राष्ट्रवृणोऽपवादः[6]। वृजिकः। मद्रकः। सुसर्वार्थदिक्शब्देभ्यो जनपदस्य प्रत्ययो भवति। तत्र मद्राद्विक्पूर्वपदात् मद्रादञित्यञ्विहितः। शेषपूर्वपदादयं भवति। सुमद्रकः। सर्वमद्रकः। अर्धमद्रकः। देशादिति किम्? मनुष्यवृत्तेः। वार्जः। माद्रः।

ओष्टञ् ॥३।१।३२॥ उवर्णान्ताद् देशवाचिनः प्राग्जितीये कृताद्यर्थे ठण्प्रत्ययो भवति। अणपवादः। परत्वाच्छठञ्ठिठञ्ठानपि बाधते। शबरजम्बू—शाबरजाम्बुकः। निषादकर्षु[7]—नैषादकर्षुकः। दाक्षिकर्षु—दाक्षिकर्षुकः। प्लाक्षिकर्षु—प्लाक्षिकर्षुकः। नापितवास्तु वाहीकग्रामः। तत्र भवः नापितवास्तुकः। यः प्राग्ग्रामस्तस्मादुत्तरेण भवति। आग्नीतमायकः। जैह्मवकः। इति परत्वाद्वुञ्, ऐक्ष्वाक इत्यण्। ओरिति किम्? दैवदत्तः। देशादिति किम्? पटोच्छात्राः पाटवाः। ठण्ग्रहणं ञिठनिवृत्त्यर्थम्।

दोरेव प्राचः ॥ ३।१।३३ ॥ शरे[10]वत्या नद्याः प्राच्यां दिशि देशः प्राग्देशः। तद्वाचिन उवर्णान्तादुदुसंज्ञकादेव प्राग्जितीये कृताद्यर्थे ठण्प्रत्ययो भवति। आढकजम्बू—आढकजम्बुकः। नापितवास्तु—नापितवास्तुकः। पूर्वेण सिद्धे नियमार्थं वचनम्। इह न भवति, मल्लवास्तु प्राग्ग्रामः, तत्र जातः [11]माल्लवास्तुवः। एवकार इहनियमार्थः, दोः प्राचः एवेति मा भूत्।

ईरोपान्त्याद्वुञ् ॥३।१।३४॥ दोर्देशादिति वर्तते। प्राच इति च। [12]ईकारान्तेकान्ताच्च प्राग्देशवाचिनो दुसंज्ञकाद्वुञ् प्रत्ययो भवति। काकन्दी—काकन्दकः। माकन्दी—माकन्दकः। रोपान्त्यात्—पाटलिपुत्रकः। ऐक्षवकः। प्राच इति किम्? दान्तामित्रीयम्।

प्रस्थपुरवहान्तयोपान्त्यधन्वनः ॥३।१।३५॥ दोर्देशादिति वर्तते। प्रस्थ पुर वाह (?) इत्येवमन्ताद् यकारोपान्त्याद्धन्ववाचिनश्च देशवाचिनो दुसंज्ञात् प्राग्जितीये कृताद्यर्थे वुञ्प्रत्ययो भवति। धन्वेति मरुदेश उच्यते। प्रस्थान्तात्—मालाप्रस्थकः। शाणा[13]प्रस्थक। आञ्जिप्रस्थकः। पुरान्तात्—कार्तीपुरकः हास्तिनपुरक[14]। वहान्तात्—पैलुवहकः। फाल्गुनीवहकः। कौक्कुटीवहकः। योपान्त्यात्-साङ्काश्यकः। काम्पिल्यकः। [15]माणिक्यकः। [16]आग्नीतमायकः। धन्वनः—पारेधन्वकः। आपारेधन्वकः। ऐरावतकः। पुरग्रहणमप्रागर्थं प्राचो हि रोपान्त्यादित्येव सिद्धम्।

राष्ट्रेभ्यः ॥३।१।३६॥ राष्ट्रेभ्यो देशेभ्यो दुसंज्ञकेभ्यः प्राग्जितीये कृताद्यर्थे वुञ्प्रत्ययो भवति। आभिसारकः। आदर्शकः। औपुष्टकः। श्यामायनकः। बहुवचनं [17]प्रकृतिबहुत्वं द्योतयदपवादविषयेऽपि प्रापणार्थम्। [18]अभिसारागतकः। अत्र मर्तोत्तरपदलक्षणः छः प्राप्नोति। राष्ट्रसमुदायो न राष्ट्रग्रहणेन गृह्यते इतीह न भवति। काशिकोशलीयाः।

---

१. हस्तिकर्णके नाम क० म०। २. सर्वमित्र क० म०। ३. छागमित्र क० म०। ४. शौवावतान क० म०। ५. -यौ वा भव—क० म०। ६. -ष्ट्रवृणोऽप—क० म०। ७. -कर्ष्यं क० म०। ८. कर्ष्यः क० म०। ९. -कर्ष्यः क० म०। १०. -शरावत्याः क० म०। ११. वस्तवः क० म०। १२. इकारान्त्याद्रेफोपान्त्याच्च क० म०। १३. शौणाप्रस्थकः क० म०। १४. -कः। नान्दीपुरकः क० म०। १५. -कः। दासकप्यकः। आ—क० म०। १६ आग्नीतमाणवकः क० म०। १७. वुञ्प्रकृति क० म०। १८. आभिसारकः क० म०।

बहुविषयेभ्यः ॥३।१।३७॥ दोरिति निवृत्तम् । अतः परं सामान्येन विधानम् । राष्ट्रेभ्यो देशेभ्यो बहुविषयेभ्यः प्राग्जितीये कृताद्यर्थे वुञ्प्रत्ययो भवति । अणाद्यपवादः । अङ्गेषु जातः आङ्गकः । वङ्गेषु वाङ्गकः । दार्वेषु दार्वकः । काम्बलेषु काम्बलकः । जिम्हिषु [1]जैम्हवकः । अजमीढेषु आजमीढकः । अजक्रन्देषु आजक्रन्दकः । कालञ्जरेषु कालञ्जरकः । वैकुलिशेषु वैकुलिशकः । विषयग्रहणमन्यत्र भावार्थम् । वर्तनी च वर्तनी च वर्तनी च वर्तन्यः । तत्र जातो वर्तनः । बहुवचनमपवादविषयेऽपि ज्ञापनार्थम् । त्रैगर्तकः । बहुर्थं वचनम् । दोस्तु पूर्वेणैव सिद्धम् ।

धूमादिकच्छाग्निबक्त्रवर्तोत्तरपदात् ॥३।१।३८॥ देशादित्येव वर्तते । धूमादिभ्यः कच्छ अग्नि बक्त्र वर्त इत्येतदुत्तरपदेभ्यश्च देशवाचिभ्यः प्राग्जितीये कृताद्यर्थे वुञ्प्रत्ययो भवति । अणाद्यपवादः । धौमकः । पाण्डकः । कच्छ–भाडकच्छकः । पैप्पलकच्छकः । अग्नि–काण्डाग्नकः । वैसुजाग्नकः । बक्त्र–ऐन्दुबक्त्रकः[2] । वर्त–बाहुलवर्तकः । चाक्रवर्तकः । उत्तरपदग्रहणं बहुपूर्वार्थम् । ईषदसमाप्तः कच्छः बहुकच्छो देशः । ततो वुञ् न भवति । धूम, [3]पण्ड, [4]दशादन, आर्जुनाभ,दण्डायनस्थली, मालवस्थली, घोषस्थली, राजगृह, सत्रासाह[5], मद्रकुल, अञ्जकुल, द्वयाहाच, [6]आहाच, [7]सस्फीय, वर्वद, गर्त, वर्ज्य[8], विनाय, हिमकान्त, विदेह, आनर्त, वाधूर, पारेय, घोष, वप्य, वणीय, [9]वल्ली, आराज्ञी, आर्तराज्ञी, अवया, तीर्थ, कुक्षी, अनरोम[10], अरुण, उज्जयिनी, दक्षिणापथ[11], साकेत इति धूमादिः । दण्डायनस्थलीत्यादीनामिकारान्तानां पाठोऽप्रागर्थः । विदेहानर्तयो राष्ट्रे वुञ् सिद्धः सामर्थ्यविदेशार्थः पाठः । विदेहानामानर्तानां च स्त्रियाणां स्वं वैदेहकम्, आनर्तकम् । पारं यास्येषात्पाद वुञ् सिद्ध आदेशार्थः पाठः । परेरपत्यं पारेयस्तस्य स्वं पारेयकम् ।

सौवीरेषु [12]कुलात् ॥३।१।३९॥ सौवीरदेशवाचिनः [13]कुलशब्दात् प्राग्जितीये कृताद्यर्थे वुञ्प्रत्ययो भवति । कौलकः सौवीरेषु । कौलोऽन्यत्र ।

समुद्रान्नावोः ॥३।१।४०॥ समुद्रशब्दाद्देशवाचिनः प्राग्जितीये कृताद्यर्थे वुञ्प्रत्ययो भवति स चेन्ना मनुष्यो नौर्वा भवति । सामुद्रको मनुष्यः । सामुद्रिका नौः । नृनावोरिति किम् ? सामुद्रं लवणम् ।

नगरात् कुत्सादाक्ष्ये ॥३।१।४१॥ नगरशब्दाद् देशवाचिनः प्राग्जितीये कृताद्यर्थे वुञ्प्रत्ययो भवति प्रत्ययार्थस्य कुत्सायां दाक्ष्ये नैपुण्ये च गम्यमाने । केनायं मुषितः ? इह नगरे मनुष्येण स भाव्यते । एतन्नागरकैर्[14] हि नागरका भवन्ति । केनेदं चित्रं लिखितम् ? इह नगरे मनुष्येण स भाव्यते । एतन्नागरका दक्षा हि नागरका भवन्ति । कुत्सादाक्ष्य इति किम् ? नागरः पुरुषः । नाम्नस्तु कथ्यादिपाठाड् ढक्मत्युदाहर्तव्यः । नागरेयकः ।

पथ्यध्यायन्यायविहारनिभेऽरण्यात् ॥३।१।४२॥ अरण्यशब्दाद्देशवाचिनः प्राग्जितीये कृताद्यर्थे पथ्याद्युपपदो वुञ्प्रत्ययो भवति । पथि–आरण्यकः पन्थाः । अध्याये–आरण्यको ऽध्यायः । न्याये–आरण्यको न्यायः । विहारे–आरण्यको विहारः । नरि–आरण्यको नरः । द्वये–आरण्यको हस्ती । पथ्यादाविति किम् ? आरण्याः सुमनसः । आरण्या ओषधयः ।

गोमये वा ॥३।१।४३॥ अरण्यशब्दाद्देशवाचिनः प्राग्जितीये कृताद्यर्थे वुञ्प्रत्ययो भवति वा स चेद् गोमयो भवति । आरण्यका गोमयाः । आरण्या गोमयाः । हस्तिजातो आरण्या हस्तिनीत्यप्यपरे प्रयोगमिच्छन्ति ।

---

१. जैम्हव: क० म० । २. -बक्त्रकः । वैसुबक्त्रकः । क० म० । ३. पदण्ड क० म० । ४. दशादन क० म० । ५. -ह । सत्राकि । सत्र—क० म० । ६. व्याहाच क० म० । ७. संस्फीया । वर्वद । क० म० । ८. -र्च शकुनि । विनाय । हि—क० म० । ९. पल्ली क० म० । १०. अनरीप क० म० । ११. दक्षिणापथ क० म० । १२. कूलात् क० म० । १३. कूलशब्दात् क० म० । १४. चोरा क० म० ।

कुरुयुगन्धरराष्ट्रवृञ् ॥३।१।४५॥ कुरुयुगन्धरराष्ट्राभ्यां देशवाचिभ्यां प्राग्जितीये कृताद्यर्थे वुञ्प्रत्ययो भवति वा । कौरवकः । कौरवः । यौगन्धरकः । यौगन्धरः । कुरुयुगन्धरौ राष्ट्रशब्दौ बहुविषयौ । तत्र युगन्धरादिभ्यं राष्ट्रवुञ् विकल्पः । कुरोस्तु कच्छादिषु पाठाद्यं विकल्प्यते । उत्तरो वुञ् [1]नृनृस्थयो नित्यः । कौरवको मनुष्यः । कौरवकमस्य हसितम् ।

साल्वाद्गोयवाग्वपत्तौ ॥३।१।४६॥ साल्वशब्दादेशवाचिनः नदि यवाग्वामपत्तावपवादौ च मनुष्ये[2] कृताद्यर्थे वुञ्प्रत्ययो भवति । साल्वको गौः । साल्वका[3] यवागूः । साल्वको मनुष्यः । गोयवाग्वपत्ताविति किम् ? साल्वा व्रीहयः । साल्वः पत्तिः । राष्ट्रेभ्यो वुञ् कच्छादिपाठावगाधीयते[4] । गोयवागूग्रहणं विध्यर्थम् । अपत्तिग्रहणं नदि नियमार्थम् । नृनृस्थयोर्ह्युत्तरेण सिद्ध एव वुञ् । एवं च गोयवाग्वोरपत्तौ मनुष्ये मनुष्यस्थे साल्वकः । अन्यत्र साल्व इति स्थितम् । अयं च विभागः साल्वादेरपि विज्ञेयः । अन्यथा हि यवादिभ्योऽन्यत्र यदि साल्वः साल्वकमित्युभयमिष्टं स्यात् गणे सूत्रे च[5] पाठोऽनर्थकः सूत्र एव[6] दुरवबोध उपादेयः स्यात् । अपत्तीति कच्छादेर्नृनृस्थे इत्युपात्तं नृनृस्थं परिग्राहिष्यते न नृपात्रं[7] कच्छादेश्च नृनृस्थ इति वा षष्ठ्यन्तः करिष्यते इति नृस्थे रूपद्वयं न भविष्यति ।

कच्छादेर्नृनृस्थे ॥३।१।४७॥ कच्छ इत्येवमादिभ्यः प्राग्जितीये कृताद्यर्थे नदि मनुष्ये नृस्थे मनुष्यस्थे च वुञ्प्रत्ययो भवति । काच्छको मनुष्यः, काच्छकमस्य हसितम् । स्मितमीक्षितं स्थितम् । काच्छिका चूडा । सैन्धवको मनुष्यः । सैन्धवकमस्य हसितं स्मितमीक्षितम् । सैन्धविका चूडा[8] । कच्छ, सिन्धु, वर्ण[9], मधुमत्, कम्भोज[10], साल्व, कुरु, अनुषण्ड[11], कश्मीर, विजाय[12], अजवाह, कुलूतरङ्कु[13] इति कच्छादिः । कच्छादौ ये बहुविषया राष्ट्रशब्दास्तेभ्यो वुञि तदपवाद उत्तरेऽणि तदपवादोऽयं वुञ् । वर्णसिन्धुभ्यामोष्ठ्यि कुरोर्विकल्पे विज्ञापकस्य कोपान्त्याणि कच्छस्यौत्सर्गिकाणि अपरे कच्छमपि बहुविषयराष्ट्रमाहुः ।

कोपान्त्याच्चाण् ॥३।१।४८॥ देशादित्येव वर्तते न नृनृस्थ इति । कोपान्त्यात् कच्छादेश्च देशवाचिनः प्राग्जितीये कृताद्यर्थेऽण् प्रत्यये प्रत्ययो भवति । ठगवुञोरपवादः । कोपान्त्यात्—ऋषिका जनपदः, तत्र जातः आर्षिकः । माहिषिकः । आश्मकः । ऐक्ष्वाकः । कच्छादेः—काच्छः । सैन्धवः । वार्णवि[14] । अण्ग्रहणं किमर्थम् ? योऽन्येन बाधितो न प्राप्नोति तदर्थमिद स्यात् । स चाणेव न वेदं वुञर्थम् । तथा हि[15] वुञ्विधानमनर्थकं स्यात् । सैतद[16]स्यसत्यण्ग्रहणे इक्वाकोष्ठ्ण् स्यात् । स हि ततो राष्ट्रवुना बाधितः ।

पृथिवीमध्याग्निवासात्मध्यमश्चास्य चरणे ॥३।१।४९॥ पृथिवीमध्यादेशाग्निवासीभ्यो[17] ताच्चरणे निवस्तरि प्राग्जितीये कृताद्यर्थेऽण्प्रत्ययो भवति । मध्यम[18]श्चास्य पृथिवीमध्यशब्दस्यादेशः । पृथिवीमध्यं निवासोऽस्य चरक[19]स्य माध्यम. चरकः[20] । त्रयः प्राच्याः । त्रयं उदीच्याः । त्रयो मध्यमाः । निवासादिति किम् ? पृथिवीमध्यादागतं मध्यमीयं चरणम् । [21]पृथिवीमध्यं निवासोऽस्य देवदत्तस्य मध्यमीयो देवदत्तः । सोनिवासादस्योत्पत्तेरिदं कर्तव्यमिह क्रियते उत्तरार्थम् ।

छः ॥३।१।५०॥ पृथिवीमध्यान्मध्यमश्चास्येति वर्तते न चरणे निवासादिति । पृथिवीमध्यादेशात् प्राग्जितीये कृताद्यर्थे छप्रत्ययो भवति । मध्यमश्चास्यादेशः । पृथिवीमध्ये जातो भवो वा पृथिवी[22] मध्यमीयः ।

गहादिगर्तोत्तरपदेभ्यः ॥३।१।५०॥ देशादिति वर्तते । तद्गहादीनां यथासम्भवं विशेषणम् ।

---

१. नृनृस्थ—क० म० । २. कृताद्यर्थे क० म० । ३. साल्विका जवागूः, क० म० । ४. –आधीयते क० म० । ५. च साल्वपाठो—क० म० । ६. –वादुरव—क० म० । ७. नृमात्रं क० म० । ८. चूडा क० म० । ९. वर्णु क० म० । १०. कम्भोज क० म० । ११. अनूषण्ड क० म० । १२. विजावक क० म० । १३. कुलूतरङ्कु क० म० । १४. वार्णव. क० म० । १५. हि पूर्वं वु—क० म० । १६. सैतदस्य– क० म० । १७. निवासभूता—क० म० । १८. मध्यश्चास्य क० म० । १९. चरणस्य म० । २०. चरणः म० । २१. -यम् । चरण इति किम् ? पृथि—क० म० । २२. वा मध्यमीयः क० म० ।

गहादिभ्यो यथायोगं देशवाचिभ्यो वर्तोत्तरपदेभ्यश्च देशवाचिभ्यः प्राग्जितीये कृताद्यर्थे छप्रत्ययो भवति । अणाद्यपवादः । गह्यीयः । अन्तःस्थीयः । वर्तोत्तरपदात्—शवाविद्वर्तीयः । वृकवर्तीयः । रोहिद्वर्तीयः । सृगाल-वर्तीयः । अभिसारवर्तीयः[1] । जैनर्तक इति युञ् बहुवचनाद्भवति । वह, अन्तःस्थ[2], सम, विषम, उत्तम, अङ्ग, ममक, शुक्लपक्ष, पूर्वपक्ष, अपरपक्ष, अधमशाख, उत्तमशाख, समानशाख, एकग्राम, एकवृक्ष, एकपलाश, इक्षव, दन्ताग्र, इक्षवीक, अवस्यन्द, कामप्रस्थ, खादायनी, कारेरणी, आचेरणी, शैशिरी, शीघ्री, आसुरी, अहिंसी[3], आमिक्षी, व्याधि[4], भौजी, आशाश्वी[5], अश्वत्थी, ओदवाहमानी, औपबिन्दवी, आरिनधर्मी, दैवधर्मी, औति, वाराटकी[6], वाल्मीकि, क्षेमदृत्वी, उत्तर, अन्तर, मुखतस्, पार्श्वतस्, एकतस्—इति गहादयः । गहादिराकृति-गणः । तेन मध्यीयः, हंसीय इत्यादि सिद्धं भवति ।

दोः कन्याफलदनगरग्रामह्रदोत्तरपदककोपान्त्यात् ॥३।१।५१॥ कन्या फलद नगर ग्राम ह्रद इत्येवमुत्तरपदात् ककारोपान्त्यात् ककारोपान्त्याच्च दुसंज्ञकाद्देशवाचिनः प्राग्जितीये कृताद्यर्थे छप्रत्ययो भवति । ठण्णिठादेरपवादः । दाक्षीकन्थीयः[7] । दाक्षीफलदीयः । माहकीफलदीयः । दाक्षीनगरीयः । माहकी-नगरीयः । दाक्षीग्रामीयः । माहकीग्रामीयः । दाक्षीह्रदीयः । माहकीह्रदीयः । कोपान्त्यात्—वारीहणकीयः । द्रौघ्नणकीय.[8] । आष्टकीयः । ब्राह्मणकीयः । बालाकीयः[9] । आम्रवत्थकीयः । शाल्मलीकीयः । सौसुकीयः । कोपान्त्यात्—कौदिशिकीय.[10] । मादिशिकीयः । आयोमुखीय.[11] । दोरिति किम् ? आर्षिकः । माहर्षिकः ।

कटादेः प्राचः ॥३।१।५२॥ प्राग्देशवाचिनः कटादेः कटपूर्वपदशब्दरूपात् प्राग्जितीये कृताद्यर्थे छप्रत्ययो भवति । अणोऽपवादः । कटनगरीयः । कटग्रामीयः । कटघोषीयः । कटपल्वलीयः ।

पर्णकृकणाङ्गारद्राजात् ॥३।१।५३॥ पर्ण कृकण इत्येताभ्यां भारद्वाजदेशवाचिभ्यां प्राग्जितीये कृताद्यर्थे छप्रत्ययो भवति । पर्णीयः । कृकणीयः । भारद्वाजादिति किम् ? पार्णः । कार्कणः ।

पर्वताग्रे ॥३।१।५४॥ पर्वत[12] इति शब्दाद्देशवाचिनः प्राग्जितीये कृताद्यर्थे नरे मनुष्ये छप्रत्ययो भवति । विकल्पापवादः । पर्वतीयो मनुष्यः । पर्वतीयो राजा ।

वा ॥३।१।५५॥ पर्वतादिति वर्तते । नगरे इति पर्वतात् प्राग्जितीये कृताद्यर्थे छप्रत्ययो भवति वा । पर्वतीयमुदकम् । पार्वतमुदकम् । पर्वतीयानि फलानि । पार्वतानि फलानि ।

वेणुकादिभ्यश्छण् ॥३।१।५६॥ वेणुक इत्येवमादिभ्यः यथायोगं देशवाचिभ्यः प्राग्जितीये कृताद्यर्थे छण्प्रत्ययो भवति । वैणुकीयः । चैत्रकीयः । औत्तरपदीयः । प्राच्यीयः । माध्यमकीयः ।

युष्मदस्मदोऽभ्यञौ वाकञ्चैकस्मिंस्तवकममकम् ॥३।१।५७॥ देशादिति निवृत्तम् । युष्मद् अस्मद् इत्येताभ्यां प्राग्जितीये कृताद्यर्थेऽञ् खञ् इत्येतौ प्रत्ययौ भवतो वा तत्सन्नियोगे च तयोरकञ् वादेशो भवति । यदा तु तौ युष्मदस्मदौ एकस्मिन्नेकत्वविशिष्टेऽर्थे वर्तेते तदा तयोर्यथासङ्ख्यं तवक ममक-इत्येतावादेशौ भवतः । प्रत्ययययोर्यथासङ्ख्यं नास्ति वचनभेदात् । यौष्माकः । आस्माकः । यौष्माकीणः । आस्माकीनः । एकस्मिन्—तावकः । मामकः । तावकीनः । मामकीनः । पक्षे दोषकः । युष्मदीयः । अस्म-दीयः । त्वदीयः । मदीयः ।

यो ऽर्द्धात् ॥३।१।५८॥ अर्द्धशब्दात्प्राग्जितीये कृताद्यर्थे यो भवति । अर्ध्यम् ।

तावेष्ठण् ॥३।१।५९॥ तावेः सपूर्वदर्धशब्दात् प्राग्जितीये कृताद्यर्थे ठण्प्रत्ययो भवति । पौष्करा-धिकः । वैद्यार्द्धिकः । वानेयार्द्धिकः । गौतमार्द्धिकः । क्षैत्रार्द्धिकः ।

---

१. अभिसारवर्तकः क० म० । २. अन्तःस्था क० म० । ३. आहिंसी क० म० । ४. व्याडि म० । ५. आशश्वी क० म० । ६. वाट । उकी क० म० । ७. -वः । माहकीकन्थीयः क० म० । ८. द्रौघ्नणकीयः क० म० । ९. बालाकीयः क० म० । १०. कौदिशिकीयः । मादिशिकीयः क० म० । ११. आयोमुखीयः क० म० । १२. तत्सदृश— क० म० ।

दिगादेर्दण्डौ ॥३।१।६०॥ दिगादेरर्थात् प्राग्जितीये कृताद्यर्थे तौ यठणौ प्रत्ययौ भवतः। ठणोऽपवादः। पूर्वार्धम्। पौर्वार्धिकम्। दक्षिणार्धम्। दाक्षिणार्धिकम्। पश्चार्धम्। पाश्चार्धिकम्।

ग्रामराष्ट्रक्यार्णठणौ ॥३।१।६१॥ ग्रामस्य राष्ट्रस्य च यदर्द्धं[1] तदेकदेशवाची योऽर्द्धशब्दस्तदन्ताद्विदकपूर्वात् प्राग्जितीये कृताद्यर्थे अण् ठण् इत्येतौ प्रत्ययौ भवतः। यठणोऽपवादः। ग्रामस्य राष्ट्रस्य वा—पौर्वार्द्धः। पौर्वार्द्धिकः। दाक्षिणार्द्धः। दाक्षिणार्द्धिकः।

परावराधमोत्तमादेर्यः ॥३।१।६२॥ पर अवर अधम उत्तम इत्येवंपूर्वादर्द्धान्तात् प्राग्जितीये कृताद्यर्थे यप्रत्ययो भवति। ठणोऽपवादः। परार्द्धम्। अवरार्द्धम्। अधमार्द्धम्। उत्तमार्द्धम्। परावरयोर्दिक्शब्देऽपि परत्वादयमेव। आदिग्रहणं किम्? परावराधमोत्तमानामेव प्रकृतित्वं विज्ञायते।[2]

अन्ताद्योऽधसोऽमः ॥३।१।६३॥ अन्त अवस् अधस् इत्येतेभ्यः प्राग्जितीये कृताद्यर्थेऽमप्रत्ययो भवति। अन्तमः। अवमः। अधमः। अकारादित्वमवोधसोरन्त्याज्जादिलुगर्थम्।

समानादिलोकोत्तरपदाध्यात्मादिभ्यष्ठण् ॥३।१।६४॥ समानशब्दाद्यवयवेभ्यः लोकोत्तरपदेभ्यः अध्यात्मादिभ्यश्च यथायोगं कृताद्यर्थे ठण्प्रत्ययो भवति। समानग्रामे कृतो भवो वा सामानग्रामिकः। [3]सामानदैशिकः। इह लोके कृतो भवो वा ऐहलौकिकः। पारलौकिकः। सार्वलौकिकः। अध्यात्मं भवमाध्यात्मिकम्। आधिदैविकम्। सामासिकम्[4]। ऐहिकम्। आमुष्मिकम्। और्ध्वभौतिकम्। अध्यात्मादयः प्रयोगगम्याः।

ऊर्ध्वादमदेहात्मक चोर्ध्वस्यैकेषाम् ॥३।१।६५॥ ऊर्ध्वशब्दात्परो यो दमदेहो तदन्तात्प्राग्जितीये कृताद्यर्थे ठण्प्रत्ययो भवति। अस्य चोर्ध्वस्य[5] केषामाचार्याणां मतमिदं भवति। और्ध्वदमिकः। और्ध्वदेहिक[6]। और्ध्वन्दमिकः। और्ध्वन्देहिकः।

वर्षाकालेभ्यः ॥३।१।६६॥ वर्षाशब्दात् कालविशेषवाचिभ्यश्च शब्देभ्यः प्राग्जितीये कृताद्यर्थे ठण्प्रत्ययो भवति। अणपवादः। दीर्घत्वमपि परत्वाद्बाधते। वार्षिकः। ऋतोर्ञ्प्रत्ययः[7]। तदवयवादेरपि वेदितव्यः। पूर्ववार्षिकः[8]। एवमुत्तरत्रापि। कालेभ्यः—मासिकः। अर्धमासिकः। निशासहचरितमध्ययनं निशा। प्रदोषसहचरितं प्रदोषः। तत्र[9] अपि नैश[10]। प्रादोषिकः। कदम्बपुष्पसहचरितः[11] कदम्बपुष्पम्। व्रीहिपलालसहचरितः व्रीहिपलालम्। तत्र देयमृणं कादम्बपुष्पिकम्। व्रैहिपलालिकम्। वर्षाग्रहणमृत्वण्बाधनार्थम्। सन्ध्यादिभ्योऽण्विधानात् कालविशेषवाचिभ्योऽयं विधिर्विज्ञायते तत्र बहुवचनं यथा कथञ्चित् कालवृत्तिभ्योऽपि प्रापणार्थम्।

कालशब्दाच्च कालार्थादकालार्थाच्च कालतः। अकालादपि कालार्थात् कालेभ्य इति यो विधिः।

शरदः कर्मणि श्राद्धे ॥३।१।६७॥ शरच्छब्दात् कालवाचिनः प्राग्जितीये कृताद्यर्थे श्राद्धकर्मणि ठञ्प्रत्ययो भवति। ऋत्वणोऽपवादः। शारदिकं श्राद्धं कर्म। कर्मणीति किम्? शारदः श्राद्धः। श्रद्धावान् इत्यर्थः। श्राद्ध इति किम्? शारदं विरेचनम्।

रोगातपे वा ॥३।१।६८॥ शरच्छब्दात् कालवाचिनः प्राग्जितीये कृताद्यर्थे रोग आतपे ठण्प्रत्ययो भवति वा। ऋत्वणोऽपवादः। शारदिको रोगः। शारदो रोगः। शारदिक आतपः। शारद आतपः। रोगातप इति किम्? शारदं दधि।

निशाप्रदोषहेमन्तात् ॥३।१।६९॥ निशा प्रदोष हेमन्त इत्येतेभ्यः कालवाचिभ्यः प्राग्जितीये कृताद्यर्थे ठण्प्रत्ययो वा भवति। नित्यमपवादः। नैशकः। नैशः। प्रादोषिकः। प्रादोषः। हैमन्तिकम्। हैमन्तम्।

---

१. यदर्थं क० म०। २. विज्ञायेत क० म०। ३. सामानदेशिकः क० म०। ४. सामासिकम् क० म०। ५. चोर्ध्वशब्दस्यैकं—क० म०। ६. -हिकः। अन्येषाम्। और्ध्व—क० म०। ७. -तोर्ञिप्रत्यक० म०। ८. अंशादतोरित्युत्तरपदवृद्धिः। इदमेव ज्ञापकम्, तदवयवादेरपि भवतीत्यस्य। क० म० टि०। ९. अयं क० म०। १०. वैशिकः क० म०। ११. -तः कालः कदम्—क० म०।

लुक्तोऽपि ॥३।१।७०॥ हेमन्तशब्दस्य कालवाचिनः प्राग्जितीये कृताद्यर्थेऽपि तकारस्य [1]लुग्भवति। हैमनम्। हैमन्तम्। एवं त्रैरूप्यं भवति। त इति किम्? अन्त्यस्यैव लुग् विकल्पो मा भूत्। अणीति किम्? ठणि मा भूत्।

पुराणम् ॥३।१।७१॥ पुराणमिति पुराशब्दात्तनट्प्रत्ययस्तत्सशब्दस्य वा लुग् निपात्यते। पुराणम्। पुरातनम्।

श्वसस्तट् च ॥३।१।७२॥ श्वस् इत्येतस्मात् कालवाचिनः प्राग्जितीये कृताद्यर्थे ठण्प्रत्ययो वा भवति तस्य च ठणस्तडागमो नित्यं भवति। एवमस्य त्रैरूप्यम्। शौवस्तिकः। श्वस्त्यः। श्वस्तनः।

पूर्वाह्णापराह्णात्तनट् ॥३।१।७३॥ पूर्वाह्ण[3]पराह्ण इत्येताभ्यां कालवाचिभ्यां प्राग्जितीये कृताद्यर्थे तनट्प्रत्ययो भवति वा। पूर्वाह्णे जातो भवो वा पूर्वाह्णतनः। अपराह्णतनः। पूर्वाह्ण[4]जयी। पूर्वाह्णतनः अपराह्णतनः। जयिनि बहुलाधिकारात् व्यवस्थितविभाषाविज्ञानाद्वा लुग् न भवति। ष्ठ्यते च पक्षे ठण्। पौर्वाह्णिकः। आपराह्णिकः। टकारो ऽर्थः। पूर्वाह्णतनी। पूर्वाह्णतनी। अपराह्णतनी। अपराह्णतनी।

सायंचिरंप्राह्णे प्रगेऽव्ययात् ॥३।१।७४॥ योगविभागाद्वेति निवृत्तम्। सायं चिर प्राह्णे प्रगे इत्येतेभ्योऽव्ययेभ्यश्च कालवाचिभ्यः प्राग्जितीये कृताद्यर्थे तनट्प्रत्ययो भवति नित्यम्। सायन्तनः। प्राह्णेतनः। प्रगेतनम्। अव्ययात्—दिवातनम्। दोषातनम्। नक्तन्तनम्। पुरस्तनम्। प्रातस्तनम्। प्रातनम्। सायमिति यन्मकारान्तमव्ययं तस्याव्ययादित्येव सिद्धम्। सायशब्दस्येदं प्रत्ययसन्नियोगे(न) रूपान्तरनिवृत्त्यर्थं मान्तत्वं निपात्यते। चिरमिति चिरशब्दस्य प्राह्णे प्रगे इत्येकारान्तत्वम्।

चिरपरुत्परारेरत्नः[5] ॥३।१।७५॥ चिर परुत् परारि इत्येतेभ्यः प्राग्जितीये कृताद्यर्थे त्नप्रत्ययो भवति। चिरत्नः। परुत्नः। परारित्नः। एवं चिरशब्दस्य पूर्वं तनट्, अयं च त्नः, इति त्रैरूप्यम्।

भर्तुसन्ध्यादेरण् ॥३।१।७६॥ भं नक्षत्रं तच्छब्देभ्यः ऋतुशब्देभ्यः सन्ध्यादिभ्यश्च कालवाचिभ्यः प्राग्जितीये कृताद्यर्थेऽण्प्रत्ययो भवति। ठणोऽपवादः। पुष्ये जातो भवो वा पौषः। तैषः। सौवातः। ऋतुभ्यः—ग्रैष्मः। शैशिरः। वासन्तः। सन्ध्यादेः–साङ्ध्यः। सान्धिवेलः। आमावास्यः। एकदेशविकृतस्यानन्यत्वादमावास्याशब्दादपि भवति। आमावस्यः। अपरग्रहणं स्यात्तिपौर्णमासीभ्यां ङ्यबाधनार्थं यथाविहितमित्युच्यमाने दोषच्छः प्राप्नोति। सन्ध्या, सन्धिवेला, अमावस्या, त्रयोदशी, चतुर्दशी, पञ्चदशी, पौर्णमासी, प्रतिपत्, शश्वत् इति सन्ध्यादिः। अशश्वदित्यतः शाश्वतिकः इति ठणपि।

संवत्सरात्फलपर्वणी ॥३।१।७७॥ संवत्सरशब्दात् कालवाचिनः प्राग्जितीये कृताद्यर्थे पर्वणि फले चाऽण्प्रत्ययो भवति। सावत्सरं पर्व। सांवत्सरं फलम्। पर्वफल इति किम्? सांवत्सरिको रोगः।

प्रावृष एण्यः ॥३।१।७८॥ प्रावृष इत्येतस्मात् कालवाचिनः प्राग्जितीये कृताद्यर्थे एण्यप्रत्ययो भवति। अणोऽपवादः। प्रावृषि भवः प्रावृषेण्यः। एण्य इति मूर्धन्यो णकारोऽतिनिमित्तकः। ष्यन्तात्त्रिवपि प्रावृषेणोति मूर्धन्यार्थः।

ष्यो ऽन्वब्धिद्वीपात् ॥३।१।७९॥ कालाधिकारो निवृत्तः। अन्वब्धि अब्धिः समुद्रस्तस्य समीपे यो द्वीपस्तद्वाचिनो द्वीपशब्दात् प्राग्जितीये कृताद्यर्थे ष्यप्रत्ययो भवति। कञ्छाद्यण्-वुञोरपवादः। द्वैप्यम्। द्वैप्यो मनुष्यः। द्वैप्यमस्य हसितम्। अन्वब्धीति किम्? अनुनदि यो द्वीपस्तस्माद् द्वैपम्। द्वैपको व्यासः। द्वैपकमस्य हसितम्।

पश्चाद्यान्ताग्रादिमः ॥३।१।८०॥ पश्चात् आदि अन्त अग्र इत्येतेभ्यः प्राग्जितीये कृताद्यर्थे इमप्रत्ययो भवति। पश्चिमः। आदिमः। अन्तिमः। अग्रिमः।

---

१. लुप्त्वा म—क० म०। २. पूर्वाह्णापरा—क० म०। ३. अपराह्ण क० म०। ४. पूर्वाह्णेजयी क० म०। ५. -रे त्नः क० म०। ६. निर्निमित्तकः क० म०।

मध्यमः ॥३।१।८१॥ मध्यशब्दात् प्राग्जतीये कृताद्यर्थे मप्रत्ययो भवति । मध्यम: ।

उत्कर्षापकर्षयोरः ॥३।१।८२॥ उत्कर्षापकर्षयोर्यन्मध्यस्तत्र वर्तमानान्मध्यशब्दात् प्राग्जतीये कृताद्यर्थे र इत्ययं प्रत्ययो भवति । मापवादः । नात्युत्कृष्टो नापकृष्टो मध्यपरिमाणो मध्यो वैयाकरणः, मध्या: युष्माः, मध्या स्त्री । नातिदीर्घं नातिह्रस्वं मध्यप्रमाणम् । मध्यं काष्ठम् । नातिस्थूलो नातिकृशो मध्यः काय: । अवस्थाऽवस्थात्रोर्भेदविवक्षादया(क्षाया)मवस्थाप्रकृत्यर्थः अवस्थाताप्रत्ययार्थ इति मः प्राप्नोतीति वचनम् ।

स्थामाजिनाच्छ्लुक् ॥३।१।८३॥ [1]स्थामान्ताज्जिनान्ताच्च परस्य प्राग्जतीये कृताद्यर्थे प्रत्ययस्य श्लुर्भवति । अश्वस्थाम्नो[3] जातो भवो वा अश्वस्थामा । सिंहाजिनः । तोटकाजिनः । वृकाजिनः ।

क्तेः कृतलब्धक्रीतसम्भूते ॥३।१।८४॥ अणादयो ढणादयश्च स्वविशेषसम्बन्धा अनुवर्तन्ते । क्तेरिति सप्तम्यन्तात्कृते लब्धे क्रीते सम्भूते चार्थे यथायोगमणादयो ढणादयश्च प्रत्यया भवन्ति । अवस्तुष्टि-राधारप्रमाणानतिरिक्तप्रमाणता चाधेयस्य सम्भूतिः । स्तुघ्ने कृतः लब्धः क्रीतः सम्भूतो वा स्तौघ्नः । एवं माधुरः । नादेयः । राष्ट्रियः । पारीणः । क्तेरिति किम् ? देवदत्तेन कृतः । कृतलब्धक्रीतसम्भूतिरिति किम् ? शयने शेते । आसने आस्ते ।

कुशले ॥३।१।८५॥ क्तेरिति वर्तते । क्तेरिति सप्तम्यन्तात् कुशलेऽर्थे [4]यथाविहितमणादयो ढणादयश्च प्रत्यया भवन्ति । स्तुघ्ने कुशलः स्तौघ्नः । माधुरः । नादेयः । राष्ट्रियः । योगविभाग उत्तरार्थः ।

पथोऽकः ॥३।१।८६॥ पथिन्शब्दात्तत्र कुशलेऽकप्रत्ययो भवति । अणोऽपवादः । पथि कुशलः पथकः ।

कोऽश्मादेः ॥३।१।८७॥ अश्मन् इत्येवमादिभ्यः सप्तम्यन्तेभ्यः कुशलेऽर्थे कप्रत्ययो भवति । अणोऽपवादः । अश्मनि कुशलः अश्मकः । अशनिकः । आकर्षकः[5] । अश्मादयस्तद्विषयाया क्रियाया वर्तमानाः प्रत्ययमुत्पादयन्ति । तत्र कुशलार्थयोगात्प्रत्ययान्तरकरणमिकारोकारान्तरार्थकम्[6] । अश्मन्, अहिमन् , आकर्ष, स्वर, पिशाच, पिशण्ड, पाद, शकुनि, निवय, जय, नय, ह्लाद, ह्लाद इत्यश्मादि[7] ।

जाते ॥३।१।८८॥ क्तेरिति सप्तम्यन्ताज्जातेऽर्थे यथाविहितमणादयो ढणादयश्च प्रत्यया भवन्ति । स्तुघ्ने जातः स्तौघ्नः । माधुरः । नादेयः । पारीणः । राष्ट्रियः । क्तेरिति किम् ? देवदत्ताज्जातः । जात इति किम् ? शयने शेते । आसने आस्ते ।

प्रावृषष्ठः ॥३।१।८९॥ प्रावृष् इत्येतस्मात्तत्र जाते ठप्रत्ययो भवति । अणोऽपवादः । प्रावृषि जातः प्रावृषिकः ।

शरदो वुञ् नाम्नि ॥३।१।९०॥ शरद् इत्येतस्मात्तत्र जातं वुञ्प्रत्ययो भवति । ऋत्वणोऽपवादः । नाम्नि प्रकृतिप्रत्ययसमुदायश्चेत्कस्यचिन्नाम सञ्ज्ञा भवति । [8]शारदा दर्भाः । शारदा मुद्गाः । दर्भविशेषाणां मुद्गविशेषाणां चेदं केषांचिन्नाम । आ उत्तरार्थनिर्देशान्नाम्नीति केचिदपेक्षन्ते ।

सिन्ध्वपकरात्काणौ ॥३।१।९१॥ सिन्धु अपकर इत्येताभ्यां तत्र जातार्थे[9] नाम्नि क अण् इत्येतौ प्रत्ययौ भवतः । सिन्धोः कच्छाद्यण्वुञोरपवादः । अपकरादौपसर्गिकाणोः[10] वचनभेदाद्बाधासङ्ख्यं नास्ति । सिन्धौ जातः सैन्धुकः[11] । सैन्धवः । अपकरे जातः अपकरकः । आपकरः ।

पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्करादञ्वुञ् ॥३।१।९२॥ पूर्वाह्ण अपराह्ण आर्द्रा मूल प्रदोष अवस्कर इत्येतेभ्यस्तत्र जाते वुञ्प्रत्ययो भवति । ढणादेरपवादः । नाम्नि सञ्ज्ञायां विषये । पूर्वाह्णकः

---

१. नाम्ताच्छ्लु—क० म० । २. -स्ताज्जि—क० म० । ३. अश्वस्थाम्नि क० म० । ४. कुशलेऽर्थे क० म० । ५. -कः । स्तरुकः म० । ६. -स्ताधम् म० । ७. अशनि म० । ८. शारदका दर्भाः शारदका मुद्गा म० । ९. जातेऽर्थे म० । १०. -दौत्सर्गिकाणोः म० । ११. सैन्धवः म० ।

अपराह्णिकः । [1]अण्ठञ्खनटोरपवादः । आर्द्रकः । मूलकः । अत्र भावः । प्रदोषकः । अत्र ठणोः । अवस्करकः । अचौत्सर्गिकाणः । नाम्नीति किम् ? अकाम्नि यथाप्राप्तं ठणादयो भवन्ति । चकारः सामान्यग्रहणार्थः । वुञ्[2] विधानमाद्रिकेत्येवमर्थम् ।

पन्थकः ॥३।१।९३॥ पन्थक इति पथिन्शब्दस्य तत्र जाते वुञ् प्रत्ययः पन्थादेशश्च नाम्नि निपात्यते । अणोऽपवादः । पथि जातः पन्थकः ।

वाह्यामावास्यायाः ॥३।१।९४॥ अमावास्या इत्येतस्मात्तत्र जातेऽर्थे नाम्नि विषये अकारो वुञ्च प्रत्ययौ भवतः । तास्यां मुक्ते सन्ध्यादिवत् । अमावास्यः । अमावास्यकः । वामावास्यः । एकदेशविकृतस्यानन्यत्वादमावस्यायां अपि भवति[3] ।

अविष्ठाषाढाच्छण् च ॥३।१।९५॥ अविष्ठा आषाढा इत्येताभ्यां तत्र जातेऽर्थे नाम्नि विषये छण् चाऽकारश्च प्रत्ययौ भवतः । खाणोऽपवादः । अविष्ठाः । धनिष्ठाः । तासु जातः [4]आविष्ठः । आविष्ठेयः । [5]आषाढयोर्जातः आषाढः । [6]आषाढेयः ।

फल्गुन्याद्वः ॥३।१।९६॥ फल्गुनीशब्दात्तत्र जातेऽर्थे नाम्नि विषये टप्रत्ययो भवति । खाणोऽपवादः । फल्गुन्योः जातः फल्गुनः । फल्गुनी स्त्री । टकारो ङ्यर्थः ।

पुष्यार्थपुनर्वसुहस्तविशाखाऽनुराधाबहुलास्वातेरल्लुक् ॥३।१।९७॥ पुष्यार्थेभ्यः पुनर्वसु हस्त विशाखा अनुराधा बहुला स्वाति इत्येतेभ्यश्च परस्य खाणस्तत्र जातेऽर्थे नाम्नि अल्लुग्भवति । विकल्पापवादः । अल्लुचि स्त्रीप्रत्ययस्याणि लुक् । पुष्यार्थात्—पुष्ये जातः पुष्यः । तिष्यः । सिष्यः[7] । पुनर्वस्वोः—पुनर्वसुः । हस्ते—हस्तः । विशाखयोर्विशाखः । अनुराधासु अनुराधा । बहुलाः कृत्तिकास्तासु जातः बहुलः । स्वाती—स्वातिः ।

चित्रारेवतीरोहिण्याः स्त्रियाम् ॥३।१।९८॥ चित्रा रेवती रोहिणी इत्येतेभ्यः परस्य खाणः तत्र जातेऽर्थे स्त्रियां नाम्नि विषये अल्लुग् भवति । चित्रायां जाता चित्रा माणविका । रेवत्यां । रेवती । रोहिण्यां रोहिणी । रेवतीरोहिणीति रोहिणीरेवत्योर्नक्षत्र इति सप्रत्ययपाठात् अल्लुचि स्त्रीप्रत्ययस्य लुग्न भवति । स्त्रियामिति किम् ? चैत्रः । रैवतः । रोहिणः ।

खान्यश्वत्सशालात् ॥३।१।९९॥ अविष्ठादिभ्यो येऽन्ये नक्षत्रशब्दास्तेभ्यः परस्य खाणः वत्सशालशब्दाच्च परस्यौत्सर्गिकाणः तत्र जातेऽर्थे नाम्नि विषये अल्लुग्वा भवति । अभिजिति जातः अभिजित् । आभिजितः । अश्वयुजि जातः अश्वयुक् । आश्वयुजः । शतभिषजि—शतभिषक् । शातभिषजः । कृत्तिकासु जातः[8] कृत्तिकः । कार्त्तिकः । मृगशिरसि—मृगशिराः । मार्गशीर्षः । वत्सशालात्—वत्सशाले वत्सशालायां वा जातः वत्सशालः । वात्सशालः ।

स्थानान्तगोशालखरशालात् ॥३।१।१००॥ स्थानशब्दान्ताद् गोशालात् खरशालाच्च[9] प्रत्ययस्य तत्र जातेऽर्थे नाम्नि नित्यं अल्लुग् भवति । गोस्थानः । अश्वस्थानः । गोशालः । खरशालः । योगविभागो नित्यार्थः ।

[10]सोदर्यसमानोदर्यौ ॥३।१।१०१॥ [11]सोदर्य समानोदर्य इति तत्र जाते यप्रत्ययान्तौ निपात्येते । समानोदरे जातः [12]सोदर्यः । समानोदर्यः । पक्षे समानस्य भावः । निपातनादभिधेयव्यवस्था । नाम्नीत्यधिकाराच्च ।

---

१. अत्र म० । २. वुञ् क० । ३. —ति । अमावस्यः । अमावस्यकः । आमावस्यः म० । ४. अविष्ठः आविष्ठीयः म० । ५. आषाढयो—म० । ६. आषाढः । आषाढीयः म० । ७. सिष्यः म० । ८. जातः इति नास्ति म० पुस्तके । ९. च तस्य अत्र—म० । १०. सौदर्य म० । ११. सौदर्य म० । १२. सौदर्य म० ।

कालात्साधुपुष्यत्पच्यमाने ॥३।१।१०२॥ ङेरित्यव । सप्तम्यन्तात् कालविशेषवाचिनः साधौ पुष्यति अध्ययने चार्थे यथाविहितं प्रत्ययो भवति । हेमन्ते साधुः हैमन्तः[1] प्रावारः । शैशिरमनुलेपनम् । वसन्तेषु पुष्यन्ति वासन्त्यो लताः । ग्रैष्माः पाटलाः । शरदि पच्यन्ते शारदाः शालयः । ग्रैष्मा यवाः ।

उप्ते ॥३।१।१०३॥ ङेरिति कालादिति च वर्तते । ङेरिति सप्तम्यन्तात्कालवाचिनः उप्ते यथाविहितं प्रत्ययो भवति । शरद्युप्ताः शारदा यवाः । हेमन्ते हैमन्ता[2] यवाः । ग्रीष्मे ग्रैष्माः शालयः । निदाघे—नैदाघाः शालयः । योगविभाग उत्तरार्थः ।

आश्वयुज्या वुञ् ॥३।१।१०४॥[3] आश्वयुजीशब्दात् सप्तम्यन्तादुप्तेऽर्थे वुञ्प्रत्ययो भवति । ठणोऽपवादः । आश्वयुज्यामुप्ता आश्वयुजका माषाः । आश्विनीभिश्चन्द्रोपेताभिर्युक्ता पौर्णमासी आश्वयुजी । अश्विनीपर्यायः[4] आश्वयुक्शब्दः ।

ग्रीष्मवसन्ताद्वा ॥३।१।१०५॥ ग्रीष्म वसन्त इत्येताभ्यां सप्तम्यन्ताभ्यामुप्तेऽर्थे वुञ्प्रत्ययो वा[5] भवति । ऋत्वणोऽपवादः । ग्रैष्मकं सस्यम् । ग्रैष्मं सस्यम् । वासन्तकं सस्यम् । वासन्तं सस्यम् ।

देय ऋणे ॥३।१।१०६॥ ङेरिति कालादिति च वर्तते । सप्तम्यन्तात् कालवाचिनो देयेऽर्थे यथाविहितं प्रत्ययो भवति । यत्तद्देयमृणं चेद् भवति । मासे देयमृणं मासिकमृणम् । अर्धमासिकम् । सांवत्सरिकम् ऋणम् । मासे गते देयमित्यर्थः । ऋण इति किम् ? मासे देया भिक्षा । स्वातौ देयं स्वस्तिवाचनम् ।

कलाप्यश्वत्थयवबुसोमाव्यासैषमसोऽकः ॥३।१।१०७॥ कलापिन् अश्वत्थ यवबुस उमाव्यास ऐषमस् इत्येतेभ्यः कालवाचिभ्यस्तत्र देये ऋणेऽकप्रत्ययो भवति । ठणाद्यपवादः । यस्मिन् काले मयूराः केदारा इक्षवो वा कलापिनो भवन्ति स कालस्तत्साहचर्यात् कलापी । तत्र देयमृणं कलापकम् । यस्मिन्-कालेऽश्वत्था फलन्ति स कालोऽश्वत्थफलसहचरितोऽश्वत्थः[6] । तत्राश्वत्थम् । यस्मिन् काले यवानां बुसं भवति स कालः यवबुसं तत्र यवबुसकम्, उमा व्यस्यन्ते विक्षिप्यन्ते यस्मिन्काले स काल उमाव्यासस्तत्र उमाव्यासकम् । ऐषमोऽस्मिन् संवत्सरे देयमृणमैषकम् ।

ग्रीष्मावरसमाद् वुञ् ॥३।१।१०८॥ ग्रीष्म अवरसमा इत्येताभ्यां कालवाचिभ्यां तत्र देये ऋणे वुञ्प्रत्ययो भवति । अण्ठणोरपवादः । जित्वमाद्यच आरैजर्थम् । ग्रीष्मे देयमृणं ग्रैष्मकम् । अवरसमायाम् आवरसमकम् ।

संवत्सराग्रहायण्याष्ठण् च ॥३।१।१०९॥ संवत्सर आग्रहायणी इत्येताभ्या तत्र देये वुञ् ठण् च प्रत्ययौ भवतः । अण्ठणोरपवादः । संवत्सराद्विफले ऋणेऽण् प्राप्नोति । संवत्सरे देयमृणं सांवत्सरिकम् । सांवत्सरकम् । आग्रहायणिकम् । आग्रहायणकम् । वाग्रहणमकृत्वा ठण्चेति वचनमण्बाधनार्थम् ।

रुवति मृगे ॥३।१।११०॥ ङेरिति कालादिति च वर्तते । सप्तम्यन्तात्कालवाचिनः रुवत्यर्थे यथाविहितं प्रत्ययो भवति रुवंश्चेन्मृगो भवति । निशायां रुवन्मृगः नैशिकः । नैशो मृगः । प्रादोषिकः । प्रादोषो मृगः । मृग इति किम् ? निशायां रौत्युलूकः । प्रभाते रौति शकुनिः ।

जयिनि च ॥३।१।१११॥ ङेरिति कालादिति च वर्तते । जयोऽस्यास्तीति जयी तस्मिंश्च सप्तम्यन्तात् कालवाचिनो यथाविहितं प्रत्ययो भवति । निशायां जयी नैशिकः । नैशः । प्रादोषिकः । प्रादोषः । वासन्तः । वार्षिकः । केवलकालविषयजयायोगात् निशादिसहचरिताध्ययनादिवृत्तयो निशादयः प्रत्ययमुत्पादयन्ति । चकारः कालादित्यनुकर्षणार्थः[7] तेनोत्तरत्रानुवर्तते ।

---

१. हैमतः म० । २. हैमना म० । ३. आश्वयुजी म० । ४. चोऽश्वयु—म० । ५. वा इति म० नास्ति । ६. -तोऽश्वत्थम् म० । ७. -दित्यस्यानुकर्षणार्थः म० ।

भवे ॥३।१।११२॥ ङेरिति वर्तते। सप्तम्यन्ताद्भवेऽर्थे यथाविहितं प्रत्ययो भवति। भवतिरत्र सत्तार्थो न जन्यर्थः। जन्यर्थवान्[1] च प्रत्ययो भूत इति भवजातौ भिद्यते। क्षुद्रे भवः क्षौद्रः। माधुरः। नादेयः। राष्ट्रियः। पारीणः।

दिगादिभ्यश्छशाद्यः ॥३।१।११३॥ दिगादिभ्योऽङ्गांशाच्छरीरावयववचनाच्च सप्तम्यन्ताद् भवेऽर्थे यप्रत्ययो भवति। अणोऽपवादः। दिशि भवो दिश्यः। वर्ग्यः। अङ्गांशात्—दन्त्यः। कण्ठ्यः[2]। ओष्ठ्यः। पाद्यः। पद्यः। दिश्, वर्ग, पूग, गण, यूथ, पक्ष, धार्य, मित्र, मेधा, अन्तर्, पथिन्, उत्क, साक्षिन्, आदि, अन्त, मुख, जघन, मेध, न्याय, वंश[3], अनुवंश, देश, काल, वेश, आकाश इति दिगादिः। मुखजघनयोरनङ्गांशार्थं गणे ग्रहणम्। सेनाया यन्मुखं तत्र भवः मुख्यः। सेनाया यज्जघनं तत्र भवः जघन्यः। उदक्येति[4] रजस्वला नाम तत्रोदकात्तत्र साधुरित्येव यः।

मध्याच्छणादिना मक्च ॥३।१।११४॥ मध्यशब्दात्तत्र भवे छणादिना[5] इत्येते प्रत्यया भवन्ति मक्चास्यागमः। मध्यमीयः। माध्यमः। मध्यमा। मध्यन्दिनः।

जिह्वामूलाङ्गुलेश्च छः ॥३।१।११५॥ जिह्वामूल अङ्गुलि इत्येताभ्यां मध्याच्च तत्र भवे छप्रत्ययो भवति। यापवादः। जिह्वामूले भवः जिह्वामूलीयः। अङ्गुलीयः। मध्यीयः। मध्यग्रहणं मगभावार्थम्।

वर्गान्तात् ॥३।१।११६॥ वर्गान्तात्तत्र भवे छप्रत्ययो भवति। अणोऽपवादः। कवर्गीयो वर्णः। चवर्गीयो वर्णः।

यखौ चाशब्दे ॥३।१।११७॥ वर्गान्तात्तत्र भवे यखौ प्रत्ययौ भवतः छस्य न[6] शब्दे न चेत्स भवः शब्दे भवति। भरतवर्ग्यः। भरतवर्गीणः। भरतवर्गीयः। बाहुलिवर्ग्यः। बाहुलिवर्गीणः। बाहुलिवर्गीयः। युष्मद्वर्ग्यः। युष्मद्वर्गीणः। युष्मद्वर्गीयः। अस्मद्वर्ग्यः। अस्मद्वर्गीणः। अस्मद्वर्गीयः। अशब्द इति किम्? शब्दे छ एव। कवर्गीयो वर्णः।

इतिकुक्षिकलशिवस्त्यहेर्ढण् ॥३।१।११८॥ इति[7] कुक्षि कलशि वस्ति अहि इत्येतेभ्यः सप्तम्यन्तेभ्यः भवेऽर्थे ढण्प्रत्ययो भवति। अणाद्यपवादः। इतौ भवं दार्तेयं जलम्। कौक्षेयो व्याधिः। कालशेयं तक्रम्। वास्तेयं सूत्रम्। आहेयं विषम्।

आस्तेयम् ॥३।१।११९॥ आस्तेयमिति अस्तिशब्दात्तिङन्तप्रतिरूपकादव्ययाद् धनविद्यमानपर्यायात् ढण्, असृक्शब्दस्य वाऽस्त्यादेशाद् ढण् च निपात्यते तत्र भवे धने विद्यमाने। असृजि वा भवमास्तेयम्।

ग्रीवाया अण् च ॥३।१।१२०॥ ग्रीवाशब्दात् सप्तम्यन्ताद् भवेऽर्थेऽण्प्रत्ययो भवति ढण् च। यापवादः। ग्रीवायां भवं ग्रैवम्। ग्रैवेयकम्[8]।

चतुर्मासाण्णिन् ॥३।१।१२१॥ ञेणिति वर्तते। चतुर्मासशब्दात्तत्र भवेऽण्प्रत्ययो भवति णिन्नस्मिन् समुदायश्चेन्नाम भवति। चतुर्षु मासेषु भवा चातुर्मासी। पौर्णमासी। आषाढी। कार्तिकी। फाल्गुनी चोच्यते। णिन्नीति किम्? अन्यत्र चतुर्मासः। भव इत्यणः श्लुर्विद्[9]। गोरलुचोऽनपत्येऽज्यायादेरिति श्लुक्। अस्य[10] विधानं श्लुग्बाधनार्थमिति न भवति।

यज्ञे ख्यः ॥३।१।१२२॥ चतुर्मासाद्यात्तत्र भवेऽर्थे यज्ञे ख्यप्रत्ययो भवति। चतुर्षु मासेषु भवानि चातुर्मास्यानि।

गम्भीरपञ्चजनबहिर्देवात् ॥३।१।१२३॥ गम्भीर पञ्चजन बहिस् देव इत्येतेभ्यस्तत्र भवे ख्यप्रत्ययो भवति। अणादेरपवादः। गम्भीरे भवं गाम्भीर्यम्। पाञ्चजन्यम्। बाह्यः। दैव्यः।

---

१. –मच्प्रत्य—म०। २. कण्ठ्यः म०। ३. वंश म०। ४. उदक्येति म०। ५. छणादि- म०। ६. माध्यमः। माध्यमा। माध्यन्दिनः म०। ७. अशब्देन चेत्स म०। ८. इतिर्दधिमन्थनघटः म० टि०। ९. ग्रैवेयक् म०। १०. श्लुर्विद्—म०। ११. अस्य तु म०।

परिमुखादेरव्ययीभावात् ॥३।१।१२४॥ परिमुख इत्येवमादिभ्योऽव्ययीभावेभ्यस्तत्र भवे ञ्यप्रत्ययो भवति । अणोऽपवादः । परितो मुखं परिमुखम् । अतएव निपातनादव्ययीभावः । वर्जन एवात्र परिः । परिमुखे भवः पारिमुख्यः । पारिहनड्यः । पार्योष्ठ्यः । परिमुखादेरिति किम् ? औपकूलम् । औपमूलम् । औपशालम् । औपकुम्भम् । औपखलम् । अनुकूलम् । [1]अनुकुम्भम् । अनुखलम् । अव्ययीभावादिति किम् ? परिखलानो मुखस्य परिमुखस्तत्र भवः पारिमुख. । परिमुख, परिहनु, पर्योष्ठ, पर्युलूखल, परिरथ, परिखरि, उपखीर, अनुखीर, उपस्थूण, उपकपाल, अनुपथ, अनुपग, [2]अनुतिल, अनु[3]सीत, अनुमाष, अनुयव, अनुपूर्[4], अनुवंश—इति परिमुखादिः ।

पर्यनोर्ग्रामाट्टण् ॥३।१।१२५॥ परि अनु इत्येताभ्यां परो यो ग्रामशब्दस्तदन्तादव्ययीभावात्तत्र भवे ठण् भवति । अणोऽपवादः । ग्रामात् परि परिग्रामम्, ग्रामस्य समीपमनुग्रामम् तत्र भवः पारिग्रामिकः । आनुग्रामिकः ।

उपाज्जानुनीविकर्णात्प्राये ॥३।१।१२६॥ उप इत्येतस्मात्परे ये जानुनीविकर्णशब्दास्तदन्तादव्ययीभावाट्टण्प्रत्ययो भवति तत्र भवे प्राये यस्तत्र बाहुल्येन भवति स चेत् कदाचिद्भवति । जानुनः समीपमुपजानु.तत्र प्रायभव औपजानुकः सेवकः । औपजानुकं [5]शाकटकम् । औपनीविकं कार्षापणम् । औपनीविकं ग्रीवाराम[6] । औपकर्णकः सूचकः । प्राय इति किम् ? नित्यं मा भूत् । औपजानवं मांसम् । औपजानवं गदम्[7] । जानुशब्दोऽङ्गावयवो नोपजानुशब्द इति यो न भवति ।

अन्तःपूर्वात् ॥३।१।१२७॥ अन्तःशब्दपूर्वपदादव्ययीभावात् तत्र भवे ठण्प्रत्ययो भवति । अणोऽपवादः । अगारस्यान्तः अन्तरगारं तत्र भवः आन्तरगारिकः । आन्तर्गेहिकः । आन्तर्वेश्मिकः । आन्त.पुरिकः । अव्ययीभावादिति किम् ? अन्तर्गतमगारस्य अन्तःस्थं वाऽगारस्य अन्तरगारं तत्र भवमान्तरगारम् । आन्तःपुरम् । आन्तःकरणम् ।

ठोऽन्तःपुराद् रूढौ॥३।१।१२८॥ अन्त.पुरशब्दात् तत्र भवे ठप्रत्ययो भवति रूढौ विषये स चेदन्तःपुरशब्दः क्वचिद्रूढः एकपुरुषपरिग्रहे[8] स्त्रीसमुदायः । अन्तःपुरे भवा आन्तःपुरिका स्त्री । रूढाविति किम् ? पुरस्यान्तर्गतम् अन्तःपुरम् । यथा अन्तरङ्गुलो नखः इति तत्र भवः आन्तःपुर. । पुरस्यान्त्योऽन्त.पुरमित्यव्ययीभावाट्ठण् भवति । आन्तःपुरिकमिति[9] ।

कर्णललाटात्कः ॥३।१।१२९॥ रूढाविति वर्तते । सेह रूढिः समुदायस्य विशेषणम् । कर्ण ललाट इत्येताभ्यं तत्र भवे कप्रत्ययो भवति रूढौ । प्रकृतिप्रत्ययसमुदायश्चेन्क्वचिद्रूढो भवति । कर्णिका[10] कर्णाभरणविशेषः पद्मावयवश्च । ललाटिका । ललाटमण्डनम् । रूढाविति किम् ? कर्णे भवं कर्ण्यम् ।

क्रतो व्याख्याने च ग्रन्थात् ॥३।१।१३०॥ क्रम इति षष्ठ्यन्ताद्व्याख्यानेऽर्थे डेरिति सप्तम्यन्ताद् भवेऽर्थे ग्रन्थवाचिनो यथाविहितं प्रत्ययो भवति । ग्रन्थ. शब्दसन्दर्भः स व्याख्यायतेऽनयेति व्याख्यानम् । सुपां व्याख्यानं सौपम् । तिङां व्याख्यानं तैङम् । कार्तम् । प्रातिपदिकीयम् । चकारो डेर्भव इत्यस्य समुच्चयार्थः । भवव्याख्यानयोर्भवेऽडेश्च स्व इति सिद्धेऽणादिर्ढणादिश्च प्रत्ययः तत्रायमुभयोर्युगपदपवादविधानार्थः प्रक्रमः । योगविभाग उत्तरत्र द्वयोरधिकारार्थः । अपवादविधिवाक्येनास्यैकयोगत्वे चानुकृष्टत्वाद् डेर्भव इत्यस्य ततः परमननुवृत्तिः स्यात् । योगविभागे तु इहानुवृत्तिरनर्थिकेति द्वयोरुत्तरत्रानुवृत्तिर्भवति । उदाहरणोपन्यासस्त्वनुवादमात्रः । ग्रन्थादिति किम् ? पाटलिपुत्रस्याख्यानेषु कोसलमथुरायां भवः । अत्र क्रतुश्च इति ठण् न भवति ।

---

१. आनुकूलम् । आनुखलम् । म० । २. अनुगग म० । ३. अनुशीत म० । ४. अनुपूप म० । ५. शाटकम् म० । ६. ग्रीवोदाम म० । ७. गद्य म० । ८. परिग्रहे म० । ९. पुरिक इति म० । १०. कर्णिका कर्णिकश्चाथ पद्मार्धं पद्मकंकटा इति वैजयन्ती । कर्णिका करिहस्ताग्रे करमर्दाङ्गुलावपि । क्षुद्रकादिच्छदांशे च कर्णिका कर्णभूषणे । इति विश्वः म० टि० । ११. वेडसः स्व इति च सि—म० ।

ऋग्यजुरभिधानाम्नायाट्ठण् ॥३।१।१३१॥ ऋच् इत्येतस्माद्, द्युधकाद्, ऋकारान्ताद् इज्यादयो यागशब्देभ्यश्च ग्रन्थवाचिभ्यस्तस्य व्याख्याने तत्र भवे च ठण्प्रत्ययो भवति[1]। ऋचां व्याख्यानम् ऋचु भवं वा आर्चिकम्। द्युधवः—द्यौधिकम्। पौधिकम्। सौत्रिकम्। तार्किकम्। [2]बाह्विकम्। ऋकारान्तात्—धातुहौतृकम्। पाञ्चहौतृकम्। इज्यादयः—आग्निष्टोमिकम्। राजसूयिकम्। पाकयज्ञिकम्। नाक्षयज्ञिकम्। पाञ्चौदनिकम्। दाशौदनिकम्। इज्याग्रहणं बह्वृचः प्राय इत्यस्य प्रपञ्चः।

ऋषेरण्याये ॥३।१।१३२॥ ऋषिशब्देभ्यो ग्रन्थवाचिभ्यस्तस्य व्याख्याने तत्र भवे चाण्याये ठण्प्रत्ययो भवति। वासिष्ठस्य ग्रन्थस्य व्याख्यानं तत्र भवो वासिष्ठकोऽध्यायः। वैश्वामित्रकोऽध्यायः। अध्याय इति किम्? वासिष्ठो ऋक्। बह्वृचः प्राय इति प्रायवचनाति[3]प्राप्तिकलनाया विपर्ययं प्राप्ताध्याय एवेति नियमार्थम्[4]।

बह्वृचः प्रायः ॥३।१।१३३॥ बह्वृचो ग्रन्थवाचिनस्तस्य व्याख्याने तत्र भवे च प्रायः ठण्प्रत्ययो भवति। चात्वणत्रिकम्। तातानिकम्[5]। ब्रह्मणिकम्। प्राधमिकम्। आध्वरिकम्। [6]पौरश्चरणिकम्। नामाख्यातिकम्। प्रायवचनात् क्वचिन्न भवति। साहितम्।

पौरोडाशपुरोडाशाट्ठट्ठौ ॥३।१।१३४॥ पौरोडाश पुरोडाश इत्येताभ्यां ग्रन्थवाचिभ्यां तस्य व्याख्याने तत्र भवे च ठट् ठ इत्येतौ प्रत्ययौ भवतः। कर्णोष्ठगोऽवादः। वचनभेदाद्यथाबह्वृचाभावः। [7]ठण्ठयोः स्त्रिया विशेषः। पुरोडाशः पिष्टपिण्डास्तेषां संस्कारको मन्त्र. पौरोडाशस्तस्य [8]व्याख्यानं तत्र भवो वा पौरोडाशिकः। पौरोडाशिकी। पौरोडाशिका। पुरोडाशवहचरितो मन्त्र. [9]पुरोडाशस्तस्य व्याख्यानं तत्र भवो वा पुरोडाशिकः। पुरोडाशिकी। पुरोडाशिका।

छन्दसो यः ॥३।१।१३५॥ छन्दस्शब्दाद् ग्रन्थवाचिनस्तस्य व्याख्याने तत्र भवे च यप्रत्ययो भवति। छन्दसो [10]व्याख्यानं तत्र भवो वा छन्दस्यः।

शिक्षादेरञ्ञाण् ॥३।१।१३६॥ शिक्षा इत्येवमादिभ्यः छन्दश्शब्दाच्च ग्रन्थवाचिनस्तस्य व्याख्याने तत्र भवे चाऽण्प्रत्ययो भवति। ठणोऽपवादः। शिक्षाया व्याख्यानं तत्र भवो वा शैक्षः। आर्गयनः। छन्दसः—छान्दसः। एवं छन्दश्शब्दस्य द्वैरूप्यं भवति। अण्ग्रहणं ञ्णित्त्वज्ञापनार्थम्। [11]नैरायम्(नैपायम्)। वास्तुविद्यम्। शिक्षा, ऋग्यजन, पदव्याख्यान[12], छन्दोमान, छन्दोभाषा, छन्दोविचिति, न्याय, पुनरुक्त, निरुक्त, व्याकरण, निवाप[13], वास्तुविद्या, अङ्गविद्या, क्षत्रविद्या, त्रिविद्या, विद्या, उत्पात, उत्पाद[14], संवत्सर, मुहूर्त, निमित्त, उपनिषद्, इति शिक्षादिः। बह्वृचाम् ऋदनामुपादानं प्रायग्रहणस्य प्रपञ्चः।

ङसः स्वे ॥३।१।१३७॥ ङस इति षष्ठ्यन्तात् स्वे[15] सम्बन्धिनि यथाविहितमणादयो ढगादयश्च प्रत्यया भवन्ति। उशनोरिदमौशनसम्[16]। स्रौघ्नम्। माधुरम्[17]। यामुनः प्रस्थः। गाङ्गोऽनूप.। वार्क्षी शाखा। नादेयम्। राष्ट्रियम्। पारीणम्। भानवीयम्। श्यामवीयः। पाटलीपुत्रकः[18]। आम्रगुप्तायनेरपत्यमाम्रगुप्तायनिः। भवती भावतायनिरिति पृथङ्निर्दिष्टेऽपत्यादावर्थे। तेन ठणादयो दृष्यपुपामयमुदाफिञश्चेति वचनात् गोत्रोऽञ्जेति गोत्रग्रहणाद्राजन्यादिषु दैवेर्पातनग्रहणाच्च न भवन्ति। भावे हि दोषः गोत्रादञ्जनिञः[19] वुञश्शिष्यदण्डमाणव इति च सिद्धयतीति तदर्थकं स्यात्। देवदत्तस्यानन्तरः, ग्रामस्य समीपं, विंशतेरवयवः, एकः शतस्य, द्वौ सहस्रस्य पञ्चेत्यनभिधानान्न भवति। क्वचिदिति च वर्तते। ङस इति डेरित्यस्य निवृत्त्यर्थं द्वयं हि प्रवृत्तम्।

हलसीराट्ठञ् ॥३।१।१३८॥ हल सीर इत्येताभ्यां ङस् इति षष्ठ्यन्ताभ्यां स्वे द्वितीये सम्बन्धिनि ठण्प्रत्ययो भवति। अणोऽपवादः। हालिकम्, सैरिकम्।

---

१. -ति। अगादेरपवादः। म०। २. बाह्विकम्। म०। ३. -द्याप्ति कल्प-म०। ४. -र्थं वचनम्। म०। ५. तात्रणिकम् म०। ६. ठट्ठयोः म०। ७. व्याख्यानः म०। ८. पौरोडाश. म०। ९. व्याख्यानः म०। १०. नैपायं म०। ११. -ख्यान, छन्दोव्याख्यान म०। १२. निगम ङ०। १३. उत्पादा म०। १४. दक्षीयसस्य—म०। १५. -मम्। काण्डस्थम् म०। १६. माधुरम् म०। १७. -त्रकः प्राकारः म०। १८. दैवदातस्य म०। १९. -दुम्बेलि- म०।

समिध आधाने डेण्यण् ॥३।१।१३९॥ समिध इत्येतस्मात् षष्ठ्यन्तात् स्वे सम्बन्धिनि आधाने आधीयते येन समित् तस्मिन् डेण्यण्प्रत्ययो भवति । अणोऽपवादः । टकारो ङ्यर्थः । समिधामाधानो मन्त्रः सामिधेन्यो मन्त्रः । सामिधेनी ऋक् । सामिधेनीरन्वाह । पञ्चदश सामिधेन्यः ।

आग्नीध्रं गृहे ॥३।१।१४०॥ आग्नीध्रमिति अग्नीध् इत्येतस्माद् [1]ध्रण्प्रत्ययो [2]डस्त्वाभावश्च स्वे सम्बन्धिनि गृहे निपात्यते । अग्नीध् ऋत्विग्विशेषस्य गृहम् आग्नीध्रम् ।

रथात्सादेश्च वोढ्रङ्गे ॥३।१।१४१॥ नियमसूत्रमेतत् । रथशब्दात्सादेः सपूर्वाच्च रथशब्दात् स्वार्थे यः प्रत्ययः स रथस्य वोढरि रथाङ्ग एव भवति । रथस्याय वोढा रथ्यः । द्विरथ्यः । त्रिरथ्यः । रथस्येदं रथ्यं चक्रम् । रथ्यं युगम् । [3]अश्वरथ चक्रम् । आश्वरथं युगम् । वोढ्रङ्ग एवेति नियमादन्यत्र वाक्यमेव न प्रत्ययः । रथस्येद स्थानम् । अश्वरथस्यायं स्वामी ।

यः ॥३।१।१४२॥ रथाद् ङस इति षष्ठ्यन्तात् सादेः सपूर्वाच्च रथान्तात् स्वेऽर्थे सम्बन्धिनि यप्रत्ययो भवति । अणाद्यपवादः । रथ्यं चक्रम् । परमरथ्यम् । काष्ठरथ्यम् ।

वाहनादेरञ् ॥३।१।१४३॥ वाहनादे रथान्ताद् ङसः स्वेऽर्थेऽञ्प्रत्ययो भवति । यात्रादः । आश्वरथं चक्रम् । औष्ट्ररथम् । रासभरथम् ।

वाहनात् ॥३।१।१४४॥ वाहनवाचिनः षष्ठ्यन्तात् स्वे सम्बन्धिनि अञ्प्रत्ययो भवति । अणाद्यपवादः । औष्ट्रः । रासभः । हास्तो रथः ।

वाह्यपथ्युपकरणे ॥३।१।१४५॥ नियमोऽयम् । वाहनाद्योऽय प्रत्यय उक्तः स वाह्यपथ्युपकरणेष्वेव स्वविशेषेषु वेदितव्यः । आश्वो रथः । आश्व पन्था । आश्वं पल्ययनम् । आश्वो कशा । वाह्यपथ्युपकरण एवेति नियमादन्यत्र वाक्यमेव भवति न प्रत्ययः । अश्वानां पुंसः [4] ।

वहेस्तुरिट् च ॥३।१।१४६॥ वहेस्तृप्रत्ययान्ताद् ङस इति षष्ठ्यन्ताद् अञ्प्रत्ययो भवति तस्य च तुरिडागमो भवति । वोढुः स्वं वाहित्रम् । संवोढुः स्वं सावहित्रम् । सवोढा सारथिः ।

द्वन्द्वाद्विवाहे वुच् ॥३।१।१४७॥ द्वन्द्वात् षष्ठ्यन्तात् स्वे सम्बन्धिनि विवाहे वैवाह्ये मैथुनिकायां वुच्प्रत्ययो भवति । अणाद्यपवादः । अत्रिभरद्वाजाना विवाहः अत्रिभरद्वाजिका । [5]वशिष्ठकाश्यपिका । भृग्वङ्गिरसिका । कुत्सकुशिकिका । गर्गभार्गविका । कुरुवृष्णिका । कुरुकाशिका । वुचिति चकारः वोरक इति सामान्यग्रहणविघातार्थः ।

वैरेऽदेवासुरादिभ्यः ॥३।१।१४८॥ द्वन्द्वात् षष्ठ्यन्ताद् देवासुरादिवर्जिताद् स्वे सम्बन्धिनि वैरे वुच्प्रत्ययो भवति । अणाद्यपवादः । अहिनकुलस्य स्वं वैरम् अहिनकुलिका । श्ववराहिका [6] । काकोलूकिका । वानरवशालक्ष्मिका [7] । अदेवासुरादिभ्य इति किम् ? देवासुरम्, राज्ञोऽपुरम् । देवासुरादयः प्रयोगगम्याः ।

चरणाद्वुञ् ॥३।१।१४९॥ चरणशब्दो वेदशाखानिमित्तकः तदध्यायिषु वर्तते । चरणात् षष्ठ्यन्तात् स्वेऽर्थे वुञ्प्रत्ययो भवति । ञकारो [8]ऽनुबन्धः अणादेर्बाधकः । कठानां स्वं काठकम् । चरकाणां चारकम् । [9]कलापाना कालापकम् । मोदाना मोदकम् । पैप्पलादाना पैप्पलादकम् । अर्चाभानाम् आर्चाभिकम् । वाजसनेयिना वाजसनेयिकम् [10] ।

---

१. -स्माद्रण् प्रत्य- म० । २. जस्त्वा- म० । ३. आश्वरथं चक्रम् । आश्वरथं युगम्- म० । ४. -कम् । आश्वरथं युगम्- म० । ५. पूसः म० । ६. वशिष्ठय- म० । ७. -ष्णाविशा- म० । ८. श्ववाहराहिका म० । ९. -क्काविनिका म० । १०. -रानुव- म० । ११. काळापानां म० । १२. वाजसनेयकम् म० ।

धर्माम्नाये ॥३।१।१५०॥ नियमोऽयम्। चरणाधोऽसौ वुञ्प्रत्ययो विहितः स धर्माम्नाययोरेव भवति। काठकः। कालापकः। [2]धर्माम्नाय एव नियमादन्यत्र वाक्यमेव न प्रत्ययः। कठानां क्षेत्रम्। कालापानां[3] गृहम्।

छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः ॥३।१।१५१॥ छन्दोग औक्थिक याज्ञिक बह्वृच इत्येतेभ्यः चरणेभ्यः नटशब्दाच्च तस्य स्वे विषये ञ्यप्रत्ययो भवति। चरणवुञोऽणश्चापवादः। स च धर्माम्नाययो[4]र्भवति। छन्दोगानां धर्मः आम्नायो वा छान्दोग्यः। औक्थिक्यः। याज्ञिक्यः। बाह्वृच्यम्[5]। नाट्यम्। धर्माम्नाय एवेति वाक्यभेदेन नियमाद् अन्यत्र वाक्यमेवेति न प्रत्ययः। नटानां गृहं कर्म नृत्तं नाट्यम्। नटस्य भावः कर्म वा[6] नाट्यम्।

आथर्वणोऽण् ॥३।१।१५२॥ आथर्वण इति आथर्वणिकशब्दस्य चरणवाचिनः अणिति [7]अण्णन्तत्वं निपात्यते स्वविषये। चरणवुञोऽपवादः[8]। स च धर्माम्नाययोरेव वेदितव्यः। आथर्वणिकानामयमाथर्वणो धर्मः। आथर्वण आम्नायः। आथर्वणी विद्या[9]। अण्णन्तत्वा[10]त्पुम्भावाभावश्च।

शाकलात् सङ्घोषाङ्कलक्षणे वा ॥३।१।१५३॥ शाकलशब्दाच्चरणवाचिनः षष्ठ्यन्तात् स्वसम्बन्धिनि अण्प्रत्ययो वा भवति तच्चेत् स्वं सङ्घो घोषोऽङ्को लक्षणो[11] वा भवति। शाकलेन[12] प्रोक्तस्याध्येतारः शाकलास्तेषां स्वं शाकलम्। सङ्घो घोषोऽङ्को वा। शाकलं लक्षणम्। वावचनाद्धर्माम्नाययोर्नियमितोऽपीह पक्षे वुञ् भवति। अङ्कलक्षणयोः को भेदः। लक्षणं लक्ष्यस्यैव स्वं यथा शिक्षादि। अङ्कः पुनर्लक्ष्ये स्वे गवादौ स्थितः स्वामिनोऽपि स्वं भवति। यथा स्वस्तिकादि।

गोत्रादञ्यञिञः ॥३।१।१५४॥ अजन्ताद्यञन्तादिञन्ताच्च गोत्रवाचिनः षष्ठ्यन्तात् स्वे नित्यमण्प्रत्ययो भवति। वुञोऽपवादः। तच्चेत्स्वं सङ्घो घोषोऽङ्को लक्षणं वा भवति। अग्नि वैदाना[13]त् स्वं वैदः सङ्घो घोषोऽङ्को वा[14]। लक्षणं वैदः। यञ्–गार्ग्याणां स्वं गार्गः सङ्घो घोषोऽङ्को वा। गार्गं लक्षणम्। इञ्–दाक्षीणां स्व[15] दाक्षः. सङ्घो घोषोऽङ्को वा। दाक्षं लक्षणम्। गोत्रादिति किम्? [16]सौगतनीयं सङ्घादि[17]। अञ्यञिञ इति किम्? औपगवकः सङ्घादिः।

वुञशिष्यदण्डमाणवे ॥३।१।१५५॥ गोत्रादिति वर्तते। गोत्रवाचिनः षष्ठ्यन्तात् स्वे शिष्यदण्डमाणववर्जिते वुञ्प्रत्ययो भवति। औपगवस्य स्वम् औपगवकम्। कापटवकम्। दाक्षकम्। प्लाक्षकम्। गार्ग्यकम्[18]। गार्ग्यायणकम्। स्त्रौचुकायनकम्। अशिष्यदण्डमाणव इति किम्? काण्वस्य स्वे काण्वाः शिष्याः दण्डमाणवा वा। गोकक्ष्यस्य स्वे गौकक्षाः। दाक्षेः स्वे दाक्षाः। प्लाक्षाः। साहकाः शिष्याः। अध्ययनार्थाः अन्तेवासिनः। दण्डप्रधाना माणवाः (दण्डमाणवाः) आश्रमिणां रक्षापरिचरणार्थाः।

रैवतिकादेरञ्छः ॥३।१।१५६॥ रैवतिकादेर्गोत्रवाचिनः तस्य स्वे छप्रत्ययो भवति। [20]वुञादेर्बाधकः। रैवतिकीयं[21] शकटम्। रैवतिकीयः सङ्घादिः[22]। गौरग्रीवीयाः[23] शिष्यदण्डमाणवाः। [24]ञ्नञिप्रतिषिद्धेऽपि रैवतिकस्य छः सिद्धयतीति। क्षेमधृत्वेश्च गहादिपाठादसङ्घावण्[25]। शेषेभ्यश्च [26]सङ्घादावन्यत्र बाऽञिञन्तत्वा-

---

१. काठकम्। कालापकम्। म०। २. -धर्मं आम्नायोवानि- म०। ३. कालापानां म०। ४. -धयोरेव म०। ५. बाह्वृच्यः म०। ६. वेति म०। ७. -नः कृते कलापः अ- म०। ८. अ(ण्ण)न्तो म०। ९. -मोरपवा- म०। १०. विद्यः म०। ११. -त्वाद्की पुम्भा- म०। १२. लक्षणं म०। १३. शाकल्येन म०। १४. विदानां स्वं म०। १५. वा वैदो लक्षणम् म०। १६. स्वः म०। १७. सौवगमीयं म०। १८. सङ्घादिः म०। १९. गार्गकम् म०। २०. आदिशब्देनाः परिग्रहः म० टि०। २१. रेवतीनक्षत्रं रोहिणरेवताद्यक्षत्र इति की। रेवत्यां जातीत्यणि तस्य चित्रारेवतीरोहिण्याः स्त्रियामिति वुलुच्यपि रेवती, रेवत्या अपत्यं रैवतिकः, अणिच्यत इति ठणि नदीभानुवीनाम्नोऽद्दोरिति यणि प्राप्ते रेवत्यादेरिणिति ठणि रैवतिकस्य स्वमिति अणिदोरुके तदपवादे उक्तेति वुञि प्राप्ते छः। म० टि०। २२. -दिः। रैवतिकीयाः शिष्यदण्डमाणवाः गौरग्रीवीयं शकटम्। गौरग्रीवीयः सङ्घादिः। गौरग्री- म०। २३. गौरी ग्रीवाऽस्येति गौरग्रीवः, तस्यापत्य गौरग्रीविः, अत्र इञ्। तस्य स्वम्। म० टि०। २४. ञ्नञि म०। २५. -दसङ्घादौ म०। २६. सङ्घादौत्वण् म०।

ञाप्नोतीति ञविधानम् । रैवतिक, गौरग्रीवि, स्वापिचि, क्षेमवृत्ति, औदमेधि, औदमहि, वैश्वदापि इति रैवतिकादिः ।

कौपिञ्जलहास्तिपदादण् ॥३।१।१५७॥ कौपिञ्जल हास्तिपद इत्येताभ्या गोत्रवाचिभ्यां तस्य स्वे ण्प्रत्ययो भवति । ञ्नाद्यैर्बाधकः । कुपिञ्जलस्यापत्यं कौपिञ्जलः । हस्तिपादस्य हास्तिपदाः । अतो विपाशनादण्पदभावो । तयोः स्वं कौपिञ्जलं शकटम् । कौपिञ्जलाः शिष्यदण्डमाणवाः । हास्तिपदं शकटम् । हास्तिपदाः शिष्यदण्डमाणवाः । अणाग्रहणं किमर्थम् ? न यथाविहितमित्येवाण् विज्ञायेत न च छः प्राप्नोति । तदभीष्टौ[2] रैवतिकादावेव पठयेयाताम् । वुञ्निवचनमनर्थकम्[3] । नैतदस्ति शिष्यदण्डमाणवेष्वसत्यग्रहणे ञ्नाद्यर्थमेतत् स्यात् । तत्र हि वुञ्प्रतिषिद्धः । णित्वं ङीपुभावाभावार्थम् । कौपिञ्जली स्थूणा[4] । हास्तिपदी स्थूणा[5] ।

ङसेरागते ॥३।१।१५८॥ ङसेरिति पञ्चम्यन्ताद् आगतेऽर्थे यथाविहितमणादयो ठणादयश्च प्रत्यया भवन्ति । स्नुघ्नादागत. स्नौघ्नः । माधुर.[6] । बार्हस्पत्यः । नादेयः । राष्ट्रियः । पारीणः । स्नुघ्नादागच्छन् वृक्षमूलादागत इत्यत्र[7] वृक्षमूलान्नान्तरीयकापायान्न प्रत्ययो भवत्यनभिधानात् ।

विद्यायोनिसम्बन्धाद्वुञ् ॥३।१।१५९॥ विद्याकृतो योनिकृतश्च सम्बन्धो यस्य तद्वाचिनः पञ्चम्यन्तादागते वुञ्प्रत्ययो भवति । आचार्यादागतम् आचार्यकम् । औपाध्यायकम् । शैष्यकम् । आत्विलकम् । मातुलकम् । मातामहकम् । पैतामहकम् ।

पित्र्यं वा ॥३।१।१६०॥ पित्र्यमिति पितृशब्दाद्योनिसम्बन्धवाचिनः पञ्चम्यन्तादागते यप्रत्ययो वा निपात्यते । ठणोऽपवादः । पितुरागतं पित्र्यम्, पैतृकं वा ।

उष्ठण् ॥३।१।१६१॥ ऋकारान्ताद्विद्यासम्बन्धवाचिन योनिसम्बन्धवाचिनश्च ङसेरागते ठण्प्रत्ययो भवति । वुञोऽपवादः । होतुरागतं होतृकम् । पौतृकम् । प्राशास्तृकम् । प्रातिहर्तृकम् । शास्तृकम् । योनिसम्बन्धात्– मातृकम् । भ्रातृकम् । स्वासृकम् । दौहितृकम् । यातृकम् । नानान्दृकम् । मातुरागता मातृकी विद्या । ठण् इति ङीप्रत्ययः ।

आयस्थानात् ॥३।१।१६२॥ स्वामिग्राह्यो भाग आयः । तस्योत्पत्तिदेश आयस्थानम् । तद्वाचिनः पञ्चम्यन्तादागतेऽर्थे ठण्प्रत्ययो भवति । ञ्नाद्यैर्बाधकः । शुल्कशालाया आगतं शौल्कशालिकम् । आकरिकम् । आपणिकम् । गौल्मिकम् । दौवारिकम् ।

शुण्डिकादेरण् ॥३।१।१६३॥ शुण्डिक इत्येवमादिभ्यः पञ्चम्यन्तेभ्यः आगतेऽर्थेऽण्प्रत्ययो भवति । ठणादेरपवादः । शुण्डिकः[9] सुरापणः, तस्मादागतं शौण्डिकम् । औदपानम् । कार्कणम् । अण्ग्रहणं विस्पष्टार्थम् । यद्यनेनाप्यायस्थानाट्ठण् तीर्थादिवुञ् । कृकण पर्ण इत्येताभ्यां चछः स्यात् । वचनमनर्थकं स्यात्[10] । न चौदपानादिह इञणि वा विशेषोऽस्ति । अथ शुण्डिकादीनि सर्वाण्यायस्थानान्येव तदा वुञ्छबाधनार्थम्[11] । शुण्डिक, उदपान, कृकण, पर्ण, तृण, तीर्थ, स्थण्डिल, उपल, उदक, भूमि, पिप्पल इति शुण्डिकादिः[12] ।

नृहेतुभ्यो मयड्रूप्यौ वा ॥३।१।१६४॥ मनुष्यवाचिभ्यो हेतुवाचिभ्यश्च पञ्चम्यन्तेभ्य आगतेऽर्थे मयड् रूप्य इत्येतौ प्रत्ययौ वा भवतः । तयोर्यो मुक्ते यथाप्राप्तम् । वचनभेदाद्यथासंख्यं नास्ति । हेतुः कारणम् । नृग्रहणमहेत्वर्थम्[13] । देवदत्तमयम् । देवदत्तरूप्यम् । दैवदत्तम् । जिनदत्तमयम् । जिनदत्तरूप्यम् । जैनदत्तम् । अत्रापायेऽवयौ पञ्चम्यौ । हेतुभ्यः–समादागतं सममयम् । समरूप्यम् । समीयम् । विषममयम् ।

---

१. -नादेयाण् पक्षाद्यः म० । २. -ष्टौ ह रैवति- म० । ३. -नर्थकं स्यात् म० । ४. स्थूणः म० । ५. स्थूण्यः म० । ६. माधुरः म० । ७. -क्षान्तरीयकापायान्न भवत्यनभिधानात् म० । ८. अत् म० । ९. शुण्डिकः म० । १०. वचनमिदमन- म० । ११. अत् म० । १२. शुण्डिकादिः म० । १३. -र्थम् । देवदत्तादागतं दैव- म० ।

विषमरूप्यम् । विषमीयम् । महादिपाठाच्छः । पापमयम् । पापरूप्यम् । पापीयम् । दोषः । अत्र हेतौ पञ्चमी टकारौ उच्चार्यौ । देव(वत्त)मयी । वत्तमयी ।

गोत्रादङ्कवत् ॥३।१।१६५॥ गोत्रवाचिनः शब्दात् पञ्चम्यन्ताद्यागतेऽर्थे ङसः स्वेऽङ्कु[1] इव प्रत्ययो भवति । यथा भवति वैदः[2] । गार्ग्यः[3] । दाक्षोऽङ्कुः इत्यण् । तथेहापि–विदेभ्यः आगतं वैदम् । गार्गम् । दाक्षम् । यथा भवति । औपगवकम् । कापटवकम् । नाडायनकम् । गार्ग्यायणकम् । इति बुञन्ते तथेहापि । औपगवीभ्य आगतम् औपगवकम् । कापटवकम् । नाडायनकम् । गार्ग्यायणकम् । एवं रैवतिकादेवश्च[4] रैवतिकेभ्य आगतं रैवतिकीयम् । गौरग्रीवीयम् । कौपिञ्जलहास्तिपदादण् कौपिञ्जलादागतं कौपिञ्जलम् । हास्तिपदम् ।

प्रभवति ॥३।१।१६६॥ ङसेरिति वर्तते । ङस इति पञ्चम्यन्तात् प्रभवति प्रकाशमाने यथाविहितं प्रत्यया भवन्ति । प्रथमत उपलभ्यमानता प्रभवः । अन्ये प्रभवति जायमान इत्याहुः । जात इति भूते सप्तम्यन्तादयं तु पञ्चम्यन्ताद्वर्तमाने । हिमवतः प्रभवन्ती हैमवती गङ्गा । काश्मीरी वितस्ता[5] ।

त्यदादेर्मयट् ॥३।१।१६७॥ त्यदादिभ्यः पञ्चम्यन्तेभ्यः प्रभवति मयट्प्रत्ययो भवति । तन्मयी । भवन्मयम् । भवन्मयी ।

वैडूर्यः ॥३।१।१६८॥ वैडूर्य इति विडूरशब्दाद् ङसेः प्रभवति ष्यञ्प्रत्ययो निपात्यते । विडूरात्प्रभवति वैडूर्यो मणि । विडूरे ग्रामे ह्ययं संस्क्रियमाणो मणितपाः ततः प्रभवति वालवायात्तु पर्वतात् प्रभवन्नसौ न मणिः किन्तु पाषाणः । अथवा वालवायशब्दस्य विडूरभावश्च निपात्यते । वालवायपर्याय एव[6] विडूरशब्दः । प्रतिनियतविषयाश्च रूढयो भवन्ति । यथा जित्वरीति वणिक्षु वाराणसीति प्रसिद्धिः ।

टः प्रोक्ते ॥३।१।१६९॥ प्रकर्षेण व्याख्यातमध्यापितं वा प्रोक्तं न तु कृतम् । कृते ग्रन्थे इत्येव गतत्वात् । तस्मिन् ट इति तृतीयान्ताद् यथाविहितं प्रत्ययो भवति । भद्रबाहुना[7] प्रोक्तानि [8]भाद्रबाह्वाण्युत्तराध्ययनानि, [9]याज्ञवल्केन प्रोक्तानि याज्ञवल्कानि ब्राह्मणानि । पाणिनिना प्रोक्तं पाणिनीयम् । आपिशलिना प्रोक्तमापिशलम् । काशकृत्स्निनना काशकृत्स्नम् ।

मौदादिभ्यः ॥३।१।१७०॥ मौद इत्येवमादिभ्यष्टान्तेभ्यः प्रोक्ते यथाविहितं प्रत्ययो विहितोऽपवादैर्बाधितः सो[10] न भवति । मोदेन प्रोक्तस्य बोद्धव्येतारो मौदाः । पैप्पलादाः । [11]माधुकरी वृत्तिः । सौलभानि ब्राह्मणानि । मौदादयः प्रयोगगम्याः । अणपवादबाधनार्थो योगः ।

कठादिभ्यः श्लुग्वेदे ॥३।१।१७१॥ कठ इत्येवमादिभ्यः प्रोक्ते यः प्रत्ययस्तस्य श्लुग्भवति । स चेत्प्रोक्तो वेदो भवति । कठेन प्रोक्तस्य वेदस्य बोद्धव्येतारः कठाः । चरकाः । कर्कराः । वेणुकण्ठाः । [12]गौरण्डाः । वैदेन ब्राह्मणमिति बोद्धव्येत्रोनियमाद् बोद्धव्येत्रोः प्रत्ययस्य श्लुक् [13]शस्त्राभिधानं तु चरणाद्वुञित्यादिना विहितेन काठकं कालापकमिति । वेद इति किम् ? चरकेण प्रोक्ताः चरकाः श्लोकाः । चरको वैशम्पायनः । कठादयः प्रयोगगम्याः ।

तित्तिरिवरतन्तुखण्डिकोखाच्छण् ॥३।१।१७२॥ तित्तिरि वरतन्तु खण्डिक उख इत्येतेभ्यस्तृतीयान्तेभ्यः प्रोक्तेऽर्थे छण्प्रत्ययो भवति । अणपवादः । स चेत् प्रोक्तो वेदो भवति । तित्तिरिणा प्रोक्तस्य वेदस्य बोद्धव्येतारः तैत्तिरीयाः । वारतन्तवीयाः । खाण्डिकीयाः । औखीयाः । वेद इति किम् ? तित्तिरिणा प्रोक्ताः तैत्तिराः श्लोकाः । वेदादौ बोद्धव्येत्रोनियमः ।

छगलिनो ण्डिन् ॥३।१।१७३॥ छगलि इत्येतस्माट्टः प्रोक्ते वेदे ण्डिन् प्रत्ययो भवति । अणपवादः । छागलिना प्रोक्तस्य वेदस्य बोद्धव्येतारः छागलेयिनः ।

---

१. ङ्क अङ्क म० । २. वैदः म० । ३. गार्गः म० । ४. रैवतिकादेश्चः म० । ५. वितस्ता म० । ६. एव वा म० । ७. भद्रबाहुणा म० । ८. भाद्रबाह्वाण्युत्त- म० । ९. यज्ञवल्केन म० । १०. सोऽण् अ- म० । ११. माधुरी म० । १२. गौरण्डाः म० । १३. शस्त्राभिधानं- म० ।

शौनकादिभ्यो णिनि ॥३।१।१७४॥ शौनक इत्येवमादिभ्यस्तृतीयान्तेभ्यः प्रोक्ते वेदे णिनिप्रत्ययो भवति। अणाद्यपवादः। शौनकेन प्रोक्तस्य वेदस्य बोद्ध्रव्येतारः शौनकिनः। शार्ङ्गरविणः[1]। [2]वाजसनेयिनः। वेद इति किम्? शौनकीया शिक्षा। शौनक, शार्ङ्गरव, वाजसनेय, कापेय, शाण्डेय, स्कन्द, स्कन्ध, वेददर्श, रज्जुभार, रज्जुकण्ठ, कठशार, [3]कुशाय, तल, वकार, पुरुषा, [4]शक, हरिद्रु, तुम्बुरु, उलप, आलम्बि, पृक्षिङ्ग, कमल, ऋचाभ, आरुणि, ताण्डय, श्यामायन, आदायन इति शौनकादयः। आकृतिगणोऽयम्। तेन भाल्लविना प्रोक्तस्य ब्राह्मणस्य बोद्ध्रव्येतारो भाल्लविनः[5]। शाटयायनिनः। ऐतरेयिणः इत्यादि सिद्धं भवति। ब्राह्मणमपि वेद एव। मन्त्रब्राह्मणं हि वेदः।

पुराणे कल्पे ॥३।१।१७५॥ तृतीयान्तेऽर्थे णिनिप्रत्ययो भवति। अणाद्यपवादः। स चेत्प्रोक्तः पुराणः कल्पो भवति। पिङ्गेन प्रोक्तः कल्पः पुराणश्चेत् पैङ्गी कल्पः। अरुणपराजेन अरुणपराजो कल्पः। पुराण इति किम्? आश्मरथः कल्पः। आश्मरथ्येन[6] प्रोक्तः कल्प इतरकल्पेभ्यः [7]आरतीय इति श्रूयते।

काश्यपकौशिकाद्वेदवच्च ॥३।१।१७६॥ काश्यप कौशिक इत्येताभ्यां तृतीयान्ताभ्यां प्रोक्ते पुराणे कल्पे णिनिप्रत्ययो भवति। छापवादः। वेदवच्चास्मिन् कल्पे कार्यं भवति। काश्यपेन प्रोक्तस्य पुराणस्य कल्पस्य बोद्ध्रव्येतारः काश्यपिनः। कौशिकेन कौशिकिनः। काश्यपिनां धर्म आम्नायो वा काश्यपकम्। [8]कौशिकीना कौशिककम्। वेदवच्चेत्यतिदेशात् वेदेन ब्राह्मणमिति बोद्ध्रव्येतृविषयता चरणाद्वुञ् इति प्रत्ययश्च भवति। वेदवच्चेत्यतिदेशार्थं वचनम्।

शिलालिपाराशर्याभिक्षुसूत्रे ॥३।१।१७७॥ शिलालिन् पाराशर्य इत्येताभ्यां प्रोक्ते यथासङ्ख्यं नटसूत्रे भिक्षुसूत्रे चाभिधेये णिनिप्रत्ययो भवति। अणपवादः। वेदवच्चास्मिन् कार्यं भवति। नटानामध्ययनं नटसूत्रम्। भिक्षूणामध्ययनं भिक्षुसूत्रम्। शिलालिना प्रोक्तस्य [9]बोद्ध्रव्येतारः शैलालिनो नटाः। पाराशर्येण प्रोक्तस्य भिक्षुसूत्रस्य बोद्ध्रव्येतारः पाराशरिणो भिक्षवः। [10]शैलालिकः। पाराशरकम्। नटभिक्षुसूत्र इति किम्? शैलालम्। पाराशरम्।

कृशाश्वकापिलेयकर्मन्दादिन् ॥३।१।१७८॥ नटभिक्षुसूत्र इति वर्तते। तच्चासम्भवं विशेषणम्। कृशाश्व कापिलेय इत्येताभ्यां टान्ताभ्यां नटसूत्रे, कर्मन्दाद् भिक्षुसूत्रे प्रोक्ते इन्प्रत्ययो भवति। अणछयोरपवादः। वेदवच्चास्मिन् कार्यं भवति। कृशाश्विनो नटाः। कापिलेयिनो नटाः। कर्मन्दिनो भिक्षवः। काश्यपिश्वकम्[11]। कापिलेयम्। कार्मन्दकम्।

एकदिशि ॥३।१।१७९॥ ट इत्येव। ट इति तृतीयान्तादेकदिशि यथाविहितं प्रत्ययो भवति। एका समाना साधारणी[12] दिग्यस्य स एकदिक् तुल्यदिगित्यर्थः। सुदाम्ना एकदिक् सौदामनी विद्युत्। सुदामा नाम पर्वतः। यस्या दिशि विद्युत् तदेक[13]दिगुच्यते। हेमेन[14] हैमवती। त्रैकुटी[15]। पैलु[16]माली।

तस् ॥३।१।१८०॥ ट इति तृतीयान्तादेकदिशि तसित्ययं प्रत्ययो भवति। पूर्वेण यथास्वमणादयो डणादयश्च विहिताः। प्रत्ययान्तरमिदं सर्वप्रकृतिविषयं विधीयते। सुदामतः। हेमवतः। त्रिककुतः। पीलुमा[17]लतः।

यश्चोरसः ॥३।१।१८१॥ उरस् इत्येतस्मात् तेनैकदिशि य इत्ययं प्रत्ययो भवति। तसित्ययं प्रत्ययो भवति। तमित्ययं चाणपवादः। उरसा एकदिक् उरस्यः। उरस्तः। उर[18]सस्तमध्ययम्।

---

१. शार्ङ्गरवीणः म०। २. वाजसनेयीनः म०। ३. कुशापत्य कवकार म०। ४. पुरुषांशक म०। ५. भाल्लाविनः म०। ६. साट्यायनिनः म०। ७. -यान्तात्प्रोक्ते म०। ८. अणाद्यपवादः म०। ९. आश्मरथ्येन म०। १०. आरातीय म०। ११. कौशिकिनाम कौशिकिकम् म०। १२. प्रोक्तस्य नटसूत्रस्य म०। १३. शैलालकः म०। १४. कापिलेयकम् म०। १५. साधारणा म०। १६. तेनैकदि- म०। १७. हेम हैम- म०। १८. त्रैकुकटी म०। १९. पैलुमूली म०। २०. पीलुमूलतः म०। २१. उरस्तसस्तमध्यम- म०।

उपज्ञाते ॥३।१।१८२॥ ट इत्येव । प्रथमतो विनोपदेशेन वा ज्ञातमुपज्ञातम् । तस्मिन्नर्थे ट इति तृतीयान्ताद् यथाविहितं प्रत्ययो भवति । पाणिनिनोपज्ञातं पाणिनीयमकालकं व्याकरणम् । काशकृत्स्नं[1] गुरुलाघवम् ।

नाम्नि कृते ॥३।१।१८३॥ ट इति तृतीयान्तात् कृत उत्पादितेऽर्थे यथाविहितं प्रत्ययो भवति नाम्नि प्रत्ययान्तं चेत् कस्यचिन्नाम भवति । मक्षिकाभिः कृतं माक्षिकम्[2] । सरघाभिः[3] सारघम् । गर्मुद्भिः कृतं गार्मुतम् । गर्मुकाभिः गार्मुकम् । मुक्तिकाभिः मौक्तिकम् । क्षुद्राभिः क्षौद्रम् । भ्रमरैः भ्रामरम् । वटरैः वाटरम् । वातपैः वातपम् । वातपशब्दश्चान्तो नाम न भवति । किं तर्हि ? अणन्तमेवेत्यणेव भवति न वक्ष्यः । नाम्नीति किम् ? मक्षिकाभिः कृतं शकृत् ।

कुलालादेर्वुञ्[4] ॥३।१।१८४॥ कुलाल इत्येवमादिभ्यष्टान्तेभ्यः कृते वुञ्प्रत्ययो भवति नाम्नि सञ्ज्ञायाम् । कुलालेन[5] कौलालकम् । वार्धटिकम्[6] । नाम्नीत्यभिधेयनियमार्थम् । तेन घटघटीशरावोदञ्चनादिभाण्डं कौलालकम् । नान्यत् कुलालकृतम् । शूर्पपिटकपटलिकापच्छिकादिभाण्डं वास्टकम् । नान्यत् । एवमन्यत्राप्यभिधेयनियमः । कुलाल, वर्धट, कर्मार, निषाद, चण्डाल, सेना, सीरध्र[7], देवराज, परिषद्, वधू[10], रुरु[11], रुद्र[12], अनडुह्, ब्रह्मन्, कुम्भकार, श्वपाक इति कुलालादिः ।

छन्दस्योरस्यौरससर्वचर्मणसार्वचर्मीणाः ॥३।१।१८५॥ छन्दस्य उरस्य औरस सर्वचर्मण सार्वचर्मीण इत्येते शब्दाः ट इति तृतीयान्तात् कृते यादिप्रत्ययान्ता निपात्यन्ते । नाम्नीत्यधिकारा[13]भिधेयनियमः । छन्दसा इच्छया कृतः छन्दस्यः । न तु प्रवचनेन गायत्र्यादिना वा । निपातनात् क्वचिदन्यत्रापि भवति । ओ[14] श्रावयेति चतुरक्षरम् । अस्तु श्रौषडिति चतुरक्षरम् । ये यजामहे इति पञ्चाक्षरम् । यजेति द्व्यक्षरम् । वषट्कारश्चेत्येष सप्तदशाक्षरः छान्दस्यः । यज्ञमनुविहितः । स्वार्थेऽत्र[15] प्रत्ययः । यथाऽनुष्टुभादि[16]रक्षरसमूहः छन्दः तथैषा सप्तदशानामक्षराणा समूहश्छन्दस्य उच्यते । उरसा निर्मितः उरस्यः पुत्रः । अत्र यप्रत्ययः । तथा औरसः पुत्रः, अत्राण् । सर्वचर्मणा कृतः सर्वचर्मीणः । सार्वचर्मीणः । अत्र खञौ । स[17]शब्दस्य कृतापेक्षस्य चर्मणा योगे समासोऽपि निपातनादेव ।

ग्रन्थे ॥३।१।१८६॥ ट इति तृतीयान्तात् कृतेऽर्थे ग्रन्थे यथाविहितं प्रत्ययो भवति । ग्रन्थः शब्दसन्दर्भः । वारुरुचानि वाक्यानि । चौलू[18]काः श्लोकाः । जैननन्दिनः संग्रहः । सिद्धसेनीयस्तवः । अनामार्थं वचनम् ।

अमोऽधिकृत्य ॥३।१।१८७॥ कृते ग्रन्थे इति वर्तते । अमो द्वितीयान्ताद् अधिकृत्य कृतेऽर्थे ग्रन्थे यथाविहितं प्रत्ययो भवति । अधिकृत्य प्रस्तुते[19] इत्यर्थः । तदपेक्षा द्वितीया । भद्रामधिकृत्य कृतो ग्रन्थो भाद्रः । सुभद्रां सौभद्रः । सुतारां सौतारः । सुलोचनां सौलोचनः । भीमरथमधिकृत्य कृताऽऽख्यायिका भैमरथी । ग्रन्थ इति किम् ? भद्रामधिकृत्य कृतः प्रासादः । वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता । उर्वशीसुमनोहरा । अधिब्रह्मणम् । सीताहरणमित्युपचाराद्ग्रन्थे तात्स्थ्यम् ।

ज्योतिषम् ॥३।१।१८८॥ ज्योतिषमिति ज्योतिरशब्दाद् द्वितीयान्तादधिकृत्य कृते ग्रन्थेऽण्प्रत्ययो ज्योत्वाभावश्च निपात्यते । ज्योतींषि अधिकृत्य कृतो ग्रन्थः ज्योतिषम् ।

छन्देन्द्रजननादिभ्यः प्रायश्छः ॥३।१।१८९॥ छन्दसमासादिन्द्रजननादिभ्यश्चामन्तेभ्योऽधिकृत्य कृते ग्रन्थे प्रायः छप्रत्ययो भवति । अणाद्यपवादः । प्रायश्शब्दः शाकल्यस्य किंचिन्न्यूनतामाह । प्रायविषयः प्रायः । छन्दात्—श्रीमतीवजजछीयम् । ध्येनकपोतीयम् । शब्दार्थसम्बन्धीयम् । वाक्यपदीयम् । द्रव्यपर्यायीयम् ।

---

१. काशकृत्स्निना उपज्ञातम् इन् इत्यञ् म० टि० । २. माक्षिकं मधु म० । ३. -भिः कृतं सार- म० । ४. पुक्तिकाभिः कृतं पौक्तिकम् म० । ५. -देर्ञ् म० । ६. -लेन कृतं कौला- म० । ७. वार्धटकम् म० । ८. सरावो वर्धमानकः इत्यमरः म० टि० । ९. सीरध्र म० । १०. बहूय म० । ११. रुरु इति नास्ति म०पु० । १२. रुद्र म० । १३. -सङ्गिके- म० । १४. दि म० । १५. -त्र थः म० । १६. -दिरक्षरसमूहः छन्दः म० । १७. सर्वशब्द- म० । १८. आस्तृकाः म० । १९. प्रस्तुत्येत्यर्थः म० ।

इन्द्रजननादिभ्यः—इन्द्रस्य जननमिन्द्रजननं तदधिकृत्य कृतं काव्यम् इन्द्रजननीयम् । प्रद्युम्नप्रत्यायमनीयम् । प्रद्युम्नोदयनीयम् । सीताहरणीयम् । यदुशिक्षीयम् । शिशुक्रन्दीयम् । केचित्तु–शैशुक्रन्दमिच्छन्ति । इन्द्रजननादयः प्रयोगतोऽनुसर्तव्याः । प्राय इति किम् ? दैवासुरम् । राक्षसासुरम् । नौणमुख्यम् । प्रायग्रहणं द्वन्द्वार्थम् । एवं च द्वन्द्वात्प्राय इति इन्द्रजननादिभ्य इत्यस्यैव प्रपञ्चः ।

गच्छति पथि दूते ॥३।१।१९०॥ अम इति वर्तते । अमः द्वितीयान्तात् गच्छत्यर्थे पथि दूते[4] च यथाविहितं प्रत्ययो भवति । स्नुघ्नं गच्छन् सौघ्नः । माधुरः[5] । नादेयः । राष्ट्रियः पन्था दूतो वा । पथि स्वेषु गच्छत्सु नद्धेतुः पन्थाः गच्छतीत्युच्यते । स्नुघ्नादिप्राप्तिर्वा पथो गमनम् । पथि दूत इति किम् ? स्नुघ्नं गच्छति देवदत्तः । पाटलिपुत्रं गच्छति नौः पण्यं वणिग्वा ।

अभिनिष्क्रामति द्वारे ॥३।१।१९१॥ अम इत्येव । अमो द्वितीयान्तादभिनिष्क्रामति[6] अभिगच्छतीत्यर्थे द्वारे यथाविहितं प्रत्ययो भवति । स्नुघ्नमभिनिष्क्रामति सौघ्नम् ।[7] माधुरः । नादेयः । राष्ट्रियः । द्वारम् । करणस्येयमभिनिष्क्रामतीति स्वातन्त्र्यविवक्षा यथा साध्वसिः छिनत्तीति । रचनाबहिर्भावे वा निष्क्रमिः । यथा गृहकोणे निष्क्रान्त इति । द्वार इति किम् ? स्नुघ्नमभिनिष्क्रामति देवदत्तः ।

भजति ॥३।१।१९२॥ अम इति वर्तते । अमो द्वितीयान्माद् भजतीत्यर्थे यथाविहितं प्रत्ययो भवति । स्नुघ्नं भजति [8]सौघ्नम् । माधुरः । नादेयः । राष्ट्रियः ।

महाराजाचित्ता[9]ददेशकालाट्ठण् ॥३।१।१९३॥ महाराजशब्दाद्देशकालवर्जितं यदचित्तं तद्वाचिनश्च शब्दाद् अमन्ताद् भजति ठण्प्रत्ययो भवति । अणादेर्बाधकः । महाराजं भजति माहाराजिकः । अचित्तात्—अपूपान् भजति आपूपिकः[10] । मौदकिकः । [11]पायसिकः । अदेशकालादिति किम् ? सौघ्नः । पूर्वातनः । अचित्तादिति प्राप्तिः प्रतिषिध्यते ।

वासुदेवार्जुनाद्वुच् ॥३।१।१९४॥ वासुदेव अर्जुन इत्येताभ्यां भजति [12]वुच्प्रत्ययो भवति । छवुञोरपवादः । वासुदेवशब्दो हि सञ्ज्ञाशब्दः । क्षत्रियाख्याप्यस्ति । अर्जुनशब्दः क्षत्रियाख्या । वासुदेवं भजति वासुदेवकः । अर्जुनक[13] । किं वुजुच्यते न क ? वासुदेवीं भजति वासुदेवकः । अर्जुनीमर्जुनकः ।

गोत्रक्षत्रियेभ्यः प्रायो वुञ् ॥३।१।१९५॥ गोत्रवाचिभ्यः क्षत्रियवाचिभ्यश्च द्वितीयान्तेभ्यो भजति वुञ्प्रत्ययो भवति प्रायः । अणाद्यपवादः । ग्लुचुकायनी भजति ग्लौचुकायनिकः । ग्लौचुकायनिकः । औपगवकः[14] । गार्गकः । गार्ग्यायणकः । क्षत्रियेभ्य.—नाकुलकः । साहदेवकः । दौर्योधनकः । दौःशासनकः । बहुवचनं क्षत्रियविशेषपरिग्रहार्थम् । प्राय इति किम् ? [15]पाणिनिं भजति पाणिनीयः । पौरवीय. ।

सरूपाद् ब्रेरा[16]ज्यवत्सर्वम् ॥ ३।१।१९६ ॥ राष्ट्राज्ञः सरूपाद्राजापत्येऽञ्त्रिरिति प्रस्तुत्य सरूपाद्यो ब्रिरुक्तः तदन्तस्यामन्तस्य भजति राष्ट्रवत् सर्वं प्रकृतिः प्रत्ययश्च भवति । राष्ट्रवाचिनी या प्रकृतिः वृजि इत्यादिः ततश्च यः प्रत्ययः वृजिमद्राद्देशात्क इत्यादिना विहितः तदुभयं आर्ज्य इत्यादेः सरूपाद् ब्रेरस्मिन् विषये भवतीत्यर्थः । आर्ज्यं आर्ज्यौ वृजीन् वा भजति वृजिकः । मार्द्रं मार्द्रौ मद्रान् वा भजति मार्द्रकः[17] । अत्र कः । पाण्ड्यं पाण्ड्यौ पाण्डून्[18] वा भजति पाण्डवकः । आङ्गकः । वाङ्गकः । कालिङ्गकः । पाञ्चालकः । वैदेहकः । औदुम्बरकः । तैलखलकः । बहुविषयेभ्य इति वुञ् । कौरवः । योगन्धरकः । यौगन्धरः । कुरुयुगन्ध-

---

१. यमशिक्षीयम् म० । २. -मितीच्छ- म० । ३. राक्षासुरम् म० । ४. क्षुते म० । ५. माधुरः म० । ६. अभिनिर्ग- म० । ७. माधुरः म० । ८ स्नौघ्नः । माधुरः । म० । ९. -त्तादेश म० । १०. -पिकः । शाष्कुलिकः । मौ- म० । ११. क्षैरेयं पायसं प्रोक्तं परमान्नं च सूरिभिः इति हलायुधः म० द्वि० । १२ अच् म० । १३. आर्जुनकः म० । १४. -वकः । दाक्षकः । गा-म० । १५. पाणिनं म० । १६. राष्ट्रव-म० । १७. मद्रकः म० । १८. पाण्ड्यान् म० ।

रादिति वा [1]वुञ् । ऐदशकः । [2]कोपान्त्यादित्यण् । सारूप्यादिति किम् ? पौरवीयः पुरु राजा । अनूषण्डो जनपदः । इति सारूप्यं नास्ति । पुरुद्वयजनपदेति पुरुग्रहणं [3]सारूप्यार्थम् । [4]त्रेरिति किम् ? पञ्चालान् ब्राह्मणान् भजति पाञ्चालः । सर्वग्रहणं प्रकृत्यतिदेशार्थम् । तत्र वाज्यमद्रपाण्डया: प्रयोजयन्ति । अन्यत्र हि नास्ति विशेषः ।

सोर्निवासादस्य ॥ ३।१।१९७ ॥ सोः प्रथमान्तान्निवासवाचिनस्तस्येति[5] षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति । निवसन्त्यस्मिन्निति निवासो देश उच्यते । स्रुघ्नो निवासोऽस्येति स्रौघ्नः । माथुरः । नादेयः । राष्ट्रियः । दोश्च इत्यादौ दोर्यः सुस्तदन्तादिति विशेषणं सोर्निवासादिति ज्ञापकं [6]सूचयति न सोऽस्य निवास इत्येषः प्रक्रमः ।

अभिजनात् ॥३।१।१९८॥ सोर्निवासादस्येति वर्तते । सोः प्रथमान्तादभिजनान्निवासोऽस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति । अभिजनः पूर्वबान्धवाः । तत्र वासा[7]दुपचारेणाभिजनवृत्तेरभिजनत्वेन वाऽव्यवसितात् प्रत्ययः । स्रुघ्नोऽस्याभिजनो निवासः स्रौघ्नः । माथुरः । नादेयः । राष्ट्रियः ।

छोऽस्त्राजीवेऽत्रेः ॥३।१।१९९॥ अत्रिर्योऽभिजनो निवासस्तदभिधायिनः प्रथमान्तादस्येति षष्ठ्यर्थे छप्रत्ययो भवति । अणोऽपवादः । अस्त्राजीवे अस्त्रमायुधमाजीव्यं जीविका यस्य तस्मिन्नायुधजीविन्यभिधेये इत्यर्थः । हृद्गोलः पर्वताभिजननिवासोऽस्यास्त्राजीवस्य हृद्गोलीयः । [8]अन्धधर्मीयः । खलीयः । भोजखलीयः । रोहितगरीयः अस्त्राजीवः । अस्त्राजीव इति किम् ? [9]अक्षोदः पर्वतोऽभिजनितो निवासोऽस्य आक्षोदो[10] ब्राह्मणः । पृथु पार्थिवः[11] । अत्रेरिति किम् ? साङ्काश्यकोऽस्त्राजीवः ।

तूदिवर्मत्या ढण् ॥३।१।२००॥ तूदि वर्मति इत्येताभ्यां प्रथमान्ताभ्यामभिजनवासवासिभ्यामस्येत्यस्मिन्नर्थे ढण्प्रत्ययो भवति । तौदेयः । वार्मतेयः ।

शण्डिकादिञ्ञ्यादिशालातुराण्यात्र्छण् ॥३।१।२०१॥ शण्डिकादिभ्यः सिन्ध्वादिभ्यः शालातुरशब्दाच्च प्रथमान्तेभ्यः अभिजननिवास[12]वासिभ्योऽस्येत्यस्मिन्नर्थे यथासङ्ख्यं ण्य अञ् छण् इत्येते प्रत्यया भवन्ति । अणाद्यपवादः । शण्डिकादेर्ण्यः[13] । [14]शाण्डिक्यः । [15]कौचवार्यः । शण्डिक, कूचवार, सर्वसेन, सर्वकेश, शक, शट, रक, चणक, शङ्ख, वोढ्य[16] इति शण्डिकादिः । सिन्ध्वादेरञ् । सैन्धवः । [17]वार्णः । सिन्धु, [18]वर्ण, मधुमत्, कश्मीज, कश्मीर, सल्व, [19]गन्धार, किष्किन्ध, गव्यिक, उरस्, दरद, ग्रामणी, काण्ड, वरक इति सिन्ध्वादिः । साल्वन्तेभ्यो नृनृत्यवृजोरादादोऽञ् । शेषेभ्यो राष्ट्रलक्षणस्य ग्रामणीकाण्डवरकाभ्यां छस्य । शालातुरात् छण्–शालातुरीयः ।

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने वृत्तौ तृतीयाध्यायस्य प्रथमः पादः समाप्तः ॥ ३।१ ॥

---

१. अञ् म० । २. -त्यात्त्रेस्त्यण् म० । ३. -णं वा सरू- म० । ४. त्रिरिति म० । ५. अस्येति म० । ६. सूपपद्यते म० । ७. -सात् योगादुप- म० । ८. अन्धधर्मीयः म० । ९. औक्षोदः म० । १०. आर्क्षदो म० । ११. पार्थवः म० । १२. वासिभ्यः म० । १३. र्ण्यः म० । १४. शण्डिको ग्रामः, सोऽस्याभिजनः, म० टि० । १५. कौचवार्यः म० । कूचस्य वारः, कूचवारः सोऽस्याभिजनः, म० टि० । १६. ओघ म० । १७. वार्णवः म० । १८. वर्णु म० । १९ गान्धार म० ।

[द्वितीयः पादः]

ऊर्ध्वम् ॥३।२।१॥ अधिकारोऽयम् । यदित ऊर्ध्वमनुक्रमिष्यामः । तत्र यावत् प्रकृतिसामान्यविषयमनुपात-प्रकृतिविशेषं प्रत्ययान्तरमधिक्रियते । य इति तावदुणित्यपवादविषयं परिहृत्य अधिकृतं वेदितव्यम् ।

ढो जितजयदीव्यत्खनत्सु ॥३।२।२॥ ट इति तृतीयान्ताज्जिते जयति दीव्यति खनति चार्थे ठण् प्रत्ययो भवति । अक्षैर्जितमाक्षिकम् । शालाकिकम् । अक्षैर्जयन् आक्षिकः । शालाकिकः । अक्षैर्दीव्यन् आक्षिकः । शालाकिकः । अभ्रया खनन् आभ्रिकः[2] । खानित्रिकः । ट इतीह करणे तृतीया वेदितव्या नान्यत्रानभिधानात् । तेन देवदत्तेन जितम् । धनेन जितम् । इत्यत्र न भवति । अभ्रया खनन्नङ्गुल्या खनतीत्यत्र सत्यप्यङ्गुलेः करणत्वे मुख्यः करणभावोऽभ्रया एव नाङ्गुल्या इति अङ्गुलेर्न भवति । यथा ग्रामादायच्छन् वृक्षमूलादागत इति ।

संस्कृते ॥३।२।३॥ ट इति वर्तते । ट इति तृतीयान्तात् संस्कृते ठण्प्रत्ययो भवति । सतः[3] उत्कर्षा-धानं संस्कारः । दध्ना संस्कृतं दाधिकम् । [4]शार्ङ्गवैरिकम् । मारीचिकम् । उपाध्यायेन संस्कृतः औपाध्यायिकः शिष्यः । विद्यया वैद्यिकः । योगविभाग उत्तरार्थः ।

कोपान्त्यकुलस्थाद्ण् ॥३।२।४॥ कोपान्त्यात् कुलस्थशब्दाच्च तेन संस्कृतेऽण्प्रत्ययो भवति । कोपान्त्यात्–तित्त्रिणिकेन संस्कृतं तैत्त्रिणिकम् । मरण्डयकेन मारण्डयकम् । दर्दुरकेण–दार्दुरकम् । कुलस्थात्–कौलस्थम् । कुलस्थेत्यपरे प्रातिपदिकमाहुः ।

तरति ॥३।२।५॥ ट इति वर्तते । तृतीयान्तात्तरति ठण्प्रत्ययो भवति । [5]उडुपेन तरन् [6]औडुपिकः । काण्डव्लविकः । शारप्लविकः । गौपुच्छिकः ।

नौद्व्यचष्ठः ॥३।२।६॥ नौशब्दात् द्व्यच्कात्च शब्दरूपात् या टा तृतीया तदन्तात्तरति ठप्रत्ययो भवति । नावा तरति नाविकः । नाविका । पादिकः । प्लविकः । तृतिकः । वाहुकः ।

चरति ॥३।२।७॥ ट इति तृतीयान्ताच्चरति गच्छति भक्षयति च ठण्प्रत्ययो भवति । [7]तन्त्रेणार्थ-द्वयस्यापि परिग्रहः । गच्छति—हस्तिना चरन् हास्तिकः । शाकटिकः । आकषिकः । भक्षयति—दध्ना चरति दाधिकः । शार्ङ्गवैरिकः ।

पर्पादेष्ठट् ॥३।२।८॥ पर्प इत्येवमादिभ्यस्तृतीयान्तेभ्यश्चरति ठट्प्रत्ययो भवति । पर्पेण चरति पार्पिकः । पार्पिकी । आश्विकः । आश्विकी । पर्प, अश्व, अश्वत्थ, रथ, व्याल, व्याल इति पर्पादिः ।

पदिकः ॥३।२।९॥ पदिक इति पादशब्दात्तेन चरति ठट्प्रत्ययो पद्भावश्च निपात्यते । पादाभ्यां चरन् पदिकः ।

श्वगणाद्वा ॥३।२।१०॥ श्वगणशब्दात् तेन चरति ठट्प्रत्ययो वा भवति । तेन भुक्ते पक्षे ठण्प्रत्ययो भवति । श्वगणेन चरन् श्वगणिकः । श्वगणिकी । श्वागणिकः । श्वागणिकी ।

वेतनादेर्जीवति ॥३।२।११॥ ट इत्येव । वेतन इत्येवमादिभ्यः तृतीयान्तेभ्यो जीवत्यर्थे [8]ठट्प्रत्ययो भवति । वेतनेन जीवन् वैतनिकः । वाहिकः । वेतन, वाह, अर्द्धवाह, धनुस्, दण्ड, धनुर्दण्ड, जालवेश, उपवेश, पेषण, भृति[9], उपस्था, उपस्थान, सुख, शय्या, उषित, उपनिषद्, स्फिग, [10]आल, उपदेश, पाद इति वेतनादिः ।

---

१. -धिकरिष्यते म० । २ -कः । कौदालिकः । खा- म० । ३. सतो गुणस्य गुणान्तराधानं संस्कारः म० टि० । ४. शार्ङ्गवेरिकम् म० । ५. उडुपेन म० । ६. औडुपिकः म० । ७. तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे । एकस्यैवोभयार्थत्वे कुटुम्बव्यापृतावपि म० टि० । ८. ठण् म० । ९. भृति । उपवेशे उप- म० । १०. चाल म० ।

वस्नक्रयविक्रयेभ्यष्ठः ॥३।२।१२॥ वस्न क्रय विक्रय इत्येतेभ्यस्तेन जीवति ठप्रत्ययो भवति । वस्नं मूल्यम्—तेन जीवन् वस्निकः । क्रयिकः । विक्रयिकः । क्रयविक्रयिकः । बहुवचनं क्रयविक्रयौ क्रयविक्रयाश्च क्रयविक्रया इत्येकशेषद्योतनार्थम् ।

आयुधात् ॥३।२।१३॥ आयुधशब्दात् तेन जीवति ठञ्ठौ प्रत्ययौ भवतः । आयुधेन जीवन् आयुधीयः । आयुधिकः । आयुधिका । आयुधाट्ठणो. स्त्रियां विशेषः ।

व्रातीनञ् ॥३।२।१४॥ व्रातीनञ् इति व्रातशब्दात्तेन जीवति खञ्प्रत्ययो निपात्यते । नानाव्रातीया अनियतवृत्तयः शरीरायासजीविनः सङ्घाः व्राताः, तत्कर्मणा जीवन् व्रातीनः । तेषामेवान्यतम उच्यते वान्यः । निपातनं हि रूढ्यर्थम् । स्त्रियं पुम्भावार्थम् । व्रातीनावार्यः ।

भस्त्रोत्सङ्गादेष्ठट्ठण् हरति ॥३।२।१५॥ [1]तृतीयान्तेभ्यो भस्त्रादिभ्य उत्सङ्गादिभ्यश्च हरत्यर्थे यथासङ्ख्यं ठट्ठण् इत्येतौ प्रत्ययौ भवतः । भस्त्रया हरन् भस्त्रिकः । भस्त्रिकी । [2]भरणिकः । भरणिकी । ठण्—औत्सङ्गिकः । औष्ट्रपिकः[3] । भस्त्रा, भरण[4], शीर्ष, भार[5], असक्थार, इति भस्त्रादिः । उत्सङ्ग, उष्ट्रपु[6], उत्पुट, पिटक, पिटाक इत्युत्सङ्गादिः ।

विवधवीवधात् ॥ ३।२।१६ ॥ विवध वीवध इत्येताभ्यां तेन हरति प्रत्येकं ठट्ठणौ प्रत्ययौ भवतः । विवधेन हरन् विवधिकः । विवधिकी । वैवधिकः । वैवधिकी । वीवधेन हरन् वीवधिकः । वीवधिकी । वैवधिकः । वैवधिकी । विवधवीवध-शब्दौ पथिकार्थे पर्यायेण वर्तेते ।

अण् कुटिलिकायाः ॥ ३।२।१७ ॥ कुटिलिकाशब्दाट्टान्ताद् हरत्यण् प्रत्ययो भवति । कुटिलिकया हरन् मृगो व्याधं कौटिलिको मृगः । कुटिलिकया अङ्गारान् हरन् कौटिलिकः कर्मारः ।

निवृत्तेऽक्षद्यूतादेः ॥ ३।२।१८ ॥ ट इत्येव । अक्षद्यूत इत्येवमादिभ्यस्तृतीयान्तेभ्यो निर्वृत्ते ठण्-प्रत्ययो भवति । अक्षद्यूतेन निर्वृत्तमाक्षद्यूतिकं वैरम् । जाङ्घाप्रहृतिकं वैरम् । अक्षद्यूत, जङ्घाप्रहृत, पाद-सेवन, कण्ठमर्दन, गतागत, यातोपयात, अनुगत इत्यक्षद्यूतादिः ।

भावादिमः ॥ ३।२।१९ ॥ भाववाचिनो भावप्रत्ययान्तात् तेन निर्वृत्ते इमप्रत्ययो भवति । पाकि-मम् । सेकिमम् । त्यागिमम् । दानिमम्[7] । कुट्टिमम् । सम्मूर्च्छिमम् ।

क्तिरिमे ॥ ३।२।२० ॥ क्तिप्रत्ययान्तं शब्दरूपमिमप्रत्ययपरमेव प्रयोक्तव्यम् । पाकेन निर्वृत्तं पक्ति-मम् । वापेन उप्तिमम् । करणेन कृतिमम् । वाक्यनिवृत्त्यर्थमर्थान्तर[8]निवृत्त्यर्थं वचनम् ।

याचिताऽपमित्यात्कण् ॥ ३।२।२१॥ याचित अपमित्य इत्येताभ्यां टान्ताभ्यां निर्वृत्ते कण्प्रत्ययो भवति । याच्ञा याचितम् । तेन निर्वृत्तं याचितकम् । अपमित्य प्रतिधानेन निर्वृत्तमपमित्यकम् ।

संसृष्टे ॥ ३।२।२२ ॥ ट इत्येव तृतीयान्तात् संसृष्टेऽर्थे ठण्प्रत्ययो भवति । [9]संसृष्टं सम्मिश्रमेकी-भूतम् । दध्ना संसृष्टं दाधिकम् । शार्ङ्गवैरिकम् । पैप्पलिकम् । वैशिका भक्षाः । आशुचिकमन्नम् ।

चूर्णलवणमुद्गादिनाण् ॥ ३।२।२३ ॥ चूर्ण लवण मुद्ग इत्येतेभ्यः शब्देभ्यश्च इति तृतीयान्तेभ्यः संसृष्टेऽर्थे यथासङ्ख्यं इन, अ, अण्, इत्येते प्रत्यया भवन्ति । चूर्णेन संसृष्टाश्चूर्णिनोऽपूपाः । चूर्णिन्यो धानाः । लवणेन संसृष्टः लवणः सूपः । लवणः शाकः । लवणा यवागूः । मुद्गैः संसृष्टः मौद्गः ओदनः । मौद्गा यवागूः । संसृष्टविवक्षायां ठण्बाधनार्थम् । चूर्णादिन्वचना[10]भिधानं ह्यगतिका गतिः । लवणशब्दो[11] द्रव्यशब्दो गुणशब्दश्च । तत्र द्रव्यशब्दो लवणग्रहणं प्रयोजयति ।

---

१. ट इति तृती- म० । २. भरटिकः । भरटिकी म० । ३. औष्ट्रिकः म० । ४. भरट भरण म० । ५. -र, शीर्षभार अ- म० । ६. उष्ट्रपु म० । ७. दानिमम् म० । ८. स्वोगनि- म० । ९. संसृष्टः म० । १०. नमभि- म० । ११. शब्दात् म० ।

व्यञ्जनैरुपसिक्ते ॥ ३।२।२४ ॥ व्यञ्जनवाचिनस्तृतीयान्तादुपसिक्तेऽर्थे ठण्प्रत्ययो भवति । सूपेन उपसिक्तः सौपिकः ओदनः । दाधिक ओदनः । पूर्तिकः सूपः । तैलिकं शाकम् । व्यञ्जनैरिति किम् ? उदकेनोपसिक्त ओदनः । [1]व्यञ्जनशब्दोऽयं रूढिशब्दः सूपादौ वर्तते । उपसिक्त इति किम् ? सूपेन [2]सृष्टा स्थाली । उपसिक्तमित्योदनादिकमुच्यते । व्यञ्जनैः संसृष्ट उपसिक्त एव । उपसिक्ते च व्यञ्जनैरेव संसृष्टे प्रत्ययो यथा स्यादिति प्रकृतिप्रत्ययार्थव्यवस्थार्थं वचनम् । व्यञ्जनैरिति बहुवचनं स्वरूपविधिनिरासार्थम् । ट इति कृते तृतीयानुवाद एव ।

ओजस्सहोऽम्भसा वर्तते ॥३।२।२५॥ ओजस् सहस् अम्भस् इत्येतेभ्यः तृतीयान्तेभ्यो वर्तत इति वर्तमाने ठण्प्रत्ययो भवति । वृत्तिरात्मयापना चेष्टा वा । ओजसा बलेन वर्तमान ओजसिकः । सहसा प्रहसनेन पराभवेन साहसिकः । अम्भसा जलेन आम्भसिकः ।

तत्प्रत्यनोर्लोमकूलेपात् ॥३।२।२६॥ तदिति द्वितीयान्तात् प्रति अनु इत्येताभ्यां परो यो लोम कूल ईप इति तदन्ताद् वर्तमाने ठण्प्रत्ययो भवति । प्रतिलोमं वर्तमानः प्रातिलोमिकः । आनुलोमिकः । प्रातिकूलिकः । आनुकूलिकः । प्रातीपिकः । आन्वीपिकः । सर्वप्रक्रियाविशेषणात् प्रत्ययः ।

परेर्मुखपार्श्वात् ॥३।२।२७॥ परि इत्यनस्मात् परो यो मुखशब्दः पार्श्वशब्दश्च तदन्ताद् द्वितीयान्तादुर्तमाने ठण्प्रत्ययो भवति । परिमुखं वर्तमानः पारिमुखिक., परिपार्श्वं [3]पारिपार्श्विक । परिवर्जने सर्वतोभावे वा स्वामिनो मुखं वर्जयित्वा वर्तमानः । परितो मुखं यतो यतो वा स्वामिनो मुखं ततस्ततो वर्तमानः पारिमुखिकः सेवकः । एवं पारिपार्श्विक. ।

दधानेऽवृद्धेर्गर्ह्ये ॥३।२।२८॥ तदिति वर्तते । तदिति द्वितीयान्ताद् वृद्धिशब्दवर्जिताद् दधाने प्रयच्छति ठण्प्रत्ययो भवति । योऽसौ ददाति[4] (दधाति) स चेद्गर्ह्यो निन्द्यो भवति । अन्यायेन दानाद् द्विगुणार्थं द्विगुणमेकं तद्दधानो द्वैगुणिकः । त्रैगुणिक. । वृधुषि वृद्धिम् । वृद्धयर्थं ददानो वार्धुषिकः । अल्पं दत्त्वा बहु जिघृक्षन्नयमन्यायकारी निन्द्यते । अवृद्धेरिति किम् ? वृद्धि दत्ते । वृद्धिशब्देन वाक्यमेव न वृत्तिः । गर्ह्य इति किम् ? द्विगुणं प्रयच्छत्यधमर्णं ।

कुसीदाट्टट् ॥३।२।२९॥ तदिति द्वितीयान्तात् कुसीदशब्दाद् ददाने (दधाने) गर्ह्ये ठट्प्रत्ययो भवति । कुसीदं वृद्धिः । तदर्थमपि द्रव्यं कुसीदं तद्ददा(धा)नः कुसीदकः[5] । कुसीदकी ।

दशैकादशाट्टश्च ॥३।२।३०॥ तदिति द्वितीयान्ताद् दशैकादशशब्दाद् ददाने (दधाने) गर्ह्ये ठश्च ठट् च प्रत्ययौ भवतः । एकादशार्थाः[6] दश दशैकादशं शब्देनोच्यते[7] । तान् ददा(धा)नो दशैकादशिकः, स्त्री दशैकादशिका दशैकादशिकी वा । ठठोः स्त्रियां विशेष. । दशैकादशादित्यत एव निपातनादकारान्तत्वम् । तच्च वाक्ये प्रयोगार्थम् । दशैकादशान् ददातीति । अन्ये दशैकादश प्रयच्छतीति विगृह्णन्ति । तदप्यबाधकान्यपि निपातनानि भवन्तीत्युपपद्यते ।

रक्षत्युञ्छतोः ॥३।२।३१॥ तदिति वर्तते । तदिति द्वितीयान्ताद् [8]रक्षत्युञ्छति ठण्प्रत्ययो भवति । समाजं रक्षन् सामाजिकः । सामवायिकः । नागरिकः । [9]सान्निवेशिकः । बदराण्युञ्छन्[10] बादरिकः । श्यामाकिकः । नैवारिकः ।

मीनमत्स्यपक्षिमृगार्थाद्घ्नति ॥३।२।३२॥ तदित्येव । मीनशब्दात् मत्स्यार्थात् पक्ष्यर्थाद् मृगार्थाच्च शब्दाद् द्वितीयान्ताद् घ्नति हन्त्यर्थे ठण्प्रत्ययो भवति । मीनान् घ्नन् मैनिकः । मत्स्यान् घ्नन् मात्सिकः ।

---

१. निष्ठानं सेमनं तच्च व्यञ्जनं स्याद् घृतादि च इति वैजयन्ती म० टि० । २. संसृष्टा म० । ३. पारिपार्श्विकम् म० । ४. दत्ते म० । ५. कुसीदिकः कुसीदिकी म० । ६. -शार्थो दश म० । ७. नोच्यन्ते म० । ८. रक्षदुञ्छ- म० । ९. सन्निवेशो निकर्षणम् इत्यमरः- म० टि० । १०. युञ्छिन्वन् म० ।

शाष्करिकः । शाष्कुलिकः । पक्षि-पाक्षिकः । शाकुनिकः । मायूरिकः । दैत्तिरिकः । मृग—मार्गिकः । हारिणिकः । सौकरिकः । नैयङ्कवः । अर्थग्रहणं स्वरूपपर्यायविशेषपरिग्रहार्थम् । मीनग्रहणादन्यस्य मत्स्यपर्यायस्य न भवति । अजिह्मान् हन्ति । अनिमिषान् हन्ति ।

परिपन्थं तिष्ठति च ॥३।२।३३॥ परिपन्थशब्दाद्द्वितीयान्तात् तिष्ठति च घ्नति चार्थे ठण्प्रत्ययो भवति । परिपन्थं तिष्ठन् घ्नन् वा पारिपान्थिकश्चोरः । परिवर्जने सर्वतोभावे वा । द्वितीयाप्रकरणे द्वितीयोच्चारणं लौकिकप्रदर्शनार्थम् । तेन वाक्येऽपि परिपन्थशब्दः साधुर्विज्ञायते । अन्यथा परिपन्थशब्दस्य प्रत्ययसन्नियोगे परिपन्थादेशो विज्ञायेत ।

परिपथम् ॥३।२।३४॥ तिष्ठतीति वर्तते । परिपथशब्दाद् द्वितीयान्तात् तिष्ठत्यर्थे ठण्प्रत्ययो भवति । परिपथं तिष्ठन् पारिपथिकः । [1]परिपथमिति द्वितीयोच्चारितेति प्रक्रमाभेदेन परिपथमिति [2]द्वितीयान्तम् ।

माथोत्तरपदपदव्याक्रन्दाद्धावति ॥३।२।३५॥ तदित्येव । माथ उत्तरपदं यस्य तस्मात् पदवीशब्दादाक्रन्दशब्दाच्च द्वितीयान्ताद्धावति ठण्प्रत्ययो भवति । दण्डमाथं धावद् दाण्डमाथिकः । माथः पथिपर्यायः । पदवी धावन् पादविकः । आक्रन्दम् आक्रन्दिकः । आक्रन्दन्ति यत्र स देश आक्रन्दः । आक्रन्दत इति वा । आर्तायनं शरणमुच्यते । अन्तग्रहणमकृत्वा माथोत्तरपदेत्युत्तरपदग्रहणं बहुप्रत्ययपूर्वव्युदासार्थं बहुमाथं धावति ।

पश्चात्यनुपदात् ॥३।२।३६॥ तद्धावतीति वर्तते । पश्चातीति प्रकृतिविशेषणं पश्चादर्थः । पश्चादर्थे वर्तमानादनुपदशब्दाद् द्वितीयान्ताद् धावति ठण्प्रत्ययो भवति । पदस्य पश्चादनुपदम् । अनुपदं धावन् आनुपदिकः । प्रत्यासाद्य धावन्नित्यर्थः । पश्चातीति किम् ? अनुपदं धावति दैर्घ्येऽनुः समीपे गतादिषु प्रादय इति समासेन भवति ।

परदारादीन् यति ॥३।२।३७॥ परदार इत्येवमादिभ्यो यति गच्छत्यर्थे ठण्प्रत्ययो भवति । परदारान् गच्छति पारदारिकः । गौरुतल्पिकः । परदारादयः प्रयोगगम्याः ।

प्रतिपथाट्ठञ्च ॥३।२।३८॥ प्रतिपथ इत्येतस्माद् द्वितीयान्ताद् यति ठप्रत्ययो भवति ठण् च । पन्थानं पन्थानं पथोऽभिमुखमिति वा प्रतिपथं यन् प्रतिपथिकः, प्रातिपथिको वा ।

पदोत्तरपदपदार्थललामप्रतिकण्ठाद् गृह्णति ॥३।२।३९॥ पदोत्तरपदात् पद अर्थ ललाम प्रतिकण्ठ इत्येतेभ्यश्च द्वितीयान्तेभ्यो गृह्णत्यर्थे ठण्प्रत्ययो भवति । पूर्वपदं गृह्णन् पौर्वपदिकः । औत्तरपदिकः । आदिपदिकः । आन्तपदिक. । प्रतिकण्ठ—प्रातिकण्ठिकः ।

धर्माधर्मौ चरति ॥३।२।४०॥ धर्म अधर्म इत्येताभ्यां द्वितीयान्ताभ्यां चरत्यर्थे ठण्प्रत्ययो भवति । चरतिरासेवायां तात्पर्येणानुष्ठाने । धर्मं चरन् तात्पर्येण [3]उत्तिष्ठन् धार्मिकः । अधर्म—आधर्मिकः ।

समूहात् समवेते ॥३।२।४१॥ समूहवाचिभ्यो द्वितीयान्तेभ्यः समवेते तादात्म्यापन्ने तदेकदेशीभूतेऽर्थे ठण्प्रत्ययो भवति । बहुवचनं स्वरूपविधिनिरासार्थम् । समूहं समवेतः सामूहिकः [4] । सांसदिकः । सामवायिकः । गौष्ठिकः । तदेकदेशीभावमनुभवन्नेवमुच्यते समवेत्यापन्नते [5] तु समकेति [6] शब्दो नास्ति । यथा सुप्तोत्थिते सुप्तसु [7] शब्द इति न भवति ।

परिषदं ण्यः ॥३।२।४२॥ परिषदमिति परिषद् इत्येतस्माद् द्वितीयान्तात् समवेते ण्यप्रत्ययो भवति । ठणोऽपवादः । परिषदं समवेतः पारिषद्यः ।

सेनां वा ॥३।२।४३॥ सेनाशब्दाद् द्वितीयान्तात् समवेते ण्यप्रत्ययो भवति वा । ठणोऽपवादः । पक्षे सोऽपि भवन्ति [8] । सेनां समवेतः [9] सैनिकः । सैन्यमिति स्वार्थेऽपि टक्ष्ण् वक्ष्यते ।

---

१. परिपन्थमिति म० । २. द्वितीया म० । ३. अनुतिष्ठन् म० । ४. -द्विकः । सामाजिकः म० । ५. -स्वापद्यते म० । ६. समवेत म० । ७. सुप्तशब्द म० । ८. भवति म० । ९. -वेतः सैन्यः सैनिकः म० ।

सुल्नातादीन् वृञ्वुत्ति ॥३।२।४४॥ सुल्नात इत्येवमादिभ्यो द्वितीयान्तेभ्यः वृञ्वृत्त्यर्थे ठण्प्रत्ययो भवति। सुल्नातं वृञ्वन् सौल्नातिकः। सौखराविकः। सौखशायनिकः। सौखशयिकः। सौखशयनिकः। सुल्नातादयः प्रयोगगम्याः।

प्रभूतादिभ्यो ब्रुवति ॥३।२।४५॥ तदित्येव प्रभूतादिभ्यो द्वितीयान्तेभ्यो ब्रुवत्यर्थे ठण्प्रत्ययो भवति। प्रभूतं ब्रुवन् [1]प्राभूतिकः। [2]पार्याप्तिकः। प्रभूतादयः प्रयोगगम्याः। क्रियाविशेषणात्प्रत्ययः।

माशब्दमित्यादिभ्यः ॥३।२।४६॥ माशब्दमित्येवमादिभ्यो वाक्येभ्यो ब्रुवत्यर्थे ठण्प्रत्ययो भवति। इतिशब्दो वाक्यपरामर्शार्थः। माशब्दमिति ब्रुवन् माशब्दिकः। मा शब्दं कार्षीरिति ब्रुवन्नित्यर्थः। कार्यशब्द इति ब्रुवन् कार्यशब्दिकः। नित्यशब्द इति नैत्यशब्दिकः, माशब्द[3] इत्यादयः प्रयोगगम्याः। वाक्यात् प्रत्ययविधानार्थं वचनम्।

शाब्दिकदार्दरिकलालाटिककौक्कुटिकाः[4] ॥३।२।४७॥ शाब्दिकादयः शब्दाः यथास्वं प्रसिद्धेऽर्थविशेषे ठण्प्रत्ययान्ता निपात्यन्ते। शब्दं कुर्वन् शाब्दिकः, यः कश्चित् शब्दं करोति काकभेकादिः स[5] स सर्वः शाब्दिकः। कस्तर्हि ? यः शब्दं जानाति वैयाकरणः। सो विनष्टं शब्दमुच्चारयन् शाब्दिकः। निपातनं हि रूढ्यर्थम्। एवं दार्दरिकः। दर्दरो घटो वादित्रं च। तत्र वादित्रं कुर्वन्नेवमुच्यते। ललाटं पश्यन् लालाटिकः सेवकः। दृष्टं स्वामिनो ललाटमिति दूरतो याति न स्वामिकार्येष्वपतिष्ठते यः स उच्यते। कुक्कुटीं पश्यन् कौक्कुटिकः। कुक्कुटघा कुक्कुटीपादो लक्ष्यते। तेनापि देशस्याल्पता। तेन गच्छन् पुरो युगमात्रार्पितदृष्टिः संयतो भिक्षुरुच्यते। [6]दाम्भिको वा। कुक्कुटीमाचरन् [7]कौक्कुटिकः। कुक्कुटीति[8] ह दाम्भिकक्रियामिथ्याशौचादिरुच्यते।

ङस्तो धर्म्ये ॥ ३।२।४८ ॥ ङस इति षष्ठ्यन्ताद्धर्म्ये ठण्प्रत्ययो भवति। धर्मो न्यायोऽनुवृत्त आचारस्तस्मादनपेतं प्राप्यं धर्म्यम्। शुल्कशालायाः धर्म्यं शौल्कशालिकम्। आपणिकम्। आन्तरिकम्। गौल्मिकम्।

नरादृतोऽण् ॥ ३।२।४९ ॥ नर इत्येवमादिभ्यः ऋकारान्तेभ्यश्च षष्ठ्यन्तेभ्यो धर्म्ये अण्प्रत्ययो भवति। नरस्य धर्म्यं नारम्। नारी स्त्री। महिष्याः—माहिषम्। ऋतः—नुर्धर्म्यं नारम्। नारी स्त्री। मातृ—मात्रम्। पितृ—पैत्रम्। शास्तृ—शास्त्रम्। विकर्तृ—वैकर्त्रम्। [9]वैकर्त्री। होतृ—हौत्रम्। पोतृ—पौत्रम्। नर, महिषी, प्रजावती, प्रजापति, विलेपिका, प्रलेपिका, [10]आनूरिपिका, वर्णकपेषिका[11], मणिपाली, पुरोहित, अनुचारक, जयमान इति नरादिः।

वैशस्त्रवैभाजित्रे ॥ ३।२।५० ॥ वैशस्त्र वैभाजित्र इति विशसितृ वैभाजयितृ इत्येताभ्या षष्ठ्यन्ताभ्यां धर्म्ये अणन्ते शब्दरूपे निपात्येते। विशसितुः धर्म्यं वैशस्त्रम्। अत्राण् ऋन इत्यस्यैव। इटो लुग् निपात्यते। विभाजयितुः वैभाजित्रम्। [12]अत्राणि लुक्।

वक्रये[13] ॥३।२।५१ ॥ ङस इत्येव। अवक्रीयते येनासौ वक्रयः। कियन्तमपि कालमापणादेरिच्छानियमितेन द्रव्येण ग्रहणमवक्रयणम्। षष्ठ्यन्ताद् वक्रये ठण्प्रत्ययो भवति। आपणस्य वक्रयः आपणिकम्। शौल्कशालिकम्। आकरिकम्। गौल्मिकम्। लोकपीडया धर्मातिक्रमेणापि वक्रये भवतीति धर्मोद्भूयते ॥

---

१. प्रभूतं प्रचुरं प्राज्यम् इत्यमरः म० टि०। २. पर्याप्तिः स्यात्परिग्राणं हस्तवारणमित्यपि इत्यमरः म० टि०। ३. माशब्दमि- म०। ४. टिकाः म०। ५. न स म०। ६. स्याद्दाम्भिकः कौक्कुटिको यश्च दूरेरिक्षणः इति नामलिङ्गानुशासनम् म० टि०। ७. भिक्षाचरः कौक्कुटिकः इत्यभिधानम्, म० टि०। ८. -ति हि म०। ९. विकर्तिनृ-वैकर्तिन्त्रम्, म०। १०. अनूरिपिका म०। ११. वर्णकपेषिका म०। १२. अत्र णिलुक् म०। १३. भाटको वक्रयः स्मृतः इति हलायुधः म० टि०।

तदस्य पण्यम् ॥ ३।२।५२ ॥ तदिति प्रथमान्तादस्येति षष्ठ्यर्थे ठण्प्रत्ययो भवति । यत्तत्प्रथमान्तं तच्चेत्पण्यं [1]विक्रेयं भवति । अपूपाः पण्यमस्य आपूपिकः । पण्यार्थो वृत्तावन्तर्भूत इति पण्यशब्दस्याप्रयोगः । एवं शाष्कुलिकः । मौदकिकः । लावणिकः ।

किशरादेष्टट् ॥ ३।२।५३ ॥ किशर इत्येवमादिभ्यस्तदस्य पण्यमित्येतस्मिन् विषये टट्प्रत्ययो भवति । किशरादयो गन्धविशेषवचनाः । किशरं पण्यमस्य किशारिकः । किशारिकी स्त्री । तगरिकः । तगरिकी । किशर, तगर, स्थगर, नलद, उशीर, हरिद्रा, हरिद्रु, [2]पर्ण, गुग्गुल इति किशरादिः ।

शलालोर्वा ॥ ३।२।५४ ॥ शलालुशब्दात् [3]तस्य पण्यमित्येतस्मिन् विषये टट्प्रत्ययो वा भवति । पक्षे ठण् । शलालु पण्यमस्य शलालुकः । शलालुकी । शालालुकः । शालालुकी । शलाल्वर्थो नपुंसक[4]शब्दः पुंल्लिङ्गनिर्देशः ।

शिल्पम् ॥ ३।२।५५ ॥ तदस्येति वर्तते । तदिति प्रथमान्तादस्येति षष्ठ्यर्थे ठण्प्रत्ययो भवति यत्तत् प्रथमान्तं चेद् भवति । शिल्पं कौशलं विज्ञानप्रकर्षः । नृत्ता शिल्पमस्य नार्तिकः । वादनं वादनिकः । मृदङ्गवादन शिल्पमस्य मार्दङ्गिकः । पाणविकः [5]। वैणविकः । वादनार्थः शिल्पार्थश्च वृत्तावन्तर्भूतो यथा [6]तद्योजने उपसिक्तार्थ इति शिल्पवादनशब्दयोरप्रयोगः । मृदङ्गकरणं शिल्पमस्य मार्दङ्गकरणिकः । वैणाकरणिकः । सर्वोत्पत्तिमता साधारणः करोत्यर्थो विशेषप्रकृतिकेन तद्धितोक्तेन शक्योऽन्तर्भावयितुमिति वृत्तौ करणशब्दस्यानिवृत्तिः । वादनादित्वसाधारणं साधनविशेषविषयं [7]विशेषशब्दैरन्तर्भाव्यते ।

भड्डुकझर्झराट्ठाऽण् ॥ ३।२।५६ ॥ भड्डुक झर्झर इत्येताभ्यां तदस्य शिल्पमित्यस्मिन् विषयेऽण्प्रत्ययो भवति वा । पक्षे ठण् । भड्डुकवादनं शिल्पमस्य भाड्डुकः । भाड्डुकिकः । झार्झरः । झार्झरिकः ।

प्रहरणम् ॥ ३।२।५७ ॥ तदस्येति वर्तते । तदिति प्रथमान्तादस्येति षष्ठ्यर्थे ठण्प्रत्ययो भवति यत्तत्प्रथमान्तं तच्चेत् प्रहरणं भवति । असिः प्रहरणमस्य आसिकः । प्रासिकः । चाक्रिकः । मौष्टिकः । मौद्गरिकः । मौसलिकः । स्तोत्रुकः । धानुष्कः । चरति व्यापारसाधनात्प्रत्ययो यथा [8]तेन चरतीति । शिल्पमिति विज्ञानातिशये । अनेन तु व्यापारभावेऽपि [9]परिहरणपरिज्ञानमात्रे प्रत्ययः ।

परश्वधाट्ठाऽण् ॥३।२।५८॥ परश्वधशब्दाद् तदस्य प्रहरणमित्यस्मिन् विषयेऽण्प्रत्ययो वा भवति । पक्षे ठण् । परश्वधः प्रहरणमस्य पारश्वधः । पारश्वधिकः ।

शक्तियष्टेष्टोकण् ॥३।२।५९॥ शक्ति यष्टि इत्येताभ्यां तदस्य प्रहरणमित्यस्मिन् विषये टीकण्प्रत्ययो भवति । शक्तिः प्रहरणमस्य शाक्तीकः । शाक्तीकी । याष्टीकः । याष्टीकी ।

इष्वादिभ्योऽन्येषाम् ॥३।२।६०॥ इषु एवमादिभ्यः तदस्य प्रहरणमित्यस्मिन् विषये टीकण्प्रत्ययो भवत्यन्येषामाचार्याणाम् । इष्वी प्रहरणमस्य ऐष्वीकः । ऐष्वीकी । काम्पनीकः । काम्पनीकी । आम्भसीकः । आम्भसीकी । दाण्डीकः । दाण्डीकी । अपरेषां ठणि च ऐष्विकः । काम्पनिकः । आम्भसिकः । दाण्डिकः ।

दैष्टिकास्तिकनास्तिकाः ॥३।२।६१॥ दैष्टिक आस्तिक नास्तिक इत्येते शब्दास्तदिति प्रथमान्तादस्येति षष्ठ्यर्थे ठणन्ता निपात्यन्ते । [10]निपातनं रूढ्यर्थम् । दिष्टा [11]प्रहरणानुपातिनी मतिरस्य, दिष्टं वैषं [12]प्रहरणमिति वा मतिरस्य दैष्टिकः । अस्ति परलोकः पुण्यं [13]पापमिति च मतिरस्येत्यास्तिकः । नास्ति परलोकः पुण्य-

---

१. विक्रेयं पणितव्यं च पण्यम् म० टि० । २. पर्ण्या गुग्गुल- म० । ३. तदस्य म० । ४. -सर्व शा- म० । ५. -विकः । मौरविकः । वैण- म० । ६. तद्योजने म० । ७. -वशब्दैरन्त- म० । ८. -थात्वेन म० । ९. व्यापाराभावेऽपि म० । १०. -सर्वं हि रू- म०। ११. प्रमाणानु- म० । १२. प्रमाणमिति म० । १३. पुण्यपापमिति म० । 'आद्यः अदृष्टानुसन्धिकः' इति वैजयन्ती म० टी० ।

पत्यमिति च मतिरस्य नास्तिकः । अस्तिनास्तिशब्दौ निपातौ । निपातनादेव तदिति प्रथमाधिकारेऽपि सिङ्स्तात् पदसमुदायस्य प्रत्ययः ।

शीलम् ॥३।२।६२॥ तदस्येत्येव । तदिति प्रथमान्तादस्येति षष्ठ्यर्थे ठण्प्रत्ययो भवति यत् प्रथमान्तं शीलं चेत्तद् भवति । शीलं प्राणिनां स्वभावः । फलनिरपेक्षा प्रवृत्तिः । अपूपभक्षणं शीलमस्य आपूपिकः । शाष्कुलिकः । मौदकिकः । ताम्बूलिकः । भक्षणार्थः शीलार्थश्च वृत्तावन्तर्भूत इति शीलभक्षणशब्दयोरप्रयोगः ।

छत्रादेरञ् ॥३।२।६३॥ छत्र इत्येवमादिभ्यस्तदस्य शीलमित्यस्मिन् विषये[1]ऽण्प्रत्ययो भवति । छत्रं शीलमस्य छात्रः । [2]छात्र इति गुरुकार्येष्वाहितस्य शिष्यस्य छत्रक्रिया तुल्या गुरुच्छिद्रावरणादिका क्रियोच्यते । [3]शिष्यो हि छत्रवद् गुरुच्छिद्रावरणादिप्रवृत्तश्छात्र उच्यते । अभ्यासापेक्षापि क्रिया शीलमित्युच्यते । यथा शीलिता विद्येति । शिक्षा शीलः शैक्षः । चुक्षा शीलः चौक्षः । कर्म शीलमस्येति कार्मः छत्र, शिक्षा, चुक्षा, भिक्षा, तितिक्षा, चुरास्था, विश्वधा, उदस्थान, पुरोधा, [4]कृषिकर्म, तपस्, [5]सत्य, अनृत, विधिका इति छत्रादिः । स्थाशब्द. [6]स्त्रीप्रत्ययान्तः । स चोपसर्गपूर्वस्त्रीप्रत्ययः । आस्था संस्थेति केवलपाठः सर्वोपसर्गपरिग्रहणार्थः ।

तूष्णीकः ॥३।२।६४॥ तूष्णीक इति तूष्णीं[7] शब्दात्तदस्य शीलमित्यस्मिन् विषये कप्रत्ययो मकारलोपश्च निपात्यते । तूष्णीम्भावः शीलमस्य तूष्णीकः ।

वृत्तोऽपपाठोऽनुयोगे ॥३।२।६५॥ तदस्येति । तदिति प्रथमान्तादस्येति षष्ठ्यर्थे ठण्प्रत्ययो भवति । यत्तत्प्रथमान्तमनुयोगविषयं विषयश्चेद् वृत्तोऽपपाठो भवति । अनुयोग परीक्षा । एकमन्यदस्यापपाठरूपमनुयोगे वृत्तम् ऐकान्यिकः । एकान्यशब्दयोस्तद्धितविषयभूते समासस्ततस्तद्धितः । वृत्तोऽपपाठोऽनुयोग इत्यस्य वृत्तावन्तर्भावादप्रयोगः । अत्यत्वं चोपपाठस्य सम्यक् पाठापेक्षम् । एवं द्वैयन्यिक. । त्रैयन्यिक. । वृत्त इति किम् ? वर्तमाने वर्त्स्यति वा मा भूत् । अपपाठ इति किम् ? एकमन्यदस्य दुःखमनुयोगे वृत्तजयेऽनुयोगे वृत्तः । अनुयोग इति किम् ? स्वैराध्ययने मा भूत् ।

बह्वचपूर्वपदाट्ठः ॥३।२।६६॥ बह्वचपूर्वपदात्तदिति प्रथमान्तादस्येति षष्ठ्यर्थे ठप्रत्ययो भवति यत्प्रथमान्तं तच्चेद्वृत्तोऽपपाठोऽनुयोगे भवति । एकादशान्यान्यस्यापपाठरूपमनुयोगे वृत्तानि एकादशान्यिकः । एकादशान्यिका स्त्री । द्वादशान्यिकः । द्वादशान्यिका । त्रयोदशान्यिक. । त्रयोदशान्यिका स्त्री । चतुर्दशान्यिकः । चतुर्दशान्यिका ।

भक्ष्योऽस्मै हितम् ॥३।२।६७॥ तदित्येव । तदिति प्रथमान्तादस्मै इति चतुर्थ्यर्थे ठप्रत्ययो भवति यत्प्रथमान्तं भक्षश्चेत्स भवति तच्च हितम् । अपूपा भक्षा हितमस्मै आपूपिकः । शाष्कुलिकः । मौदकिकः । भक्ष इति किम् ? देवदत्तो हितोऽस्मै । हितमिति किम् ? अपूपा हितमस्मै । अस्मै इत्युत्तरार्थमिह विभक्तिविपरिणामेनापि चतुर्थ्यर्थः शक्यो विज्ञातुम् ।

नियुक्तं दीयते ॥३।२।६८॥ तदस्मै इत्येव । तदिति प्रथमान्तादस्मै इति चतुर्थ्यर्थे ठण्प्रत्ययो भवति यत्प्रथमान्तं तच्चेन्नियुक्तमध्यभिचारेण नित्यं वा दीयते । [8]अग्रभोजनमस्मै नियुक्तं दीयते आग्रभोजनिकः । आपूपिकः । शाष्कुलिकः । मौदकिकः । मासिकः । अस्मै इति किम् ? रजकस्य वस्त्रं नित्यं देयम् । आप्यमित्यर्थः ।

भक्तौदनाद्ठाण् ठट् ॥३।२।६९॥ भक्त ओदन इत्येताभ्यां यथासङ्ख्यम् अण् ठट् इत्येतौ प्रत्ययौ भवतो वा तदस्मै नियुक्तं दीयते इत्येतस्मिन् विषये । भक्तमस्मै नियुक्तं दीयते भाक्तः । भाक्तिकः[9] । ओदनोऽस्मै नियुक्तं दीयते ओदनिकः । ओदनिकी । ठणि औदनिकः । औदनिकी ।

---

१. अण् म० । २. छत्रमिति । ३. उपपदाच्छिष्यो- म० । ४. कृषिकर्मन् म० । ५. सत्य म० । ६. -धात्मन् म० । ७. तूष्णीम् श्र- म० । ८. भिक्षाचम् म० टि० । ९. भाक्तिकः म० ।

आणामांसौदनाट्टक: ॥३।२।७०॥ आणा मांसौदन इत्येताभ्यां ठप्रत्ययो भवति वा। पक्षे ठन्। तदस्मै नियुक्तं दीयत इत्यस्मिन् विषये। आणाऽस्मै नियुक्तं दीयते आणिकः। आणिका। ठण्—आणिकी। मांसौदनिकः। मांसौदनिका[1]। ठठणोः स्त्रियां विशेषः।

नवयज्ञादयोऽस्मिन् वर्तते ॥३।२।७१॥ नवयज्ञादिभ्यः प्रथमान्तेभ्यो वर्तते इत्येवमुपाधिभ्योऽस्मिन्निति सप्तम्यर्थे ठण्प्रत्ययो भवति। नवयज्ञा अस्मिन् वर्तन्ते नावयज्ञिकः। पाकयज्ञिकः। नवयज्ञादयः प्रयोगगम्याः।

तत्र नियुक्ते ॥३।२।७२॥ तत्रेति सप्तम्यन्तान्नियुक्तेऽर्थे ठण्प्रत्ययो भवति। नियुक्तोऽधिकृतो व्यापारित इति प्रत्ययार्थः। पूर्वकं नियुक्तमिति क्रियाविशेषणमव्यभिचारो नित्यमिति चार्थः। शुल्कशालाया नियुक्तः शौल्कशालिकः। आपणिकः। आन्तरिकः। आक्षपटलिकः। [2]गौल्मिकः। दौवारिकः।

ठोऽगारान्तात् ॥३।२।७३॥ अगार इत्येवमन्तात् ठप्रत्ययो भवति तत्र नियुक्ते। देवागारे नियुक्तः देवागारिकः। कोष्ठागारिकः। भाण्डागारिकः। भाण्डागारिका। आयुधागारिकः। आयुधागारिका।

अध्यायिन्यदेशकालात् ॥३।२।७४॥ तत्रेत्येव। अध्ययनस्य यावदेशकालौ तद्वाचिनः सप्तम्यन्तादध्यायिनि ठण्प्रत्ययो भवति। अशुवाचकाध्यायी आशुचिकः। स्माशानिकः। स्माशानाभ्याशिकः। अकालात्—सान्ध्यिकः। आकपोतिकः। आनध्यायिकः।

चन्द्रसूर्योपरागश्च निर्घातो भूमिकम्पनम्।
तृतीयं गर्जितं विद्युदुल्का दाहो दिशां तथा ॥ १ ॥
स्मशानाभ्याशमज्ञुचिरुत्सवो दशसन्ध्यया।

इति [3]कलिकावृत्रस्थानध्यायदेशकाला. पठिता.। अदेशकाक इति किम्? विहारभूमावध्यायी। पूर्वाह्णेऽध्यायी।

संस्थानप्रस्तारतदन्तकठिनान्तेषु व्यवहरति ॥३।२।७५॥ संस्थान प्रस्तार इत्येताभ्यां संस्थानान्तात् प्रस्तारान्तात् कठिनान्ताच्च सप्तम्यन्ताद् व्यवहरत्यर्थे ठण्प्रत्ययो भवति। व्यवहरति क्रियातत्त्वे यथा लौकिक्या व्यवहार इति। संस्थाने व्यवहरन् सांस्थानिकः। प्रास्तारिकः। [4]तदन्तात्—गौसंस्थानिक.। आश्वसंस्थानिकः[5]। कासप्रस्तारिकः। कठिनान्तात्—वांशकठिनिकः। वार्द्धकठिनिकः[6]। कठिनं तापसभाजनम्। पीठं वातो वा कठिनश्च ते इत्येकप्रयोगेण तदन्त इति स्यात्। एकान्तग्रहणे तत्र कठिनान्तार्था नावगम्यत इति द्विरन्तग्रहणं बहुवचनं कठिनान्तेति सरूपग्रहणं मा भूदिति।

निकटादिषु वसति ॥३।२।७६॥ निकट इत्येवमादिभ्यः सप्तम्यन्तेभ्यो वसत्यर्थे ठण्प्रत्ययो भवति। निकटेन वसन् नैकटिकः। यो ग्रामस्य समीपे वसत्यारण्यको भिक्षुः स उच्यते[7]। वृक्षमूले वसन् वार्क्षमूलिकः। [8]अभ्रावकाशिकः। स्माशानिकः। आवसथिकः। निकटादयः प्रयोगगम्याः।

सतीर्थ्यः ॥३।२।७७॥ सतीर्थ्य इति समानतीर्थशब्दात् सप्तम्यन्ताद्वसत्यर्थे यप्रत्ययः समानशब्दस्य सभावश्च निपात्यते। समानतीर्थे वसन् सतीर्थ्यः। तीर्थमिह गुरुरुच्यते।

सङ्ख्यादेश्चार्हद्वलुक्च: ॥३।२।७८॥ या अर्हदर्थाद् या प्रकृतिरुपादास्यते तस्याः केवलायास्तदन्ताच्च सङ्ख्यादेः स वक्ष्यमाणः प्रत्ययो भवतीति वेदितव्यं न चेत् स लुगन्तो भवति। चान्द्रायणं चरन् चान्द्रायणिकः।

---

१. -निका। मांसौदनिकी। ठ- म०। २. शैल्कशाले रोगशैले स्तम्भे च वल्कलजाले। दुर्गादिरक्षणो-स्थाने सैन्यरक्षणभेदयोः॥ विटपालाच्च सङ्घाते गुल्मः पुंसि विधक्षितः। म० टि०। ३. कालिका म०। ४. तदन्ता म०। ५. -कः। कौक्षपटलिकः। कपि- म०। ६. वार्द्धकठिनिकः म०। ७. -च्यते प्रसिद्धेः वृक्ष- म०। ८. आभ्रावकाशिकः म०।

द्वे चन्द्रायणे चरन् द्वैचान्द्रायणिकः । पारायणमधीयानः पारायणिकः । द्वे पारायणेऽधीयानः द्वैपारायणिकः । संख्यादेरिति किम् ? परमपारायणमधीते । महापारायणमधीते । चकारः केवलार्थः । आर्हदित्यत्र्यर्थम् अभिविधौ चायमाकारः । तेनार्हदर्थेऽपि भवति । द्वे सहस्रे द्विसहस्रं वाऽर्हन् द्विसाहस्रिकः । [1]द्विप्रतिकः । अलुप इति किम् ? द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम् । द्विशूर्पेण क्रीतं [2]द्विशौर्पिकम् । त्रिशौर्पिकम् ।

गोदानादीनां ब्रह्मचर्ये ॥३।२।७६॥ गोदानादिभ्यः षष्ठ्यन्तेभ्यो ब्रह्मचर्येऽभिधेये ठण्प्रत्ययो भवति । निर्देशादेव षष्ठ्यन्तता । गोदानस्य ब्रह्मचर्यं गौदानिकम्[3] । आदित्यव्रतानामादित्यव्रतिकम् । महानाम्नीना माहानाम्निकम् । गोदानादयः प्रयोगगम्याः । येभ्योऽस्मिन्नर्थे प्रयोगे ठण् दृश्यते ते गोदानादयः ।

चान्द्रायणं च चरति ॥३।२।८०॥ चान्द्रायण इत्येतस्माद् द्वितीयान्ताद् गोदानादिभ्यश्च द्वितीयान्तेभ्यश्चरत्यर्थे ठण्प्रत्ययो भवति । चान्द्रायण इति निर्देशाच्चान्द्रायणस्य द्वितीयान्तता । गोदानादीना चार्थात् । चान्द्रायणं[4] चरन् चान्द्रायणिकः । गोदानं चरन् गौदानिकः । आदित्यव्रतिकः । महानाम्न्यो नाम ऋचः—तत्साहचर्यात्तासां व्रतमपि महानाम्न्यः । महानाम्नीव्रतं चरन् महानाम्निकः[5] ।

देवव्रतादीन् डिन् ॥३।२।८१॥ देवव्रतादिभ्यो द्वितीयान्तेभ्यश्चरत्यर्थे डिन्प्रत्ययो भवति । देवव्रतं चरन् देवव्रती । तिलव्रती । [6]आवान्तदीक्षि । देवव्रतादयः प्रयोगगम्याः ।

ड्वुश्चाष्टाचत्वारिंशच्चातुर्मास्यं यलुक्च ॥३।२।८२॥ अष्टाचत्वारिंशत् चातुर्मास्य इत्येताभ्या द्वितीयान्ताभ्या चरत्यर्थे ड्वुप्रत्ययो डिश्च चातुर्मास्ययकारस्य लुग्भवति । अष्टाचत्वारिंशकम् । अष्टाचत्वारिंशी । चातुर्मास्यानि चरन् [7]चातुर्मासः । चातुर्मासी । चतुर्षु मासेषु भवानि चातुर्मास्यानि । यज्ञञ्य इति ञ्यान्तः ।

तुरायणपारायणयजमानाधीयाने ॥३।२।८३॥ तुरायण पारायण इत्येताभ्या द्वितीयान्ताभ्या यथासंख्यं यजमाने अधीयाने [8]चाणे ठण्प्रत्ययो भवति । तुरायणं यजमानं [9]तौरायणिकः । तुरायण नाम यज्ञः । पारायणमधीयानः पारायणिकः ।

संशयं प्राप्तेऽर्थे ॥३।२।८४॥ संशयमिति द्वितीयान्तात् प्राप्तेऽर्थे ठण्प्रत्ययो भवति । अर्यत(अर्थत) इत्यर्थः । गम्यो ज्ञानस्य विषय इत्यर्थः । संशयं प्राप्तोऽर्थः सांशयिकः । सांशयिकोऽयमूर्ध्वः.[10] न जाने स्थाणुरुत पुरुषः । सांशयिको देवदत्तः न जाने जीवत्युत मृतः । अर्थ इति किम् ? संशयितरि मा भूत् । सोऽपि हि संशयं प्राप्तो भवति तस्य तद्भावात् ।

[11]**क्रोशयोजनाच्छताद्योजनाद्यात्यभिगमार्हे** ॥३।२।८५॥ क्रोशशब्दाद् योजनशब्दाच्च परो यः शतशब्दस्तदन्ताद् योजनशब्दाच्च पञ्चम्यन्तादभिगमार्हेऽर्थे ठण्प्रत्ययो भवति । क्रोशशतादभिगमार्हः क्रोशशतिको मुनिः । योजनशतिको गुरुः[12] । योजनिकः साधुः ।

तद्यात्येभ्यः ॥३।२।८६॥ तदिति द्वितीयान्तेभ्य एभ्यः क्रोशशत योजनशत योजन इत्येतेभ्यो याति गच्छत्यर्थे ठण्प्रत्ययो भवति । क्रोशशत यान् क्रोशशतिकः । योजनशतिकः । योजनिको दूतः । एभ्य इति किम् ? नगर याति देवदत्तः ।

पथष्ठट् ॥३।२।८७॥ पथ[13] इत्येतस्माद्[14] द्वितीयान्ताद् यात्यर्थे ठट्प्रत्ययो भवति । पन्थानं यान् पथिकः । पथिकी स्त्री । ठणमकृत्वा ठड्वचनादन्तरङ्गत्वात्तमासे कृतेऽपि भवति ।

---

१. द्विप्रतिकः म० । २. द्विशौर्पिकः । त्रिशौर्पिकः म० । ३. गौदानिकः म० । ४. -र्यं च चर- म० । ५. माहानाम्निकः म० । ६. अवान्तरदीक्षी म० । ७. चातुर्मासकः । चतुर्मासी म० । ८. चार्थे म० । ९. यजमानः म० । १०. ऊर्ध्वः स्थादुत्थिते तुङ्गे इत्यभिधानम्- म० टि० । ११. योजनच्छता- म० । १२. गुरुः म० । १३. पथिन्शब्दे- म० । १४. -स्मात्पदिति द्वितीय- म० ।

नित्यं पथः पन्थश्च ॥३।२।८८॥ पथिन्शब्दात् द्वितीयान्तान्नित्यं याति णप्रत्ययो भवति पथिन्-शब्दस्य च पन्थ आदेशः। नित्यमिति प्रत्ययार्थविशेषणम्। पन्थानं नित्यं यान् पान्थः। पान्था स्त्री। द्वौ पन्थानौ नित्यं यान् द्वैपन्थः। द्वैपन्था। नित्यमिति किम् ? पथिकः।

शङ्कुत्तरराजवारिस्थलजङ्गलकान्तारादिनाहृते च ॥ ३।२।८९ ॥ शङ्कु उत्तर अज वारि स्थल जङ्गल कान्तार इत्येतत् पूर्वपदात् पथिन्नन्तात् तृतीयान्तादाहृते याति चार्थे ठण्प्रत्ययो भवति। निर्देशादेव तृतीयान्तता। शङ्कुपथेनाहृतः—शाङ्कुपथिकः। शङ्कुपथेन यान् शाङ्कुपथिकः। एवमौत्तरपथिकः। आज-पथिकः। वारिपथिकः। स्थालपथिकः। जाङ्गलपथिकः[2]।

स्थलादिनाऽण् मधुकमरिचे ॥ ३।२।९० ॥ स्थलादेः पथ्यन्तात्तृतीयान्तादाहृतेऽर्थेऽण्प्रत्ययो भवति। ठणपवादः। तच्चेदाहृतं मधुक[3] मरिचं वा भवति। स्थलपथेनाहृतं स्थालपथं मधुकं मरिचं वा। मधुकमरिच इति किम् ? स्थालपथिकमन्यत्।

योगाद्ये शक्ते ॥ ३।२।९१ ॥ योग इत्येवमादिभ्यः चतुर्थ्यन्तेभ्यः शक्तेऽर्थे ठण्प्रत्ययो भवति। निर्देशादेव चतुर्थ्यन्तता। योगाय शक्तो यौगिकः। सान्तापिकः। योग, सन्ताप, सन्नाह, सङ्ग्राम, संयोग,[4] सम्पेष, निश्शेष,[5] निसर्ग, निस्सर्ग, विसर्ग, उपसर्ग, प्रवास, उपवास, सङ्घात, सङ्क्रम, सपाद, सक्तु, मांस, ओदन, मासोदन, सक्तुमासोदन इति योगादिः।

योग्यकार्मुके ॥ ३।२।९२ ॥ योग्य कार्मुक इति योग कर्मन् इत्येताभ्यां चतुर्थ्यन्ताभ्यां शक्तेऽर्थे यथा-क्रमं य उकण् इत्येतौ प्रत्ययौ निपात्येते। योगाय शक्तो योग्यः। कर्मणे शक्तं कार्मुकम्। एवं योगशब्दस्य द्वैरूप्यम्।

यज्ञानां दक्षिणायाम् ॥ ३।२।९३ ॥ यज्ञवाचिभ्यः षष्ठ्यन्तेभ्यो दक्षिणायामर्थे ठण्प्रत्ययो भवति। अग्निषोमस्य[6] दक्षिणा आग्निषोमिकी। वाजपेयिकी। राजसूयिकी। नावयज्ञिकी। पाकयज्ञिकी। पाञ्चौद-निकी। दाशौदनिकी। ऐकादशाहिकी। द्वादशाहिकी। द्वैवाजपेयिकी। यज्ञाना दक्षिणा यज्ञेषु भवा भवतीति ऋग्द्वचच्त्रिज्यामष्ठण्[7] विधीयमाने इज्यान्तान्न स्यात्। इह तु संख्यादेर्वार्हदालुच इति भावे। भवत्यपि[8] द्विगोः ष्लुक् स्यात्। स्ववित्रक्षाया चाण् प्राप्नोति। दक्षिणार्थं च प्रत्ययार्थो यथा स्यादिति वचनम्।

तेषु देये ॥ ३।२।९४ ॥ तेष्विति यज्ञवाचिभ्यः सप्तम्यन्तेभ्यो देयेऽर्थे ठण्प्रत्ययो भवति। [9]अग्नीषोमे देयमाग्निषोमिकं भक्तम्। वाजपेयिकं भक्तम्।

काले कार्ये च भववत् ॥३।२।९५॥ कालवाचिनः सप्तम्यन्ताद् देये कार्ये चार्थे भववत् प्रत्यया भवन्ति। याभ्य. प्रकृतिभ्यो येन विशेषेण ये प्रत्यया भवेऽर्थे भवन्ति ताभ्यः प्रकृतिभ्यस्तेन विशेषेण कार्ये देये चार्थे ते प्रत्यया भवन्तीत्यर्थः। वतिर्हि सर्वसादृश्यार्थः। यथा—वर्षासु भवं वार्षिकं तथा वर्षासु देयं कार्यं च वार्षिकम्। मासिकम्। एवं शारदिकं आद्यं कर्म। शारदिकः। शारदो रोग आतपो वा। एवं नैशम्। नैशिकम्। प्रादोषम्। प्रादोषिकम्। हैमन्तम्। हैमन्तिकम्। हैमनम्। पुराणम्। पुरातनम्। शौवस्तिकम्। श्वस्त्यम्। श्वस्तनम्। पौर्वाह्णिकम्। पूर्वाह्णतनम्। सायन्तनम्। चिरन्तनम्। चिरत्नम्। पदत्नम्। पौषम्। चैरिरम्। पान्त्यम्। सांवत्सरं पर्व फलं वा। प्रावृषेण्यम्। प्रत्ययस्य भावोऽत्रादिश्यते नाभाव इति द्विगोः ष्लुन भवति। द्वयोर्मासयोः कार्यं देयं वा द्वैमासिकम्। त्रैमासिकम्।

---

१. महारण्ये दुर्गपथे कान्तारं पुन्नपुंसकम् इत्यमरः म० टि०। २. -थिकः। कान्तारपथिकः म०। ३. मधुकं पक्वोतकं वट्टोमधुका मधुयष्टिका इति नामलि० म० टि०। ४. -ग सम्पराय सम्पे- म०। ५. निश्पेष म०। ६. अग्निष्टोमस्य दक्षिणा इति आग्निष्टोमिकी म०। ७. -ष्ठण् इति ठण् विधौ- म०। ८. भवति सिद्धि- म०। ९. अग्निष्टोमे देयमाग्निष्टोमिकं म०।

व्युष्टादिष्वण् ॥३।२।९६॥ व्युष्टादिभ्यः सप्तम्यन्तेभ्यो देये कार्ये चार्थे[1] ठण्प्रत्ययो भवति। व्युष्टे देयं कार्यं[2] वैयुष्टम्। नैत्यम्। व्युष्टशब्दाहर्यात् नित्यशब्द. कालशब्दो गृह्यते। ततः सप्तम्यपवादेन कालाध्वनोर्व्याप्ताविति द्वितीयाविधानान्नित्यं देयं कार्यं चेति द्वितीयान्तादेव प्रत्ययः। व्युष्ट, नित्य, निष्क्रमण, प्रवेशन, तीर्थ, सङ्ग्राम, सङ्क्रात, प्रवास, उपवास, [3]अग्नीप, पीलुमूल इति व्युष्टादिराकृतिगणोऽयम्।

तेन हस्तयथाकथाचाद्यणम् ॥३।२।९७॥ तेनेति तृतीयान्ताभ्यां हस्त यथाकथाच इत्येताभ्यां यथासङ्ख्यं य ण इत्येतौ प्रत्ययौ भवतः। प्रत्येकं देये कार्ये चार्थे यथाकथाचेति निपातसमुदायोऽनादरेणेत्यस्मिन्नर्थे वर्तते अस्य तृतीयान्तता न संभवति। हस्तेन देयं कार्यं वा हस्त्यम्। यथाकथाचानादरेण याथाकथाचम्।

सम्पादिनि ॥३।२।९८॥ तेनेति तृतीयान्तात् सम्पादिन्यर्थे ठण्प्रत्ययो भवति। गुणोत्कर्षः सम्पत्तिः। आवश्यके गृहादित्वादत एव निपातनाद्वा वर्तरि णिन्। कर्णवेष्टकाभ्या सम्पादि कार्णवेष्टकिकं मुखम्। कर्णवेष्टकाभ्यां विशेषतः शोभत इत्यर्थः। एवं वास्त्रयुगिकं शरीरम्। औपानहिको पादौ।

कर्मवेषाद्यः ॥३।२।९९॥ कर्म वेष इत्येताभ्यां तृतीयान्ताभ्यां सम्पादिन्यर्थे यप्रत्ययो भवति। कर्मणा सम्पादि कर्मण्यं शौर्यम्। वेषेण सम्पादि वेष्या नटी।

कालात्परिजय्यलभ्यकार्यसुकरे ॥३।२।१००॥ कालवाचिनः शब्दात् तेनेति तृतीयान्तात् परिजय्ये लभ्ये कार्ये सुकरे चार्थे ठण्प्रत्ययो भवति। परितो जेतु शक्यं परिजय्यम्। लभ्यकार्ययोः शक्येऽर्हेऽयः। अकृच्छ्रेण क्रियते यत्तत् सुकरम्। मासेन परिजय्यः मासिको व्याधिः। मासिको हस्ती। आर्धमासिकः। सांवत्सरिकः। मासेन लभ्यः मासिकः पटः। मासेन कार्यं मासिकं चान्द्रायणम्। मासेन सुकर. मासिकः प्रासादः। कालादिति किम्? देवदत्तेन परिजय्यम्।

निर्वृत्ते ॥३।२।१०१॥ तेन कालादिति[4] वर्तते। तृतीयान्तात् कालवाचिनो निर्वृत्तेऽर्थे ठण्प्रत्ययो भवति। अह्ना निर्वृत्तमाह्निकम्। मासिकम्। सांवत्सरिकम्। योगविभाग उत्तरत्रानुकृत्यर्थः[5]।

तस्मै भृताधीष्टे ॥३।२।१०२॥ कालादिति वर्तते। तस्मै इति चतुर्थ्यर्थात् कालवाचिनो भृतेऽधीष्टे चार्थे ठण्प्रत्ययो भवति। तस्मै इति यदर्थमिति चतुर्थी[6] वेतनेन व्यापारितः। अधीष्ट[7] सत्कृत्य[8] मासाय भृतो मासिक. कर्मकरः। मासकर्मणे भृत इत्यर्थ.। एवमार्धमासिकः। सांवत्सरिकः। मासायाधीष्टः मासिकोऽध्यापकः। मासमध्यापनायाधीष्ट इत्यर्थः। एवमार्धमासिकः। सांवत्सरिकः।

तं भावि भूते च ॥३।२।१०३॥ कालादित्येव। तमिति द्वितीयान्तात् कालवाचिनः भाविनि भूते चार्थे ठण्प्रत्ययो भवति। स्वसत्तया व्याप्स्यमानः[9] कालो भावी। व्याप्त.[10] कालो भूतः। मासं भावी मासिक उत्सवः। मासं भूतो मासिको व्याधिः। चकारः तेन निर्वृत्ते तस्मै भृताधीष्टे तं भावि भूते चेति त्रयाणामनुवृत्त्यर्थः।

षण्मासाण्ण्यठौ ॥३।२।१०४॥ षण्मास इत्येतस्मात्[11] कालवाचिनस्तेन निर्वृत्ते, तस्मै[12] भृताधीष्टे च, तं[13] भावि भूते[14] चार्थे ण्य ठ इत्येतौ प्रत्ययौ भवतः। षड्भिर्मासैर्निर्वृत्तः षड्भ्यो मासेभ्यो भृतोऽधीष्टो वा षण्मासा[15] भूतो भावी वा षाण्मास्यः। षण्मासिकः। अवयस्त्रयं विधिः। वयसि तु षण्मासाट्ठण्ण्या इति भवति।

समायाः खः ॥ ३।२।१०५ ॥ समःशब्दात्तेन निर्वृत्त इत्यादिषु पञ्चसु विषयेषु खप्रत्ययो भवति। समया निर्वृत्तः समायै भृतोऽधीष्टो वा समा[16] भावी भूतो वा समीनः।

---

१. अण् म०। २. -र्थे वा वै- म०। ३. अग्निपद म०। ४. -दिति च वर्त- म०। ५. आऽस्यानुवृ- म०। ६. -र्थी भूतो वेतनेन म०। ७. याचितः म० टि०। ८. अन्यकर्म्य विना वेतनदानेन कर्मणि व्यापारित उच्यते म० टि०। ९. नक्ष-म०। १०. व्याप्तकालो म०। ११. कालशब्दात् म०। १२. भृतेऽधीष्टे म०। १३. भाविनि भूते म०। १४. -र्थे विषये ण्य म०। १५. षण्मासान् म०। १६. समां म०।

रात्र्यहःसंवत्सराच्च टिगोर्वा ॥३।२।१०६॥ रात्रि अहन् संवत्सर इत्येवमन्तात् समासाताच्च टिगोस्तेन निर्वृत्त इत्यादिषु पञ्चसु विषयेषु खप्रत्ययो भवति[1] तेन[2] ठण्। द्वाभ्यां रात्रिभ्यां निर्वृत्त इत्येवमादिना विगृह्य द्विरात्रीणः। [3]द्विरात्रिकः। त्रिरात्रीणः। त्रैरात्रिकः। अहन्—द्वाभ्याम् अहोभ्यां निर्वृत्त इत्यादिना विगृह्य द्व्यहीनः। [4]द्व्यह्निकः। त्र्यहीनः। [5]त्र्यह्निकः। अहरन्तात् खवचनस्यानवकाशत्वात् समासान्तमतं[6] बाधित्वाऽयं ख एव[7] भवति। तत्र समासान्तनियोगे[8] उच्यमानः सङ्ख्याव्यय सर्वादित्यल्लोपादेशो न भवति। [9]द्वैहीक इति द्व्यहशब्दात् समाहारद्विगोष्ठण्। [10]संवत्सरम्-द्वाभ्यां संवत्सराभ्यां निर्वृत्त इत्यादिना विगृह्य द्विसंवत्सरीणः। द्विसावत्सरिकः। त्रिसंवत्सरीणः। त्रिसावत्सरिकः। [11]मासंसंवत्सरस्येति तूत्तरपदाद्यच आकारः द्विसमीनः। द्वैसमीकः। त्रिसमीनः। त्रैसमीकः। सामान्तात् पूर्वेण नित्ये प्राप्ते विकल्पः। शेषादप्राप्ते।

वर्षाद्यश्च ॥३।२।१०७॥ वर्षशब्दो यः कालवाची तदन्ताद् द्विगोस्तेन निर्वृत्त इत्यादिषु पञ्चसु विषयेषु अकारप्रत्ययः[12] खश्च वा भवतः। ताभ्यां मुक्ते ठण्। एवं त्रैरूप्यं भवति। द्विवर्षः। द्विवर्षीणः। द्वैवार्षिकः। भाविन्यादिपदाद्यच [13]एवारेच्। द्विवर्षे भावी द्वैवर्षिकः। त्रैवर्षिकः।

प्राणिनि भूते ॥३।२।१०८॥ कालवाचिवर्षशब्दान्ताद् द्विगोर्भूतेऽर्थे नित्यमप्रत्ययो भवति प्राणिनि चेद् भूतः प्राणी भवति। द्वे वर्षे भूते[14] द्विवर्षो दारकः। त्रिवर्षो नायकः। प्राणिनीति किम्? द्विवर्षीणः-द्वैवार्षिकश्च व्याधिः। भूत इति किम्? द्वाभ्या वर्षाभ्यां भृतोऽवीष्टो वा द्विवर्षीणः। द्वैवार्षिकः मनुष्यः। पूर्वेण विकल्पे प्राप्ते नित्योऽयं विधिर्न भूत एव। प्राणिनीति नियमः, विधिनियमश्चम्भवे विधिरेव। विधौ हि शास्त्रमनुगृह्णीतं भवति[15] नियमेऽवनिगृह्णीतमनिवाददोषश्च।

मासाद्वयसि यः ॥३।२।१०९॥ मासान्ताद् द्विगोर्भूतेऽर्थे यप्रत्ययो भवति वयसि गम्यमाने। द्वौ मासौ भूतौ द्विमास्यः। त्रिमास्यः दारकः। वयसीति किम्? द्वैमासिको व्याधिः। द्वैमासिको नायकः। भूत इति किम्? द्वौ मासौ भावी द्वैमासिको युवा।

खञ्च ॥३।२।११०॥ द्विगोरिति निवृत्तम्। मासशब्दाद्भूते खञ्प्रत्ययो भवति यश्च वयसि गम्यमाने। मासीनः। मास्यः दारकः। अकारः[16]पुंभावार्थः। मासीनः[17] दुहितृकः। वयसीति किम्? मासिको नायकः।

षण्मासाट्ठण्यण्याः ॥३।२।१११॥ षण्मासशब्दात् कालवाचिनो भूते ठण् यण् य इत्येते प्रत्ययाः भवन्ति वयसि गम्यमाने। षण्मासान् भूतः षाण्मासिकः। षाण्मास्यो दारकः। भूत इति किम्? षण्मासान् भावी षाण्मास्यः। षण्मासिकः। वयसीति किम्? षाण्मास्यः। षाण्मासिको[18] नायकः। अन्यत्र ण्यठौ भवतो न यठणौ।

सोऽस्य ब्रह्मचर्यतद्वेदोः ॥ ३।२।११२ ॥ स इति प्रथमान्तात् कालवाचिनोऽस्येति षष्ठ्यर्थे ठण् प्रत्ययो भवति ब्रह्मचर्ये तद्वति ब्रह्मचारिणि चाभिधेये। यत्तदस्येति निर्दिष्टं तच्चेद्ब्रह्मचर्यं ब्रह्मचारी वा भवतीत्यर्थः। मासो ब्रह्मचर्यस्य मासिकं ब्रह्मचर्यम्। अर्धमासिकम्[19]। सांवत्सरिकम्। मासोऽस्य ब्रह्मचारिणः मासिको ब्रह्मचारी। [20]अर्धमासिकः। सांवत्सरिकः।

समयात् प्राप्तात् ॥ ३।२।११३ ॥ सोऽस्येति वर्तते। स इति प्रथमान्तात् समयशब्दात् प्राप्तौपाधिकाद् अस्येति षष्ठ्यर्थे ठण्प्रत्ययो भवति। समयः प्राप्तोऽस्य सामयिकं कार्यम्। उपनतकालमित्यर्थः।

---

१. -ति वा। म०। २. -न भुक्ते ठण- म०। ३. द्वैरात्रिकः म०। ४. द्वैयह्निकः म०। ५. त्रैयह्निकः म०। ६. -तमतं वा-म०। ७. ख एव म-म०। ८. सान्तसन्नि-म०। ९. द्वैयह्निक इति म०। १०. संवत्सर म०। ११. मासंसंव-म०। १२. -रः प्रत्य-म०। १३. -वारेच् म०। १४. भूतो म०। १५. -यमे निगृह्णीतमनुवा- म०। १६. पुम्भावाभावार्थः म०। १७. मासीना म०। १८. षण्मासिको म०। १९. आर्धमासिकम् म०। २०. आर्धमासिकः म०।

ऋत्वादिभ्योऽण् ॥ ३।२।११५ ॥ कालादि निर्वृत्तम्[1]। ऋतु इत्येवमादिभ्यः प्राप्तोपाधिभ्यः सोऽस्येत्यस्मिन् विषयेऽण्प्रत्ययो भवति। ऋतुः प्राप्तोऽस्यार्तवं पुष्पं[2] फलम्। उपवस्त्रा[3] प्राप्तोऽस्य औपवस्त्रम्। प्रावृषा प्राप्तोऽस्य प्रावृषिकम्। ऋत्वादयः प्रयोगगम्याः।

कालाट्ठञ् ॥३।२।११६॥ काल इत्येतस्माच्छब्दात् [4]प्राप्तोऽधिकात् सोऽस्येत्यस्मिन् विषये ठञ्प्रत्ययो भवति। कालः प्राप्तोऽस्य कालिकस्तापः। कालिको मेघः।

दीर्घात् ॥३।२।११७॥ [5]कालशब्दाद् दीर्घोपाधिकात्[6] सोऽस्येत्यस्मिन् विषये ठण् भवति। दीर्घः कालोऽस्य कालिकम् ऋणम्। कालिकं वैरम्। कालिकी सम्पत्। योगविभागाट्ठण्। यदि चाने हि कालाद्दीर्घाच्च य इत्येक एव योगः [7]क्रियते।

प्रयोजनम् ॥३।२।११८॥ सोऽस्येति वर्तते। स इति प्रथमान्तादस्येति षष्ठ्यर्थे ठण्प्रत्ययो भवति यत्प्रथमान्तं तच्चेत् प्रयोजनं स्यात्। प्रयोजनं प्रयोजकं प्रवर्तकं जनकमुत्पादकम्। जिनमहः प्रयोजनमस्येति[8] जैनमहिकम्। ऐन्द्रमहिकम्। आभिषेचनिकम्।

एकागाराच्चौरे[9] ॥३।२।११९॥ एकागारशब्दात्तदस्य प्रयोजनमित्यस्मिन् विषये ठण्प्रत्ययो भवति चौरे यदस्येति निर्दिष्टं स [10]चेच्चौरो भवति। एकमसहायमगारं प्रयोजनमस्य ऐकागारिकः। [11]चोरः चौरे नियमार्थं वचनम्, अन्यत्र न भवति। एकागारं प्रयोजनमस्य भिक्षोः।

चूलादिभ्योऽण् ॥३।२।१२०॥ चूलादिभ्यस्तदस्य प्रयोजनमित्यस्मिन् विषयेऽण् प्रत्ययो भवति। चूला प्रयोजनमस्य चौलम्। श्रद्धा श्राद्धम्। चूलादयः प्रयोगगम्याः।

विशाखाषाढान्मन्थदण्डे ॥३।२।१२१॥ विशाखा आषाढ इत्येताभ्यां तदस्य प्रयोजनमित्यस्मिन् विषयेऽण्प्रत्ययो भवति। ठणोऽपवादः। मन्थे दण्डे चाभिधेये। मन्थनं मन्थः विलोडनम्। विशाखा प्रयोजनमस्य वैशाखो मन्थः। [12]वैशाखाया पौर्णमास्या सर्वे गोमन्तः सर्वगोदोहं दधिभूतं शास्त्रमभिवृद्धयर्थं मथ्नन्ति। मन्थित्वा गृहदेवताभ्यो बलिमुपहृत्याऽतिथिभ्यः प्रदायावशिष्टं स्वयमुपयुञ्जते स मन्थो वैशाखः। अस्य हि विशाखा प्रयोजनम्। आषाढाः प्रयोजनमस्य आषाढो मन्थः। आषाढया पौर्णमास्यां वेणुं छित्वा सर्वगन्धैरनुलिप्य स्वयमनुलिप्ताः [13]लम्बिणोऽलङ्कृताः कुमारकाः तेनागाराण्यभिघ्नन्ति स दण्ड आषाढः। तस्य ह्याषाढाः प्रयोजनम्।

उत्थापनादेश्छः ॥३।२।१२१॥ उत्थापना[14] इत्येवमादिभ्यस्तदस्य प्रयोजनमित्यस्मिन् विषये छप्रत्ययो भवति। ठणोऽपवादः। उत्थापनं प्रयोजनमस्य उत्थापनीयम्। अनुप्रवचनीयम्। उत्थापन, अनुप्रवचन, अनुवाचन, अनुपान, अनुवासन, आरम्भव[15] इत्युत्थापनादिः।

विशिपदिरुहिपूरिसमापोऽन्तात्पूर्वपदात् ॥ ३।२।१२२॥ विशि पदि रुहि पूरि समापि इत्येतेभ्योऽनप्रत्ययान्तेभ्यो विद्यमानपूर्वपदेभ्यस्तदस्य प्रयोजनमित्यस्मिन् विषये छप्रत्ययो भवति। विशि—संवेशनं प्रयोजनमस्य संवेशनीयम्। अनुप्रवेशनीयम्। गृहप्रवेशनीयम्। पदि—पोत्प्रपदनीयम्। अश्वप्रपदनीयम्। रुहि—आरोहणीयम्। [16]प्रासादारोहणीयम्। पूरि—प्रपापूरणीयम्। समापि—अङ्कसमापनीयम्। श्रुतस्कन्धसमापनीयम्।

स्वर्गस्वस्तिवाचनादिभ्यो यश्लुक् ॥३।२।१२३॥ स्वर्गादिभ्यः स्वस्तिवाचनादिभ्यश्च यथासङ्ख्यं तदस्य प्रयोजनमित्यस्मिन् विषये यप्रत्ययः श्लुक् च भवतः[17]। स्वर्गः प्रयोजनमस्य स्वर्ग्यम्। यशस्यम्। आयुष्यम्।

---

१. निवृत्तम् म०। २. पुष्पफलम् म०। ३. उपवस्त्रा म०। ४. प्राप्तोपाधिकात् म०। ५. कालादित्यस्य दीर्घादिति विशेषणम्। स इति प्रथमान्तात् काल इत्येतस्मात् दीर्घोपा-म०। ६. -धिकादस्येति षष्ठ्यर्थे ठण् प्रत्ययो भवति। म०। ७. क्रियत म०। ८. -नमस्य जै-म०। ९. -च्चौरे म०। १०. चेच्चौरो म०। ११. चोरः चौरे म०। १२. वैशाख्यां पौर्ण-म। १३. लम्बिणो म०। १४. -यव इत्येव-म०। १५. आरम्भण म०। १६. प्रासादारोहणीयम् म०। १७. -तः। स्वर्गादिभ्यो यः। एव-म०।

काम्या इष्टयः । स्वस्तिवाचनादिभ्यः श्लुक् भवति ठणः । स्वस्तिवाचनं प्रयोजनमस्य स्वस्तिवाचनम् । शान्तिवाचनम् । पुण्याहवाचनम् । स्वर्गादयः स्वस्तिवाचनादयश्च प्रयोगगम्याः ।

आकालिकं ठञ्चाद्यन्ते ॥३।२।१२४॥ आकालिकमिति [1]अकालशब्दात् ठ ठण् च निपात्येते । भवत्यर्थे आदिरेव यस्यान्तो गम्यते[2] । यस्मिन्नेव काले[3] यत्प्रवृत्तं तस्मिन्नेव प्रत्यावृत्ते यदि तदुपरमेत अथवा यस्मिन्नेव काले तज्जन्म तस्मिन्नेव काले यदि तस्य विनाशो भवेन्नात्मलाभकालादूर्ध्वं तिष्ठेदित्यर्थः । आकालं भवत्याकालिकोऽनध्यायः । पूर्वेद्युर्यस्मिन् काले तृतीये चतुर्थे वा यामे प्रवृत्त. । पुनरपरेद्युरपि आ तस्मात् कालाद्भवत्यनध्याय आकालिक उच्यते । आकालिको विद्युत् । आकालका[4] विद्युत् । ठण्[5] ङी ठे आङ् आजन्मकालमेव भवन्ती नोर्ध्वं सा जन्मान्तर-विनाशिन्येवमुच्यते । आद्यन्त इति किम् ? सर्वकालभाविनो मा भूत् । आदावन्ते चेति निवृत्त्यर्थं निपातनम् । अथवा समानकालशब्दस्य [6]आकालादेशः आद्यन्त इति द्वन्द्व[7]प्रकृतिविशेषणमस्येति षष्ठ्यर्थे ठण्ठो प्रत्ययौ निपात्येते । निपातं च कस्यचिदिष्टस्य प्रतिपत्त्यर्थं [8]सकालाद्यन्तावस्य आकालिकोऽनध्यायः । आकालिको आकालिका वा विद्युत् । समानकालतादि[9]अन्तयोः पूर्ववद् वेदितव्या ।

त्रिंशद्द्विशतेर्ड्वुरनाम्न्यार्हात् ॥३।२।१२५॥ त्रिंशत् विंशति इत्येताभ्याम्[10] आ अर्हदर्थाद्योऽर्थो वक्ष्यते तस्मिन् ड्वुप्रत्ययो भवति । कापवादः । अनाम्नि अच्संज्ञायां विषये न चेत्प्रत्ययान्तं कस्यचित्संज्ञा भवति । त्रिंशता क्रीतं त्रिंशकम् । विंशकम् । त्रिंशतमर्हन् त्रिंशकः । विंशकः । आ[11] अर्हदित्यभिविधावाकारः । अनाम्नीति किम् ? त्रिंशत्कम् । विंशतिकम् ।

संख्याऽडतेश्चाशत्तिष्टेः कः ॥३।२।१२६॥ शत्[12]तिष्ट इत्येतदन्तवर्जितायाः संख्यायाः डति-प्रत्ययान्ताच्च शब्दात् त्रिंशद्विंशतिशब्दाभ्यां च[13] आ अर्हतोऽर्थे कप्रत्ययो भवति । ठणोऽपवादः । संख्यायाः— द्विकम् । त्रिकम् । पञ्चकम् । सप्तकम् । बहुकम् । गणकम् । यावत्कम्[14] । अर्धद्वकम् । अर्धपञ्चमकम् । डुति । [15]कतिकम् । त्रिंशत्–त्रिंशत्कम् । विंशति–विंशतिकम् । डति—त्रिंशत् । विंशतीनामुपादानमशत्तिष्टेरिति प्रतिषेधात् । अशत्तिष्टेरिति किम् ? चात्वारिंशत्कम्[16] । आशीतिकम् । नावतिकम् । षाष्टिकम् ।

अनादेः शतादतस्मिन्यठौ ॥३।२।१२७॥ आ अर्हदर्थाद्योऽर्थो वक्ष्यते तस्मिन्नादेरपूर्वपदात्[17] शब्दात् य ठ इत्येतौ प्रत्ययौ भवतः । कापवादः । अतस्मिन् स चेदर्थो वस्तुतः प्रकृत्यर्थादभिन्नो न भवति । शतेन क्रीतं शत्यम् । शतिकम् । शतमर्हति शत्यः । शतिकः । अनादेरिति किम् ? द्व्युत्तरं शतं[18] तेन क्रीतं द्विशतकम् । संख्यादेश्चार्हदतु[19]च इति प्राप्नोति । अतस्मिन्निति किम् ? शतं मानमस्य शतकं स्तोत्रम् । शातकं निदानम् ।

वातोष्टः ॥ ३।२।१२८ ॥ अतोः अत्वन्तायाः संख्याया अर्हतोऽर्थे ठप्रत्ययो[20] भवति । यावतिकम् । यावतम्[21] । [22]तावतिकम् । ठविधानसामर्थ्यात् कादेशो न भवति ।

सहस्रशतमानादण् ॥ ३।२।१२९ ॥ सहस्र शतमान इत्येताभ्यामार्हदर्थेऽण्प्रत्ययो भवति । कठणोरपवादः । साहस्रम् । शातमानम् । "वसनात्"[23] इत्यत्र सहस्रशतमानग्रहणमकृत्वाऽण्वचनं "वा अण" इत्येवमर्थम् ।

---

१. आकाल म० । २. द्विधा चादिरेवान्तो भवति यस्मिन्नेव म० । ३. -स्मिन्नेव काले प्र-म० । ४. अकालिका म० । ५. ठणि म० । ६. आकालादेशः म० । ७. द्वन्द्वः प्रकृ-म० । ८. समानकालाद्यन्त-म० । ९. -द्यन्तयोः म० । १०. असंज्ञायां म० । ११. आ इति म० नास्ति । १२. तिष्टि म० । १३. चार्हदोऽर्थे म० । १४. यावत्कम् तावत्कम् म० । १५. डति म० । १६. -त्कम् । पाञ्चाशत्कम् सासतिकम् । आ-म० । १७. -दाद् शतशब्दा-म० । १८. -तं द्विशतं तेन म० । १९. -दुत्तरं च म० । २०. यो वा म-म० । २१. यावत्कम् म० । २२. तावतिकम् । तावत्कम् म० । २३. -सनादीत्य-म० ।

कंसकार्षादट्ट ॥३।२।१३०॥ कंस अर्ध इत्येताभ्यामार्हतोऽर्थे ठट्प्रत्ययो भवति। कांसिकम्। कांसिकी। अर्धिकम्। अर्धिकी। टकारो ङ्यर्थः।

अर्धात्पलकंसकर्षात् ॥३।२।१३१॥ अर्धादेः पल कंस कर्ष इत्येवमन्ताच्छब्दादार्हतोऽर्थे ठट्प्रत्ययो[1] भवति। अर्धपलिकम्। अर्धपलिकी। अर्धकंसिकम्। अर्धकंसिकी। अर्धकर्षिकम्। अर्धकर्षिकी।

कार्षापणात् प्रतिश्चास्य वा ॥३।२।१३२॥ कार्षापणशब्दादार्हतोऽर्थे ठट्प्रत्ययो भवति, अस्य कार्षापणशब्दस्य च प्रति इत्ययमादेशो भवति वा। कार्षापणिकम्। कार्षापणिकी। प्रतिकम्। प्रतिकी। चकार आदेशस्य प्रत्ययसन्नियोगशिष्टार्थः[2]। अत एव द्विगोः ङ्लुचि प्रत्यादेशो न भवति। द्विकार्षापणम्। अध्यर्धकार्षापणम्। अस्येति स्थानिप्रतिपत्त्यर्थम्। अन्यथा प्रतिः प्रत्ययान्तरं विज्ञायेत[3]।

शूर्पादञ् ॥३।२।१३३॥ शूर्पशब्दादार्हतोऽर्थेऽञ्प्रत्ययो वा भवति। ठणोऽपवादः। शौर्पम्। शौर्पिकम्।

वसनात् ॥३।२।१३४॥ वसनशब्दादार्हतोऽर्थेऽञ्प्रत्ययो नित्यं भवति। वासनम्। योगविभागो नित्यार्थः।

विंशतिकात् ॥३।२।१३५॥ विंशतिकशब्दादार्हतोऽर्थेऽञ्प्रत्ययो भवति। वैंशतिकम्। योगविभाग उत्तरार्थः।

द्विगोः खः ॥३।२।१३६॥ विंशतिकशब्दान्ताद् द्विगोरार्हतोऽर्थे खप्रत्ययो भवति। अलोऽपवादः। विधानसामर्थ्यात् प्लुग्न भवति। द्विविंशतिकीनम्। द्विविंशतीकीनम्। अध्यर्धविंशतिकीनम्। अर्धपञ्चविंशतिकीनम्।

खारीकाकणीभ्यः कच् ॥३।२।१३७॥ खारी काकणी इत्येवमन्ताद् द्विगोः केवलाभ्यां च खारीकाकणीभ्यामार्हतोऽर्थे कच्प्रत्ययो भवति। द्विखारीकम्। त्रिखारीकम्। अध्यर्धखारीकम्। खारीकम्। द्विकाकणीकम्। त्रिकाकणीकम्। अध्यर्धकाकणीकम्। काकणीकम्। बहुवचनं केवलार्थम्। चकारो न कचीति[4] प्रतिषेधार्थम्।

माषपणपादाद्यः ॥३।२।१३८॥ द्विगोरिति वर्तते। माष पण पाद इत्येवमन्ताद् द्विगोरार्हतोऽर्थे यप्रत्ययो भवति। द्विमाष्यम्। अध्यर्धमाष्यम्। द्विपण्यम्। त्रिपण्यम्। अध्यर्धपण्यम्। द्विपाद्यम्। त्रिपाद्यम्। अध्यर्धपाद्यम्। माषपणसाहचर्यात्पादः परिमाणं न प्राण्यङ्गमिति पत्काषिहिमहति य इति पद्भावो न भवति।

शताद्वा ॥३।२।१३९॥ शतान्ताद् द्विगोरार्हतोऽर्थे यप्रत्ययो वा भवति। पक्षे संख्यालक्षणः कः। तस्य ङ्लुग्[5] न[6] भवति। अस्य[7] तु[8] विधानसामर्थ्यान्न भवति। [9]द्विशत्यः। द्विशतम्। अध्यर्धशत्यः। अध्यर्धशतम्।

शाणात् ॥३।२।१४०॥ [10]शाणाद् द्विगोरार्हतोऽर्थे[11] यप्रत्ययो वा भवति। पक्षे ठण्। तस्य ङ्लुक्। [11]अस्य तु विधानसामर्थ्यान्न भवति। द्विशाण्यम्। द्विशाणम्। अध्यर्धशाण्यम्। अध्यर्धशाणम्। योगविभाग उत्तरार्थः।

[12]**द्वित्रेरणच्** ॥३।२।१४१॥ द्वि त्रि इत्येतत्पूर्वो यः शाणशब्दः तदन्तात् द्विगोरार्हतेऽर्थे अण् च यश्च वा प्रत्ययौ भवतः। पक्षे ठण्, तस्य ङ्लुक्। एवं त्रैरूप्यं सम्पद्यते। द्विशैण्यम्। द्वैशाण्यम्। द्विशाणम्। [13]त्रिशाण्यम्।

---

१. -तोऽर्थे ठट्प्र-म०। २. शिष्टतार्थ म०। ३. विज्ञायते म०। ४. प्रतिषेधार्थः म०। ५. ङ्लुग्म--म०। ६. यप्रत्ययस्य म० टि०। ७. विशेषे म० टि०। ८. द्विशत्वम् म० टि०। ९. शाणान्तद्वि-म० टि०। १०. -तोऽर्थे म०। ११. यप्रत्ययस्य म०। १२. रण् च म०। १३. त्रिशाण्यम्, त्रैशाणम्, त्रिशाणम् म०।

अलुग्वो नाम्नि प्लुक् ॥३।२।१४२॥ अलुगन्ताद् द्विगोरार्हतोऽर्थे उत्पन्नस्य प्रत्ययस्य प्लुग् भवति नाम्नि न चेत्प्रत्ययान्तं कस्यचिन्नाम भवति । द्वाभ्यां कंसाभ्यां द्विकंस्या[1] वा क्रीतं द्विकंसम्[2] । त्रिकंसम् । अध्यर्धेन कंसेन क्रीतम् [3]अध्यर्धकंसम् । अर्धपञ्चमकंसम् । [4]द्विशूर्पम् । त्रिशूर्पम् । अध्यर्धशूर्पम् । अर्धपञ्चमशूर्पम् । अलुग्व इति किम् ? द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम् । द्विशूर्पेण क्रीतं [5]द्विशूर्पिकम् । अनाम्नीति किम् ? पञ्चलोहित्यः परिमाणमस्य [6]पाञ्चलोहितकम् । [7]पञ्चकलापाः प्रमाणमस्य पाञ्चकलापिकम् । परिमाणविशेषस्य नाम्नी एते, [8]पकारचकारानुबन्धौ पित्तिं तद्धित इति मुम्भावार्थौ । पञ्चगर्गः । दशगर्गः ।

वाऽध्यः ॥३।२।१४३॥ अलुगन्तात् द्विगोः परस्यार्हतोऽर्थेऽध्यः प्रत्ययस्य प्लुग् भवति वा । नित्यापवादः । द्विसहस्रम् । [9]द्विसाहस्रम् । अध्यर्धसहस्रम् । अध्यर्धसाहस्रम् । द्विशतमानम् । द्विशातमानम् । अध्यर्धशतमानम् । अध्यर्धशातमानम् । अण इति किम् ? द्वौ[10] द्रोणौ पचन् द्विद्रोणः । अध्यर्धद्रोणः ।

सुवर्णकार्षापणात् ॥३।२।१४४॥ सुवर्णान्तात् कार्षापणान्तादेव द्विगोरलुगन्तादिहितस्यार्हतोऽर्थे[11] प्लुग्वा भवति । द्विसुवर्णम् । द्विसौवर्णिकम् । अध्यर्धसुवर्णम् । अध्यर्धसौवर्णिकम् । द्विकार्षापणम् । द्विकार्षापणिकम् । द्विप्रतिकम् । अध्यर्धकार्षापणिकम् । अध्यर्धप्रतिकम् । प्लुचि प्रतिरादेशो नास्ति चकारस्य सन्नियोगार्थत्वात् ।

द्वित्रिबहोर्निष्कविस्तात् ॥३।२।१४५॥ द्वि त्रि बहु इत्येतेभ्यः परो यो निष्कशब्दो विस्तशब्दश्च तदन्ताद् द्विगोरलुगन्तात्परस्यार्हतोऽर्थे प्रत्ययस्य प्लुग्वा भवति । द्विनिष्कम् । द्वैनैष्किकम् । त्रिनिष्कम् । त्रैनैष्किकम्[12] । द्विविस्तम्[13] । त्रिवैस्तिकम् । बहुविस्तम् । बहुवैस्तिकम् ।

मूल्यैः क्रीते ॥३।२।१४६॥ मूल्यवाचिनस्तृतीयान्तात् क्रीतेऽर्थे यथाविहितं [14]ठणादयश्च प्रत्यया भवन्ति । निर्देशादेव तृतीयान्तत्वं विज्ञायते । सप्तत्या क्रीतं साप्ततिकम् । आशीतिकम् । नैष्किकम् । पाणिकम् । पादिकम् । विंशकम् । विंशिकम् । द्विकम् । त्रिकम् । शत्यम् । शतिकम् । मूल्यग्रहणं किम् ? देवदत्तेन क्रीतम् । पाणिना क्रीतम् । शूर्पाभ्यां क्रीतम् । शूर्पैः क्रीतम् । इति परिमाणशब्दात् द्विवचनबहुवचनान्तात् प्रत्ययो न भवत्यनभिधानात् । शूर्पादयो ह्यव्यक्तपरिमाणानामर्थानां वाचकः[15] । न च संख्याभेदवाचिनो विभक्तिवाक्ये इव वृत्तावस्ति । यत्र तु संख्याभेदः[16] प्रतिपत्तौ प्रमाणमस्ति तत्र भवत्येव । द्वाभ्यां क्रीतं द्विकम् । त्रिकम् । द्वाभ्यां शूर्पाभ्यां क्रीतं द्विशूर्पम् । त्रिशूर्पम् । तथा मुद्गैः क्रीतं मौद्गिकम् । माषिकम् । न ह्येकेन मुद्गेन माषेण वा क्रयः संभवति ।

तस्य वापे ॥३।२।१४७॥ उप्यतेऽस्मिन्निति वापः । तस्येति षष्ठ्यन्ताद् वापेऽर्थे यथाविहितं प्रत्ययो भवति । प्रत्यस्य वापः क्षेत्रं प्रात्यिकम् । द्रौणिकम् । खारिकम् ।

वातपित्तश्लेष्मसन्निपाताच्छमनकोपने ॥३।२।१४८॥ तस्येति वर्तते । तस्येति षष्ठ्यन्तेभ्यः वात पित्त श्लेष्म सन्निपात इत्येतेभ्यः शमने कोपने चार्थे यथाविहितं ठण्प्रत्ययो भवति । शाम्यति येन

---

१. समाहारे द्विगुः स्त्रियामिति द्विगोरिति ङी म० टि० । २. अत्र ठणि प्राप्ते तदपवादः । कंसार्धाट्ठञिति ठञ् । तस्यानेन प्लुक् म० । लुप्तयणोञिति ईकारस्य श्लुक् म० टि० । ३. कंसमासेऽध्यर्ध इति वचनाद्द्विगौ समासेऽध्यर्धः संख्येति तद्धितद्विगौ ततः कंसार्धाट्ठञिति ठञ् म० टि० । ४. द्वा सूर्पादनित्यञः ठणो वा प्लुक् म० टि० । ५. द्विशौर्पिकम् म० । ६. पाञ्चलोहितिकम् म० । तद्धितद्विगोर्मालमित्यहितार्थे ठण् म० टि० । ७. पञ्चकलापाः परिमाणमस्य पाञ्चकलापिकम् म० । ८. ते ते पकारे शकारावनु म० । ९. द्वाभ्यां सहस्राभ्यां क्रीतमिति द्विगौ ततः सङ्ख्यावेर्हदेर्लुक् इति वचनात् सहस्रशतमानादणिस्यण् । मानसंबन्धसंख्यापूर्वपदवृद्धिः म० टि० । १०. पचत्पञ्चद्द्रोणादित्यम् ठण् वा म० टि० । ११. -र्थे प्रत्ययस्य प्लु–म० । १२. -स्तम् । बहुवैष्किकम् म० । १३. –स्तम् । द्विवैस्तिकम् । त्रिविस्तम् । त्रिवै- म० । १४. ठण्ठञादयश्च म० । १५. वाचकाः म० । १६. –द्रव्यक्षिप–म० ।

तच्छमनम्। कुप्यति वैन तत्कोपनम्। वातस्य शमनं कोपनं वातिकम्। पैत्तिकम्। श्लैष्मिकम्। सान्निपातिकम्। विग्रहयोरर्थयोः प्रकरणादेव विशेषगतिः।

हेतौ संयोगोत्पाते ॥३।२।१४९॥ तस्येति षष्ठ्यन्ताद् हेतावर्थे यथाविहितं प्रत्ययो भवति योऽसौ हेतुः स चेत् संयोग उत्पातो वा भवति। हेतुर्निमित्तम्। संयोग. संबन्धः। प्राणिना शुभाशुभसूचको भूतपरिणाम उत्पातः। शतस्य हेतुर्दैवदत्तसंयोगः शत्यः। शतिकः। साहस्र.। उत्पाते—ग्रोमग्रहणे[2] हेतुः सोमग्रहणको[3] भूमिकम्पः। साङ्ग्रामिकमिन्द्रधनुः। सौमिक्किः[4] सन्देशः। शतस्य हेतुर्दक्षिणाक्षिस्पन्दनं शतिकम्। साहस्रम्।

द्रुघणब्रह्मवर्चसाद्योऽसंख्यापरिमाणाश्वादेः ॥३।२।१५०॥ संख्यापरिमाणाश्वादिवर्जिताद् द्रुघणात् ब्रह्मवर्चसशब्दाच्च तस्येति षष्ठ्यन्ताद्धेतावर्थे यप्रत्ययो भवति। ठणाद्यपवादः। स चेद्धेतुः संयोग उत्पातो वा भवति। धनस्य हेतुः संयोग उत्पातो वा धन्यः। यशस्यः। आयुष्यः। वात्या विद्युत्। ब्रह्मवर्चस्य। गव्य इति गोर्योऽजोति[5] सिद्धम्। असंख्यापरिमाणाश्वादेरिति किम्? सङ्ख्यायाः—पञ्चकः। सप्तकः। परिमाणात्—प्रस्थिकः। द्रौपः। खारीकः। अश्वादेः—आश्विकः। आस्मिकः।

ऊर्ध्वमानं किलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात् संख्या बाह्या तु सर्वतः।

अश्व, अश्मन्, गण, उमा, ऊर्णा, भङ्गा, वर्ष, वस्त्र इत्यश्वादिः।

पुत्राच्छ्यौ ॥३।२।१५१॥ पुत्रशब्दात्तस्येति षष्ठ्यन्ताद् हेतावर्थे छ य इत्येतौ प्रत्ययौ भवतः। स चेद्धेतुः संयोग उत्पातो वा भवति। पुत्रस्य हेतुः संयोग उत्पातो वा पुत्रीयः। पुत्र्यः।

पृथिवीसर्वभूमिभ्यामञ् ॥३।२।१५२॥ पृथिवी सर्वभूमि इत्येताभ्या तस्य हेतौ संयोगोत्पाते-ऽञ्प्रत्ययो भवति। पृथिव्याः हेतु. संयोग उत्पातो वा पार्थिवः। सार्वभौमः। सर्वभूमेरनुशतिकादित्वादुभयपदवृद्धिः।

ईशे ॥३।२।१५३॥ पृथिवीसर्वभूमिशब्दाभ्यां तस्येति षष्ठ्यन्ताभ्याम् ईशे ईश्वरेऽर्थेऽञ्प्रत्ययो भवति। पृथिव्या ईशः पार्थिवः। सार्वभौमः। योगविभागादीश इत्यर्थान्तरमिदं न हेतोर्विशेषणम् विशेषणत्वे हि पृथिवी-सर्वभूमिरीशे[6] चाजित्येक एव योग. क्रियेत।

ज्ञाते ॥३।२।१५४॥ पृथिवीसर्वभूमिशब्दाभ्या तस्येति षष्ठ्यन्ताभ्या ज्ञातेऽर्थेऽञ्प्रत्ययो भवति। ज्ञातो विदितः प्रकाशित[7] इत्यर्थ.। पृथिव्या विदितः पार्थिवः। सार्वभौमः। कर्तृसंबन्धविवक्षाया षष्ठी। पृथिवीसर्व-भूमिशब्दाभ्यामिह[8] तत्रेत्या: प्राणिन उच्यन्ते पूर्वत्रात्र च पृथिवीसर्वभूमिभ्यामिति वर्तते लोकसर्वलोकादित्या-रम्भात्। ज्ञात इति यदि प्रकृतिमात्राट्ठणादिप्रत्ययो विधेयः स्यात् लोकसर्वलोकग्रहणमनर्थकं[9] स्यात्। यदि च पृथिवीसर्वभूमिभ्या ठण् विधेयः लोकसर्वलोक[10] इति विभागोऽनर्थकः। ज्ञाते[11] लोकसर्वलोकाच्चेत्येक एव योगः क्रियेत।

लोकसर्वलोकात् ॥३।२।१५५॥ लोकसर्वलोकशब्दाभ्यां तस्येति षष्ठ्यन्ताभ्यां ज्ञातेऽर्थे यथाविहितं ठण्प्रत्ययो भवति। लोकस्य ज्ञातो लौकिकः। सार्वलौकिक.। सर्वलोकस्यानुशतिकादित्वादुभयपदवृद्धिः।

तदस्मै वा वृद्ध्यायलाभोपदाशुल्कं देयम् ॥३।२।१५६॥ तदिति प्रथमान्तादनेति सप्तम्यर्थे-ऽस्मै इति चतुर्थ्यर्थे वा यथाविहितं प्रत्ययो भवति यत्प्रथमान्त तच्चेद्वृद्धिरायो लाभ उपदा शुल्कं वा देयं भवति। अधमर्णेनोत्तमर्णे धनातिरिक्तं देयम्। वृद्धिः ग्रामादिषु नित्यं निबद्धो ग्राम्यो[12] भाग आयः पटादीनामुपादान-

---

१. –णादेर्विशे– म०। २. सोमग्रहणस्य हेतुः म०। ३. –हणिको भू– म०। ४. सौमिक्किः परिवेषः म०। –परिवेषं विजानीयादुपसूर्यकमण्डले, परिवेष्टनमप्याहुः परिवेषं मनीषिणः॥ इति शाश्वतः म० द्वि०। ५. –र्योऽजोति– म०। ६. –मेरीशे चा– म०। ७. प्राकाशित म०। ८. –भ्यां चेह म०। ९. –र्थकम्। यदि म०। १०. –कादिति योगवि– म०। ११. अज्ञाते म०। १२. ग्राम्यो म०।

मूल्यादतिरिक्तं प्राप्यं धनं[1] लाभः। उपदा उत्कोचो वक्रं च उत्कोट इत्यर्थः। वणिजां राजकारितो राजभागः शुल्कम्। पञ्चास्मिन्शते वृद्धिः पञ्चकं शतकम्। पञ्चास्मिन्ग्रामे लाभः पञ्चको ग्रामः। पञ्चास्मिन्पटे लाभः पञ्चकः पटः। पञ्चास्मिन्व्यवहारे उपदा पञ्चको व्यवहारः। पञ्चास्मिन् शते शुल्कं पञ्चशतम्[2]। एवं शतमस्मिन् वृद्धिरायो लाभ उपदा शुल्कं वा देयमिति शत्यम्। शतिकम्। सहस्रम्[3]। प्रस्थिकम्। चतुर्थ्यर्थे देवदत्ताय वृद्धिरायो लाभ उपदा शुल्कं वा देयं पञ्चको देवदत्तः। शत्यः। शतिकः। सहस्रः। प्रास्थिकः।

उदर्धाट्टः ॥३।२।१५७॥ इदंप्रत्याहारगृहीतप्रत्ययान्तादर्धशब्दाच्च तदिति प्रथमान्तादत्रेति सप्तम्यर्थे वा ठप्रत्ययो भवति। ठष्ठटोरपवादः। तच्चेत्प्रथमान्तं वृद्धायलाभोपदाशुल्कं देयं भवति। द्वितीयस्मिन्नस्मै वा वृद्धिरायो लाभ उपदा शुल्कं वा देयं द्वितीयिकः। तृतीयिकः। पञ्चमीकः। षष्ठीकः। अर्धात्-अर्धिकः। अर्धिका स्त्री। अर्धशब्दो रूपकार्धवाची।

भागाद् यठौ ॥३।२।१५८॥ भागशब्दाद् यठप्रत्ययौ भवतः। ठणोऽपवादः। तदस्मै वा वृद्धायलाभोपदाशुल्कं देयमित्यस्मिन्विषये। भागोऽस्मिन्नस्मै वा वृद्धादिदेयं भाग्यः। भागिकः। भागिका[4] स्त्री। [5]भागशब्दो रूपकार्धे रूढः।

[6]वस्त्राशभृत्यस्य ॥३।२।१५९॥ तदिति वर्तते। तदिति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति। यत्प्रथमान्तं [7]तच्चेद्वस्त्रं मूल्यं अंशो भागो भृतिर्वेतनं वा भवति। पञ्चास्य वस्त्रं पञ्चकः पटः। पञ्चास्याशाः[10] पञ्चकं [11]नगरम्। पञ्चको देवदत्तः। पञ्चास्य भृतिः पञ्चकः कर्मकरः। एवं शत्यः। शतिकः। साहस्रः। प्रास्थिकः[12]।

मानम् ॥३।२।१६०॥ तदस्येति वर्तते। तदिति प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति। यत्प्रथमान्तं तच्चेन्मानं भवति। मीयते येन तन्मानं द्रव्यपरिच्छेदः। प्रस्थो मानमस्य प्रास्थिको राशिः। द्रौणिकः। [13]दौस्मिकः। वाहिकः। खारिकः। खारशतिकः। खारसहस्रिकः। वर्षशतं मानमस्य वार्षशतिको देवदत्तः। वार्षसहस्रिकः। पञ्चलोहितानि परिमाणमस्य पाञ्चलोहितकः[14]। पाञ्चकलायकम्[15]। मानसंवत्सरस्याशाढकुलिजस्येति संवत्सरग्रहणात्कालो मानग्रहणेन गृह्यते इति कालान्मानमिति प्रत्ययो[16] भवति। षष्टिजीवितपरिमाणमस्य षाष्टिकः। साप्ततिकः। वार्षशतिकः। वार्षसहस्रिकः[17]। [18]द्विषाष्टिर्जीवितपरिमाणं[19] द्विषाष्टिकः। द्विसाप्ततिकः[20]। [21]द्विवार्षशतिकः। त्रिवार्षशतिकः। द्विवार्षसहस्रिकः। त्रिवार्षसहस्रिकः[22]। इति जीवितवृत्तेस्तन्मात्रविभूते इति भवति यस्य हि [23]षष्टिवर्षाणि जीवितपरिमाणं षष्टिमासो भूतो भवति।

सङ्घस्याः सङ्घसूत्रपाठे ॥३।२।१६१॥ सङ्घशब्दावाचिनस्तदिति प्रथमान्तान्मानोपाधिकादस्येति षष्ठ्यर्थे यथाविहितं प्रत्ययो भवति स चेत् षष्ठ्यर्थः सङ्घः सूत्रं पाठो वा भवति। सङ्घः समुदायः। सूत्रं शास्त्रं ग्रन्थः। [24]पाठोऽध्ययनम्। पञ्च [25]परिमाणमस्य सङ्घस्य पञ्चकः। नवकः। दशकः। अष्टावध्यायाः परिमाणमस्य अष्टकं पाणिनीयसूत्रम्। दशकं वैयाघ्रपदीयम्। अष्टौ रूपाणि वाराः परिमाणमस्य अष्टकः पाठोऽभीतिः। नवकः। दशकः। सङ्घसूत्रपाठ इति किम्? चतुष्टयी शब्दानां प्रवृत्तिः। को न भवति क्रमभाष्यवयवेषु सूत्रपाठयोरेव

---

१. द्रव्यं म०। २. पञ्चकं श– म०। ३. साहस्रं प्रास्थि– म०। ४. साहस्रं म०। ५. द्वितीयस्मिन्– म०। ६. भागिका म०। ७. भागो रूपार्द्धके प्रोक्तो भागधेयैकदेशयोः इति विश्वः म० टि०। ८. वस्त्रांश–म०। ९. वस्त्रं म०। १०. –स्यांशः म०। ११. –कं तग– म०। १२. प्रास्थिकः म०। अस्त्रियामाढकद्रोणौ खारीवाहो भिकुञ्जकः। कुडवः प्रस्थ इत्याद्या परिमाणार्थकाः पृथक्॥ –म० टि०। १३. दौस्मिकः म०। १४. पाञ्चलोहितिकम् म०। १५. –कायिकम् म०। १६. –धो न भव– म०। १७. –सहस्रिकः म०। १८. द्वे षष्टी जी– म०। १९. –माणमस्य द्वि– म०। २०. –कः। त्रिसाप्ततिकः। द्वि– म०। २१. वार्षश– म०। २२. –सहस्रिकः म०। २३. षष्टिवर्षाणि म०। २४. पाठादिति अध्ययन– म०। २५. पञ्च गावः परि– म०।

नान्यस्मिन्समुदाय इति नियमार्थं सूत्रपाठो[1] पञ्चतयं पदमिति को न भवति। अथवा सङ्घः प्राणिसमुदाय इति तयोः पृथगुपादानं पञ्चादीनां संख्येयानामवयवतया सङ्घादेर्मात्रशास्त्रयटो[2] बाधनार्थमिदं वचनं[3] सुवादौ आश्रेदवयवो पयतौ[4] तुतपडेव यथा द्वये देवमनुष्याः। चतुष्टये ब्राह्मणक्षत्रियविटशूद्रा इति।

त्रिंशत्चत्वारिंशम् ॥३।२।१६२॥ सङ्ख्यावाचिनः स्वार्थे[5] विहितं प्रत्ययो भवति नाम्नि समुदायश्चेन्नाम भवति। पञ्चैव पञ्चकाः शकुनयः। त्रिकाः शालङ्कायनाः। सप्तका ब्रह्मवृक्षाः।

त्रिंशत्चत्वारिंशम् ॥३।२।१६३॥ तदस्य मानं नाम्नीति च वर्तते। त्रिंशच्चत्वारिंशमिति त्रिंशच्चत्वारिंशदित्येताभ्यां तदस्य मानमित्यस्मिन्विषये[7] ठण्प्रत्ययो निपात्यते नाम्नि सञ्ज्ञाया विषये। त्रिंशदध्यायाः परिमाणमेषां त्रैंशानि। [8]चत्वारिंशानि [9]ब्राह्मणानि कानिचिद् उच्यन्ते।

पञ्चदशद्वर्गे वा ॥३।२।१६४॥ पञ्चदशत् इत्येतौ शब्दौ ड[10]प्रत्ययान्तौ वा निपात्येते। तदस्मिन्मानमित्येतस्मिन्विषये वर्गेऽभिधेये। पक्षे को भवति। पञ्च प्रमाणमस्य वर्गस्य पञ्चवर्गः। पञ्चको वर्गः।[11] दशको वर्गः। विंशत्यादयो गुणशब्दा गुणे गुणिनि[12] चायत्वलिङ्गसंख्या एव वर्तन्ते। विंशतिर्गवां विंशतिर्गाव इति साधुत्वमेषां पृषोदरादय उणादयो बहुलमिति वा[13] तन्निर्देशाद्वा विज्ञायते।

स्तोमे डट् ॥३।२।१६५॥ सङ्ख्यायाः स्तोमेऽभिधेये डट्प्रत्ययो भवति। तदस्य मानमित्येतस्मिन्विषये। पञ्चदशः। सप्तदशः। विंशः। पञ्चविंशः.[14] स्तोमः। पञ्चदशा[15] रात्रिः।

तद्धरद्वहदावहत्सु वंशादेर्भारात् ॥३।२।१६६॥ तदिति द्वितीयान्तात्[16] धूरभूतार्थवाचिनो वंशादेर्हरति वहत्यावहति चार्थे[17] यथाविहितं प्रत्ययो भवति। वंशान्भारभूतान् हरन्वहन्नावहन् वा वांशिकः। कौटिकः। [18]वाल्वीभिकः। भारादिति किम्? एकं वंशं [19]वहति पुनः वंशादिभ्यः परो यो भारशब्दस्तदन्ताच्छकटरूपान्ता-[20]दिति द्वितीयाद्धरति वहत्यावहति चार्थे यथाविहितं प्रत्ययो भवति। वांशभारिकः।[21] कौटभारिकः।[22] बाल्वजभारिकः। वंशादेरिति किम्? भारं वहति। भारादिति किम्? वंशं हरति। हरतिर्देशान्तरप्रापणे चौर्ये वा। वसतिरुत्क्षिप्य धारणे।[23] आवहतिरुत्सादने। वंश, कुरु,[24] बल्वज, मूलस्थूण,[25] लक्ष, अस्मन्, इक्षु,[26] स्वद् इति वंशादिः।

वस्त्रद्रव्याट्टकम् ॥३।२।१६७॥[27] वस्त्र द्रव्य इत्येताभ्यां तद्धरद्वहदावहत्सु यथासङ्ख्यं ट क इत्येतौ प्रत्ययौ भवतः। वस्त्रं[28] हरन् वहन् आवहन् वा वस्त्रिकः.[29]। एव द्रव्यकः।

[30]**पञ्चत्पञ्चद्रोणात्** ॥३।२।१६८॥ तदिति वर्तते। तदिति द्वितीयान्ताद् द्रोणशब्दात्[31] पञ्चत्यर्थे-[32]ऽप्रत्ययो भवति। चकारादधिकृतश्च ठण्। द्रोणं पचन् द्रौणिकः। द्रौणिकी स्थाली। द्रौणिकी गृहिणी।

सम्भवद्वहरतोश्च ॥३।२।१६९॥ तदिति द्वितीयान्तात्पचति सम्भवद्वहरतोश्चार्थयोर्यथाविहितं प्रत्ययो भवति। प्रस्थं पचन् संभवन् अवहरन्वा प्रास्थिकः। प्रास्थिकी स्थाली।[33] कौडुविकः।[34] खाण्डिकः। प्रमाणानतिरेकः सम्भवः। तत्र[35] सम्भवति[36] सकर्मकोऽकर्मकश्च। सकर्मक इहोपात्तः। सम्भवत्यवगृह्णातीत्यर्थः।

---

१. पाठोपादानं तेन पञ्चवर्णाः परिमाणमस्य पञ्च– म०। २. –त्वात्तयटो बाध– म०। ३. –वचनं सङ्घा– म०। ४ –तोपत्ता तु तयाडे– म०। ५. –र्थे यथा वि– म०। ६. –त्रैंशच्चात्वा– म०। ७. –थे ठण् प्र– म०। ८. चात्वा– म०। ९. ब्राह्मणानि कानिचिदेवोच्यन्ते म०। १०. डप्रत्यय–र्गे०। ११. र्गः। दशद्-वर्गः। द्र–म०। १२ -नि चोपात्तस्वकि। १३ वा तत्त्रि– म०। १४ -वः त्रिंशः म०। १५. –दशी रा–म०। १६. यथा– म०। १७. बाल्वजिक· म०। १८. –शं हरति म०। १९. –रूपात्तदिति म०। २०. –तीकान्ताद्र– म०। २१. कौष्टभा– म०। २२. बाल्वाज भा– म०। २३. -रुत्पादने म०। २४. कुट म०। २५. अक्ष म०। २६. खट्वा म०। २७. वस्त्र द्र– म०। २८. वस्त्रं हर– म०। २९. वस्त्रिकः म०। ३०. पञ्चत्पञ्च– म०। ३१. पचत्प– म०। ३२. अत्र प्र– म०। ३३. कौडुविकः म०। ३४. खारीकः म०। ३५. अत्र म०। ३६. -वतिः स म०।

अवहारः क्षेपणमुपसंहरणम् । चकारः पचतासम्भवदवहरतोः समुच्चयार्थः[1] तन्नोत्तरत्रार्थः अवश्यानुवृत्तिः ।

पात्राढकाचितात्खो वा ॥३।२।१७०॥ पात्र आढक [2]अचित इत्येतेभ्यस्तत्पचत्सम्भवदवहरत्सु खप्रत्ययो वा भवति । पक्षे ठण् । पात्रं पचन्संभवन्नवहरन् पात्रीणः । पात्रिकः । पात्रीणा । पात्रिकी स्थाली । आढकीना । आढकिकी । आचितीना । [3]आचितकी । पात्रादयः परिमाणशब्दाः ।

द्विगोष्टट्खौ ॥ ३।२।१७१ ॥ पात्राढकाचितान्तात् द्विगोस्तत्पचत्सम्भवदवहरत्सु टट्ख इत्येतौ प्रत्ययौ वा भवतः । पक्षे ठण् । तस्य प्लुगपवादः । टाऽनयोर्विधानसामर्थ्यात् । द्वे पात्रे पचन् सम्भवन्नवहरन्वा द्विपात्रिकः । द्विपात्रीणः । द्विपात्रः । द्विपात्रिकी । द्विपात्रीणा । द्विपात्री स्थाली । द्व्याढकिकी । द्व्याढकीना । द्व्याढकी । द्व्याचितिकी । द्व्याचितीना । द्व्याचिता । अचितान्ताद् ङो न भवति । [4]अचिताचितकम्बल्यादिति प्रतिषेधात् ।

प्लुक्च कुलिजात् ॥३।२।१७२॥ कुलिजशब्दान्ताद् द्विगोस्तत्पचत्सम्भवदवहरत्सु टट्खौ प्रत्ययौ वा भवतः । पक्षे ठण् तस्य प्लुक् च वा [5]भवतः । एवं चातुरूप्यं सम्पद्यते [6]द्विकुलिजे पचन् सम्भवन्नवहरन् वा द्विकुलिजिकः । द्विकुलिजीनः । द्वैकुलिजिकः । द्विकुलिजः । द्विकुलिजिकी । द्विकुलजीना । द्वैकुलिजिकी । द्विकुलिजी स्थाली । प्लुचि द्विगोरिति ङी ।

अर्हति ॥३।२।१७३॥ तदिति द्वितीयान्तादर्हतीत्यर्थे यथाविहितं [7] प्रत्ययो भवति । एवैतच्छत्रमर्हति एवैतच्छत्रिकः । आभिषेचनिकः । वास्त्रिकः । वास्त्रयुगिकः । बलीवर्दिकः । शत्यः । शतिकः । साहस्रः । भोजनमर्हति पानमर्हतीति भोजनादिष्वनभिधानान्न भवति ।

दण्डादियज्ञाद्यछम् ॥३।२।१७४॥ दण्डादिभ्यो यज्ञशब्दाच्च तदर्हतीत्यर्थे यथासङ्ख्यं य छ इत्येतौ प्रत्ययौ भवतः । ठणोऽपवादः । दण्डादेः—दण्डमर्हति दण्ड्यः । मुसल्यः । मधुपर्क्यः । यज्ञात्—यज्ञमर्हति यज्ञीयो देशः । यज्ञीयः पुरुषः । यज्ञो नाम क्रियासमुदायः । केचित् दधिमन्थाद्यं वाऽपूर्वमित्याहुः । दण्ड, मुसल, मधुपर्क, शका, कथा, अर्ह, मेध, मेधा, उदक, वध, युग, द्रुघ इति दण्डादिः ।

पात्रात् ॥३।२।१७५॥ पात्रशब्दात्तदर्हत्यर्थे यछप्रत्ययौ भवतः । पात्र्यः । पात्रीयः ।

कडङ्करदक्षिणास्थालीविलाच्छ्यौ ॥३।२।१७६॥ कडङ्कर दक्षिणा स्थालीविल इत्येतेभ्यः तदर्हत्यर्थे छ य इत्येतौ प्रत्ययौ भवतः । कडङ्करमर्हति कडङ्करीयः । कडङ्कर्यो बलीवर्दः । कडङ्करं माषादिकाष्ठम् । दक्षिणीयः । दक्षिण्यो गुरुः । स्थालीविल्यः । स्थालीविल्यास्तण्डुलाः ।

शालीनकौपीनार्त्विजीनाः ॥३।२।१७७॥ शालीन कौपीन आर्त्विजीन इत्येते शब्दास्तदर्हतीत्यर्थे खञ्प्रत्ययान्ता निपात्यन्ते । शालीन इति शालाप्रवेशनशब्दात् खञ् । उत्तरपदस्य च लुक् । शालाप्रवेशनमर्हतीति शालीनः । [8]शालीना भार्या । शालीनशब्दोऽभूषणपर्यायः । कौपीन इति कूपप्रवेशनशब्दात् । कूपप्रवेशनमर्हतीति कौपीनः[9] । कौपीनशब्दः पापस्य पायूपस्थस्य तदावरणस्य [10]चीरखण्डस्य च वाचकः । आर्त्विजीनः इति ऋत्विज्[11] शब्दात् ऋत्विककर्मशब्दाद्वा खञ्प्रत्ययः कर्मशब्दस्य [12]लोपे निपात्यते । ऋत्विजमर्हति आर्त्विजीनो यजमानः । ऋत्विककर्मार्हति आर्त्विजीन ऋत्विगेव ।

छेदादेर्नित्यम् ॥३।२।१७८॥ नित्यमित्यर्हतीत्यस्य विशेषणम् । छेदादिभ्यस्तदिति द्वितीयान्तेभ्यो नित्यमर्हतीत्यर्थे यथाविहितं प्रत्ययो भवति । छेदं नित्यमर्हति छैदिक[13]म् । छेद, भेद, दोह, द्रोह, कर्ष, विकर्ष, प्रकर्ष, विप्रकर्ष, प्रयोग, विप्रयोग, संप्रयोग, [14]वर्त, प्रेक्षा[15], संप्रश्न[16] इति छेदादिः ।

---

१. तेभ्योत्तरत्रार्थत्रय–म० । २. आचित म० । ३. आचितिकी म० । ४. अचिस्ताचि– म० । ५. भवति म० । ६. द्वे कुलि– म० । ७. –हितः प्रत्य– म० । ८. –त् तदभिन्यक्ष्यं म० । ९. शालीनाभार्यः म० । १०. कौपीनम् म० । ११. चीरं खण्डकम्बिलामिति स्वामिः । चीरचीवरपञ्चरमिति वामनलिङ्गानुशासनसङ्ग्रहवर्गे–म० टि० । १२. इत्येतस्मात् स० । १३. -स्य च लो– म० । १४. छैदिकः म० । १५. वर्त म० । १६. प्रेक्षण म० । १७. सम्प्रश्न म० ।

वैरङ्गिकः ॥३।२।१७९॥ वैरङ्गिक इति विरागशब्दात्तन्नित्यमर्हतीत्यर्थे ठण्प्रत्ययो विरङ्गादेशश्च निपात्यते । विरागं नित्यमर्हति वैरङ्गिकः ।

शीर्षच्छेदाद्यो वा ॥३।२।१८०॥ शीर्षच्छेदशब्दात्तन्नित्यमर्हति यप्रत्ययो वा भवति । पक्षे ठण् । शीर्षच्छेदं नित्यमर्हति शीर्षच्छेद्यः । शैर्षच्छेदिकः ।

वः ॥३।२।१८१॥ ठणिति निवृत्तम् । प्रत्ययान्तरमधिक्रियते । यदित ऊर्ध्वमनुक्रमिष्यामः । यावत्प्रकृतिसामान्यविषयमनुपात्तप्रकृतिविशेषं प्रत्ययान्तरं नाधिकरिष्यते तावत्तत्र य इत्येतदपवादविषयं परिहृत्याधिकृतं वेदितव्यम् ।

वहति रथप्रासङ्गात् ॥३।२।१८२॥ तदिति वर्तते । तदिति द्वितीयान्ताद्रथशब्दात्प्रासङ्गशब्दाच्च वहत्यर्थे यप्रत्ययो भवति । रथं वहन् रथ्यः । प्रासज्यत इति प्रासङ्गः [1]काष्ठम्, यद्वत्सानां दमनकाले स्कन्धे आसज्यते—तद्वहन् प्रासङ्ग्यः । यत्त्वन्यत्प्रसङ्गादागतं प्रासङ्गमिति न भवत्यनभिधानात् । रथग्रहणं किमर्थम् ? यो हि रथं वहति स रथस्य वोढा भवति । रथात्सादेश्च वोढरि य इत्येव सिद्धम् । [2]अस्लुग्यर्थं तस्य य इत्यस्य ग्लुग्विधानोरलुगोऽनपत्ये ज्यादेरिति ग्लुग्भवति । द्वयो रथयोर्वोढा द्विरथ इति । अस्य तु न भवति । अप्रागिञतत्वाद् द्वौ रथौ वहन् द्विरथ्यः । एव च द्विगो रूपद्वयं सम्पद्यते । युग्ये इति युग्यं नाम्नीति सिद्धम् ।

धुरो यड्ढक् ॥३।२।१८३॥ धुर इत्येतस्मात्तदिति द्वितीयान्ताद्वहत्यर्थे य ढक् इत्येतौ प्रत्ययौ भवतः । धुरं वहन् धुर्यः । धौरेयः । अथ यग्रहणं किमर्थम् ? न ढक् चेत्येवोच्येत तत्र चकारेण यथाविहित प्रत्ययो विज्ञायते, नैवं शक्ष्यते[3] यथाविहितं विज्ञायमाने तस्य स्वत्वविवक्षायां वहत्यण् प्रसज्येत तन्निवृत्त्यर्थं यग्रहणम् ।

वामाद्यादेः खः ॥३।२।१८४॥ वामाद्यादेः धुर् इत्येतदन्ताद्वहति खप्रत्ययो भवति । वामधुरं वहन् वामधुरीणः । सर्वधुरीणः । उत्तरधुरीणः । दक्षिणधुरीणः ।

अश्वैकादेः ॥३।२।१८५॥ एकादेर्धुर् इत्येतदन्ताद्वहत्यर्थेऽप्रत्ययो भवति खश्च । [4]एकधुरं वहन् एकधुरः । एकधुरीण. ।

शकटादण् ॥३।२।१८६॥ शकटशब्दात्तद्वहत्यण्प्रत्ययो भवति । शकटं वहन् शाकटो गौः ।

हलसीराट्ठण् ॥३।२।१८७॥ हल सीर इत्येताभ्यां तद्वहति ठण्प्रत्ययो भवति । हलं वहन् हालिकः । सैरिकः । शकटाद्धलसीराभ्याञ्च स्वत्वविवक्षायामण्ठणौ सिद्धौ—अर्थविशेष प्रत्ययाभ्यामभिधापयितुं वचनम् ।

विध्यत्यनन्येन ॥३।२।१८८॥ तदिति वर्तते । तदिति द्वितीयान्ताद्विध्यत्यर्थे यप्रत्ययो भवति । न चेत्स विध्यन्नात्मनोऽन्येन करणेन विध्यति । पादौ विध्यन्त्यः पद्याः शर्कराः । ऊरू विध्यन्तः ऊरव्याः कण्टकाः । उरो विध्यन्त उरस्या वाताः । अनन्येनेति किम् ? चोरं विध्यति देवदत्तः । अत्र चोरं विध्यन्देवदत्तो धनुषा पाषाणेन वाऽन्येन विध्यति । शर्कराः कण्टका वा न तथा मुखादि च करणं ततो नान्यत् । पादौ विध्यन्ति शर्करा मुखेनेतिकरणप्रयोगसापेक्षत्वान्न भवति । क्रिया च साधनेप्रसाधने तद्धित उपसर्जनम् । अनभिधाने हि मुखेन पद्या इत्युक्ते व्यधिम्प्रति [5]मुखस्य करणत्वं प्रतीयते । किं तर्हि [6]व्यद्धरूपलक्षणादि (?) ।

धनगणं लब्धा ॥३।२।१८९॥ द्वितीयान्ताद्धनशब्दाद्गणशब्दाच्च लब्धेत्यर्थे यप्रत्ययो भवति । धनं लब्धा धन्यः । गण्यः । लब्धेति तृन्नन्तम् ।

णोऽन्नात् ॥३।२।१९०॥ अन्नशब्दाद्द्वितीयान्ताल्लब्धरि णप्रत्ययो भवति । अन्नं लब्धा आन्नः ।

पदमस्मिन्दृश्यम् ॥३।२।१९१॥ पदशब्दात्प्रथमान्ताद्दृश्यत्वोपाधिकाद् अस्मिन्निति सप्तम्यर्थे यप्रत्ययो भवति । निर्देशादेव प्रथमान्तता । दृश्यमिति क्रियया कर्मणो गतत्वात् । क्यण्च शक्यार्थे । पदमस्मिन्दृश्यं पद्यः कर्दमः । नातिद्रवो नातिशुष्को यत्र प्रतिमुद्रोत्पादनेन पदं द्रष्टुं शक्यम् ।

---

१. काष्ठः म० । २. अस्लुगर्थं म० । ३. शक्यं म० । ४. एकधुर्यं म० । ५. –धनप्रधाने तद्धि– म० । ६. –भिधानाद्वा नहि मु– म० । ७. मुखस्य म० । ८. व्यद्ध, म० ।

नौविधेण तार्यवब्ये ॥३।२।१९२॥ नौ विध इत्येताभ्यां यथासंख्यं तार्ये वब्ये चार्थे यप्रत्ययो भवति । नावा तार्यं नाव्यमुदकम् । नाव्या नदी । विधेन वब्यो विध्यः । वब्यो वधार्हः ।

न्यायार्थादनपेते ॥३।२।१९३॥ न्याय अर्थ इत्येताभ्यां निर्देशादेव पञ्चम्यन्ताभ्यामनपेतेऽर्थे यप्रत्ययो भवति । न्यायादनपेतं न्याय्यम् । अर्थ्यम् ।

मतस्य करणे ॥३।२।१९४॥ मतशब्दान्निर्देशादेव षष्ठ्यन्तात्करणेऽर्थे यप्रत्ययो भवति । मतं स्याभ्यं दृष्टं ज्ञातं मतिर्वा तस्य करणं मत्यं करणम् । करणं भावो वा । मदस्येति च पाठः । तत्र मद्यमित्युदाहरणम् ।

वश्यपथ्यवयस्यधेनुष्यागार्हपत्यजन्यधर्म्यहृद्यमूल्यम् ॥३।२।१९५॥ वश्यादयः शब्दा यथास्वमर्थविशेषेषु यप्रत्ययान्ता निपात्यन्ते । वश्य इति वशशब्दाद् द्वितीयान्ताद् गतेऽर्थे यप्रत्ययो निपात्यते । वशं गतो वश्यः । गुरोर्विधेय इत्यर्थः । निपातनं रूढपर्यमितीह न भवति । वशं गतः । इष्टां प्राप्त. । अभिप्रेतं गत इत्यर्थः । पथ्य इति पथिन् इत्येतस्मादनपेते यः । पथोऽनपेतं पथ्यमोदनादि । निपातनादिह न भवति पथोऽनपेतं शकटादि । वयस्येति वयशब्दात्तृतीयान्तात्तुल्येऽर्थे यः । वयसा तुल्यो वयस्यः सखा । निपातनादिह न न भवति वयसा तुल्यः शत्रुः । धेनुष्येति धेनुशब्दाद्विशिष्टायां धेनौ यप्रत्ययः व्यवहारगमः धेनुष्या या गोमता गोपालाय अधमर्णेन[1] वोढ्रेमर्णाय आ ऋणप्रदानाद्धार्थं धेनूर्दीयते सा धेनुष्या । गार्हपत्येति गृहपतिशब्दात्तृतीयान्तात्संयुक्ते ञ्यः प्रत्ययः । गृहपतिना संयुक्तो गार्हपत्यः । एवंनामा कश्चिदग्निः । निपातनादन्यत्र न भवति । जन्येति जनीशब्दाद्वधूवाचिनो द्वितीयान्ताद्वहत्सु जनशब्दाच्च बहुषु तात्पर्ये यैः प्रत्ययः । जनीं बहूनां जन्यां[2] जामातृव्यस्या उच्यन्ते । जनस्य जल्पो जन्यः । निपातनादन्यत्र न भवति । धर्म्येति धर्मशब्दात्तृतीयान्तात्प्रभवत्यर्थे पञ्चम्यन्ताच्चानपेते यप्रत्ययो भवति । धर्मेण प्राप्यं धर्म्यं सुखम् । धर्मादनपेतं च धर्म्यम् । यद्धर्ममनुवर्तते । हृद्येति हृदयशब्दात्तृष्टयन्तात्प्रियेऽर्थे बन्धने च वशीकरणमन्त्रे यः । हृदयस्य प्रियं हृद्यम् औषधम् । हृद्यो देशः । हृदयस्य बन्धनं हृद्यो वशीकरणमन्त्रः । निपातनादन्यत्र न भवति । हृदयस्य प्रियः पुत्रः । मूल्यमिति मूलशब्दात्प्रथमान्तादस्येति षष्ठ्यर्थे यो निपात्यते । तच्च मूल्यं यद्युत्पाट्यं उत्पाटनयोग्यं भवति । मूलमेषामुत्पाट्यं मूल्या मुद्गाः । मूल्या माषाः । तृतीयान्ताच्चानाम्ये समे च यः । मूलेनानाम्यं मूल्यम् । मूल्यं पटाद्युत्पत्तिकारणम् । तेनानाम्यं यत्तत्पटादेर्विक्रयात् प्राप्यते सुवर्णादि तन्मूल्यम् । मूलेन समो मूल्यो घटः[3] उपादानेन समानफल इत्यर्थः । तुल्यशब्दः सदृशपर्यायः । तुल्यार्थे[4] तृतीयेति निपातनात्साधुर्विज्ञायते ।

तत्र साधौ ॥३।२।१९६॥ तत्रेति सप्तम्यन्तात्साध्वर्थे यप्रत्ययो भवति । सामनि साधुः सामन्यः । वेमन्यः । कर्मण्यः । सभ्यः । शरण्यः । साधुर्योग्यः प्रवीण उपकारको वा ।

पथ्यतिथिवसतिस्वपतेर्डण् ॥३।२।१९७॥ पथिन् अतिथि वसति स्वपति इत्येतेभ्यः तत्र साधौ डण्प्रत्ययो भवति । पथि साधु पाथेयम् । आतिथेयम् । वासतेयम् । स्वापतेयम् ।

भक्ताण्णः ॥३।२।१९८॥ भक्तशब्दात्तत्र साधौ णप्रत्ययो भवति । भक्ते साधुः भाक्तः शालिः । भाक्तास्तण्डुलाः ।

परिषदो ण्यश्च ॥३।२।१९९॥ परिषच्छब्दात्तत्र साधौ ण्यप्रत्ययो भवति णश्च । परिषदि साधुः पारिषद्यः । पारिषदः ।

सर्वजनात्खञ्च ॥३।२।२००॥ सर्वजनशब्दात्तत्र साधौ खञ्प्रत्ययो भवति चकाराण्यश्च । सार्वजन्यः । सार्वजनीनः ।

---

१. सार्म्यं म० । २. धर्म्यं म० । ३. "अथमार्यां विकल्पे वा" म० टि० । ४. यप्रत्य– म० । ५. ज्ञाति मूल्या अवोढाया जन्या स्त्रियां वरस्य ये इति वैजयन्ती म० टि० । ६. –नादिह न भव– म० । ७. मूलं म० । ८. घटः म० । ९. –ल्यार्थेस्तृती– म० ।

प्रतिजनादेः ॥३।२।२०१॥ प्रतिजनादिभ्यः तत्र साधौ खञ्प्रत्ययो भवति। प्रतिजने जने जने साधुः प्रातिजनीनः। आनुजनीनः। इदंयुगे साधुः ऐदंयुगीनः। प्रतिजन, अनुजन, इदंयुग, संयुग, समयुग, परयुग, परस्यकुल, अमुष्यकुल, विश्वजन, पञ्चजन, महाजन इति प्रतिजनादिः।

कथादेष्ठण् ॥३।२।२०२॥ कथादिभ्यस्तत्र साधौ ठण्प्रत्ययो भवति। कथायां साधुः काथिकः। वैकथिकः। कथा, विकथा, विश्वकथा, संकथा, वितण्डा, जनवाद, जनेवाद, जनोवाद, वृत्तिसङ्ग्रह, गुण, गण, आयुर्वेद, गुड, गुल्मास, इक्षु, सक्तु, वेणु, अपूप, मांसौदन, संग्राम, संघात, प्रवास, निवास, उपवास इति कथादिः।

देवतान्तात्तदर्थे ॥३।२।२०३॥ देवतान्ताच्छब्दरूपात्तदर्थे[1] यप्रत्ययो भवति। अर्थाश्चतुर्थ्यन्तात् प्रत्ययः। अग्निदेवतायै इदम् अग्निदेवत्यम्। पितृदेवत्यम्। देवदेवत्यम्। देवताशब्देन देयस्य हविरादेः प्रतिगृहीता स्वामी सम्प्रदानमुच्यते।

पाद्यार्घ्ये ॥३।२।२०४॥ पाद्यार्घ्यशब्दौ तदर्थे यप्रत्ययान्तौ निपात्येते। पादार्थं पाद्यमुदकम्। निपातनादेव पदादेशो न भवति। अर्घार्थमर्घ्यं रत्नम्।

ण्योऽतिथेः ॥३।२।२०५॥ अतिथिशब्दात्तदर्थे ण्यप्रत्ययो भवति। अतिथ्यर्थम् आतिथ्यम्।

हलस्य सादेश्च कर्षे ॥३।२।२०६॥ हलशब्दात्केवलात्सादेश्च निर्देशादेव षष्ठ्यन्तात्कर्षेऽर्थे यप्रत्ययो भवति। हलस्य कर्षो हल्या। द्वयोर्हलयोर्द्विहल्या। त्रिहल्या। परमहल्या। कर्षो गतमार्गः। सादेरित्यधिकार आपादपरिसमाप्तेः।

सीतया सङ्गते ॥३।२।२०७॥ सीताशब्दात्केवलात्सादेश्च निर्देशादेव तृतीयान्तात्सङ्गतेऽर्थे यप्रत्ययो भवति। सीतया सङ्गतं सीत्यम्। द्वाभ्यां सीताभ्यां सङ्गतं द्विसीत्यम्। त्रिसीत्यम्। परमसीत्यम्।

छः ॥३।२।२०८॥ य इति निवृत्तम्। प्रत्ययान्तरमभिक्रियते। यदित ऊर्ध्वमनुक्रमिष्यामः। तत्र छ इत्येतदधिकृतं वेदितव्यम्।

हविरन्नभेदापूपादेर्यो वा ॥३।२।२०९॥ हविर्भेदवाचिभ्योऽन्नभेदवाचिभ्योऽपूपादिभ्यश्च शब्देभ्यो वा यप्रत्ययोऽधिक्रियते। छापवादः। हविषः—आमिक्ष्यं दधि। आमिक्षीयं दधि। पुरोडाश्यास्तण्डुलाः। पुरोडाशीयास्तण्डुलाः। अन्नभेदात्—ओदन्यास्तण्डुलाः। ओदनीयास्तण्डुलाः। कृसर्यास्तण्डुलाः। कृसरीयास्तण्डुलाः। अपूपादेः—अपूप्यम्। आपूपीयम्। तण्डुल्यम्। तण्डुलीयम्। सादेश्चेत्यधिकारात्सदन्तादपि भवति। यवापूप्यम्। यवापूपीयम्। उवर्णान्ताद् हविरन्नभेदात् परत्वान्नित्यो यो भवति। चरव्यास्तण्डुलाः। सक्तव्या धानाः। अपूपादिषु येऽन्नभेदशब्दा अपूपादयस्तेषां केनचिदाकारसादृश्यादिनाऽर्थान्तरवृत्तौ प्रत्ययार्थमुपादानम्। अपूप, तण्डुल, पृथक्, अम्यूष, अदोष, किण्व, मुसल, कटक, कर्णवेष्टक, इर्गल, स्थूणापूप, सर्म्य[3], दीप, प्रदीप, अश्वत्थ, इत्यपूपादिः।

युगाद्योर्यः ॥३।२।२१०॥ युगादिभ्य उवर्णान्तेभ्यश्च यप्रत्ययोऽधिक्रियते। छापवादः। युगादेः—युग्यम्। हविष्यम्। शङ्कुभ्यं दारु। पिचव्य. कार्पासः। परशव्यमयः। कमण्डलव्या मृत्तिकाः। चरव्यास्तण्डुलाः। सक्तव्या धानाः। इह यग्रहणं बाधकबाधनार्थम्। सनद्वण्यं चर्म। अत्र हि परत्वाच्चर्मण्यञ्प्राप्नोति। सादेश्चेत्यधिकारात् सुयुग्यम्। अतियुग्यम्। गव्यमिति गोर्योऽवीति सिद्धम्। युग, हविस, अष्टका, बर्हिष्, मेधा, स्रुच्[3], [4]वोच, कूप, रक्ष, खद, विष—इति युगादिः।

शून्यशून्योधन्यनभ्यः ॥३।२।२११॥ शून्यादयः शब्दा आपादपरिसमाप्तेर्वक्ष्यमाणेष्वर्थेषु निपात्यन्ते शून्यशून्येति स्वञ्नित्येतस्मादयप्रत्ययः। शुन् शून् इत्येतौ चाधादेशौ निपात्येते। स्वम्यो हितं शून्यं शून्यम्।

---

१. थेऽर्थे यप्र- म०। २. स्थूणापाप म०। ३. सूप म०। ४. वीज म०।

ऊधन्येति ऊधस्शब्दात्यः । नश्चान्तादेशः । ऊधसे हित ऊधन्यः । नभ्येति नाभिशब्दाद् यः प्रत्ययः नभभावश्च । नाभये हितं नभ्यमञ्जनम् । औत्सर्गिकः एवायं नभभावो न प्राण्यङ्गलक्षणे, तत्र नाभये हितं नाभ्यं तैलमिति । न भवति । नाभये इदं नभ्यं दार्वेयदनरगण्डम् । चक्रमेककाष्ठं फलकञ्च तत्र मण्डलनभ्यं काष्ठनभ्यं मध्यफलकम् । इत्ययवयवात्समुदाये वृत्ते सिद्धम् । अवयवो हि अक्षधारण उक्तति शौर्यादि-गुणान्तरयोगाद्विकृतैर्नभः प्रकृतिर्भवतीति । नभ्यार्थो वृक्षस्तदर्थे ताच्छब्द्याच्च उच्यते ।

कम्बलाच्चाऽऽम्नि ॥३।२।२१२॥ कम्बलशब्दात्चाऽऽम्नि संज्ञायां विषये यप्रत्ययो भवत्यापादपरिसमाप्तेरर्थेषु । कम्बलस्य स्यात्कम्बल्यम् । परिमाणस्येयं संज्ञा । नाम्नीति किम् ? कम्बलीया ऊर्णा[6] ।

तस्मै हितेऽराजाचार्यब्राह्मणवृष्णः ॥३।२।२१३॥ तस्मै इति चतुर्थ्यन्तादराजन् आचार्य ब्राह्मण वृषन् इत्येतद्वर्जिताद्हितेऽर्थे यथाविकृतं प्रत्ययो भवति । उपकारकं हितम् । वत्सेभ्यो हितो वत्सीयः । करभीयः । मात्रीयः । पित्रीयः । आमिक्ष्यः । आमिक्षीयः । ओदन्यः । ओदनीयः । अपूप्यः । अपूपीयः । युग्यः । हविष्यः । शून्यः । शून्यः । अराजाचार्यब्राह्मणवृष्ण इति किम् ? राजादिभिर्विषयमेव भवति । राज्ञे हितः, आचार्याय हितः, ब्राह्मणाय हितः, वृष्णे हितः ।

रथखलतिलयवमाषवृषब्रह्मप्राण्यङ्गाद्यः ॥३।२।२१४॥ रथ खल तिल यव माष वृष ब्रह्मन्—इत्येतेभ्यः प्राण्यङ्गवाचिभ्यश्च तस्मै हिते यप्रत्ययो भवति । ञापवादः । रथाय हिता रथ्या भूमिः । खलाय हितं खल्यमग्निरक्षणम् । तिलेभ्यो हितस्तिल्यो वायुः । यवेभ्यो हितो यव्यस्तुषारः । माषेभ्यो हितो माष्यो वातः । वृषाय हितं वृष्यं क्षीरपानम्[7] । ब्रह्मणे हितः ब्रह्मण्यो देशः । प्राण्यङ्गेभ्यः—दन्तेभ्यो हित दन्त्यम् । कर्ण्यम् । चक्षुष्यम् । नाम्यम् । सादेश्चेत्यधिकारात्—प्रवरथ्या भूमिः । कृष्णतिल्यः । राजमाष्यः । राजदन्त्यमित्यादि सिद्धम् ।

ष्ण्योऽजावे ॥३।२।२१५॥ अज, अवि इत्येताभ्यां हिते ष्ण्यप्रत्ययो भवति । अजेभ्यो हितम् अजर्ष्यम् । अविर्ष्यम् । रकार[8]इति पुम्भावार्थः । अजाभ्यो हिता अजर्ष्या यूथिका ।

माणवचरकात् खञ् ॥३।२।२१६॥ माणव चरक इत्येताभ्यां तस्मै हिते खञ्प्रत्ययो भवति । माणवेभ्यो हितो माणवीनः । चारकीणः ।

भोगोत्तरपदात्मन्ख्यां खः ॥३।२।२१७॥ भोगोत्तरपदादात्मन्शब्दाच्च तस्मै हिते खप्रत्ययो भवति । मातृभोगाय हितः मातृभोगीणः । पितृभोगीणः । ग्रामणीभोगीणः । सेनानीभोगीनः । राजभोगीनः । आचार्यभोगीनः । अत्र क्षुम्नादिस्वादणत्वम् । आत्मने हित. आत्मनीनः । आत्मन्निति[9] नकारोच्चारणोऽपदस्येतिलोपो न भवति ।

पञ्चसर्वविश्वाज्जनात् कर्मधारयात् ॥३।२।२१८॥ पञ्च सर्व विश्व इत्येतेभ्यः परो यो जनशब्दस्तदन्तात्कर्मधारयात्तस्मै हिते खप्रत्ययो भवति । ञापवादः । पञ्चभ्यो जनेभ्यो हित. पञ्चजनीनः । सर्वस्मै जनाय हितः सर्वजनीनः । कर्मधारयादिति किम् ? पञ्चानां जनाय हितः पञ्चजनीयः । सर्वेषा जनाय हितः सर्वजनीयः । विश्वजनीय. । महान् जनोऽस्य महाजनः तस्मै हितो महाजनीयः ।

सर्वमहतष्ठण् ॥३।२।२१९॥ सर्व महा इत्येताभ्यां परो यो जनशब्दस्तदन्तात् कर्मधारयात् तस्मै हिते ठण्प्रत्ययो भवति । सर्वस्मै जनाय हितः सार्वजनिकः । महते जनाय हितः महाजनिकः । एवं सर्वजनात् पूर्वं खः । अयं च ठणिति द्वैरूप्यं भवति । कर्मधारयादिति किम् ? सर्वेषा जनाय हितः सर्वजनीनः ।

---

१. एव थे न म० । २. दार्व्यदनगण्डं म० । ३. तत्र नभ्यं मण्डलकचक्रं नभ्यं मध्यफलकम् इत्यव– म० । ४. ऊर्णा मेषादिलोम्नि स्यादित्यभिधानम् । म० टि० । ५. क्षीरपाणम् म० । ६. -र इत्युम्मा– म० । ७. णान्नोऽपद– मं० ।

सर्वाण्णो वा ॥३।२।२२०॥ कर्मवारयादिति निवृत्तम्। सर्वशब्दात्तस्मै हिते णप्रत्ययो वा भवति। पक्षे छः। सर्वेभ्यो हितः सार्वः। सर्वीयः।

परिणामिनि तदर्थे ॥३।२।२२१॥ तस्मै इति चतुर्थ्यन्तात् तदर्थे चतुर्थ्यन्तार्थ परिणामिनि अभिधेये यथाविहितं प्रत्ययो भवति। तद्भावः परिणामः। अङ्गारेभ्य काष्ठानि अङ्गारीयाणि काष्ठाणि अङ्गारार्थानीत्यर्थः। एवंप्रकारीया इष्टकाः। आमिक्ष्यं दधि। आमिक्षीयं दधि। ओदन्यास्तण्डुलाः। ओदनीयास्तण्डुलाः। अपूप्यं पिष्टम्। अपूपीयं पिष्टम्। शाकुन्यं दारु। पिचव्य.[1] कार्पासः। परिणामिनीति किम्? उदकाय कूपः। अंशये कोषीनकोशीकूपावस्युदकभावे परिणामिनी। तदर्थ इति किम्? मूत्राय यवागूः। उच्चाराय यवाग्वं सम्पद्यते न तु तदर्थम्।

चर्मण्यञ् ॥३।२।२२२॥ तस्मै इति चतुर्थ्यन्तात् परिणामिनि तदर्थे चर्मण्यभिधेयेऽञ्प्रत्ययो भवति। वर्ध्राय इदं वार्ध्रं चर्म। वास्त्रं चर्म। रायोपस्थं चर्म। हालबन्धं चर्म। सङ्ग्राम्य चर्मेति। उवर्णान्ताद् युगाद्योर्यः इति यग्रहणाद्य एव भवति।

ऋषभोपानहाञ्ञ्यः ॥३।२।२२३॥ ऋषभ उपानह् इत्येताभ्या चतुर्थ्यन्ताभ्या परिणामिनि तदर्थे[3] चर्मण्यभिधेये ञ्यप्रत्ययो भवति। ऋषभाय अयम् आर्षभ्यो वत्सः। औपानह्यो मुञ्जः। औपानह्यं काष्ठम्। औपानह्यं चर्म। चर्मण्यपि परत्वादयमेव भवति।

छदिर्बलेर्ढण् ॥३।२।२२४॥ छदिस्[4] बलि इत्येताभ्या चतुर्थ्यन्ताभ्या परिणामिनि तदर्थे ढण्प्रत्ययो भवति। [5]छदिषे इमानि छादिषेयाणि तृणानि। छादिषेयं चर्म। बालेयास्तण्डुलाः। चर्मण्यपि परत्वादयमेव भवति। औपवेयमित्युपधेयशब्दात् प्राज्ञाद्यण् स्वार्थिक। औपधेयशब्देन चोपधिरेवोच्यते। तेनोपधिशब्दात् परिणामिनि तदर्थे ढण् विधीयते।

परिखाऽस्य स्यात् ॥३।२।२२५॥ परिखाशब्दान्निर्देशादेव प्रथमान्तादस्येति षष्ठ्यर्थे परिणामिनि ढण् प्रत्ययो भवति। तदिति यथाविहितं विधानाद्या सा परिखा सा चेन्नगरादिति योगविभागेन सम्भाव्यते। परिखात्साविष्टकाना[6] स्यात्पारिखेय्य इष्टका। स्यादिति किम्? परिखा इष्टकानाम्। परिणामिनीति किम्? परिखाऽस्य नगरस्य स्यात्।

अत्र च ॥३।२।२२६॥ परिखाशब्दान्निर्देशादेव प्रथमान्तादत्रेति सप्तम्यर्थे ढण्प्रत्ययो भवति सा चेत्परिखा स्यादिति सम्भाव्यते। परिखाऽस्या स्यात्पारिखेयी भूमि.। योगविभाग. परिणामिनीत्यस्येहासम्बन्धार्थः। चशब्द उत्तरत्रास्य स्यादिति परिणामित्यत्र स्यादिति चोभयस्याप्यनुवृत्यर्थः।

नत् ॥३।२।२२७॥ तदिति प्रथमान्तादस्येति षष्ठ्यर्थे परिणामिनि अत्रेति सप्तम्यर्थे च यथाविहितं प्रत्ययो भवति। यत्प्रथमान्तं तच्चेत्स्यादिति अर्हतया सम्भाव्यते। प्राकार आसामिष्टकाना स्यात् प्राकारीया इष्टका.। प्रासादीय दारु। परशव्यमयः। प्रासादोऽस्मिन देशे स्यात् प्रासादीयो देशः। प्रासादीया भूमिः। स्यादिति किम्? प्राकार इष्टकानाम्। परिणामिनीति किम्? प्रासादोऽस्य स्यात्। गुणवानयं देवदत्तः।

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने वृत्तौ तृतीयस्याध्यायस्य द्वितीय. पाद. समाप्तिमगमत्।

---

१. तन्तुयोग्यः कार्पासविशेषः पिचुः म० टि०। कृजः पास इत्यौणादिकसूत्रेण पासप्रत्ययः, अरादेशश्च म० टि०। २. अमये कोशी न को- म०। ३. -दर्थेऽभिधे- म०। ४. उपहारो बलिः स्मृतः म० टि०। ५. बलीकनिद्भ्रे पटलप्रान्तेऽथ पटलं छदिः इत्यमरः म० टि०। ६. -खासामिष्टका स्यात् पारिखेय्यस्य इष्टकाः म०।

[तृतीयः पादः]

तस्यार्हे कृत्ये वत् ॥३।३।१॥ तस्येति षष्ठ्यन्तादर्हतीत्यर्हस्तस्मिन्नर्हेऽर्थे वत्प्रत्ययो भवति यत्तदर्हं तच्चेत् कृत्यं कर्तव्यं क्रिया भवति । राज्ञोऽर्हं राजवद्वृषस्य । राज्ञः राजत्वस्य वा युक्तमस्य वृत्तमित्यर्थः । राजवदवर्तत भरत इति राज्ञोऽर्हमवर्तत इत्यर्थः । एवं कुलीनवत्, साधुवत् । कृत्य इति किम् ? शतस्यार्हो देवदत्तः । राज्ञोऽर्हो मणिः ।

सुप इवे ॥३।३।२॥ कृत्ये वदिति वर्तते । सुबन्तादिवार्थे वत्प्रत्ययो भवति । इवशब्दः सादृश्यं द्योतयति । तच्चेत् सादृश्यं कृत्ये क्रियाविषयं क्रियागतं भवतीत्यर्थः । क्षत्रिय इव क्षत्रियवद् युध्यते । अश्ववद् धावति देवदत्तः । देवमिव देववत्पश्यन्ति देवदत्तम् । साधुनेव साधुवदाचरितं देवदत्तेन । ब्राह्मणायेव ब्राह्मणवद् दत्तं देवदत्ताय । पर्वतादिव पर्ववदवरोहन्त्याप्तनात् । सुप इति किम् ? गच्छन्नास्ते इव मन्दत्वादीप्सितदेशस्याप्राप्तेः । अश्नीयमानो नृत्यति वाङ्मात्रविकारप्रायत्वात् । कृत्य इति किम् ? देवदत्त इव स्थूलः । देवदत्त इव गोमान् । अत्र गुणादिविषये सादृश्ये, न भवति ।

तत्र ॥३।३।३॥ तत्रेति सप्तम्यन्तादिवार्थे वत्प्रत्ययो भवति । मथुरायामिव मथुरावत् सुघ्ने प्राकारः । पाटलिपुत्रवत्साकेते परिखा । गुरुवद्गुरुपुत्रे वर्तितव्यमिति । क्रियासादृश्ये पूर्वेणैव सिद्धमिति औकृत्यर्थोऽयमारम्भः ।

तस्य ॥३।३।४॥ तस्येति षष्ठ्यन्तादिवार्थे वद्भवति । देवदत्तस्येव देवदत्तवत् जिनदत्तस्य गावः । देवदत्तस्येव देवदत्तवज्जिनदत्तस्य दन्ताः । अक्रियाविषयदृश्यार्थे आरम्भः । योगविभाग उत्तरार्थः ।

भावे त्वतल् ॥३।३।५॥ तस्येति षष्ठ्यन्ताद्भावेऽभिधेये त्वतलित्येतौ प्रत्ययौ भवतः । भवतोऽस्मादभिधानप्रत्ययाविति भावः, शब्दप्रवृत्तिनिमित्तम् । गोर्भावः गोत्वं गोता । अश्वस्य भावोऽश्वत्वम् । अश्वता । अत्र सामान्यं भावः । शुक्लत्वम् । शुक्लता पटस्य । अत्र गुणः । शुक्लत्वं शुक्लता रूपस्य । अत्र गुणसामान्यम् । राजपुरुषत्वम् । राजपुरुषता । पाचकत्वम् । पाचकता । औपगवत्वम् । औपगवता । अत्र सम्बन्धः । समासकृत्तद्धितेष्वपि रूढेशब्देषु जात्यभिधानमेव । कृष्णसर्पत्वम् । कृष्णसर्पता । कुम्भकारत्वम् । कुम्भकारता । रजकत्वम् । रजकता । हस्तित्वम् । हस्तिता । धवखदिरत्वम् । धवखदिरता । इति जाति[3]सङ्केतः । यदृच्छाशब्देषु शब्दस्वरूप[4] सञ्ज्ञासञ्ज्ञिसम्बन्धः । बालकुमाराद्यवस्थानुगतं[5] वा वस्तुरूपम् । डित्थत्वम् । डित्थता । देवदत्तस्येति यः प्रथमकल्पितो डित्थः तत्क्रियागुणा देवदत्ते । भवनं भूतिर्भाव इति । प्रकृत्यर्थावच्छिन्ना वा सत्ता प्रत्ययार्थो वेदितव्यः । पृथक्त्वम् । पृथक्ता । नानात्वम् । नानातेति । वृत्तौ पृथगादिशब्दाः पृथग्भूतार्थे सत्त्वे वर्तन्ते इति प्रत्ययः । विग्रहस्तु प्रथग्भूतस्य भाव इति तस्येति वेह शब्दो विज्ञायते । स्वभावतस्त्वान्तं नपुंसकम्, तलन्तं स्त्रियाम् ।

प्राक्त्वात्पगडुलादे ॥३।३।६॥ त्वतलित्यनुवर्तते । ब्राह्मणस्त्व इत्यात्वसंशब्दनात्प्राक्त्वतलित्येतौ प्रत्ययावधिकृतौ वेदितव्यौ पगडुलादीन् वर्जयित्वा । उत्तरत्रैवोदाहरिष्यते । अपगडुलादेरिति किम् ? पागडुल्यम् । कामण्डलवम् । पगडुलादेर्वक्ष्यमाणावेव टपणजौ भवतः । अपवादैः समावेशार्थः कृत्ये विधानार्थश्चाधिकारः । पगडुल, विशस्त, दायाद, बाडिश, संवादिन्, बहुभाषिन्, शोर्षवातिन्, कमण्डलु इति पगडुलादिः ।

ब्राह्मणतत्पुरुषाद्वुधादेः ॥३।३।७॥ प्राक्त्वाच्च पूर्वात्तत्पुरुषाद् बुधाद्यन्तवर्जितात् त्वतलौ भवतः इत्ययमधिकारो वेदितव्यः । टपणादिबाधनार्थम् । न शुक्लः अशुक्लः, तस्य भावः अशुक्लत्वम् । अशुक्लता ।

---

१. अकृत्यार्थोऽयमा– म० । २. रूढिशब्देषु म० । ३. जातिसङ्गातः म० । ४. गौः शुक्लश्चलो डित्थ इत्यादौ चतुष्टयी शब्दप्रवृत्तिरिति महाभाष्यकारः । अत्र गौरिति जातिः, शुक्ल इति गुणः, चल इति क्रिया, डित्थ इति यदृच्छाशब्दः, इति ज्ञातव्यम् । म० टि० । ५. वा वस्तु म० ।

वर्ण इति टघञ्बाधया त्वतलौ । अशौक्ल्यमकार्ष्ण्यमिति टघञन्तेन समासः । समासाट्टघणि नञो वृद्धिः प्रसज्येत । एवमपतित्वमपतिता । पत्यन्त इति ट्यण्बाधया । अनाधिपत्य गाणपत्यमिति ट्यणन्तेन समासः । अराजत्वम् । अराजता । राजान्त इति टघण्बाधनया ।[1] अनाधिराज्यम्, अयौवराज्यमिति टघणन्तेन समासः । अमूर्खत्वम् । अमूर्खता । गुणाङ्ग इति टघण्बाधया । अयौवर्ण्यम् । अजाड्यमिति ट्यणन्तेन समासः । अस्थविरत्वम् । अस्थविरता । वयोवचन इत्यञ्बाधया । अस्थाविरम् । अकैशोरमित्यञन्तेन समासः । अहायनत्वम् । अहायनता । ह्यायनान्त इत्यण्बाधया । अद्व्यहायनम् । अत्रैहायणमिति अणन्तेन समासः । अपटुत्वम् । अपटुता इगन्त इत्यण्बाधया । अपाटवम् । अनाघवमित्यणन्तेन समासः । अरमणीयत्वम् । अरमणीयता । योपान्त्य इत्यण्बाधया ।[2] अरामणीयकम् । अकामनीयकमिति वुञन्तेन समास. । नञ्ग्रहणं किम् ? प्राजापत्यम् । सैनापत्यम् । तत्पुरुषग्रहणं किम् ? न विद्यते पतिरस्येत्यपतिर्ग्रामः तस्य भावः कृत्यं वेत्यापत्यम् । एवमाराज्यम् । आह्वायनम् । आपटवम् । आरमणीयकम् । अबुधादेरिति किम् ? न बुधः अबुध.—तस्य भावः कृत्यं वा आबुध्यम् । आचतुर्यम् । बुध, चतुर, यथातथा, यथापुर, सङ्गत, लवण, वदक, तरस, असु, ईश्वर, क्षेत्रज्ञ, संवादिन्, [4]सुवेशिन्, संभाषिन्, बहुभाषिन्, शौर्य, घातिन्, समस्थ, विषमस्थ, पुरस्थ, परमस्थ, मध्यस्थ, दुःपुरुष, कापुरुष, विशाल—इति बुधादिः ।

पृथ्वादेर्वेमन् ॥३।३।८॥ पृथु इत्येवमादिभ्यस्तस्य भावे वा इमन्प्रत्ययो भवति । प्राक्त्वादिति त्वतलौ च, वा वचनाद्यञ्च । प्राग्लोत्यणादिस्सोऽपि भवति । पृथोर्भावः प्रथिमा । पृथुत्वम् । पृथुता । पार्थवम् । बंहिमा । बहुलत्वम् । बहुलता । बाहुल्यम् । वत्सिमा । वत्सत्वम् । वत्सता । वात्सम् । पृथु, मृदु, महि, पटु, तनु, लघु, बहु, साधु, आशु, उरु, गुरु, खण्डु, बहुल, चण्ड, खण्ड, अकिञ्चन, बाल, बाड, पाक, वत्स, मन्द, स्वादु, ऋजु, वृष, ह्रस्व, दीर्घ, क्षिप्र, क्षुद्र, प्रिय इति पृथ्वादिः ।

वर्णदृढादिभ्यष्ट्यण् च ॥३।३।९॥ वर्णविशेषवाचिभ्यो दृढादिभ्यश्च तस्य भावे इमन् टघण् च प्रत्ययो वा भवत. प्राक्त्वादिति वा त्वतलौ च वावचनाद्यञ्च प्राग्लोत्यण् सोऽपि भवति । शुक्लस्य भावः शुक्लिमा । शौक्ल्यम् । शुक्लत्वम् । शुक्लता । कृष्णिमा । कृष्णत्वम् । कार्ष्ण्यम् । कृष्णता । कद्रिमा । कादर्व्यम् । कद्रुत्वम् । कद्रुता । शितिमा । शैत्यम् । शितित्वम् । शितिता । शैतम् । वावचनादिगन्तस्य पाञ्चरूप्यम् । दृढादिभ्य.—दृढस्य भावः द्रेढिमा । दार्ढ्यम् । दृढत्वम् । दृढता । द्रेढिमा । दार्ढ्यम् । वृढत्वम् । वृढता । परिवृढिमा । परिवृढ्यम् । परिवृढत्वम् । परिवृढता । विमतिमा । वैमत्यम् । विमतित्वम् । विमतिता । वैमतम् । सम्मतिमा । सम्मतित्वम् । सामत्यम् । सम्मतिता । सामतम् । इगन्तस्येत्यण् । टकारो ङ्यर्थः । आर्हन्ती । औचिती । यथाकारामी । [5]साहस्रो । शैवो[6] । पारिख्याती । दृढ, वृढ, परिवृढ, कृश, भृश, चुक्र, शुक्र, आम्र, लवण, शीत, उष्ण, [7]जड, बधिर, मूक, मूर्ख, पण्डित, मधुर, वियात, विलात, विमनस्, विशारद, विमति, सम्मति, सम्मन इति दृढादिः । आकृतिगणोऽयम् । तेन स्थैर्यं स्थेमेत्याद्यपि सिद्ध्यति[8] ।

पतिराजान्तगुणाङ्गराजादिभ्यः कृत्ये च ॥३।३।१०॥ पत्यन्तेभ्यो गुणाङ्गेभ्यो राजादिभ्यश्च तस्येति षष्ठ्यन्तेभ्यः कृत्ये कर्तव्ये कर्मणि क्रियायां च भावे च टघण्प्रत्ययो भवति । प्राक्त्वादिति त्वतलौ च । पत्यन्तेभ्य —अधिपत्योर्भावः कृत्यं वा आधिपत्यम् । नारपत्यम् । बार्हस्पत्यम् । प्राजापत्यम् । सैनापत्यम् । अधिपतित्वम् । अधिपतिता । राजान्तेभ्य—आधिराज्यम् । यौवराज्यम् । सौराज्यम् । अधिराजत्वम् । अधिराजता । गुणा अङ्ग निमित्तं येषां प्रवृत्तेस्ते गुणाङ्गा गुणद्वारेण गुणिनि वर्तमानास्तेभ्यः—मौढ्यम् । [9]मौर्ख्यम् । मूढत्वम् । मूढता । राजादिभ्य—राज्यम् । काव्यम् । ब्राह्मण्यम् । राजत्वम् । राजता । चकारो भावे कृत्ये चेति समुच्चयार्थः । राजन्, कवि, ब्राह्मण, माणव, वाडव, चोर, धूर्त, आराधय, विराधय, उपराधय, अपिराधय, अनृशंस,

---

1. बाधयां म० । 2. इति बुञ् । 3 लस म० । 4. संवेशिन् म० । 5. सामग्री म० । 6 शैवी म० । 7. जल म० । 8. सिद्धम् । 9. मौख्यम् म० ।

कुशल, चपल, निपुण, पिशुन, वाक्ष, स्वस्य, विश्वस्त, विफल, विशांपति, पुरोहित, ग्रामिक, खण्डिक, दण्डिक, कर्मिक, [1]चर्मिक, [2]म्लेक, सूतका, अजिनिका, अञ्जलिक, छत्रिक, सूचक—इति राजादिराकृतिगणः ।

सहायाद्वा ॥३।३।११॥ सहायशब्दात्तस्य भावे कृत्ये च ष्टयञ्प्रत्ययो वा भवति । प्राक्त्वादिति त्वतलौ । वावचनाद्ष्ण्ञ । सहायस्य भावः कृत्यं वा साहाय्यम् । साहायकम् । सहायत्वम् । सहायता ।

वयःप्राणिजातेरञ् ॥३।३।१२॥ वयोवचनात्प्राणिजातिवाचिनश्च तस्य भावे कृत्ये वाञ्प्रत्ययो भवति । त्वतलौ च । कुमारस्य भावः कृत्यं वा कौमारम् । कैशोरम् । शावम् । [3]वार्कारम् । कुमारत्वम् । कुमारता । अश्वस्य भावः कृत्यं वा—आश्वम् । गार्दभम् । माहिषम् । द्वैपिनो द्वैपम् । हस्तिनो हास्तम् । अश्वत्वम् । अश्वता । प्राणिग्रहणं किम् ? तृणत्वम् । तृणता । जातिग्रहणं किम् ? देवदत्तत्वम् । देवदत्तता ।

युवादिह्यायनान्तादण् ॥३।३।१३॥ युवादिभ्यो ह्यायनान्तेभ्यः शब्देभ्यस्तस्य भावे कृत्ये चाञ्ण्-प्रत्ययो भवति । त्वतलौ च । युवादेः—यौवनम् । युवता । युवत्वम् । यौवनिकेत्यपि भवति चोरादिपाठात् । ह्यायनान्तात्—द्विह्यायनस्य भावः कृत्यं वा द्वैह्यायनम् । त्रैह्यायनम् । चातुर्ह्यायनम् । द्विह्यायनत्वम् । द्विह्यायनता । अत्रि यौवनं न सिद्ध्यति । अणि द्वैपमित्र [4]अणोरुपादानम् । युवन्, स्थविर, यजमान, [5]कुकुर, [6]श्रावणस्त्री, दुःस्त्री, सुस्त्री, हृदय, दुर्हृदय, सुहृदय, दुर्हृत, सुभ्रातृ, दुर्भ्रातृ, परिव्राजक, सब्रह्मचारिन्, अनृशंस, चपल, कुशल, निपुण, पिशुन, कुतूहल, क्षेत्रज, उद्गातृ, उन्नेतृ, प्रशास्तृ, प्रतिहर्तृ, होतृ, पोतृ, भ्रातृ, भर्तृ, रथगणक, पतिगणक, सुष्ठु, दुष्ठु, अध्वर्यु—इति युवादिः ।

लघ्वादेरिकः ॥३।३।१४॥ लघुरादिः समीपभूतो यस्येकस्तदन्तात्तस्य भावे कृत्ये च अण्प्रत्ययो भवति । शुचेर्भाव. कृत्यं वा शौचम् । शाकुनम् । मौनम् । साम्मतम् । नाक्षरजनम् । हारीतकम् । तैतवम् । पाथिवम् । पाटवम् । लाघवम् । बाधवम् । पैत्रम् । शुचित्वम् । शुचिता । तैतवमित्यत्र यद्यपि तितउ इत्यव्य-वहितलघ्वादिगतं सम्भवति तथापि नैकमुदाहरणं लक्षणारम्भं प्रयोजयतीति शुच्यादिभ्योऽपि भवति । लघ्वादेरिति किम् ? पाण्डुत्वम् । कडूत्वम् । इक इति किम् ? घटत्वम् । पटत्वम् । केचिल्लघ्वादेरित्यपि प्रकृतेर्विशेषण-मिच्छन्ति । कार्षानवम्, आरतम् आरातमित्युदाहरन्ति साम्मतमितीच्छन्ति ।

हृदयपुरुषादसमासे ॥३।३।१५॥ हृदय पुरुष इत्येताभ्यां तस्य भावे कृत्ये चाञ्ण्प्रत्ययो भवति त्वतलौ च असमासे, न चेत् हृदयपुरुषशब्दयोः समासो विषयभूतो भवति । हृदयस्य भावः कृत्यं वा हार्दम् । हृदयत्वम् । पौरुषम् । पुरुषत्वम् । असमास इति किम् ? परमस्य हृदयस्य भावः कृत्यं वा परमहृदयत्वम् । परमपुरुषत्वम् । परमहार्द परमपौरुषमिति माभूत् । अत एव निपातनात्सापेक्षादपि भावे प्रत्ययो विज्ञायते तेन काकस्य काक्ष्यम्, बलाकायाः बालक्यमित्यादि सिद्ध्यति । अत्र हि काकाद्यपेक्षा कृष्णादिप्रकृतिः पौरुषमिति प्राणिजात्यमपि सिद्धम् । समासविषये प्रतिषेधार्थं पुरुषोपादानम् ।

सखिवणिक्दूतोद्यः ॥३।३।१६॥ सखि वणिज् दूत इत्येतेभ्यः तस्य भावे कृत्ये च यप्रत्ययो भवति । त्वतलौ च । सख्युर्भावः कृत्यं वा सख्यम् । सखित्वम् । सखिता । वणिज्या । वणिक्त्वम् । वणिक्ता । दूत्यम् । दूतत्वम् । दूतता । राजादिदर्शनाद्वाणिज्यं दौत्यमित्यपि भवति ।

स्तेयाहेन्त्यश्रौत्रम् ॥३।३।१७॥ स्तेय आर्हन्त्य श्रौत्रेति तस्य भावे कृत्ये च निपात्यते । स्तेयेति स्तेनाद्यो नलोपश्च निपात्यते । स्तेनस्य भावः कृत्यं वा स्तेयम् । राजादिदर्शनात् स्तैन्यमित्यपि भवति । आर्हन्त्येति अर्हतो नम् ष्टयण् च । अर्हतो भावः कृत्यं वा आर्हन्त्यम् । आर्हन्ती । श्रौत्रमिति श्रोत्रियादण् यलोपश्च । श्रोत्रियस्य भावः कृत्यं वा श्रौत्रम् । चोरादिपाठाद्वुञ् च । श्रौत्रियकम् । सर्वत्र त्वतलौ भवतः । एवं स्तेनत्वम् । स्तेनता । अर्हत्त्वम् । अर्हत्ता । श्रोत्रियत्वम् । श्रोत्रियता ।

---

१. चर्मिक म० । २. सिरिक म० । ३. वार्कारम् म० । ४. —स्थगणो म० । ५. कुकुक म० । ६. अवणस्त्री म० ।

कपिज्ञातेर्ढक् ॥३।३।१८॥ कपि ज्ञाति इत्येताभ्यां तस्य भावे कृत्ये च ढक्प्रत्ययो भवति त्वतलौ च । कपेर्भावः कृत्यं वा—कापेयम्[1] । कपित्वम् । कपिता । ज्ञातेयम् । ज्ञातित्वम् । ज्ञातिता ।

योपान्त्याद्गुरूपोत्तमाद्वुञ् ॥३।३।१९॥ त्रिप्रभृतीनामन्त्यमुत्तमम् । तत्समीपमुपोत्तमम् । उपोत्तमं गुरुर्यस्य तस्माद्यकारोपान्त्यात्तस्य भावे कृत्ये च वुञ्प्रत्ययो भवति त्वतलौ च । रमणीयस्य भावः कृत्यं वा-रामणीयकम्[2] । कामनीयकम् । पानीयकम् । औपाध्यायकम् । आचार्यकम् । रमणीयत्वम् । रमणीयता । गुरुग्रहणादनेकहल्व्यवधानेऽपि भवति । गुरुग्रहणं हि दीर्घसंयोगपरार्थम् । अन्यथा दीर्घोपोत्तमादित्युच्येत । योपान्त्यादिति किम् ? कापोतत्वम् । विभोक्तृत्वम् । गुरूपोत्तमादिति किम् ? क्षत्रियत्वम् ।

द्वन्द्वचोरादेः ॥३।३।२०॥ द्वन्द्वसमासाच्चोरादिभ्यश्च तस्य भावे कृत्ये च वुञ्प्रत्ययो भवति । गोपालपशुपालानां भाव कृत्यं वा गोपालपशुपालिका । शैव्योपाध्यायिका । कौत्सकौशिकिका[4] । विन्ध्यो वैन्ध्रिका । चोरादेः—चौरिका । धौर्तिका । मानोज्ञकम् । प्रैयरूपकम् । चोर, धूर्त, युवन्, ग्रामपुत्र, ग्रामसंङ्कट[5], ग्रामकुमार, अमुष्यपुत्र, अमुष्यकुल, शरपत्र, मनोज्ञ, प्रियरूप, अदोरूप, अभिरूप, बहुल, मेधाविन्, कल्याण, आढ्य, सुकुमार, छान्दस्, छात्र, श्रोत्रिय, विश्वदेव इति चोरादिः ।

गोत्रचरणाच्छ्लाघात्याकारावाये ॥३।३।२१॥ गोत्रवाचिनश्चरणवाचिनश्च शब्दास्तस्य भावे कृत्ये च वुञ्प्रत्ययो भवति त्वतलौ च श्लाघादिषु विषयभूतेषु । श्लाघा विकत्थनम् । अत्याकारः पराधिक्षेपः । अवायः प्राप्तिर्निश्चयो वा । विषयभाव पुनरेषा क्रियारूपाणा भावकृत्ये प्रतिसाध्यत्वात् । गार्ग्यस्य भावः कृत्यं वा गार्गिका तया गार्गिक्या । गार्गिकया श्लाघते । गार्गिकया अत्याकुरुते । वात्सिकया अत्याकुरुते । गार्गिकामवेतवान् । वात्सिकामवेतवान् । चरणात्—काठिक्या श्लाघते । कालापिकया श्लाघते । काठिक्या अत्याकुरुते । कालापिकया अत्याकुरुते । काठिकामवेतवान् । कालापिकामवेतवान् । गार्ग्यत्वेन कठत्वेन । श्लाघात्याकारावाय इति किम् ? गार्गम् । काठम् । प्राणिजातिलक्षणोऽञ् ।

होत्राभ्यश्छः ॥३।३।२२॥ होत्राशब्द ऋत्विग्वचन., ऋत्विग्विशेषवाचिभ्यस्तस्य भावे कृत्ये च छप्रत्ययो भवति त्वतलौ च । अच्छावाकस्य भावः कृत्यं वा अच्छावाकीयम् । मैत्रावरुणीयम् । ब्राह्मणच्छंसीयम् । अच्छावाकत्वम् । अच्छावाकता । हूयते आभिरिति होत्रा ऋच इत्येके । तान्येवोदाहरणानि । अच्छावाकादयस्तु ऋग्वचनाः । बहुवचनं स्वरूपविधिनिरासार्थम् ।

ब्रह्मणस्त्वः ॥३।३।२३॥ होत्राभ्य इति वर्तते । ब्रह्मन्नित्येतस्मादृत्विग्वाचिनस्तस्य भावे कृत्ये च त्वप्रत्ययो भवति । छापवादः । ब्रह्मणो भावः कृत्यं वा ब्रह्मत्वम् । होत्राभ्यो ब्रह्मणश्चेति ब्रह्मनिषेधे त्वतलावपि प्राप्नोतीति ब्रह्मणस्त्ववचनम् । होत्राकाराज्जातिशब्दस्तु ब्राह्मणपर्यायाब्रह्मशब्दात्त्वतलौ भवतः । एवं ब्रह्मत्वम् । ब्रह्मता ।

शाकटशाकिनौ क्षेत्रे ॥३।३।२४॥ तस्येति वर्तते । क्षेत्रं धान्यापीनामुत्पत्त्याधारभूमिः । तस्येति षष्ठ्यन्तात्क्षेत्रेऽर्थे शाकट शाकिन इत्येतौ प्रत्ययौ भवतः । इक्षूणां क्षेत्रम् इक्षुशाकटम्[6] । इक्षुशाकिनम्[7] । मूलशाकटम् । मूलशाकिनम् ।

धान्येभ्यः खञ् ॥३।३।२५॥ तस्येति वर्तते धान्यविशेषवाचिभ्यस्तस्येति षष्ठ्यन्तेभ्यः क्षेत्रेऽर्थे खञ्प्रत्ययो भवति । कुलत्थाना क्षेत्रं कौलत्थीनम् । मौद्गीनम् । प्रैयङ्गवीनम् । नैवारीणं पल्वलम् ।

---

१. कपेः क्रीडादिकं किञ्चित्कापेयमिति कथ्यते इति विश्वः, म० टि० । २. विज्ञानत्वं म० । ३. इत्युदन्तं गुरोः श्रुत्वा शिष्यो नोत्तरमूचिवान् । स्ववाच्या किन्तु वक्त्रेण शैव्योपाध्यायिका हि सा म० टि० । ४ कौत्साकुशिकिका म० । ५ ग्रामसण्ट म० । ६. इक्षुशाकटमिक्षूणां क्षेत्रमिक्षुवणं वनिम् शाकशाकटमित्युक्तमथवा शाकशाकिनम् । शाकस्य क्षेत्रमन्येषामेवं क्षेत्रेषु संज्ञनिः इत्यभिधानम् । म० टि० । ८. जातिर्बहुवद्वैकाच्यायाम् इति सूत्रेण बहुवचनम् म० टि० ।

व्रीहिशालेर्ढण् ॥३।३।२६॥ व्रीहि शालि इत्येताभ्यां तस्य क्षेत्रे ढण्प्रत्ययो भवति । अत्रपवादः । व्रीहेः क्षेत्रं व्रैहीयम् । शालेयम् ।

यवयवकषष्टिकाद्यः ॥३।३।२७॥ यव यवक षष्टिक इत्येतेभ्यस्तस्य क्षेत्रे यप्रत्ययो भवति । अत्रोऽपवादः । यवानां क्षेत्रं यव्यम् । यवक्यम् । षष्टिक्यम् । षष्टिरात्रेण पच्यमाना व्रीहयः षष्टिकाः । अत एव निपातनात्सिद्धम् ।

वाऽणुमाषात् ॥३।३।२८॥ अणु माष इत्येताभ्यां षष्ठ्यन्ताभ्या क्षेत्रेऽर्थे यप्रत्ययो वा भवति । पक्षे खञ् । अणूना क्षेत्रमणव्यम् । आणवीनम् । माष्यम् । माषीणम् ।

भङ्गोमातिलात् ॥३।३।२९॥ भङ्गा उमा तिल इत्येतेभ्यः षष्ठ्यन्तेभ्यः क्षेत्रे यप्रत्ययो वा भवति । पक्षे खञ् । उमाभङ्गेऽपिधान्य एवेष्यते । भङ्गाना क्षेत्रं भङ्ग्यम् । भाङ्गीनम् । उम्यम् । औमीनम् । तिल्यम् । तैलीनम् । योगविभाग उत्तरार्थः । नेत्यत्रानुवर्तत एव । अन्यथा यवयवकषष्टिकाद्य इत्यस्य पूर्वाकरणमकौशलं स्यात् । नित्यविधेर्विप्रकरणे फलाभावात् । वाक्यं तु महाविभाषया सिद्धम् ।

रजस्यलाब्वाश्च कटः ॥३।३।३०॥ अलाबूशब्दाद् भङ्गा उमा तिल इत्येतेभ्यश्च षष्ठ्यन्तेभ्यो रजस्यर्थे कटप्रत्ययो भवति । अलाबूना रज. अलाबूकटम् । भङ्गाकटम् । उमाकटम् । तिलकटम् ।

गम्येऽह्नाश्वात् खञ् ॥३।३।३१॥ तस्येति षष्ठ्यन्ताद्दशब्दादेकेनाह्ना गम्ये खञ्प्रत्ययो भवति । अश्वस्यैकेनाह्ना गम्य आश्वीनं. अश्व्या । अह्नेति किम् ? अश्वस्य मासेन गम्यः ।

कुलाज्जल्पे ॥३।३।३२॥ तस्येनि षष्ठ्यन्तात्कुलशब्दाज्जल्पेऽर्थे खञ्प्रत्ययो भवति । कुलस्य जल्पः कौलीनः ।

तुल्ये कस्सञ्ज्ञाप्रतिकृत्योः ॥३।३।३३॥ तस्येति षष्ठ्यन्तात्तुल्येऽर्थे कप्रत्ययो भवति सञ्ज्ञाप्रतिकृत्योः सञ्ज्ञायां प्रतिकृतौ च विषये । प्रतिकृतिः काष्ठादिमयं प्रतिच्छन्दकम् । अश्वस्य तुल्यः अश्वकः । उष्ट्रकः । गर्दभकः । अश्वादिसदृशस्य सञ्ज्ञा एताः । अश्वकं रूपम् । अश्विका प्रतिमा । अश्वकानि रूपाणि । तुल्य इति किम् ? इन्द्रदेव एवं नामा कश्चित् नात्र सादृश्यम् । सञ्ज्ञाप्रतिकृत्योरिति किम् ? गोस्तुल्यो गवयः । सञ्ज्ञाग्रहणम् अप्रतिकृत्यर्थम् । तुल्यमात्रे प्रत्ययः । शिव इव शिवक इत्येके ।

न नृपूजार्थेभ्यञ्जत्रिभ्रे ॥३।३।३४॥ नरि मनुष्ये पूजार्थे भ्रजे त्रिभ्रे त्रिभ्रकर्मणि चाभिधेये कप्रत्ययो न भवति । तत्र सोऽयमित्येवाभिसम्बन्धः । सञ्ज्ञाप्रतिकृत्योरिति यथासम्भवं प्राप्तिः । नरि चञ्चा सदृशः चञ्चो मनुष्यः । सिध्रिका । खरकुटी । दासी । पूजार्थे—अर्हन् । शिवः । स्कन्दः । पूजार्था. प्रतिकृतयः उच्यन्ते । भ्रजे—गरुडः । सिंहः । तालः । ध्वजः । त्रिभ्रकर्मणि—दुर्योधनः । भीमसेनः ।

जीवनेऽपण्ये ॥३।३।३५॥ जीवन्त्यनेनेति जीवनम्, पण्यं विक्रेतव्यम्, जीवनं यदपण्यं तस्मिन् कप्रत्ययो न भवति । वासुदेवसदृशो वासुदेवः । शिवः । स्कन्दः । विष्णुः । देवलकानां जीविकार्थाः प्रतिकृतय उच्यन्ते । जीवन इति किम् ? क्रीडने माभूत् । हास्तिकः । अपण्य इति किम् ? हस्तिकान् विक्रीणीते ।

देवपथादिभ्यः ॥३।३।३६॥ देवपथादिभ्यस्तुल्ये सञ्ज्ञाप्रतिकृत्योः कप्रत्ययो न भवति । देवपथतुल्यो देवपथः । हंसपथः । देवपथ, हंसपथ, चारिपथ, अजपथ, राजपथ, शतपथ, शङ्कुपथ, स्थलपथ, सिन्धुपथ,

---

१. जातिव्यक्त्योः कथञ्चित्तादात्म्यात् म० । २. अतसी स्यादुमा क्षुमा । मातुलानी तु भङ्गायाम्, व्रीहिभेदस्त्वणुः पुमान् म० टि० । ३. त्रिभ्वाहवीनं यदहर्येन दिनेनैकेन गम्यते इति नामलिङ्गानुशासनम् म० टि० । ४. प्रतिबिम्बं प्रतिरूपं प्रतिमानं प्रतिकृतिं प्रतिच्छन्दः प्रतिकायश्च प्रतिनिधिमाहुः प्रतियातना प्रतिच्छायाम्, म० टि० । ५. सचित्तपुरुषो वाऽन्तु चञ्चापुरुष एव च । यो विनापि गुणैः पौंस्नैः नाम्नैव पुरुषायते ॥ म० टि० ।

उष्ट्रग्रीवा, वामरज्जु, हस्त, इन्द्र, दण्ड, पुष्प, मत्स्य—इति देवपथादिर्गृतिगणः। अस्यैव पूर्वप्रयोगे प्रपञ्चः।

वस्तेर्ढञ् ॥३।३।३७॥ तस्य तुल्य इति वर्तते। न सञ्ज्ञाप्रतिकृत्योरिति। वस्तिशब्दात् षष्ठ्यन्तात् तुल्येऽर्थे ढञ्प्रत्ययो भवति। वस्तेस्तुल्यं वास्तेयम्। वास्तेयी प्रणालिका।

शिलाया ढच्च ॥३।३।३८॥ शिलाशब्दात्तस्य तुल्ये इत्यस्मिन् ढच्प्रत्ययो भवति। चकारात् ढञ् च। शिलातुल्यं शिलेयम्। शिलेयी इष्टका। शैलेयं दधि। शैलेयी इष्टका। चकार इत्। टिड्ढण्ढेऽञ्णिति सामान्यग्रहणार्थः। अन्यथा हि अस्यैव स्यात्। केचिद्ढान्तं द्रव्यवत् स्त्रिया नास्तीत्याहुः। तन्मतेन चकारो न कर्तव्यः।

शाखादेर्यः ॥३।३।३९॥ शाख इत्येवमादिभ्यस्तत्तुल्ये यप्रत्ययो भवति। शाखायास्तुल्यः शाख्यः। मुख्यः। जघन्यः। शाखा, मुख, जघन, स्कन्ध, मेघ, शृङ्ग[1], स्कन्द, चरण, शरण, उरस्, अग्र, शिरस् इति शाखादिः।

द्रोर्भव्ये ॥३।३।४०॥ द्रुशब्दात्तस्य तुल्ये भव्ये यप्रत्ययो भवति विशिष्टेष्टपरिणामेन भवति इति भव्यमभिप्रेतानामर्थानां पात्रम्। द्रव्यं कार्षापणम्। द्रव्यो माणवकः। यथाद्रु अग्रन्थ्यजिह्मं दारु[3] कल्प्यं मानं विशिष्टेष्टरूपं भवति तथेदं कार्षापणं विनियुज्यमानं विशिष्टेष्टमाल्याद्युपभोगफलम्। माणवकश्च विनीयमानो विद्यालक्ष्म्यादिभाजनं भवतीति द्रव्यमुच्यते[4]। भव्य इति किम्? द्रुणस्तुल्यः।

कुशाग्राच्छः ॥३।३।४१॥ कुशाग्रशब्दात्तुल्ये छप्रत्ययो भवति। कुशाग्रस्य तुल्यं कुशाग्रीयम्। तदाकारत्वात्कुशाग्रीया बुद्धिः। तीक्ष्णत्वेन णः।

काकतालीयादयः ॥३।३।४२॥ काकतालीयादयश्छप्रत्ययान्ताः साधवो वेदितव्याः। तत्तुल्येऽभिधेये। काकश्च तालश्च काकतालमिति[5] लक्षणया पतत. काकस्य निपतता तालेनातर्कितोपनतश्चित्रीयमाणसंयोग उच्यते। तत्तुल्यं काकतालीयम्। अन्धकश्च वर्तका चान्धकवर्तकमित्यन्धकस्य वर्तकाया उपरि अतर्कितः पादन्यास उच्यते। तत्तुल्यमन्धकवर्तकीयम्[6]। अजया पादेनावकीर्त्या कृपाणस्य दर्शनमजाकृपाणं तत्तुल्यमजाकृपाणीयम्। एवंविधविचित्रीकरणविषयाः काकतालीयादय। निपातन रूढ्यर्थम्।

शर्करादेरण् ॥३।३।४३॥ शर्करादिभ्यस्तुल्येऽण्प्रत्ययो भवति। शर्करया तुल्यं शार्कर दधि मधुरत्वात्। शार्करी मृत्तिका कठिनत्वात्। शर्करा, कपालिका, कम्पालिकर्का[7], गोपुच्छ, गोलोमन्, पुण्डरीक, शतपत्र, नराजी, नकुल, सिकता—इति शर्करादिः।

एकशालायाष्ठः ॥३।३।४४॥ एकशालाशब्दात्तत्तुल्ये ठप्रत्ययो भवति। एकशालायास्तुल्यमेकशालिकम्।

गोण्यादेश्च ठण् ॥३।३।४५॥ गोण्यादिभ्य एकशालाशब्दाच्च तत्तुल्ये ठण्प्रत्ययो भवति। गोण्यास्तुल्यं गौणिकम्। आङ्गुलिकम्। एकशालाया ऐकशालिकम्। गोणी, अङ्गुली,[9] भस्त्रा,[10] बभ्रु, मण्डल, शष्कुली, हरि, कपि,[11] भरा,[12] खलु, उदश्वित्, तरस् मुनि, कुलिश इति गोण्यादिः।

---

१. पूर्वयोगौ म०। २. सूत्र म०। ३. दारूपकल्प्यं मानं म०। ४. सन्निवादीयमाना गुणा यत्र संक्रामन्ति तद्द्रव्यमिति वचनात् म० टि०। ५. तस्य तुल्ये म०। ६. मुख्यार्थबाधे तद्योगे रूढितोऽथ प्रयोजनात्। अन्योऽर्थो लक्ष्यते यस्मात्लक्षणाऽरोपिता क्रिया इति काव्यप्रकाशिकायाम् म० टि०। ७. वर्तको वर्तिकादयः इति नामलिङ्गानुशासनम्। म० टि०। ८ कम्पाडिका म०। ९. मरूजू म०। १०. -भ्रु बम्लु म०। ११. भट म०। १२. खल म०।

कर्कलोहितादीकण् च ॥३।३।४६॥ कर्क लोहित इत्येताभ्यां तत्तुल्ये टीकण्प्रत्ययो भवति। चकाराट्टक् च। कर्कस्य तुल्यं कार्कीकम्। कार्किकम्। लोहितीकः। लोहितिकः स्फटिकः। टकारो ङ्यर्थः। कार्की। लोहितीकी।

पीलवादेः कुणः पाके ॥३।३।४७॥ पीलु इत्येवमादिभ्यस्तस्येति षष्ठ्यन्तेभ्यः पाकेऽर्थे कुणप्रत्ययो भवति। [1]पीलूनां पाकः पीलुकुणः। [2]कर्कन्धुकुणः। पीलु, कर्कन्धु, शमी, करीर, बदर, कुवल, अश्वत्थ, खदिर, इति पीलवादिः।

कर्णादिपक्षाज्जाहति मूले ॥३।३।४८॥ कर्णादिभ्यः पक्षशब्दाच्च षष्ठ्यन्तान्मूलेऽर्थे जाह ति इत्येतौ प्रत्ययौ यथासंख्यं भवतः। कर्णादेर्जाहः। कर्णस्य मूलं कर्णजाहम्। अक्षिजाहम्। पक्षात्तिः—पक्षस्य मूलं पक्षतिः। कर्ण, अक्षि, आस्य, वक्त्र, नख, मुख, केश, दन्त, ओष्ठ, भ्रू, शृङ्ग, पाद, गुल्फ, पुष्प, फल—इति कर्णादिः।

शीतोष्णतृप्रादसहे आलुः ॥३।३।४९॥ शीत उष्ण तृप्र इत्येतेभ्यस्तस्येति षष्ठ्यन्तेभ्योऽसहे—असहमाने—आलुप्रत्ययो भवति। शीतस्यासहः शीतमसहमानः शीतालुः। उष्णालुः। तृप्रालुः। तृप्रम् दु.खम्।

हिमादेलुः सहेः ॥३।३।५०॥ हिमशब्दात्तस्येति षष्ठ्यन्तात्सहे सहमाने एलुप्रत्ययो भवति। हिमस्य सहः हिमं सहमानः हिमेलुः।

बलवातादूलः ॥३।३।५१॥ बलशब्दाद्वातशब्दाच्च तस्येति षष्ठ्यन्तात् सहे ऊलप्रत्ययो भवति। बलस्य सहः बलं सहमानः बलूलः। वातूलः।

यथामुखसम्मुखाद्दर्शने खः ॥३।३।५२॥ तस्येति वर्तते। यथामुख सम्मुख इत्येताभ्यां षष्ठ्यन्ताभ्यां दर्शनेऽर्थे खप्रत्ययो भवति। दृश्यतेऽस्मिन्निति दर्शन[3] आदर्शादिः—प्रतिबिम्बाश्रय उच्यते। यथामुखं दर्शन यथामुखीनम्। *यथामुखमित्यत एव निपातनाद्यथा*[4] इति प्रतिषेधेऽपि समासः। षष्ठ्या अभावोऽपि पूर्वपदार्थप्रधानत्वेऽव्ययीभावस्यामपञ्चम्यास्तृतीयाया वा सप्तम्या इति लिङ्गादव्ययीभावात्सर्वविभक्तयो भवन्ति। यथामुखं तथाऽस्मिन्दृश्यते प्रतिबिम्बमिति यथामुखीन[5]मादर्शादिकमुच्यते। समं मुखं सम्मुखं समं मुखमस्यानेनेति वा सम्मुखं प्रतिबिम्बमुच्यते। तस्य दर्शनं सम्मुखीनम्। आदर्शादिकमेवोच्यते। इन्द्रस्य नीतावविचक्षुरन्धावाज्ञापयामास दिशां कुमारीः। ऐशं भविष्यज्जननीमुपाध्वं यूयं जिनस्येति यथामुखीनाः ॥१॥ क्षणमपि रिपुपक्षं सम्मुखीनं न सेहे इति चोपमानात्प्रयोगः। यथादर्शादिकं यथामुखीनं सम्मुखीनम्। अभिमुखं तिष्ठति तथा ताः दिक्कुमार्योऽभिमुखं स्थिता रिपुपक्षस्य।

सर्वादेः पथाङ्गकर्मपत्रपात्रशरावाद्यधापिनि ॥३।३।५३॥ तस्येति वर्तते। तस्येति षष्ठ्यन्तात्सर्वशब्दादेः पथ अङ्ग कर्मन् पत्र पात्र शराव इत्येतदन्ताच्छब्दरूपाद्यधापिनीत्यस्मिन्नर्थे खप्रत्ययो भवति। सर्वपथस्य व्यापी सर्वपथीनो रथः। सर्वपथानां व्यापि सर्वपथीनमुदकम्। सर्वस्याङ्गस्य व्यापी सर्वाङ्गीणस्तापः। सर्वेषामङ्गानां व्यापी सर्वाङ्गीणः पटः। सर्वस्यः कर्मणः सर्वेषां वा कर्मणां व्यापी सर्वकर्मीणः पुरुषः। एवं सर्वपत्रीणः सारथिः। सर्वपात्रीण ओदनः। सर्वशरावीण ओदनः।

आप्रपदम् ३।३।५४॥ आप्रपदमित्येतस्मात्यष्ठ्यन्ताद्यधापिन्यर्थे खप्रत्ययो भवति। आप्रपद व्यापी आप्रपदीनः पटः। पदस्याग्रं प्रपदम्। प्रभूतं पदं प्रपदम्। पदस्योपरिष्टात्संस्थानलक्षक इत्यन्ये। मर्यादायामाङ् तेनाप्रपदं व्याप्नोति न तदिति वर्तते यः स आप्रपदीनः। अनेन पटस्य प्रमाणमाख्यायते।

---

१. पीलौ गुडफलः खंसीत्यभिधानम् म० टि०। २. कर्कन्धुर्बदरी कोली इत्यमरः, म० टि०। ३. दर्शनम् म०। ४. -थाथा इत्यथा इति प्र- म०। ५. -मित्यादर्शा—म०।

यथाकामानुकामात्यन्तपारावारपारान्मामिनि ॥३।३।५५॥ यथाकाम अनुकाम अत्यन्त पार अवार पारावार अवारपार इत्येतेभ्यो निर्देशादेव द्वितीयान्तेभ्य. गामिनि खप्रत्ययो भवति । यथाकामं गामी यथाकामीनः । अनुकामीनः । अत्यन्तीनः । पारीण. । अवारीणः । पारावारीणः । अवारपारीणः ।

अनुग्वलम् ॥३।३।५६॥ अनुगु इत्येतस्माद्द्वितीयान्तात् अलङ्गामिनि खप्रत्ययो भवति । अलं पर्याप्तमित्यर्थः । अनुग्वलं गामी अनुगवीनो गोपालकः ।

अध्वानौ खौ ॥३।३।५७॥ अलङ्गामिनीति वर्तते । अध्वन्नित्येतस्मान्निर्देशादेव द्वितीयान्तादलङ्गामिनि ख ख इत्येतौ प्रत्ययौ भवत । अध्वानं अलङ्गामी अध्वन्यः । अध्वनीनः ।

छश्चाभ्यमित्रम् ॥३।३।५८॥ अभ्यमित्र इत्येतस्मान्निर्देशादेव द्वितीयान्तादलङ्गामिनि छप्रत्ययो भवति खौ च । अभ्यमित्रमलङ्गामी अभ्यमित्रीयः । अभ्यमित्र्य । अभ्यमित्रीणः । अमित्राभिमुखं भृशं गन्तेत्यर्थः ।

परोवरीणपरम्परीणपुत्रपौत्रीणसर्वान्नीनायानयीनानुपदीनागवीनाद्यश्वीनाद्यप्रातीन - समांसमीनसाप्तपदीनम् ॥३।३।५९॥ परोवरीणादय शब्दाः समासमीनान्ताः खप्रत्ययान्ताः साप्तपदीनः खञ्प्रत्ययान्तो यथास्वमर्थविशेषे निपात्यन्ते । परोवरीणेति परावरात् द्वितीयान्तादनुभवति खः परस्योत्वं च प्रत्ययसन्नियोगे निपात्यते । पराश्चावराश्चानुभवन् परोवरीणः । परोवर्यमित्यत्र परोवरमित्यतीतक्रमवाचिशब्दान्तरम् । परम्परीणेति परपरतरान् द्वितीयान्तादनुभवति ख परम्पराभावश्च (?) पराश्च परतराश्चानुभवन् परम्परीणो मन्त्री । परम्परा मन्त्रं मिनोतीति । परम्पराशब्दः प्रकृत्यन्तरम् । पुत्रपौत्रीणेति पुत्रपौत्राद् द्वितीयान्तादनुभवति ख पुत्राश्च पौत्राश्चानुभवन् पुत्रपौत्रीण । सर्वान्नीनेति सर्वान्नाद् द्वितीयान्ताद् भक्षयति खः सर्वान्नानि भक्षयन् सर्वान्नीनो भिक्षु. नियमरहित. । अयानयीनेति—अयानयाद् द्वितीयान्ताच्चेये खः । अयानयं नेयः, अयानयीनः शारः । अय प्रदक्षिणं गमनम् । अनयः प्रसव्यम्, शारि द्यूते, शाराः केचित्प्रदक्षिणं गच्छन्ति केचित्प्रसव्यम्, तेषा गति. अयसहितोऽनय अयानय इत्युच्यते तत्र यस्मिन् परशारं पदानामप्रवेशस्तन्नेयोऽयानयीनः । निपातनं हि रूढ्यर्थम् । अनुपदीनेति अनुपदशब्दाद्वन्वार्थे खः । अनुपद बद्धा अनुपदीना उपानत् पदप्रमाणेत्यर्थः । आगवीनेति आगोः प्रतिदानात्कारिणा ख. प्रतिदानशब्दस्य च लुक् आगो. प्रतिदानकारी आगवीनः कर्मकरः । गवा भूतो य आ तस्यागोः प्रत्यर्पणात्कर्म करोति स आगवीन. । रूढिशब्दोऽयम् । यत्किञ्चिदादाय यत्तस्य प्रतिदानात्कर्मकर. एवमुच्यते इत्येके । अद्यश्वीनेति अद्यश्वशब्दयोरर्थे समास., विजनिष्यमाणेऽर्थे खः । विजनस्य प्रत्यासत्तौ गम्यमानायाम्—अद्य वा श्वो वा विजनिष्यमाणा अद्यश्वीना गौ. । एवग्राम प्रत्यासन्नप्रसवेत्यर्थः । अन्ये प्रत्यासत्तौ गम्यमानाया भविष्यत्यर्थे प्रत्ययमाहु. । अद्य श्वो वा भविष्यदद्यश्वीन मरणम् । अद्यश्वीनो वियोग इति । एषमद्यप्रात शब्दात्च., अद्यप्रातीना गौः । अद्यप्रातीनं मरणम् । अद्यप्रातीनो वियोगः । समांसमीनेति समा समामिति वीप्सा द्वितीयान्तसमुदायात् गर्भं धारयतीत्यर्थ ख । पूर्वपदमुपरचाल्लुक् समा समा गर्भं धारयन्ती समासमीना गौः । अन्ये समाया समाया गर्भं विमुञ्चतीति समासमीनेति पूर्वपदस्य यत्योऽयमाहुः । साप्तपदीनेति सप्तपदा तृतीयान्तादवाप्येऽर्थे खञ् यत्तदवाप्य तच्चेति मख्यं सख्या वा भवति । सप्तभिः पदैरवाप्यं साप्तपदीनं सख्यम् । साप्तपदीन. सखा । साप्तपदीनं मित्रम् । गोगोष्ठम् । अश्वगोष्ठम् । उष्ट्रगोष्ठमिति गोष्ठशब्दः पशुमात्रसस्थाने रूढ. प्रातिपदिकं न प्रत्ययः । गवां गोष्ठम् । अश्वानां गोष्ठमिति विग्रहस्यापि भावात् । एवम् अविकटः । अजाकट. । अविपटः । अजापटः । इति कटपटौ पशुसमूहे । उष्ट्रगोयुगम् । अश्वगोयुगम् । इति गोयुगशब्द पशुद्वन्द्वे[1] हस्तिषड्गवमिति षड्गवशब्दः पशुषट्के । तिलतैलमिङ्गुदतैलमिति तैलशब्दोऽपि[2] स्नेहे । क्वचिद्व्युत्पादिता अपि हि रूढिवशात्सामान्ये न वर्तन्ते ।

तदस्य प्रमाणान्मात्रट् ॥३।३।६०॥ तदिति प्रथमान्तात्प्रमाणवाचिन. शब्दादस्येति षष्ठ्यर्थे मात्रट्प्रत्ययो भवति । आयाममान प्रमाणम् । तद्द्विविधम्—ऊर्ध्वमानम्, शय्यामानञ्च । तत्र ऊर्ध्वमानात्—

१. अध्वानं म० टि० । २. आमन्नप्रसवेत्यर्थः म० । ३. –त्रस्थाने म० । ४. पशुद्विस्वे म० ।

ऊरुः प्रमाणमस्य ऊरुमात्रमुदकम्। ऊरुमात्रो खाता। जानुमात्रमुदकम्। जानुमात्री खाता। खन्यामाने—रज्जुमात्रभूमिः। तन्मात्रो। तावन्मात्रो।

हस्तिपुरुषाड्डाऽण् ॥३।३।६१॥ तदिति प्रथमान्तात्प्रमाणवाचिनो हस्तिशब्दात्पुरुषशब्दाच्च अस्येति षष्ठ्यर्थेऽण्प्रत्ययो वा भवति। पक्षे यथाप्राप्तम्। हस्ती प्रमाणमस्य हास्तिनम्। हस्तिमात्रम्। हस्तिदघ्नम्। हस्तित्रयसमुदकम्। हस्तिमात्रो। हस्तिदघ्नो। हस्तित्रयसी खाता। पौरुषम्। पुरुषमात्रम्। पुरुषदघ्नम्। पुरुषत्रयसमुदकम्। पौरुषी। पुरुषमात्रो। पुरुषदघ्नी। पुरुषत्रयसी खाता। पौरुषी। पुरुषमात्रीच्छाया।

ऊर्ध्वं दघ्नड्द्वयसट् ॥३।३।६२॥ ऊर्ध्वं यत्प्रमाणं तद्वाचिनः शब्दरूपात् प्रथमान्तादस्येति षष्ठ्यर्थे दघ्नट् द्वयसट् इत्येतौ प्रत्ययौ वा भवतः। पक्षे मात्रट्। ऊरुः प्रमाणमस्योरुदघ्नम्। ऊरुद्वयसम्। ऊरुमात्रमुदकम्। ऊरुदघ्नी। ऊरुद्वयसी। ऊरुमात्रो खाता। तद्घ्नी। तद्द्वयसी। तन्मात्रो। तावद्घ्नी। तावद्द्वयसी। तावन्मात्री। ऊर्ध्वग्रहणमणमात्रबाधनार्थम्। पुनर्ग्रहणादुत्तरत्र विकल्पो नास्ति। ऊर्ध्वमिति किम्? रज्जुमात्री भूमिः।

श्लुङ्मानात् ॥३।३।६३॥ मानवाच्येव साक्षाद्यः प्रमाणशब्दस्तस्मात्प्रस्तुतस्य प्रत्ययस्य मात्रडादेः श्लुर्भवति। सम. प्रमाणमस्य शमः। द्विष्टिः। वितस्तिः। हस्तः। मानादिति किम्? ऊरुमात्रमुदकम्। रज्जुमात्री भूमिः। उत्तरत्र संशये चेति वचनादिह संशये श्लुर्नास्ति। शमः प्रमाणमस्य स्यात् शममात्रम्। दिष्टिमात्रम्। वितस्तिमात्रम्।

द्विगोरसंशये च ॥३।३।६४॥ मानादिति वर्तते न प्रमाणादिति। पुरुषात्प्रमाणाद्वेति लुबो ङेर्विधानात् मानान्ताद् द्विगो. संशये चासंशये च प्रत्ययस्य मात्रडादेः श्लुर्भवति। द्वौ शमौ प्रमाणमस्य द्विशमः। द्विदिष्टः। द्विवितस्तिः। द्विकाण्डा क्षेत्रभवितः। द्विकाण्डो रज्जुः। द्विपुरुषो। द्विपुरुषा खाता। द्विहस्तिनो। त्रिहस्तिनी। द्वौ प्रस्थौ मानमस्य स्यात् द्विप्रस्थः। द्विपलं द्विपतः। चकारोऽसंशयार्थः। इह संशये चेति वचनं पूर्वत्रासंशयार्थम्।

मात्रट् ॥३।३।६५॥ मानात्संशयेति वर्तते। तदिति प्रथमान्तान्मानवाचिनः शब्दादस्येति षष्ठ्यर्थे मात्रट्प्रत्ययो भवति संशये। प्रस्थो मानमस्य स्यात् प्रस्थमात्रं धान्यम्। प्रस्थो मानमेषा प्रस्थमात्रा द्रोहयः। कुडवमात्रम्। पलमात्रम्। कर्षमात्रम्। पञ्चमात्राः। शतमात्राः। शममात्रम्। दिष्टिमात्रम्। मात्रदघ्नद्वयसानि प्रातिपदिकान्यपि सन्ति। तत्र प्रत्ययविधानमनुबन्धासञ्जनार्थम्। तेन च स्त्रियां विशेषः।

शन् शद्विंशतेः ॥३।३।६६॥ शत्रन्ताच्छदन्ताच्च सङ्ख्याशब्दाद्विंशतिशब्दाच्च मानवृत्तेः तदिति प्रथमान्तादस्येति षष्ठ्यर्थे संशये मात्रट्प्रत्ययो भवति। डिनोऽपवादः। दश मानमेषा स्यात् दशमात्राः। पञ्चदशमात्राः। त्रिंशन्मात्राः। त्रयस्त्रिंशन्मात्राः। विंशतिमात्राः।

डिन् ॥३।३।६७॥ संशय इति निवृत्तम्। शत्रन्तात् दशत्रन्ताच्च संख्याशब्दात् विंशतिशब्दाच्च मानवृत्तेः प्रथमान्तादस्येति षष्ठ्यर्थे डिन्प्रत्ययो भवति। पञ्चदशिनोऽर्धमासाः। त्रिंशिनो मासाः। त्रयस्त्रिंशिनो देवाः। विंशिनो भवनेन्द्राः।

यत्तदेतदिदमः ॥३।३।६८॥ तदस्य मानादिति वर्तते। तदिति प्रथमान्तान्मानवृत्तेरिदं शब्दादिक-शब्दाच्च अस्येति षष्ठ्यर्थे मेये चतुप्रत्ययो भवति। मानं चतुर्विधं प्रमाणं परिमाणम् (उ)न्मानं संख्या चेति। तत्र प्रमाणात्—इदं मानमस्येति इयान् पटः। परिमाणात्—इयद्धान्यम्। किमद्धान्यम्। उन्मनात्—कियत्सुवर्णम्। इयत्सुवर्णम्। संख्यायाः—इयन्तो गुणिनः। कियन्तः सन्ति गुणिनः।

यत्तदो सो डः ॥३।३।६९॥ एतदः परस्य यातोर्थकारस्य सकारादेशो डकारो भवति। एतावान् दण्डः। एतावती परिखा। एतावत्स्यलीकरणानि। यग्रहणं किम्? न परस्मादेरेव भवति यग्रहणं प्रत्ययान्तरत्वनिवृत्त्यर्थम्। सर्वादेशो वा स्यात्। अकारस्योच्चारणार्थत्वव्याख्यानाच्च यग्रहणं लघु मन्यते।

यत्तदः ॥३।३।७०॥ यत् तद् इत्येताभ्यां परस्य घतोर्घकारस्य वकारादेशो भवति । यावान् । तावान् । इदमेवादेशवचनं ज्ञापकं यत्तदेतद्भ्यां घतुर्भवतीति । योगविभाग उत्तरार्थः ।

किमश्च सङ्ख्यायाः डतिश्च ॥३।३।७१॥ संख्या यन्मानं तद्वृत्तेस्तदिति प्रथमान्तात्किंशब्दात् यत्तदूभ्यां च अस्येति षष्ठ्यर्थे संख्येये मेये डतिप्रत्ययो भवति । चकाराद्घतुश्च । का संख्या मानमेषां कति । कियन्तः । या संख्या मानमेषा यति, यावन्तः । सा संख्या मानमेषाम्, तति, तावन्तः । स्वभावत इह चतुर्डती अवादिवद्बहुवचनविषयावेव । संख्याया इति किम् ? कियान् । यावान् । तावान् पटः । मानादिति किम् ? क्षेपविषये माभूत् । का संख्यैषां दशानाम् ।

अवयवात्तयट् ॥३।३।७२॥ तदस्येति वर्तते संख्याया इति च । न मानादिति । अवयवादवयवे वर्तमानात्संख्यावाचिनः शब्दात्तदिति प्रथमान्तादस्येति षष्ठ्यर्थे अवयविनि तयट् प्रत्ययो भवति । चत्वारोऽवयवा अस्या चतुष्टयी रज्जुः । चतुष्टयी शब्दानां प्रवृत्तिः । पञ्चावयवो यमः । सप्तावयवो नयवृत्तिः । दशावयवो धर्मः ।

द्वित्रिभ्यां लुग्वा ॥३।३।७३॥ द्वि त्रि इत्येताभ्यां परस्य तयडादेरनकारस्य लुग्वा भवति द्वावयवावस्य द्वैयम् । द्वितयम् । द्वितयः । त्रयः । त्रितयो मोक्षमार्गः । द्वयी, द्वितयी रज्जुः । त्रयी, त्रितयी रज्जुः । त्रयाणि पात्राणि । भेदरूपेण समुदायाभिधानाद् बहुवचनम् । द्वये पदार्थाः जीवा अजीवाश्च । जीवाजीवतया द्वैराश्योपादानाद् बहूनामपि द्वावयवौ भवतः । उभयो भणिः । उभये देवमनुष्याः । उभये दृष्टिरित्युभयशब्दः सर्वादिषूभयादिति पठ्यमान शब्दान्तरमेव विज्ञेयम् । तथा चास्य जस. शि विकल्पो न भवति ।

द्व्यादेर्गुणान्मूल्यक्रेये मयट् ३।३।७४॥ द्व्यादेर्गुणवृत्ते. संख्याशब्दात्तदीति प्रथमान्तादस्येति षष्ठ्यर्थे मयट्प्रत्ययो भवति स चेत्षष्ठ्यर्थो मूल्यं क्रेयं वा भवति । द्वौ गुणौ येषा मूल्यभूतानां यवानामुदश्वितो द्वितया यवा उदश्वितो मूल्यम् । त्रितयाश्चतुर्मयाः । द्वौ गुणावस्योदश्वितः क्रेयभूतस्य द्वितयमुदश्वित्क्रयवानां क्रेयम् । त्रितयम् । चतुर्मयम् । द्व्यादेरिति किम् ? एकगुणा यवा उदश्वितो मूल्यम् । एकगुणमुदश्वित्क्रयवानां क्रेयम् । गुणादिति किम् ? उदश्वितस्त्रयाणां[1] भागानां द्वौ भागौ यवानां मूल्यभूतानां यवानां त्रयाणां भागानां द्वौ द्वौ भागा उदश्वितः क्रेयस्य द्वौ गुणाविति क्रेयम् । मूल्यञ्चैकगुणं कृत्वा तदपेक्षया मूल्यक्रेयया द्विस्तातोच्यते । मूल्यक्रेय इति किम् ? द्विगुणं क्षीरं तैलस्य पाकस्य । केचिन्मूल्यक्रेय इत्यपि प्रकृतिविशेषणमेवेच्छन्ति मयट् द्व्यादेर्गुणवृत्तेः[2] संख्याशब्दात्तदिति प्रथमान्ता दस्येति षष्ठ्यर्थे मयट्प्रत्ययो भवति । स चेत्संख्याशब्दो मूल्ये क्रेये वा वर्तते । अत्रैव मूल्य क्रेयं च गुण एव द्वैगुण्यादि चास्येति क्रेयं मूल्यभूत प्रत्ययार्थमेकमेकगुण कृत्वा तदपेक्षं तदपेक्षं वेदितव्यम् । यवाना द्वौ गुणौ मूल्यमस्योदश्वितः क्रेयस्य द्वितयमुदश्वित्क्रयवानाम् । त्रितयम् । चतुर्मयम् । उदश्वितो द्वौ गुणौ क्रेयावेषां यवाना द्वितया यवा उदश्वितः । त्रितयाश्चतुर्मयाः । अत्र द्व्यादिशब्दस्य सापेक्षस्यापि गमकत्वाद्वृत्तिः । द्व्यादेरिति किम् ? यवानामेको मूल्यमस्योदश्वित. । उदश्वित एको गुण[3] क्रेय एषा यवानाम् । गुणादिति किम् ? द्वौ द्रोहियवौ मूल्यमस्योदश्वितः । द्वे घृतोदश्विती एषा यवानाम् । मूल्यक्रेये इति किम् ? क्षीरस्य द्वौ गुणौ तैलस्य पाकस्य ।

अधिकमस्मिन् शतसहस्रे तत्संख्यं शतिशद्दशान्तादड् ॥३।३।७५॥ तदिति वर्तते । तदिति प्रथमान्ता शति शद् दशन् इत्येवमन्तात् संख्याशब्दात् तस्मिन्निति सप्तम्यर्थे शते सहस्रे चाधिकेयर्थे डित्प्रत्ययो भवति । यत्तत्प्रथमान्त तच्चेत्तत्संख्यमधिक भवति शत सहस्रमिति च यत्संख्यायते तदेव यद्यधिकमपि भवती-

---

१. विज्ञापकम् म० । २. जातिक्रियागुणद्रव्यभेदेन चतुष्टयी शब्दानां प्रवृत्तिरिति वचनात् म० टि० । ३. द्वयं द्वितयमुभयं यमलं युगलं युगम् । युग्मं द्वन्द्वं युगं द्वैतं पादयोः पातु जैनयोः ॥ इति धनञ्जयः । मिथुनं द्वितयं द्वैतं द्वयं द्वन्द्वं युगं यमम् । यमलं युगलं युग्मं युतकञ्च द्वयोर्गणे ॥ इति वैजयन्ती । म० टि० । ४. निर्धारणे म० टि० । ५. द्विस्तावत्तोच्यते म० । ६. वृत्तेः म० ।

स्यर्थः । योजनानां विंशतिर्योजनानि वा विंशतिरधिकास्मिन्योजनशते शते वा योजनेषु विंशं योजनशतं, विंशं शतं योजनानि । एवं विंशं योजनसहस्रम् । विंशं सहस्रं योजनानि । विंशं कार्षापणशतम् । विंशं कार्षापणसहस्रम् । एकविंशम् । द्वाविंशम् । त्रिंशशतम् । त्रिंशं सहस्रम् । एकत्रिंशम् । योजनसहस्रद्वात्रिंशम् । चत्वारिंशम् । पञ्चाशम् । दशन्—एकादशं शतम् । एकादशं सहस्रम् । द्वादशम् । त्रयोदशम् । विंशतिशताभ्यधिकान्यस्मिन् शतानां सहस्रे इति विंशम् । त्रिंशम् । एकादशम् । शतसहस्रम् । विंशतिः सहस्राभ्यधिकान्यस्मिन् सहस्राणां शते त्रिंशम् । त्रिंशम् । एकादशम् । शतसहस्रम् । राजदन्तादिपाठाच्छतस्य पूर्वो निपातः । अधिकमिति किम् ? विंशतिरूनाऽस्मिन् शते । शतसहस्रे इति किम् ? एकादशाधिका अस्याः त्रिंशतिः । तत्संख्यमिति किम् ? त्रिंशतिर्दण्डा अधिकाः अस्मिन् योजनशते त्रिंशन्माषा अधिका अस्मिन्कार्षापणशते । सहस्रे । शतिशद्-शान्तादिति किम् ? दशाधिका अस्मिञ्छते । संख्याया इति किम् ? गोविंशतिरधिकाऽस्मिन् गोशते ।

संख्यापूरणे डट् ॥३।३।७६॥ संख्या इति वर्तते । संख्याशब्दात् सा संख्या येन पूर्यते तस्मिन् संख्यापूरणेऽभिधेये डट्प्रत्ययो भवति । अत्र सामर्थ्यान्यष्षष्यन्तात्प्रत्ययो विज्ञायते । एकादशानां पूरणः एकादशः । एकादशसंख्यापूरण इत्यर्थः । एवं द्वादशः । त्रयोदशः । चतुर्दशः । एकादशी स्त्री । संख्याग्रहणं किम् ? एकादशानामुष्ट्रिकाणां[1] पूरणो घटः ।

घतोरिथट् ॥३।३।७७॥ घत्वन्तायाः संख्यायाः संख्यापूरणे इथट्प्रत्ययो भवति । डटोऽपवादः । इयता पूरण इयतिथः । इयतीनां पूरणी इयतिथी । कियतिथः । कियतिथी । एतावतिथः । एतावतिथी । यावतिथः । तावतिथः ।

बहुगणपूगसङ्घात् त्तिथट् ॥३।३।७८॥ बहु गण पूग संघ इत्येतेभ्यः संख्यापूरणे त्तिथट्प्रत्ययो भवति । बहूना पूरणः बहुतिथः । बहूनां पूरणी बहुतिथी । गणतिथः । गणतिथी । पूगतिथः । पूगतिथी । संघतिथः । संघतिथी । संख्याविशेषणं सम्भवापेक्षार्थम्[2] । पकारः पिति तद्धित इति पुम्भावार्थः । टकारो ङ्यर्थः ।

षट्कतिकतिपयात् थ्यट् ॥३।३।७९॥ षट् कति कतिपय इत्येतेभ्यः संख्यापूरणे थ्यट्प्रत्ययो भवति । षण्णां पूरणः षष्ठः । षष्ठी । कतीनां पूरणः कतिथः । कतिथी । कतिपयथः । कतिपयथी । षष्ठी-चानादरे द्वितीया चतुर्थ्यर्थे[3] इति निर्देशात् थ्यडि सिद्धलोपि पदत्वं न भवति ।

चतुरः ॥३।३।८०॥ चतुर् इत्येतस्मात् सङ्ख्यापूरणे थ्यट्प्रत्ययो भवति । चतुर्णां पूरणः चतुर्थः । चतसृणां पूरणी चतुर्थी । योगविभाग उत्तरार्थः ।

थश्छौ चश्लुक्च ॥३।३।८१॥ चतुर् इत्येतस्माद् थश्छ इत्येतौ प्रत्ययौ भवतः, चशब्दस्य श्लुक् । चतुर्णां पूरणः तुर्यः । तुर्या । तुरीया । एवं पूर्वेण च त्रैरूप्यं भवति ।

विंशत्यादेस्तमड्वा ॥३।३।८२॥ विंशति इत्येवमादिकायाः संख्यायाः सङ्ख्यापूरणे तमट्प्रत्ययो भवति वा । पक्षे डट् । विंशतेः पूरणः विंशतितमः । विंशः । विंशतितमी । विंशी स्त्री । एकविंशतितमः । एकविंशः । द्वाविंशतितमः । द्वाविंशः । त्रिंशत्तमः । त्रिंशः । एकत्रिंशत्तमः । एकत्रिंशः । चत्वारिंशत्तमः । चत्वारिंशः । पञ्चाशत्तमः । पञ्चाशः ।

शतादिमासार्धमाससंवत्सरात् ॥३।३।८३॥ शतादिभ्यः संख्याशब्देभ्यो मास अर्धमास संवत्सर इत्येतेभ्यश्च संख्यापूरणे नित्यं तमट्प्रत्ययो भवति । शतस्य पूरणः शततमः । शततमी । एकशततमः । सहस्रतमः । लक्षतमः । मासस्य पूरणो मासतमो दिवसः । अर्धमासतमः । संवत्सरतमः । षष्टयादेरित्येव नित्यं तमटि सिद्धे शतादिग्रहणं साहचर्यम् ।

---

१. अथ मृद्भाण्डमुष्ट्रिका, इत्यभिधानम् म० टि० । २. सम्भवापेक्षम् म० । ३. इत्यादि म० ।

षष्ट्यादेरसादेः ॥३।३।८४॥ षष्टि इत्येवमादेस्तत्प्रभृतेः संख्याशब्दात् यस्यादिरवयवः संख्याशब्दो नास्ति ततः संख्यापूरणे नित्यं तमट्प्रत्ययो भवति । विकल्पापवादः । षष्टितमः । सप्ततितमः । अशीतितमः । नवतितमः । असादेरिति किम् ? सादेर्विकल्प एव । एकषष्टितमः । एकषष्टः । एकसप्ततितमः । एकसप्ततः ।

नो मट् ॥३।३।८५॥ नान्तादसादेः संख्याशब्दात् संख्यापूरणे मट्प्रत्ययो भवति । डटोऽपवादः । पञ्चमः । पञ्चमी । सप्तमः । सप्तमी । अष्टमः । नवमः । दशमः । न इति किम् ? विंशः । असादेरिति किम् ? एकादशः । द्वादशः ।

द्वित्रेस्तीयद्रेश्च ऋशँ[1] ॥३।३।८६॥ द्वि त्रि इत्येताभ्यां संख्याशब्दाभ्यां संख्यापूरणे तीयत्प्रत्ययो भवति त्रिशब्दस्य च यद्रि इति रूपं तस्य प्रत्ययसन्नियोगे ऋश् इत्ययमादेशो भवति । द्वयोः पूरणो द्वितीयः । द्वितीया । त्रयाणां पूरणः तृतीयः । तृतीया । तकारो डदिति प्रत्याहारार्थः । शकारः सर्वादेशार्थः ।

पूर्वमनेन सादेश्चेन् ॥३।३।८७॥ पूर्वमिति क्रियाविशेषणाद् द्वितीयान्तात्केवलात् सादेः सपूर्वाच्च अनेनेति तृतीयार्थे कर्त्तरि इन्प्रत्ययो भवति । केवलात् पूर्वमनेन पूर्वी पूर्विणौ पूर्विणः । अनेनेति कर्ता क्रियामन्तरेण वेत्ति कृतं भुक्तं पीतं वेति काचित्क्रियापेक्ष्यते । विशेषाधिगमस्त्वर्थान्तरकरणाच्छब्दान्तरसन्निधेर्वा भवति । पूर्वी कटम् । पूर्वी ओदनम् । पूर्वी सुराम् । सादेः—कृतं पूर्वमनेन कृतपूर्वीकटम् । भुक्तं पूर्वमनेन भुक्तपूर्वी ओदनम् । पीतं पूर्वमनेन पीतपूर्वी सुरा । वृत्तौ वर्तान्त कटादिना व सामानाधिकरण्यमिति कटादिगतं कर्मत्वमगतमतो द्वितीया ।

इष्टादेः ॥३।३।८८॥ इष्ट इत्येवमादेः प्रथमान्तादनेनेति तृतीयार्थे कर्त्तरि इन्प्रत्ययो भवति । इष्टमनेन इष्टी यज्ञे । पूर्ती श्राद्धे । इष्ट, पूर्त, उपपादित, निगदित, [2]पराधिगत, [3]निकरित, [4]निपरित, संकलित, परिकलित, सरक्षित, परिरक्षित, अर्चित, अगणित, अवकीर्ण, अभुक्त, [5]अयुक्त, अघोति, आम्नात, श्रुत, आसेवित, अवधारित, अवकलित, कृत, निराकृत, उपाकृत, उपकृत, अनुयुक्त, अनुगणित, परिगणित, अनुपरीत, व्याकुलित इति इष्टादिः ।

श्राद्धमद्य भुक्तं ठेनौ ॥३।३।८९॥ श्राद्धशब्दात्प्रथमान्तादद्य भुक्तमित्येवमुपाधिकात् अनेनेति तृतीयार्थे कर्तरि ठ इन् इत्येतौ प्रत्ययौ भवतः । श्राद्धशब्दः कर्मनामधेयं तत्साधने द्रव्ये वर्तित्वात् प्रत्ययमुत्पादयति । श्राद्धमनेनाद्य भुक्तं श्राद्धिकः श्राद्धी । अद्येति किम् ? अद्य भुक्ते श्राद्धे श्वः श्राद्धिकः श्राद्धी इति च माभूत् । भुक्तमिति किम् ? श्राद्धमनेनाद्य कृतम् ।

[6]क्षेत्रेऽन्यस्मिन्नाश्ये घः ॥३।३।९०॥ क्षेत्रशब्दान्निर्देशादेव सप्तम्यन्तादन्योपाधिकात् नाश्येऽर्थे घप्रत्ययो भवति । अन्यस्मिन्क्षेत्रे नाश्यः क्षेत्रियो व्याधिः । क्षेत्रं शरीरम् । अन्यदिति जन्मान्तरशरीरमुच्यते । तत्र नाश्यो नेहेति असाध्यो व्याधिरुच्यते । क्षेत्रियं विषम् । तद्धि श्व(तत्स्व)शरीरादन्यस्मिन्परशरीरे संक्रमय्य किञ्चिन्नाश्य किञ्चिच्चिकित्स्यं भवति । [7]क्षेत्रियाणि तृणानि तानि हि सस्यक्षेत्रेऽन्यस्मिन्नुत्पन्नानि नाश्यान्युत्पाट्यानि भवन्ति । क्षेत्रियः पारदारिकः । स हि परदारेषु स्वक्षेत्रादन्यस्मिन्क्षेत्रे प्रवर्तमानस्तत्र नाश्यो निग्राह्यो भवति । दाराश्च क्षेत्रम् ।

श्रोत्रियो वा छन्दोऽध्यायी ॥३।३।९१॥ श्रोत्रिय इति वा निपात्यते छन्दोऽध्यायी चेदुच्यते । किमिह निपात्यते छन्दश्शब्दादध्यायिनि घप्रत्ययो छन्दश्शब्दस्य च श्रोत्रभावः । छन्दसोऽध्यायी श्रोत्रियः । वाग्रहणाच्छान्दस इत्यपि भवति ॥

---

१ ऋशँ म० । २. परिधिगत म० । ३. निगरीत म० । ४. निपरी । ५. आयुक्त म० । ६. क्षेत्रं शरीरे केदारे सिद्धस्थानकलत्रयो., इति विश्वः, म० टि० । ७. क्षेत्रियं क्षेत्रजतृणे परदाररते त्रिषु इत्यभिधानम् । उभयत्र त्रिलिङ्गम् । म० टि० ।

इन्द्रियम् ॥३।३।९२॥ इन्द्रियमितीन्द्रशब्दाद् घप्रत्ययो निपात्यते। रूढिशब्दोऽयम्, चक्षुरादीनां संज्ञा। तत्र यथायोगमर्थकल्पना इन्द्र आत्मा तस्येन्द्रस्य लिङ्गमिन्द्रेण सृष्टमिन्द्रेण [1]जुष्टम्। इन्द्रेण दत्तम्। [2]इन्द्रस्यावरणक्षयोपशमसाधनमिति वेन्द्रियम्।

तेन वित्ते चुञ्चुचणौ ॥३।३।९३॥ तेनेति तृतीयान्ताद्वित्तेऽर्थे चुञ्चु चण इत्येतौ प्रत्ययौ भवतः। वित्तः प्रतीतो जातः प्रकाश इत्यर्थः। विद्यया वित्तः विद्याचुञ्चुः। विद्याचणः। केशचुञ्चुः। केशचणः।

ङतो ग्रन्थस्य ग्राहके कश्श्लुक् च ॥३।३।९४॥ तेनेति तृतीयान्ताद्ङतो ङत्प्रत्याहारगृहीतप्रत्ययान्ताद् ग्रन्थस्य शास्त्रस्य ग्राहकेऽवधारके कप्रत्ययो भवति ङतश्च श्लुक्। द्वितीयेन रूपेण ग्रन्थस्य ग्राहकः द्विकः। त्रिकः। चतुष्कः। पञ्चकः। ग्रन्थस्येति किम्? द्वितीयेन दिनेन शत्रूणां ग्राहकः।

ग्रहणाद्वा ॥३।३।९५॥ ङत्प्रत्याहारगृहीतप्रत्ययान्ताद् ग्रन्थस्य ग्रहणाद् ग्रहणे वर्तमानात्कप्रत्ययो भवति स्वार्थे प्रकृत्यर्थ एवार्थान्तरानिर्देशात्। ङतश्च श्लुग्वा भवति द्विकं ग्रन्थग्रहणमस्य द्वितीयकं ग्रन्थग्रहणमस्य। त्रिकं व्याकरणस्य ग्रहणं तृतीयकं व्याकरणमस्य ग्रहणम्। चतुष्कं चतुर्थकम्। पञ्चकं, पञ्चमकम्। द्वितीयं ग्रन्थग्रहणमिति। पक्षे प्रत्ययानुत्पत्तेः कुतयो महाविभाषयैव सिद्धत्वात् अनेन वाग्रहणेन् ङत एव श्लुग्विकल्प्यते। ग्रन्थस्येति किम्? द्वितीयं ग्रहणं धान्यस्य।

सस्याद् गुणात् परिजाते ॥३।३।९६॥ सस्यशब्दाद् गुणवाचिनस्तेनेति तृतीयान्तात् परिजातेऽर्थे कप्रत्ययो भवति। परि. सर्वतो भावे। जनिः सम्पत्तौ। सस्येन परिजातः सस्यकः। शालीयः। सर्वतो गुणैः सम्पन्नो न यस्य किञ्चिदपि वैगुण्यमस्ति स एवमुच्यते। एवं सस्यको देशः। सस्यको वत्सः। सस्यकं सीधु। सस्यको मणिः। रूढिशब्दश्चाय मणिविषये। गुणादिति किम्? धान्यवचनान्माभूत्। सस्येन परिजातं क्षेत्रम्।

पार्श्वकायश्शूलिकदाण्डाजिनिकानुपदान्वेष्टा ॥३।३।९७॥ पार्श्वक आयश्शूलिक दाण्डाजिनिक अनुपदिन् इत्येते शब्दाः क ठण् इन् इत्येते प्रत्यया निपात्यन्ते। अन्वेष्टा चेत्यप्रत्ययार्थो भवति। पार्श्वात् कः। पार्श्वमनृजुरुपाय। पार्श्वेनान्वेष्टा पार्श्वकः। ऋजुनोपायेनान्वेष्टव्यानर्थान्योऽनृजुनोपायेनान्विच्छति स पार्श्वक उच्यते। यस्तु राज्ञः पार्श्वे नार्थानन्विच्छति राजपुरुषस्तत्र न भवति। निपातनं हि प्रसिद्धद्युपमंग्रहार्थम्। एवम् अयश्शूलदण्डाजिनाभ्यां ठण्। तीक्ष्णोपायोऽयःशूलसाम्यादयश्शूलम्। अयश्शूलेनान्वेष्टा [4]आयश्शूलिकः। यो मृदुनोपायेनान्वेष्टव्यानर्थान् तीक्ष्णेनोपायेनान्विच्छति रासभिकः स उच्यते। दण्डाजिनं दम्भः। दण्डाजिनेनान्वेष्टा दाण्डाजिनिकः। यो मिथ्याव्रती परप्रसादनार्थं दण्डाजिनमुपादायार्थानन्विच्छति स दाम्भिक उच्यते। केचिदयश्शूलदण्डाजिनाभ्यां ठमाहुः। अयश्शूलिकः। अयश्शूलिका। दण्डाजिनिकः। दण्डाजिनिका। अनुरदादिन्। पदस्य पश्चादनुपदम्। अनुपदमन्वेष्टा अनुपदी गवाम्। अनुपदी उष्ट्राणाम्।

धनहिरण्येऽभिलाषे ॥३।३।९८॥ धन हिरण्य इत्येताभ्यां निर्देशादेव सप्तम्यन्ताभ्यामभिलाषेऽर्थे कप्रत्ययो भवति। धनेऽभिलाषो धनको देवदत्तस्य। हिरण्यको देवदत्तस्य।

स्वाङ्गेषु सक्ते ॥३।३।९९॥ स्वाङ्गवाचिभ्यो निर्देशादेव सप्तम्यन्तेभ्यः सक्तेऽर्थे कप्रत्ययो भवति। केशेषु सक्तः केशकः। नखकः। दन्तकः। केशादिरचनायां सक्त उच्यते। बहुवचनं स्वाङ्गसमुदायादपि यथा स्यात्। केशनखकः। दन्तनखकः।

उदरे ठणाद्यूने ॥३।३।१००॥ उदरशब्दान्निर्देशादेव सप्तम्यन्तात्सक्तेऽर्थे ठण्प्रत्ययो भवति। सक्तश्चेदाद्यूनो भवति। उदरे सक्त औदरिकः आद्यूनः। अविजिगीषुरित्यर्थः। आद्यून इति किम्? उदरकोऽन्यः।

कर्मठो घटः ॥३।३।१०१॥ कर्मठ इति कर्मन्शब्दात् सप्तम्यन्ताट्ठप्रत्यय इकादेशाभावश्च निपात्यते। घटः घटिता चेत्प्रत्ययार्थो भवेत्। कर्मणि घटः घटिता घटमानः कर्मठः पुरुषः।

---

१. सेवितम् म० टि०। २. इन्द्रस्यावरणक्षयोपशमसाधन म०। ३. -रपायः म०। ४. स आयश्शूलिको यस्तु साध्यः स्यात्तीक्ष्णसाधनैः, इत्यभिधानम्, म० टि०।

अंशं हारिणि ॥३।३।१०२॥ अंशमिति द्वितीयान्ताद् हारिण्यर्थे कप्रत्ययो भवति । अंशहारी अंशकः पुत्रः । अंशको दायादः । हारीत्यावश्यके णिन् ।

शीतकोष्णकौ कारिणि ॥३।३।१०३॥ शीतक उष्णक इति शीतोष्णशब्दाभ्यां मन्दशीघ्रार्थवाचिभ्यां क्रियाविशेषणाभ्यां कारिण्यर्थे कप्रत्ययो निपात्यते । शीतंकारी शीतकः । क्रियासु मन्द इत्यर्थः । उष्णंकारी उष्णकः । क्रियासु शीघ्र इत्यर्थः । निपातनं रूढ्यर्थमिति स्पर्शवचनाभ्यां प्रत्ययो न भवति ।

तन्त्राच्चावोद्धृते ॥३।३।१०४॥ तन्त्रशब्दान्निर्देशादेव पञ्चम्यन्तात्तन्नवोद्धृतेऽर्थे कप्रत्ययो भवति । तन्त्रात्[1]तन्त्रावोद्धृतः तन्त्रकः प्रावारः । तन्त्रकः पटः । तन्त्रकं वस्त्रम् । प्रत्यग्रमित्यर्थः ।

कमितर्यन्वभ्यमीभ्यः ॥३।३।१०५॥ अनु अभि अमी इत्येतेभ्यः कमितरि काममाने कप्रत्ययो भवति । अनुकमिता अनुकः । अभिकमिता अभिकः । अमीकः । निपातनादेव पक्षे दीर्घत्वम् । तदर्थमेवाभ्यमीति द्विरुपादानं बहुवचनं हि एकवचने च दीर्घस्याश्रुतिः स्यात् । अधिकः खार्यां द्रोणः । अधिका खारी द्रोणेनेति अधिकमस्मिन् शतसहस्र इत्यादिनिर्देशात् सिद्धम् ।

विशालविशङ्कटविकटसंकटोत्कटप्रकटनिकटावकटावकुटाराचटीटावनाटावभ्रटनिवि - डनिविरीसचिक्कचिकिनचिपिटचिल्लपिल्लचुल्लोपत्यकाधित्यकाः ॥३।३।१०६॥ विशालादयः समुदाया व्यादिभ्यः शालादिप्रत्ययान्ता यथास्वं प्रसिद्धेऽर्थविशेषे निपात्यन्ते विगते विशाले शृङ्गे । विशङ्कटे शृङ्गे । विशालो गौः । विशङ्कटो गौः । विकटो देशः । विकटः कटीतट । अत्र वेः शालाशङ्कटकटाः प्रत्ययाः । संगतः संकटः पन्था । उद्गत उत्कटो गन्ध । प्रगतः प्रकटोऽर्थः । निगतः निकटो ग्रामः । अत्र समुत्प्रनिभ्यः कटः । अवगत अवकट । अवकुटारः । अत्र अवात्कटकुटारदच । अवनतम् अवटीटम् । अवनाटम् । अवभ्रटम् नासिकायाः । अवनता अवटीटा । अवनाटा । अवभ्रटा नासिका । नासिकायामवनतः अवटीटः अवनाटः । अवभ्रटो देवदत्तः । अत्र अवान्नासिका नतविषये टीटनाटभ्रटाः । निननं निबिडम् । निविरीसम्–नासिकायाः । निबिडा निविरीसा नासिका । निबिडो निविरीसो देवदत्तः । निबिडा निविरीसाः केशाः । निबिड निविरीसं वस्त्रम् । अत्र नेबिडविरीसौ नासिकानतविषयेऽन्यत्र च निननं चिक्कं चिकिनं चिपिटं नासिकायाः । चिक्का, चिकिना, चिपिटा नासिका । चिक्कः, चिकिनः, चिपिटो देवदत्तः । अत्र नेर्नासिकानतविषये कचिकिनपिटाः प्रत्ययाः चि च नेरादेशः । चिल्ले चिल्ले पिल्ले चुल्ले चक्षुषी चिल्लचक्षुः । चिल्लः, पिल्लः, चुल्लो देवदत्तः । अत्र चिलशब्दाच्चक्षुर्विषये लप्रत्ययः चिलशब्दस्य[2] च चिल् पिल् चुल् इत्यादेशाः । उपत्यका, अधित्यका पर्वतस्यासन्नाधिरूढो प्रदेशौ । अत्र उप अधि इत्येताभ्यां त्यकप्रत्ययौ निपात्यते । निपातनं रूढ्यर्थम् । रूढिशब्दाश्चैते यथा कथञ्चिद्बद्धयुत्पाद्यन्ते । विना नानेति स्वरादिपाठात्सिद्धम् ।

तदस्मिन्प्रायोऽन्नं नाम्नि ॥३।३।१०७॥ तदिति प्रथमान्तादस्मिन्निति सप्तम्यर्थे कप्रत्ययो भवति नाम्नि समुदायो नाम यत्तत् प्रथमान्तं तच्चेत्प्रायोऽन्नं भवति । प्रायकृत्स्न बहुत्वम् । तस्यानेन सामानाधिकरण्यनिर्देशः । गुडापूपाः प्रायोऽन्नमस्यां गुडापूपिका पौर्णमासी । तिलापूपिका । कृशरिका । त्रिघटिका पौर्णमासी । नाम्नीति किम् ? अपूपाः प्रायोऽन्नमवन्तिषु ।

कौल्माषोवटकिन्यौ ॥३।३।१०८॥ कौल्मापोवटकिनीशब्दौ वणिन्प्रत्ययान्तौ निपात्येते तस्मिन्प्रायोऽन्नं नाम्नीत्यस्मिन्विषये । कुल्माषप्रायोऽन्नमस्यां कौल्माषी पौर्णमासी । वटकिनी पौर्णमासी ।

ब्राह्मणकोष्णिके ॥३।३।१०९॥ ब्राह्मणक उष्णिक इति कप्रत्ययान्तौ निपात्यते नाम्नि समुदायो नाम । ब्राह्मणा आयुधजीविनो यस्मिन्देशे स ब्राह्मणको देशः । आयुधजीवी ब्राह्मण एव ब्राह्मणक इत्यन्ये । उष्णिका अल्पान्ना यवागूः ।

---

१. यथा भवति म० टि० । २. तन्त्रं प्रधाने सिद्धान्ते सूत्रवाये परिच्छदे–इत्यमरः । तन्त्रकं तु नवाम्बरं । म० टि० । ३. चिलस्य च म० ।

कालः प्रयोजनमस्य रोगे ॥३।३।११०॥ तदिति वर्तते। तदिति प्रथमान्तादस्येति षष्ठ्यर्थे रोगे कप्रत्ययो भवति। यत्तत्प्रथमान्तं तच्चेत्कालः प्रयोजनं वा भवति। प्रयोजनं[1] कारणं कार्यं च। सततः कालोऽस्य सततको ज्वरः। द्वितीयो दिवसः कालोऽस्य द्वितीयकः। तृतीयकः। चतुर्थकः ज्वरः। विषपुष्पं प्रयोजनं कारणमस्य विषपुष्पकः। काशपुष्पकः। पर्वतको रोगः। उष्णं प्रयोजनं कार्यमस्य उष्णकः। शीतको ज्वरः। रोग इति किम् ? द्वितीयो दिवसः कालोऽस्य भोजनस्य।

मुख्यः ॥३।३।१११॥ तदस्येति वर्तते। तदिति प्रथमान्तादस्येति षष्ठ्यर्थे कप्रत्ययो भवति। यत्प्रथमान्तं तच्चेन्मुख्यः प्रधानं भवति। देवदत्तो मुख्योऽस्य देवदत्तकः। देवदत्तो मुख्य एषां देवदत्तकाः। जिनदत्तकाः।

शृङ्खलकः करभे ॥३।३।११२॥ शृङ्खलकशब्दः कप्रत्ययान्तो निपात्यते करभे उष्ट्रबालो यदि वाच्यो भवति। शृङ्खलकः करभ[2] उच्यते। वयःशब्दोऽयम्। शृङ्खलबन्धनं भवतु वा मा वा।

उन्मनस्युत्सोः ॥३।३।११३॥ उत् उत्सु इत्येताभ्याम् अस्येत्युन्मनस्यभिधेये कप्रत्ययो भवति। उद्गतं मनोऽस्य उत्कः। उत्सु गतं मनोऽस्य उत्सुकः। उन्मना इत्यर्थः।

संजातः तारकादिभ्य इतः ॥३।३।११४॥ तदिति प्रथमान्तेभ्यः संजातोपाधिभ्यः अस्येति षष्ठ्यन्ते(र्थे) इतप्रत्ययो भवति। तारका अस्य संजातास्तारकितं नभः। पुष्पाण्यस्य संजातानि पुष्पितो वृक्षः। तारका, पुष्प, कर्णक, मुञ्जिष, मूत्र, निष्क्रमण, पुरोष, उच्चार, विचार, प्रचार, कुड्मल[3], कुसुम, मुकुल, स्तबक, पल्लव, किसलय, वेग, निद्रा, तन्द्रा, श्रद्धा, बुभुक्षा, पिपासा, अभ्र, स्वभ्र, रोग, अङ्गारक, पर्णक, द्रोह, सुख, दुःख, उत्कण्ठा, भर, तरङ्ग, व्याधि, तृण[4], कण्टक इति तारकादिः। आकृतिगणोऽयम्।

गर्भादप्राणिनि ॥३।३।११५॥ गर्भशब्दात्तदिति प्रथमान्तात्संजातोपाधिकादस्येति षष्ठ्यर्थे इत-प्रत्ययो भवति अप्राणिनि, न चेत् षष्ठ्यर्थः प्राणी न भवति। गर्भोऽस्य संजातो गर्भिता व्रीहिः। गर्भिताः शालयः। अप्राणिनीति किम् ? गर्भिणी गौः। गर्भिणी वडवा।

अस्त्यस्मिन्वेति मतुः ॥३।३।११६॥ तदस्येति वर्तते। तदिति प्रथमान्तादस्तीत्येवमुपाधिकादस्येति षष्ठ्यर्थेऽस्मिन्निति सप्तम्यर्थे वा मतुप्रत्ययो भवति। गावोऽस्य सन्ति गोमान्। यवमान्। अस्ति—धनमस्यास्ति अस्तिमान्। स्वस्त्यारोग्यमस्यास्ति स्वस्तिमान्, अस्ति स्वस्ति, अव्ययौ, विशेषास्तेषां च सामान्यास्तिना सामा-नाधिकरण्यमुपपद्यत एव। वृक्षा अस्मिन् सन्ति वृक्षवान्पर्वतः। प्लक्षवान्। अस्तीति किम् ? गावोऽस्य विनास्तिनाद्यविशेषणे स्यात्, (?) गावोऽस्यासन्। गावोऽस्य भवितारः। भूतभविष्यत्सत्तयोरपि स्यात्। गावोऽस्यानन्तराः। गावोऽस्यासमीपा। अनन्तरादिष्वपि स्यात्। पञ्चगुः। दशगुः। असत्यस्तिग्रहणे बहुव्रीहि-द्विगुना[5] परत्वाद् बाध्येत। ततश्च मतुः समासान्तः स्यात्। सति तु पञ्च गावोऽस्येत्येतावति प्राप्तिमान्तरङ्गो बहुव्रीहिरस्तित्यधिकप्राप्तिः। (?) तद्धितद्विगुम्। द्वैमातरादिषु सावकाशं बाधते। तत्र च तेनोक्तार्थत्वान्म-तुर्न भवति वाशब्दोऽवैकल्पार्थः। अन्यथास्मिन्नित्येव प्रत्ययार्थः स्यात्। इतिकरणो विवक्षार्थस्तेन

भूम्निनिन्दाप्रशंसासु नित्ययोगेऽतिशायने।
संसर्गेऽस्ति विवक्षायां प्रायो मत्वादयो मताः ॥१॥

भूम्नि—गोमान्, यवमान्। निन्दायाम्—शङ्कटकी। ककुदावर्ती। प्रशंसायाम्—रूपवान्, वर्णवान्। नित्य-योगे—क्षीरिणो वृक्षाः। अतिशायने—उदरिणी कन्या। संसर्गे[6]—दण्डी। छत्री। प्रायिकमेतद्भूमादिदर्शनम्। सत्तामात्रेऽपि प्रत्ययो दृश्यते। व्याघ्रवान्पर्वतः। स्पर्शरसगन्धवर्णवन्तः पुद्गलाः। रूपरसगन्धस्पर्शवती पृथिवी। स्पर्शवान्वायुः। मत्वर्थीयान्मत्वर्थीयः सरूपो न भवति। गाव एषां सन्तीति गोमन्तः। गोमन्तोऽत्र

---

१. कार्ये हेतौ प्रयोजनम्—म० टि०। २. कीर्यते प्रतिपाद्यते बाल्य एव तस्मिन् दीर्घग्रीवत्वादिवैरूप्यं प्रजापतिनेति करभः म० टि०। ३. कुद्(द्)मल म०। ४. व्रण म०। ५. द्विर्द्विगुणपरत्वाद् बाध्येत म०। ६. संसर्गे म०। ७. संसर्गे म०।

सन्तोति मतुर्न भवति । दण्ड एषामस्तीति दण्डिकाः—तत्र[1] सन्तीति ठो न भवति । विरूपस्तु भवत्येव । दण्डिमती शाला । विरूपोऽपि मत्वर्थीयः समानायां वृत्तौ न भवति । वीरपुरुषा अस्मिन् ग्रामे सन्तीति तत्र बहुव्रीहिरेव भवति । वीरपुरुषको ग्राम इति संज्ञायास्तु भवति । गोखरवदरण्यम् । कृष्णसर्पवान्वल्मीकः । लोहितशालिमान्ग्रामः । ऐकगविकः । सर्वदा[2] नित्यारम्भादेव भवति । गुणे गुणिनि च ये गुणशब्दास्तेभ्यो[3] मत्वर्थीयो न भवति । शुक्लो वर्णोऽस्यास्ति, तिक्तो रसोऽस्यास्ति । तेषामेव तदभिधाने सामर्थ्यम् ये तु गुणमात्रे तेभ्यो भवत्येव । रूपवान् । रसवान् । शौक्ल्यवान् । कार्ष्ण्यवान् ।

आयात् ॥३।३।११७॥ गुणादिभ्यो यः रूपाच्छस्ताहतादित्या एतस्माद्यप्रत्ययाद्याः प्रकृतयो[4] निर्दिश्यन्ते ताभ्यो मतुप्रत्ययो भवति तदस्यास्ति तदस्मिन्नस्तीत्यस्मिन्विषये । बातवान् । चूडावान् । सिधावान्[5] । फेनवान् । गुणवान् । अभिविधावाकारः अपवादेर्माघो माभूदिति वचनम् । तेन यथाभिधानमुत्तरत्र मतुरपि भवति ।

बातदन्तबलललाटादूलः ॥३।३।११८॥ बात दन्त बल ललाट इत्येतेभ्यो मत्वर्थे ऊलप्रत्ययो भवति । बातूलः । दन्तूलः । बलूल । ललाटूलः । मतु—बातवान् । दन्तवान् । बलवान् । ललाटवान् ।

प्राण्यङ्गादातो लः ॥३।३।११९॥ प्राण्यङ्गवाचिन. आकारान्तान्मत्वर्थे लप्रत्ययो भवति । चूडालः । जङ्घालः । मतु.—चूडावान् । जङ्घावान् । प्राण्यङ्गादिति किम् ? शिखावान् प्रदीप. । शाखावान् वृक्ष । चिकोर्षावान् । लोलूयावान् देवदत्त. । कर्णिकाल इत्यत्र कर्णिकाशब्दः प्राण्यङ्गस्यैव वाचक इत्याहुः । आत इति किम् ? हस्तवान् । पादवान् ।

सिध्मादिरुक्षुद्रजन्तोः ॥३।३।१२०॥ सिध्मादिभ्यो रुग्वाचिभ्यः क्षुद्रजन्तुवाचिभ्यश्च मत्वर्थे लप्रत्ययो भवति । सिध्मादिः । सिध्मलः । गडुलः । पार्ष्णिलः । धामनीलः । पार्ष्णिधमनीशब्दौ दीर्घान्तावेव गणे पठयेते तेन दीर्घान्ताभ्यामेव लः । ह्रस्वान्ताभ्यां मतुरेव । रुक्—मूर्च्छालः । विचर्चिकालः । विसूचिकालः[6] । क्षुद्रजन्तुः—यूकालः । मक्षिकालः । क्षुद्रजन्तुरानकुलात् । मतुः—सिध्मवान्[7] । गडुमान्[8] । मूर्च्छावान्[9] । यूकावान्[10] । सिध्म, वर्ध्र, गण्डु, तुण्डो, मणि, नाभि, बीज, निपार्ट[11], पास[12], हनु, पर्शु, पार्ष्णी, धमनी, सन्नु[13], मासपत्र इति सिध्मादिः । वत्सलांशलकुशलपेशलाः रूढिशब्दा नात्र कश्चिद्वृत्त्यर्थोऽस्ति । ते यथाकथञ्चिद्व्युत्पाद्याः ।

प्रज्ञापर्णोदकफेनाल्लेलौ ॥३।३।१२१॥ प्रज्ञा पर्ण उदक फेन इत्येतेभ्यो मत्वर्थे ल इल इत्येतौ प्रत्ययौ भवतः । प्रज्ञालः । प्रज्ञिलः । पर्णलः । पर्णिलः । पर्णवान् । उदकलः । उदकिलः । उदकवान् । फेनलः । फेनिलः । फेनवान् ।

काडाजटाघाटात्क्षेपे ॥३।३।१२२॥ काडा जटा घाटा इत्येतेभ्यो मत्वर्थे ल इल इत्येतौ प्रत्ययौ भवतः क्षेपे प्रत्ययार्थस्य निन्दाया गम्यमानायाम् । काडालः । जटालः । घाटालः । काडिलः । जटिलः । घाटिलः । क्षेप इति किम् ? काडावान् । जटावान् । घाटावान् । क्षेपो मतुना न गम्यत इति क्षेपे मतुर्न भवति ।

वाचालाटौ ॥३।३।१२३॥ वाच इत्येतस्मात्प्रथमान्तादस्त्युपाधिकात् अस्यास्मिन्नित्येतयोरर्थयोः, आल आट इत्येतौ भवतः । ग्मिनोऽपवादः क्षेपे गम्यमाने । वाचालः । वाचाटः । यो बहुनिस्सारं भाषते स एवं क्षिप्यते । क्षेपे इति किम् ? वाग्मी । वाग्वान् । क्षेपो मतुना गम्यत इति क्षेपे मतुर्न भवति ।

ग्मिन् ॥३।३।१२४॥ वाग्स्यास्तीत्यस्मिन् वेद्यस्मिन् विषये वाचो ग्मिन्प्रत्ययो भवति मतुश्च । वाग्मी । वाग्वान् । गकारोऽनुनासिकनिवृत्त्यर्थः ।

---

१. अत्र म० । २. सर्वदानि—म० । ३. स्तेभ्यश्च म० । ४. निर्दिश्यन्ते म० । ५. सिध्मवान् म० । ६. विपादिकालः म० । ७. वर्ध्म म० । ८. निःपाट म० । ९. पांसु म० । १०. सक्थु म० ।

मधुकृपिलोमपिच्छादिभ्योरबलश्चेलाः ॥३।३।१२५॥ मध्वादिभ्यः कुल्यादिभ्यो लोमादिभ्यः पिच्छादिभ्यश्च मत्वर्थे यथासंख्यं र बल श इल इत्येते प्रत्यया भवन्ति । मध्वादिभ्यो रः । मधुरो रसः । मधुरं मधु । मधुशब्दः, स्वादुत्वे गुणसामान्ये गुणे च वर्तमानो रसमुत्पादयति । द्रव्यवृत्तेर्मतुरेव । मधुमान् घटः[1] । एवं सं महत्कण्ठबिवरमस्यास्तीति खरो गर्दभः । खवानन्यः । मुखं सर्वस्मिन्व्यक्तव्येऽस्यास्तीति मुखरो वाचालः । मुखवानन्यः । कुञ्जावस्य स्तः कुञ्जरो हस्ती[2] । कुञ्जशब्दोऽस्मिन् हनुपर्यायः । कुञ्जवानन्यः । नगरं पुरम् । नगवदन्यत् । ऊषरं क्षेत्रम् । ऊषवदन्यत् । मुष्करः पशुः । मुष्कवानन्यः । शुषिरं काष्ठम् । शुषिमदन्यत् । कण्डूरः[3] । कण्डूमान् । पाण्डुरः । पाण्डुमान् । पाशुरः । पाशुमान् । कुल्यादिभ्यो बलः । कृषीबलः कुटुम्बी । कृषिमत्क्षेत्रम् । आसुतीबलः । आसुतिमान् । परिषद्बलः । परिषद्वान् । परिषद्वलम् । परिषद्वत् । रजस्वला स्त्री । रजस्वान् ग्रामः । दन्तावलो नाम राजा । शिखावलं नगरम् । शिखावलो मयूरः । शिखावला स्थूणा । मातृबलः । पितृबलः । भ्रातृबलः । उत्साहबलः । पुत्रबलः । उत्संगबलः । लोमादेः शः लोमशः । रोमशः । लोमवान् । रोमवान् । पिच्छादेरिलः । पिच्छिलः । पिच्छवान् । उरसिलः । उरस्वान् । इतिकरणः सर्वत्र यथाभिधान व्यवस्थापयति, मध्वादयः, कुल्यादयश्च प्रयोगगम्या । लोमन्, रोमन्, वभ्रु, बभ्लु, हरि, कपि, मुनि, गिरि इति लोमादिः । पिच्छ, उरस, घुवका इति पिच्छादिः ।

नोऽङ्गादेः ॥३।३।१२६॥ अङ्ग इत्येवमादिभ्यो मत्वर्थे नप्रत्ययो भवति मतुश्च । अङ्गान्यस्याः सन्तीत्यङ्गना । रूढिशब्दोऽयम् । कल्याणाङ्गो स्त्युच्यते । अन्यत्राङ्गवान् । पामन् । पामनः । पामवान् । वामन् । वामनः । वामवान् । अङ्ग, पामन्, वामन्, हेमन्, श्लेष्मन्, सामन्, कद्रु, वलि इत्यङ्गादिः । योग विभाग उत्तरार्थः ।

शाकीपलालीदद्रुभ्यो ह्रस्वश्च ॥३।३।१२७॥ शाकी पलाली दद्रू इत्येतेभ्यो नप्रत्ययो भवति ह्रस्वश्चैषामन्तादेशो भवति । शाकिनः । पलालिनः । दद्रुणः । शाकीमान् । पलालीमान् । दद्रूमान् । महच्छाक शाकी । नानाशाकसमाहार इत्यन्ये । महत्पलालं पलाली । पलालं 'क्षोद' इत्यन्ये । दद्रूनामं व्याधिः ।

विषुणलक्ष्मणौ ॥३।३।१२८॥ विषुणेति विश्वच् इत्येतस्मान्मत्वर्थे नप्रत्ययो विषु इत्ययं चास्यादेशो निपात्यते । लक्ष्मणेति लक्ष्मीशब्दान्नप्रत्ययोऽकारश्चान्तादेशः । विश्वञ्चो विश्वगतानि वाऽस्य सन्तीति विषुणः आदित्यः । विषुणो वायुः । विषुशब्दो निपातो नानात्वे वर्तते । लक्ष्मीरस्यास्तीति लक्ष्मणः ।

प्रज्ञाश्रद्धार्चावृत्तेर्णः ॥३।३।१२९॥ प्रज्ञा[4] श्रद्धा[5] अर्चा वृत्ति इत्येतेभ्यो मत्वर्थे णप्रत्ययो भवति । प्राज्ञः । श्राद्धः[6] । आर्चः । वार्तः[7] । मतुः—प्रज्ञावान् । श्रद्धावान् । आर्चावान् । वृत्तिमान् ।

ज्योत्स्नादिभ्योऽण् ॥३।३।१३०॥ ज्योत्स्नादिभ्यो मत्वर्थेऽण्प्रत्ययो भवति । ज्योतिरस्यामस्तीति ज्योत्स्ना चन्द्रप्रभा । अत एव निपातनान्नप्रत्ययः । [9]उपान्त्यस्य च लुक् । सास्मिन्नस्तीति ज्यौत्स्नः पक्षः । ज्योत्स्नी[10] रात्रिः । तमोऽस्यामस्तीति तमिस्रा[11] रात्रिः । तमिस्रं तमःसमूहः । तदस्मिन्नस्तीति तामिस्रः पक्षः ।

---

१. घटकः म० । २. कुञ्जो दन्तेऽपि न स्त्रियाम् इत्यमरः म० टि० । ३. कन्दं स्वल्पे चित्रदण्ड उल्कः कण्डूरपूरणौ—इति वैजयन्ती म० टि० । ४. मज्ञा च कल्पपालश्च द्वाविमावासुतीबलौ—इत्यभिधानम् म० टि० । ५. स्मृतिस्वतीतविषया मतिरागादिगोचरा । बुद्धिस्तात्कालिकी प्रोक्ता प्रज्ञा त्रैकालिकी मता म० टि० । ६. श्रद्धा सत्प्रत्ययः स्पृहा—इत्यमरः म० टि० । ७. श्राद्धः श्रद्धालुरास्तिक इति वैजयन्ती म० टि० । ८. वृष्टिमन्निरजो वार्तो वार्तमारोग्यफल्गुनोरिति विश्वः म० टि० । ९. उपान्तस्य म० । १०. ङिद्वाणमित्यादिना ङीप्रत्ययः म० टि० । ११. तमिस्रा तामसी रात्रिर्ज्यौत्स्नी चन्द्रिकयाऽन्विता—इत्यमरः म० टि० ।

तामिस्री रात्रिः । तामिस्राणि गृहाभिधानानि । वैसर्पो व्याधिः । वैयाधिकं कुष्ठम् । कोतपं गृहम् । कोण्डलो युवा तापसः । पाषण्डो साहस्रो देवदत्तः । मतुः—ज्योत्स्नावान् । तमिस्रावान् । तापसशब्दो रूढिशब्दः रूढिविषये मतुर्न भवति । कुण्डली सहस्रीति शिखादित्वात् । ज्योत्स्नादयः प्रयोगगम्याः ।

सिकताशर्कराट्ट ॥३।३।१३१॥ सिकता शर्करा इत्येताभ्यां मत्वर्थेऽण्प्रत्ययो भवति । सैकत ओदनः । शार्करः ओदनः । मतुः—शर्करावान् । सिकतावान् ।

इलश्च देशे ॥३।३।१३२॥ सिकताशर्कराभ्यां देशे मत्वर्थे इलश्च अण् च प्रत्ययौ भवतः मतुश्च । सिकतिलः । सैकतः । सिकतावान् देशः । शर्करिलः । शार्करः । शर्करावान् देशः । सिकता देशः । शर्करा देश इत्यभेदोपचारात् ।

द्युद्रुभ्यां ॥३।३।१३३॥ द्युद्रुशब्दाभ्यां मत्वर्थे मप्रत्ययो भवति । द्यौरस्य अस्मिन्वाऽस्तीति द्युमः । द्युशब्द उकारान्तोऽहः पर्यायः । प्रकृत्यन्तरमित्यपरे । द्रूण्यस्यास्मिन्वा द्रुमः । रूढिशब्दाविमौ । रूढिविषये मतुर्न भवति । अन्यत्र मतुरेव । द्युमान् । द्रुमान् ।

काण्डाण्डभाण्डाद्वीरः ॥३।३।१३४॥ काण्ड आण्ड भाण्ड इत्येतेभ्यो मत्वर्थे ईरप्रत्ययो भवति । मतुश्च । काण्डीरः[1] । काण्डावान् । आण्डीरः[2] । आण्डावान् । भाण्डीरः[3] । भाण्डावान् ।

कच्छ्वा डुरः ॥३।३।१३५॥ कच्छू इत्येतस्मान्मत्वर्थे डुरप्रत्ययो भवति । कच्छुरः । कच्छूमान् ।

दन्त उन्नतः ॥३।३।१३६॥ दन्तशब्दादुन्नतोपाधिकान्मत्वर्थे उरप्रत्ययो भवति । दन्ता उन्नता अस्य सन्ति दन्तुरः[4] । उन्नत इति किम् ? दन्तवान् ।

मेधारथाद्वेरः ॥३।३।१३७॥ मेधा रथ इत्येताभ्यां मत्वर्थे इरप्रत्ययो वा भवति । मेधिरः । मेधावी । मेधावान् । रथिरः । रथी । रथिकः । रथवान् ।

कृपाहृदयादालुः ॥३।३।१३८॥ कृपाहृदयशब्दाभ्यां मत्वर्थे आलुप्रत्ययो वा भवति । कृपालुः । कृपावान् । हृदयालुः । हृदयिकः । हृदयी । हृदयवान् ।

केशाद्वः ॥३।३।१३९॥ केशशब्दान्मत्वर्थे वप्रत्ययो वा भवति । केशवः । केशी । केशिकः । केशवान् ।

मण्यादिभ्यः ॥३।३।१४०॥ मण्यादिभ्यो मत्वर्थे वप्रत्ययो भवति मतुश्च । मणिवः । मणिमान् । सिध्मादिपाठान्मणिलः । हिरण्यवः । हिरण्यवान् । बिम्बावम् । कुरावम्[5] । राजीवम् । इष्टकावम् । गाण्डीवम् । अजकावम् । रूढिविषये मतुर्न भवति । मण्यादयः प्रयोगगम्याः । इह वेति नास्ति पृथग्रारम्भात् ।

स्वाङ्गाद्दीनादः ॥३।३।१४१॥ हीनोपाधिकात्स्वाङ्गान्मत्वर्थेऽप्रत्ययो भवति । खण्डः[6] कर्णोऽस्यास्तीति कर्णः । छिन्ना नासिकास्यास्तीति नासिकः । हीनादिति किम् ? कर्णवान् । नासिकावानित्येवान्यत्र भवति ।

अभ्रादिभ्यः ॥३।३।१४२॥ अभ्र इत्येवमादिभ्यो मत्वर्थेऽप्रत्ययो भवति । अभ्राण्यस्मिन्सन्ति अभ्रं नभः । अर्शांस्यस्य सन्ति अर्शसो देवदत्तः । उरसः—यथादेश् (?) मातुरपि भवति । उरस्वान् । जटावान् । घाटावान् । कामवान् । बलवान् । अभ्र, अर्शस्, उरस्, तुण्ड, चतुर, पलित, जटा, घाटा, कर्दम, काम, बल इत्यभ्रादिराकृतिगणः ।

शृङ्गादारकः ॥३।३।१४३॥ शृङ्गान्मत्वर्थे आरकप्रत्ययो भवति । शृङ्गारकः । शृङ्गवान् । शिखा-

---

१. स्यात्काण्डवांस्तु काण्डीरः, इत्यभिधानम् म० टि० । २. अण्डं स्वगाधिकोक्तौ स्यान्मुष्के वीर्येऽपि च क्वचित् म० टि० । ३. वणिङ्मूलधने पात्रे भाण्डं भूषाक्षभूषयोः, म० टि० । ४. दन्तुरं वाक्यवद् विषाद् विषमोन्नतदन्तयोरित्यभिधानचिन्तामणिः म० टि० । ५. कुरारवम् म० । ६. खण्डं— म० । ७. यथा दश् मन्मतुरपि भवति म० ।

दित्वाच्छृङ्गी । वृन्दारक इति वृन्दारकनागकुञ्जरैरिति निपातनात्सिद्धम् । मतुना वृन्दवान् । शिखादित्वात् वृन्दी ।

फलवर्हाभ्येनः ॥३।३।१४४॥ फल बर्ह इत्येताभ्यां शृङ्गाच्च मत्वर्थे इनप्रत्ययो भवति । फलिनः । बर्हिणः । शृङ्गिणः । मतुः—फलवान् । बर्हवान् । शिखादित्वात्—फली । बर्ही ।

मलादीमसश्च ॥३।३।१४५॥ मलशब्दान्मत्वर्थे ईमसश्च इनश्च प्रत्ययौ भवतः, मतुश्च । मलीमसः । मलिनः । मलवान् ।

मरुत्पर्वणस्तः ॥३।३।१४६॥ मरुत् पर्वन् इत्येताभ्यां मत्वर्थे तप्रत्ययो भवति । मरुत्तः । पर्वतः । मरुत्वान् । पर्ववान् ।

वलितुण्डिवटेर्भः ॥३।३।१४७॥ वलि तुण्डि वटि इत्येतेभ्यो मत्वर्थे भप्रत्ययो भवति । वलिभः । वलिन इत्यङ्गादित्वात् । तुण्डिभः । वटिभः । प्रवृद्धा नाभिस्तुण्डी ।

ऊर्णाहंशुभमो युस् ॥३।३।१४८॥ ऊर्णा अहं शुभम् इत्येतेभ्यो मत्वर्थे युस्प्रत्ययो भवति । ऊर्णायुः । अहंयुः—अहंकारवान् । शुभंयुः कल्याणबुद्धिः ।

कंशमस्तियुस्तुयस्तवभाः ॥३।३।१४९॥ कं शम् इत्येताभ्यां मत्वर्थे ति युस् तु यस् त व भ इत्येते प्रत्यया भवन्ति । कन्तिः । शन्तिः । कंयुः । शंयुः । कन्तुः । शन्तुः । कंयः । शंयः । कन्तः । शन्तः । कंवः । शंवः । कम्भः । शम्भः । युस्यसो. सकार इत्पदत्वार्थः ।

तपस्त्रग्मायामेधाऽसो विन् ॥३।३।१५०॥ तपस् स्रग् माया मेधा इत्येतेभ्योऽसन्तेभ्यश्च मत्वर्थे विन्प्रत्ययो भवति । तपस्वी । स्रग्वी । मायावी । मेधावी । असः—यशस्वी । तेजस्वी । अर्चस्वी । मतु—स्रग्वान् । मायावान् । मेधावान् । यशस्वान् । यशस्वती । सरस्वती । ज्योत्स्नाद्यणा बाधा माभूदिति तपसो ग्रहणम् । मायी । मायिकः इति ब्रीह्यादिपाठात् ।

तमिस्राार्णवोर्जस्वलोर्जस्विन्नामयाविन्गोमिन् ॥३।३।१५१॥ तमिस्र अर्णव ऊर्जस्वल ऊर्जस्विन् आमयाविन् गोमिन् इति मत्वर्थे निपात्यन्ते । तमश्शब्दाद्र उपान्त्यस्य चेत्वं तमिस्रा रात्रिः । तमिस्राणि गुहामुखानि । अर्णसो वः प्रत्ययः अन्त्यस्य च लोपः । अर्णवः समुद्रः । ऊर्ज इत्येतस्माद्वल विन् इत्येतौ प्रत्ययौ असश्चागमः । ऊर्जस्वलः । ऊर्जस्वी । आमयशब्दाद्विन् दीर्घश्चास्य आमयावी । गोशब्दान्मिन्, गावोऽस्य सन्ति गोमी । मतुः—तमस्वान् । [1]ऊर्जस्वान् । गोमान् । स्वमैश्वर्यमस्यास्तीति स्वामीति स्वामीश्वरादिति निपातनात्सिद्धम् ।

नौशिखादिभ्यां ठेनौ ॥३।३।१५२॥ नावादिभ्यः शिखादिभ्यश्च मत्वर्थे यथासंख्यं ठ इन् इत्येतौ प्रत्ययौ भवतः मतुश्च । नावादिभ्यष्ठः । नाविकः । नौमान् । कुमारिकः । कुमारीमान् । यवखादिकः । यवखादवान् । शिखादिभ्यः इन् । शिखी । शिखावान् । माली । मालावान् । नावादयस्त्रय उदाहृताः । शिखा, माला, मेखला, शाखा, वीणा, सज्जा, वडवा, अष्टका, बलाका, पताका, कर्मन्, वर्मन्, चर्मन्, बल, उत्साह, उद्दास[3], उद्भास, उर्ज[4], मुल, आयाम, व्यायाम, प्रयाम, आरोह, अवरोह, परिणाह, शृङ्ग, वृन्द इति शिखादिराकृतिगणः । तेन करुणी, करुणावान् इत्यादि सिद्धम् ।

ब्रीह्यादितोऽनेकाचः ॥३।३।१५३॥ ब्रीह्यादिभ्योऽकारान्ताच्चानेकाचो मत्वर्थे ठ इन इत्येतौ प्रत्ययौ भवतः, मतुश्च । व्रीहिकः । व्रीही । व्रीहिमान् । मायिकः । मायी । मायावान् । मायावीति विन् । ब्रीह्यादयः प्रयोगगम्याः । अतः दण्डिकः । दण्डी । दण्डवान् । छत्रिकः । छत्री । छत्रवान् । तकारादिह न भवति । खट्वावान् ।

---

१. ऊर्ज्वान् म० । २. नाविकाः सङ्ग्रामवार्धितरणे प्रस्थिता नाविका इव इति जिनसेनाचार्यप्रयोगः । म० टि० । ३. उद्भास म० । ४. उक उक मुल म० ।

माक्षावान् । अनेकाच इति किम् ? खवान् । स्ववान् । कारकवान् । हारकवान् । वृक्षवान् । प्लक्षवान् । सिंहवान् । व्याघ्रवान् । दण्डवती शालेति क्रियाजातिशब्दाभ्यां सप्तम्यर्थे च ठेनौ भवतः । इत्याहुः । तथा रसरूपस्पर्शगन्धशब्दस्नेहेभ्यश्च गुणवाचिभ्यो दृश्यते च क्वचित् । कार्यी । कायिकः । हार्यी । हायिकः । भोगी । भोगिकः । तण्डुली । तण्डुलिकः । खलिनी भूमिः । शाद्वलिनी भूमिः । रसिको नटः । रूपिणी कन्या । रूपिको दारकः । रूपिष्ववधे. रूपिसमवायाच्चक्षुषाणि, स्पर्शिको वायुरिति तदत्राभिधानतो, व्यवस्था वेदितव्या इति करणश्च सर्वत्र तदर्थोऽनुवर्तते ।

अशिरसोऽशीर्षश्च ॥३।३।१५४॥ अशिरस् इत्येतस्मान्मत्वर्थे ठ इन् इत्येतौ प्रत्ययौ भवतः मतुश्च तत्सन्नियोगे चाशिरसः अशीर्ष इत्ययमादेशो भवति । अशीर्षी । अशीर्षिकः । अशीर्षवान् मतावशिरसो शीर्षभावः, ठेनोस्तु शीर्षोऽयोति विद्यत एव ।

अर्थार्थिन्ताद्भावात् ॥३।३।१५५॥ अर्थशब्दादर्थान्ताच्च भाववाचिनो मत्वर्थे ठेनावेव भवतः तौ च ततो भाववाचिन एव । उभयथा चायं नियमो वाक्यभेदेन क्रियते । अर्थी याच्ञायाम् । अर्थनमर्थः, सोऽस्यास्तीत्यर्थिकः, अर्थी । प्रतीपमर्थनं प्रत्यर्थः, सोऽस्यास्तीति प्रत्यर्थिकः । प्रत्यर्थी । ठेनावेवेति नियमादतो मतुर्न भवति । भावादेवेति नियमादतो द्रव्यवाचिनष्ठेनौ न भवतः । अर्थो हिरण्यादिरस्तीत्यर्थवानिति मतुरेव भवति ।

व्रीहितुन्दादेरिलश्च ॥३।३।१५६॥ व्रीहिवाचिभ्यस्तुन्दादिभ्यश्च मत्वर्थ इलप्रत्ययो भवति । चकाराट्ठेनौ च, यादिति मतुश्च । व्रीहेः कलमिलः । कलमिकः । कलमी । कलमवान् । व्रीहिशब्दात्त्विलो न भवति पूर्वत्रोपादानात् । भावे हि तत्रोपादानमनर्थकं स्यात् । इतरेषामप्यनेन सिद्धे. तुन्दादिभ्यः—तुन्दिलः । तुन्दिकः । तुन्दी । तुन्दवान् । उदरिलः । उदरिकः । उदरी । उदरवान् । पिचण्डिलः । पिचण्डिकः । पिचण्डी । पिचण्डवान् । यविलः । यविकः । यवी । यवमान् ।

स्वाङ्गाद्विवृद्धात् ॥३।३।१५७॥ स्वाङ्गाद्विवृद्धोपाधिकान्मत्वर्थे इलश्च ठेनौ च मतुश्च प्रत्यया भवन्ति । विवृद्धौ महान्तौ कर्णावस्य स्तः कर्णिलः । कर्णिकः । कर्णी । कर्णवान् । ओष्ठिलः । ओष्ठिकः । ओष्ठी । ओष्ठवान् । विवृद्धाविति किम् ? अन्यत्रेलो न भवति ।

गुणादिभ्यो यः ॥३।३।१५८॥ गुणादिभ्यो मत्वर्थे यप्रत्ययो भवति । गुण्यः पुरुषः । हिम्यः पर्वतः । मतुः—गुणवान् । हिमवान् ।

रूपात् शस्ताहतात् ॥३।३।१५९॥ रूपात् शस्ताहतोपाधिकान्मत्वर्थे यप्रत्ययो भवति । शस्तं प्रशस्तं रूपमस्यास्तीति रूप्यो गौः । रूप्यः पुरुषः । आहतं रूपमस्यास्तीति रूप्यः[2] कार्षापणः । निघातिका[3] ताडनाद्दीनारादिषु यद्रूपमुत्पद्यते तदाहतं रूपम् । शस्ताहतादिति किम् ? रूपवान् । प्रशंसायाम्, रूपवती कन्येति मतुरप्यायादिति भवति । अतः परं मतुर्नास्ति ।

गवादेष्ठण् ॥३।३।१६०॥ गोशब्दपूर्वादकारान्तान्मत्वर्थे ठण्प्रत्ययो भवति । मत्वादीनामपवादः । गोशतिकः । गोसहस्रिकः । अत इति किम् ? गोविंशतिमान् । कथं गोशकटिकः ? शकटिशब्देन समानार्थः शकटशब्दोऽस्ति । शकटशब्दार्थेऽनभिधानात् मतुर्न भवति । केषाञ्चिदत इति नानुवर्तते गौत्रिकः । गौवयसिक इति[5] हि भवति । गोविंशतिमानिति त्वनभिधानान्न भवति । एवं चित्रललाटिकावतीत्यादौ चेत्याहुः ।

निष्कादेः शाट्सहस्रात् ॥३।३।१६१॥ निष्को य आदिस्ततः परं यच्छतं सहस्रञ्च तदन्तान्मत्वर्थे

---

१. इत्याहुः म० । २. स्यात्कोशश्च हिरण्यञ्च हेमरूप्ये कृताकृते । ताभ्यां यद्व्यवस्तद्रूप्यं, रूप्यं तद्द्वयमाहतम्—इति नामलिङ्गानुशासनम् । रूप्यं स्यादाहतस्वर्णरजते रजतेऽपि च—इति विश्वः म० टि० । ३. यत्र निक्षिप्य कूटेन हन्यते सा निघातिका म० टि० । ४. शकटिशब्दा—म० । ५. इत्यादि हि म० । ६. साष्टे शते सुवर्णानां हेम्नुरोभूषणे पले । दीनारेऽपि च निष्कोऽस्त्री, इति नामलिङ्गानुशासनम् म० टि० ।

ठण्प्रत्ययो भवति । नैष्कशतिकः । नैष्कसहस्रिकः । निष्कादेरिति किम् ? शती । सहस्री । आदिग्रहणात् सुवर्णादि-निष्कशतमस्यास्तीत्यत्र न भवति ।

एकादेः कर्मधारयात् ॥३।३।१६२॥ एकादेः कर्मधारयादकारान्मत्वर्थे ठण्प्रत्ययो भवति । एको गौः एकगवः, सोऽस्यास्तीत्यर्थेकगविकः । ऐकहलिकः । ऐकशतिकः । ऐकसहस्रिकः । कर्मधारयादिति किम् ? एकस्य गौः एकगवः, सोऽस्यास्तीति न भवति । अत इति किम् ? एकविंशतिरस्यास्मिन् वाऽस्तीति न भवति ।

सर्वादेरिन् ॥३।३।१६३॥ सर्वादेरकारान्तात्कर्मधारयादिन्प्रत्ययो भवति । मत्वादीनामपवादः । सर्वं धनं तदस्यास्तीति सर्वधनी । सर्वजीवी । सर्वकेशी नटः ।

द्वन्द्वरुग्निन्द्यात्प्राणिस्थादस्थाङ्गात् ॥३।३।१६४॥ द्वन्द्व. समासो रुग्रोगो निन्द्यं गर्ह्यं च यत्प्राणि-स्थमस्थाङ्गमकारान्तं तस्मान्मत्वर्थे इन्प्रत्ययो भवति । द्वन्द्वात्—कटकवलयिनी । शङ्खनूपुरिणी । रुज.—कुष्ठी । कोलासी । निन्द्यात्—शङ्खाढकी[1] । ककुदावर्ती । कालतालुकी । प्राणिस्थादिति किम् ? पुष्पफलवान् वृक्षः । अस्थाङ्गादिति किम् ? स्तनकेशवती । पाणिपादवती । अत इति किम् ? चित्रललाटिकावती । विपाटिकावती । कालतालुमती । आतोऽनेकाच [2]इत्येव सिद्धे वचनमस्य निवृत्त्यर्थम् ।

वातातिसारपिशाचात्कक् च ॥३।३।१६५॥ वात अतिसार पिशाच इत्येतेभ्यो मत्वर्थ इन्-प्रत्ययो भवति कक् चैषामागमो भवति । वातकी । अतिसारकी । पिशाचकी । वातातिसारयोरुक्त्वा पूर्वेणेन् सिद्धः । कगर्थमुपादानम् । पिशाचस्य तूभयार्थम् ।

वयसि डतः ॥३।३।१६६॥ डत्प्रत्याहारगृहीतप्रत्ययान्तान्मत्वर्थ इन्नेव भवति वयसि गम्यमाने । पञ्चमो मासः संवत्सरो वाऽस्यास्तीति पञ्चमी उष्ट्रः । नवमी । दशमी ।

सुखादेः ॥३।३।१६७॥ सुखादिभ्यो मत्वर्थे इन्नेव भवति । सुखी । दुःखी । सुख, दुःख, तृप्र, कृच्छ्र, अस्र, अलीक, कृपण, सोढ, प्रताप, शील, हृल इति सुखादिः ।

मालाऽक्षेपे ॥३।३।१६८॥ मालाऽस्यास्मिन्वास्तीति मालाशब्दादिन्नेव भवति क्षेपे गम्यमाने । माली । क्षेप इति किम् ? मालावान् । मालाशब्दः शिखादिस्ततः क्षेपे मतुनिवृत्त्यर्थं वचनम् ।

धर्मशीलवर्णान्तात् ॥३।३।१६९॥ धर्म शील वर्ण इत्येतदन्तान्मत्वर्थ इन्नेव भवति । तपस्विधर्मी[3] । तपस्विशीली । ब्राह्मणवर्णी । शूद्रवर्णी ।

बाहुर्वादेर्बलात् ॥३।३।१७०॥ बाहु ऊरु इत्येवमादेर्बलशब्दान्तान्मत्वर्थ इन्नेव भवति । बाहुबली । ऊरुबली ।

मन्माज्ञाम्नि ॥३।३।१७१॥ मन् म इत्येवमन्तान्मत्वर्थ इन्नेव भवति समुदायश्चेन्नाम भवति । दामिनी । वर्मिणी । चर्मिणी । [म—सोमिनी] संसोमिनी । प्रथमिनी । याम्मिनी[4] । कामिनी । नाम्नीति किम् ? दामवान् । सोमवान् ।

हस्तदन्तकराज्जातौ ॥३।३।१७२॥ हस्त दन्त कर इत्येतेभ्यो मत्वर्थ इन्नेव भवति जातौ, समुदायेन चेज्जातिरभिधीयते । हस्तोऽस्यास्तीति हस्ती । दन्ती । करी । जाताविति किम् ? हस्तवान् । करवान् । दन्तवान् ।

पुष्करादेर्देशे ॥३।३।१७३॥ पुष्करादिभ्यो मत्वर्थ इन्नेव भवति देशेऽभिधेये । पुष्करिणी । पद्मिनी । देश इति किम् ? पुष्करवान् हस्ती । पुष्कर, पद्म, उत्पल, तमाल, कुमुद, नल, कपित्थ, बिस, मृणाल, कर्दम, शालूक, विवह, करीष, शिरीष, यवास, हिरण्य इति पुष्करादिः ।

---

१. शङ्खाधकी म० । २. इत्येवेति सिद्धे म० । ३. तपोऽस्यास्तीति, तपस्विधर्मोऽस्यास्तीति म० टि० । ४. आम्मिनी म० ।

वर्णी ब्रह्मचारी ॥३।३।१७४॥ वर्णीति वर्णशब्दान्ताम्मत्वर्थ इन्निपात्यते ब्रह्मचारी चेदभिधेयो भवति। वर्णशब्दो ब्रह्मचर्यपर्याय। वर्णो ब्रह्मचर्यमस्यास्तीति वर्णी ब्रह्मचारीत्येके। वर्णशब्दो ब्राह्मणादिवर्ण-वचनस्तत्र ब्रह्मचारीत्यनेन शूद्रव्यवच्छेदः क्रियते तेन नैर्वणिको वर्णीत्युच्यते। स हि विद्याग्रहणार्थमुपनीतो ब्रह्म चरति न शूद्र इत्यन्ये।

सूक्तसाम्निच्छः ॥३।३।१७५॥ तदस्यास्त्यस्मिन्वेत्यस्मिन्विषये सूक्ते सामनि चाभिधेये छप्रत्ययो भवति। मत्वादीनामपवादः। अच्छावाक्शब्दोऽस्मिन्नस्तीत्यच्छावाकीयम्। मैत्रावरुणीयं सूक्तम्। साम्नि—यज्ञा-यज्ञीयम्। अशनपिपासीयम्। वारतन्तवीयम्। अस्यवालीयम्। कयाशुभीयम् इत्यत्र अस्य वामादीनि सूक्त-सामस्थानामनुकार्याणामखण्डान्येवानुकरणप्रातिपदिकानि नात्र स्यादिति स्सुचिति श्लुर्भवति। प्रथमान्तता चोपपद्यते। सूक्तादयो ग्रन्थविशेषाः।

ऋग्याऽध्यायानुवाके ॥३।३।१७६॥ अध्यायेऽनुवाके चाभिधेये मत्वर्थे यश्छस्तस्य श्लुम्वा भवति। अतएव श्लुग्वचनादृगयानुवाकयोरपि छोऽनुमीयते। गर्दभाण्डशब्दोऽस्मिन्नध्यायेऽनुवाके वास्ति गर्दभाण्डः। गर्दभाण्डीयो वा अध्यायोऽनुवाको वा। दीर्घजीवितः। दीर्घजीवितीयः। पलितस्तम्भः। पलित-स्तम्भीय.। द्रुमपुष्पः। द्रुमपुष्पीयः। उच्चिष्ट। उच्छीष्टीय.। पलितः। पलितीय.। स्कम्भः। स्कम्भीयः।

विमुक्तादेरण् ॥३।३।१७७॥ विमुक्तादिभ्यो मत्वर्थेऽध्यायानुवाकयोरभिधेययोरण्प्रत्ययो भवति। वैमुक्तः। दैवासुरः। अध्यायोऽनुवाको वा। विमुक्त, देवासुर, रक्षोसुर, उपपद्, परिसारक, वसु, मरुत्, सत्वत्, दशार्ह, वयस्, हविर्धान, महित्री, सोमा, पूषन्, इडा, अग्नि, विष्णु, वृत्रहन्—इति विमुक्तादिः।

घोषडादेर्वुच् ॥३।३।१७८॥ घोषड इत्येवमादिभ्यो मत्वर्थे अध्यायानुवाकयोरभिधेययोर्वुच्प्रत्ययो भवति। घोषट्(ड्-छ)शब्दोऽस्मिन्नस्तीति घोषडक.। इषेत्वक। वुश्चकारो वोरक इति सामान्यग्रहणाविघातार्थः। घोषड, घोषद्, इषेत्वा, मातरिश्वन्, देवस्यत्वादे, वीराय, कृष्णोऽस्या, खरेष्टा, दैवोदास्य, रक्षोहण, अञ्जन, प्रतूर्त, उशान, कृशानु इति घोषडादि।

प्रकारो जातीयर् ॥३।३।१७९॥ तदस्येति वर्तते। तदिति प्रथमान्तादस्येति षष्ठ्यर्थे जातीयर्प्रत्ययो भवति यत्तत्प्रथमान्तं तच्चेत्प्रकारो भवति सामान्यस्य भिद्यमानस्य यो विशेषो विशेषान्तरानुप्रवृत्तः स प्रकारः। पटु. प्रकारोऽस्य पटुजातीय.। मृदुजातीय.। तज्जातीयः। यज्जातीयः। नानाभूतः प्रकारोऽस्य नानाजातीयः। एवंजातीयः। तथाजातीयः। यथाजातीय.। कथंजातीय.। इत्थंजातीय.। यावमो प्रकारमात्रे जातीयः। प्रकारवतीति तदन्तादपि भवति। जातीयरिति रेफ इत् अरित्स्वार्थ इति पर्युदासार्थः।

कोऽण्वादेः ॥३।३।१८०॥ अणु इत्येवमादिभ्यस्तदस्य प्रकार इत्यस्मिन्विषये कप्रत्ययो भवति। जातीयरोऽपवादः। अणुः प्रकारोऽस्य अणुकः पटः। स्थूलकः पट.। अणुका माषाः। स्थूलका माषाः। माषकं हिरण्यम्। इषुका गोलिका। अणु, स्थूल, माष, इषु, इक्षु, तिल, व्रीहि, काल, पत्र, मूल, पत्रमूल, कुमारी-पुत्र, कुमारी, श्वशुर, भ्रमणी, वञ्चन्, बृहत् इत्यण्वादिः।

कृष्णयवजीर्णसुरावदातगोमूत्रात्तिलव्रीहिशाल्यहिसुराच्छादने ॥३।३।१८१॥ कृष्ण यव जीर्ण सुरा अवदात गोमूत्र इत्येतेभ्यो यथासंख्यं तिलव्रीहिशाल्यहिसुराच्छादनेषु वाच्येषु तदस्य प्रकार-इत्यस्मिन्विषये कप्रत्ययो भवति। कृष्णात्तिलेषु—कृष्णः प्रकारो येषां ते, कृष्णकास्तिलाः। कृष्णजातीयोऽन्यः। एवमुत्तरत्रापि यवाद् व्रीहि—यवप्रकारा यवका व्रीहयः। जीर्णच्छालिषु—जीर्णप्रकारा जीर्णकाः शालयः। सुराया अहौ—सुरा प्रकारः। सुरावर्ण सुरकोऽहिः सर्पः। अवदातात्सुरायाम्—अवदातप्रकारा अवदातिका सुरा। गोमूत्रादाच्छादने—गोमूत्रप्रकारं गोमूत्रकमाच्छादनम्।

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने
वृत्तौ तृतीयस्याध्यायस्य तृतीयः पादः समाप्तः॥

---

१. ब्रह्मचारिलक्षणम् उपनयनं ब्रह्मचर्यम् म०टि०। २. आकृतावक्षरे रूपे ब्राह्मणादिषु जातिषु। माल्यानुलेपनेषु च वर्णशब्दः षष्ठ्यर्थमाक्। म० टि०। ३. अशनायापिपासीयम् म०। ४. स चेत्।

[चतुर्थः पादः]

भूतपूर्वे प्वरट् ॥३।४।१॥ अतः परं प्रायशः स्वार्थिकाः प्रत्ययाः तत्रोपाधिः प्रकृतेर्विज्ञायते स प्रत्ययस्य योन्यो भवति । पूर्वं भूतो भूतपूर्वः । भूतपूर्वत्वे वर्तमानात्सुबन्ताच्छब्दरूपात् प्वरट्प्रत्ययो भवति स्वार्थे । आढ्यो भूतपूर्वः आढ्यप्वरः । दर्शनीयप्वरः । आढ्या भूतपूर्वा आढ्यप्वरी । दर्शनीयप्वरी । भूतशब्दो वर्तमानेऽप्यस्ति पूर्वशब्दो दिगादावपि इत्यतिक्रान्तकालप्रतिपत्त्यर्थमुभयोरुपादानम् । पकारः पुम्भावार्थः । टकारो ङ्यर्थः । इह कस्मान्न भवति । अर्जुनो माहिष्मत्या भूतपूर्व इति । प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तस्य भूतपूर्वत्वे प्रत्ययः ।

गोष्ठात् खञ् ॥३।४।२॥ गोष्ठशब्दाद् भूतपूर्वे खञ्प्रत्ययो भवति । गोष्ठो भूतपूर्वः गोष्ठीनो देशः ।

षष्ठ्या रूप्यप्वरट् ॥३।४।३॥ षष्ठ्यन्ताद्भूतपूर्वेऽर्थे रूप्यप्वरट् इत्येतौ प्रत्ययौ भवतः । भूतपूर्व इतीह प्रत्ययार्थः । देवदत्तस्य भूतपूर्वः देवदत्तरूप्यो गौः । देवदत्तप्वरो गौः ।

व्याश्रये तस् ॥३।४।४॥ नानापक्षाश्रयो व्याश्रयः । षष्ठ्यन्ताद् व्याश्रये गम्यमाने तस्प्रत्ययो भवति । देवदत्तश्चैत्रतोऽभवत्, गुरुदत्तो मैत्रतः । चैत्रमैत्रयोर्विघटमानयोश्चैत्रस्य पक्षे देवदत्त. मैत्रस्य पक्षे गुरुदत्तोऽभवदित्यर्थः । एवं यत्तोऽभवत् । तत्तोऽभवत् । त्वत्तोऽभवत् । मत्तोऽभवत् ।

व्याधेः प्रतीकारे ॥३।४।५॥ व्याधिवाचिनः षष्ठ्यन्तात्प्रत्ययो भवति प्रतीकारे गम्यमाने । प्रवाहिकातः कुरु । प्रच्छर्दिकातः कुरु । तस्य व्याधेः प्रतीकारं कुर्वित्यर्थः ।

पर्यभेः सर्वोभये ॥३।४।६॥ परि अभि इत्येताभ्या यथाक्रमं सर्वोभयार्थे वर्तमानाभ्यां तस्प्रत्ययो भवति । परितः । सर्वतः इत्यर्थः । अभितः उभयतः इत्यर्थः । सर्वोभय इति किम्? परिषिञ्चति । अभिषिञ्चति । अभियाति ।

आद्यादिभ्यः ॥३।४।७॥ आद्यादिभ्यः सम्भवद्विभक्त्यन्तेभ्यस्तस्प्रत्ययो भवति । आदावादितः । अन्ततः । मध्यतः । पृष्ठेन—पृष्ठतोऽर्कं निषेवेत । पार्श्वतः । मुखतः । दुष्टः शब्द स्वरतो वर्णतो वा । शब्दतः, अर्थतः, अभिधानतः आद्यादयः प्रयोगगम्याः ।

क्षेपातिग्रहाड्यथेऽकर्तुस्तृतीयायाः ॥३।४।८॥ तृतीयान्तादकर्तृवाचिनः क्षेपातिग्रहाड्यथाविषये तस्प्रत्ययो भवति । क्षेपो निन्दा; तत्र वृत्तेन क्षिप्तो वृत्ततः क्षिप्तः, वृत्तेन निन्दित इत्यर्थः । अतिक्रम्य ग्रहणमतिग्रहः । वृत्तेनातिगृह्यते वृत्ततोऽतिगृह्यते साधुवृत्तोऽन्यान्यतिक्रम्य वृत्तेन गृह्यते साध्वाचार इति सम्भाव्यत इत्यर्थः । अचलनमक्षोभणमव्यथा अभीतिरित्यन्ते तत्र वृत्तेन न व्यथते—वृत्ततो न व्यथते—वृत्तेन न चलति न बिभेति वेत्यर्थः । क्षेपातिग्रहाड्यथ इति किम् ? वृत्तेन भिन्न । अकर्तुरिति किम् ? देवदत्तेन क्षिप्तः । तृतीयाया इति किम् ? देवदत्तं क्षिपति ।

पापहीयमानेन ॥३।४।९॥ तृतीयान्तादकर्तृवाचिनः पापहीयमानाभ्यां योगे तस्प्रत्ययो[1] भवति । वृत्तेन पापः वृत्ततः पापः । चारित्रेण हीयते चारित्रतो हीयते । मन्त्रतो हीनः स्वरतो वर्णतो वा । पापहीयमानेनेति किम् ? चारित्रेण शुद्धः । अकर्तुरिति किम् ? देवदत्तेन हीयते । तृतीयाया इति किम् ? ग्रामो हीयते । अधिः क्षेपार्थं वचनम्[2] ।

पञ्चम्याः प्रतिना ॥३।४।१०॥ प्रतिना योगे या पञ्चमी विहिता तदन्तात्तस्प्रत्ययो वा भवति । प्रद्युम्नो वासुदेवात् प्रति वासुदेवतः प्रति वासुदेवस्य प्रतिनिधिरित्यर्थः । पञ्चम्या इति किम् ? वृक्षं प्रति विद्योतते । उत्तरार्थं च ।

---

१. प्रत्ययो वा म० । २. अक्षेपार्थं वचनम् म० ।

अहीयरुहोऽपाये ॥३।४।११॥ हीयरुहवर्जितस्य धातोरपायेऽवधौ या पञ्चमी विहिता तदन्तात्तसुप्रत्ययो वा भवति । ग्रामादागच्छति । ग्रामत आगच्छति । उपाध्यायादधीते । उपाध्यायत. अधीते । अहीयरुह इति किम् ? सार्थाद्धीयते, सार्थाद्धीनः । पर्वतादवरोहति । स्वार्थादिति कर्नुरपायेऽप्यविवक्षा । हीयते इति कर्मकर्तर्यन्ये हीयेति विकरणेन जहातिनिर्देशो जिहीतिनिर्देशार्थः । तेन तत्र प्रतिषेधो न भवति भूमितः उज्जिहते । अपाय इति किम् ? ऋते धर्मात्कुतः सुखम् । पाटलीपुत्राद् वृष्टो देवः ।

अद्व्यादिवैपुल्यात्सर्वादिकिंबहोः तस् ॥३।४।१२॥ द्व्यादिवर्जितेभ्यः सर्वादिभ्यः किम्शब्दाद्वैपुल्यवाचिनो बहुशब्दाच्च पञ्चम्यन्तात् तस्प्रत्ययो भवति । सर्वस्मात् सर्वतः । विश्वत. । यतः । ततः । कुतः । बहुभ्य. । बहुत । द्व्यादिप्रतिषेध किम् ? द्वाभ्या त्वत् निमित्तात् त्वत्तः मत्त. भवत्तः इत्यहीयरुहोपाय इति भवति । वैपुल्यप्रतिषेधः किम् ? बहोः सूपात् । सर्वादिकिंबहोरिति किम् ? वृक्षात् प्लक्षाद्विना । किमो द्व्यदित्वात्पृथगुपादानम् । तर्हि सर्वादिकिम्बहोः तस्विषयेऽपि परत्वादयमेव भवति । यतः प्रति, ततः प्रति, यत आगच्छति, तत आगच्छति । पकारः पुम्भावार्थ । बह्वीभ्यः, बहुत. ।

इतोऽतः कुतः ॥३।४।१३॥ इतस् अतस् कुतस् इत्येते शब्दा निपात्यन्ते इत इति इदमः तसि इशादेशो निपात्यते । अस्मात् इत । इमकस्मात् इतः । अत इति एतदः अशादेशः । एतस्मात् एतकस्मात् अतः । कुत इति किम· कु इत्यादेश. कस्मात्कुतः । इह पञ्चम्या इति नानुवर्तते लक्षणान्तरेण सप्तम्यादेशमात्रं विधीयते । तेन भवदादियोगेऽपि भवति । इतो भवान् । अतो भवान् ।

भवदायुष्मद्दीर्घायुर्देवानाम्प्रियैकार्थात् ॥३।४।१४॥ भवत् आयुष्मत् दीर्घायुस् देवानांप्रिय इत्येतत्समानाधिकरणाद्द्व्यादिवैपुल्यात् सर्वादिकिंबहोः सर्वविभक्तयन्तात् तस्प्रत्ययो भवति वा । स भवान् । ततो भवान् । तौ भवन्तौ । ततो भवन्तौ । ते भवन्त. । ततो भवन्त. । तं भवन्तम् । ततो भवन्तम् । तेन भवता । ततो भवता । तस्मै भवते । ततो भवते । तस्माद्भवत । ततो भवत. । तस्य भवत. । ततो भवतः । तस्मिन्भवति । ततो भवति । एवमायुष्मद्दीर्घायुर्देवानांप्रियैरप्युदाहार्यम् । भवदिति प्रतिषेधोक्तविज्ञानान्मतुशत्रन्तव्युदास. ।

त्रप्च ॥३।४।१५॥ भवत् आयुष्मद् दीर्घायुस् देवानाम्प्रिय इत्येतत्समानाधिकरणाद्द्व्यादिवैपुल्यात्सर्वादिकिंबहोः सर्वविभक्तयन्तात्त्रप्च प्रत्ययो वा भवति । स भवान् । तत्र भवान् । तं भवन्तम् । तत्र भवन्तम् । तेन भवता । तत्र भवता । तस्मै भवते । तत्र भवते । तस्माद्भवतः । तत्र भवतः । तस्य भवतः । तत्र भवतः । तस्मिन्भवति । तत्र भवति । एवमायुष्मद्दीर्घायुर्देवानाम्प्रियैरप्युदाहार्यम् । योगविभागश्चकारेण पुनः तस्विधानार्थः । तेन सप्तम्यन्तादपि तस् भवति । ततो भवतीति । अन्यथा हि ततः परत्वात् त्रबेव स्यात् । रूढिशब्दा इमे, ततो भवदादयः समुदायाः पूजावचना यथाकथंचिद् व्युत्पाद्यन्ते । अतएव पुनस्तयदादिरनुप्रयुज्यते । स तत्रभवान् । त तत्रभवन्तम् ।

क्वकुत्रात्रेह ॥३।४।१६॥ क्व कुत्र अत्र इह इति त्रबन्ता निपात्यन्ते । क्वेति किमः क्वादेशः त्रपश्चादेश । कुत्रेति किम एव कु-इत्यादेशः । कस्मिन् (स्निति) क्व, कुत्र । अत्रेति—एतदोऽशादेशः । एतस्मिन्नत्र । एतकस्मिन्नत्र । इहेनीदम इशादेश त्रपश्च हादेशः । अस्मिन् इह । इमकस्मिन्निह । अत्र त्रम्मात्र आदेशो विधीयते । तेन भवदादियोगेऽभवदादियोगे च भवति ।

सप्तम्याः ॥३।४।१७॥ सप्तम्यन्तादद्व्यादिवैपुल्यात् सर्वादिकिंबहोस्त्रप्प्रत्ययो भवति । सर्वस्मिन् सर्वत्र । तत्र । कुत्र । बहुषु इति बहुत्र । पकारः पुम्भावार्थ । बह्वीषु बहुत्र ।

---

१ म देवानां प्रियः प्राज्ञो मन्दो धीनामवर्जितः—इति धनञ्जयः म० टि० । २. अत्रभवान्, तत्रभवान् पूज्ये च भगवानिति । इत्यभिधानम् । अत्रभवान् भगवानिति शब्दौ विबुधैः प्रयुज्यते पूज्ये इति वैजयन्ती । म० टि० ।

किंयत्तत्सर्वैकान्यात्काले दा ॥३।४।१८॥ किं यत् तत् सर्व एक अन्य इत्येतेभ्यः सप्तम्यन्तेभ्यः काले वर्तमानेभ्यः दाप्रत्ययो भवति। कस्मिन् काले कदा। यदा। तदा। सर्वदा। एकदा। अन्यदा। काल इति किम्? क्व देशे।

सदैतर्ह्यधुनेदानीन्तदानींसद्यः ॥३।४।१९॥ सदा एतर्हि अधुना इदानीं तदानीं सद्यस् इत्येते शब्दाः काले निपात्यन्ते। सदेति सर्वशब्दात् सप्तम्यन्तात् काले वर्तमानाद्दाप्रत्ययः सभावश्च निपात्यते। सर्वस्मिन् काले सदा। सर्वदेति पूर्वविधेर्भवति। एतर्हीति इदमोर्हिप्रत्ययः एतादेशश्च। अधुनेति धुनाप्रत्ययः अधादेशश्च। इदानीमिति दानीम्प्रत्ययः इशादेशश्च। अस्मिन् काले एतर्हि अधुना, इदानीम्। तदानीमिति तदो दानीम्। तस्मिन्काले तदानीम्। तदेति पूर्वविधेः। सद्यः इति समानशब्दात् दास् सभावश्च। समाने काले सद्यः। केचित्समानेऽहनि सद्य इत्याहुः। तेषां सद्यः परेद्यव्यह्नोत्युत्तरत्र प्रक्षेपः।

परेद्यव्यह्नि ॥३।४।२०॥ परेद्यवीति परशब्दात् सप्तम्यन्तादह्नि काले वर्तमानादेद्यविप्रत्ययौ निपात्यते। परस्मिन्नहनि परेद्यवि। अह्नीति किम्? परस्मिन्वर्षे। अद्येति श्राद्धमद्यभुक्तं ठेनो इति निपातनात्सिद्धम्।

पूर्वापराधरोत्तरान्यान्यतरेतरादेद्युस् ॥३।४।२१॥ पूर्व अपर अधर उत्तर अन्य अन्यतर इतर इत्येतेभ्यः अह्नि काले वर्तमानेभ्यः एद्युस् प्रत्ययो भवति। पूर्वस्मिन्नहनि पूर्वेद्युः। अपरेद्युः। अधरेद्युः। उत्तरेद्युः। अन्येद्युः। अन्यतरेद्युः। (इतरेद्युः)

उभयद्युश्च ॥३।४।२२॥ उभयशब्दात्सप्तम्यन्तादह्नि काले द्युस्प्रत्यय एद्युस्प्रत्ययश्च। उभयस्मिन्नहनि उभयेद्युः, उभयेद्युः[2]।

परुत्परार्यैषमो वर्षे ॥३।४।२३॥ परुत् परारि ऐषमस् इत्येते शब्दा वर्षे संवत्सरे काले निपात्यन्ते। परुरिति पूर्वशब्दात् सप्तम्यन्तात् संवत्सरे वर्तमानादुनप्रत्ययस्तस्य परादेशो निपात्यते। पूर्वस्मिन् संवत्सरे परुत्। परारीति पूर्वतरशब्दादारिप्रत्ययस्तस्य च परादेशः। पूर्वस्मिन् संवत्सरे परारि। ऐषम इति इदंशब्दात् मैसिण् इदमैश्चैषादेशः। अस्मिन्संवत्सरे ऐषमः। इमकस्मिन् ऐषमः।

अनद्यतने र्हिः ॥३।४।२४॥ सप्तम्यन्तादनद्यतने काले वर्तमानाद्यथासंभवमद्यादिर्वैतुल्यात्सर्वादिकिंबहो र्हिप्रत्ययो भवति। यस्मिननद्यतने काले यर्हि। तर्हि। अन्यर्हि। अमुर्हि। कर्हि। काल इति किम्? यस्मिननद्यतने भोजने यत्र। अनद्यतन इति किम्? यस्मिन्काले यदा। अनद्यतने काले कालमात्रविवक्षायां दादिप्रत्ययो भवति। यदा। तदा। तदानीम्। सप्तम्यर्थे मात्रविवक्षाया त्रबपि भवति। अमुत्र काले।

प्रकारे था ॥३।४।२५॥ सप्तम्या इति निवृत्तम्। यथासंभवं विभक्तिः। सामान्यस्य भेदो भेदान्तरानुप्रवृत्तः प्रकारः। अस्मिन्विद्यमानादह्नादिवैतुल्यासर्वादिकिंबहोः थाप्रत्ययो भवति। सर्वेण प्रकारेण सर्वथा। यथा। तथा। बहोस्तु परत्वाद्धा भवति।

कथमित्थमुः॥३।४।२६॥ कथं इत्थं इति प्रकारे निपात्यते। कथमिति किमः थापवादः थमिपात्यते। केन प्रकारेण कथम्। इत्थमिति इदमः एतदो वा थमुप्रत्ययः। इदादेशश्च। अनेन एतेन प्रकारेण वा इत्थम्। उकार इत् त्सो चादिति प्रत्याहारार्थः।

सङ्ख्याया धा ॥३।४।२७॥ सङ्ख्यावाचिनः सुपः प्रकारे वर्तमानात् धाप्रत्ययो भवति। एकेन प्रकारेण एकधा। द्विधा। त्रिधा। चतुर्धा। पञ्चधा भुङ्क्ते। षोढा द्रव्यम्। बहुधा गुणो भवति।

---

१. उभयद्युरुपोषणम्। २. उभयेद्युरुत्सवः। म० टि०। ३. समसिण् म०। ४. -दमश्च (श्चे) शादे म०। ५. परारि संचितं वित्तं परलक्षमभोगतः। ऐषमश्चीयते यस्मात् ततः किं वा भविष्यति। म० टि०।

विचाले च ॥३।४।२८॥ विचलनं विचालः। द्रव्यस्य पूर्वसङ्ख्यायाः प्रच्युतिः सङ्ख्यान्तरापत्तिः। एकस्यानेकीभावः, अनेकस्य चैकीभावः, तस्मिन् गम्यमाने सङ्ख्यायाः सुप् धाप्रत्ययो वा भवति। एको राशिः द्वौ क्रियते द्विधा क्रियते। एकं राशिं द्वौ करोति, द्विधाकरोति। शतेन शतधा। उन्मत्तशतधाम्यर्घा तवैषोऽश्व फल्क्ष्यति। (?) अनेकः एक. क्रियते एकधा क्रियते। अनेकमेकं करोति एकधा करोति। चकार उत्तरत्र प्रकारे विचाले चेत्युभयोः समुच्चयार्थः।

वैकाज्जात्यम् ॥३।४।२९॥ एक इत्येतस्मात्सङ्ख्यावाचिनः प्रकारे वर्तमानाद्विचाले वा गम्यमाने ज्यं प्रत्ययो भवति वा। एकेन प्रकारेण ऐक्यं भुङ्क्ते। अनेकमेकं करोति ऐक्यं करोति। एकधा करोति। वाग्रहणं धार्थम्।

द्वित्रेर्ध्यमेधौ ॥३।४।३०॥ द्वि त्रि इत्येताभ्यां सङ्ख्यावाचिभ्यां प्रकारे वर्तमानाभ्यां विचाले वा गम्यमाने ध्यम् एधा इत्येतौ प्रत्ययौ वा भवतः। वचनभेदादिह यथासङ्ख्यं नेष्यते। द्वाभ्यां प्रकाराभ्यां द्वैधम्। त्रैधम्। द्वेधा। त्रेधा भुङ्क्ते। वावचनाद्धा। द्विधा। त्रिधा करोति।

तद्वति धण् ॥३।४।३१॥ द्वित्रिभ्यां सङ्ख्यावाचिभ्यां तद्वति प्रकारवति विचालवति चाभिधेये धण्-प्रत्ययो भवति। द्वौ प्रकारौ विभागौ एषां द्वैधानि। त्रैधानि। द्वैधीभाव.।

वारे कृत्वस् ॥३।४।३२॥ सङ्ख्याया इति वर्तते। वारो धात्वर्थन्यायोगपद्येन वृत्तिस्तत्कालो वा तस्मिन्वर्तमानात् सङ्ख्याशब्दस्तद्वति वारवति धात्वर्थे क्रियायामर्थे कृत्वस्प्रत्ययो भवति। पञ्च वारा अस्य पञ्चकृत्वो भुङ्क्ते। षट्कृत्वः। शतकृत्वः। सहस्रकृत्व.। भुज्यर्थो वारवानिति भुज्यर्थेऽस्येदं विशेषणम्। तद्वतीति किम् ? भोजनस्य पञ्च वाराः।

चतुस्त्रिद्वेस्सुच् ॥३।४।३३॥ चतुर् त्रि द्वि इत्येतेभ्यो वारे वर्तमानेभ्य. सङ्ख्याशब्देभ्यः तद्वति सुच्प्रत्ययो भवति। कृत्वसोऽपवाद.। चत्वारो वारा अस्य चतुर्भुङ्क्ते। त्रिर्भुङ्क्ते। द्विर्भुङ्क्ते। चकारः सुचो वेति विशेषणार्थः।

सकृत् ॥३।४।३४॥ सकृदित्येकशब्दाद्वारे वर्तमानात्तद्वत्यभिधेये सुच्प्रत्ययः सकृदिति चास्यादेशो निपात्यते। एकवार भुङ्क्ते सकृद्भुङ्क्ते।

बहोर्धास्वन्ने ॥३।४।३५॥ बहु इत्येतस्मात्सङ्ख्यावाचिन आसन्नेऽदूरेऽबप्रकृष्टे काले वारे क्रिया-प्रवृत्तौ, अविप्रकृष्टो वा तत्काले वर्तमानात्तद्वति धाप्रत्ययो भवति। बह्वाममवारं भुङ्क्ते बहुधा भुङ्क्ते। बहुधा पिबति। [1]वृणानैर्बहुधा समाग लयानुपात.। आसन्न इति किम् ? बहुकृत्वो भुङ्क्ते। आसन्नवारेऽपि वारमात्रे द्योत्ये कृत्वस्प्रत्ययो भवत्येव बहुकृत्वोऽत्र भुङ्क्ते इति। तत्रासन्नता प्रकरणादिगम्या भवति। अन्येभ्योऽपि दृश्यते। गणधा भुङ्क्ते इत्येके।

दिशो दिग्देशकालेऽतृतीयायुजः ॥३।४।३६॥ दिशः दिक्शब्दात् यो दिशि रूढस्तस्माद् दिशि देशे काले च वर्तमानात् तृतीयावर्जिताद्युष्मदभक्तश्यन्तात् स्वार्थे धाप्रत्ययो भवति। प्राची दिग्रमणीया। प्राग्रमणीयम्। प्राग्दिशो रमणीयाः। प्राग्रमणीयम्। [2]प्राक्कालो रमणीयः। प्राग्रमणीयम्। प्राच्या दिश आगतः प्रागागत.। प्राचो देशादागतः प्रागागतः। प्राचः कालात् प्रागागत.। प्राच्या दिशि। प्राचि देशे। प्राचि काले वसति। देश इति किम् ? ऐन्द्री दिक्। दिग्देशकाल इति किम् ? प्राङ्वृक्षः। अतृतीयायुज इति किम् ? प्राच्या दिशा प्रज्वलितम्। प्राचीं दिशं प्रपश्यति[3]। प्राच्यै दिशे देहि। प्राच्याः दिशः स्वम्। इलुमञ्चेरिति धाप्रत्ययश्लुक्। स्तातं विधाय यदि तस्य श्लुक् क्रियेत तदा विचियोगे स्तात्ता इति प्राप्नोति।

---

१. पुनर्वृणानैर्बहुधा समागमं तदानुयातः म०। २. प्राङ्कालो म०। ३. पश्यति म०।

परावरात्स्तात् ॥३।४।३७॥ पर अवर इत्येताभ्यां दिग्देशकालेषु वर्तमानाभ्यामतृतीयाऽयुग्विभक्तयन्ताभ्यां स्वार्थे स्तात्प्रत्ययो भवति । अपवादः । परस्ताद्रमणीयम् । परस्तादागतः । परस्ताद् वसति । अवरस्ताद्रमणीयम् । अवरस्तादागतः । अवरस्ताद् वसति ।

दक्षिणोत्तराद्धातस् ॥३।४।३८॥ दक्षिण उत्तर इत्येताभ्यां दिग्देशकालेषु वर्तमानाभ्यां तृतीयावर्जितायुग्विभक्तयन्ताभ्यां अतस्प्रत्ययो भवति । चकारात्परावराभ्यां च । दक्षिणशब्दः काले न सम्भवतीति दिग्देशवृत्तिर्गृह्यते । दक्षिणतो रमणीयम् । दक्षिणत आगतः । दक्षिणतो वसति । उत्तरतो रमणीयम् । उत्तरत आगतः । उत्तरतो वसति । परतो रमणीयम् । परत आगतः । परतो वसति । अवरतो रमणीयम् । अवरत आगतः । अवरतो वसति । अकारस्तसोऽस्य भेदार्थः । तेनातः क्वेहामातस्त्रास्त्यजिति त्यज् न भवति । परतो भवं पारतम् ।

अधराद्धात् ॥३।४।३९॥ अवरशब्दाद्दिग्देशकालवृत्तेस्तृतीयाऽयुग्विभक्तयन्तादातप्रत्ययो भवति । चकारादक्षिणोत्तराभ्यां च । अधराद्रमणीयम् । अधरादागतः । अधराद्वसति । दक्षिणाद्रमणीयम् । दक्षिणादागतः । दक्षिणाद्वसति । उत्तराद्रमणीयम् । उत्तरादागतः । उत्तराद्वसति ।

पश्चोऽपरस्य दिगादेश्चाति ॥३।४।४०॥ अवरशब्दस्य दिग्वाचिनः प्रकृतेराद्यवयवात् परस्य च आतिप्रत्यये परे पश्चादेशो भवति । अपवादः प्रत्ययोऽनेव निमित्तत्वेनोपादानात् । विज्ञायते अपरा दिग्देशः कालो वा । पश्चाद्रमणीयम् । पश्चादागतः । पश्चाद्वसति । दिगादेः—दक्षिणा परा दिग्देशो वा दक्षिणपश्चाद्रमणीयम् । दक्षिणपश्चादागतः । दक्षिणपश्चाद्वसति । उत्तरपश्चाद्रमणीयम् । उत्तरपश्चादागतः । उत्तरपश्चाद्वसति ।

वोत्तरपदेऽर्धे ॥३।४।४१॥ अवरशब्दस्य केवलस्य दिग्वाचिनः समासाद्यवयवात्परस्य चार्धशब्दे उत्तरपदे पश्चादेशो वा भवति । अपरमर्धम् अपरार्धम् । पश्चार्धम् । दक्षिणावरस्यार्धः दक्षिणपश्चार्धः । दक्षिणापरार्धः । उत्तरपश्चार्धः । उत्तरापरार्धः । उत्तरपद इति किम् ? अपरार्धः शोभते । असमासोऽयम् । समासे एतद्भवति । पूर्वपदमुत्तरपदमिति दिशो दिग्देशकाले । तृतीयायुज इति प्रत्ययविधौ विशेषणं नादेश इत्यर्धशब्द आदेशः अविशेषेण विज्ञायते ।

पुर पुरस्तादवोऽवस्ताद्धोऽधस्तादुपर्युपरिष्टात् ॥३।४।४२॥ पुरस् पुरस्तात् अवस् अवस्तात् अधस् अधस्तात् उपरि उपरिष्टात् इत्येते शब्दा निपात्यन्ते । पुरः पुरस्तादिति पूर्वशब्दाद्दिग्देशकालवृत्तेरतृतीयायुग्विभक्त्यन्तात् । अपवादः । अस् अस्तादित्येतौ प्रत्ययौ तस्य च पुरादेशो निपात्यते । पुरो रमणीयं पुरस्ताद्रमणीयम् । पुर आगतः पुरस्तादागतः । पुरो वसति पुरस्ताद्वसति । अवोऽवस्तादिति अवरशब्दात् अस् अस्तादित्येतौ प्रत्ययौ अवादेशश्च । अवो रमणीयम् अवस्ताद्रमणीयम् । अव आगतः अवस्तादागतः । अवो वसति अवस्ताद्वसति । एवमवरशब्दस्य चातूरूप्यं भवति । अधोऽधस्तादिति अवरशब्दादसस्तातौ अधादेशश्च । अधो रमणीयम् । अधस्ताद्रमणीयम् । अध आगतः । अधस्तादागतः । अधो वसति । अधस्ताद्वसति । एवमधरशब्दस्य त्रैरूप्यम् । उपर्युपरिष्टादिति । ऊर्ध्वशब्दाद् रिरिष्टादित्येतौ प्रत्ययौ तस्य च उप इत्ययमादेशः । उपरि रमणीयम् । उपरिष्टाद्रमणीयम् । उपर्यागतः । उपरिष्टादागतः । उपरि वसति । उपरिष्टाद् वसति । स्ताद्यस्तादिति प्रत्ययान्तरकरणमवरार्थं स्तादवादेशो नास्ति । अस्तात् तिशुतु भवतीत्यवरस्तादवस्तादिति रूपद्वयं सिद्धं भवति । अन्यथा हि परावरात् स्तादित्यवरग्रहणमुत्तरार्थं स्यादिति रूपभेदो न लभ्यते उत्तरत्र चाकृतिरुत्तरत्राननुवृत्त्यर्था स्यात् । उपरिष्टादिति द्वितकारको निर्देशः । तत्रैकस्तकार इत् स्तास्ता इति प्रत्याहारार्थम् ।

दक्षिणाद्भाऽपञ्चम्याः ॥३।४।४३॥ दक्षिणशब्दात्पञ्चमीतृतीयावर्जिताद् अयुग्विभक्त्यन्ताद्दिग्देशवृत्तेराप्रत्ययो भवति वा । दक्षिणा रमणीयम् । दक्षिणा वसति । दक्षिणतो रमणीयम् । दक्षिणतो वसति । दक्षिणाद् रमणीयम् । दक्षिणाद्वसति । पञ्चम्याः सावकाशत्वात् स्तातावपञ्चम्यामाकारो बाधेतेति वा ग्रहणम् । अपञ्चम्या इति किम् ? दक्षिणत आगतः । दक्षिणादागतः ।

आहि दूरे ॥३।४।४४॥ दिक्शब्दा अवध्यपेक्षास्तत्रावधेर्दूरे दिशि देशे वा वर्तमानात् पञ्चमीतृतीया वर्जितायुग्विभक्त्यन्तादक्षिणशब्दाद् आ आहि इत्येतौ प्रत्ययौ भवतः। ग्रामाद्दूरा दक्षिणा दिग् रमणीया देशो वा, ग्रामाद् दक्षिणा रमणीयम्। दक्षिणाहि रमणीयम्। दक्षिणा वसति, दक्षिणाहि वसति। दूर इति किम्? दक्षिणतः, दक्षिणात् दक्षिणा रमणीयम्। दक्षिणशब्दादाप्रत्ययो दूरतां प्रकरणादिनि(र)पेक्षो न द्योतयति। सामान्येऽपि विधानात्। प्रकरणाद्यपेक्षायां सामान्यशब्दत्वेऽपि सिद्ध्यति। तत्राकारग्रहणं सामान्यबाधायां दूरार्थमुत्तरार्थं च। अपञ्चम्या इति किम्? दक्षिणत आगत। दक्षिणादागतः।

उत्तरात् ॥३।४।४५॥ उत्तरशब्दात्पञ्चमीतृतीयावर्जितायुग्विभक्त्यन्तादा आहि इत्येतौ प्रत्ययौ वा भवतः। उत्तरा रमणीयम्। उत्तराहि रमणीयम्। उत्तराहि वसति। उत्तरतः उत्तरात्। वाग्रहणमतसादिबाधनार्थं वर्तते। अपञ्चम्या इति किम्? उत्तरत। उत्तरादागत। योगविभागादिह दूर इति नास्ति।

एनोऽदूरे ॥३।४।४६॥ दिग्देशकाले तृतीया युज इति वर्तते। अपञ्चम्या इति च नोत्तरादिति दिक्छब्दादवधेरदूरे दिग्देशकाले वर्तमानात् पञ्चमीतृतीयावर्जितायुग्विभक्त्यन्तात् स्वार्थे एनप्रत्ययो भवति अस्मात्पूर्वा अदूरादि ग्रामणीयादेशः कालो वा। पूर्वेणास्य रमणीयम्। पूर्वेणास्य वसति। अपरेणास्य रमणीयम्। अपरेणास्य वसति। दक्षिणेन। उत्तरेण। अदूर इति किम्? पुरो रमणीयम्। पुरो वसति। अपञ्चम्या इति किम्? पुर आगतः। अदूरेऽपि दिग्देशकालमात्रे द्योत्ये सामान्यप्रत्यया भवन्त्येव। तत्र अदूरता प्रकरणादिगम्या भवति।

ध्लुगञ्चेः ॥३।४।४७॥ पञ्चम्यन्तादिक्छब्दाद्दिग्देशे काले वर्तमानादृतीयायुग्विभक्त्यन्ताद्यः प्रत्ययो विहितः घा एनो वा तस्य ध्लुग्भवति। प्राची दिगदूरा वा रमणीया देशः कालो वा। प्राग् रमणीयम्। प्रागागतः। प्राग्वसति। प्रत्यक्। अवाक्। उदक्। दिग्वृत्तेः स्त्रीप्रत्ययस्य लुप्यगोणी मूच्योष्यत इति लुक्।

तीयशम्बबीजात् कृषौ कृञा डाच् ॥३।४।४८॥ तीयप्रत्ययान्तात् शम्ब बीज इत्येताभ्यां च सुबन्ताभ्या कृञा योगे कृषिविषये डाच्प्रत्ययो भवति। द्वितीयाकरोति क्षेत्रम्। द्वितीयं वारं कृषतीत्यर्थः। तृतीया करोति क्षेत्रम्। तृतीयं वारं कृषतीत्यर्थ। शम्बाकरोति क्षेत्रं पुनस्तिर्यक् कृषतीत्यर्थ.। शम्बेन कृषतीत्येके अन्ये शम्बाकरोति कुलीवमित्युदाहरन्ति। लोहं कुञ्ची वर्द्धकुण्डलिका वा शम्बं तत्कुलीवस्य करोतीत्यर्थः। बीजाकरोति क्षेत्रम्। उप्ते पश्चाद् बीजैः सह कृषतीत्यर्थः। अन्ये क्षेत्रस्य बीजं करोति वपतीत्यर्थः इत्याहुः। द्वितीयाकरोतीत्यादयो मुण्डयतीत्यादिवत् क्रियाशब्दास्तेषां क्षेत्रादिकर्मत्वेन विज्ञायते। कृषाविति किम्? द्वितीयं करोति पदम्। कृञ इति किम्? द्वितीय वार कृषति। डाजिति चकार. डाच्यूर्यादिति विशेषणार्थः।

सङ्ख्यादेर्गुणात् ॥३।४।४९॥ सङ्ख्याया: आद्यवयवात् परो यो गुणशब्दस्तदन्तात्कृञा योगे कृषिविषये डाच्प्रत्ययो भवति। द्विगुणाकरोति क्षेत्रम्। त्रिगुणाकरोति क्षेत्रम्। क्षेत्रस्य द्विगुणं त्रिगुणं च विलेखनं करोतीत्यर्थः। कृषाविति किम्? द्विगुणा करोति रज्जुम्।

सपत्रनिष्पत्रादतिपीडने ॥३।४।५०॥ सपत्र निष्पत्र इत्येताभ्यामतिपीडने गम्यमाने कृञा योगे डाच्प्रत्ययो भवति। सपत्राकरोति मृगम्। पत्रं शर.; सह पत्रमनेनेति सपत्रः तं करोति शरमस्य शरीरे प्रवेशयतीत्यर्थ.। निष्पत्राकरोति निर्गतं पत्रमस्मादिति निष्पत्रः तं करोति शरमस्यापरपार्श्वेन निष्क्रमयतीत्यर्थ.। सपत्राकरोति वृक्षं वायुः। निष्पत्राकरोति वृक्षं वायुः। अत्र पत्रशातनमेवातिपीडनम्। सपत्राकरोतीत्यपि मंगलाभिप्रायेण वृक्षस्य निष्पत्राकरणमेवाख्यायते। यथा दोषो नन्दतीति विध्वंसः। अतिपीडन इति किम्? सपत्रं करोति वृक्ष[२] जलसेक.। निष्पत्रं करोति वृक्षं भूमिशोधकः।

---

१. सहस्रपत्रमनेनेति क० म०। १. वृक्षतलं क० म०।

भद्रभद्राभ्यां मुण्डने ॥३।४।५१॥ भद्र भद्र इत्येताभ्यां मुण्डने वर्तमानाभ्यां कृञो योगे डाच्प्रत्ययो भवति। भद्रं मुण्डनं करोति भद्राकरोति शिरः। भद्राकरोति शिरः। भद्रभद्रशब्दौ माङ्गल्यवचनौ। मुण्डन इति किम्? भद्रं करोति। भद्रं करोति।

प्रियसुखादानुकूल्ये ॥३।४।५२॥ प्रिय सुख इत्येताभ्यामानुकूल्ये वर्तमानाभ्यां कृञो योगे डाच्-प्रत्ययो भवति। प्रियाकरोति देवदत्तम्। सुखाकरोति देवदत्तम्। देवदत्तस्यानुकूल्यं करोति अनुकूलमाचरति। तमाराधयतीत्यर्थः। आनुकूल्य इति किम्? प्रियं करोति सुखं करोति तिक्तौषधपानम्।

दुःखनिष्कुलशूलसमयसत्यात्प्रातिकूल्यनिष्कोषपाकयापनाऽशपथे॥३।४।५३॥ दुःख निष्कुल शूल समय सत्य इत्येतेभ्यो यथासंख्यं प्रातिकूल्य निष्कोषे पाके यापनायामशपथे च विषये कृञो योगे डाच्प्रत्ययो भवति। दुःखात्प्रातिकूल्ये—दुःखाकरोति देवदत्तम्। देवदत्तस्य प्रातिकूल्यं करोति प्रतिकूलमाचरति तं चित्तेऽनभिमतानुष्ठानेन पीडयतीत्यर्थः। प्रातिकूल्य इति किम्? दुःखं करोत्यशनम्। निष्कुलान्निष्कोषे—निष्कुलाकरोति दाडिमम्। निष्कुलमातीत्यर्थः। अन्तरवयवानां बहिष्करणं निष्कोषः। निष्कोष इति किम्? निष्कुलं करोति शत्रुम्। शूलात् पाके—शूलाकरोति मांसम्। शूले पचतीत्यर्थः। पाक इति किम्? शूलं करोति कदन्नम्। समयाद्यापनायाम्—समयाकरोति तन्तुवायः। अद्यश्वस्ते पटं दास्यामीति कालक्षेपं करोतीत्यर्थः। यापनायामिति किम्? समयं करोति। सत्यादशपथे—सत्याकरोति वणिक् भाण्डम्। कार्षापणदानेन भाण्डं ग्रहीष्यामीति निश्चाययतीत्यर्थः। अशपथ इति किम्? सत्यं करोति यदीदमेवं न स्यादिदं मे इष्टं माभूदनिष्टं वा भवत्विति शपथं करोतीत्यर्थः।

अनेकाचोऽव्यक्तानुकरणात् कृभ्वस्तिभ्यां द्विश्च ॥३।४।५४॥ अनेकोऽच् यस्य तस्मादव्यक्त-स्यानुकरणात्कृञ् भू अस्ति इत्येताभ्यां च धातुभ्यां योगे डाच्प्रत्ययो भवति वा द्विश्चास्य प्रकृतिरुच्यते प्रत्ययस्य द्विर्वचनानर्थक्यात्। डाच्यादाविति वचनाच्च प्रकृतेरेव द्विर्वचनम्। पटत्करोति। पटपटाकरोति। पटपटाभवति। पटपटास्यात्। दमत्करोति दमदमाकरोति। दमदमाभवति। दमदमास्यात्। मसत्करोति मसमसाकरोति। मसमसाभवति। मसमसास्यात्। खरटत्करोति खरटखरटाकरोति। खरटखरटाभवति। खरटखरटास्यात्। अनेकाच इति किम्? श्रत्करोति। [1]खात्करोति। अव्यक्तानुकरणादिति किम्?[2] दृषत्करोति। अत्र व्यक्त-वर्णमनुकार्यम् अव्यक्तवर्णस्यापि कथञ्चित् ध्वनिमात्रसादृश्यात् व्यक्तवर्णमनुकरणं भवति। कृभ्वस्तिभ्यामिति किम्? पटं(टी)यति। भूश्च अस्तिश्च। कृ च भ्वस्ति च कृभ्वस्तिनी ताभ्यां कृभ्वस्तिभ्यामिति द्वित्वनिर्देशः। उत्तरत्र कर्मकर्तृभ्यामिति यथासंख्यार्थः। पटिति करोति इत्यत्र पट इत्यस्येति नायोगो न करोतिना, इतिस्तु करोतिनेति न भवति।

कर्मकर्तृभ्यां प्रागतत्त्वे च्विः ॥३।४।५५॥ कृकर्मणो भ्वस्तिकर्तुश्च प्राक्पूर्वमतस्य तत्त्वे गम्यमाने कृञा भ्वस्तिभ्यां च योगे च्विप्रत्ययो भवति। शुक्लीकरोति पटम्। प्रागशुक्लं पटमिदानीं शुक्लं करोतीत्यर्थः। शुक्लीभवति पटः। प्रागशुक्लः पटः। इदानीं शुक्लो भवतीत्यर्थः। शुक्ली स्यात्पटः, प्रागशुक्लः इदानीं शुक्लः स्यादित्यर्थः। एवं कारकीकरोति देवदत्तम्। कारकीभवति देवदत्तः। कारकी-स्यात् देवदत्तः। दण्डीकरोति देवदत्तम्। दण्डीभवति देवदत्तः। दण्डीस्यात् देवदत्तः। घटीकरोति मृदम्। घटीभवति मृत्। घटीस्यात् मृत्। पटीकरोति तन्तून्। पटीभवन्ति तन्तवः। पटीस्युः तन्तवः। संधीकरोति गाः। संधीभवन्ति गावः। संधीस्युः गावः। कर्मकर्तृभ्यामिति किम्? प्रागदेवकुल इदानीं देवकुले करोति। प्रागदेवकुले करोति। प्रागदेवकुल इदानीं देवकुले भवति। समीभवति। अभ्यासीभवतीति। ताच्छील्याद्भवति। प्रागतत्त्व इति किम्? शुक्लं करोति। शुक्लीभवति। शुक्लः स्यात्। प्राग्ग्रहणं किम्?

---

१. वणिक्मूलधनेऽभत्रे भाण्डं भूषाऽलंभूषयोः इति वैजयन्तो, क० म० टि०। २. खाट् करोति क० म०।

अशुक्लं करोति शुक्लम्। एककालमतत्त्वेन भवति। भवति क्रियेको भावः कश्चिदेककालं शुक्लोऽशुक्लश्च देशभेदेन। कृभ्वस्तिभ्यामिति किम्? अशुक्लं शुक्लं सम्पादयति। अशुक्लः शुक्लः सम्पद्यते।

चेतोमनोरहोरजोऽरुक्षचक्षुषो लुक्च्वौ ॥३।४।५६॥ चेतस् मनस् रहस् रजस् अरुस् चक्षुष् इत्येतेषां च्वौ परे लुग्भवति। चेतीकरोति। चेतीभवति। चेतीस्यात्। विचेतीकरोति। विचेतीभवति। विचेतीस्यात्। मनीकरोति। मनीभवति। मनीस्यात्। उन्मनीकरोति। उन्मनीभवति। उन्मनीस्यात्। रहीकरोति। रहीभवति। रहीस्यात्। विरहीकरोति। विरहीभवति। विरहीस्यात्। रजीकरोति। रजीभवति। रजीस्यात्। विरजीकरोति। विरजीभवति। विरजीस्यात्। अरूकरोति। अरूभवति। अरूस्यात्। महारूकरोति। महारूभवति। महारूस्यात्। चक्षूकरोति। चक्षूभवति। चक्षूस्यात्। उच्चक्षूकरोति। उच्चक्षूभवति। उच्चक्षूस्यात्। च्वाविति किम्? मनःकरोति। च्विर्विधिः। सर्वविशेषणसंबन्धेऽप्येषां[1] च्विसन्नियोगे लुग्विज्ञाने विचेतीकरोति इत्यादौ न स्यात्। चेत आदीनां[2] वृत्तिपदानां च्वि तत्संबन्धाभावात्। तदन्तविज्ञाने केवलानां न स्यात्। उपादानात् केवलानां तदन्तविधिना च तदन्तानां च प्रतिपत्तिगौरवपरिहारार्थं च्विग्रहणम्।

इसुसोर्बहुलम् ॥३।४।५७॥ इस् उस् इत्येवमन्तस्य च्वौ परे बहुलं[3] लुग्भवति। सर्पीर्भवति नवनीतम्। धनूर्भवति दण्डः। न च भवति सर्पिर्भवति। धनुर्भवति। बहुलग्रहणं प्रयोगानुसरणार्थम्।

हलः ॥३।४।५८॥ हलन्तस्य च्वौ परे बहुलमिगागमो भवति। दृषदीभवति। शिलासमिधीभवति काष्ठम्। न च भवति। दृषद्भवति। समिद्भवति।

व्याप्तौ सात् ॥३।४।५९॥ कृभ्वस्तिभ्यो योगे कर्मकर्तृभ्यो प्रागतत्तत्त्व इति वर्तते। एतस्मिन्विषये सात्प्रत्ययो भवति। व्याप्तौ, प्रागतत्तत्त्वस्य चेद्व्याप्तिः, सर्वात्मना द्रव्येणाभिसम्बन्धो गम्येत। सर्वं काष्ठं प्रागग्निमग्निं करोति अग्निसात्करोति काष्ठम्। अग्निसाद्भवति। अग्निसात्स्यात्। उदकसात्करोति लवणम्। उदकसाद्भवति। उदकसात्स्यात्। व्याप्ताविति किम्? अग्नीकरोति काष्ठम्। अग्नीभवति काष्ठम्। सत्यामपि वस्तुनि व्याप्तौ प्रागतत्तत्त्वभावे द्विर्भवत्येव। तत्र व्याप्तिः प्रकरणादिगम्या भवति।

जातेः सम्पदा च ॥३।४।६०॥ कृभ्वस्तिभिः सम्पदा च योगे कृकर्मणो भ्वस्तिकर्तुः सम्पदिति कर्तुश्च प्रागतत्तत्त्वे जातेः सामान्यस्य व्याप्तौ सात्प्रत्ययो भवति। अस्या सेनाया सर्वं शस्त्रम् अग्निसात्करोति दैवम्। अस्या सेनाया सर्वं शस्त्रम् अग्निसाद्भवति। अग्निसात्स्यात्। अग्निसात्सम्पद्यते। वर्षासु सर्वं लवणमुदकसात्करोति देव। उदकसाद्भवति। उदकसात्स्यात्। उदकसात्सम्पद्यते। यथैकस्य द्रव्यस्य सर्वावयवाभिसम्बन्धे प्रागतत्तत्त्वस्य व्याप्तिर्भवति तथा जातेः। सामान्यस्य सर्वव्यक्त्यभिसम्बन्धे भवति। कृभ्वस्तियोगे पूर्वेणैव सात्सिद्धः। व्याप्ताविति सामान्योपादानात् सम्पद्यर्थं वचनम्। चकार उत्तरत्र उभयोः समुच्चयार्थः।

तत्राधीने ॥३।४।६१॥ कर्मकर्तृभ्यो प्रागतत्तत्त्व इति निवृत्तम्। कृभ्वस्तिभ्यो सम्पदा चेति वर्तते। तत्रेति सप्तम्यन्तादधीते आयत्तेऽर्थे कृभ्वस्तिसम्पद्भिर्योगे सात्प्रत्ययो भवति। राजन्यधीनं करोति राजसात्करोति। राजसाद्भवति। राजसात्स्यात्। राजसात्सम्पद्यते। आचार्यसात्करोति। आचार्यसाद्भवति। आचार्यसात्स्यात्। आचार्यसात्सम्पद्यते।

देये त्रा च ॥३।४।६२॥ तत्रेति सप्तम्यन्तादेयोपाधिक अधीनेऽर्थे कृभ्वस्तिसम्पद्भिर्योगे त्राप्रत्ययो भवति। राजन्यधीनं देयं करोति राजत्राकरोति द्रव्यम्। राज्ञि दातव्यमिति यत्स्वापितं तदिदानीं राज्ञे ददातीत्यर्थः। राजन्यधीनं देयं भवति राजत्राभवति। राजत्रास्यात्। राजत्रासम्पद्यते। गुरुत्राकरोति। गुरुत्राभवति। गुरुत्रास्यात्। गुरुत्रासम्पद्यते। देय इति किम्? राजसाद्भवति राष्ट्रम्। देयेऽपि वस्तुन्यधीनता मात्रे

---

१ सम्बन्धेनैषां क० म०। २. वर्ति क० म०। ३ लुग्लोपो भवति म०।

पूर्वेण साद्धुरत्येव । तत्र विशेषाधिगमः प्रकरणादिना भवति । चकारः कृञ्श्रस्तिभ्यां समादा चेत्यस्यानुकर्षणार्थः । तेनोत्तरत्र नानुवर्तते ।

देवादिभ्यः सप्तमीद्वितीयात् ॥३।४।६३॥ देवादिभ्यः सप्तम्यन्तेभ्यो द्वितीयान्तेभ्यश्च स्वार्थे त्राप्रत्ययो वा भवति । देवेषु वसति देवत्रावसति । देवान् गच्छति देवत्रागच्छति । मनुष्येषु वसति मनुष्यत्रावसति । मनुष्यान् गच्छति मनुष्यत्रागच्छति । पुरुषेषु वसति पुरुषत्रावसति । पुरुषान् गच्छति पुरुषत्रागच्छति । पुरुषु वसति पुरुत्रावसति । पुरून् गच्छति पुरुत्रागच्छति । मर्त्येषु वसति मर्त्यत्रावसति । मर्त्यान् गच्छति मर्त्यत्रागच्छति । बहुषु वसति बहुत्रावसति । बहून् गच्छति बहुत्रागच्छति । देवादयः शिष्टेभ्योऽवगन्तव्याः ।

बहुल्पार्थात्कारकाच्छस्यनिष्टे ॥३।४।६४॥ बहुर्यादल्पार्थाच्च कारकाभिधायिनः शब्दात्सुबन्ताच्छसि प्रत्ययो भवति यथाक्रममिष्टेऽनिष्टे च विषये । कारकं क्रियानिर्वर्तकं[2] कर्मोच्यते । बहुधनं ददाति । बहुशो धनं ददाति विवाहे । बहून् कार्षापणान् ददाति बहुशः कार्षापणान् ददाति विवाहे । बहुभिर्भुक्तमतिथिभिः । बहुशो भुक्तमतिथिभिः । बहुभ्योऽतिथिभ्यो ददाति । बहुशोऽतिथिभ्यो ददाति । बहुभ्यो ग्रामेभ्यः आगच्छति । बहुशो ग्रामेभ्य आगच्छति । बहुषु ग्रामेषु वसति । बहुशो ग्रामेषु वसति । एवं भूरिश.[3] । प्रभूतशः । अल्पार्थात्—अल्पं ददाति अल्पशो ददाति धनम् । श्राद्धे अल्पैर्भुक्तम् अल्पशो भुक्तम् । अल्पेभ्यो ददाति अल्पशो ददाति । अल्पेभ्य आगत अल्पश आगतः । अल्पेषु वसति अल्पशो वसति । एवं स्तोकशः । कतिपयशः । कारकादिति किम् ? बहूना स्वामी । इष्टानिष्ट इति किम् ? बहूनि ददाति श्राद्धादिष्वनिष्टेषु । अल्पानि प्राशित्रादिष्विष्टेषु कर्मसु । केचिद्बहुलग्रहणमल्पार्थवाचिनोऽपि ग्रहणं न वैपुल्येषदर्थवाचिनोरित्याहुः । तद्बहुशो ददाति धनमिति पदशेषाद्युदाहरणेन विरुद्धयेते । शसीति इकारः "तस्वन्कामषण्तसि" इति प्रत्याहारार्थः ।

संख्यैकाद्वीप्सायाम् ॥३।४।६५॥ संख्यावाचिन. एकत्ववर्जितसंख्यार्थवाचिनश्च कारकाभिधायिनः शब्दात्सुबन्ताद्वीप्सायां द्योत्यायां शसिप्रत्ययो भवति । वाधिकारात् द्विर्वचनमपि भवति । एकैकं ददाति एकशो ददाति । द्वौ द्वौ द्विशः । त्रिशः । तावच्छः । कतिशः । एकैकेन दीयते एकशो दीयते । द्वाभ्यां द्वाभ्यां द्विशः । त्रिशः । तावच्छः । कतिश. । एकार्थवाचिनः । माषं माषं देहि माषशो देहि । कार्षापणशः । पादशः । पणश. । प्रस्थशः । द्रुघ्नशः । क्रमेण क्रमेणागच्छन्ति क्रमश आगच्छन्ति । संख्यैकादिति किम् ? माषो माषो ददाति । वीप्सायामिति किम् ? द्वौ ददाति । माष ददाति । तानेकैकशः पृच्छदेकैकशो ददाति । वीप्सायां द्विरुक्तात्प्रवेणालमर्थादिति शम् । वीप्सितवीप्सायां वा । कारकादिति किम् ? द्वाभ्यां द्वाभ्यां सह भुङ्क्ते । माषस्य माषस्य स्वामी ।

संख्यादेः पादादिभ्यो दानदण्डे च वुच्लुकच्च ॥३।४।६६॥ संख्यायाः प्रकृत्याद्यवयवात् परे ये पादादय. तदन्ताच्छब्दाद्दाने दण्डे वीप्सायां च विषये वुच्प्रत्ययो भवति । तत्सन्नियोगे प्रकृतेश्च लुग्भवति । द्वौ पादौ ददाति द्विपदिका ददाति । त्रिपदिकां ददाति । द्विशतिकाम् । त्रिशतिकाम् । द्विमोदकिकाम् । त्रिमोदकिकाम् । दण्डे—द्वौ पादौ दण्डितः द्विपदिका दण्डित. । त्रिपदिकाम् । द्विशतिकाम् । त्रिशतिकाम् । द्विमोदकिकाम् । त्रिमोदकिकाम् । वीप्सायां द्वौ द्वौ पादौ भुङ्क्ते द्विपदिकाम् । त्रिपदिकाम् । द्विशतिकाम् । त्रिशतिकाम् । द्विमोदकिकाम् । त्रिमोदकिकाम् । संख्यादेरिति किम् ? पादं ददाति । पादं दण्डितः । पादं पादं भुङ्क्ते । पादादिभ्य इति किम् ? द्वौ द्वौ माषौ ददाति । दानदण्डे चेति किम् ? द्वौ पादौ भुङ्क्ते । चकारो वीप्सायामित्यस्यानुकर्षणार्थः । वुचश्चकारः वोरक इत्यत्र सामान्यग्रहणविघातार्थः । लुक्चेति लुग्वचनं पादः पदर्थम् । एरिति लुक् परनिमित्तेति तत्र स्थानिवद्भावान्न स्यात् । पादादयः शिष्टेभ्योऽनुसर्तव्याः ।

प्रकृते मयट् ॥३।४।६७॥ प्राचुर्येण प्राधान्येन वा कृतं प्रकृतम् । प्रकृतेऽर्थे वर्तमानाच्छब्दरूपात् स्वार्थे मयट्प्रत्ययो भवति । अन्नं प्रकृतं अन्नमयम् । घृतमयम् । दधिमयम् । पूजायाम्-यवागूमयम् । यवागूमयी । स्वार्थिकानां प्रत्ययानां प्रकृतिलिङ्गवचनातिवृत्तिरपि भवति । प्रकृत इति किम् ? अन्नम् । घृतम् ।

---

१. -भ्योऽधिगन्तव्याः क० म० । २. षट्कारकीत्यर्थः । सम्प्रदानमपादानं करणाधिकरणं तथा । स्याद्याश्रितं कर्ता च सेयं षट्कारकी स्मृता क० म० टि० । ३. -शः, प्रभूरिशः, प्रभू—क० म० ।

अस्मिन् ॥३।४।६८॥ प्रकृतेऽर्थे वर्तमानाच्छरदादस्मिन्निति सप्तम्यर्थे मयट्प्रत्ययो भवति। अन्नं प्रकृतमस्मिन्नन्नमयं भोजनम्। घृतमयी पूजा।

तयोः समूहवच्च बहुषु ॥३।४।६९॥ तयोः प्रकृते मयट् अस्मिन् इत्येतयोर्विषययोर्बहुषु वर्तमानात् समूहवच्च प्रत्ययो भवति। मयट् च। आपूपाः प्रकृताः आपूपिकम्। आपूपमयम्। मौदकिकम्। मोदकमयम्। आपूपाः प्रकृता अस्मिन् आपूपिकं पर्व[1]। आपूपमयं पर्व। मौदकिकी पूजा। मोदकमयी पूजा। गणिकाः प्रकृता अस्यां यात्रायां गाणिक्या[3]। गणिकामयी यात्रा। अश्वीया[4]। अश्वमयी यात्रा। तयोरिति योगद्वयविषयनिर्देशार्थम्। अन्यथा अस्मिन्नित्येतयैव स्यात्।

निन्द्ये पाशप् ॥३।४।७०॥ निन्द्येऽर्थे वर्तमानात् सुबन्तात्स्वार्थे पाशप्प्रत्ययो भवति। निन्द्यो वैयाकरण वैयाकरणपाशः। तार्किकपाशः। प्रत्यासत्तेः शब्दप्रवृत्तिनिमित्तनिन्दायामयं प्रत्ययः। इह न भवति। कुशीलो वैयाकरणः। पकारः पुम्भावार्थः। कुमारपाशा। किशोरपाशा। कुमारादयो वयोवचनाः, न कुमारपाशादयः। एते हि निन्द्यवचना[6] इति ङो न भवति।

निङश्च प्रकृष्टे तमप् ॥३।४।७१॥ तिङन्तात् सुबन्ताच्च प्रकृष्टे प्रकर्षवत्यर्थे वर्तमानात्स्वार्थे तमप्प्रत्ययो भवति। तिङ्. सर्व एते[7] पचन्ति अयमेषां प्रकृष्टं पचति पचतितमो देवदत्तः। पचतस्तमाम्। पचन्तितमाम्। सुप्, सर्व इमे शुक्लाः अयमेषां प्रकृष्टः शुक्ल शुक्लतमः। आढ्यतमः। सुकुमारतमः। कारकतमः। साधकतमः। गोतमो यः शकटं वहति सीरं च। सूक्ष्मवस्त्रतमो येषां सूक्ष्मतमानि वस्त्राणि। प्रधानमयं ग्रामः। प्रधानतमोऽयं ग्रामः। आढ्यं नगरं आढ्यतमोऽयं नगरम्। पाकशौकल्यादयः प्रकर्षाप्रकर्षवन्तः, तत्र प्रकर्षवति प्रकर्षप्रत्ययः, प्रकर्षप्रत्ययान्तात्प्रकृष्टप्रकर्षेषु पुनः प्रकर्षप्रत्ययो भवति। यथा युधिष्ठिरः श्रेष्ठतमः कुरूणामिति। तरबन्तात्तु तरप् न भवति। अनभिधानात्। तथा यथापूर्वपदातिशये पूर्वपदाद् बहुव्रीहेरिष्ठातिशायिकः। सूक्ष्मतमवस्त्र सूक्ष्मतमवस्त्र इति न तथोत्तरपदातिशये बहुव्रीहेः. वस्त्रं ढ्यतमो वस्त्राढ्यतमकः, इत्यतिशायिकान्तेन बहुव्रीहिः। पकारस्तमपः पुम्भावार्थः। शुक्लतमा शाटी।

द्वयोर्विभज्ये च तरप् ॥३।४।७२॥ द्वयोस्तद्गुणयोरर्थयोर्मध्ये यः प्रकृष्टस्तस्मिन् विभज्ये विभक्तव्ये च प्रकृष्टेऽर्थे वर्तमानात्तिङन्तात् सुबन्ताच्च तरप्प्रत्ययो भवति। तमपोऽपवादः। द्वाविमौ पचतः, अयमनयोः प्रकृष्टं पचति पचतितरम्। पठतितरम्। पचतेतरम्। अधीतेतरम्। द्वाविमौ पटू अयमनयोः प्रकृष्टं पटुः पटुतरः। अयमनयोः सुकुमारतरः। पाचकतरः। गोतरो यः शकटं वहति सीरं च। गोतरा या समा समा विजायते। स्त्रीवत्सा च भवति। दन्तोष्ठस्य दन्ताः स्निग्धतराः। पाणिपादस्य पाणी सुकुमारतरौ। समाहारेऽवयवो स्वार्थमात्रमुपादाते न संख्याभेदमिति द्वयोरेव प्रकर्षः। अस्माकं च देवदत्तस्य च देवदत्तोऽभिरूपतरः, अस्माकमित्येकस्यैव बहुवद्भावः। पर्यायार्थापणया द्वित्वम्। विभज्येति ङः। साकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा[10]। पचन्तितरम्। पठन्तितरम्। सुपः—साकाश्यकेभ्यः पाटलीपुत्रका आढ्यतराः। अभिरूपतराः। साकाश्यकेभ्यः पाटलीपुत्रकेभ्यश्च माथुरा आढ्यतरा अभिरूपतराः। साकाश्यकादिषु पाटलीपुत्रकादीनामविशेषाद्विभागः। तद्विशेषणमाढ्याद्यर्थम्। प्रकृष्टं विभज्यम्। द्वयोर्विभज्ये चेति किम्? कृष्णा गवां सम्पन्नक्षीरतमा। साकाश्यकानां पाटलीपुत्रकाणां च पाटलीपुत्रका अभिरूपतमाः। राश्यपेक्षया द्वित्वेऽपि शब्देन बहुत्वोपादानान्न भवति। विभज्यग्रहणमद्वित्वार्थम्। अत एव निपातनाच्चप्रत्ययः।

---

१ आपूपमादाय करेण कश्चिन् कूरामयान्तःकरणो मनीषी क० म० टि०। २. तिथिभेदे क्षणे पर्व—इत्यभिधानम्। क० म० टि०। ३. गणिकायां यत्रः क० म० टि०। ४. छोऽश्वात् क० म० टि०। ५. प्रकृतेर्मयट् अस्मिन्निति सूत्रद्वये क० म० टि०। ६. निन्द्यमत्रै—क० म०। ७. निन्द्यादिषत्र—क० म०। ८. इमे क० म०। ९. परुत्परारिरेषमोऽव्ददूर्वं पूर्वतरं इति नामलिङ्गानुशासनम् क० म० टि०। १०. अभिरूपकाः क० म०। ११. -मप्रवेशाद्वि—क० म०।

प्रकृष्ट इति किम् ? अयमनयोः पटुः । सांकाश्यकेभ्यः—पाटलीपुत्रका अभिरूपाः । पकारः पुम्भावार्थः । शुक्लतरा शाटी ।

तौ ङः ॥३।४।७३॥ तकारादितरप्तमपौ ङसञ्ज्ञौ भवतः । श्रेयसितरा । श्रेयसितमा । ताविति किम् ? पटिष्ठा । पटीयसी । टेः[1] प्रदेशाः कपकल्पडेत्येवमादयः ।

अव्ययैतिंकतिङोऽसत्त्वे तयोर्डाम् ॥३।४।७४॥ अव्ययेभ्यः एकारान्तात्किम्शब्दात्तिङन्ताच्च परयोस्तयोस्तरप्तमपोर्डामादेशो भवति । न चेत्तौ सत्त्वे द्रव्ये—इदं तदिति परामर्शयोग्ये प्रकृष्टे वर्तेते । उच्चैस्तरा अल्पति । उच्चैस्तमा अल्पति । नीचैस्तरां कथयति । नीचैस्तमां कथयति । एत्—पूर्वाह्णेतरा भुङ्क्ते । पूर्वाह्णेतमां भुङ्क्ते । अपराह्णेतरामागच्छति । अपराह्णेतमामागच्छति । एद्ग्रहणसामर्थ्यात्कालेऽसत्त्वेऽपि डाम् भवति । नान्यस्मिन्नेदन्तामावात् । अथवा विभक्तयर्थोऽत्र न द्रव्यं तत्प्रकर्षेऽत्र तरप्तमपौ । किम्—किन्तरां पचति । किन्तमां पचति । किन्तरां करोति । किन्तमां करोति । तिङः—अल्पतितराम् । अल्पतितमाम् । अव्ययैतिंकतिङ इति किम् ? शीघ्रतरं गच्छति । असत्त्व इति किम् ? उच्चैस्तरो वृक्षः । कितरं दारु । तयोरिति स्थान्यर्थम् । साधकतर. । डकारोऽन्तादेशार्थः ।

गुणाङ्गाद्वेष्ठेयसू ॥३।४।७५॥ गुणमभिधाय यः शब्दो द्रव्ये वर्त्तते तस्माद्गुणाङ्गात् परयोस्तरप्तमप् इत्येतयोर्यथासंख्य इष्ठ ईयसु इत्येतावादेशौ भवतः । पटिष्ठः । पटुतमः । पटीयान् । पटुतरः । लघिष्ठः । लघुतमः । लघीयान् । लघुतरः । श्रविष्ठाऽपाढाच्छण् वेति निर्देशाद्विष्ठस्येक न भवति । गुणाङ्गादिति किम् ? गोतमः । गोतरः । साधकतमः । साधकतरः । अङ्गग्रहणं किम् ? शुक्लतमं शुक्लतरं रूपम् । असत्यङ्गग्रहणेऽत्र स्यात् प्रकृना महाविभाषा प्रत्ययाभावार्थेऽन्यर्था । [3]वा ग्रहणमादेशाभावार्थम् । अत एव डाम्नित्यः । इयसोरुकार उगित्कार्यार्थः ।

प्रशस्ते रूपप् ॥३।४।७६॥ तिङन्तेचेति वर्तते । तिङन्तात्सुबन्ताच्च प्रशस्तेऽर्थे वर्तमानाद्रूपप्प्रत्ययो भवति । प्रशस्त पचति पचतिरूपम् । पचतीरूपम् । पचन्तिरूपम् । प्रशस्तो वैयाकरणः वैयाकरणरूपः । नैयायिकरूपः । पण्डितरूप. । प्रकृत्यर्थस्य वैशिष्ट्यं परिपूर्णत्वं प्रशस्तता । तेनेहापि भवति वृषलरूपोऽयमपि पलाण्डुना सुरा पिबेत् । चोररूपोऽयमप्यस्मिन्यमङ्गनं हरेत् । दस्युरूपोऽयमपि दावन्याः लोहितं पिबेत् । पटुतमरूपः । पटुतररूपः । पकारः पुम्भावार्थः । शोभनरूपा । दर्शनीयरूपा ।

ईषदसमाप्तेऽकादेः कल्पप्देश्यच्देशीयर् ॥३।४।७७॥ तिङन्तात्सुबन्ताच्च ङाद्यन्तवर्जितादीषदसमाप्तेऽर्थे वर्तमानात् कल्पप् देश्यप् देशीयर् इत्येते प्रत्यया भवन्ति । ईषदसमाप्तं पचति पचतिकल्पम् । पचतिदेश्यम् । पचतिदेशीयम् । पचतः कल्पम् । पचतो देश्यम् । पचतो देशीयम् । पचन्तिकल्पम् । पचन्तिदेश्यम् । पचन्तिदेशीयम् । तिङो यद्रूपवादितिङन्तं क्रियाया अभेदैकत्वलक्षणा संख्या नपुंसकलिङ्गं चोपादत्त इति [4]सुरम्भावश्च । इदमेव च तिङ्ग्रहणं ज्ञापकमन्यस्तद्धितः सुबन्तादेव न तिङन्तादि । ईषदसमाप्तः पटु पटुकल्पः । पटुदेश्यः । पटुदेशीयः । ईषदसमाप्तः कारकः कारककल्पः । कारकदेश्यः । कारकदेशीयः । ईषदसमाप्त भुक्तं भुक्तकल्पम् । भुक्तदेश्यम् । भुक्तदेशीयम् । ईषदसमाप्तो गुडो गुडकल्पा द्राक्षा । गुडदेश्या । गुडदेशीया । पयस्कल्पा यवागूः । तैलकल्पा प्रसन्ना । गुडादिवर्णिका माधुर्यादीना द्राक्षादिष्वीषदसमाप्तत्वात् गुडादित्वेनेषदसमाप्ता द्राक्षादय एवमुच्यन्ते । कल्पबादयस्तमुपमेये वर्तमानमुपमेयलिङ्गसंख्यम् । बहुपूर्वं तु प्रकृतिलिङ्गसंख्यमेव स्वभावात् । अडादेरिति किम् ? तमादिकृतो न भवन्ति । प्रकर्षादीषदसमाप्तिविशिष्टविवक्षायां कल्पादिभ्य एव तमादयः । पटुकल्पतमः । पटुकल्पतरः । पटुदेश्यतरः । पटुदेश्यतमः । पटुकल्परूपः । पटुदेश्यरूपः । रूपवन्तो

---

१. -टिप्रदेशा. क० म० । २. वार्थेदम्भ्यर्था क० म० । ३. दम्त्यवाग्रह—क० म० । ४. तिसस्त्रीत्यादि विभक्त्यन्तं क० म० टि० । ५. सुवचन क० म० टि० । ६. अतोऽम् इति अ(म्)भावः क० म० टि० ।

ङादिः । पकारः पुम्भावार्थः । दर्शनीयकल्पा । दर्शनीयदेश्याः । केचिद्दर्शनीया देश्येत्येव भवितव्यमिति देश्यपः पकारं नेच्छन्ति । देशीयरिति रेफः अरित्स्वार्थ इति पर्युदासार्थः । लोध्नदेशीया । पञ्चदेशीया ।

सुपः प्राग्बहुर्वा ॥३।४।७८॥ ईषदसमाप्तेऽर्थे वर्तमानात् सुबन्ताच्छब्दरूपात् प्राक् पुरस्ताद् बहु-प्रत्ययो वा भवति न परस्तात् । ईषदसमाप्तः पटु बहुपटु. । बहुमृदु. । बहुभुक्तम् । बहुगुडा द्राक्षा । बहुपयो यवागूः । बहुतैलं प्रसन्ना । वावचनात् कल्पबादयो भवन्ति । सुप इति किम् ? तिङन्तान्माभूत् ।

नञादिः कपोऽच्छिन्नादिभ्यः ॥३।४।७९॥ छिन्नादिवर्जिताद्य. कप्प्रत्ययस्तदन्ताद् ङादिः प्रत्ययो न भवति । अयमेषां प्रकृष्टः पटुकः । अयमनयोः प्रकृष्टः पटुकः । प्रशस्तः पटुकः । प्रशस्तादिकुत्सित-त्वादिविशिष्टाया तत एव को भवति । अयमेषां पटुतमकः । अयमनयोः पटुतरकः । पटुरूपकः । पटुकल्पकः । पटु-देश्यकः । पटुदेशीयकः । कप इति किम् ? कुटीरतमः । पकारः किम् ? लोहितकतमो मणिः । लोहितकमक्षि-कोपेन । अच्छिन्नादिभ्य इति किम् ? कुत्सितः अज्ञातो वा छिन्नः छिन्नकः । अयमेषां छिन्नकतमः । अयमनयो-श्छिन्नकतरः । छिन्नकरूपः । छिन्नककल्पः । छिन्नादयः प्रयोगगम्याः ।

अनत्यन्ते ॥३।४।८०॥ अनत्यन्तेऽर्थे यः कप् तदन्ताद् ङादिर्न भवति । अनत्यन्तं छिन्नं छिन्नकम् । अनत्यन्तं भिन्नं भिन्नकम् । इदमेषां प्रकृष्टं भिन्नकम् । इदमेषां प्रकृष्टं छिन्नकम् । इदमनयोः प्रकृष्टं छिन्नकम् । प्रकृष्टं भिन्नकम् । प्रकृष्टानत्यन्तताविशिष्टविवक्षाया ङादिग्रहणात्तत एव को भवति छिन्नतमकम् । भिन्नतमकम् । छिन्नतरकम् । भिन्नतरकम् ।

प्राक्कात्कप् ॥३।४।८१॥ लोहितान्मणौ कः इति वक्ष्यते इति ऊर्ध्वं ततः प्राक्कात्प्रत्ययोऽधिकृतो वेदितव्यः । कुत्सितोऽल्पोऽज्ञातो वाऽश्वः अश्वकः । गर्दभकः । पकारः पुम्भावार्थः । कुत्सिता दरद् दारदिका प्राक्कादित्यवक्ष्यर्थम् । अन्यथापवादबाधितो नोत्तरत्रानुवर्तेत । परतोऽपि वा वर्तन ।

तिङ्सर्वादेरस्वन्त्यात् पूर्वोऽक् ॥३।४।८२॥ तिङन्तस्य सर्वादीनां च अक्षु अचां मध्ये योऽन्त्योऽ-च् तस्मात्पूर्वः अवप्रत्ययो भवति । प्राक्कात् कवपवाद । कुत्सितमल्पमज्ञातं वा पचति पचतकि । पचतकः । पचन्तकि । सर्वके । विश्वके । यकल्पिता । तकल्पिता । त्वकल्पिता । मकल्पिता । परमत्वकल्पिता । परममकल्पिता । परमसर्वके । परमविश्वके । कुत्सितादिवृत्तेः सर्वादेरगिति तदन्तेऽप्यत्राक् । अदन्त्यादिति किम् ? तिङ् सर्वादेः पूर्वः स्यात् । पूर्व इति किम् ? परः स्यात् ।

युष्मदस्मदोः सुपोऽसोभि ॥३।४।८३॥ युष्मदस्मदोरक् सुबन्तस्याऽदन्त्यात्पूर्वो भवति । युष्म-दस्मदोरदन्त्यात् पूर्वत्वापवादः । असोभि । न चेद्युष्मदस्मद्भ्यां सकार ओकारो भकारो वा परो भवति । त्वयका । मयका । त्वयकि । मयकि । युष्माककम् । अस्माककम् । परमत्वयका । परममयका । युष्मदस्म-दोरिति किम् ? तकया । यकया । सर्वकेण । विश्वकेन । इमकेन । अमुकेन । इमकैः । अमुकैः । भवकन्तौ । भवकन्तः । सुप इति किम् ? युष्मदस्मदोरेव स्यात् । वचनं सोऽभिनिषेधार्थं भविष्यति । असोभीति किम् ? युष्मकासु । अस्मकासु । युवकयोः । आवकयोः । युवकाभ्याम् । आवकाभ्याम् । युष्मकाभिः । अस्मकाभिः ।

कोदिश्चाव्ययस्य ॥३।४।८४॥ अव्ययस्य योऽदन्त्योऽच् तस्मात्पूर्वोऽक्प्रत्ययो भवति प्राक्कात् । कपोऽपवादः । यत्तु ककारान्तमव्ययम् । तस्याक्सन्नियोगे दकारश्चान्तादेशो भवति । कुत्सितमल्पमज्ञातं वा उच्चैः उच्चकैः । नीचैः नीचकैः । धिक्—धकिक् । हिरिक—हिरकित् । पृथक्—पृथकत् । हिरितीकारोच्चारणं स्यान्यादेशविभागार्थम् । युगपकत् । चकारोऽन्वाचयेत् । न सर्वस्याग्भवति । ककारान्तत्वे दिक्च योगविभाग-स्तिटो दित्वाभावार्थः । शक्नु शक्तौ । यङ्लुक् । लङ्—अशाशक् । अकि अशाशकक् ।

तूष्णीकाम् ॥३।४।८५॥ तूष्णीकामिति तूष्णीमः काम् निपात्यते । प्राक्कादकोऽपवादः । कुत्सितमल्प-मज्ञातं वा तूष्णीं तूष्णीकामास्ते । तूष्णीका तिष्ठति ।

---

१. प्रकर्षान—क० म० ।

कुत्सितालपाज्ञाते ॥३।४।८६॥ कुत्सितं गर्हितम्। अल्पं महत्प्रतियोगि। अज्ञातं प्रकृत्युपात्तधर्मव्यतिरेकेण केनचित्स्वरूपादिना धर्मेणाज्ञातम्। अन्ययायोगात्। एतदुपाधिकेऽर्थे वर्तमानाद्यथायोगं कबादयः प्रत्यया भवन्ति। कुत्सितः अल्पः अज्ञातो वा अश्वः अश्वकः। गर्दभकः। घृतकम्। तैलकम्। पचतकि। जल्पतकि। सर्वके। विश्वके। उच्चकैः। नीचकैः। तूष्णीकाम्। कुत्सितकः। अल्पकः। अज्ञातकः। कुत्सितादीनां भेदोपपत्ते। कुत्सितादिभ्यः कुत्सितादौ च प्रत्ययः। राधकः। पूर्णकः। शूद्रकः इति संज्ञाया कुत्साऽयोगात्। कुत्सित इत्येव कः। व्याकरणकेन नाम त्वं गर्वितः। याज्ञिकयकेन नाम त्वं गर्वित इत्येव क्षेपणमपि कुत्सितमेव। न ह्यकुत्सितेनावक्षिप्यते।

अनुकम्पातन्नीत्योः ॥३।४।८७॥ अनुकम्पा कारुण्येनाभ्युपपत्तिरनुग्रहस्तस्य नीतिस्तन्नीतिः। अनुकम्पायुक्ता नीतिरित्यर्थः। नीतिः सामादिप्रयोगः। तत्रानुकम्पा[1] सामोपप्रधान एव न भेददण्डौ तयोरनुकम्पायामयोगात्। अनुकम्पायामनुकम्पायुक्तायां च नीतौ गम्यमानायां यथायोगं कबादयः प्रत्यया भवन्ति। अनुकम्पा तन्नीतिश्च। प्रयोक्तृधर्मो वेदितव्यः। पुत्रकः। वत्सकः। बालकः। बुभुक्षितकः। ज्वरितकः। पचतकि। जल्पतकि। स्वपितकि। श्वसितकि। अनुकम्पमान एवं प्रयुङ्क्ते तन्नीतौ। पुत्रक उत्सङ्गके उपविश। कर्दमकेनासिंचिद्यकः। वत्सक तूष्णीका तिष्ठ। हन्त ते तिलकाः। हन्त ते गुडकाः। हन्त ते धानकाः। एहकि[2]। अद्धकि[3]। अनुकम्पाया प्रत्यारम्भेरनुकम्प्यमानादः स्यात्। नान्यस्मादुत्सङ्गादेः तथा यथा स्यादिति तन्नीतिग्रहणम्।

बह्वचो नृनाम्नोऽजातेष्ठघेला वा ॥३।४।८८॥ बह्वचो नृनाम्नो मनुष्यनामधेयाच्छब्दात् ठ घ इल इत्येते प्रत्यया वा भवन्ति। अनुकम्पायां गम्यमानायाम्। अजातेः, न चेत्स शब्दो जातिशब्दो भवेत्। अनुकम्पितो देवदत्तः देविकः। देवियः। देविलः। देवदत्तकः। जिनिकः। जिनिलः। जिनियः। जिनदत्तकः। बह्वच इति किम्? नामकः। गुप्तकः। नृनाम्न इति किम्? सुशोमकः। शोमासुरा[4]। नृग्रहणं किम्? अनुकम्पितो देवदत्तो हस्ती देवदत्तकः। नामग्रहणं किम्? कुमारकः। भद्रबाहुकः। विशेषणमेतन्नाम। अजातेरिति किम्? महिषकः। वराहकः। शरभकः। सूकरकः। गर्दभकः। एते जातिशब्दा न[5] मनुष्या न नामनि। केचिदजातेरिति प्रायिको निषेधः। व्याघ्रिलः। सिंहिलः इत्यपि हि दृश्यते इत्याहुः। बह्वग्रहणं कबर्थम्।

बुजदौ चोपाधेः ॥३।४।८९॥ बह्वचो नृनाम्नोऽजाते रूप इत्येवमादेः शब्दरूपाद्बुच् अद इत्येतौ ठघेलाश्च प्रत्यया भवन्ति। अनुकम्पायाम्, अनुकम्पित उपेन्द्रदत्तः उपकः। उपदः। उपिकः। उपियः। उपिलः। उपेन्द्रदत्तकः। बुचश्चकारः सामान्यग्रहणार्थः।

उकोऽञो लुक् प्रकृत्या च ॥३।४।९०॥ उगन्तात्परस्यानुकम्पायामजादेः प्रत्ययस्यादेर्लुग्भवति। तच्चोगन्तं शब्दरूपं प्रकृत्या भवति न विकारमापद्यते। वायुदत्तको वायुकः। वायुयः। वायुलः। गुरुकः। गुरुयः। गुरुलः। मातृकः। मातृयः। मातृलः। पितृकः। पितृयः। पितृलः। प्रकृतिभावादवादेशरीभावदीर्घा न भवन्ति। ठो लुचं प्रयोजयति। इगादेशो हि सति मादिति कादिवत्कादेशो न भवति। उक इति किम्? देविकः। देवियः। देविलः। वाजिकः। वाजियः। वाजिलः। अञ इति किम्? भद्रबाहुकः।

ष्फलुक्युत्तरपदस्य ष्कन् ॥३।४।९१॥ नृनाम्नो यदुत्तरपदं तस्य ष्फलुग्बुचि इत्यां ततः ष्कन् प्रत्ययो भवति। कबादीनामपवादः। अनुकम्पायां देवदत्तः देवः। अनुकम्पितो देवः देवकः। जिनकः। देवदत्ता देवी। जिनदत्ता। जिना। अनुकम्पिता देवी देवका। जिनका। उत्तरपदस्येति किम्? देवदत्ता। दत्ता। अनुकम्पिता दत्ता दत्तिका। षकारः पुम्भावार्थः। नकारः इच्छा पुंसो नित्कीति पर्युदासार्थः। कपि सतीत्वं स्यादिति ष्कन्वचनम्।

---

१. तुकम्पायां क० म०। २. एहि क० म० टि०। ३. अद्धि क० म० टि०। ४. स्फटा क० म०। ५. -दा मनुष्यनामानि च क० म०।

ह्लुक्चाजिनात् ॥३।४।९२॥ अजिनान्तात्समासान्नुनाम्नः कन् भवति अनुकम्पायाम् । कबादीनामपवादः । उत्तरपदस्य च ह्लुक् व्याघ्राजिनो व्याघ्रमहाजिनो वा नाम मनुष्यः । सोऽनुकम्पितः व्याघ्रकः । सिंहकः । वृकः । कृष्णकः । उलकः । अनुकम्पिता व्याघ्राजिना व्याघ्रमहाजिना वा व्याघ्रका । सिंहका । अकृतवद् व्यूहे नाकृतपन्थेरुत्तरपदस्य ह्लुक् । शकारः सर्वलोपार्थः ।

अषडेकाच् पूर्वपदस्याचि ॥३।४।९३॥ षड्वर्जितं यस्यैकाच्पूर्वपदं तस्य यदुत्तरपदं तस्यानुकम्पाया विहितेऽजादौ प्रत्यये ह्लुग्भवति । द्वितीयादच इत्यस्यापवादः । अनुकम्पितो वागाशीः वाग्दत्तो वाचिकः । वाचियः । वाचिलः । त्वचिकः । त्वचिय । त्वचिलः । स्रुचिकः । स्रुचिय । स्रुचिलः । अषडेकाच्पूर्वपदस्येति किम् ? उपेन्द्रेण दत्तः उपेन्द्रदत्तः सोऽनुकम्पितः उपकः । उपदः । उपिकः । उपियः । उपिलः । षट्प्रतिषेधः किम् ? षडङ्गुलिः । षडिकः । षडिय । षडिलः । अच इति द्वितीयादचः ह्लुचि एरिति लुप्तः स्थानिवद्भावात् पदत्वस्थानिवृत्तेर्जश्त्वं न निवर्तते । अचीति किम् ? वागाशीर्पः वाग्दत्तकः ।

द्वितीयादचः ॥३।४।९४॥ अनुकम्पाया विहितेऽजादौ प्रत्यये परत प्रकृतेर्द्वितीयादचः उत्तरस्य शब्दरूपस्य ह्लुग्भवति । शित्त्वात्सर्वस्य भवति । अनुकम्पितो देवदत्तः देविकः । देवियः । देविलः । उपेन्द्रदत्तः उपकः । उपद । उपिकः । उपियः । उपिलः । वायुदत्त । वायुकः । वायुयः । वायुलः । पितृदत्तः पितृकः । पितृयः । पितृल ।

तेनैचः ॥३।४।९५॥ अनुकम्पाया विहितेऽजादौ प्रत्यये परतः प्रकृतेर्द्वितीयेनाचा सह तस्मादुत्तरस्य शब्दरूपस्य ह्लुग्भवति । यदि सद्वितीयोऽजेव्भवति । अनुकम्पितः अहोडः अहिकः । अहियः । अहिलः । अमोदः—अमिकः । अमियः । अमिलः । कपोतरोमा—कपिकः । कपियः । कपिलः । एच इति किम् ? गुरुदत्त—गुरुकः ।

शेवलसुपरिविशालवरुणार्यमादेस्तृतीयात् ॥३।४।९६॥ शेवल सुपरि विशाल वरुण अर्यमन् इत्येवमादेर्मनुष्यनाम्नोऽनुकम्पायामजादौ प्रत्यये परतः तृतीयादच उत्तरस्य ह्लुग्भवति । द्वितीयादच इत्यस्यापवादः । अनुकम्पित शैवलदत्तः शैवलिकः । शैवलियः । शैवलिकः । सुपरिकः । सुपरियः । सुपरिलः । विशालिकः । विशालिय । विशालिल । वरुणिकः । वरुणियः । वरुणिल । अर्यमिकः । अर्यमियः । अर्यमिल । अकृतवद्व्यूहेनाकृतपन्थेरेव लोपः । शैवलेन्द्रदत्तः शैवलिकः । सुपर्याशीर्दत्तः सुपरिकः । शैवलयिकः । सुपर्यिक इति न भवति ।

क्वचिन् तुर्यात् ॥३।४।९७॥ अनुकम्पाया विहितेऽजादौ प्रत्यये परे क्वचित्तुर्याच्चतुर्यादच उत्तरस्य शब्दरूपस्य ह्लुग्भवति । अनुकम्पितो बृहस्पतिदत्तः बृहस्पतिशर्मा वा बृहस्पतिकः । बृहस्पतियः । बृहस्पतिलः । प्रजापतिक । प्रजापतियः । प्रजापतिलः । क्वचिदिति प्रयोगानुसरणार्थम् । उपेन्द्रदत्तः उपकः । उपदः । उपिक । उपियः । उपिलः ।

पूर्वपदस्य वा ॥३।४।९८॥ पूर्वपदस्यानुकम्पायामजादौ प्रत्यये परे क्वचित् ह्लुग्वा भवति । अनुकम्पितो देवदत्तः दत्तिकः । दत्तियः । दत्तिलः । वाचनाद्देविकः । देवियः । देविलः ।

ह्रस्वे ॥३।४।९९॥ दीर्घप्रतियोगि ह्रस्वम्, ह्रस्वेऽर्थे वर्तमानाच्छब्दरूपाद्यथायोगं कबादयः प्रत्यया भवन्ति । ह्रस्वः पटः पटकः । पुरुषकः ह्रस्वं पचति । पचतकि । जल्पतकि । ह्रस्वकालयोगात् क्रिया ह्रस्वेत्युच्यते । ह्रस्वाः सर्वे सर्वके । विश्वके । उच्चकैः । नीचकैः । तूष्णीकाम् । वशक । वेणुकः । नलकः । चरकः । इति सञ्ज्ञाया ह्रस्वत्वयोगाद्ध्रस्व इत्येव कः । योगविभाग उत्तरार्थः ।

कुटीशुण्डाद्रः ॥३।४।१००॥ कुटी शुण्डा इत्येताभ्या ह्रस्वेऽर्थे वर्तमानाभ्या रप्रत्ययो भवति । कबपवादः । ह्रस्वा कुटी कुटीरः । शुण्डारः ।

शम्या रुरौ ॥३।४।१०१॥ शमीशब्दाद्ध्रस्वेऽर्थे वर्तमानाद्रु र इत्येतौ प्रत्ययौ भवतः । ह्रस्वा शमी शमीरुः । शमीरः ।

कुतुपः ॥३।४।१०२॥ कुतुप इति कुतुशब्दाद्ह्रस्वेऽर्थे वर्तमानात् प्रत्ययो निपात्यते । ह्रस्वा कुतुः कुतुपः । चर्ममयं स्नेहभाजनं कुतूरित्यावपनम् । कुटचादयः स्त्रीलिङ्गाः कुटीरादयस्तु पुल्लिङ्गाः शब्दशक्तिस्वाभाव्यात् ।

कासू गोण्याः तरट् ॥३।४।१०३॥ कासू गोणी इत्येताभ्यां ह्रस्वेऽर्थे वर्तमानाभ्या प्तरट्प्रत्ययो भवति । ह्रस्वा कासूः कासूतरी । गोणीतरी । कासूतरः गोणीतरः इति पुल्लिङ्गमपि दृश्यते इत्येके । कासूः शक्तिनामायुधम् । गोण्यावपनम् । पकार उत्तरत्र पुम्भावार्थः । वत्सतरी । गर्भमश्वतरी यथा । कासू गोण्या इति कासूश्चासौ गोणी चासौ कासूगोणीति समुदाय उच्यते । समुदायेन चावयवलक्षणादवयवकार्ययोगो द्वन्द्वैकत्वेऽपि चाचार्याणां सूत्रनिबन्धने पुल्लिङ्गव्यभिचारो दृश्यते ।

वत्सोक्षर्षभाश्वाद्ह्रासे ॥३।४।१०४॥ वत्स उक्षन् ऋषभ अश्व इत्येतेभ्यः स्वार्थे प्तरट्प्रत्ययो भवति ह्रासे । प्रत्ययासत्तेर्यस्य गुणस्य भावाद्द्रव्ये शब्दनिवेशः, तस्य स्वार्थस्यापचये गम्यमाने । ह्रसितो वत्सः वत्सतरः । वत्सः । प्रथमवयास्तस्य ह्रासो द्वितीयवयःप्राप्तिः । ह्रसित उक्षा उक्षतरः । उक्षा द्वितीयवयास्तरुणस्तस्य ह्रासस्तृतीयवयःप्राप्तिः । ह्रसित ऋषभ ऋषभतरः । ऋषभोऽनड्वान् बलीयांस्तस्य ह्रासो भारवहने मन्द-शक्तिता । ह्रसितोऽश्व अश्वतर । अश्वस्याश्वाया जातोऽश्वः तस्य ह्रासो गर्दभपित्तृकता । आशुगमनादश्वः, तस्य ह्रासो गमने मन्दिमेत्येके । सर्वदाऽश्वतरशब्दो जातिशब्दः ।

यत्तत्किमन्याद्द्वयोर्निर्धार्ये डतरः ॥३।४।१०५॥ यद् तद् किम् अन्य इत्येतेभ्यो द्वयोरेकस्मिन्निर्धार्ये वर्तमानेभ्य. डतरप्रत्ययो भवति । समुदायादेकदेशस्य प्रकृत्या निष्कृष्य धारणं निर्धारणम् । यतरो भवतोः कठ. पटुर्न्ता दण्डी देवदत्तो वा ततर आगच्छतु । कतरो भवतोः कठः अपटुर्वा । अन्यतरो भवतोरागच्छतु । महावाधिकारात्प्रत्ययो न भवत्यपि । यो भवतो पटुः स आगच्छतु । द्वयोरिति किम् ? योऽस्मिन् ग्रामे प्रधानः स आगच्छतु । निर्धार्य इति किम् ? योऽनयोर्ग्रामयोः स्वामी स आगच्छतु ।

वैकात् ॥३।४।१०६॥ एकशब्दाद् द्वयोरेकस्मिन्निर्धार्ये वर्तमानाड्डतरप्रत्ययो वा भवति । एकतरो भवतोः कठः पटुः । वावचनमगर्थम् । एककः । महावाधिकारान्न भवत्यपि । एको भवतो पटुः पण्डितः ।

बहूनां प्रश्ने डतमश्च ॥३।४।१०७॥ यत्तत्किमन्यदिति वर्तते । नैकादित्युत्तरत्र पृथगेकग्रहणात् प्रश्नग्रहणाच्च । यद् तद् किम् अन्य इत्येतेभ्यो बहूना मध्ये निर्धार्ये वर्तमानेभ्यः प्रश्नविषये डतमप्रत्ययो भवति डतरश्च वा । यतमो यतरो वा भवतां कठः । ततमस्ततरो तवाऽऽगच्छतु । कतमः कतरो वा भवता कठः, बहुष्वासोनेषु कश्चित् कञ्चित्पृच्छति कतमो देवदत्तः कतरो देवदत्तः । अन्यतमः अन्यतरो वा भवतां कठः । शुचि वल्कवीतपुरन्यतमस्तिमिरच्छिदामिव गिरो भवतः । वृद्धस्तु व्याधितो वा राजा मातृबन्धुकुल्यवत्सामन्तानामन्यतमेन क्षेत्रे[७] बीजमुत्पादयेत् । वावचनमगर्थम् । यको भवतां कठः सक आगच्छतु । महावाधिकारान्न भवत्यपि । यो भवतां कठः स आगच्छतु । बहूनामिति किम् ? योऽस्मिन् ग्रामे कठः स आगच्छतु । प्रश्न इति किम् ? क्षेपे मा भूत् । को भवतां कठः । कुत्सित इत्यर्थः । प्रश्नग्रहणं किमो विशेषणम् । नान्यस्यासम्भवात् । यत्तत्किम्यो जातावेव डतरो डतमश्च । बहूना निर्धार्ये किम एव जातावेव । अन्यशब्दादपि बहुविषये डतम एव । डतमडतरौ च निर्धार्ये अन्यशब्दान्नित्यावेवेत्येके । अन्ये त्वविशेषेणेत्यत्राभिधानमनुमर्तव्यम् । सर्वादिषु चान्यतरशब्दस्य पृथक् पाठाड् डतमशब्देन गृह्यते । अन्यतमायान्यतमं वस्त्रम् ।

---

१. कासूसामर्थ्ययोः शक्तिरित्यभिधानम् क० म० टि० । २. सर्वभावपनं भाण्डम् क० म० टि० कुम्भः सूर्पो स्त्रियां तौ द्वौ गोणी वाहस्तु तद्वयम् । तौ द्वौ खारी क० म० टि० । ३. सूत्रनिबन्धेषु क० म० । ४. सर्वथा क० म० । ५. वेदशाखा क० म० । ६. सामन्ता राज्यसन्धिस्था क० म० टि० । ७. क्षेत्रं पत्नीशरीरयोः क० म० टि० ।

एकात् ॥३।४।१०८॥ एकशब्दाद् बहूनां निर्धार्ये डतमप्रत्ययो भवति वा। एकतमो भवता कठः पटुर्गम्यो वा। वाधिकारान्न भवत्यपि। एकः। एकादिति पृथग्योगो डतरनिवृत्त्यर्थः।

क्तान्तादेरानत्यन्ते ॥३।४।१०९॥ क्तान्तात्केवलाद् डादेस्तमाद्यन्ताच्चाऽनत्यन्तेऽर्थे वर्तमानात्कप्-प्रत्ययो भवति। अनत्यन्तं भिन्न भिन्नकम्। छिन्नम्। छिन्नकम्। भिन्नका घटी। छिन्नका रज्जुः। डाद्यन्तात् क्तात्। अनत्यन्तं भिन्नतरं भिन्नतरकम्। भिन्नतमं भिन्नतमकम्। भिन्नकल्पं भिन्नकल्पकम्। छिन्नतरकम्। छिन्नतमकम्। छिन्नकल्पकम्। भेदादेः स्वेनाश्रयेण साकल्येनाभिसम्बन्धोऽनत्यन्तता। डादौ क्तान्तता नास्तीति डादिग्रहणम्। असमाप्तोऽनादेरित्यत्रापि क्तादित्यस्य सम्बन्धार्थः। तेन सह न भवति। अनत्यन्तं शुक्लतमम्।

न सामिवचने ॥३।४।११०॥ सामिवचने उपपदे अनत्यन्तेऽर्थे वर्तमानात् क्तान्तात् केवलात् डादेस्तरतमाद्यन्ताच्च कप्रत्ययो न भवति। 'सामि अर्धं नेममनत्यन्तं भिन्नं कृतं भुक्तं पीतं भिन्नतरं भिन्नतमम्। साम्यादिभिः समुदायविषये क्रियाया अनत्यन्तता प्रतीयते न स्वविषये। तत्र 'कः' प्राप्नोतीति प्रतिषेधः।

लोहितान्मणौ कः ॥३।४।१११॥ लोहितशब्दात् सुपो मणौ वर्तमानात्कप्रत्ययो भवति वा। लोहित एव लोहितको मणिः। मणेर्विशेषणमेतदित्येके। अन्ये नामधेयमित्याहुः। वाऽधिकारान्न भवत्यपि। लोहितो मणि.। कपि प्रकृते कवचनम्। नडादिः कपोऽच्छिन्नादिभ्य इति प्रतिषेधनिवृत्त्यर्थम्। लोहितकतमो मणिः। लोहितकतमं वस्त्रं कृमिरागेण। लोहितकमक्षिकोपेन। पुम्भावनिवृत्त्यर्थं च। लोहिनिका मणिः। लोहिनिका शाटी कृमिरागेण। लोहिनिका कन्या कोपेन। लोहितिका मणिः। लोहितिका शाटी कृमिरागेण। लोहितिका कन्या कोपेनेति। आड्पक्षे। पाक्षिको डीप्रत्ययः।

रक्तानित्यवर्णयोः कालाच्च ॥३।४।११२॥ रक्ते द्रव्यान्तरेण लाक्षादिना वर्णान्तरमापादितेऽनित्ये च वर्णे वर्तमानाल्लोहितशब्दात्कालशब्दाच्च कप्रत्ययो वा भवति। रक्ते—लोहितक. पटः। कालकः पटः। अनित्ये वर्णे। लोहितकमक्षिकोपेन। कालकं मुख वैलक्ष्येण। वाधिकारान्न भवत्यपि। लोहित. कालः पटः। लोहितं कालं मुखम्। नित्योऽपि रक्तो वर्णोऽस्ति यथा कृमिरागादिरक्ते पटे, इति रक्तग्रहणम्। अनित्यग्रहणं किम्? लोहिता गौ। काली महिषी। सत्येवाश्रये द्रव्येऽपयन्निहानित्य उच्यते। अन्यथा रक्तग्रहणानर्थक्यात्। वर्णग्रहणं द्रव्यनिवृत्त्यर्थम्। अवृति वर्णग्रहणे स्त्रीणामार्तवे द्रव्ये स्यात्। तद्धि सत्येवाश्रये स्त्रियां कदाचिन्न भवति लोहितशब्दवाच्यं च।

शीतोष्णाद्वतौ ॥३।४।११३॥ शीतोष्णशब्दाभ्यामृतौ वर्तमानाभ्यां स्वार्थे कप्रत्ययो वा भवति। शीत एव शीतक ऋतुः। उष्णकः ऋतुः। ऋताविति किम्? शीतो वायुः। उष्णः स्पर्शः।

लूनविहानात्पशौ ॥३।४।११४॥ लून विहान इत्येताभ्यां पशौ वर्तमानाभ्यां स्वार्थे कप्रत्ययो भवति। लून एव लूनकः पशुः। विहान एव विहानकः पशुः। लूनो विहान इत्येवान्यत्र।

तनुपुत्राणुस्नातबृहतीशून्यात्सूत्रकृत्रिमनिपुणसमाप्तवेदाच्छादनरिक्ते ॥३।४।११५॥ तनु पुत्र अणु स्नात बृहती शून्य इत्येतेभ्य यथासंख्यं सूत्रे कृत्रिमे निपुणे समाप्तवेदे आच्छादने रिक्ते चाभिधेये कप्रत्ययो भवति। तनोः सूत्रे—तनुक सूत्रम्। तन्वित्येवान्यत्। पुत्रात्कृत्रिमे—पुत्रकः कृत्रिमः पुत्रः। कृत्रिम इति किम्? औरसः पुत्रः। अणो निपुणे—अणुको निपुण इत्यर्थः। अन्योऽणुः। स्नातात्समाप्तवेदे स्नातकः। यस्य समाप्तो वेदः स उच्यते। समाप्तवेद इति किम्? नद्या स्नातः। बृहत्या आच्छादने बृहती शाटी बृहतिका। आच्छादन इति किम्? बृहतो छन्दः। बृहतो ओषधिः। शून्याद्रिक्ते शून्यकः तुच्छ इत्यर्थः। शून्योऽन्यः, सूत्रादिरित्यर्थः। प्रत्ययमन्तरेण न प्रतीयते इत्यस्मिन् विषये नित्यः प्रत्ययः।

कुमारीक्रीडने योऽव्यादिभ्यः ॥३।४।११६॥ कुमारीणां यानि क्रीडनानि तद्वाचिभ्य इयसन्तेभ्यः अवि इत्येवमादिभ्यश्च स्वार्थे कप्रत्ययो वा भवति। कुमारीक्रीडनात्-कन्दुरेव कन्दुकः। उत्कण्ठकः। ईयस् श्रेयानेवश्रेय स्कः। ज्यायस्कः। भूयस्कः। अव्यादि—अविरेव अविकः। याव एव यावकः। मणिरेव मणिकः।

कुमारीक्रीडनेषो ग्रहणमव्यादेरेव प्रपञ्चः । अवि, याव, मणि, अस्थि, पीत, स्तब्ध, ज्ञात, अज्ञात, पुण्य, नित्य, सत्यत्, दशार्ह, वयस्, इत्यव्यादिराकृतिगणः । तेन अभिज्ञतरकं बहुतरकम् इत्यादि सिद्धं भवति । लोहितान्मणो क इत्याद्यस्यैव प्रपञ्चः ।

तीयाट्टीकण् विद्यायाम् ॥३।४।११७॥ तीयप्रत्ययान्तात्स्वार्थे टीकण्प्रत्ययो वा भवति न चेत् तीयान्तं विद्याया वर्तेत । द्वितीयं द्वैतीयकम् । तृतीयं तार्तीयकम् । टकारो ङ्यर्थः । द्वैतीयीकी, तार्तीयीकी, शाटिकी शाटी । अविद्यायामिति किम् ? द्वितीया विद्या । तृतीया विद्या । अविद्यायामिति प्रसज्यप्रतिषेधोऽयम् । तेन विद्यायामेव न भवति । अन्यत्र तु सर्वत्र भवत्येव । मुखतीयः, पार्श्वतीयः । इत्यत्र तीयोऽनर्थकः । अवयव एवार्थवानिति न भवति ।

अोऽष्टमाद्भागे ॥३।४।११८॥ अंशे वर्तमानात्स्वार्थे अप्रत्ययो वा भवति । अष्टम एव अष्टमो भागः । भाग इति किम् ? अष्टमो जिनदत्तचन्द्रप्रभः ।

षष्ठात् ॥३।४।११९॥ षष्ठशब्दाद्भागे वर्तमानात्स्वार्थे अप्रत्ययो वा भवति । षष्ठ एव पाष्ठो भागः । योगविभाग उत्तरार्थः ।

माने कश्च ॥३।४।१२०॥ मीयते येन तन्मानम्, तस्मिन्माने भागे वर्तमानात् षष्ठशब्दात् कश्च अश्च प्रत्ययौ वा भवतः । षष्ठ एव षष्ठकः । पाष्ठो भागः मानं चेत् । मान इति किम् ? षष्ठ एव पाष्ठो भागोऽन्यः ।

एकादाकिन्नासहाये ॥३।४।१२१॥ एकशब्दादसहायार्थवाचिन आकिन्प्रत्ययो भवति कश्च वा । एक एव एकाकी । एककः । एकाकिभिः क्षुद्रकैर्जितम् । असहाय इति किम् ? एके आचार्याः । एकः द्वौ बहवः ।

तिलात् पिञ्जपेजौ निष्फले ॥३।४।१२२॥ निष्फलेऽर्थे वर्तमानात्तिलशब्दात्पिञ्ज पेज इत्येतौ प्रत्ययौ भवतः । निष्फलः तिलः तिलपिञ्जः । तिलपेजः ।

मृद्वस्तिकः ॥३।४।१२३॥ मृच्छब्दात्स्वार्थे तिकप्रत्ययो वा भवति । मृदेव मृत्तिका । तिकं कृत्वा आदित्वे क्रियमाणे प्रक्रियागौरवम् । पञ्चभिर्मृत्तिकाभिः क्रीतः । पञ्चमृत्तिकः । इत्याङभावे इत्वाभावश्च स्यादिति को विधीयते ।

स्नौ प्रशस्ते ॥३।४।१२४॥ मृद् इत्येतस्मात्सुः प्रशस्तेऽर्थे वर्तमानात् स स्न इत्येतौ प्रत्ययौ भवतः । प्रशस्ता मृद् मृत्सा । मृत्स्ना । रूपसिद्धौ प्राप्तेऽयं विधिः । तत्र केचिद्रूपसाधनं नेच्छन्ति । तन्मतोत्तरं बहुलग्रहणमत्रापि सम्बन्धनीयम् । मृद्वपा ।

बहुलं घतोर्द्वयसड्मात्रट् ॥३।४।१२५॥ घतवन्तात्स्वार्थे द्वयसट् मात्रट् इत्येतौ प्रत्ययौ बहुलं भवतः । यावदेव यावद्द्वयसम् । यावन्मात्रम् । तावदेव तावद्द्वयसम् । तावन्मात्रम् । एतावदेव एतावद्द्वयसम् । एतावन्मात्रम् । बहुलग्रहणं प्रयोगानुसरणार्थम् ।

वर्णात्कारः ॥३।४।१२६॥ वर्णवाचिनः कारप्रत्ययो भवति स्वार्थे । अ एव अकारः । ककारः । चकारः । बहुलमित्येव तेनाभिनिष्टान इत्यादौ न भवति । एवकार इत्यादौ च भवति । रेफ इति रिय: फ इति सिद्धम् । रकार इत्यपीष्यते ।

भेषजादिहोत्रादेभ्यष्ट्यण् कृतल् ॥३।४।१२७॥ भेषजादिभ्यो होत्रादेव इत्येताभ्यां च स्वार्थे यथासंख्यं ट्यण् क तल् इत्येते प्रत्यया वा भवन्ति । भेषजमेव भैषज्यम् । अनन्त एवानन्त्यम् । अवश्य एवावश्यम् । इतिह इत्येव ऐतिह्यम् । इतिहेति निपातसमुदायः । उपदेशपारम्पर्ये वर्तते । चत्वार एव वर्णाश्चातुर्वर्ण्यम् । चातुराश्रम्यम् । चातुर्वेद्यम् । त्रैविद्यम् । त्रैलोक्यम् । ऐकभाष्यम् । त्रैभाष्यम् । आन्यभाष्यम् । सार्ववैद्यम् । सार्वलोक्यम् । शैलमेव शैलीयमाचार्यस्य । भैषज्यानन्त्यावश्यैतिह्यशब्दा यदि स्त्रियां स्युरादिषु प्रक्षिप्यन्ते । भेषजादयः शिष्टेभ्योऽविलक्षणाः । होत्रायाश्छः होत्रैव–होत्रीयम् । देवात्तल्, देव एव देवता । बहुवचनं भेषजादेराकृतिगणत्वार्थम् । वचनभेदेऽपि यथासंख्यम् । अन्यथा होत्रादेवौ भेषजादी एव विज्ञायेयाताम् ।

नामरूपभागाद्धेयः ॥३।४।१२८॥ नामन् रूप भाग इत्येतेभ्यः स्वार्थे धेयप्रत्ययो वा भवति। नाम—नामधेयम्। रूप—रूपधेयम्। भाग—भागधेयम्।

मर्तादिभ्यो यः ॥३।४।१२९॥ मर्त इत्येवमादिभ्यः स्वार्थे यप्रत्ययो वा भवति। मर्त एव मर्त्यः। एवं सूर्यः। क्षेम्यः। यविष्ठ्य.। भाग्यम्। लभ्यम्। रव्यम्। मर्तादयः प्रयोगगम्याः।

नवात्तनतनखं च नू च ॥३।४।१३०॥ नवशब्दात्स्वार्थे त्न तन त्न इत्येते यश्च प्रत्यया वा भवन्ति तत्सन्नियोगे च नवस्य नू इत्यादेशः। नवम्। नूत्नम्। नूतनम्। नवीनम्। नव्यम्।

प्रात्पुराणे ॥३।४।१३१॥ प्रशब्दात्पुराणेऽर्थे वर्तमानात् स्वार्थे त्न तन त्न इत्येते प्रत्यया वा भवन्ति। प्रगतं कालेन पुराणं प्रत्नम्। प्रतनम्। प्रीणम्।

प्रज्ञादिभ्योऽण् ॥३।४।१३२॥ प्रज्ञा इत्येवमादिभ्यः स्वार्थेऽण्प्रत्ययो वा भवति। प्रज्ञ—प्रजानातीति प्रज्ञ.। प्रज्ञ एव प्राज्ञः, प्राज्ञी कन्या। प्रज्ञाऽस्यास्तीति प्राज्ञा कन्या। वणिज्-वाणिजः। उशिज्-औशिजः। प्रज्ञ, वणिज्, उशिज्, उष्णिह, प्रत्यक्ष, विद्वस्, विदत्, षोडत्, विद्या, मनस्, जुह्वत्, चिकीर्षत्, वसु, मरुत्, सत्वत्, दशार्ह, कुञ्च, वयस्, असुर, रक्षस्, शत्रु, चोर, योध, चक्षुष्, पिशाच, अशनि, कर्षापण, देवता, बन्धु, अनुजावर, अनुपूक, चतुःप्राश्य, रक्षोघ्न, वियात्, विकृत, चरवस्कृत, अग्रायणी, अग्रहायणी, सन्तेमस इति प्रज्ञादिराकृतिगणः। तेन आग्नीध्री। आग्नेध्रा वा शाला। साधारणी साधारणा वा भूमिरित्यादि सिद्धम्।

कृष्णौषधिश्रोत्रान्मृगभेषजशरीरे ॥३।४।१३३॥ कृष्ण ओषधि श्रोत्र इत्येतेभ्यो यथासंख्यं मृगभेषजशरीरेषु वर्तमानेभ्योऽण्प्रत्ययो भवति। कृष्णान्मृगे, कृष्ण एव काष्णों मृग.। कृष्ण एवान्यः। ओषधेर्भेषजे ओषधिरेव औषधं भेषजम्। ओषधिरेवान्या। श्रोत्राच्छरीरे—श्रोत्रमेव श्रौत्रं शरीरम्। श्रोत्रमेवान्यत्।

कर्मणः सन्दिष्टे ॥३।४।१३४॥ सन्दिष्टेऽर्थे वर्तमानात् कर्मन्शब्दादण्प्रत्ययो भवति। अन्येनान्यः स्वात्मन्यर्पितामन्यस्मै यथाह त्वयेद कर्म कर्तव्यमिति तेनोक्तमिति तत्सन्दिष्टं कर्म [२]कार्मणं करोति सन्दिष्टं कर्म करोतीत्यर्थ.। वशीकरणमपि बृद्धपरम्परोपदेशात्क्रियते इति कार्मणमुच्यते। सन्दिष्ट इति किम्? कर्म करोति। सत्यपि महावाऽधिकारे विशिष्टेऽर्थे [३]प्रत्ययमन्तरेण न [४] प्रतीतिरिति अस्मिन्विषये नित्यमेव प्रत्ययः।

वाचष्ठण् ॥३।४।१३५॥ सन्दिष्टेऽर्थे वर्तमानाद् वाक्शब्दात् ठण्प्रत्ययो भवति। अन्येनान्यकः। स्वात्मन्यर्पितामन्यस्मै यामाह सा सन्दिष्टा वाक् वाचिकम्[५]। वाचिकं कथयति। सन्दिष्टा वाचं कथयतीत्यर्थः। सन्दिष्ट इति किम्? चित्रा वाग्देवदत्तस्य। वाऽधिकारेऽपि नित्य एव प्रत्ययोऽन्यथा तद्विशेषाप्रतीतेः।

विनयादिभ्यः ॥३।४।१३६॥ विनय इत्येवमादिभ्य स्वार्थे ठण्प्रत्ययो वा भवति। विनय एव वैनयिकम्। समय एव सामयिकम्। विनय, समय, सङ्गति, कथञ्चित्, अकस्मात्, उपचार, समाचार, व्यवहार, सम्प्रदान, समुत्कर्ष, संग्राम, समूह, विशेष, अव्यय इति विनयादिराकृतिगणः।

औपयिकम् ॥३।४।१३७॥ औपयिकमिति उपायशब्दात् स्वार्थे ठण्प्रत्ययो[६] निपात्यते। तत्सन्नियोगे च नित्य ह्रस्व.। उपाय एव औपयिकम्।

अनुगादिनः ॥३।४।१३८॥ अनुगादिन्शब्दात्स्वार्थे ठण्प्रत्ययो भवति। अनुगदतीत्यनुगादी। आनुगादिकः। विनयादिष्वस्याप्रक्षेपान्निवृत्ता महाविभाषा। अतः परं नित्याः प्रत्ययाः।

अञ्निनोऽण् ॥३।४।१३९॥ अञ्निन्नित्येतत्प्रत्ययान्तात् स्वार्थेऽण्प्रत्ययो भवति। व्यावक्रोशी। व्यावलेखी। व्यावहासी वर्तते। ञिन्। साकुटिनम्। साकोटिनम्। मांराविणम्। साम्माजिनम्।

विसारिणो मत्स्ये ॥३।४।१४०॥ विसरतीति विसारी। विसारिन्शब्दान्मत्स्ये वर्तमानादण्प्रत्ययो भवति। वैसारिणो मत्स्य.। मत्स्य इति किम्? विसारी देवदत्त.।

---

१. मन्तपन क० म०। २. कार्मणं मन्त्रतन्त्रादि योजने कर्मकारके, इति विश्व: क० म० टि०। ३. विशिष्टोऽर्थः म०। ४. न प्रतीयते, इति म०। ५. सन्देशवाग्वाचिकं स्यात्, इति नामलिङ्गानुशासनम् क० म० टि०। ६. यो वा निपा—क० म०।

त्रिब्योऽमुख्यकात्पूगात् ॥३।४।१४१॥ नानाजातीया अनियतवृत्तयो धर्मकामप्रधानाः संघाः पूगाः, पूगवाचिनः शब्दात्स्वार्थे ञ्यप्रत्ययो भवति । त्रिः । त्रिसंज्ञः । स चेत्पूगशब्दो मुख्य इति विहितकप्रत्ययान्तो न भवति । लोहजङ्घाः । पूगो लौहजङ्घ्यः । लौहजङ्घ्यौ । लौहजङ्घाः । शैंड्यः । शैंड्यौ । शिबयः । त्रिस्वाद्-बहुषु ञ्लुक् । अमुख्यकादिति किम् ? देवदत्तकः । इन्द्राग्निगुप्तकः ।

व्रातञ्फाढक्त्रियाम् ॥३।४।१४२॥ नानाजातीया अनियतवृत्तयः उत्सेधजीविनः संघा व्राताः । व्रात-वाचिनः ञ्फप्रत्ययान्ताच्चास्त्रियां वर्तमानात्स्वार्थे ञ्यप्रत्ययो भवति । त्रिवज्रः । कापोतपाक्यः । कापोतपाक्यौ । कपोतपाकाः । व्रैहिमत्यः । व्रैहिमत्यौ । व्रीहिमताः । ञ्फ–कौञ्जायन्यः । कौञ्जायन्यौ । कौञ्जायनाः । व्राघ्नायन्यः । व्राघ्नायन्यौ । व्रघ्नायनाः । अस्त्रियामिति किम् ? कपोतपाका । व्रीहिमता । कौञ्जायनी । व्राघ्नायनी स्त्री ।

शस्त्रजीविसंघाद् ञ्यङ्ढ्वा ॥३।४।१४३॥ शस्त्रजीविनां यः संघस्तद्वाचिनः स्वार्थे ञ्यट्प्रत्ययो वा भवति त्रिः । शबराः शस्त्रजीविसंघः शाबर्यः । शाबर्यौ । शबराः । पौलिन्द्यः । पौलिन्द्यौ । पुलिन्दाः । कुन्तेरपत्य बहवो माणवकाः कुन्तयः, ते शस्त्रजीविसंघः कौन्त्यः । कौन्त्यौ । कुन्तयः । वाग्रहणान्न भवत्यपि । शबरः । पुलिन्द. । शस्त्रजीविग्रहणं किम् ? मल्ला. संघः मल्लः । शयण्डः । संघादिति किम् ? सम्राट् वागुरः । वागुरौ वागुरा । नैते श्रेणिपन्थाः । ञ्यटि टकारो ङ्यर्थः । शाबरी । पौलिन्दी । कौन्ती । आवन्ती ।

वाहीकेष्वब्राह्मणराजन्येभ्यः ॥३।४।१४४॥ वाहीकेषु यः शस्त्रजीविसंघो ब्राह्मणराजन्यवर्जित-स्तद्वाचिन. स्वार्थे ञ्यट्प्रत्ययो नित्यं भवति त्रि. । कुण्डिविसाः शस्त्रजीविसंघः कौण्डीविस्यः । कौण्डीविस्यौ । कुण्डीविसाः । क्षौद्राय: । क्षौद्रयौ । क्षुद्रकाः । मालव्यः । मालव्यौ । मालवाः । वाहीकेष्विति किम् ? शबराः शस्त्रजीविसंघः शबरः । शबरौ । पुलिन्दः । पुलिन्दौ । अब्राह्मणराजन्येभ्य इति किम् ? गोपालिः । गोपाली । शालङ्कायनः । शालङ्कायनाः । राजन्येभ्य., राजन्यः । राजन्यौ । राजन्याः । काम्बव्यः । काम्बव्यौ । काम्बव्याः । ब्राह्मणे विशेषग्रहणं वाहीकेषु शस्त्रजीविसंघे स्वरूपाभावाद्राजन्ये तूभयग्रहणम् तदर्थमेव बहुवचनम् । शस्त्रजीविसंघादिति किम् ? मल्लः । मल्लौ । मल्लाः । शयण्ड. । शयण्डौ । शयण्डाः । साम्राटा वागुरः । वागुरौ । वागुराः ।

दामनीयौधेयपर्श्वादिवृकाच्छाऽण् टेन्यण् ॥३।४।१४५॥ दामन्यादिभ्यः यौधेयादिभ्यः पर्श्वादिभ्य. वृकशब्दाच्च शस्त्रजीविसंघवाचिभ्यो यथासंख्यं छ अञ् अण् टेन्यण् इत्येते स्वार्थे त्रिसंज्ञाः प्रत्यया भवन्ति । दामन्यादिभ्यश्छः—दामनयः शास्त्रजीविसंघः । दामनीयः । दामनीयौ । दामनयः । औलपीयः । औलपीयौ । औलपयः । दामनी, ओलपी, वैजवापि, औदकि, आच्युतन्ति, काकन्दि, शाभुन्नपि, सार्वसेनि, विन्दुतुलभ, मौञ्जायन, सावित्रीपुत्र, काण्डोपरथ, दण्डिकी, क्रौष्ट्रकी, जालमानि, ब्रह्मगुप्त, जानकि इति दामन्यादिः । यौधेयादिभ्यो ञ्—यौधेयः । यौधेयौ । यौधेयाः । शौभ्रेयः । शौभ्रेयौ । शुभ्रयाः । यौधेयादिभ्योऽञ्वचनं यौधेयस्य संघादियौधेयमिति गोत्रावञ्यञिञ इत्यणर्थम् । यौधेयादयोऽप्यपत्यप्रत्ययान्ता गोत्रं भवन्ति । अपत्यं हि गोत्रम्, अपत्यस्वाधिकस्यापत्यग्रहणेन गृह्यते । तत्र चेदमञ्वचनम् । यौधेयादिर्भगाद्यिन्तर्गणः । पर्श्वादिभ्योऽण्—पर्शोरपत्यं बहवो माणवकाः पर्शवः शस्त्रजीविसंघः पार्शवः । पार्शवौ । पर्शवः । राक्षसः । राक्षसौ । रक्षांसि । आसुरः । आसुरौ । असुराः । स्त्रियां ङेरतो प्राग् भगादेः इति ङ्लुक् । पर्शुः । रक्षः । आसुरी । पर्शु, रक्षस्, असुर, वल्लोक, वयस्, वसु, मरुत्, सत्वत्, दशार्ह, पिशाच, अशनि, कार्षापण इति पर्श्वादिः । वृकाट्टेन्यण्—वृकाः शस्त्रजीविसंघः वार्केण्यः । वार्केण्यौ । वृका. । टकारो ङ्यर्थः । वार्केणी ।

वाहीकत्वे नित्यं ञ्यटयवाहीकत्वे विकल्पेन प्राप्ते वचनम् ।

श्रीशमीशिक्याशालोर्णामत्वभिञ्जिद्विदभृतो गोत्रेऽणो यञ् ॥३।४।१४६॥ इह शस्त्रजीवि-संघादिति नास्ति । श्री शमी शिक्या शाला ऊर्णा इत्येतेभ्यो यो मतुप्रत्ययस्तदन्ताच्छ्रीमत्यादेरभिजित् विदभृत् इत्येताभ्या चाणन्तेभ्यो गोत्रे वर्तमानेभ्य. स्वार्थे त्रियंत्रप्रत्ययो भवति । श्रीमत्—श्रीमतोऽपत्यं श्रैमत्यः ।

---

१. ब्रेः क० म० । २. यौधेयाः, क० म० । ३. शौभ्रेयाः, क० म० ।

श्रैमत्यौ । श्रैमताः । शमीवत्—शामीवत्यः । शामीवत्यौ । शामीवताः । शिलावत्—शैलावत्यः । शैलावत्यौ । शैलावताः । शालावत्—शालावत्यः । शालावत्यौ । शालावताः । ऊर्णावत्—ऊर्णावत्यः । ऊर्णावत्यौ । ऊर्णावताः । अभिजित्—आभिजित्यः । आभिजित्यौ । आभिजिताः । विदभृत्—वैदभृत्यः । वैदभृत्यौ । वैदभृताः । गोत्र इति किम् ? श्रीमत इदं श्रैमतम् । अभिजितो मुहूर्तः आभिजितः । आभिजितः स्थालीपाकः । स्वार्थिकोऽयं यत् गोत्रेऽप्रत्य एव वर्तते । इति तदाश्रयः प्रत्ययो भवति । श्रैमत्यस्यापत्यं युवा श्रैमत्यायनः । आभिजित्यायनः । श्रैमतानां समूहः श्रैमतकम् । आभिजितकम् । श्रैमत्यस्य संबादि श्रैमतम् । आभिजितकम् ।

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने वृत्तौ तृतीयस्याध्यायस्य
चतुर्थः पादः समाप्तः समाप्तोऽध्यायस्तृतीयः ।

■

चतुर्थोऽध्यायः

[प्रथमः पादः]

गुपौधूपविच्छिपन्पणेरायः ॥४।१।१॥ गुपौ रक्षणे, धूप सन्तापे, विच्छि गतौ, पनि स्तुतौ, पणि व्यवहारे इत्येतेभ्य. आयप्रत्ययो भवति स्वार्थे । नित्याः शपीति वचनादेते विकल्पिता विषयः । गुप्तिर्गोपाया । जुगोप । गोपायाञ्चकार । गोपिता, गोपायिता । धूपिता, धूपायिता । विच्छिता, विच्छायिता । पनिता, पनायिता । पणिता, पणायिता । स्तुत्यर्थेन पनिना साहचर्यात्पणिरपि स्तुत्यर्थं एव प्रत्ययमुत्पादयति नान्य. । शतस्य पणते । सहस्रस्य पणते । अन्ये द्वौ पणो एधादिषु च । तत्र गुपौ इत्यादिभिः साहचर्यादेधादिरेवेह गृह्यते नेतर इत्याहुः । तेषां शतस्य पणायतीत्यपि भवति । एवं विच्छायति विच्छतीत्यपि । गुपावित्योकारोच्चारणं गुपि गोपन इत्यस्य निवृत्त्यर्थम् । तद्ग्रहणे ह्यायान्तादात्मनेपदं स्याद्यथा सनि जुगुप्सते इति । यङश्लुङ्निवृत्त्यर्थं वा ।

कमृतेर्णिङीयङ् ॥४।१।२॥ कमेः ऋतेश्च धातोर्यथासङ्ख्यं णिङ् ईयङ् इत्येतौ प्रत्ययौ भवतः स्वार्थे । कमिता । कामयिता । अर्तिता । ऋतीयिता ।

नित्याः शपि ॥४।१।३॥ आयादयो गुपादिभ्यः शपि प्रत्यये नित्या भवन्ति । गोपायति । धूपायति । विच्छायति । पनायति । पणायति । कामयते । ऋतीयते । शपि नित्यवचनाच्छपि भावेऽन्य पूर्वे विधयो विकल्पिताः । तथा चैवोदाहृतम् । बहुवचनं प्रत्ययत्रयपरिग्रहार्थम् अन्यथानन्तर एव विकल्प्येत ।

कित्तिज्गुपेर्भिषज्यादिक्षमानिन्द्ये सन् ॥४।१।४॥ किति तिज् गुप् इत्येतेभ्यो यथासंख्यं भिषज्यादौ क्षमायां निन्दायां चार्थे वर्तमानेभ्यः सन्प्रत्ययो भवति स्वार्थे । भिषज्यापारो भिषज्या व्याधिप्रतीकारस्तत्र ज्वरं चिकित्सेति । कुष्ठं चिकित्सति । आदिग्रहणात् क्षेत्रे चिकित्स्यानि तृणानि । विनेशयितव्यानीत्यर्थः । क्षेत्रे । चिकित्स्यः पारदारिक. निग्राह्य इत्यर्थः । विचिकित्सति सशेते इत्यर्थ. । तिज: क्षमायां-तितिक्षते । गुपो निन्दाया—जुगुप्सते । तिज्गुपोरनुबन्धकरणसामर्थ्यादात्मनेपदम् । भिषज्यादिक्षमानिन्द्य इति किम् ? सङ्केतिता । सङ्केतयति । सङ्केतकः । सङ्केतः । संङ्केतनम् । तेजयति, तेजः, तेजनं, तिग्मं, तीक्ष्णम् । गोपयति, गोपनम्, सनोऽकारनकारौ सन्ग्रहणेषु सामान्यग्रहणार्थौ ।

शान्दान्मान्बधान्निशानार्जवजिज्ञासावैकल्प्य ईक्षैः ॥४।१।५॥ शान् दान् मान् बध् इत्येतेभ्यः यथासंख्यं निशाने आर्जवे जिज्ञासायां वैकल्प्ये चार्थे वर्तमानेभ्यः सन्प्रत्ययो भवति ईकारश्चैषामभिकारस्यादेशो भवति । शीशासति । शीशासते । दीदांसति । दीदासते । मीमांसते । बीभत्सते । आशाविदितौ तेषामनुसन्-

---

१. तुदादिः, म० । २. उत्पाटयितव्यानीत्यर्थः । म० टि० । ३. शास वै–म० । ४. -तौ शेषाविदितौ, म० ।

करणसामर्थ्यात्सत्यात्मनेपदम्। अर्थोपादानं किम्? अर्थान्तरे न भवति। निशानम् अच्। मानिता मानयति। बाधयति।

धातोः कण्ड्वादेर्यक् ॥४।१।६॥ कण्डूञ् इत्येवमादिभ्यो धातुभ्यो यक्प्रत्ययो भवति स्वार्थे। कण्डूयति। कण्डूयते। मन्तूयति। वल्गूयति। असूयति। हूणीयते। धातोरिति किम्? कण्डूः कण्ड्वौ कण्ड्वः। मन्तुः, वल्गुः। कण्डूञ्, हूणीञ् इत्येवमादीनां दीर्घोच्चारणात्किरकरणाच्च कण्ड्वादेर्धातोः एवायं प्रत्ययो विज्ञायते न प्रातिपदिकात्। तत्र धातुग्रहणमुत्तरार्थमिह च विस्पष्टार्थं भवति। कण्ड्वादिषु अकार-ईकारावनुबन्धौ आत्मनेपदार्थौ। कण्डूञ्, मन्तु, वल्गु, असु, हूणीञ्, महीञ्, वेट लाङ्। इरस्, इयस्, इरच्, इषस्, मेधा, कुषुभ, मगध, तन्तस, पम्पस, सुख, दुःख, खपर, अरर, भिषज, भिष्णज्, इषुध, चरण, चुरण, तुरण, भुरण, पुरण, गद्गद, एला, केला, खेला, लिट्, लोट, इति कण्ड्वादिः।

चुरादिभ्यो णिच् ॥४।१।७॥ चुरादिभ्यो धातुभ्यो णिच्प्रत्ययो भवति स्वार्थे। चोरयति। लुण्ठयति। चिन्तयति। लक्षयति। लक्षयते। चेतयते। लक्ष्यादावयत्वे कृते लिङ्गं समुदायार्थम्, अवयवे कार्याभावात्। बहु-वचनमस्याकृतिगणता द्योतयति। तेन [2]संबाहयति इत्यादि सिद्धम्। णकार आकारार्थः णिग्रहणेषु ग्रहणार्थश्च। चकार सान्यग्रहणाविघातार्थः। चुर, लुण्ट, चिन्तु, यन्त्र, चूर्ण, स्फुट[3], क्रुद्, अँद, मिदु, स्निट, डुल, वल, डुअल, पोर[4], नट, अर्थ[5], वध[6], प्रवर्ध, ऊर्ज, इल, जुड़, चूर्ण, प्रथ, तस्क, भक्ष, चटु[7], छटु[8], कुद[9], चुद[10], अह, स्मिट, श्वठ, श्वठु, तुजु, पिदु[11], पिस, सान्त्व, श्वल्क, वल्का, श्लिष, पथु, पिच्छ, छद, श्रण, छर्द[12], खद, खदु, कदु[13], मदु, भदु, छर्द, बुस्त, चुर, नक्क, ठक्क, पसु, चक्क, चुक्क, अल[14], तल, तुल[15], बुल, स्तूप, मूल, दीप, कल, पिल[16], कुडु, जसु, पल, सूर[17], मुट[18], वज्र, शुल्ब, छप, क्षप, क्षुट्[19], श्वर्त, घट्ट[20], खट्ट, घूर, अस्त, थप, दीपु पीदु, पूण, पस, टकु, धूम[21], कीट, पूज शुठ, गज, मार्ज, घृ, पचु, तिज, कुन, कुबु, लुबु, तुबु, ह्लप, अक्ष, म्लेच्छ, सह[22], वट, जस, रुज, यूप, लूख[23], बर्ह, गर्द, पुर्व, अर्क, ईड, रुष। चर्च अध्ययने। बुक्क[24] आभाषणे। शब्द उपसर्गादिविष्कारे च। कण निमीलने। जभु नाशने। सूद आस्रवणे। जस ताडने। पशु बन्धने। आम रोगे। चटी स्फुटी चटी च हन्त्यर्थाः। दिवो आर्दने। आर्ज प्रतियत्ने। घुषु विशब्दने। आङः क्रन्दे। लस शिल्पयोगे। भूष अलङ्कारे। अर्ह पूजायाम्। ज्ञा नियोजने। यत निकारोपस्कारयोः। निरश्च श्वद प्रसहने। भज विश्राणने। वस स्नेहच्छेदावहरणेषु। चर संशये। ष्यु सहने। भू कृपोऽवकल्पने। रक रग आस्वादने। अञ्च विशेषणे। लिबु चित्रकरणे। मुद संसर्गे। त्रस धारणे। मुच प्रमोचने। आस्पदः सकर्मकात्। पुष दारणे। दल विदारणे। पट, पुट, लुट, तुजु, पिजु, भजु, पिसु, कुसु, दशु, लबु, त्रसु, कुशु, पटु, बृहु, गुप, धूप, विच्छ, चिब, बर्द, बल्ह, पुथ, लोकृ, लोचृ, नद, कूर, तर्क, ब्रूञ् भाषार्थाः। पूर आप्यायने। स्वद संवरणे। सूत्र, मूत्र, रुक्ष, ठक्क, कत्थ, चित्र, अंश, मिश्र, विद्र, कर्ण, अन्ध, दण्ड, अङ्क, अङ्ग, पर्ण, वर्ण, कथ, वर, गण, क्षर, स्वर, घट, वट, वृष, रह, स्तन, गदी, देव शब्दे। पत गतौ वा। पथ अनुपसर्गात्। स्वर आक्षेपे। रघ प्रतियत्ने। कल आगतौ। चह मह पूजायाम्। क्षार, कुप, श्रथ, दौर्बल्ये। स्पृह, भाम, सूच, श्वेड, श्वोड, गोम, कुमार, शील, साम, वेल, कालोपदेश पत्, पूल, वात, गवेष, वास, निवास, भज, समाज, ऊन, कूट, वेत, क्षाम, कुण, गुण, स्तेन, वटु, अलजु, पार, तीर, स्तोम, सुख, दुःख, तस, (रस) व्यय, रूप, छेद, लाभ, व्रण, पिजु, पटि, गृहि, मृगि, कुहि, शूरि, वीरि, स्थूलि—वृत्। अर्षी, सत्री, गर्वी, सङ्ग्रामि, चिति,

---

१. गुणेषु दोषमारोपयति, म० टि०। २. संबाधयति, म०। ३. स्फट, म०। ४. लद, म०। ५. पीड, म०। ६. अज, म०। ७. वध, म०। ८. चुटु, म०। ९. छुट, म०। १०. कट्ट, म०। ११. चुट अट्ट स्मि–म०। १२. पिजु, म०। १३. छड, म०। १४. कडुवदु म–म०। १५. क्षक शौचकर्मणि, म० टि०। १६. तुक उन्माने, म० टि०। १७. पिक, म०। १८. सूर्च, म०। १९. क्षुट सम्पूर्णने, म० टि०। २०. क्षदु म०। २१. घट्ट चलने, म० टि०। २२ धूप, म०। २३. सट्ट, म०। २४. लूर्च, म०। २५. बुक्कं भाषितं पुनः, म० टि०।

दंशि, दंशि, दसि, दृम्भि, दिम्भि, तन्त्रि, स्पशि, भर्त्सि, तर्जि, बर्हि, गन्धि, किटिक्, निटिक्, अलि, कूणि, तूणि, भ्रूणि, शरि, यक्षि, स्थामि, गूरि, कुस्मि, शमि, लक्षि आलोचने। कुत्सि अवक्षेपणे। कुदि प्रतापने। भलि आभण्डने। वञ्चि प्रलम्भने। वृषि शक्तिबन्धने। मदि तृप्तियोगे। दिवि परिकूजने। गृङ् विज्ञापने। विदि चेतनाख्याननिवासेषु। मनि स्तम्भे। युङ् जुगुप्सायाम्। गृङ् विज्ञापने लक्षी इति चुरादयः।

युजादेर्वा ॥४।१।८॥ युज् इत्येवमादिभ्यो धातुभ्यो णिच्प्रत्ययो वा भवति। योजयति, योजति। पर्वयति, पर्वति। साहयति, सहति। कलभेभ्यः परिभवम्। युज, पूज, सह, हर, लो, व्रज, जू, चरि, क्षिप विपूर्वोऽतिशये। नृप, क्षुद, छद, दृभै, मी, श्रथ, क्रथ, हिंसु, ग्रथ, क्लीक, शोक, आटिस्सद, जुष, ग्रन्थ, ग्रन्थ, आप्ल, तनू, उपसर्गाद्दैर्घ्यम्। वच भाषणे। मान पूजाया गर्हे। मार्ग, कुटु, मूजा, दृषा, मृषि, तपि, दृदि, अर्चि, अर्दि, शुन्धि, वृङ्, प्रीञ्, इति युजादिः।

भुवेः प्राप्तावणिः ॥४।१।९॥ भू इत्यतो धातोः प्राप्तावर्थे वर्तमानादणिप्रत्ययो वा भवति। भावयते, भवति—प्राप्नोतीत्यर्थः। भवतीत्येवान्यत्र। इ इति इकारस्तदर्थः। भुवेरितीकारनिर्देशेनेण्यभावेऽप्यस्य तङ् सूच्यते। तेन सिद्धं "याचितारश्च नः सन्तु, दातारश्च भवामहे। आक्रोष्टारश्च नः सन्तु, क्षन्तारश्च भवामहे॥" इति।

अटधाद्येकाज्झलादिभ्योऽरुचिशुचिभ्यां भृशाभीक्ष्ण्ये(ण्ये)यङ् ॥४।१।१०॥ अटधादिभ्य एकाज्यो हलादिर्धातुस्तस्माच्च रुचिशुचिवर्जितात् भृशे आभीक्ष्ण्ये चार्थे वर्तमानाद्यङ्प्रत्ययो भवति। गुणक्रियाणामधिश्रयणादीना क्रियान्तराद्व्यपेतानां साकल्येन सम्पत्तिः फलातिरेको वा भृशत्वम्। प्रधानक्रियाया विक्लेदादेः क्रियान्तराव्यवायो वृत्तिः पौनःपुन्यमाभीक्ष्ण्यम्। भृशं पुनर्वा। अटति, अटाट्यते। ऋच्छति, इयर्तीति वा। अरार्यते। अश्नुते, अशाश्यते। अर्णोति, ऊर्णोन्यते। सूचयति, सोसूच्यते। सूत्रयति, सोसूत्र्यते। मूत्रयति, मोमूत्र्यते। एकाज्झलादेः भृशमभीक्ष्णं वा पचति पापच्यते। पापठ्यते। देदीव्यते। जाज्वल्यते। वेत्येव। लुनीहि लुनीहीत्येवायं लुनाति। अटधार्त्यशौङ्घूर्णसूचिसूत्रिमूत्रयोऽटधादयः। अपरे भृशमश्नातीत्यशास्यते इत्याहुः। अपरे जागर्तेरपीच्छन्ति। जाजाग्रीयते सर्वस्मादप्रत्ययान्तादेकेषाम्। अवाव्यते। दादरिद्र्यते। अटधादिग्रहणमनेकाज्झलाद्यर्थम्। अत एवैकाज्झलादिग्रहणं समुदितं लक्षणं न प्रत्येकम्। एकाज्ग्रहणं किम्? भृशं पाचयति। हलादिग्रहणं किम्? भृशमीक्षते, भृशमीहते। अरुचिशुचिभ्यामिति किम्? भृशं रोचते, भृशं शोचते। भृशाभीक्ष्ण इति किम्? पचति।

गृलुप्सदहजबजभचर्दशगत्यर्थाभ्यां गर्ह्यकुटिलयोः ॥४।१।११॥ गृ लुप् सद् दह जब् जभ चर दश इत्येतेभ्यो गत्यर्थेभ्यश्च धातुभ्यो यथासंख्यं गर्ह्ये कुटिले चार्थे वर्तमानेभ्यो यङ्प्रत्ययो भवति। यथासङ्ख्यार्थ एव द्वित्वनिर्देशः। गर्हितं निगिरति, निजेगीर्यते। एवं लोलुप्यते। सासद्यते। दन्दह्यते। जब्जभ्यते। जब्जभ्यते। चञ्चूर्यते। दन्दश्यते। दशेति दंशेर्नलोपं कृत्वा निर्देशः। यङ्लुक्यपि नलोपार्थः। दन्दशीति। गत्यर्थेभ्यः। कुटिलं क्रमति चङ्क्रम्यते। दन्द्रम्यते। आवनीवच्यियोऽलरीवस्यश्वनि गतागतानि करोति स एवमुच्यते। नाप्राप्ते भृशाभीक्ष्णे यङ्यत्रायमारभ्यमाणं तं बाधते। तेन भृशं निगिरति भृशं कामयत इति यङ् न भवति। केचिदत्र भृशाभीक्ष्ण इत्यस्यानुवृत्तिमिच्छन्ति। तत्र सिद्धे विधिरारभ्यमाणो नियमार्थो भवतीति शुद्धे भृशाभीक्ष्णे न भवति। जङ्गम इति लक्षणया स्थावरविपक्षमात्रमुपादाय वर्तते। रूढिशब्दोऽयम्। रूढिशब्दाश्च रूढिवशादेव वर्तन्ते न सम्बन्धवशात्।

श्लुक् बहुलम् ॥४।१।१२॥ यङः श्लुग्बहुलं भवति। बोभूयते। बोभोति, बोभवीति। रोरूयते, रोरोति। रोरवीति। लालप्यते। लालप्ति। लालपीति। बहुलग्रहणं प्रयोगानुसरणार्थम्।

अचि ॥४।१।१३॥ अचि प्रत्यये परे यङः श्लुगुनित्यं भवति। चेक्यः। चेक्रियः। लोलुवः। लोलुवः। मरीमृजः। सनीस्रंसः। धनि(दनी)ध्वंसः। नित्यार्थं वचनम्।

---

१. व्यवायो व्यवधावपि, इत्यभिधानम्, म० टि०।

नोतः ॥४।१।१४॥ उकारान्ताद्विहितस्य यङोऽपि परे श्लुक् न भवति । योयूयः । रोरूयः ।

प्रयुज्याप्याण्णिङ्वा ॥४।१।१५॥ प्रयुज्याप्यार्थाद्धातोर्णिङ्प्रत्ययो भवति वा । प्रयोगः प्रवृत्तिकरणं प्रेरणम् । तत्प्रेषणाध्येषणनिमित्तभावाख्यानाभिनयज्ञानप्राप्तिभेदैरनेकधा भवति । देवदत्तस्य कटस्य करणं प्रयुङ्क्ते देवदत्तं कटं कारयति । देवदत्तस्यासनं प्रयुङ्क्ते देवदत्तमासयति । देवदत्तेनौदनस्य पाकं प्रयुङ्क्ते देवदत्तेनौदनं पाचयति । अत्र प्रेषणेनाध्येषणेन वा प्रयोगाः । भिक्षावासं प्रयोजयन्ति भिक्षावासयन्ति । कारीषोऽग्निरध्यापयति, अत्र निमित्तभावेन । राजागमनं प्रयुङ्क्ते राजानमागमयति । मृगान् रमयति । रात्रिं विवासयति कपकः । अत्राख्यानेन हि बुद्धिस्थ.गमनादिप्रयुक्तं प्रतीयते । कंसस्य वधं प्रयुङ्क्ते कंसं घातयति । बलिं बन्धयति शोभनिकः । अत्राभिनयेन । पुष्पेण योगं प्रयुङ्क्ते । पुष्पेण प्रयोजयति । मणिभिर्योजयति मणकः । अत्र ज्ञानेन । उज्जयिन्याः प्रदोषे प्रस्थितो माहिष्मत्यां सूर्योद्गमनं प्रयुङ्क्ते माहिष्मत्यां सूर्यमुद्गमयति । पाटलीपुत्रात्प्रस्थितः उज्जयिन्यां सूर्यं पातयति देवदत्तः । अत्र प्राप्त्या । प्रयोज्येति किम् ? पाकं विहन्ति । आप्यादिति किम् ? पाकेन प्रयुङ्क्ते वेति वाक्यार्थम् । देवदत्तं पाचयति । देवदत्तं कटं कारयति । देवदत्तमासयतीत्यादौ क्रियायाः प्रयोज्यत्वे कर्तुर्यत्नात्कर्मत्वम् । देवदत्तेनौदनं पाचयति जिनदत्त इति यत्नाभावाद्देवदत्तः पचिकर्ता न लकारेणोक्त इति तृतीया प्रयुजिकर्ता तु लकारेणोक्तः ।

कम्येककर्तृकात्सन्नतत्सनः ॥४।१।१६॥ वेति वाक्यार्थमनुवर्तते । कमेराप्यादातोः कमिनैवैककर्तृकात् साधारणकर्तृकात् कम्यर्थे इच्छायां सन्प्रत्ययो वा भवति । अतत्सनः । न चेत्स कमि यो विहितः सन् तदन्तो भवति । कर्तुं कामयते इच्छति चिकीर्षति । जिहीर्षति । कमीति किम् ? कर्तुं शक्नोति । कुलं पिपतिषति । इवा मुमूर्षतीत्युपादानाद्यथा वाक्यं भवति । कुलं पतितुमिच्छति इवा मर्तुमिच्छतीति । एककर्तृकादिति किम् ? देवदत्तस्य गमनमिच्छति । अतत्सन इति किम् ? चिकीर्षितुमिच्छति । तदग्रहणं किम् ? चिकित्सिषति । शिक्षांसिषति । आप्यादिति किम् ? गमनेनेच्छति । सनोऽकारः किम् ? प्रतोषिषति । नकारः सन्ग्रहणेषु विशेषणार्थः ।

सुपः कर्तुः काम्यः ॥४।१।१७॥ सुबन्तात्काम्याप्यात्कर्तुरात्मनः कामयितुरेव सम्बन्धिनः कम्यर्थे काम्यप्रत्ययो वा भवति । आत्मनः पुत्रं कामयते इच्छति पुत्रकाम्यति । वस्त्रकाम्यति । इदं काम्यति । स्वः काम्यति । आत्मार्थो वृत्तावन्तर्भूतः इति आत्मशब्दो न प्रयुज्यते । सुप इति किम् ? आत्मनो गमनमिच्छति । अत्रात्मोपाधिके धातोः काम्यं स्यात् । महान्तं पुत्रमिच्छति । अत्र समुदायसमुदायिनोरभेदनये समुदायोऽपि कर्मेति काम्ये कृते न्यग्भूतयोः । परस्परमसामर्थ्यसमासोऽन्येत्युत्तरपदलक्षणमात्रं न स्यात् । महापुत्रकाम्यतीति समासोऽप्रत्ययः । कर्तुरिति किम् ? अमुमिच्छति, दुःखमिच्छति । अत्र परस्येच्छति । आत्मनः पुत्रं भोजयितुमिच्छति । महान्तं पुत्रमिच्छतीत्यत्र सापेक्षस्यासामर्थ्यान्न भवति । क्यच्काम्यान्तकर्मवत्कर्मकमिति तस्यापि महान्तमिति कर्म भवति । धातूनां सकर्मकत्वेऽकर्मकत्वे च प्रयोग प्रमाणम् ।

क्यच्वामाव्ययात् ॥४।१।१८॥ सुबन्तादाप्यादात्मनः काम्ये क्यच्प्रत्ययो भवति काम्यश्च । यद्यसौ सुप् मकारान्तोऽव्ययाच्च न भवति । पुत्रमात्मन इच्छति पुत्रीयति । वस्त्रीयति । वाक्यति । स्वक्यति । चकारः काम्यार्थः । अन्यथा मान्ताव्यययोः । सावकाशो वोभ्येन प्रकृतश्च वाऽधिकारो वाक्यार्थः । अमाव्ययादिति किम् ? इदमिच्छति । किमिच्छति । स्वरिच्छति । ककारो समुच्चय इति सामान्यग्रहणार्थः । चकारः सामा(न्य)ग्रहणाविघातार्थो विशेषणार्थो वा ।

गौणादाचाराच्चाचरि ॥४।१।१९॥ गुणाद्विषयान्तरमागतो गौणः । यथा गौर्वाहीक इति । तस्मात्सुबन्तादमाव्ययादाचरेराप्यादाचाराच्चाचर्यर्थे क्यच्प्रत्ययो भवति वा । पुत्रमाचरति पुत्रीयति छात्रम् । वस्त्रीयति कम्बलम् । आचारात्—कुट्यां प्रासाद आचरति । प्रासादीयति कुटयाम् । पर्यङ्कीयति मञ्चके । गौणादिति किम् ? छात्रादेर्न भवति । आचाराच्चेति किम् ? परशुना दात्रेणेवाचरति । आचारोऽपि कर्मतया शक्यते विवक्षितुं तस्यानुप्रयोगे कुट्यामिति सप्तमी न सङ्गच्छते इति आचारग्रहणम् ।

कर्तुः क्विप् ॥४।१।२०॥ गोणादाचरोति वर्तते । गोणादाचरेः कर्तुः सुपः आचर्यर्थे क्विप्प्रत्ययो भवति वा । अयमप्रयोगे । अश्व इवाचरति अश्वति । गर्दभति । पुरुषति । कर्तुरिति किम् ? पुत्रीयति छात्रम् ।

गल्भक्लीबहोडाङ्क्विप् ॥४।१।२१॥ गल्भ क्लीब होड इत्येतेभ्य आचरिकर्तृभ्यः आचर्यर्थे क्विप्-प्रत्ययो ङिद् भवति । अवगल्भते । अवगल्भांचक्रे । विक्लीबते । विक्लीबाञ्चक्रे । विहोडते । विहोडाञ्चक्रे ।

क्यङ्क्यङ् ॥४।१।२२॥ गोणादाचरि कर्तुरिति वर्तते । गोणादाचरति कर्तुः सुप आचर्यर्थे क्यङ्-प्रत्ययो भवति । काकः श्येन इवाचरति काकः श्येनायते । अश्वायते । गर्दभायते । पुरुषायते । अवगल्भायते । विक्लीबायते । विहोडायते । क्विप् क्यङोरनन्यविषयत्वाद्विकल्पः । पकारः पुम्भावार्थः । अतद्धितेऽप्यनु-बन्धकरणसामर्थ्यात्पुम्भावः । एनी–एतायते । श्येनी[1]–श्येतायते ।

तद्वत्योजसः ॥४।१।२३॥ ओजः[2] शब्दाद् यः क्यङ् स तद्वति ओजस्विनि वर्तमानाद्भवति । ओज[3]-स्विनीवाचरति ओजायते । ओजस्यते । अनोजस्वी ओजस्वी भवति ओजायते । तद्वतीति किम् ? ओज इवाचरति अनोजः ओजो भवति । परिभाषेयम् । इहाचरीति न सम्बध्यते । स्त इति सकारग्रहणार्थः ।

सो वा लुक्च ॥४।१।२४॥ सकारान्तस्य गोणस्य कर्तुः सुपः आचरि क्यङ्प्रत्ययो भवति लोपश्च वा । पयायते । पयस्यते । क्यङ्सिद्ध लुगर्थं वचनम् । चकारो लुचः क्यङ्सन्नियोगार्थः ।

अप्सरसः ॥४।१।२५॥ अप्सरसः क्यङ्सन्नियोगे नित्यं लुग्भवति । अप्सरायते ।

भृशादेरच्वौ स्तः ॥४।१।२६॥ भृश इत्येवमादेः सुबन्तात्कर्तुः च्वौ च्व्यर्थे प्रागतस्तद्भावे क्यङ्-प्रत्ययो वा भवति तत्सन्नियोगे च स्तः सकारतकारान्तस्य लुग्भवति । अभृशः भृशो भवति भृशायते । शीघ्रायते । उन्मनायते । अभिमनायते । रेहायते । वेहायते । उत्सुकायते । कर्तुरिति किम् ? अभृशं भृशं करोति । अत एव शेषस्य स्वशब्देनोक्तेऽच्वौ प्रागतस्वमात्रेऽपि लक्षणया प्रागतस्तद्भावे क्यङ् । अर्थ-भेदात् च्वेरपि भवति । च्वाविति किम् ? क्व भृशा भवन्ति ? अत्र ये भृशास्ते क्व भवन्तीत्यर्थः । न स्वभृशा भवन्तीति । भृशीभवन्तीत्यत्र च्विनैव सोऽर्थ उक्त इति न भवति । भृश, शीघ्र, चपल, पण्डित, उत्सुक, उन्मनस्, अभिमनस्, सुमनस्, दुर्मनस्, वर्चस्, ओजस्, रेहत्, वेहत्, रेफट्, संदंशत्, नृषत्, शुचि, अण्डर, नील, वध्र, फेन, हरित, मन इति भृशादिः ।

निद्रादिडाज्भ्यो धर्मिणि कषप् ॥४।१।२७॥ निद्रादिभ्यो डाजन्तेभ्यश्च धर्मिणि वर्तमानेभ्यः सुबन्तेभ्यः कर्तृवाचिभ्यः च्व्यर्थे कषप्प्रत्ययो भवति । अनिद्रो निद्रावान् भवति निद्रायति । निद्रायते । निद्राशब्दोऽत्र वृत्तौ धर्मिविषय । एवं कृपायति । कृपायते । करुणायति । करुणायते । अलोहितो लोहितो भवति । लोहितायति । लोहितायते । अचर्म चर्म भवति चर्मायति । चर्मायते । निद्रादयः प्रयोगगम्याः । डाच्-अपटत्पटद्भवति पटपटायति । पटपटायते । दमदमायति । दमदमायते । डाजन्तात्कषप् । वचनात्कुम्भस्ति-भिरिव कषपापि योगे डाज्भवति । धर्मिणीति किम् ? धर्ममात्रवृत्तेर्माभूत् । निद्रा भवति । कर्तुरिति किम् ? निद्रावन्त करोति । द्वितीयाकरोति क्षेत्रम् । च्व्यर्थेति किम् ? निद्रावान्भवति । लोहितोभवतीत्यत्र च्विनैव सोऽर्थो गत इति न भवति । ककारो नङ् कष इति सामान्यग्रहणार्थः । षकारस्तदविघातार्थः विशेषणार्थो वा ।

णिज्बहुलं कृआदिषु ॥४।१।२८॥ सुप इति वर्तते । सुबन्तात्कृआदीनां धातूनामर्थे बहुलं णिज्भवति । बहुलग्रहणं प्रयोगानुसरणार्थम् । तेन यस्माच्छब्दाद्यत्सुबन्ताद्यस्मिन् भात्वर्थे दृश्यते तस्मात्सुबन्तात्तद्धात्वर्थे एव भवतीति नियमो लभ्यते । सूत्रं करोति सूत्रयति व्याकरणम् । चर्चयति पारायणम् । मुण्डयति माणवकम् । मिश्रयति ओदनम् । इक्षणयति वस्त्रम् । लवणयति सूपम् । छिद्रयति । कर्णयति । अम्बयति । वण्डयति । अङ्कयति । व्रतं करोति व्रतयति । पयोव्रतयति पय एव भुङ्क्त इत्यर्थः । सावद्यं व्रतयति सावद्यं न भुङ्क्त

---

१. शोणश्येतैतहरितभरतलोहितादूर्णास्तो नश्च, इति की तो नश्च । म० टि० । २. ओजस्तु तेजो घ तूनां शुक्रान्तानां परं स्मृतम्, म० टि० । ३. तमिस्राणबोर्जलकेरवादिना साधुः । म० टि० ।

एवेत्यर्थः । मुण्डं बलीवर्दं करोतीत्युभयपदधर्मविधाने मुण्डं शुक्लं करोतीत्यनुवादे चानभिधानान्न भवति । कृतं गृह्णाति कृतयति । त्रपयति । तूस्तानि विहन्ति वितूस्तयति । तूस्तान्युद्धन्ति उत्तूस्तयति केशान्, विजटीकरोतीत्यर्थः । पाशं विमोचयति विपाशयति । रूपं दर्शयति रूपयति । लोमान्यनुमार्ष्टि अनुलोमयति । पटुमाचष्टे पटयति । वृक्षमाचष्टे वृक्षयति । तृणान्युद्धृत्य दात्रेयति उत्तृणयति । वस्त्रेण समाच्छादयति संवस्त्रयति । वीणया उपगायति उपवीणयति । तूलैरनुकृणाति अनुतूलयति । श्लोकैरुपस्तौति उपश्लोकयति । सेनया अभियाति अभिषेणयति । वर्मणा सन्नह्यति संवर्मयति । वास्या छिनत्ति वासयति । परशयति । अशयति । अश्वेनातिक्रामति अत्यश्वयति । अतिहस्तयति । आख्यानमाचष्टे इत्यत्र बहुत्ववचनान्न भवति ।

श्वेताश्वाश्वतरगालोडिताह्वारकस्याश्वतरेतकलुकच ॥४।१।२९॥ श्वेताश्व अश्वतर गालोडित आह्वारक इत्येतेषां णिच्सन्नियोगे यथासङ्ख्यम् अश्व तर इत क इत्येतेषा लुग्भवति । श्वेताश्वमाचष्टे श्वेतयति । अश्वतर–अश्वयति । गालोडित–गालोडयति । आह्वारक–आह्वारयति । चकारो लुको णिच्सन्नियोगार्थः । णिच् तु पूर्वेणैव सिद्धः ।

हलिकल्योरः ॥४।१।३०॥ हलि कलि इत्येतयोर्णिच्सन्नियोगे अकारादेशो भवति । हलिमग्रहीत् अजहलत् । कलिमग्रहीत् अचकलत् । हलिकल्योरिति किम् ? अपोपटत् । अलीलघत् । हलिकल्योरप्येतत्सिद्धम् । हलिकुल्यो रूपान्तरनिवृत्त्यर्थमत्ववचनम् । अत्वे हुको लुगित्यनग्लुच्युच्यमानः सन्नद्भावो न भवति । अत्वाभावे तु परत्वाण्णिच्चेङ्येङो लुग्वाल्लुगिति स्यात् । अत एव वचनादाधातुप्रत्ययेऽप्येङ् । अन्ये यथाकथञ्चिदको निवृत्तिरग्लुक् । तत्रेङ्यादिदृश्यमानेऽको निवृत्तिरस्तीति प्रतिषेधो भवत्येव । अचीकरदपीपचदित्यत्र ह्रस्वादिभावे सन्वद्भावस्यासम्भवात् । ह्रस्वादेशो निमित्तमेव सन्वद्भावस्येति भवति लुक्चेङः प्रवृत्तिमेवोच्छिनत्ति एङ् तु शब्दान्तरं प्रापयतीति । लुगेङादेशयोरनित्यतापि न तुल्येति लुचैव भवितव्यम् । तेन अजहलत् । अचकलत् । अपपटत् । अललघदित्येव भवतीत्याहुः । तच्च प्रतिक्षिप्तम् । अपीपठत् । अलीलघदित्येव गजपथः ।

सत्यार्थवेदस्याः ॥४।१।३१॥ सत्य अर्थ वेद इत्येतेषा णिच्सन्नियोगे आकारादेशो भवति । सत्यमाचष्टे सत्यापयति । अर्थापयति । वेदापयति । णावाद्यविधौ धात्वधिकारान्न क्रियते ।

निरस्यङ्गेभ्यः कर्मणो णिङ् ॥४।१।३२॥ अङ्गेभ्यः शरीरावयववाचिभ्य. सुबन्तेभ्यः कर्मभूतेभ्यः निरसिक्रियायां णिङ्प्रत्ययो भवति । णिचोऽपवादः । हस्तं निरस्यति हस्तयते । पादयते । निरसीति किम् ? हस्तं करोत्याचष्टे वा हस्तयति । पादयति । कर्मण इति किम् ? हस्तेन निरस्यति । प्रत्येकमभिसम्बन्धादेकवचनम् ।

पुच्छभाण्डाद्दस्तमाचौ ॥४।१।३३॥ पुच्छ भाण्ड इत्येताभ्या कर्मवाचिभ्या यथासंख्यम् अस्यत्यर्थे समाचिनोत्यर्थे च णिङ्प्रत्ययो भवति । पुच्छमस्यति पुच्छयते पुच्छमुदस्यति उत्पुच्छयते । पुच्छं पर्यस्यति परिपुच्छयते । पुच्छं व्यस्यति विपुच्छयते । भाण्डं समाचिनोति सम्भाण्डयते । परिभाण्डयते ।

चीवरात्परिधाज्र्योः ॥४।१।३४॥ चीवरशब्दात् कर्मणः परिदधातेरर्जेश्चार्थे णिङ्प्रत्ययो भवति । चीवरं परिदधते अर्जयति वा संचीवरयते । परिचीवरयते ।

सत्रकक्षकष्टकृच्छ्रगहनात्पापे चिकीर्षौ क्यङ् ॥४।१।३५॥ सत्र कक्ष कष्ट कृच्छ्र गहन इत्येतेभ्यः कर्मभ्यः पापे वर्तमानेभ्यः चिकीर्षौ चिकीर्षेऽर्थे क्यङ्प्रत्ययो भवति । सत्रं चिकीर्षति सत्रायते । पापं कर्तुमिच्छतीत्यर्थः । एवं कक्षायते । कष्टायते । कृच्छ्रयते । गहनायते । ककारो यङो भेदार्थः । पाप इति किम् ? सत्रं चिकीर्षति ।

---

१. –प्युल्लुप्य शा–म० । २. शद्लृ शातने वा सञ्जोर्विधूनागत्यो अकस्यावितिं शादेशः म० टि० । ३. कोकिलाकलिस्वानैरकिञ्चारवजृम्भितैः । अभिषेणयतीवोच्चैर्मनोभूर्भुवनत्रयम् । म० टि० । ४. तक्षकशस्त्रेण 'वासी स्याद्दात्रलूनि' इत्यभिधानम् म० टि० ।

वाष्पोष्मफेनादुद्वमति ॥४।१।३६॥ वाष्प उष्म फेन इत्येतेभ्यः कर्मभ्य उद्वमत्यर्थे क्यङ्प्रत्ययो भवति । वाष्पमुद्वमति वाष्पायते । धूमाय्यन्त इवाश्लिष्टाः प्रज्वलन्तीव संहताः ।

सुखादेर्भुजि ॥४।१।३७॥ सुखादिभ्यः कर्मभ्यो भुज्यर्थे क्यङ्प्रत्ययो भवति । सुखादिमतोऽनुभवो भुज्यर्थः । सुखं भुङ्क्ते सुखायते । दुःखायते । भुजेरिति किम् ? सुखं वेदयते प्रसादको देवदत्तस्य । नेयमानुमान्यको वेदना भुज्यर्थ. । यथा ह्योदनं भुङ्क्ते इति भोजने रसाद्यनुभवः तथाविधः सुखाद्यनुभवोऽत्र भुज्यर्थः । सुख, दुःख, तृप्र, कृच्छ्र, आल, अलीक, करुण, कृपण, साध, प्रतीप इति सुखादिः ।

शब्दादेः कृञि वा ॥४।१।३८॥ शब्दादिभ्यः कर्मभ्य कृञि करोत्यर्थे क्यङ्प्रत्ययो वा भवति । शब्दं करोति शब्दायते । वैरायते । शब्दयति । वैरयति । शब्द, वैर, कलह, अभ्र, कण्ड, मेघ, सुदिन, दुर्दिन, नीहार, अटा, अट्टा, अटाटया, शोका, कोटा, पोटा, शोका, सोटा, प्रष्टा, दीर्घ[1], वेग, युद्ध, इति शब्दादिः ।

रोमन्थादुच्चर्वणे ॥४।१।३९॥ उच्चर्वणे वर्तमानाद् रोमन्थशब्दात् कर्मणः करोत्यर्थे क्यङ्प्रत्ययो भवति । अभ्यवहृतस्योद्गीर्य चर्वणमुच्चर्वणम् । रोमन्थनं रोमन्थ. । तं करोति रोमन्थायते गौः । उच्चर्वण इति किम् ? रोमन्थं करोति कीटः । गवादीनामुद्गीर्णं वा द्रव्यं वर्तयतीत्यर्थः ।

नमोवरिवस्तपसः क्यच् ॥४।१।४०॥ नमस् वरिवस् तपस् इत्येतेभ्यः कृजर्थे क्यच्प्रत्ययो भवति । नमस्करोति नमस्यति देवान् । पूजयतीत्यर्थः । वरिवस्यति गुरुन्—सपर्यति, परिचरतीत्यर्थः । तपस्यति, तपश्चरतीत्यर्थ. । नमः करोति । वरिव करोति । तपः करोति । नम इत्यादिशब्दरूपमुच्चारयतीत्यत्रानभिधानान्न भवति । पुत्रीयपुत्रकाम्यादयः । सुबन्तोपादाना. क्रियार्था धातवो जीवत्यादिवत् तिरोहितसाध्यसाधनप्रविभागा यथाकथञ्चिद् व्युत्पाद्यन्ते । तत्र पृथगवयवार्थाभावान्नमस्यति देवानिति नम शब्दयोगनिबन्धना चतुर्थी न भवति । अन्तरङ्गत्वादुपपदविभक्तेः कारकविभक्तिर्बलीयसी भवति । तथा देवेभ्यो नमोऽस्त्विति चतुर्थी, मावकाशेति ऊरीकरोत्यर्थमित्यादिवद्वाक्येऽपि नमस्करोति देवानिति द्वितीया भवति ।

चित्रङो विस्मये ॥४।१।४१॥ चित्रङ इत्येतस्मात्कर्मणो वर्तमानात् कृजर्थे क्यच्प्रत्ययो भवति । चित्रं करोति चित्रीयते । विस्मयं करोतीत्यर्थ. । विस्मय इति किम् ? चित्र करोति । ङकारः आत्मनेपदार्थः ।

ह्रस्वस्य तक् पिति कृति ॥४।१।४२॥ ह्रस्वस्य पिति कृति परे तगागमो भवति । अग्निचित् । सोमसुत् । प्रकृत्य । प्रहृत्य । सुत्वा[2] । सुत्वानौ । सुत्वान. । ह्रस्वस्येति किम् ? लोलूय । पितीति किम् ? चितम् । स्तुतम् । कृतीति किम् ? पचति । ग्रामणीकुलमित्यत्रासिद्धं बहिरङ्गमन्तरङ्गे, इति न भवति । सुप्तः । उपशूय । पिपरीरित्यादौ परत्वाद्गिदीर्घादि भवति ।

द्विर्धातुः श्लुलिङ्डेप्रत्यये प्राक्त्वच्यचः ॥४।१।४३॥ श्लुपि लिटि ङे च प्रत्यये परे धातुर्द्विर्भवति प्राक्त्वच्यचः । अजादौ तु तन्निमित्तादच्कार्यात्प्रागेव भवति । जुहोति । बिभेति । इयाय । आर । पपाच । पपाट । अशिश्रियत् । असुस्रुवत् । धातुरिति किम् ? प्राशीश्रियत् । कारयाञ्चकार । वेत्तेः किद्वचनादामि न भवति । दयाञ्चक्रे । विद्याञ्चकार । श्लुव्यद्वचनादिह न भवति । बिभयाञ्चकार । बिभराञ्चकारेति । श्लुलिङ्डे इति किम् ? ग्रामणीलिटधति । प्राग्वचन किम् ? निनाय । लुलाव । बिनयिथ । लुलविथ । निन्यतुः । निन्युः । चक्रतुः । चक्रुः । पपौ । पपतुः । पपुः । जग्मतुः । जग्मुः । अदधत् । तुशब्दो विशेषणार्थः । प्राग्भावस्त्वचि न तु द्विर्भावः स ह्यविशेषेणेति । अचीति किम् ? दिदीवान् । शिशीवान् । जेघ्नीयते । देघ्मीयते । अच इति किम् ? शुशाव । शुशुवतुः । शुशुवुः । आपिप्ये । आपिप्याते । आपिप्यिरे । अचिकीर्तत । तितवतीत्यत्रातन्निमित्तत्वान्न भवति । अवतुतावयिषति 'ओः पुयण्ज्य' इति वचनात् पुयजवदवर्णपरे णिनिमित्तादपि भवति । जग्ले । मम्लके इत्यनिमित्तकमात्वम् । अधिजग इति विषय आदेशः । प्राक्त्वच्यच इति यावद् द्विर्वचनमविक्रियत अन्यथा ह्याटीट इत्यादि न सिद्धयति ।

---

१. –दुद्वमि म० । २. दीघ म० । ३. सुत्वा स्वमिषधातूर्ध्वम् म० टि० ।

आद्येकाच् ॥४।१।४४॥ योऽनेकाच् धातुस्तस्यादिरेकाचोऽवयवो लिङ्डे द्विर्भवति । अजागार । अचाकरत् । अजीहरत् । पूर्वेण सर्वस्य प्राप्ते वचनम् ।

सन्यङश्च ॥४।१।४५॥ सनन्तस्य यङन्तस्य च धातोरवयव आद्येकाच् द्विर्भवति । दिधक्षति । पिपक्षति । पापच्यते । वेक्रीयते । देध्मीयते । स्तेतेस्तीर्यते । निपोपूर्यते । प्राक्त्वच्यच इति यावद् द्विर्वचनमधिक्रियते । षष्ठीनिर्देश उत्तरार्थः । चकारो लिङ्डे चेति समुच्चयार्थ उत्तरार्थ एव ।

सुपः ॥४।१।४६॥ एकाज्ग्रहणमनुवर्तते । नादिग्रहणमादेः पूर्वेणैव सिद्धत्वाद् । सुबवयवस्य धातोः सन्यङन्तस्य लिङ्डे परतः पूर्वस्य च यः कश्चिदेकाजवयवः स एको द्विर्भवति । पुपुत्रीयिषति । पुत्रीयिषति । पुत्रीयिषिषति । पुत्रीयां (यन्त) प्रायुङ्क्त अपुपुत्रीयत् । अपुत्रीयत् । अपुत्रीयियत् ।

नाद्यच् ॥४।१।४७॥ सुब्धातोरादिरच् न द्विरुच्यते । अश्वीश्वीयिषति । अश्वीयिषति । अश्वीयिषिषति । पूर्वेण प्राप्तिः प्रतिषिध्यते । अत एव प्रतिषेधात् परमपि सुब्धातोस्तत इत्येतन्न भवति ।

ततः ॥४।१।४८॥ तत इत्यादच् परामृश्यते न सुप इति नाद्यच इति प्रतिषेधात् । अनेकाचो धातोरजादेः सन्यङन्तस्य च लिङ्डेपूर्वस्य चादेरच. पर एकाच् द्विर्भवति । आदिद्विर्वचनापवादः । अदीधिषति । अशीशिषति । अटाटघते । अशाश्यते । प्राक्त्वच्यच इत्येव । प्रोर्णुनविषति । प्रोर्णुनाव । प्रोर्णुनवत् । आटिटत् । आशिशत् । अजादौ सनिति विज्ञानादिह न भवति । दुद्यूषति । अजादौ सनि परे तत एकाजिति विज्ञानादिह न भवति । अरीरिषति । अरीरीषति ।

न बन्द्रा वलि ॥४।१।४९॥ ततः आदेरचः परे बकारनकारदकाररेफाः बल्पराः सन्यङन्तस्य च लिङ्डेपूर्वस्य च न द्विर्भवन्ति । उब्जिब्जीषति । अब्जिब्जीषति । इन्दिन्दीषति । उन्दिन्दीषति । अद्रिद्रीषति । अर्चिचिषति । प्रोर्णुनाव । प्रोर्णोनूयते । प्रोर्णुनविषति । औब्जिब्जत् । आब्जिब्जत् । ऐन्दिधत् । अट्रिट्रत् । आद्रिद्रत् । आर्चिचत् । प्रोर्णुनवत् । बन्द्रा इति किम् ? चेईचिक्षिषते । वलीति किम् ? अरिरिषति । अरार्यते । तत इति किम् ? दिद्रासति । इन्द्रिद्रीयिषति । अत्र दकारो नावः परः इति तस्य प्रतिषेधो न भवति ।

द्विरेकेषाम् ॥४।१।५०॥ एवेषामाचार्याणां द्विर्द्विर्न भवति । द्विरुक्तस्य द्विर्वचनं न भवतीत्यर्थः । लोलूयिषते । पोपूयिषते । अन्येषां भवत्येव । सुसोषुषिषते, अभिसुसोसुषिषते, (अभिसुसोपूयिषते) । प्राणिनिनिषत् ।

यकस्तृतीयः ॥४।१।५१॥ यगन्तस्य कण्ड्वादेर्धातोः सन्यङन्तस्य लिङ्डे च पूर्वस्य तत आदेरचस्तृतीय एकाच् द्विर्भवति । तत इत्यस्यापवादः । असूयियिषति । असूयियत् । केषाञ्चित् तत इति नानुवर्तते । कण्डूयियिषति ।

ईर्ष्यः ॥४।१।५२॥ ईर्ष्यतेः सन्यङन्तस्य लिङ्डेपूर्वस्य तृतीयो हलेकाच् द्विर्भवति । अचस्तृतीयस्यासम्भवात् तृतीयहल्परिग्रहः । तृतीयस्य वर्णस्य रेफद्विर्वचननिषेधात् सिद्धम् । ईर्ष्यियिषति, ऐर्ष्यियत् ।

सन्वा ॥४।१।५३॥ ईर्ष्यतेः सन् वा तृतीय एकाच् द्विरुच्यते । ईर्ष्यियिषति, ईर्ष्यियिषति ।

चरिचलपतिवदोऽचि ॥४।१।५४॥ चरि चलि पति वदि इत्येते धातवोऽचि प्रत्यये परे द्विर्वा भवन्ति । चरतीति चरः । चराचरः । चलतीति चलः । चलाचलः । पततीति पतः । पतापतः । वदतीति वदः । वदावदः ।

घनाघनपटूपटम् ॥४।१।५५॥ घनाघनपटूपटौ निपात्येते । घनाघनेति हन्तेरचि द्विर्वचनं घत्वं च निपात्यते । आकारस्त्वव्यागित्येव सिद्धः । हन्तीति घनाघनः । घनः । पटूपटेति पाटेरचि णेः लुग् द्विर्वचनम् । पूर्वस्य चागपवादः । ऊगागमः । पाटयतीति पटूपटः । पाटः । केषाञ्चित् पाटूपट इति दीर्घो निपात्यते ।

---

१. आद्रिद्रत्, म० ।

चिक्लिदश्वकनसदाश्वत्साह्वमीढ्वत् ॥४।१।५६॥ चिक्लिदादयः शब्दाः कादौ प्रत्यये परे द्विर्वचनादिभावाभावाभ्यां निपात्यन्ते। चिक्लिदेति क्लिद्यतीति चिक्लिदः, इगुपान्त्यलक्षणः कः। वनस्यतीति वक्वनः। ण्वुतृच्। उभयत्र घञर्थे वा कः। चक्रंयुः[1]। [2]बभुरित्यादीन्यभ्युत्तराणि। दाश्वदिति दाश्वान् दाश इत्यस्य वसाविड्[3]द्विर्वचनस्य चाभावः। दाश्वान्। साह्वदिति सहेः परस्मैपदोपान्त्यदीर्घत्वे च साह्वान्। मीढ्वदिति मीहेरद्वित्वमनिट्त्वमुपान्त्यदीर्घत्वं ढत्वं च मीढ्वत्।

सीर्धीप्लीप्सन्यृधाव्ह्वपेर्न च ॥४।१।५७॥ ऋध् आप् क्ष्णु इत्येतेषां धातूनां सकारादौ सनि परे यथासङ्ख्यम् ईर्ध ईप् क्ष्णीप् इत्येते आदेशा भवन्ति। न च द्विः द्विश्चैषामेकाज् न भवति। न चेत्यादेशे कृते द्विर्वचनं प्राप्नोतीति निषेधः। ईर्त्सति। ईप्सति। क्ष्णीप्सति। सीति किम्? अदिधीषति। जिक्ष्णपयिषति। आदेशसन्नियोगे द्विर्वचनं प्रतिषिध्यते। तदभावे भवत्येव। सनीति किम्? आप्स्यति।

धिन्धीप्वृम्भः ॥४।१।५८॥ दम्भेः सकारादौ सनि परे धिप् धीप् इत्येतावादेशौ भवतः। न चास्य द्विर्भवति। धिप्सति। धीप्सति। सीति किम्? दिदम्भिषति।

धौन्मुचोऽनाप्येऽचः ॥४।१।५९॥ मुचेर्धातोः सकारादौ सनि परे अच ओकारादेशो वा भवति। न चास्य द्विः। अनाप्ये[4] न चेदस्याप्यं कर्म विवक्ष्यते। मोक्षते वत्सः। मुमुक्षते वत्सः स्वयमेव। आदेशसन्नियोगे द्विर्वचनप्रतिषेधः। अनाप्य इति किम्? अन्त्यस्य मा भूत्।

घुमोमारभलभशकपतपदामिस् ॥४।१।६०॥ घुसञ्ज्ञाना मो मा रभ लभ शक् पत् पद् इत्येतेषा चाच. सकारादौ सनि परे इसादेशो भवति। एषामेकाच्च न द्विर्भवति। मी इति मिञ्मीञ्मीङा ग्रहणम्। मित्रो वै हि सनि दीर्घ मो इति रूपं भवति। घु-दाण्-प्रदित्सति दानम्। देङ्—दित्सते पुत्रम्। डुदाञ्—दित्सति। दित्सते वस्त्रम्। दो—दित्सति दण्डम्। धेट्—धित्सति स्तनम्। डुधाञ्—धित्सति। धित्सते श्रुतम्। मिञ्—मित्सति शतम्। प्रमित्सति शत्रुम्। मीञ्—मित्सते। मा इति मेङ्माङोर्ग्रहणम्। निमित्सते। प्रमित्सते। न मातेरादादिकत्वात्—मीमांसति[5]। अन्ये त्रयाणामप्यविशेषमाहुः। मित्सति। रभ—आरिप्सते। लभ—लिप्सते। शक्—शिक्षति(ते)। पत्—पित्सति। पद्—प्रपित्सते। सीति किम्? पिपतिषति। अच इति किम्? सर्वस्य मा भूत्।

राधेर्वधे ॥४।१।६१॥ राधेर्वधे हिंसायामर्थे वर्तमानस्य सकारादौ सनि परे अच इसादेशो भवति। न चास्य द्वि'। प्रतिरित्सति। अपरित्सति। वध इति किम्? आरिरात्मति गुरुम्।

लिटोऽप्येत् ॥४।१।६२॥ राधेर्वधेऽर्थे वर्तमानस्य इटि इजादौ अपि अपिति च लिटि परे अच एकारादेशो भवति। न चाय द्विर्भवति। रेधतुः। रेधुः। रेधिथ। अपरेधतुः। अपरेधुः। अपरेधिथ। प्रतिरेधतु'। प्रतिरेधुः। प्रतिरेधिथ। परिरेधतुः। परिरेधुः। परिरेधिथ। लिटीति किम्? अपराराध्यते। इडपीति किम्? अपरराध। इड्ग्रहणं पिदर्थम्। वध इति किम्? आररावतुः। आरराविथ।

ऋप्फलिभजत्रमट्क्वजादिदिदिशसिकृतस्याऽन्तर्हलोः ॥४।१।६३॥ ऋप् फलि भज तृ इत्येषा धातूना यो जकार' यश्च झटकवर्गाज्झकारवकारादिदिदिशसिकृतवर्जितस्य द्वयोरसहाययोर्हलोरन्तर्मध्ये वर्तते तस्यापि इडादौ च लिटि परे एकारादेशो भवति। न च द्विः। त्रेपे। त्रेपाते। त्रेपिरे। फेलतुः। फेलुः। फेलिथ। फलीति फलनिष्पत्तौ क्रिफला विशरणे इत्युभयोर्ग्रहणम्। भेजतुः। भेजुः। भेजिथ। तेरतुः। तेरुः। तेरिथ। येमतुः। येमुः। येमिथ। रेणतुः। रेणुः। रेणिथ। लेभे। लेभाते। लेभिरे। मेने। मेनाते। मेनिरे। नेमतुः। नेमुः। नेमिथ। जेमतुः। जेमुः। जेमिथ। देमतुः। देमुः। देमिथ। चेरतुः। चेरुः। चेरिथ। तेमतु'। तेमुः। तेमिथ। पेचतुः। पेचुः। पेचिथ। शेकतुः। शेकुः। शेकिथ। लेहे। लेहाते।

---

१. चक्रंयु', म०। २. बभुरि-म०। ३. त्रिणो द्वि-म०। ४. अनाप्येन भेदस्याप्यं कर्म विवक्ष्यते। म०। ५. मातुमिच्छति म० टि०।

सेहिरे । त्रपग्रहणमद्विहल्मध्यार्थम्, फलिमजग्रहणम् झडाद्यर्थम् । तृग्रहणं कृदर्थम् । झट्क्वज्झादिदंशसिकृतपर्युदासः किम् ? झडादिः—झडटतुः । झडटुः । झडटिथ । वमतुः । वमुः । वमिथ । क्वादि–चकणतुः । चकणुः । चकणिथ । जगदतुः । जगदुः । जगदिथ । अज्झादि—इयजिथ । उवपिथ । उवहिथ । उवयिथ । उवसिथ । उवदिथ । उवशिथ । हादि–जहसतुः । जहसुः । जहसिथ । वादि–ववणतुः । ववणुः । ववणिथ । ववले । ववलाते । ववलिरे । ददि—ददते । दददाते । दददिरे । शसि—विशशसतुः । विशशसुः । विशशसिथ । कृत—विशशरतुः । विशशरुः । विशशरिथ । निपपरतुः । निपपरुः । निपपरिथ । लुलविथ । पुपविथ । अत इति किम् ? दिदिवतुः । दिदिवुः । दिदेविथ । ररासे । ररासाते । रराशिरे । अन्तर्हलोरिति किम् ? आटतुः । आटुः । आटिथ । हलोरिति द्वित्वनिर्देशादिह न भवति । ततक्षतुः । ततक्षुः । ततक्षिथ । तत्सरतुः । तत्सरुः । तत्सरिथ । लिटीति किम् ? पिपक्षति, पापच्यते । इडपीति किम् ? पपक्व, अहं पपच ।

फणादिजृभ्रस्भ्रम्वमां वा ॥४।१।६४॥ फणादीनां सप्तानां जृ भ्रस् भ्रम वम इत्येतेषां चाच इडादावपिति च लिटि परे, एकारादेशो वा भवति । न च द्विः । फेणतुः । फेणुः । फेणिथ । पफणतुः । पफणुः । पफणिथ । स्येमतुः । स्येमुः । स्येमिथ । सस्यमतुः । सस्यमुः । सस्यमिथ । स्वेनतुः । स्वेनुः । स्वेनिथः । सस्वनतुः । सस्वनुः । सस्वनिथ । रेजतुः । रेजुः । रेजिथ । रराजतुः । रराजुः । रराजिथ । भ्रेशे । भ्रेशाते । भ्रेशिरे । बभ्राशे । बभ्राशाते । बभ्राशिरे । भ्लेशे । भ्लेशाते । भ्लेशिरे । बभ्लाशे । बभ्लाशाते । बभ्लाशिरे । भ्रेजे । भ्रेजाते । भ्रेजिरे । जृ–जेरतुः । जेरुः । जेरिथ । जजरतुः । जजरुः । जजरिथ । त्रस्–त्रेसतुः । त्रेसुः । त्रेसिथ । तत्रसतुः । तत्रसुः । तत्रसिथ । भ्रेमतुः । भ्रेमुः । भ्रेमिथ । बभ्रमतुः । बभ्रमुः । बभ्रमिथ । वेमतुः । वेमुः । वेमिथ । उद्वेमुस्तत्र रुधिरं रथिनोऽन्योन्यवीक्षिताः । ववमतुः । ववमुः । ववमिथ ।

ग्रन्थग्रन्थोर्ल्युक्च ॥४।१।६५॥ ग्रन्थग्रन्थोरिडादावपिति च लिटि परे अच एकारादेशो वा भवति । न च द्विर्ल्युक्च नकारस्य चानयोर्लुग्भवति । श्रेथतुः । श्रेथुः । श्रेथिथ । शश्रन्थतुः । शश्रन्थुः । शश्रन्थिथ । ग्रेथतुः । ग्रेथुः । ग्रेथिथ । जग्रन्थतुः । जग्रन्थुः । जग्रन्थिथ । इडपीति किम् ? शश्रन्थ । जग्रन्थ ।

दम्भः ॥४।१।६६॥ दम्भेरपिति लिटि परेऽच एकारादेशो भवति । न च द्विर्ल्युक्च । देमतुः । योगविभागोऽस्य नित्यार्थः ।

थे वा ॥४।१।६७॥ दम्भेः थे परे एकारादेशो वा भवति । न च द्विर्लुक् च । देमिथ । दम्भिथ ।

धोर्हि ॥४।१।६८॥ घुसञ्ज्ञकस्य धातोर्हकारादौ प्रत्यये हि इत्येतस्मिन् लेडादेशे परे अच एकारादेशो भवति । न च द्विः । देहि । धेहि । न च द्विरपीति । कृतस्यापि निवृत्तिरिति यङ्लुच्यप्येवम् । होति किम् ? दत्तात् । धत्तात् ।

देर्ङिटीगिः ॥४।१।६९॥ देः देङ् रक्षणे इत्येतस्याचो लिटि परे इगि इत्ययमादेशो भवति । न च द्विः । अवदिग्ये । अवदिग्याते । अवदिग्यिरे ।

पिबरीयेङ्क्ङे ॥४।१।७०॥ पा पाने इत्यस्याचो ङे परत ईय् इत्ययमादेशो भवति । न च द्विः । अपीय्यत् । अपीय्यताम् । अपीय्यन् । ङिन्निर्देशः किम् ? अपापयतुः (अपापयत) । ङे इति किम् ? पाययति ।

हिन्वोऽङे कुः पूर्वात् ॥४।१।७१॥ ङवर्जिते प्रत्यये परतो यौ हि हुन् इत्येतौ धातू, तयोर्द्विर्भावे पूर्वस्मात् परस्योरादेः कुः कवर्गादेशो भवति । हि–प्रजिघाय । प्रजिघीषति । प्रजिघीयते । प्रजिघेति । हुन्–अजुहवम् । अहं अजुहवम् । जिघांसति । अजुह्वन्त । अङ इति किम् ? प्राजीहयत् । अङे द्विर्वचननिमित्ते प्रत्ययेऽनन्तरस्य विज्ञानादिह भवति । हुनमीयिषुनिञ्छति जिहुनमीयिषति । ङपर्युदासात्तु णिच्यचङापेऽपि भवति । प्रजिघाययिषति । पूर्वादिति किम् ? परस्य यथा स्यात् ।

---

१. हि गतिबुद्ध्योः, अ० टि० ।

जेर्लिट्सनि ॥४।१।७२॥ जि इत्येतस्य लिटि सनि च परे द्विर्भावे पूर्वात् परस्य कुरादेशो भवति। जिगाय। जिग्यतुः। जिग्युः। विजिग्ये। जिगीषति। विजिगीषते। लिट्सनीति किम्? जेजीयते, जिग्यतुः, जिग्युरिति जिनातेर्जिरूपस्य लाक्षणिकत्वान्न भवति।

चेर्वा ॥४।१।७३॥ चिनोतेर्धातोर्लिट्सनोः परतो द्विर्भावे पूर्वस्मात् परस्य कुरादेशो वा भवति। चिकाय, चिचाय। चिकीषति, चिचीषति। लिट्सनीति किम्? चेचीयते।

सञ्जेश्चिष्यणि ॥४।१।७४॥ षञ्जे. सञ्ज सङ्ग इत्येतस्य ण्यन्तस्य षणि षत्वभूते सनि सति द्विर्भावे पूर्वात् परस्य षिर्वा भवति। सिसञ्जयिषति। सिषञ्जयिषति।

न स्विदिस्वदिसह्यणिस्तोः ॥४।१।७५॥ स्विदि स्वदि सहि इत्येतेषां ण्यन्तस्तौतिवर्जितानां च धातूनां षणि षत्वभूते सनि सति द्विर्भावे पूर्वात्परस्य षिर्न भवति। सिस्वेदयिषति। सिस्वादयिषति। सिसाह्यिषति। सुषूषति। सिसिक्षति। स्विदिस्वदिसहिग्रहणं ण्यन्तार्थम्। अणिस्तोरिति किम्? सिसेचयिषति। सुस्वापयिषति। षणीति किम्? सिषेव। षत्वं किम्? सिषासति। सुषुप्सति। नकारः किम्? व्यतिसुषुपिषे। पूर्वादिति किम्? प्रतीषिषति। अधीषिषति। षणा पूर्वविशेषणं किम्? सुसोषुपिषते।

पूर्वस्यास्वेऽचीयुव्योः ॥४।१।७६॥ द्विर्भावे यः पूर्वस्तस्य योः[1] इवर्ण उवर्णस्तस्य च अस्वेऽचि परे यथासङ्ख्यम् इय् उव् इत्येतावादेशौ भवतः। इयर्ति। इयृतः। इयृति। इयेष। उवोष। इयाय। अरियर्ति। अरियरीति। अर्यर्ति। अर्यरीति। इत्येके। तेषां पूर्वस्येति योरित्यस्य समानाधिकरणं विशेषणम्। पूर्वस्येति किम्? पूर्वात् परस्य न भवति। तथैवोदाहृतम्। पूर्वस्येत्यधिकारः। अस्वे इति किम्? ईषतुः। ऊषतुः। अचीति किम्? पिपक्षति। अदिदीषति। इयाज। उवाप। योरिति किम्? उवोष। इयेष। इकारस्य उव् उकार इय् स्यात्तस्य इकारादेशो भवति (?)।

आण्जश्रज्रक्षः ॥४।१।७७॥ द्विर्भावे पूर्वस्य यः ऋवर्णः योऽच् यश्च क्ष तेषां यथासंख्यम् आण् च (अश्च अण् च) जश्च भवन्ति। चकार। जहार। पपौ। निन्ये। लुलूषति। सिस्रेकिषते। तुत्रौकिषते। जश्—जिक्षकारीयिषति। बभार। डुढौकिषते। दधौ।

द्युतेरिः ॥४।१।७८॥ द्युतेर्द्विर्भावे यः पूर्वस्याच् तस्य इकारो भवति। व्यविद्युतत्। विदिद्युतिषते। विदिद्योतिषते। विदेद्युत्यते।

खरश्चर् ॥४।१।७९॥ द्विर्भावे पूर्वस्य च यः खर् तस्य चरादेशो भवति। पफाण। पफणतुः। पफणुः। चिच्छेद। चिच्छिदतुः[2]। चिच्छिदुः। टिठकारीयिषति। तिष्ठासति। खर इति किम्? जिजनिषते। आणजश्रित्यत्रास्याकरणमुत्तरार्थम्।

ष्ठिवेष्टो वा ॥४।१।८०॥ ष्ठिवेर्धातोर्द्विर्भावे पूर्वस्य खरष्टकारादेशो वा भवति। तिष्ठेव। टिष्ठेव। तेष्ठीव्यते। टेष्ठीव्यते। ष्ठीव इति किम्? तष्टौ[3]। तिष्ठासति।

लुक्खयि ॥४।१।८१॥ द्विर्भावे पूर्वस्य यः खर् खय्परः तस्य लुग्भवति। अनादिर्लुग्योऽपवादः। चुश्च्योतिषति। तिष्ठासति। पिस्पन्दिषते। खयीति किम्? सस्नौ।

हलोऽनादेः ॥४।१।८२॥ द्विर्भावे पूर्वस्य योऽनादिर्हल् तस्य लुग्भवति। अग्लौ। मम्लौ। पपाच। पपाठ। आट। आटतुः। आटुः। पापच्यते। पापठ्यते। डुढौकिषते। तुत्रौकिषते। अटाट्यते। अदिदिषते। उचिच्छिषति। हल् इति किम्? पपाच। अचो मा भूत्। अनादेरिति किम्? आदेर्मा भूत्।

---

१. य्वोः, म०। २. चिच्छेदतुः। चिच्छेदुः। म०। ३. तष्टौ, तिष्ठांसति। म०।

अच्यात् ॥४।१।८३॥ अचि प्रत्यये द्विर्भावे पूर्वस्य आगागमो भवति । चरोचरः । चलाचलः । पतापतः । वदावदः । आगित्यागमविधानसामर्थ्यादत्र हलोऽनादेर्लुग्न भवति । अन्यथा हि आ इत्यादेश एव विधीयेत ।

कुहोश्चुः ॥४।१।८४॥ द्विर्भावे पूर्वस्य यः कवर्गो हकारस्य तस्य चुः चवर्गादेशो भवति । कु–चकार । चक्षान । जगाम । जघान । अ[1]ङ्कुवे । जिङ्कारीयिषति । हृ–जहौ । जहास । जिह्रीर्षति ।

यङोऽकवतेः ॥४।१।८५॥ यङन्तस्य द्विर्भावे पूर्वस्य कुहोः कवतिवर्जितस्य चुर्भवति । चेक्रीयते । जेह्रीयते । यङ् इति किम् ? उष्ट्रश्चुकूषते । अकवतेरिति किम् ? उष्ट्रः कोकूयते । विकरणनिर्देशः कौतिकुवतिनिवृत्त्यर्थः । चोकूयते[2] । कवतिरव्यक्ते शब्दे । कुवतिरार्त्तस्वरे । कौतिः शब्दमात्रे पाठे शब्दार्थत्वेऽप्येषां रङ्क्त्यादिगत्यर्थवदर्थभेदः । यङ्लुचि च प्रतिषेधो न भवति । चोकवीति । कवतेः प्रतिषेधार्थं वचनम् ।

एङभिदाहाकोः ॥४।१।८६॥ यङन्तस्य द्विर्भावे पूर्वस्यामितः, अभिद्रुाविनः, आकारान्तहाकवर्जितस्य आकारः एङ् चादेशो भवति । पापच्यते । अटाट्यते । वेव्रीयते । वेभिद्यते । लोलूयते[3] । बोभुज्यते । डोढोक्यते । तोत्रौक्यते । पापचीति । बेभिदीति । लोलवीति । श्लुचि नियमस्तन्निमित्तकस्य इदन्त्ययङन्तस्य द्विर्भावे पूर्वस्यानिमित्तकं विधानम् । अभिदाहाकोरिति किम् ? यंयम्यते । रंरम्यते । जहासि । जिहेति । भिदपवादत्वाद् एचो बाधको भविष्यति । तत्र भिद्ग्रहणं द्विर्भावे पूर्वविधौ बाधको न बाधकः इति ज्ञापकम् । तेनैव हलोऽनादेरिति न बाध्यते । अन्यथा बेभिद्यत इत्यादौ दकारादेरैङ् स्यात् । आकारविशेषणं किम् ? जिह्रीयते ।

वञ्चस्रंसध्वंसभ्रंशकसपत्पदिस्कन्दाम्नीम् ॥४।१।८७॥ वञ्च् स्रंस ध्वंस भ्रंश कस् पत् पद् स्कन्द् इत्येतेषां यङन्तानामे द्विर्भावे पूर्वस्य नोमागमो भवति । वनीवच्यते । वनीवच्चीति । सनीस्रंस्यते । सनीस्रंसीति । दनीध्वस्यते । दनीध्वंसीति । मनीभ्रंस्यते । मनीभ्रंशीति । चनीकस्यते । चनीकसीति । पनीपत्यते पनीपतीति । आपनीपद्यते । आपनीपदीति । चनीस्कद्यते । चनीस्कन्दीति । दीर्घोच्चारणन्नीम् न विज्ञायते ।

अतोऽनुनासिकस्य मम् ॥४।१।८८॥ अकारान्तात्परो योऽनुनासिकस्तदन्तस्य धातोर्यङन्तस्य द्विर्भावे पूर्वस्य ममागमो भवति । यंयम्यते । यंयमीति । रंरम्यते । रंरमीति । जङ्गम्यते । जङ्गमीति । बंभण्यते । बम्भणीति । तन्तन्यते । तन्तनीति । चञ्चलः । तन्तयः । मंमण्यते । स्नदीनाममनुनासिकत्वे चचाल., (चाचलः)। तनाप्रः (तातयः) । मामण्यते । अत इति किम् ? तेतीम्यते । सेसिम्यते । जोघुण्यते । बाभाम्यते । अनुनासिकस्येति किम् ? पापच्यते ।

जबजभदहदशभञ्जपसाम् ॥४।१।८९॥ जब् जभ दह दश भञ्ज पस इत्येतेषां यङन्तानां द्विर्भावे पूर्वस्य ममागमो भवति । जञ्जभ्यते । जञ्जभीति । जञ्जभ्यते । जञ्जभीति । दन्दह्यते । दन्दहीति । दन्दश्यते । दन्दशीति । बम्भज्यते । बम्भजीति । पम्पस्यते । पम्पसीति । दशेति लुप्तनकारनिर्देशाद् यङः श्लुच्यपि दंशोनकारो न श्रूयते । पसिः सौत्रो धातुः ।

चर्फलाम् ॥४।१।९०॥ चर गतिभक्षणयोः, फल निष्पत्तौ, त्रिफला विशरणे इत्येतेषां धातूनां यङन्तानां द्विर्भावे पूर्वस्य ममागमो भवति । चञ्चूर्यते । चञ्चुरीति । पम्फुल्यते । पम्फुलीति । धान्यं पुष्पं वा । बहुवचनं त्रिफला विशरणे इत्यस्य परिग्रहार्थम् । अन्यथा हि निरनुबन्धकग्रहणे न सानुबन्धकस्येति फलनिष्पत्तावित्यस्यैव स्यात् ।

---

१. चरिचल्पतिवदोऽचीति द्विः । म० टि० । २. कुङ्शब्दे, म० टि० । ३. ककारमात्मन इच्छति (इति)–म० टि० । ४. वनद्रुमाः षट्पदचौरवृन्दैर्विलुप्यमानप्रसवार्थसाराः । चोकूयमाना इव भान्त्यमुष्मिन् समुच्चरत्कोकिलनिःस्वनेन म० टि० । ५. ऐचो म० । ६. तेनैव म० । तेन अतोऽनुनासिकस्य मम् इत्यनेन ऐङ् न बाध्यते । ऐचो हलोऽनादेरिति न बाध्यते, इति प्रत्यन्तरे पाठान्तरम् म० टि० ।

तिङ्यातोर्युत् ॥४।१।९१॥ चर्फलां यङन्तानां रेफलकारपरस्याकारस्य ति च तकारादौ प्रत्यये पर उकारादेशो भवति। चञ्चूर्यते। चञ्चुरीति। पम्फुल्यते। पम्फुलीति। चरणं चूर्तिः। ब्रह्मचूर्तिः। प्रफुल्तिः। प्रफुल्तः। प्रफुल्तवान्। प्रफुल्लाः सुमनसः। आदित्वाद्विशरणार्थस्योदभावः। उदिति तकारः चञ्चूर्ति। पम्फुल्ति इत्येङ्निवृत्त्यर्थः। दीर्घस्तु परशास्त्रे प्रवर्तमाने स्वयमसन्निति न बाध्यते। अत इति किम्? फालयतेः क्विपि ततः कर्तुः क्विप्। यङ्—पम्फाल्यते। पम्फालीति। एकदेशविकृतस्यानन्यत्वात् फल उच्यमानं फालोऽपि प्राप्नोति। लीति पूर्वनिवृत्त्यर्थम्।

रीमृत्वताम् ॥४।१।९२॥ ऋकारवतो धातोर्यङन्तस्य द्विर्भावे पूर्वस्य रीमागमो भवति। वृतूङ्। वरीवृत्यते। वरीवृतीति। वृधूङ्। वरीवृध्यते। वरीवृधीति। नृतैं—नरीनृत्यते। नरीनृतीति। दृशं—दरीदृश्यते। दरीदृशीति। दरीदृज्यते। दरीदृजीति। परीपृच्छ्यते। परीपृच्छीति। वरीवृश्च्यते। वरीवृश्चीति। प्रच्छश्च्योर्यङ्। ऋकारे कृते ऋत्वत्वम्। ऋत्वतामिति किम्? चेक्रीयते। जेहीयते। कृञ्हृञोरीभावे कृते द्विर्वचनमिति ऋत्वता नास्ति। बहुवचनं लाक्षणिकार्थम्।

रम् रिम् च श्लुचि ॥४।१।९३॥ ऋत्वतो धातोर्यङः श्लुचि सत्यां द्विर्भावे पूर्वस्य रम्-रिमौ रीम् आगमौ भवन्ति। कृ—चर्कर्ति। चरिकर्ति। चरीकर्ति। हृ—जर्हर्ति। जरिहर्ति। जरीहर्ति। ननर्ति। नरिनर्ति। नरीनर्ति। ददृद्र्क्ति। दरिदृद्र्क्ति। दरीदृद्र्क्ति। वर्वृश्चीति। वरिवृश्चीति। वरीवृश्चीति। रमोऽकार उच्चारणार्थः। चकारो रीम्बाधनार्थः। श्लुचीति किम्? नरीनृत्यते। ऋत्वतामिति किम्? मोमोक्ति। कृ—चाकर्ति। चाकरीति। चाकीर्तिः। चाकिरति। गृ—जागर्ति। तृ—तातर्ति।

निजामेन् ॥४।१।९४॥ निजादीनां श्लुचि ह्वदादेः श्लुग्लुगिति द्विर्भावे यः पूर्वस्तस्यैकारादेशो भवति। नेनेक्ति। नेनिक्तः। नेनिजति। द्विर्भावे पूर्वविधौ बाधको न बाधक इति हल्ोऽनादेर्लुग्भवत्येव। एवं वेवेक्ति। वेवेष्टि। श्लुचीति किम्? निनेज। निनिक्षति। अनीनिजत्। णिजृङ् विजृङ् विषृङ् इति त्रयो निजादयः परतो दिवादयः।

पभृहाङ्माङ्गामित् ॥४।१।९५॥ पृ ऋ भृ हाङ् माङ् इत्येतेषां श्लुपि श्लुपि विहिते द्विर्भावे यः पूर्वस्तस्य इकारादेशो भवति। पिपर्ति। इयर्ति। बिभर्ति। जिहीते। मिमीते। हाङिति ङकारोपादानात् ओहाक् त्याग इत्यस्य न भवति। जहाति। श्लुचीति किम्? पपाठ। पर्पर्ति। परिपर्ति। परीपर्ति। यङन्तस्य द्विर्भावेन श्लुचीति न भवति।

सन्यतः ॥४।१।९६॥ धातोः सनि परे द्विर्भावे पूर्वस्याकारस्येकारादेशो भवति। पिपलिषति। पिपासति। प्रतीषिषति। सनीति किम्? पपाच। अत इति किम्? लुलूषति। पापचिषते। सनोऽन्त्येति निर्दिश्य सन्सम्बन्धिद्विर्भावः इत्वमिति तकारः शक्यमकर्तुम्। तितत्रनोपिपतीति यथा स्यादिति ह्युच्चारार्थः सप्तमीनिर्देशः कर्तव्यः।

ओः पुयज्ज्ये ॥४।१।९७॥ सनि परे द्विर्भावे पूर्वस्योवर्णस्य पुयज्ज्ये पवर्गे यञि जकारे चाऽवर्णे पर ईकारादेशो भवति। पू—पुङ्—पिपविषति। पिपावयिषति। भू-बिभावयिषति। मूङ्—मिमवयिषति। यङ्—यु—यियविषति। यियावयिषति। रु—रिरावयिषति। लू—लिलावयिषति। जकारे जुः सौत्रो धातुः। जिजावयिषति। असम्भवाण्णिना व्यवधानमाश्रीयते। ओरिति किम्? पापचिषते। लोलविषते। पुयज्जीति किम्? अवतुतावयिषति। दुदावयिषति। नुनावयिषति। शुशावयिषति। सुसावयिषति। जुजावयिषति। चुशावयिषति। तुष्टावयिषति। पुष्टावयिषति। इदमेवेत्त्ववचनं ज्ञापकं णिनिमित्तादपि प्राग् द्विर्वचनमिति। अन्यथा पूर्वेणैव

---

१. ऋत्वत्वम् म०। ऋत्वत्तम् क०। २. जुधावयिषति, क० म०। ३. पुस्थावयिषति, क० म०। ४. सन्यत इत्यनेन सूत्रेण क०म० टि०।

सिद्धम् । एतच्च पुयञ्जयदवर्णपर एव ज्ञापकं वेदितव्यम् । अन्यथा ह्यविकोर्तदिति न सिद्ध्येत् । ए इति किम् ? बुभूषति । लुलूषति । जुज्यावयिषति । सनीति किम् ? लुलाव ।

श्रुस्नुद्रुप्लुच्योर्वा ॥४।१।९८॥ श्रु स्नु द्रु प्लु च्यु इत्येतेषां सनि परे द्विर्भावे यो पूर्वस्योवर्णस्य यञि ए अवर्णपरे इकारादेशो वा भवति । शिश्रावयिषति । शुश्रावयिषति । सिस्नावयिषति । सुस्नावयिषति । दिद्रावयिषति । दुद्रावयिषति । पिप्रावयिषति । पुप्रावयिषति । पिप्लावयिषति । पुप्लावयिषति । चिच्यावयिषति । चुच्यावयिषति । ए इति किम् ? सुस्रूषते । ओरिति किम् ? शोश्रविषति । सोस्रविषति ।

स्वपेर्णौ डुः ॥४।१।९९॥ स्वपेर्धातोर्णौ परे द्विर्भावे पूर्वस्य यञि उकारादेशो भवति । सुस्वापयिषति । असुष्वापयिषत् । हलो अनादेरिति लुचि अकारस्यौकारः । स्वपेरिति किम् ? यियाजयिषति । णाविति किम् ? सिस्वाप[1] कोयिषति । स्वापं करोतीति स्वापयति । स्वापयतेः सन् । सिष्वापयिषति इत्यत्र न स्वपेर्णि. पुङ् व्यवधानात् । यञीति किम् ? सोषोपयिषति ।

सन्वल्लघौ डेऽनग्लुचि ॥४।१।१००॥ न विद्यतेऽको लुक् यस्मिन् णौ ङेपरे यो द्विर्भावः तस्मिन् पूर्वस्य लघौ धात्वक्षरे परे सनि द्विर्भावे पूर्वस्य यथा तथा कार्यं भवति । सन्वत इत्यत्वमत्रापि । अचीकरत्[2] । अजीहरत् । ओः पुयञ्जे इति । अपीपवत्[3] । अबीभवत् । अमीमवत् । अपीपवत् । अरीरवत् । अलीलवत् । अजीजवत् । 'श्रुवादि'-विकल्पः । अशिश्रवत् । अशुश्रवत् । असिस्नवत् । असुस्नवत् । अदिद्रवत् । अदुद्रवत् । अपिप्रवत् । अपुप्रवत् । अपिप्लवत् । अपुप्लवत् । अचिच्यवत् । अचुच्यवत् । लघाविति किम् ? अततक्षत् । अररक्षत् । अजजागरत् । अचिक्षणत् । अचिक्रमत् । इत्यादौ हल संघातव्यवधाने लघ्वोर्दीर्घानामत्ववचनाद् भवति । ङे इति किम् ? पपच । दददे । अव्यीमकियत्[4] । अनग्लुचीति किम् ? अचकमत् । अतस्तनत्[5] । अजगदत् । दृपदमाक्षयत् अददृपत् । वादयो[6] ने प्रायुङ्क्त अबीवदिति । णिजातेर्निमित्तत्वेनाश्रयणात् ततोऽन्यस्याको लुचि प्रतिषेध इति भवति आदिधत् आपियत् अजिज्ञपत् इत्यादौ पूर्वस्य सन्मात्राश्रयणः । कार्यसंप्रत्ययेनेत्वस्याश्रयणात् दीर्घादिर्न भवति । ईर्घ्याद्यादेशो हि न पूर्वस्य । ङीति विशेषश्चाश्रीयते ।

लघोर्दीर्घोऽनजादेः ॥४।१।१०१॥ धातोर्द्विर्भावे पूर्वस्य लघोर्लघौ धात्वक्षरे परे दीर्घो भवति । अचीकरत् । अजीहरत् । अबूबुधत् । अबूभुजत् । लघोरिति किम् ? अचिक्षणत् । अचिक्रमत् । अबिभ्रजत् । अनजादेरिति किम् ? प्रोर्णुनवत् । औरिरवत् । लघ्वोरिति किम् ? अततक्षत्, अररक्षत् । ङ इति किम् ? पपच । रिरमयिषति । अनग्लुचीति किम् ? अचकमत् । अजगदत् । अदधृषत् ।

स्मृदृत्वरप्रथम्रदस्पृशोऽत् ॥४।१।१०२॥ स्मृ दृ स्तृ त्वर् मृद प्रथ स्पृश इत्येतेषां धातूनां ङपरेऽनग्लुचि णौ परतो द्विर्भावे पूर्वस्याकारादेशो भवति । सन्वद्भावापवादः । असस्मरत् । अददरत् । अतस्तरत् । अतत्वरत् । अममृदत् । अपप्रथत् । अपस्पशत् । अदिति तपरकरणात् अददरदित्यत्र लघोर्दीर्घोऽनजादेरिति दीर्घो न भवति ।

वेष्टिचेष्टी वा ॥४।१।१०३॥ वेष्टि चेष्टि इत्येतयोर्ङ[7] परेऽनग्लुचि णौ परतः द्विर्भावे पूर्वस्याकारादेशो वा भवति । अववेष्टत् । अवचेष्टत् । अविचेष्टत् ।

---

१. ष्वुः । वोरकः, ततः क्यच्, याङ्किति दीर्घः । ततः सन्, क० म० टि० । २. ङेऽशास्वग्नास्यूदित इति ह्रस्वः । क० म० टि० । ३. पूङ्, क० म० टि० । ४. स्त्रादीना—का स्त्रादीना—म० (शीर्दीर्घकीसन्पुदाङ्पेर्न च इति क० म० टि०) । ५. अजीगमकीयत्, म० । अजगमकीयत्, क० । ६. स्तन गदौ देवशब्दे अन्यादिः, क० म० टि० । ७. वादानां प्रायु—क० म० । ८. जिस्वरिष् सम्भ्रमे । ९. ङपरे, क० म० ।

गजशञ्चेः ॥४।१।१०४॥ गमयतेर्ङे परे द्विर्भावे पूर्वस्येकारादेशो वा भवति । अजीगणत् । अजगणत् । चशब्दो वाऽनुकर्षणार्थः । चशब्दाद् भूरिदाक्षिण्यसंयुक्तं यत्वंशान्त्वमचीकथ इत्येके । अदन्तत्वादित्वस्याप्राप्तौ वचनम् ।

लिटश्चाद्यादेरतः ॥४।१।१०५॥ लिटि धातोर्द्विर्भावे पूर्वस्यादेरकारस्याकारादेशो भवति । आटतुः । आटुः । आटिथ । आदतुः । आदु । आदिथ । लिटोत्युत्तरार्थम् । आदेरिति किम् ? पपाच । अत इति किम् ? ईषतुः । ईषुः । तकार उत्तरार्थः । एद लुचो बाधनार्थं वचनम् ।

नक्वाञ्ज्वृदाद्यनेकहलश्च ॥४।१।१०६॥ अशौङ् व्याप्तावित्यस्य ऋकारादेरनेकहलश्च धातोर्लिटि द्विर्भावे पूर्वस्यादेरकारस्याकारादेशो भवति नक्वास्यागमः । अश्नु—आनशे । आनशाते । आनशिरे । अश्नु इति श्नुविकरणोपादानादश्न भोजन इत्यस्य न भवति । आश । आशतुः । आशुः । ऋदादि—ऋधू–आनृधतुः । आनृधुः । ऋजि–आनृजे । आनृजाते । आनृजिरे । दकार ऋकाराभिव्यक्त्यर्थः । अनेकहल्—आनर्च । आनर्चतुः । आनर्चुः । आनर्च्छ । आनर्च्छतुः । आनर्च्छुः । आनङ्क्[1] । आनङ्क्तुः । आनङ्कुः । आनञ्ज । आनञ्जतुः । आनञ्जुः । आनक्ष । आनक्षतुः । आनक्षुः । अनेकग्रहणं किम् ? आट । आटतुः । आटुः । विधीयमानाकार-सन्नियोगेऽयं नक्वा चाकारः अत इति तकाराद्याकारभूतपूर्वस्य न भवतीतीह न भवति । आछु आयामे । आञ्छ । आञ्छतुः । आञ्छुरित्येके ।

भूव्यथोदित् ॥४।१।१०७॥ भू व्यथ इत्येतयोर्लिटि द्विर्भावे पूर्वस्य यथासंख्यम् अत् इत् इत्येतावादेशौ भवतः । बभूव । बभूवे देवदत्तेन । अनुबभूवे कम्बलो देवदत्तेन । विव्यथे । विव्यथाते । विव्यथिरे । लिटिति किम् ? बुभूषति । वाव्यथ्यते । केचित्—भवति व्यथोऽदित् इति निर्देशमिच्छन्ति तत्र किल न भवतीति कर्तृनिर्देशात् । [2]कर्त्रर्थे लिटि भुवो अकारो भवति । न भावकर्मणोः । बभूवे देवदत्तेन । अनुबभूवे कम्बलो देवदत्तेन ।

इग्यङस्साचोऽर्याज्यम् ॥४।१।१०८॥ आज्यमिति आज्या इत्यतो यो निर्देश्यते धातुस्तस्य लिटि द्विर्भावे पूर्वस्य साऽच परेणाचा सहितस्य अयि च अरेफयकारपरस्य यत्र स्थाने इगादेशो भवति । उवास । उवसिथ । उवाद । उवदिथ । इयाज । इयजिथ । उवाप । उवपिथ । उवाह । उवहिथ । उवाय । उवयिथ । संविव्याय । संविव्यायिथ । सुष्वाप । सुष्वपिथ । उवाच । उवचिथ । उवाश । उवशिथ । विव्याच । विव्यचिथ । विव्याध । विव्य—विव्यधिथ । शिश्यौ—शिश्यिथ । साच इति किम् ? यत्रोऽचश्चोभयस्य स्थाने एक इग्यथा स्यात् । न यङ्मात्रस्य । अर्यीति किम् ? विव्याय । विव्याच । विव्याध । वकारस्य मा भूत् । निषेधसामर्थ्याद्यकारस्येकि कृतेऽपि प्रतिषेधः । अर्यीतीदमेव ज्ञापकं हलोऽनादेरिति[3] लुचं बाधित्वा इग्यङो भवतीति । रग्रहणमुत्तरार्थम् । वृश्चति । वृश्चते । आज्यमिति किम् ? सस्याम । सस्यमतुः । सस्यमुः । ग्रहिज्यावियविमविपच्छिभ्रज्जामिकि सत्युरत्वम् । असति हलोऽनादेरिति लुगिति नास्ति विशेषः । स्वापेश्चाम् भवति । लिटीति किम् ? वावस्यते । यायज्यते । इवयतेर्लिटि अडि नेत्ययं विधिर्न भवति । शिश्वाय । शिश्विययतुः । शिश्वियुः । शुशावेत्यादौ शुभूतो द्विरुच्यते ।

न वः ॥४।१।१०९॥ द्विर्भावे पूर्वस्येति निवृत्तम् । वः वेरित्यादेशस्य वयो यो यङ् लिटि परे तस्येगादेशो न भवति । प्ये चेति वयावप्राप्त्यर्थं वचनम् । तेन वयोर्व इत्यस्येग्भवति । उवाय । ऊयतुः । ऊयुः । व इति किम् ? अपिप्ये । अपिप्यति । अपिप्यिरे । उत्तरार्थं च ।

वा ॥४।१।११०॥ वः वेत्रादेशस्य वयो यो यङ् लिटि परे तस्येगादेशो वा न भवति । पूर्वेण नित्ये निषेधे प्राप्ते विकल्पः । ऊयतुः । ऊयुः । ऊवतुः । ऊवुः । निषेधविकल्पः किम् ? उवाय । उवयिथ । उवय ।

---

१. अगु गतौ, क० म० टि० । २. कर्तर्येव, क० म० । ३. -देर्लुचं बा-क० म० ।

प्ये च ॥४।१।१११॥ वः वेञो धातोः प्ये च ङिति परे यञ इग् न भवति । प्रवाय्य । उपवाय । ववौ । ववतुः । ववुः । पूर्वेण पकारस्येवप्रतिषेधः । स्थानिवद्भावेन वेञादेशस्य वयेरयं प्रतिषेधो न भवति ।

ज्यः ॥४।१।११२॥ ज्या इत्येतस्य प्ये परे यञ इग्न भवति । प्रज्याय । अनुज्याय ।

व्यः ॥४।१।११३॥ व्येञ. प्ये परे यञ इग्न भवति । परिव्याय[1] । उपव्याय । योगविभाग उत्तरार्थः ।

परेर्वा ॥४।१।११४॥ परेः परस्य व्यः प्ये परे च यञ इगादेशो वा भवति । परिव्याय । परिवीय[2] ।

इव्यादिष्वश्वचः किति ॥४।१।११५॥ नेति निवृत्तम् । इग्यञश्चाचः इति वर्तते । इव्यादीनां स्वप् वच् इत्येतयोश्च किति प्रत्यये साचः अर्यपरस्य यञ इगादेशो भवति । शून[3] । शूनवान् । उषितः[4] । उषितवान् । उदितः । उदितवान् । इष्टः । इष्टवान् । उप्तः । उप्तवान् । ऊढः । ऊढवान् । उतः । उतवान् । संवीतः । संवीतवान् । हूतः । हूतवान् । स्वप्—सुप्तः । सुप्तवान् । वच्—वच् भाषणे–वुवो वचिः । उक्तः । उक्तवान् । किताविति किम् ? इवयिता । वायज्यते । अर्यादिति किम् ? संवीतः । वकारस्य मा भूत् । धातोरिति प्रत्ययविशेषणम् । धातोः सरूपग्रहणे तत्प्रत्ययविज्ञान भ्रूणहत्येति निपातनादिति चात्र न भवति । वाव्यति, टोश्वि, वस, वद, यजी, डुवपी, वही, वेञ्, व्येञ्, ह्वेञ् इति इव्यादिः ।

वशिव्यचिव्यधिज्याग्रहिव्रश्चिप्रच्छिभ्रस्जां किङति ॥४।१।११६॥ वशि व्यचि व्यधि ज्या ग्रहि व्रश्चि प्रच्छि भ्रस्ज इत्येतेषां धातूनां किति ङिति च परे साचोऽर्यपरस्य यञ इगादेशो भवति । वशि—वष्टि । उष्टः । उशन्ति । उशितः । उशितवान् । व्यचि—विचति । वेविच्यते । विचितः । विचितवान् । व्यधि—विध्यति । वेविध्यते । वेवेद्धि । विद्धः । विद्धवान् । ज्या—जिनाति । जेज्यायते । जीनः[5] । जीनवान् । गृहि—गृह्णाति । जरीगृह्यते । गृहीतः । गृहीतवान् । व्रश्चि—वृश्चति । वरीवृश्च्यते । वृक्णः । वृक्णवान् । प्रच्छि—पृच्छति । परीपृच्छ्यते । पृष्टः । पृष्टवान् । भ्रस्ज–भृज्जति । बरीभृज्यते । भृष्टः । भृष्टवान् । अर्यादिति किम् ? विचति । विद्धयति । वृश्चति ।

स्वापेर्ङे ॥४।१।११७॥ स्वापि इत्येतस्य ण्यन्तस्य ङे प्रत्यये परे साचो यञ इगादेशो भवति । स्वपेर्णौ—असूषुपत् । असूषुपताम् । असूषुपन् । स्वाप इति चञन्ताण्णौ—असुषुपत् । असुषुपताम् । असुषुपन् । ङ इति किम् ? स्वाप्यते । सोसुप्यते । स्वापेः क्विबन्तात्कर्तुः क्विपि—यङ् ।

वशो न यङि ॥४।१।११८॥ वशेर्धातोर्यङि परे यञ इग्न भवति । वावश्यते । यङीति किम् ? उष्टः । उशन्ति ।

स्वप्यास्यमः ॥४।१।११९॥ यङीति वर्तते । न नेति । स्वप् स्यम् इत्येतेषां यङि प्रत्यये साचोऽर्यपरस्य यञ इगादेशो भवति । सोषुप्यते । संवेवीयते । सेसिम्यते । यङीति किम् ? स्वपन्ति । अर्य[6] इति किम् ? वेवीयते । वकारस्य मा भूत् ।

चायः की ॥४।१।१२०॥ [7]चायृ इत्येतस्य धातोर्यङि की इत्ययमादेशो भवति । चेकीयते । चेकीयन्ते । दीर्घो यङ्लुगर्थः । चेकीतः ।

द्व्युक्तौ ह्वः ॥४।१।१२१॥ द्वे उक्ती अस्मिन्निति द्व्युक्तः । तस्मिन् द्विर्वचननिमित्ते प्रत्यये विषयभूते ह्वृ ह्वा इत्येतस्य धातोः साचो यञ इगादेशो भवति । जुहाव । जुहवति । ओहूयते । द्विर्वचनप्रत्यये परतः इग्विधौ, जुहुवतुः । जुहुवुरिति । परत्वादस्लुचि[8] सत्यां साचो यञ इग्विधीयमानो न प्राप्नोति । विषयभाव आश्रीयते यदि लुच. स्थानिवद्भावः स्यात्परेऽपि न दोषः ।

---

१. प्रव्याय, क० म० । २. दीर्घोऽचोऽवः इति दीर्घः, क० म० टि० । ३. शूनं वाक्यवदच्छून्ये, इति विश्वः (च्छूने) क० म० टि० । ४. उक्षितं व्युषितेऽपि च, इत्यभिधानम् क० म० टि० । ५. "जिनः स्यादर्तिहृदे च बुद्धे चार्हति जिस्वरे" इति क्वचित्पुस्तकः । म० टि० । ६. सोष्वाप्यते, क० म० । ७. इथ, क० म० । ८. चायृण् पूजानाम्, क० म० टि० । ९. इति धातोर्लुक् इति क०म० टि० ।

णौ सन्ङे ॥४।१।१२२॥ सन्परे ङपरे च णौ परे ह्वा इत्यस्य धातोः; साचो यत्र इगादेशो भवति। जुह्वावयिषति। अजूहवत्। सन्ङे इति किम्? ह्वाययति। णाविस्युत्तरार्थम्।

इवेर्वा ॥४।१।१२३॥ ष्विव इत्येतस्य धातोः सन्परे ङपरे च णौ साचो यत्र इगादेशो वा भवति। शुशावयिषति। शिश्वावयिषति। अशूशवत्। अशिश्वयत्।

लिङ्यङि ४।१।१२४॥ ष्वयेर्धातोर्लिटि यङि च परे साचो यत्र इगादेशो वा भवति। शुशाव। शिश्वाय। शुशविथ। शिश्वयिथ। अहं [1]शुशाव। शिश्वाय[2]। शुशुवतुः। शिश्वियतुः। शुशुवुः। शिश्वियुः। शोशूयते। शेश्वीयते।

न ॥४।१।१२५॥ ष्वयतेर्धातोर्लिङ्यङोः परतः साचो यत्र इगादेशो न भवति। शिश्वियतुः। शिश्वियुः। शिश्वाय। शिश्वयिथ। विकल्पः पित सावकाशः इत्यपित परत्वात् किद्वद्भावेन नित्यमेवेकस्यात्। पूर्वस्य चेति प्रतिषेधः।

प्यायः ४।१।१२६॥ प्यायैङित्यस्य धातोर्लिङ्यङो परतः साचो यत्र इगादेशो भवति। आपिप्ये। आपिप्याते। आपिप्यिरे। आपेपीयते। आपेपीयन्ते। आकारेण सह परस्य यकारस्येकि कृते पूर्वस्येक्। [3]नायिति किम्? प्रतिषेधोऽव्यवधानात्।

क्तयोरनुपसर्गस्य ॥४।१।१२७॥ अनुपसर्गस्य प्यायः क्तयोः क्तक्तवत्वोः प्रत्यययोः परतः साचो यत्र इगादेशो भवति। पीनं [4]सुखम्। पीनवन्मुखम्। पीनेऽक्षे। पीनोऽन्धुः। पीनमूधः। क्तयोरिति किम्? पूर्यते। अनुपसर्गस्येति किम्? प्राप्यानमूधः।

आङोऽन्धूधसोः ॥४।१।१२८॥ आङः परस्य प्यायः क्तयोः परतः अन्धूधसोरभिधेययोः साचो यत्र इगादेशो भवति। आपीनोऽन्धु। आपीनवानन्धु। आपीनमूधः। आपीनवदूधः। आङ इति किम्? प्राप्यानमूधः। प्राप्यायिरनुपसर्ग आङ्पूर्वः आङन्तोपसर्गसमुदायपूर्वो वा प्रयुज्यते। तत्राङ इत्यादि उन्तोपसर्गसमुदायपूर्वस्य निनिवृत्तिः। अन्धूधसोरिति किम्? आप्यानश्चन्द्रमाः। आप्यानेऽक्षे। अन्धुर्व्रणमूधस एव पर्यायः। क्तयोरिति किम्? आप्याय्य।

स्फायः ॥४।१।१२९॥ स्फायैङित्येतस्य धातोः क्तयोः परतः साचः पूर्वेणाचा सहितस्य यत्र इगादेशो भवति। स्फीतः। स्फीतवान्। संस्फीतः। संस्फीतवान्। क्तयोरिति किम्? स्फातिः[5]।

स्त्यः प्रपूर्वस्य ॥४।१।१३०॥ प्रपूर्वो यः स्त्या इति धातुस्तस्य क्तयोः परतः साचो यत्र इगादेशो भवति। प्रास्तीतः। प्रास्तीतवान्। प्रास्तीमः। प्रास्तीमवान्। प्रपूर्वस्येति किम्? संस्त्यानः, संस्त्यानवान्। प्रस्त्य इत्येव प्रस्तीत इत्यादौ सिद्धे प्रपूर्वग्रहणं प्र एव पूर्वो यस्मात्तस्य यथा स्यादधिकपूर्वस्य मा भूदित्येवमर्थम्। सम्प्रस्त्यान., सम्प्रस्त्यानवान्। अन(न्य) त्राधिकपूर्वस्य भवत्येव। अभिनिविशते। केषाञ्चिदप्रपूर्वस्य धातूपसर्गसमुदायस्य योऽवयवः स्त्या इति तस्य क्तयोर्यत्र इगभवति। प्रस्तीतः, प्रस्तीतवान्। प्रसस्तीतः। प्रसंस्तीतवान् इति।

द्रवमूर्तौ स्य ॥४।१।१३१॥ द्रवस्य [6]मूर्तिः काठिन्यम्। द्रव्यमूर्तौ वर्तमानस्य ष्यैङित्येतस्य धातोः क्तयोः परतः साचो यत्र इगादेशो भवति। [7]शीनं, शीनवत्(द्)—घृतम्। शीनं शीनवन्मेदः। शीना, शीनवती-वसा। द्रवावस्थायाः काठिन्यं गता इत्यर्थः। द्रवमूर्ताविति किम्? सश्यानो वृश्चिकः शीतेन। शीतं वर्तते। शीतो वायुः। शीतमुदकमिति गुणे शीतोष्ण तृप्रादसह आलुरिति निपातनात्सिद्धम्।

---

1. अहं शुशव, क० म०। 2. शिश्वय, क० म०। 3. नायिति प्रतिषेधो व्यवधानात्, क० म०। 4. दीर्घोऽचोऽत्र इति दीर्घः क० म० टि०। 5. स्त्रियां क्तिन्, क० म० टि०। 6. मूर्तिः काठिन्यकाययोः, क० म० टि०। 7. शीनं स्नानं घृतं पक्वं विक्लीनं विधृतं घृते, इति वैजयन्ती क० म० टि०।

प्रतेः ॥४।१।१३२॥ प्रति इत्येतस्मात्परस्य ष्या इत्येतस्य क्तयोः परतः साचो इगादेशो भवति। प्रतिशीनः। प्रतिशीनवान्। अद्रवमूर्त्यर्थ आरम्भः।

वाऽभ्यवपूर्वस्य ॥४।१।१३३॥ अभि अव इत्येतत्पूर्वस्य श्यः क्तयोः [परयोः] परतः साचो यत्र इगादेशो वा भवति। अभिशीनः। अभिशीनवान्। अभिश्यानः। अभिश्यानवान्। अवशीनः। अवशीनवान्। अवश्यानः। अवश्यानवान्। द्रवमूर्तावपि परत्वादयमेव विकल्पः। अवशीनं घृतम्। अवश्यानं घृतम्। अभ्यवपूर्वस्येति किम्? संश्यानः। संश्यानवान्। पूर्वग्रहणं किम्? समभिश्यानः। समभिश्यानवान्। समवश्यानः। समवश्यानवान्। इत्येके। अभिसंशीनः। अभिसंशीनवान्। अभिसंश्यानः। अभिसंश्यानवान्। अवसंशीनः। अवसंशीनवान्,। अवसंश्यानः। अवसंश्यानवानित्यपरे।

शृतं पक्वे हविः क्षीरे ॥४।१।१३४॥ पक्वशब्देन एकीकृतोऽर्थः पक्वः। पचेः कर्मकर्ता कर्म च तस्मिन् कृते शृतमिति निपात्यते योऽसौ पक्वार्थः स चेद्धविः क्षीरं वा भवति। श्रा इत्यस्य श्रपयतेश्च प्रथमण्यन्तस्य शृभ्वादौ निपात्यते। श्रा इति हि कर्मकर्तृ पक्ष्यर्थमाह। श्रयिः प्रथमण्यन्तः कर्मकर्तृविषयम् [2]शृतं हविः। शृतं क्षीरं स्वयमेव। शृतं हविः। शृतं क्षीरं देवदत्तेन। पक्व इति किम्? श्रपितं हविः क्षीरं वा देवदत्तेन। पाचितमित्यर्थः। द्वितीयण्यन्तात् क्तः। हविः क्षीर इति किम्? श्राणा यवागूः। श्रयिता यवागूः।

दीर्घोऽचोऽवः ॥४।१।१३५॥ अञ्चतस्य वेञ्वर्जितस्य धातोः साचो यत्र इक्प्रत्यये परे दीर्घो भवति। जीन। सवीतः। हूतः। [3]शूनः। अच इति किम्? सुप्तः। उक्तः। उशितः। विजितः। उत्तरार्थं च। अव इति किम्? उत। उतवान्। निरुतम्। दुरुतम्।

क्विबजलि ङित्यनुनासिके ॥४।१।१३६॥ क्वौ किति ङिति च जलादौ प्रत्यये परतो योऽनुनासिकस्तस्मिन् परे योऽञ्चधातोस्तस्य दीर्घो भवति। प्रशान्। प्रतान्। प्रदान्। प्रतामौ। प्रतामः। प्रदामौ। प्रदामः। प्रतान्भिः। प्रदान्भिः। प्रशानिति स्वरादिः। जलि किति, शान्तः। शान्तिः। तान्तः। दान्तः। ङिति शंशान्तः। तन्तान्तः। दन्दान्तः। क्विबजलीति किम्? यम्यते। रम्यते। यंयम्यते। रंरम्यते। ङिदतीति किम्? यन्ता। रन्ता। अनुनासिक इति किम्? पक्वः। पक्ववान्। ओदनपक्।

सनि ॥४।१।१३७॥ अञ्चतस्य धातोर्जलादौ सनि परे दीर्घो भवति। चिचीषति। तुष्टूषति। निसमीत्सति। चिकीर्षति। जिहीर्षति। अच इति किम्? रिरंसते।

इङ् घ्नः ॥४।१।१३८॥ एरिणि गिङादेशस्य गमेर्हन्तेश्चाचो जलादौ सनि परे दीर्घो भवति। जिगांस्यते। सञ्जिगांस्यते। अधिजिगांस्यते। माता अधिजिगांस्यते। जिगांसति। येन नाव्यवधानं तेन व्यवहितेऽपीत्युपान्त्यस्यैवाऽचो दीर्घ इति गमिग्रहणाद्गच्छतेर्न भवति। संजिगंसते वत्सो मात्रा। जलीति किम्? जिगमिषति। अधिजिगमिषति।

तनो वा ॥४।१।१३९॥ तनूञ् विस्तार इत्यस्य धातोर्योऽच् तस्य जलादौ सनि प्रत्यये परे दीर्घो वा भवति। सन्तितांसति, सन्तितंसति। जलीति किम्? सन्तितनिषति। यङ् श्लुचः तन्तनिषति।

क्रमस्त्वा ॥४।१।१४०॥ क्रम् इत्येतस्य धातोरचः जलादौ क्त्वाप्रत्यये परे दीर्घो वा भवति। क्रान्त्वा। क्रन्त्वा। जलीति किम्? प्रक्रम्य। क्रमित्वा।

शूङ्छ्वोऽनुनासिके च ॥४।१।१४१॥ धातोर्यौ ङकारवकारौ तयोरनुनासिकादौ क्विपि जलादौ प्रत्यये यथासङ्ख्यं श ऊच् इत्येतावादेशौ भवतः। प्रशूः। विश्वः। शब्दप्राट्। शब्दप्राशौ। शब्दप्राशः।

---

१. अन्तर्गतण्यन्ताः सर्वे धातवः, क० म० टि०। २. सान्नाय्यमपक्वं स्याच्छृतमाढकलैः (?) द्रोणेन तण्डुलैः पक्वं परं मिश्रार्चनाविधौ। मिश्रपक्वं क्वथितं पाके क्षीराज्यहविषां शृतम्, क० म० टि०। ३. शूनं वाप्यवदुच्छूने विश्वः क० म० टि०।

गोक्विट् । गोविशौ । गोविशः । प्रष्टा । प्रष्टुम् । प्रष्टव्यम् । पृष्टः । पृष्टवान् । पृष्ट्वा । ऊच्–प्रष्टारौ । हिरण्यष्टूः । सूतः । सूतवान् । स्यूत्वा । स्यूतिः । स्यूमः । स्योनः । सुस्योमा वक्तव्यनिपोर्वकारस्यानुनासिकत्वे सुस्योवा सुस्यूवा ह्रस्वस्य हल इत्यतो नित्यत्वाद्धलन्तविड्विधेर्ड् । नाडानन्तर्यो बहिःप्रक्लृप्ति, निर्मृन्तेत्वयचूनादेरिति निर्देशादिति [1]यड् । ऊरीनि चकार एजुच्चैजिति विशेषणार्थः । धातोरिति किम् ? द्युभ्याम् । द्युभिः । इह केषाञ्चित् जलि विड नीत्यनुवर्तते । तेषां दिवेर्यड्ग्लुचि देदेति । देदेषि । येषां नानुवर्तते तेषा देद्योति । देद्योषि ।

त्वर्जर्मव्यविस्त्रिवोऽचश्च ॥४।१।१४२॥ त्वर् जर् मवि अवि स्त्रिव् इत्येतेषामचो वकारस्य च अनुनासिके ववौ जलि च प्रत्यये ऊनादेशो भवति । चकारः स्थानीव सम्भवति । तेन शकारोऽन्नादेशो न भवति । त्वर्—तूः । तूरौ । तूरः । तूर्तिः । तूर्णः । तूर्णवान् । तातूर्ति । ज्वर्—जूः । जूरौ । जूरः । जूर्तिः । जाजूर्तिः । मवि–मूः । मुवौ । मुवः । मूर्तिः । अवि ओमादौ । दुरोमाणम् । ऊः । उवौ । उवः । ऊतिः । ओतुः । स्त्रिव्—सुस्त्रामा । स्यूः । स्युवौ । स्युवः । स्यूतः । स्यूतवान् । स्यूत्वा । स्यूतिः । त्वर्जर्मव्यविस्त्रिवोऽच् इत्युच्यमानेन यड्ग्लुचि पूर्वस्याप्यच. स्यादनुनासिके चेत्यचो विशेषणात् ।

रात्लुक ॥४।१।१४३॥ रात्परयोर्घातोरलकारवकारयोरनुनासिके ववौ जलि च प्रत्यये परे लुग्लोपो भवति । ग्लुचोऽपवादः । हुर्छा—हूः । हुरौ । हुरः । हूर्णः । हूर्णवान् । हूर्तिः । मूर्छा—मूः । मुरौ । मुरः । मूर्तः । मूर्तवान् । मूर्तिः । तुर्वे—तूः । तुरौ । तुरः । तूर्णः । तूर्णवान् । तूर्तिः । धुर्वे—धूः । धुरौ । धुरः । धूर्णवान् । धूर्तिः ।

[2]गाङ्कुटां ङिद्वदञ्णि ॥४।१।१४४॥ गाङित्येतस्य कुटादीनां च धातूनां अञ्णिति प्रत्यये परे ङिद्वत् ङिदिव कार्यं भवति । गाङ्—अध्यगीष्ट । अध्यगीषाताम् । अध्यगीषत । अध्यगीष्यत । अध्यगीष्येताम्, अध्यगीष्यन्त । कुटाम्—कुटिता । कुटितुम् । कुटितव्यम् । कुटित्वा । घुटिता । घुटितुम् । घुटित्वा । गाङिति ङकारः किम् ? कै गै शब्दे । गाता । अनभिधानाद् व्याख्यानादादेशङकारस्यानन्यार्थत्वाद्च इति अधिकाराद्धा न गाङ् गतावित्यस्य ग्रहणम् । तस्यापि ग्रहणमित्येके । अजीति किम् ? [3]उत्कोटः । तृणकोटः । उत्कोटयति । [4]उत्कोटकः । सङ्कुटति । उच्चकुटिषति । निचुकुटिषति । उरव्यचा इत्यौणादिकः । कुट, घुट, कुच, व्यध, गुड, गुज, छिप, छुर, चुट, छुट, त्रुट, स्फुट, मुट, तुट, जुट्, कट, लुद, कृद, कुद, घुड्, तुड, थुड, स्थुड, स्फर, स्फुर, बुड, क्षुड, भ्रुड, हुड, तूड, स्फल, स्फुल, णू, डू, गु, डु, कुड्, गुरैड्, वृत् इति कुटादिः । कटस्फरफलां कुटादिकार्यं नास्ति । कटकः । स्फरकः । स्फलकः । इण्तिण्वोः कुटादिषु पाठसामर्थ्याद् आकाराभावमेके मन्यन्ते ।

इटि विजः ॥४।१।१४५॥ विज[5] इत्येतस्य धातोरिडादौ प्रत्यये ङिद्वत्कार्यं भवति । उद्विजिता । उद्विजितुम् । उद्विजितव्यम् । इटीति किम् ? उद्वेग[6] । उद्वेजनीयः ।

वोर्णोः ॥४।१।१४६॥ ऊर्णोरिडादौ प्रत्यये परे ङित्कार्यं भवति वा । प्रोर्णुविता । प्रोर्णविता । प्रोर्णुवितुम् । प्रोर्णवितुम् । प्रोर्णुवितव्यम् । प्रोर्णवितव्यम् ।

श्लयक्लौ ॥४।१।१४७॥ श इति शकारावयवकः शित् । एवं प इति पित् । क्लीति लिङ्लिटोर्ग्रहणम् । धातोर्विहिते प्रत्यये शिति लादेशे चापिन्लौ परे ङितीव पूर्वस्य कार्यं भवति । चिनुतः । चिन्वन्ति । विध्यति । वृश्चति । जिनाति । गृह्णाति । जागृतः । जाग्रति । जागृहि । जागृनात् । कुरुतः । कुर्वन्ति । हतः । घ्नन्ति । शंशान्तः । तन्तान्त । इतीति किम् ? कर्ता । कर्तुम् । अञ्चावित्ति किम् ? आगति । हन्ति । करोति । करोषि । करोमि । चेषेष्ट । वरिषीष्ट । वर्त्तिषीष्ट । वर्द्धिषीष्ट । लिटि सस्से दध्वंसे व्यक्ते लौ लिङि क्लक्त इति एडि कृते एद इति लुक् स्थानिवद्भावाद्वा एड इत्याटो ङित्त्वादयाथासङ्क्ष्यम् ।

---

१. अङ्गिग्लुग्वेर्ता, इति क० म० टि० । २. कुटि कौटिल्ये तुदादौ, अन्तर्गणः–क०म० टि० । ३. अकर्तरीति घञ् क०म० टि० । ४. ण्वुत्रञ्ञिञ्झारिभ्यः, इति ण्वुः । क० म० टि० । ५. ओविजीक् भयचलनयोः, क० म० टि० । ६. समे उद्वेग उद्भ्रमे, इत्यमरः । क० म० टि० ।

किद्वल्लिटीन्धेरासंयोगात् ॥४।१।१४८॥ इन्धेरन्यस्माद् धातोरसंयोगादपिति लिटि किद्वत् कितीव कार्यं भवति । समीधे । समीधाते । समीधिरे । निन्यतुः । निन्युः । विभिदतुः । विभिदुः । चक्रतुः । चक्रुः । ववृते । ववृधे । ऊजतुः । ऊजुः । सुषुपतुः । सुषुपुः । लिटीति किम् ? इन्धिता । नेता । इकारः किम् ? इन्धीष्ट । नेषीष्ट । इन्धेरिति संयोगार्थम् । चक्रुरोऽप्यर्थः । अन्यधेन्धिरेवासंयोगान्तोऽपि विज्ञायेत । असंयोगादिति किम् ? सस्रंसे । दध्रंसे । अपितीति किम् ? निनाय । निनयिथ । विभेद । विभेदिथ । इयाज । इयजिथ । ङिद्वदिति प्रकृते किद्वद्वचनं ख्यादीति यङीमर्थं जागर्तेरर्थं च । ङिति हि तत्र भवति । स्वपितः । स्वपन्ति । जागृतः । जाग्रति ।

स्वञ्जेर्वा ॥४।१।१४९॥ स्वञ्ज इत्येतस्य लिटि परे किद्वत् कितीव कार्यं वा भवति । परिष्वस्वजे । परिष्वस्वञ्जे ।

नशस्ति त्वि न्युपान्त्ये ॥४।१।१५०॥ नशः आन्तात्च धातोर्नकारः उपान्त्ये सति तकारादौ क्त्वाप्रत्यये परे किद्वत्कार्यं भवति वा । नष्ट्वा । नंष्ट्वा । मक्त्वा । मङ्क्त्वा । रक्त्वा । रङ्क्त्वा । भक्त्वा । भङ्क्त्वा । तीति किम् ? विभज्य । प्रसज्य । परिष्वज्य । त्विति किम् ? नंष्टा । भङ्क्ता । न्युपान्त्य इति किम् ? मुक्त्वा । इष्ट्वा । भृष्ट्वा । उपान्त्य इति किम् ? निक्त्वा ।

थफवब्लुञ्छ्यूतितृषिमृषिकृष इटि ॥४।१।१५१॥ नकार उपान्त्ये सति थकारफकारान्तयोः वब्लि लुञ्छि ऋति तृषि मृषि कृष इत्येतेषां च इडादौ क्त्वाप्रत्यये परे किद्वत्कार्यं वा भवति । त्वीति प्रतिषेधे विकल्पः । ग्रथित्वा । ग्रन्थित्वा । ग्रथित्वा । ग्रन्थित्वा । गुफित्वा । गुम्फित्वा । वब्लित्वा । वब्लित्वा । लुञ्छित्वा । लुञ्छित्वा । ऋतित्वा । अर्तित्वा । तृषित्वा । तर्षित्वा । मृषित्वा । मर्षित्वा । कृषित्वा । कर्षित्वा । न्युपान्त्य इति किम् ? कुथ[1]—कोथित्वा । पुथ[2]—पोथित्वा । रिफ[3]—रेफित्वा । न्युपान्त्य इति थफविशेषणं नान्येषां सम्भवव्यभिचाराभावात् । त्वीति किम् ? ग्रथितः । ग्रथितवान् । इटीति किम् ? क्वक्त्वा । मृष्ट्वा । मृ (ब)ञ्चू मृष् इति ऊदितो क्त्वादा विकल्पितेटौ ।

यौ हलादेरलः संस्वोः ॥४।१।१५२॥ यौ इकारे उकारे च उपान्त्ये सति रलन्तस्य हलादेर्धातोरिडादौ सनि स्वायां च प्रत्यये परे किद्वत्कार्यं वा भवति । लिलिखिषति । लिलेखिषति । लिखित्वा । लेखित्वा । दिद्युतिषते । दिद्योतिषते । द्युतित्वा । द्योतित्वा । याविति किम् ? विवर्तिषते । वर्तित्वा । हलादेरिति किम् ? एविधिषति । एधित्वा । रल इति किम् ? दिदेविषति । देवित्वा । इटीति किम् ? बुभुक्षते । भुक्त्वा ।

उति शपः क्त्वोर्भावारम्भे ॥४।१।१५३॥ शब्दान् शप यः इलेले शब्दमुत्पादयति । तस्य धातोरुति उकार उपान्त्ये सति भाव आरम्भ आदिकर्मणि च इडाद्योः क्त्वयोः क्तक्तवतवोः किद्वत्कार्यं वा भवति । कुच शब्दे तारे—कुचितमनेन । कोचितमनेन । प्रकुचितः । प्रकोचितः । प्रकुचितवान् । प्रकोचितवान् । द्युति दीप्तौ—प्रद्योतितः । द्युतितमनेन । द्योतितमनेन । प्रद्युतितः । लुटितमनेन । लोटितमनेन । प्रलुटितः । प्रलोटितः । रुदितमनेन । रोदितमनेन । प्ररुदितः । प्ररोदितः । प्ररुदितवान् । प्ररोदितवान् । उतीति किम् ? श्वयितमनेन । प्रश्वयितः । शप इति किम् ? द्युदितमनेन । प्रद्युदितः । क्त्वयोरिति किम् ? प्रद्योतिषीष्ट । भावारम्भ इति किम् ? दवितः कार्षापणः । इटीति किम् ? रुडमनेन । प्ररुडः । प्ररुडवान् ।

क्ष्वीङ् ङीङ् पूङ्स्विभिदिछिदुङ्भ्यो न ॥४।१।१५४॥ क्ष्वीङ् ङीङ् पूङ् स्विदि भिदि छिदृ धूष् इत्येतेभ्यो धातुभ्यः क्त्वयोः परतः किद्वत्कार्यं न भवति । क्ष्वायितः । क्ष्वयितवान् । ङयितः । ङयितवान् । पवितः । पवितवान् । प्रस्वेदितः । प्रस्वेदितवान् । प्रभेदितः । प्रभेदितवान् । प्रच्छेदितः । प्रच्छेदितवान् । धूषितः । धूषितवान् । क्ष्वीङ् ङीङ् पूङ् अनुबन्धोच्चारणं यङ्लुगुनिवृत्त्यर्थम् । क्ष्वेयितः । क्ष्वेयितवान् । ङेयितः । ङेयितवान् । पोपूयितः । पोपूयितवान् । इटोत्येव । पूतः । पूतवान् । स्विन्नः । स्विन्नवान् ।

---

१. कुथ पूतीभावे—क० म० टि० । २. पुथ हिंसायाम्—क० म० टि० । ३. रिफ कत्थने—क० म० टि० । ४. दीर्घो भ्रूहलक्ष्मोश्च इत्येतयोरपवादोऽयम् । प्रत्ययेऽनुधीण इति यण् । क० म० टि० ।

मृषः क्षान्तौ ॥४।१।१५५॥ मृष इत्येतस्य क्षान्तौ वर्तमानस्य इटि क्तयोः किित्कार्यं न भवति। मर्षितः। मर्षितवान्। क्षान्ताविति किम्? अपमृषितं वाक्यमाह अपक्लिष्टम् इत्यर्थः। इटीति किम्? मृष्टः। मृष्टवान्।

स्विव ॥४।१।१५६॥ इडादौ क्त्वाप्रत्यये परे किित्कार्यं न भवति। देवित्वा। सेवित्वा। वर्तित्वा। वर्द्धित्वा। ध्वंसित्वा। ध्वंसित्वा। वृद्धित्वा। इटीत्येव। कृत्वा। हृत्वा। दृष्ट्वा। शान्त्वा।

स्कन्दस्यन्दः ॥४।१।१५७॥ स्कन्दस्यन्दोर्धत्वोः क्त्वाप्रत्यये किित्कार्यं न भवति। स्कन्त्वा। स्यन्त्वा। त्वीति तकारप्रश्लेषः। स चेहार्थ एव। तेन तकारादावेवायं प्रतिषेधो न प्रस्कन्द्य प्रस्यन्द्येत्यत्रेके। अन्ये अव-स्कन्द्य। अवस्यन्द्य इत्यप्युदाहरन्ति। अनिडर्थं वचनम्।

मृड्मृद्गुधकुषक्लिशवद्वसः ॥४।१।१५८॥ नेति निवृत्तम्। मृड् मृद् गुध् कुष् क्लिश् वद् वस् इत्येतेषां क्त्वाप्रत्यये परे किित्कार्यं भवति। मृडित्वा। मृदित्वा। गुधित्वा। कुषित्वा। क्लिशित्वा। उदित्वा। उषित्वा। त्वीति प्रतिषेधे यौ हलादेरलः संस्त्वोरिति विकल्पे च प्राप्ते वचनम्।

रुदिन्मुषिग्रहिस्वपप्रच्छां सनि च ॥४।१।१५९॥ इटीति निवृत्तम्। रुद् विद् मुषि ग्रहि स्वप् पृच्छ इत्येतेषां सनि चकारात् क्त्वाप्रत्यये च परे किद्वत्कार्यं भवति। रुदित्वा। रुरुदिषति। विदित्वा। विविदिषति। मुषित्वा। मुमुषिषति। गृहीत्वा। जिघृक्षति। सुषुप्सति। पिपृच्छिषति। रुविद्मुषीणा वित्व विकल्पे ग्रहेः प्रतिषेधे प्राप्ते वचनम्। स्वपि पृच्छेयाः सनर्थमेव। क्त्वा हि किटेव।

सीकः ॥४।१।१६०॥ इगन्तस्य धातोः सकारादौ सनि परे किद्वत्कार्यं भवति। चिचीषति। निनीषति। तुष्टूषति। चुकूषति। चिकीर्षति। तितीर्षति। सीति किम्? शिक्षयिषते। इक इति किम्? पिपासति। तिष्ठासति। सनीति किम्? चेष्यति। नेष्यति। कुटादिष्वोत्वबाधाया मी(सी) इति सामान्यग्रहणे न वा सनीति दीर्घः कृनार्थो न चिचीषत्यादिषु एङ्गौ बाधते इतीदं वचनम्।

हलि ॥४।१।१६१॥ सकारादौ सनि परे यो हल् तस्मिन्परे य इक् तस्य किद्वत्कार्यं भवति। बिभित्सति। बुभुत्सते। विवृत्सते। विवृत्सति। सीति किम्? विवर्तिषते। विवर्धिषते। इक इति किम्? यियक्षति। विवप्सति। सनीति किम्? भेत्स्यति। भोत्स्यते।

सि लौ तङि ॥४।१।१६२॥ तङ्परे सकारादौ सिप्रत्यये सकारादौ लौ लिङि च परे यो हल् तस्मिन्परे इक् तस्य किद्वत्कार्यं भवति। अभित्त। अबुद्ध। असुष्ट। भित्सीष्ट। सुत्सीष्ट। लिटि किद्वद्भावस्य सिद्धत्वाल्लीति लिङो ग्रहणम्। सिलाविति किम्? भेत्स्यते। भोत्स्यते। तङीति किम्? अक्षाक्षीत्। अद्राक्षीत्। तङीति सेर्विशेषण साङस्तु लिटाङ् विषय एव। सीति किम्? अवर्तिष्ट। वर्तिषीष्ट। इक इति किम्? अयष्ट। यक्षीष्ट। हलीति किम्? अचेष्ट। चेषीष्ट।

उः ॥४।१।१६३॥ ऋवर्णान्तस्य धातोस्तङि सकारादौ सि लौ परे किद्वत्कार्यं भवति। अकृत्। अहृत्। कृषीष्ट। हृषीष्ट। आस्तीर्ष्ट। न्यमूर्ष्ट[1]। आस्तीर्षीष्ट। न्यग्रर्षीष्ट। सीति किम्? अकारिषाताम्। कारिषीष्ट। अवरिष्ट। अवरिषीष्ट।

गमो वा ॥४।१।१६४॥ गमेर्धातोः सनि सकारादौ सिलौ परे किद्वत्कार्यं वा भवति। समगत। समगंस्त देवदत्तः। अगसाताम्। अगंसाताम् ग्रामो देवदत्तेन। संगसीष्ट। संगंसीष्ट।

यमः सौ विवाहे ॥४।१।१६५॥ यम् इत्येतस्य विवाहे दारकर्मणि पाणिग्रहणे वर्तमानस्य तङि सकारादौ सिप्रत्यये परे किद्वत् कार्यं वा भवति। उपायत कन्याम्। उपायंस्त कन्याम्। उपायत भार्याम्।

---

१. न्यग्रर्ष्ट क० म०।

उपायंस्त भार्याम् । स्वाविति किम् ? उपायंसीष्ट कन्याम् । विवाह इति किम् ? आर्यस्त पादौ । आर्यस्त कूपाद्रज्जुम् ?

गन्धने ॥४।१।१६६॥ वेति निवृत्तम् । गन्धनं सूचनं परेण प्रच्छाद्यमानस्यावद्यस्य प्रकटीकरणम् । तस्मिन् वर्तमानस्य यमेस्तङि सकारादौ सिप्रत्यये परे किद्वत्कार्यं भवति । उदायत । उदायसाताम् । उदायसत । सूचितवान् इत्यर्थः ।

हः ॥४।१।१६७॥ हन् इत्येतस्य धातोस्तङि सकारादौ सिप्रत्यये परे किद्वत् कार्यं भवति । आहत । आहसाताम् । आहसत ।

घुस्थोरि च ॥४।१।१६८॥ घुसञ्ज्ञकस्य स्था इत्येतस्य च धातोस्तङि सकारादौ सिप्रत्यये परे इकारादेशो भवति । किद्वच्च । घु—दाण्—व्यत्ययेदित । अदिषातां वस्त्रे । देङ्—प्रदित पुत्रम् । डुदाञ्—अदित दानम् । दो—व्यत्ययदित । अदित । अदिषाता दण्डो । धेट्—व्यत्ययधित । अधिषाता स्तनौ । दुधाञ्—अधित भारम् । स्था—प्रास्थित । प्रास्थिषाताम् । प्रास्थिषत । घुस्थोरिति किम् ? दाण्धेयोः दाङ्दैयोः—व्यत्ययदास्त । अदासत । चकारेण किद्वचनमेङ्घाधनार्थम् । इत्ववचनं ज्ञापनार्थमपि स्यात् । तङीति किम् ? अधासीत् स्तनम् । सीति किम् ? अधायिषाताम् ।

अन्त्योपान्त्यतामिर् ॥४।१।१६९॥ धातोरन्त्यस्योपान्त्यस्य च ऋकारस्य प्रत्यये परे इरादेशो भवति । किरति । गिरति । तीर्णम् । आस्तीर्णम् । चिकीर्षति । उपान्त्यस्य—कीर्तयति । कीर्तयतः । कीर्तयन्ति । बहुवचन लाक्षणिकार्थम् । इदमेव ज्ञापकम्—लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति । अन्त्योपान्त्य इति किम् ? ऋकारीयति । धातोरिति किम् ? पितॄणाम् ।

पुवादुर् ॥४।१।१७०॥ पवर्गाद्यकाराच्च धात्ववयवात् परस्य अन्त्यस्योपान्त्यस्य च ऋकारस्य उरादेशो भवति । इरोऽपवादः । पिपुरति । बुभूर्षति । मुमूर्षति । बुबूर्षति । प्रावुवूर्षति कम्बलम् । परिपूर्णः परिमूर्ण्डः (? र्णः) । आस्तरणम् । आस्तरकः । निपरणम् । निपारकः । प्रावरणम् । प्रावारक—इत्यत्र परत्वादुर् भवति । पुवादिति किम् ? तीर्णम् । विशेषणादिह न भवति—समीर्णम् ।

क्तेऽनिट्चजः कुर्घिति ॥४।१।१७१॥ क्तेऽनिटो धातोश्चवर्गान्तस्य कवर्गादेशो भवति घिति प्रत्यये । पाकः । योगः । पाक्यम् । योग्यम् । क्तेऽनिड्ग्रहणं किम् ? सङ्कोचः । कूजः । कर्जः । खर्जः । गर्जः । उदाजः । समाजः । परिव्राजः । शोच्यम् । क्त इति किम् ? अर्चः । अर्च्यः । याच्यम् । रोच्यम् । अर्कः याच्ञा रुग्रमित्यनिटोऽपि । क्ते सेटः आरोकदलिपातनात् ।

वाक्यार्घनिदाघावदार्घं नाम्नि ॥४।१।१७२॥ वाक्य अर्घ निदाघ अवदाघ इत्येते शब्दाः कृत-कुत्वाः नाम्नि निपात्यन्ते । वाक्यम् । अधिवाक्यम् । अर्घः । अर्हतेर्घञ् । निदाघः । अवदाघः । न्यवपूर्वाद् वहेर्घञ् । नाम्नीति किम् ? वाक्यम् । अधिवाक्यम् । अर्हः । निदाहः । अवदाहः । वचेर्नियमार्थं वाक्य-निपातनम् ।

उद्गादयः ॥४।१।१७३॥ उद्गादय इति उद्गादीनां कुत्वादि निपात्यते । उद्गः । अभ्युद्गः । समुद्गः । उञ्जेर्घञ् कुर्दश्च निपात्यते । शोकः । शुचेर्घञि कुः कते सेट्त्वात् । शवपाकः । मासपाकः । पिण्डपाकः । उलूकपाकः । कपोतपाकः । सामप्रपाकः । गोयोगः । कर्मणो णे, व्यतिसङ्गः । सर्गः । अवसर्गः । मेघः । अनु-

---

१. उत्साहने च हिंसायै सूचने चापि गन्धनम्—इति रभसः । क० म० टि० । २. ऋतिहृते गतिहिंसाशब्द इति सूत्रेण तङ् । क० म० टि० । ३. करणाधारे घानट्(ङ्) इत्यनट् क० म० टि० । ४. प्रावरणं संज्ञानं प्रच्छादनमुत्तरीयं च, इत्यभिधानम् क० म० टि० । ५. सिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता, इत्यमरः क० म० टि० । ६. अर्हं पूजायाम्—क० म० टि० । ७. समुद्गकः संपुटक इत्यमरः क० म० टि० ।

वाकः । नीचे पाकः । दूरे पाकः । फलेपाकः । क्षणेपाकः । क्युञ्च् । पचेः कर्मकर्तरि दीर्घश्च । गणे निपातनादेव । नीचेपाकुः । दूरेपाकुः । फलेपाकु । क्षणेपाकुः । न्यङ्कुः । मद्गुः । भृगुः । औणादिकः ङः । तक्रं वक्रं तक्रिवक्रयोः अविहितलक्षणकुत्वमुद्गादिषु द्रष्टव्यम् । तेन न्योकः । शकुन्तः । न्योको वृक्षः । दिवोकस् इत्यादि सिद्धम् । न्यग्रोधः । अवरोध. । वीरुदिति रुजादिः ।

न गतौ वञ्चः ॥४।१।१७४॥ वञ्चेर्गतौ वर्तमानस्य कुर्न भवति । वञ्चं वञ्चन्ति वाणिजाः । गन्तव्यं गच्छन्तीत्यर्थः । गताविति किम् ? वङ्कं काष्ठम् । कुटिलमित्यर्थः ।

याजादयो यज्ञाङ्गे ॥४।१।१७५॥ याजादय कुत्वाभावेन यज्ञाङ्गे भवन्ति । याजः । प्रयाजः । अनुयाजः । उपयाज· । उपांशुयाजः । ऋतुयाज. । एवंप्रकारा. याजादयः । यज्ञाङ्ग इति किम् ? [1]योगः । प्रयागः । भुनक्तीति भुजः । कः । न घञ् ।

ण्यण्यावश्यके ॥४।१।१७६॥ आवश्यके ण्यणि कुत्वं न भवति । अवश्यपाच्यम् । अवश्यसेच्यम् । आवश्यक इति किम् ? पाक्यम् । सेक्यम् ।

निप्राद्युजः शकि ॥४।१।१७७॥ नि प्र इत्येताभ्यां परस्य युज. शक्यर्थे गम्यमाने ण्यणि कुत्वं न भवति । नियोज्यः । प्रयोज्यः । शकीति किम् ? नियोग्यः । प्रयोग्यः ।

भुजोऽदौ ॥४।१।१७८॥ भुजोऽद्यर्थेऽभ्यवहारे ण्यणि कुर्न भवति । भोज्य ओदनः । भोज्या यवागूः । अदाविति किम् ? [2]भोग्यः कम्बलः । भोग्या अपूपाः । पाल्या इत्यर्थः ।

त्यजयजः ॥४।१।१७९॥ त्यज् यज् इत्येतयोर्ण्यणि कुत्वं न भवति । त्याज्यम् । याज्यम् ।

एचोऽश्याः ॥४।१।१८०॥ एजन्तस्य धातोराकारादेशो[3] भवति अशि अशकारादौ प्रत्यये विषयभूते भविष्यति बुद्धिस्थिते भवति । तेन आत्वे कृते प्रत्ययो भवति । [4]वेञ्—ब्राता । ब्रानीयम् । शाता । शानीयम् । ग्लै—ग्लाता । ग्लानीयम् । सुम्नः । सुम्नम् । सुम्नः । सुम्नाणम् । सुम्लानम् । सुम्लानम् । एच इति किम् ? कर्ता । हर्ता । अशीति किम् ? वयन्ति । ग्लायन्ति । अग्ले । मग्ले । इत्येश् न शादिरिति भवत्येव प्रागेवानिमित्तत्वात् । धातोरिति किम् ? गोभ्याम् । नौभ्याम् । इह लाक्षणिकत्वान्न भवति । चेता । स्तोता ।

व्योऽलिटि ॥४।१।१८१॥ व्य. व्यञ् इत्येतस्य धातोरलिटि अशि विषये आकारादेशो भवति । संव्याता । संव्यानम् । संव्यासीष्ट । अलिटीति किम् ? संविव्याय । संविव्यथिथ । संविव्यय । अलिटि पूर्वेणैव सिद्धम् । लिटि प्रतिषेधार्थं वचनम् ।

स्फुरस्फुलोर्घञि ॥४।१।१८२॥ स्फुर स्फुल इत्येतयोर्धातोरच. घञि परे आकारादेशो भवति । विस्फारः । विस्फालः । घञीति किम् ? विस्फोरकः । विस्फोलक. ।

अस्यपगुरो वा ॥४।१।१८३॥ अपपूर्वस्य गुरेङ् उद्यमन इत्यस्य धातोरचः स्थाने अमि अमुमि णमि च प्रत्यये परे आकारादेशो वा भवति । अपगारमपगारम् । अगोरमपगोरम् । अस्यपगारं युध्यन्ते । अस्यपगोरं युध्यन्ते ।

दीङस्सनि ॥४।१।१८४॥ दीङः सन्याकारो वा भवति । दिदासते । दिदीषते । उपदिदासते । उपदिदीषते ।

ण्याकिङ ॥४।१।१८५॥ दीङ इत्येतस्य धातोर्नित्यमाकारादेशो भवति ण्ये किति ङिति च प्रत्यये विषयभूते भविष्यति बुद्धिस्थिते एवेत्यर्थः । तेनात्वे कृते प्रत्ययो भवति । ण्ये-उपदाय । अवदाय । अकिङ ।

---

१. योगः प्रयोगः क० म० । २. पराध्यं वद्भवनं लोके तद्योग्यं पृथिवीभुजाम् । न भोक्तुरीदृशी भोग्या कन्दमूलफलादिभिः क० म० टि० । ३. -कार आदे- क० म० । ४. तन्तुसन्ताने, क० म० । ५. इत्येत्, क० म० ।

उपदाता । उपदातुम् । उपदातव्यम् । उपदायः । अवदायः । उपदायो वर्तते । अवदायो वर्तते । ईषदुपदानम् । ईषदवदानम् । अवङीत्युक्तेरिह न भवति । दीनः । उपदीयते । उपदेदीयते । सानुबन्धनिर्देशाद् यङ्श्लुचि न भवति । उपदेदेति ।

मिम्मीजोरक्ञाचि ॥४।१।१८६॥ मिङ् मीङ् इत्येतयोर्धात्वोः स अच् इत्येतद्वर्जितेष्वाचिङ विषयभूत आकारादेशो वा भवति । निमाय गतः । निमाता । निमातुम् । निमातव्यम् । निममौ । प्रमाय गतः । प्रमाता । प्रमातुम् । प्रमातव्यम् । प्रममौ । अक्ञाचीति किम् ? ईषन्निमयः । दुष्प्रमयः । अचि निमिनोति निमानं वा निमयः । आमीनाति आमानं वा आमयः । प्याचङीति किम् ? [1]निमिम्यतुः । निमिम्युः । मेमीयते । सानुबन्धनिर्देशादिह न भवति । अकारेदुपादानाद् मीङ् हिंसायामिति ङानुबन्धस्य दैवादिकस्य न भवति । मेता, मेतुम् ।

लीङ्लिनात्योर्घा ॥४।१।१८७॥ प्याचिङ अक्ञाचीति वर्तते । लीङ्लिनात्योर्धात्वोः स्वाज्वर्जिते प्ये अचिङति च प्रत्यये विषयभूते अकारादेशो वा भवति । विलाय । विलीय । विलाता । विलेता । विलास्यते । विलेष्यते । विलास्यति । विलेष्यति । विललौ । विललाय । प्याचिङ इति किम् ? विलीयते । विलेलीयते । लिलीषते । लिलीषति । लीनः । अक्ञाचीति किम् ? ईषल्लयः । विलयः । इत्तिङ्(ञ)निर्देशाद् यङ्श्लुचि न भवति । लेलेति । लीयतिलिनात्योरुपादानाल्ली द्रवीकरणे इति युजादेर्न भवति । विलयति ।

पूजाप्रलम्भाभिभवे णौ ॥४।१।१८८॥ लिङ्लिनात्योर्णौ परत पूजायां प्रलम्भे वञ्चनेऽभिभवे चार्थे नित्यमाकारादेशो भवति । जटाभिरालापयते—पूजयति आत्मानम् । पूजां प्रापयतीत्यर्थः । वञ्चने—कस्त्वामुल्लापयते । लोपमुल्लापयते वञ्चयते विप्रलम्भं प्रापयतीत्यर्थः । अभिभवे—श्येनो वर्तिकामपलापयते-अभिभवति । न्यग्भावं प्रापयतीत्यर्थः । पूजाप्रलम्भाभिभव इति किम् ? विलापयति ।

क्रीङ्जेः ॥४।१।१८९॥ क्रीङ् इङ् जि इत्येतेषां णौ पर आकारादेशो भवति । क्रापयति । अध्यापयति । जापयति ।

सिध्यतेरज्ञाने ॥४।१।१९०॥ सिध्यतेर्णौ परत एव आकारादेशो भवति अज्ञाने, न चेत्स ज्ञानार्थो भवति । अन्नं साधयति । पक्षं साधयति । देवदत्तं जिनदत्तः काम्पिल्ये साधयति । राजनि साधयति । अज्ञान इति किम् ? तपस्तपस्विनं सेधयति । स्वान्येवैनं कर्माणि[2] सेधयन्ति । सिद्धयति तपस्वी, ज्ञानेन सम्बद्धयते, आविर्भूतप्रकाशो भवतीत्यर्थः । तत्र ज्ञाने प्रयोजने णिजि तत्त्वं न भवति । अन्नं साधयतीति साधेः सिद्धं तत्र सेधयतीति प्रयोगनिवृत्त्यर्थं वचनम् । अनुबन्धनिर्देशेनापि यङ्श्लुङ्निवर्तयितुं शक्यते तत्र सिद्धयतीति श्यैन निर्देश ऐषादिकनिवृत्त्यर्थः ।

प्रयोक्तुस्स्मिङः ॥४।१।१९१॥ स्मिङो णौ पर आकारादेशो भवति प्रयोक्तुः स चेत्स्मिङो णिकर्तुः कारकाद्भवति नान्यस्मात् । अर्थस्ततो भवतीति स्मिदोपिततो (?) भवतीत्युच्यते । मुण्डो विस्मापयते । जटिलो विस्मापयते । प्रयोक्तुरिति किम् ? कुञ्चिकयैनं विस्मापयति । करणादत्र विस्मयो न प्रयोक्तुः । अनुबन्धनिर्देशाद् यङ्श्लुचि न भवति । विसेस्मायते ।

बिभेतेर्भीष् च[3] ॥४।१।१९२॥ बिभेतेर्णौ परत आकारादेशो भवति भीषादेशश्च । प्रयोक्तुः स चेद्बिभेतिर्णिकर्तुः कारकाद् भवति । [4]मुण्डो भापयते । [5]जटिलो भापयते । मुण्डो भीषयते । जटिलो भीषयते । प्रयोक्तुरिति किम् ? कुञ्चिकयैनं भाययति । अत्र करणाद् भयं न प्रयोक्तुः । कुञ्चिका ह्यहि मत्वा बालस्त्रको बिभेतीति । सिप्निर्देशाद् यङ्श्लुचि न भवति । बिभाययति ।

---

१. निम्यतुः (निम्युः) । क० अ० । २. कर्मणि, क० अ० । ३. चशब्दोऽन्वाचयार्थः, क० अ० टि० । ४. मुण्डस्तु मुण्डके शिरु मुण्डिते इत्यभिधानम् । क० अ० टि० । ५. "जटिलस्तु जटायुक्ते" इति विश्वः क० अ० टि० ।

चिस्फुरोर्वा ॥४।१।१९३॥ चि स्फुर इत्येतयोर्वात्वोरेचो स्था णौ परे आकारादेशो भवति वा। चापयति। चाययति। स्फारयति। स्फोरयति।

वेतेः प्रजने[1] ॥४।१।१९४॥ वी गतिप्रजनकान्त्यशनखादनेष्वित्यदादिषु पठ्यते, तस्य प्रजनेऽर्थे णौ परे आकारादेशो वा भवति। पुरो[2] वातो गाः प्रवापयति। प्रवाययति। गर्भं ग्राहयतीत्यर्थः। प्रजनो जन्मन उपक्रम.। गर्भग्रहणम्। वातिः प्रजने न दृश्यते इति योगारम्भः।

लीलोर्नग्लक्स्नेहद्रवे ॥४।१।१९५॥ स्नेहद्रवेऽर्थे वर्तमानयोः ली ला इत्येतयोर्वात्वोर्णौ परे यथासङ्ख्यं नक् लक् इत्येतावागमौ वा भवतः। ली इति ली द्रवीकरणे। ला इति ला आदाने। अथास्य स्नेहद्रवे न वृत्तिः। ली इत्ययमेव कृतात्वः। घृतं विलीनयति। घृतं विलालयति। घृतं विलालयति। घृतं विलापयति। कृतात्वस्य लीग्रहणेन ग्रहणे बलवामुक्ते पक्षे अनात्वे सावकाशं नकं परत्वात्पक् बाधते। स्नेहद्रव इति किम्? अयो विलाययति। जटाभिरालापयते। पूर्वान्तकरणं ह्रस्वार्थम्। घृतं व्यलीलीत्। व्यलीललत्। एवमुत्तरत्रापि।

रुहः पः ॥४।१।१९६॥ रुह इत्येतस्य णौ परे पकारादेशो वा भवति। रोपयति व्रीहीन्। रोहयति व्रीहीन्। आरोपयति। आरोहयति। रोहत्यर्थे रुप्यतिर्न दृश्यत इति योगारम्भः।

कथादिपातिस्फायोऽल्लग्वम् ॥४।१।१९७॥ वेति निवृत्तम्। कथादीना, पा रक्षणे, स्फायेङ् वृद्धावित्येतेषां[3] योर्वात्वोश्च णौ यथासङ्ख्यम् अल्लगागमावकारादेशश्च भवति। कथयति। वरयति। अचकथत्। अवरत्। अशशारत्। अशुशुरत्। [4]वटापयति। लज्जायति। पालयति। अपीपलत्। स्फारयति। कथादयः प्रागर्थेरधिमतृद्धिणा हि अर्थयते सत्रयते गर्वयते इत्येव भवति। अपरे पुनराहुः। आगर्वात्, अग्वचनसामर्थ्याल्लुक् नास्ति। अर्थापयते। सत्रापयते। गर्वायते इति भवतीत्याहुः। पातेर्ग्वचनं रूपान्तरनिवृत्त्यर्थम् पल रक्षण इति चुरादिषु पठ्यते एव। लकि अकार उच्चारणार्थः। ककारो देशविध्यर्थः। पातीति तिङ्निर्देशोऽदादिप्रतिपत्त्यर्थो यङ्श्लुनिवृत्त्यर्थश्च। पापापयति।

प्रीञ्धूञोर्नक् ॥४।१।१९८॥ प्रीञ् इत्येतयोर्णौ परे नगागमो भवति। प्रीणयति। अपिप्रीणत्। धूनयति। अदुधूनत्। प्रीञिति अकारोच्चारणं यङ्श्लुन्निवृत्त्यर्थं धुवतिनिवृत्त्यर्थं च।

वाशव्योर्विधूननागत्योर्जक्तौ ॥४।१।१९९॥ वा शद् इत्येतयोर्णौ परे यथाक्रमं विधूनने[5] गतौ चार्थे अगागमस्तादेशश्च भवति। पुष्पाणि प्रवाजयति। पक्षकेणोपवाजयति। उपावीवजत्। फलानि शातयति। विधूननागत्योरिति किम्? केशानवापयति। शोषयतीत्यर्थः। यद्वा गाः शादयति गमयति कालं[6]यतीत्यर्थः। वाजयतीति वज गतावित्यस्यापि सिद्ध्यति। वाते रूपान्तरनिवृत्त्यर्थं वाग्रहणम्।

वेव्यापाह्वाशाच्छासो यिक् ॥४।१।२००॥ वे व्या पा ह्वा शा च्छास इत्येतेषां णौ परे यिगागमो भवति। वे—वाययति शाटकम्। अवीवयत्। वे इति वेञोऽनात्वेन निर्देश ओर्वै इत्यस्य निवृत्त्यर्थः। आवापयति केशान्। व्या—सव्याययति। पा पाने—पाययत्युदकम्। पै इत्यस्यापि पा इति ग्रहणं केचिदिच्छन्ति। अपरे तु लाक्षणिकत्वान्नेत्याहुः। ह्वा—ह्वाययति। शा—निशाययति। छा—अवच्छाययति। सा—अवसाययति।

ह्रीङ्लीरीक्नूयीक्ष्माय्यर्त्यातां पक् ॥४।१।२०१॥ ह्रीं ङ्ली री क्नूयी क्ष्मायी अर्ति इत्येतेषामाकारान्तानां घात्वन्तयवानां णौ परे पुगागमो (भवति)। ह्रीं—ह्रेपयति। ङ्ली—ङ्लेपयति। री—रेपयति। बहुवचनात्सानुबन्धः निरनुबन्धपरिभाषेह नाश्रीयते—इति रीरीधोर्द्वयोरपि ग्रहणम्। क्नूयी—

---

१. प्रजनं स्यादुपसरः, इत्यमरः क० म० टि०। २. गोगन्धनः पुरो वातः, इत्यभिधानम् क० म० टि०। ३. -वित्यनयोर्धा- क० म०। ४. वट विभाजने- क० म० टि०। ५. ऊज प्रकाशने- क० म० टि०। ६. विधूनं विधूनमित्यमरः क० म० टि०। ७. कल गतौ, चौरादिको धातु.। क० म० टि०।

क्नोपयति । क्ष्मायी—क्ष्मापयति । अर्पि—अर्पयति । आर्तीति ऋ गतिप्रापणयोः, ऋ गताविस्युभयोर्ग्रहणम्, अधिकरणनिर्देशात् । तिप्निर्देशाद् यङ्यङ्लुग्निवृत्तिः । अरारयति । अरिरेयति । आताम्—दापयति । अदीर्घ(द)पत् । जटाभिरालापयते । क्रापयति । अध्यापयति । आपयति । सत्यापयति । अर्पापयति । वेदापयति । लक्षणप्रतिपदोक्तपरिभाषा च बहुवचनादेव नाश्रीयते ।

घटादिकगेषनूजनैङ्जृष्क्नसूरञ्ज्यमोऽकमिचम्यम्यपपरिस्खद उपान्त्यस्याचोऽणौ तु दीर्घो वा ॥४।१।२०२॥ अपपरिपूर्वस्खदवर्जितानां घटादीनां कगे वनू जनैङ् जृष् क्नसू रञ्ज इत्येतेषां कमिचम्यम्निवर्जितानां चामन्तानां धातूनामुपान्त्यस्याचो णौ परे अण्परे अण्हस्वो भवति । अमि तु णौ अस्याचः स्थाने दीर्घो वा भवति । घटादि—घटयति । घटंघटम् । घाटंघाटम् । अघटि । अघाटि । व्यथयति । व्यथं व्यथम् । व्याथं व्याथम् । अव्यथि । अव्याथि । हिडयति । हिडंहिडम् । हीडंहीडम् । अहिडि । अहीडि । कगे—कगयति । कगंकगम् । कागंकागम् । अकगि । अकागि । वनू—उपवनयति । उपवनमुपवनम् । उपवानमुपवानम् । उपावनि । उपावानि । जनैङ्—जनयति । जनंजनम् । जानंजानम् । अजनि । अजानि । जृष्—जरयति । जरंजरम् । जारं जारम् । अजरि । अजारि । क्नसू—क्नसयति । क्नसंक्नसम् । क्नासंक्नासम् । अक्नसि । अक्नासि । केचिज्जनैजृः ष्णस्विति पठन्ति ष्णसु निरसने इति धात्वन्तरं दैवादिक मन्यन्ते । रञ्ज—रजयति मृगान् व्याधः । रजंरजम् । राजंराजम् । अरजि । अराजि । अमि—गमयति । गमंगमम् । गामंगामम् । अगमि । अगामि । दमयति । दमंदमम् । दामंदामम् । अदमि । अदामि । द्वयङ्गुलोत्क्रामम् । द्वयङ्गुलोत्क्रामम् । अन्तरङ्गत्वादणि कृते अणेव वा दीर्घ इति हेडादावदोषः । घटादिग्रहणं किम् ? पारयति । पारं पारम् । अपारि । कगे इत्येकार एदित्कार्यार्थः । अकगीत् । वन् इत्यूदिदुपादानाद्वनूङ् याचन इत्यस्यैव भवति । वन षण सम्भक्तावित्यस्य तु वानयति, वानं वानम् । अवानीत्येव भवति । कगादिष्विहार्थविशेषानुपादानम् । घटादयः पुनः पठितार्था एवेति तेषां पृथगुपादानम् । तेन उद्घाटयति । राटयति । नाटयति । राणयति । स्मारयति । धारयति । श्रापयति । चालयति । छादयति । लालयति । प्रमादयति । ध्वानयति । स्वानयति । पाणयतीत्यन्यत्र भवति । अकमिचम्यम्यपपरिस्खद इति किम् ? कामयते । कामंकामम् । अकामि । आचामयति । आचाममाचामम् । आमयति । आममामम् । आमि—अपस्खादयति । अपस्खादमपस्खादम् । अपास्खादि । परिस्खादयति । परिस्खादं परिस्खादम् । पर्यस्खादि । अ(प)परिग्रहणं किम् ? स्खलयति । प्रस्खलयति । उपान्त्यस्येति किम् ? अपयति । अपंअपम् । आपंआपम् । अश्रपि । अश्रापि । क्रन्दंक्रन्दम् । क्रान्दंक्रान्दम् । अक्रन्दि । अक्रान्दीति क्रन्दरञ्जिदक्षीणां घटादिषु पाठसामर्थ्याद् भवति । रञ्जंरञ्जम् । अरञ्जीत्यत्र रञ्जेर्न लुप्युपादानं सावकाशमिति न भवति । अच इति किम् ? उपान्त्यस्य हलो मा भूत् । तुशब्दो विशेषणार्थः । तेन विशेषणो ह्रस्वः । दीर्घस्तु अम्मि परेणाविति विशेष्यते । दीर्घ इति किम् ? न ह्र(स्वः) (?) एव विकल्पेत । शमंशमम् । शामंशामम् । अशमि । अशामि । शंशमंशंशमम् । शंशामंशंशामम् । अशंशमि । अशंशामि । अत्र णि व्यन्ताच्चङ् व्यन्ताच्चायौ णोणिलुगल्लुक् च दीर्घविधौ न स्थानिवदिति दीर्घः । घटिष् चेष्टायां, व्यथिष् भयचलनयोः, प्रथिष् प्रख्यापने, म्रदिष् मर्दने, स्खदिष् स्खनने, स्वरिष् सम्भ्रमे, क्रदिष् क्रदुङ् वैकल्ये, क्षन्तृङ् गतिर्वादनयोः, दक्षि गतिहीनयोः, कृपि कृपायाम्, छिदिर् उज्झरोगे, गड सेचने, हेड वेष्टने, वट भट परिभाषणे, नट नृत्तौ, स्तक प्रतिघाते, चक तृप्तौ च, कखे हसने, रगे शङ्कायाम्, लगे सङ्गे, ह्रगे ह्रंगे सगे स्वगे संवरणे, अक अग कुटिलायां गतौ, कण रण चण गतौ, चण अण दाने, अथ ग्रथ कथ चण हिंसार्थाः, ह्रल ह्राल चलने, ज्वल दीप्तौ च, सु आध्याने, दु भये, ष्ना पाके, चल कम्पने, छद ऊर्जने, छद् [ह्लोम्न्यम्बने, मर्द हर्षश्लपनयोः, ध्वन शब्दे, स्वन अवतंसने, फण गतौ, वृत् एते घटादयः । फणमेके घटादिं नेच्छन्ति । गतावपि फाणयतीत्याहुः । तेषां ततः पूर्वं वृत्करणं द्रष्टव्यम् ।

---

१. अ रिंखादयति, क० म० । २. गतिदानयोः क० म० । ३. ह्रगे, क० म० ।

शमोऽदर्शने ॥४।१।२०३॥ शमः अदर्शनेऽर्थे वर्तमानस्योपान्त्यस्याचो णौ परे ह्रस्वो भवति। अम्नि परे तु दीर्घो वा भवति। शमयति रोगम्। निशमयति श्लोकान्। शमंशमम्। शामंशामम्। अशमि। अदर्शनम् इति किम्? निशामयति रूपम्। शमः दर्शन इत्येकेषामवग्रहः। तेषां प्रत्युदाहरणं मूलोदाहरणम्।

यमोऽपरिवेषे णिचि च ॥४।१।२०४॥ यमः अपरिवेषणेऽर्थे वर्तमानस्योपान्त्यस्याचो णिचि चाणि च ह्रस्वो भवति। अम्नि परे तु दीर्घो वा भवति। यमयति। यमंयमम्, यामंयामम्। अयमि। अयामि। अपरिवेष इति किम्? यामयत्यतिथीन्। यामयति चन्द्रमसम्। यमपरिवेष इत्येकेषां पाठः। तेषां प्रत्युदाहरणं मूलोदाहरण प्रत्युदाहरणम्। नाविति सिद्धेऽस्यणिचि चेति वचनादन्येषां णिचि न भवति। स्यमि वितर्कणे। स्यामयते। स्यामंस्यामम्। अस्यामि। शमि आलोचने। शामयते। निशामं निशामम्। म्यशामि।

मारणतोषणनिशाने ज्ञश्च ॥४।१।२०५॥ मारणे तोषणे निशाने चार्थे वर्तमानस्य ज्ञातेरुपान्त्यस्याचः णिचि चाणि चिचणौ ह्रस्वो भवति। अम्नि परे दीर्घो वा भवति। मारणे—सञ्ज्ञपयति मृगान् व्याधः। तोषणे—ज्ञपयति गुरून् शिष्यः। निशाने—ज्ञपयति शरान् व्याधः। ज्ञपंज्ञपम्। ज्ञापंज्ञापम्। अज्ञपि। अज्ञापि। निशानं तेजनं—तीक्ष्णकरणम्। अन्ये निशामन इति पठन्त. निशामनमालोचनप्रणिधानमाहुः। णिचि चाणि चिचणौ पूर्वत्रात्र च समानं रूपम्। अर्थस्तु भिद्यते णिचि[1] प्रयुजि णिचकास्वार्थक.। अत एव वचनाच्चकारः। णिचि चेत्यस्यानुकर्षणार्थः।

चहः शाठ्ये ॥४।१।२०६॥ चहेर्णौ. शाठ्येऽर्थे वर्तमानस्योपान्त्यस्याचः णिचि णौ ह्रस्वो भवति। अम्नि परे तु दीर्घो वा भवति। चहयन्ति। चहंचहम्। चाहंचाहम्। अचहि। अचाहि। शाठ्ये इति किम्? चहंचहम्। अवहि। चहतीत्येतत्कथादित्वादकापि सिद्ध दीर्घार्थं वचनम्।

वाऽनुपसर्गाज्ज्वलह्वलह्मलवनव्यमनमरमलास्नाम् ॥४।१।२०७॥ ज्वल ह्वल ह्मल वनूञ् वम नम रमा स्ना इत्येतेषा धातूनामुपान्त्यस्याचो ह्रस्वो वा भवति। न चेदुपसर्गात्ते परे भवन्ति। ज्वलयति। ज्वालयति। ह्वलयति। ह्वालयति। ह्मलयति। ह्मालयति। वनयति। वानयति। वमयति। वामयति। नमयति। नामयति। रमयति। रामयति। स्नपयति। स्नापयति। ज्वलंज्वलम्। ज्वालंज्वालम्। अज्वलि। अज्वालीति दीर्घविकल्पः सिद्ध एव। अनुपसर्गादिति किम्? प्रज्वलयति। प्रह्वलयति। प्रह्मलयति। प्रवनयति। प्रव्रमयति। प्रणमयति। प्रणामयति। प्रस्नपयति। प्रस्नापयति। रमाङोरप्राप्ते वि हस्वः। शेषाणा प्राप्तिपूर्वकं वा ग्रहणं दीर्घविकल्पार्थमिदं तु ह्रस्वविकल्पार्थम्। वेति च योगविभागः कर्त्तव्यः। तेन सङ्क्रामयतीत्यादि सिद्धं भवति।

खचि ॥४।१।२०८॥ खचि परे यो णिस्तस्मिन् परे धातोरुपान्त्यस्याचः ह्रस्वादेशो भवति। द्विषन्तपः। परन्तपः। पुरन्दरः। युगन्धरः। वसुन्धरा। चकारः किम्? दुर्भिक्षम्। सुभिक्षम्।

छदेर्मन्क्यौ ॥४।१।२०९॥ छदेर्धातोर्मन्परे क्विपरे च णावुपान्त्यस्याचो ह्रस्वादेशो भवति। छद्म। दामच्छद्। परमच्छद्। छदिरिति छदिर्वलेढेंणिति निपातनात्सिद्धम्। छत्रमिति छत्र.देरुक्तेः।

घेऽद्व्यादुपसर्गस्य ॥४।१।२१०॥ छदेरुपान्त्यस्य घप्रत्यये परे णौ परतः ह्रस्वो[2] भवति न चेत्तस्य द्व्यादय उपसर्गा भवन्ति। छाद्यतेऽनेनेति छदः। सप्त छदा अस्य सप्तच्छदः। उरसश्छदः उरश्छदः। प्रच्छाद्यतेऽनेनेति प्रच्छदः। उपच्छदः। परिच्छदः। घ इति किम्? प्रच्छादनं प्रच्छादः। अद्व्यादुपसर्गस्येति किम्? समुपच्छादः। समुपाभिच्छादः। यद्यपि यस्य त्रयोदयः सन्ति तस्य द्वावपि स्तः, तथापि संख्योत्तरोपजायमाना सत्यपि तत्र संख्यान्तरे संख्यान्तरकृतं व्यपदेशं निवर्तयति। नहि लोके द्विपुत्र आनीयतामित्युक्ते त्रिपुत्र आनीयत इत्यादिग्रहणम्।

---

१. णिक् प्र- क० म०। २. ह्रस्वादेशो भवति, क० म०।

ङेऽशास्वग्नाश्यृदितः ॥४।१।२११॥ शास् अक्ष नाशो निवृत्तिर्यस्यास्ति सोऽग्नाशी ऋकार इत् यस्य स ऋदित्, एतद्वन्नितस्य धातोर्योऽन्तस्तस्य ङपरे णौ परतः पूर्वभागोपान्त्यस्य ह्रस्वादेशो भवति। अपीपचत्। अपीपठत्। अचीकरत्। अजीहरत्। अजीलवत्। अपीपचत्। [1]अदीदवत्। अचीकृपत्। गोनावमाख्यत् अजुगुनत्। नौरायमाख्यत् अनूनुरत्। ङिपरणिपरत्वेन न धातुर्विशेष्यते किं तर्हि तदन्तोति णेः पूर्वस्याधातुत्वेऽपि ह्रस्वो भवत्येव। ङ इति किम्? कारयति। हारयति। घटाद्यादीनां ह्रस्ववचनादत्र न भवति। अचीकरदजीहरदित्यत्र भवतीति दुर्ज्ञानम्। अशाश्वग्नाश्यृदित इति किम्? शासु[3]—अन्वशशासत्। आशशासत्। अग्नाशी—अशुशारत्। अशुशूरत्। मालामाख्यत् अममालत्। मातरमाख्यत् अममातत्। राजानमतिक्रान्तवान् अत्यरराजत्। लोमान्यनुमृष्टवान् अन्वलुलोमत्। अश्वघ्नसपृदायनाशोऽप्यग्नाशोऽस्ति। अत्राप्यवयवावयविनोरभेदनये परेऽन्तः प्रायः इत्येव सिद्धेऽग्नाशिग्रहणं स्थानिवद्भावाभावार्थम्। तेन अजूगुनदित्यादि सिद्धम्। ऋदित्—बाधृ—अबबाधत्। याचृ—अययाचत्। ढौकृ—अडुढौकत्। मा भवानोचिखत्। मा भवानोणिणत्। मा भवानेजिजत्। शासु[5] इत्युकारो यङ्लुग्निवृत्त्यर्थः अपरेषां [6]ङे शास्वग्नाशीत्येव पाठः। शास्विति शासु[7] अनुशिष्टौ आङः शासुञ्छिच्छायामित्युभयोरपि ग्रहणम्। उपान्त्यस्येति किम्? अचकाशत्। अबबाङ्क्षत्। उपान्त्यस्येत्युर्ऋदित्येवमर्थमप्यनुवर्तनीयम्। येन नाव्यवधानमित्येतन्निरपेक्षमिहापि व्यवस्थापयति मा भवानटिटत् इत्यादावोण्यादेर्ऋदित्करणान्नित्यादपि[8] द्विर्वचनात्पूर्वं ह्रस्वो भवति। वादना, प्रयोजितवान् अवीवदद् वीणा परिवादकेनेति णिजातिपरिग्रहात् सिद्धम्। णाविति किम्? ङ उपान्त्यस्य ह्रस्व इतीयति, नी—अनीनयत्। लू—अलूलवत् इत्यादौ अयवादेशं बाधित्वा ह्रस्वः स्यात्। अदीदपदित्यादौ पक्। अपीपचदित्यादौ न स्यादेव।

भ्राज्भास्भाष्दीप्पीड्मील्जीव्कण्रण्श्रण्वण्लुटां वा ॥४।१।२१२॥ भ्राज् भास् भाष् दीप् पीङ् मील् जीव् कण् रण् श्रण् वण् लुट् इत्येतेषां धातूनामुपान्त्यस्याचः ङपरे णौ परतः ह्रस्वादेशो वा भवति। अबिभ्रजत्। अबभ्राजत्। अबीभसत्। अबभासत्। अबीभषत्। अबभाषत्। अदीदिपत्। अदिदीपत्। अपीपिडत्। अपिपीडत्। अमीमिलत्। अमिमीलत्। अजीजिवत् अजिजीवत्। अचीकणत्। अचकाणत्। अरीरणत्। अररात्। अशीश्रणत्। अशश्राणत्। अवीवणत्। अववाणत्। अलूलुटत्। अलुलोटत्। पूर्वेण नित्ये प्राप्ते वचनम्।

उर्ऋत् ॥४।१।२१३॥ ङपरे णौ परे धातोः ऋवर्णस्योपान्त्यस्य ऋकारादेशो वा भवति। अचीकृतत्। अचिकीर्तत्। अवीवृतत्। अववर्तत्। अमीमृजत्। अममार्जत्। ऋकारेणान्तरङ्गावपि इररौ वचनाद्बाध्येते। उपान्त्यस्येति किम्? अचीकरत्।

जिघ्रतेरिः ॥४।१।२१४॥ जिघ्रतेः घ्रा इत्येतस्योपान्त्यस्याचः ङपरे णौ परतः इकारादेशो वा भवति। अजिघ्रिपत्। अजिघ्रपत्। तिप्निर्देशो यङ्लुग्निवृत्त्यर्थः। अजाघ्रपत्।

तिष्ठतेः ॥४।१।२१५॥ तिष्ठतेः स्था इत्येतस्योपान्त्याचः ङपरे णौ परत इकारादेशो भवति। अतिष्ठिपत्। अतिष्ठिपताम्। अतिष्ठिपन्। तिब्निर्देशो यङ्लुग्निवृत्त्यर्थः। अतास्थपत्। योगविभागो नित्यार्थः।

ऊदूषो णौ ॥४।१।२१६॥ दुषेर्धातोरुपान्त्यस्याचो णौ पर ऊकारादेशो भवति। दूषयति। दूषयतः। दूषयन्ति। णाविति किम्? दोषः। दुषमाचष्टे दुषयतीत्यत्र धातोः स्वरूपग्रहणे तत्प्रत्यये विज्ञानान्न भवति। णाविति वर्तमाने पुनर्णौ ग्रहणं ङ इत्यस्य निवृत्त्यर्थम्। ऊदिति तकारो निर्देशार्थः ङे ह्रस्वबाधनार्थः इत्येके—अदुदूषदिति।

---

१. अदीदवत्, अचीक्रपत्, क० म०। २. -वस्यादुस्वेऽपि- क० म०। ३. शासू, क० म०। ४. अजूगुनत्, क० म०। ५. शासु-इत्युकारो- क० म०। ६. शासू क० म०। ७. -स्याऽपि क० म०।

चित्ते वा ॥४।१।२१७॥ चित्ते चित्तविषयस्य चित्तकर्तृकस्य दुषेर्णौ पर उपान्त्यस्याचः ऊकारादेशो वा भवति। चित्तं दूष्यति तदन्यो दूषयति दोषयति वा। मनो दूषयति दोषयति वा। प्रज्ञां दूषयति दोषयति वा।

लुङ्लिटि भुवः ॥४।१।२१८॥ भू इत्येतस्य धातोरुपान्त्यस्याचो लुङि लिटि च पर अकारादेशो भवति। अभूवन्। अभूवम्। अभूव। बभूवतुः। बभूवुः। उववादेशयोः कृतयोरूकारः। लुङ्लिटोरिति किम्? व्यतिभविषीष्ट। भुव इति किम्? लुलाव। लुलुवतुः। लुलुवुः। उपान्त्यस्येति किम्? अन्त्यस्यैव विध्यन्तरबाधनार्थो मा भूत्। अच इति किम्? अभूत्। अभूताम्। अभूवन्।

गोहोऽचि ॥४।१।२१९॥ गोहो भूतस्य गुहेरजादौ प्रत्यये परत उपान्त्यस्याच ऊकारादेशो भवति। निगूहयति। निगूहकः। साधु निगूहि। निगूहम्। निजुगूह। निगूहो वर्तते। गोह इति किम्? निजुगुहतुः। निजुगुहुः। अचीति किम्? निगोढा। निगोढुम्। निगोढव्यम्।

गमहनजनखनघसोऽनङ्यचि लुक् क्ङिति ॥४।१।२२०॥ गम् हन् जन् खन् घस् इत्येतेषामुपान्त्यस्याचः किति ङिति चाङ्वर्जितेऽजादौ प्रत्यये परतः लुग्भवति। किति—जग्मतुः। जग्मुः। जघ्नतुः। जघ्नुः। जज्ञे। जज्ञाते। जज्ञिरे। चख्नतुः। चख्नुः। जक्षतुः। जक्षुः। ङिति—घ्नन्ति। कतीह निघ्नानाः। अनङीति किम्? अगमत्। अघसत्। अचीति किम्? गम्यते। हन्यते। इहाच इत्युत्तरत्राननुवृत्त्यर्थः। क्ङितीति किम्? गमनम्। हननम्।

हलोनोऽनर्चाञ्च्युदितोः ॥४।१।२२१॥ हलन्तस्य धातोरुपान्त्यस्य नकारस्य क्ङिति प्रत्यये परे लुग्भवति अनर्चाञ्च्युदितोः, अर्चा पूजा तस्या वर्तमानमञ्चमुदितश्च वर्जयित्वा। स्रस्तः। ध्वस्तः। स्रस्यते। ध्वस्यते। सनीस्रत्यते। दनीध्वस्यते। अस्तभत्। अग्लुचत्। हल इति किम्? नीयते। नेनीयते। न इति किम्? वृश्च्यते। वरीवृश्च्यते। अनर्चाञ्च्युदितोरिति किम्? अर्चिता गुरवः। नन्द्यते। नानन्द्यते। अर्चाग्रहणं किम्? उदेवतमुदकं कूपात्, उद्धृतमित्यर्थः। उपान्त्यस्येति किम्? नन्द्यते। नानन्द्यते। क्ङितीति किम्? स्रंसिता। ध्वंसिता।

लङ्किकम्प्योरुपतापाङ्कविकृत्योः ॥४।१।२२२॥ रगु लङ्विति लङ्क्रिः पठ्यते; कपुङ् चलने; अनयोरुपान्त्यनकारस्य क्ङिति प्रत्यये परे यथासंख्यमुपतापेऽङ्कविकृतौ चार्थे लुग्भवति। विलग्नितः। विकम्पितः। उपतापाङ्कविकृताविति किम्? विलङ्क्रितः। विकम्मितः। लङ्किकम्प्यो रुदित्वादुपतापाङ्कविकृत्योरुपान्त्यनिवृत्त्यर्थं वचनम्।

भञ्जेर्औ वा ॥४।१।२२३॥ भञ्ज इत्येतस्य धातोरुपान्त्यस्य नकारस्य औ परे लुग्वा भवति। अभाजि। अभञ्जि।

दंशसञ्जः शपिः ॥४।१।२२४॥ दंश सञ्ज इत्येतयोर्नकारस्य शपि परे लुग् भवति। दशति। सजति। दशन्ती। सजन्ती। शपं विधाय शबचनं[1] नित्यशबर्थम्[2]।

रञ्जः ॥४।१।२२५॥ रञ्ज शपि नकारस्य लुग्भवति। रजति। रजतः। रजन्ति। योगविभाग उत्तरार्थः।

णौ मृगरमणे ॥४।१।२२६॥ रञ्जेरुपान्त्यस्य णौ परतो मृगाणां रमणे क्रीडायामर्थे लुग्भवति। रजयति मृगान् व्याधः। मृगरमण इति किम्? रञ्जयति वस्त्रं रजकः। रञ्जयति नटः परिषदम्।

---

१. समुदक्लोदृते समे, इत्यमरः, क० म० टि०। २. नमर्थम् (अनुशोधितः) क० म०।

घञि भावकरणे ॥४।१।२२७॥ रञ्जेरुपान्त्यस्य नकारस्य भावे करणे च घञि परतो लुग्भवति। रञ्जनं रज्यतेऽनेनेति वा रागः। घञीति किम्? रञ्जनम्। भावकरण इति किम्? रजन्त्यस्मिन्निति रङ्गः। रजनं, रजः, रजनी इत्युणादयः।

स्यदो जवे ॥४।१।२२८॥ स्यद इति स्यन्देर्घञि नलोप आकाराभावश्च निपात्यते जवे वेगे गतिभेदेऽभिधेये। गोस्यदः। अश्वस्यदः। जव इति किम्? घृतस्यन्दः। तैलस्यन्दः।

प्रश्रथहिमश्रथैधावोदोऽवशनम् ॥४।१।२२९॥ प्रश्रथ हिमश्रथ एध अवोद ओघन् दशन् इत्येते शब्दा घञादौ कृतनलोपादयो निपात्यन्ते। प्रश्रथः। हिमश्रथः। प्रहिमपूर्वस्य श्रन्थेर्घञि न लुगात्वाभावश्च निपात्यते। एध इन्धेर्घञि नलोप एत्वं च। अवोदः। अवपूर्वस्य उन्देर्घञि नलोपः। ओघन्। उन्देर्मनि नलोप ओत्वं च। दशनम्। दंशेरनीट नलोपः।

ञ्णित्यस्याः ॥४।१।२३०॥ ञिति णिति च प्रत्ययं परे धातोरुपान्त्यस्याकारस्य आकारादेशो भवति। अपाचि। अनायि। अलावि। अकारि। पाचयति। लावयति। कारयति। पाचकः। नायकः। लावकः। कारकः। ञ्णितीति किम्? पचति। करोति। अस्येति किम्? अभेदि। भेदकः। अभोजि। भोजकः। पिपठिषकः। चकासकः।

जागुर्ञ्णिणे ॥४।१।२३१॥ जागृ इत्येतस्य धातोर्ञौ णिति च प्रत्यये पर उपान्त्यस्याकारस्य आकारादेशो भवति। अजागरि। जागरिष्यते। जजागार। ञ्णिण इति किम्? जागरयति। जागरकः। साधु जागरी। जागरम्। जागरः। जागरो वर्तते। नियमार्थो योगः।

मृजुः ॥४।१।२३२॥ अस्येति वर्तते। न ञीति। मृजेर्धातोर्ऋवर्णस्य स्थाने योऽकारस्तस्य आकारादेशो भवति। मार्ष्टि। मार्ष्टा। सम्मार्जकः। सम्मार्जनम्। उरिति किम्? म्रष्टा। म्रष्टम्। म्रविमा। मृजेरप्यमिच्छन्ति। यत्तस्याम्न दृश्यत इत्याहुः। तेषामुरित्युत्तरार्थम्।

आर्वाचि ॥४।१।२३३॥ मृजुरिति वर्तते नास्येति मृज ऋकारस्याऽऽदौ प्रत्यये परे आकारादेशो वा भवति। परिमृजन्ति। परिमार्जन्ति। परिमृजन्। परिमार्जन्। परिमृजतुः। परिमार्जतुः। अचीति किम्? म्रष्टा। म्रष्टवान्। उरिति किम्? मार्जनम्। मार्जकः।

विश्रमो घञि ॥४।१।२३४। विपूर्वस्य श्रमे घञि उपान्त्यस्याकारस्याऽऽकारादेशो वा भवति। सूर्यविश्रामभूमिः। विश्रामहेतोः। विश्रमः। अविश्रमं यावदिदं शरीरम्। विपूर्वग्रहणं किम्? श्रमः। आश्रमः। घञीति किम्? विश्रमि।

नोद्यमोपरमः ॥४।१।२३५॥ उद्यमेरुपरमेश्च घञि उपान्त्यस्याकारस्याऽऽकारादेशो न भवति। उद्यमः। उपरमः। उदुपपूर्वग्रहणं किम्? यामः। संयामः। सुयामः। रामो विरामः।

मजन्यधोऽयंरनंगंषंकंचमः कृञ्औ ॥४।१।२३६॥ यमिरमिनमिगमिवमिकमिचमिवर्जितस्य मान्तस्य धातोर्जनिवधोदधोपान्त्यस्याकारस्य कृति औ ञ्णिति च प्रत्यये पर आकारादेशो न भवति। शमः। तमः। दमः। शमी। तमी। दमी। शमकः। तमकः। दमकः। अशमि। अतमि। अदमि। प्रजनः। जन्यः। जनकः। अजनि। वधः। वध्यः। वधकः। अवधि। वधिरहनादेशो व्यञ्जनान्तः प्रकृत्यन्तरमस्ति। यमादिप्रतिषेधः किम्? नियामकः। अविरामकः। विनामकः। आगामकः। कामः। कामुकः। आचामकः। केचिदाचम इति पठन्ति। चमकः। विचमकः—इति प्रत्युदाहरन्ति। आमयति णिच्याकारः। कृञ्औविति किम्? शशाम। ततान। ददाम। ववाध। आमयति। निशामयते।

---

१. चकासः, क० म०। २. णिञि च णिनि, क० म०। ३. आगरिष्यत, क० म०। ४. मृष्टः, मृष्टः। उरि क० म० टि०। ५. नियामकः पेतशाहे कर्णधारे नियन्तरि, क० म० टि०। ६. आगमुकः, क० म०। ७. इति पाठिः प्रत्यु- क० म०।

आतो धम् ॥४।१।२३७॥ आकारान्तस्य धातोः कृति ञौ च ञ्णिति प्रत्यये परे धमागमो भवति। दायः। धायः। दायकः। धायकः। दरिद्रायकः। अदायि। अधायि। दाधिष्यते। धायिष्यते। यमो मकारोऽन्त्यादचः परस्यार्थः इतीहोपान्त्यस्येति नास्ति।

घ्नो नस्तोऽञ्णिणे ॥४।१।२३८॥ हन्तेर्ञिणश्च वर्जिते ञ्णिति प्रत्यये परे नकारस्य तकारादेशो भवति। घातयति। घातकः। साधुघाती। घातंघातम्। घातो वर्तते। घ्न इति योगविभागेनाकारः। अञ्णिण इति किम्? अघानि। अघानिष्ट। जघान। घातो कार्यं तत्प्रत्यये विज्ञायत इतोह न भवति। वार्तघ्नम्। उपान्त्याधिकाराद्धपान्त्यस्य स्यादिति न इत्युच्यते।

हो घः ॥४।१।२३९॥ जिनीति वर्तते। हन्तेर्ञिणिति प्रत्यये हकारस्य घकारो भवति। अघानि। घातयति। घातकः। साधुघाती। घातम्। घातो वर्तते। ञ्णोति किम्? हन्ता। घ्न इति किम्? हारकः।

शासः क्ङित्यङ्हलीत् ॥४।१।२४०॥ शास इत्येतस्य धातोरङि क्ङिति हलादौ च प्रत्यये परे उपान्त्यस्येकारादेशो भवति। अङि—आशिषत्। आशिषताम्। आशिषन्। क्ङिति हलि—शिष्टः। शिष्टवान्। शिष्टिः। शिष्ट्वा। अनुशिष्य.। शिष्यः। शिष्यते। शेशिष्यते। शिष्टः।शिष्ट। शिशिष्यः। शिष्यः। शिष्मः। शाशिष्टः। क्ङितीति किम्? शास्ति। अङ्हलीति किम्? शशासतुः। शशासुः। शासति।

क्ववौ ॥४।१।२४१॥ शासित्येतस्य धातोः क्वावुपान्त्यस्येकारादेशो भवति। आर्यशीः। मित्रशीः।

आङः ॥४।१।२४२॥ आङः परस्य शासेः क्वावेवोपान्त्यस्येकारादेशो भवति। आशीः। पूर्वेण सिद्धे नियमार्थो योगः। इह न भवति। आयुराशास्ते। आशास्त्रहे। आशास्महे। आशास्यते।

क्तिन्यपचायः ॥४।१।२४३॥ अपपूर्वस्य चायते क्तिनि प्रत्यय उपान्त्यस्येत्वं भवति। अपचितिः।

ह्लादेः क्तिः ॥४।१।२४४॥ ह्लादतेरुपान्त्यस्य क्ति तकारादौ किति प्रत्यये परेऽकारादेशो भवति। ह्लन्नः। ह्लन्नवान्। ह्लत्ति। वर्तति किम्? ह्लादित्वा। ककारः किम्? जाह्लात्ति। जाह्लात्तः। इदमेव लिङ्गं प्रकृतिग्रहणे यङ्लुबोऽपि ग्रहणमित्यस्य। तकारः किम्? प्राह्लाद्। निह्लाद्यते। जह्लादानः।

ऋत्वादेः क्तक्तिनां नोऽप्रः ॥४।१।२४५॥ ऋकारान्तात्ल्वादिभ्यश्च परयोः क्तक्तवतवत्वोः क्तिनश्चादेर्नकारादेशो भवति—अप्रः—प्र इत्येतद्वर्जयित्वा। तीर्णः। तीर्णवान्। तीर्णिः। कीर्णः। कीर्णवान्। कीर्णिः। निगीर्णः। निगीर्णवान्। निगीर्णिः। लूनः। लूनवान्। लूनिः। धूनः। धूनवान्। धूनिः। अप्र इति किम्? पूर्तः। पूर्तिः। ल्वादिष्वृकारान्तानामृ इत्येव सिद्धमनृकारार्थं ल्वादिग्रहणम्। ल्वादिष्वृकारान्तपाठः ल्वादिकार्यार्थः। लूञ्, धूञ्, स्तॄञ्, कॄञ्, वॄञ्, भॄ, कॄ, मॄ, पॄ, भॄ, दॄ, जॄ, नॄ, बॄ, ज्या, व्ली, व्ली, री, ली, वृङ् इति ल्वादयः।

क्तयोर्ग्रश्यौदित्सूयत्यादेर्दस्य चामन्मूर्च्छेः ॥४।१।२४६॥ तीति वर्तते। दकारान्तात् रेफान्तात्सिश्च श्यायतेरोदितः सूयत्यादेश्च मन्मूर्च्छिवर्जिताद्धातोः परयोः तकारादयोः क्तयोः क्तवतवत्वोरादेर्नकारोदेशो भवति। तत्सन्नियोगे पूर्वस्य दकारस्य च नकारादेशो भवति। द.—भिन्नः। भिन्नवान्। छिन्नः। छिन्नवान्। रः—आगूर्णः। आगूर्णवान्। श्या—शीनं घृतम्। (अनवेक्षणादर्शनेऽवैतत्येवं स्थितं न ग्रन्थमाप्त्या) प्रतिशीनम्। अभिशीनम्। अपिशीनम्। अवशीनम्। अभ्यवशीनम्। शीतं वर्तते शीतमुदकमिति गुणे शीतोष्णतृप्रादसह आतुरिति निपातनान्न भवति। ओदितः। ओल्जेड्—लग्नः। लग्नवान्। ओविजैड्—उद्विग्नः। उद्विग्नवान्। ओप्यायैड्—पीनः। पीनवान्। टुओश्वि—शूनः। शूनवान्। सूयत्यादयः। प्रसूनः। प्रसूनवान्। दूनः। दूनवान्। दीनः। दीनवान्। उद्दीनः। उद्दीनवान्। क्षीनः। क्षीनवान्। मीनः। मीनवान्। रीणः। रीणवान्। लीनः। लीनवान्। व्रीणः। व्रीणवान्। एते सूयत्यादयः। क्तयोरिति किम्? भित्तिः। चूर्तिः। द्विवचनादर्थवद्ग्रहणानपेक्षं क्तवतवत्वोर्ग्रहणम्। द्रश्यौदीत्। सूयत्यादेरिति किम्? कृतवान्। रात्परेणाजागेन

व्यवधानम् । ऋकारस्य हि मध्येऽर्द्धमात्रो रेफः पूर्वं पदकाले तूर्योऽर्द्धभागः प्रतिज्ञायते । ऋणं धारयतीति । 'ऋणे' इति निपातनात् सिद्धम् । सूयतीति क्यनिर्देशः सूयतिरवतिनिवृत्यर्थः । तीति किम् ? विदितम् । धरितम् । अमन्मूर्च्छ इति किम् ? मत्तः । मत्तवान् । मूर्तः । मूर्तवान् । कृतस्यापत्यं कार्तिरित्यत्रासिद्धं च बहिरङ्गमन्तरङ्गे इति न भवति । भिन्नबद्भ्यां भिन्नवद्भिरिति प्रत्ययवदकारस्यासद्भावादश्रुत्वाच्च (न) भवति ।

हलो यत्र क्तातोऽध्याख्यः ॥४।१।२४७॥ ख्याख्यावर्जितस्य क्तातोर्हलः परावयवः परो योऽकारस्तस्मात्परयोस्तकाराद्योः क्तयोर्नकारादेशो भवति । संस्त्यानः । संस्त्यानवान् । निद्राणः । निद्राणवान् । म्लानः । म्लानवान् । ग्लानः । ग्लानवान् । हल इति किम् ? यातः । देवरातः । यत्र इति किम् ? प्रभातः । स्नातम् । ष्मातम् । क्त इति किम् ? च्युतः । च्युतवान् । अख्याख्य इति किम् ? धूतः । धूतवान् । धातूनां हलादेर्विशेषणादिह न भवति । निर्यातः । निर्यातवान् । मिद्यातः । मिद्यातवान् (निष्यातः । निष्यातवान्) । द्वित्वेऽपि यङिति जात्याश्रयणादसिद्धेश्च न भवति । क्तीति किम् ? दरिद्रितम् । दरिद्रितवान् ।

पूदिव्यश्व्येर्नाशाजिगीषाऽपादाने ॥४।१।२४८॥ पू दिवि अश्वि इत्येतेभ्यो यथासंख्यं नाशे अजिगीषायाम् अनपादाने च क्तात्योः क्तयोर्नकारादेशो भवति । पूना यवाः । आद्यूनो देवदत्तः । परिद्यूनं वस्त्रम् । समक्नो शकुनेः पक्षौ । नाशाजिगीषापादान इति किम् ? [1]पूतं धान्यम् । द्यूतं वर्तते । उदक्तमुदकं कूपात् । द्यूते क्षेपादि जिगीषणा[2] च क्रियते इति जिगीषार्थो भवति ।

सेः कर्मकर्तरि ग्रासे ॥४।१।२४९॥ सिञ् बन्धने इत्येतस्मात्परयोः क्तयोर्नकारादेशो भवति ग्रासे कर्मणि कर्तृत्वेन विवक्षिते । सीनो ग्रासः स्वयमेव । कर्मकर्तरीति किम् ? सितो गलो ग्रासेन । सितो ग्रासो देवदत्तेन । सितवान् ग्रास देवदत्तः । ग्रास इति किम् ? सितं कर्म स्वयमेव ।

निर्वाणोऽवाते ॥४।१।२५०॥ निर्वाण इति निर्पूर्वाद् वातेरुक्तरस्य क्तप्रत्ययस्य नत्वं निपात्यतेऽवाते कर्तरि वातश्चेन्निर्वाति क्रियायाः कर्ता न भवति । निर्वाणो मुनिः । निर्वाणः प्रदीपः । अवात इति किम् ? निर्वातो वात । निर्वातः । निर्वातं वातेन । निर्वाणः प्रदीपो [3]वातेनेत्यत्र वातो हेतुः करणं वा न कर्ता । केचिन्निर्वाणं [4]वातेनेतीच्छन्ति तेषां वातेः कर्तरि प्रत्यये सति प्रतिषेधः ।

दुग्वोर्दीर्घश्च ॥४।१।२५१॥ दु गु इत्येताभ्यां परयोः क्तयोर्नकारादेशो भवति । तत्सन्नियोगे च तयोर्दीर्घो भवति । आदून. । आदूनवान् । विगूनः । विगूनवान् । गूनो ग्तः ।

क्षेरच्यै ॥४।१।२५२॥ क्षि इत्येतस्मात्परयोः क्तयोर्नकारादेशो भवति तत्सन्नियोगे चास्याक्षेर्दीर्घो भवति अच्ये च्यञ्प्रत्ययस्यार्थो भावकर्मणी ततोऽन्यत्र चेत्तौ क्तौ भवतः । क्षीणो देवदत्तः । क्षीणमिदं देवदत्तस्य । अधिकरणेऽयं क्तः । अच्य इति किम् ? क्षितमस्य । भावे क्तः । क्षिप हिंसायामित्येतस्येह ग्रहणं न भवति सानुबन्धकत्वादित्येके । श्रुतपालस्तु ग्रहणं मन्यते ।

दैन्याक्रोशे वा ॥४।१।२५३॥ क्षि इत्येतस्मादच्यन्यर्थे क्तयोर्नकारादेशो वा भवति । तत्सन्नियोगे चास्या क्षेः दीर्घादेशो भवति दैन्य आक्रोशे च गम्यमाने । (दैन्ये)—क्षितस्तपस्वी । क्षीणस्तपस्वी । क्षितकः । क्षीणकः । आक्रोशे—क्षितो जाल्मः । क्षितायुर्जाल्मः । क्षीणायुर्जाल्मः । अच्य इति किम् ? क्षितं तपस्विनः । क्षितं जाल्मस्य । च्यण्यर्थस्य क्तो नास्ति । भावाधामिति श्रुतपालः ।

ह्रीभ्राभ्योन्दनुद्भिन्तेः ॥४।१।२५४॥ ह्री भ्रा द्रा घ्रा उन्द नुद इत्येतेभ्यो भिन्तेश्च विचारणार्थाभ्यां भिदेः परयोः क्तयोर्नकारादेशो वा भवति तत्सन्नियोगे पूर्वस्य च दकारस्य नकारः । ह्रीणः । ह्रीणवान् । ह्रीतः । ह्रीतवान् । त्राणः । त्राणवान् । त्रातः । त्रातवान् । द्राणः । द्राणवान् । द्रातः । द्रातवान् । घ्राण. ।

---

१. अद्दमावसितं धान्यं पूतं तु बहुलीकृतम्, इति नामलिङ्गानुशासने क० म० टि० । २. जिगीषणा क्षि- क० म० । ३. वासामञ्जकवातेन दीपो निर्वाणमागतः, क० म० टि० । ४. निर्वाणमस्तं गमने निर्वृतौ गजमज्जने, क० म० टि० ।

घ्राणवान् । घ्रातः । घ्रातवान् । समुग्नः । समुग्नवान् । समुत्तः । समुत्तवान् । नुन्नः । नुन्नवान् । नुत्तः । नुत्तवान् । विन्नः । विन्नवान् । वित्तः । वित्तवान् । विन्तेरिति नमा निर्देशः विद विचारण इत्यस्य प्रतिषेधार्थः । तेन विध्यन्तरस्य न भवति । विद सत्तायाम् । विन्नः । विन्नवान् । व्यवस्थितविभाषेयम्, तेन वायतेः सञ्ज्ञायां न भवति । त्रातः । देवत्रातः । अन्यत्र नत्वम् । त्राणः । उभयमित्येके ।

प्रस्त्यो म. ॥४।१।२५५॥ प्रपूर्वात् स्त्यायतेः क्तयोर्मकारादेशो भवति वा । प्रस्तीमः । प्रस्तीमवान् । प्रस्तीनः । प्रस्तीतवान् ।

क्षः ॥४।१।२५६॥ क्षै क्षय इत्यस्मात् क्तयोस्तकारस्य नित्यं मकारादेशो भवति । क्षामः । क्षामवान् । योगविभागो नित्यार्थः ।

शुष्पचः कवम् ॥४।१।२५७॥ शुष् पच इत्येताभ्यां क्तयोर्यथासंख्यं ककारवकारावादेशौ भवतः । शुष्कः । शुष्कवान् । पक्वः । पक्ववान् ।

अनुपसर्गाः क्षीबोल्लाघकृशपरिकृशफुल्लोत्फुल्लसम्फुल्लाः ॥४।१।२५८॥ अनुपसर्गाः क्षीब उल्लाघ कृश परिकृश फुल्ल उत्फुल्ल सम्फुल्ल इत्येते शब्दाः क्तान्ता निपात्यन्ते । क्षीबेति क्षीबृङ् मद इत्येतस्मात्परस्य क्तस्य इडभावः तलोपश्च निपात्यते । क्षीबः । उल्लाघेति 'लाघृङ् सामर्थ्ये' इत्येतस्मादुत्पूर्वात्परस्य क्तस्येडभावः तलोपश्च । उल्लाघः । कृश परिकृशेति कृश तनूकरण इत्येतस्मात् केवलात् पर्युपसृष्टाच्च क्ते क्तस्येडभावः तलोपश्च । कृशः । परिकृशः । फुल्लोत्फुल्लसम्फुल्लेति लिफ्ला विशरण इत्येतस्मात् केवलादुत्पूर्वात् सम्पूर्वाच्च परस्य क्त इडभावः आदेशश्च धातोश्चाकारस्योकारः । फुल्लः । उत्फुल्लः । सम्फुल्लः । अनुपसर्गादिति किम् ? प्रक्षोभितः । प्रोल्लाघित । व्युद्ग्रहणं केवलव्युदासार्थं स्यात् । कृशफुल्लयोः सोपसर्गयोरपि पृथगुपादानादनुपसर्गयोर्निपातन ज्ञापयेत विज्ञातुम् । क्षीबादयः शब्दाः केनाचार्येण च सिद्धयन्ति । क्षीबित इत्याद्यनिष्टरूपनिवृत्त्यर्थं निपातनम् । अपरे क्षीबवानित्याद्यपि रूपमिच्छन्ति । तदर्थं क्तक्तवत्वोस्तशब्दाश्रयेर्निपातनं विज्ञायते ।

भित्तं शकलम् ॥४।१।२५९॥ भित्तमिति भिदे. क्तस्य नत्वाभावो निपात्यते शकलं शकलपर्यायो यदि भित्तशब्दो भवति । भित्त शकलमित्यर्थः । शकलमिति किम् ? भिन्नं शकलम् । भिन्नं भित्तम् । अत्र भिन्नशब्दः क्रियाविशिष्टकारकवाची । अत एव शकलं भित्तमिति च विशेष्यमुपादीयते ।

वित्तं धनप्रतीतम् ॥४।१।२६०॥ धनं च प्रतीतं च धनप्रतीतम् । वित्तमिति विदेर्लाभार्थात्परस्य क्तस्य नत्वाभावो निपात्यते । स चेद्वित्तशब्दो धनपर्यायः प्रतीतपर्यायो वा भवति । वित्तं धनमित्यर्थः । वित्तः प्रतीत इत्यर्थः । धनप्रतीतमिति किम् ? विन्नः । वि(वे)त्तेर्विदितं [1]विन्तेर्विन्नं वित्तं च । विद्यतेर्विन्नं वित्तं धनप्रतीते च । विन्दतेर्विन्नमन्यत्र ।

हन्मन्यम्रम्गम्नम्वनतितनादेर्ल्युञ्जलि ॥४।१।२६१॥ ङिदिति वर्तते । हन् मन् यम् रम् गम् नम् इत्येतेषां वनतेस्तनादीनां च जलादौ ङिति प्रत्यये परे लुग्भवति । हन्—हतः । हतवान् । हत्वा । हतिः । आहत । आहत्याः । मन्—मतः । मतवान् । मत्वा । मतिः । यम्—यतः । यतवान् । यत्वा । यतिः । रम्—रतः । रतवान् । रत्वा । रतिः । गम्—गत. । (इदं सूत्रं तद्वृत्तिश्च तालपत्रपुस्तके लेखकप्रमादतश्चुत्यु)ते यतो लभ्यते ततो लिखितम् ।) गतवान् । गत्वा । गतिः । नम्—नतः । नतवान् । नत्वा । नतिः । अवनतिः । तनादि—तनूञ्—ततः । ततवान् । तत्वा । ततिः । अतत । अतत्या. । सनूञ्—आर्त्यं वक्ष्यते । क्षणूञ्—क्षतः । क्षतवान् । क्षत्वा । क्षति. । अक्षत । अक्षत्याः । ऋणूञ्—ऋतः । ऋतवान् । ऋत्वा । ऋतिः । आर्त । आर्त्याः । तृणूञ् । तृतः । तृतवान् । तृत्वा । तृतिः । अतृत् । अतृत्याः । घृणूञ् । घृतः । घृतवान् । घृत्वा । घृतिः । अघृत । अघृत्याः । वनूङ्—वतः । वतवान् । वत्वा । वतिः । अवत । अवत्याः । मनूङ्—मतः । मतवान् । मत्वा । मति. । अमत । अमत्याः । हनादीनामिति किम् ?

---

१. वित्तेः, क० म० ।

शान्तः । दान्तः । तिङ्गणनिर्दिष्टेषु यङ्लुचि न भवति । दंदान्तः । तन्तान्तः । अन्यत्र भवति—अक्नुतः । मम्मतः । यंयतः । रंरतः । कन्ग्रहणं मन्यत्यर्थं मनुतिस्तु तनादीत्येव भवति । जनीति किम् ? तन्यते । तन्त-न्यते । ङिडती किम् ? हन्ता । मन्ता ।

ल्यै ॥४।१।२६२॥ हनादीनां धातूनां ल्यै परतो लुग्भवति । प्रहृत्य । प्रमत्य । प्रवत्य । प्रतत्य । प्रक्षत्य ।

भो वा ॥४।१।२६३॥ हनादीना मकारान्तां ल्यै परतो लुग्वा भवति । नियत्य । नियम्य । विरत्य । विरम्य । आगत्य । आगम्य । प्रणत्य । प्रणम्य । हनादीनामिति किम् ? उपशम्य ।

गमादीनां क्वौ ॥४।१।२६४॥ हनादीनां गमादीनां क्वौ लुग्भवति । जनगत् । कलिङ्गगत् । संयत् । सुयत् । सुमत् । परीतत् । प्रतीतत् । सत् । सुक्षत् । अग्रेगूः । भ्रूरित्यौणादिको डूः ।

न क्तौ दीर्घश्च ॥४।१।२६५॥ हनादीनां क्तौ प्रत्यये लुग्दीर्घश्च न भवतः । हन्तिः । मन्तिः । यन्तिः । रन्तिः । नन्तिः । वन्तिः । तन्तिः । क्षन्तिः । हनादीनां लुचि प्रतिषिद्धायां 'क्विब्जलि ङित्यनुनासिक' इति दीर्घः प्राप्नोति सोऽपि प्रतिषिध्यते । क्तावित्येकानुबन्धग्रहणाद्द्व्यनुबन्धके क्तिनि प्रतिषेधो न भवति । हनादी-नामिति किम् ? शान्तिर्भगवान् ।

अन्यनुनासिकस्यात् ॥४।१।२६६॥ अनुनासिकान्तस्य धातो वनि प्रत्यये परे आकारादेशो भवति । जन्—विजावा । खन्—[1]विखावा । कम्—दधिकःवा । गम्—अग्रेगावा । घुण्—घ्वावा । नित्यत्वादेङः आकारः । घूणि—घूरावा । ओर्णु—अवावा । इवु—यावा । वलिलोपेन म आत्वे आदेशः । तिल् इत्यनुनासिकोपदेशेऽन्यत्र भाष्येऽनुनासिकार्थं । इह तु उभयोरुपदेशात् उभयोऽपि ।

जन्सन्खनाम् ॥४।१।२६७॥ जलि ङिति वर्तते । जन् सन् खन् इत्येतेषां जलादौ ङिति प्रत्यये परे आकारादेशो भवति । जातः । जातवान् । जातिः । सातः । सातवान् । सात्वा । सातिः । खातः । खातवान् । खात्वा । खातिः ।

सनि ॥४।१।२६८॥ जन्सन्खनां जलादौ सनि परे आकारादेशो भवति । सिषासति । जलीति किम् ? जिजनिषते । सिसनिषते । चिखनिषते । एवं च सनीति सनर्थमेव ।

ये वा ॥४।१।२६९॥ जन्सन्खनां ये ङिति प्रत्यये पर आकारादेशो वा भवति । जायते । जन्यते । आजायते । अज्जन्यते । सायते । सन्यते । सासायते । संसन्यते । खायते । खन्यते । चाखायते । चख्खन्यते । जनेः ध्येजादेशेन नित्यं जात इत्येव भवति । ङितीति किम् ? जन्यम् । सान्यम् । य इति प्रत्ययनिर्देशो न वर्ण-निर्देशः तेन सन्यात्, खन्यात् इत्यात्वं न भवति । केचिदत्रापि भवत्येवेत्याहुः । सायात् । खायात् ।

तनो यकि ॥४।१।२७०॥ तनोतेर्धातोर्यकि पर आकारादेशो वा भवति । तायते । तन्यते । यकीति किम् ? तन्तन्यते । केषाञ्चित् तनोतेर्यकीति सूत्रं तेषामपि धातुनिर्देशार्थ एव तिप् न यङ्लुग्लुग्विकृत्यर्थः ।

सनस्तौ क्तौ ॥४।१।२७१॥ सनित्यतो धातोः क्तिप्रत्यये तौ लुगाकारौ वा भवतः । सतिः । सातिः । सन्तिः । सान्तिरिति सनतेः, तौ ग्रहणमुभय-विकल्पार्थम् । असति ह्योकार एवानन्तरो विधिकल्प्येत ततश्च सातिः । सन्तिः । सान्तिरित्येव स्यात् न सतिः ।

इति श्रीश्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने वृत्तौ
चतुर्थाध्यायस्य प्रथमः पादः समाप्तः ।४।१।

■

---

१. त्रिसखावा, क० म० ।

[द्वितीयः पादः]

ह्विणोऽचीकश्श्लेले यञ् ॥४।२।१॥ हु इण् इत्येतयोर्धात्वोरिकः श्विति लेटि लेङि लटि लङि च क्ङित्यजादौ परे यञादेशो भवति। इयुवपवादः। कतीह जुह्वानाः। जुह्वतु। व्यतिजुह्वीरन्। जुह्वति। व्यत्यजुह्वाताम्। व्यत्यजुह्वत। यन्। यन्तौ। यन्तः। यन्तु। यन्ति। मा स्म यन्। ह्विण इति किम्? युवन्ति। योयुवन्ति। अचीति किम्? जुहुतः। जुहुथः। इतः। इथः। इक इति किम्? अजुह्वुः। श्लेले इति किम्? जुहवतु। जुहवुः।

वकः ॥४।२।२॥ इक इत्येतस्य धातोरजादौ श्लेले प्रत्यये परे यञादेशो वा भवति। इयपवादः। कतीह अधीयानाः। अधीयन्तु। अधियन्तु। व्यत्यधीरन्। अधियन्ति। अधियन्तु। मास्माधियन्। मास्माधीयन्।

एः शीङः ॥४।२।३॥ शीङ इत्येतस्य धातोरिकः श्लेलेपर एकारादेशो भवति। कतीह शयानाः। शेताम्। शयाताम्। शेरताम्। शयीत। शयीयाताम्। शयीरन्। शेते। शयाते। शेरते। अशेत। अशयाताम्। अशेरत। सानुबन्धोपादानाद् यङ्श्लुचि न भवति। शेशीतः। शेष्यति। श्लेल इति किम्? संशीतिः। शिश्ये। शिश्याते। शिश्यिरे।

व्यय ॥४।२।४॥ शीङ इकः क्ङिति यकारादौ प्रत्यये पर अयादेशो भवति। शय्यते। शाशय्यते। संशय्य। शय्या। योति किम्? शिश्ये। क्ङितीति किम्? शेयम्। अनुबन्धाद् यङ्श्लुचि न भवति। संशेशीयः।

उपसर्गादुदूहः ॥४।२।५॥ उपसर्गात्परस्य ऊहतेरिकः क्ङिति यकारादौ प्रत्यये परे उकारादेशो भवति। समुह्य। समुह्यते। समुह्यात्। पर्युह्य। पर्युह्यते। पर्युह्यात्। उपसर्गादिति किम्? ऊह्यते। ऊह इति किम्? समूह्य। पोति किम्? समूहितः। क्ङितीति किम्? समूह्यः। अभ्यूह्यार्थः। इक इति किम्? आ ऊह्यते। ओह्यते। समोह्यते। समौह्यत।

ल्येतेरित् ॥४।२।६॥ उपसर्गात्परस्य एतेः इण् गतावित्यस्य धातोरिकः क्ङिति यकारादौ लिलादेशे पर इकारादेशो भवति। समियात्। समियास्ताम्। समियासुः। उदियात्। उदियास्ताम्। उदियासुः। अन्वियात्। अन्वियास्ताम्। अन्वियासुः। यङ्लेङ्कृतिषर्दचोरीदीर्घाविति दीर्घो ह्रस्वः। लीति किम्? समीयते। उदीयते। उपसर्गादिति किम्? ईयात्। इक इति किम्? आ ईयात्—एयात्। समेयात्।

श्वयत्यस्वप्नपतोऽङ्थथगुपम् ॥४।२।७॥ श्वयतेरिकोऽस्यतिवचिपतोना चाऽङि परतो यथासंख्यम् अ, थक् उम् पम् इत्येते आदेशागमा भवन्ति। श्वयतेरः—अश्वत्। अश्वताम्। अश्वन्। अश्वः। अस्यतेस्थक्—आस्थत्। आस्थताम्। आस्थन्। सेरास्थः। वच उम्—अवोचत्। अवोचताम्। अवोचन्। अवोचत। पतः पम्—अपप्तत्। अपप्तताम्। अपप्तन्। श्वयतीति तिङ्निर्देशो यङ्श्लुग्निवृत्त्यर्थः। अशिश्वियत्। अशोशुवत्। अशित्यस्यतेर्ग्रहणमन्यस्याङोऽसम्भवात्।

नशो धेम् ॥४।२।८॥ नशेर्धात्वोरङि इमागमो वा भवति। अनेशत्। अनशत्। अनेशम्। अनशम्।

ऋदृशोऽङि ॥४।२।९॥ ऋवर्णान्ताद् दृशेश्च धातोरिकोऽङि परेऽरित्ययमादेशो भवति। मा भवानरत्। अरताम्। अरन्। असरत्। अजरत्। जरा। अदर्शत्। अदर्शताम्। अदर्शन्।

जागुः किति ॥४।२।१०॥ जागृ इत्येतस्येकः किति प्रत्यये परेऽरादेशो भवति। जागरितः। जागरितवान्। जागर्यते। जागः। कितीति किम्? जागृतः। जाग्रति। जागृहि। जागरीत्युत्तरेण।

शृदृप्रां क्ङिट्यृधा ॥४।२।११॥ शृ दृ पृ इत्येतेषां धातूनामिको लिटि ऋकारादेशो वा भवति। विशश्रतुः। शिशश्रुः। विशशरतुः। विशशरुः। विददृतुः। विददुः। विददरतुः। विददरुः। निपप्रतुः। निपप्रुः। निपपरतुः। निपपरुः। शश्मृवान्। शिशीर्वान्। ददृवान्। दिदीर्वान्। पपृवान्। पुपूर्वान्। शद्-

प्राप्तिति किम् ? निचकरतुः । निचकरुः । लिटीति किम् ? शीर्णम् । दीर्णम् । निपूर्णम् ।

स्कृच्छृतः ॥४।२।१२॥ अरनुवर्तते । स्कृ ऋच्छ् इत्येतयोर्ऋकारान्तानां च धातूनामिको लिटि परेऽरादेशो भवति । स्कृ—संचस्करतुः । संचस्करुः । ऋच्छ—आनर्च्छ । आनर्च्छतुः । ऋत्—निचकरतुः । निचकरुः । गृ-निजगरतुः । निजगरुः । स्कृ इति कृञः ससट्कस्योपादानादिह न भवति । चक्रतुः । चक्रुः । उत्तरेणैव सिद्धे स्कृग्रहणमन्यत्र हल्ग्यामुदर्तेरित्यौपदेशिकहलद्वयपरिग्रहेण कृञोऽपरिग्रहार्थम् । ऋत इति तकार ऋकारार्थः । अन्यथा हि ऋ गताविति ऋणातेरेव स्यात् । किद्भ्रुवेऽरादेशः सावकाशः क्वसौ किस्वेनाधिकेनाविडिति प्रतिषिध्यते । तितीर्वान् ।

हल्ग्यामुदर्तेः ॥४।२।१३॥ हलद्यात् परो य ऋकारस्तदन्तस्य चार्तेश्च धातोरिको लिटि परेऽरादेशो भवति । स्मृ-सस्मरतुः । सस्मरुः । द्रृ-दद्रुरतुः । दद्रुरुः । ध्वृ-दध्वरतुः । दध्वरुः । हृ-जह्वरतुः । जह्वरुः । स्वृ-सस्वरतुः । सस्वरुः । अर्तेः—आरतुः । आरुः । हल्ग्यामिति किम् ? चक्रतुः । चक्रुः । जह्नतुः । जह्नुः । ऋदर्तेरिति किम् ? चिकिरयत् । ऋतो हल्ग्यामिति विशेषणात् अनिग्रहणम् । तकारस्तिनिर्देशश्चोत्तरार्थः ।

यङ्थयक्क्याशूशे ॥४।२।१४॥ हलद्यात् परो य ऋकारस्तदन्तस्याऽर्तेश्च धातोरिको यङ् यक् क्याश च इत्येतेषु परतोऽरादेशो भवति । यङ्—सास्मर्यते । दाद्रर्यते । दाध्वर्यते । जाह्वर्यते । सास्वर्यते । अरार्यते । यक्—स्मर्यते । स्वर्यते । अर्यते । क्याश्—स्मर्यात् । स्वर्यात् । अर्यात् । शग्रहणमुत्तरार्थम् । धोत्यनुकरणं पृथक् सानुबन्धोपादानं किम् ? इयृयात् । संस्कृयात् इति । लिटि पृथक् स्कृग्रहणान्न भवति । वितेस्तीर्यते । विस्तीर्यते । विस्तीर्यादिति तकारात् । अरियात्, (अरियृयात्) । अर्यात् । अप्रियात् (अपर्यात्) । इति तिङ्निर्देशात् ।

रिः ॥४।२।१५॥ ऋत इति वर्तते । धातोः ऋकारस्य यङ्यक्क्याश्शेषु परतो रिशब्द आदेशो भवति । क्रियते । ह्रियते । क्रियात् । ह्रियात् । 'तुद्भ्यश्शः' । मृ-म्रियते । धृञ्-आध्रीयते । दृ-द्रियते । पृङ्-प्रियते । रिविधौ रीवाधनार्थं यङ्ग्रहणाद्धि रीतिभावो न भवति । यङ्यक्क्याश्श इति किम् ? पिपृयात् । बिभृयात् । कृषीष्ट । दृषीष्ट । निचरीकृत्यते । निकृत्यते । निकृत्यात् । निकृन्ततीत्यतो व्यवधानान्न भवति । ऋत इति सतकारस्यादृकारस्य न भवति । निचेर्कीर्यते । निकीर्यते । निकीर्यात् । निकिरति ।

जुस्पकचेऽङ्रुङ् ॥४।२।१६॥ धातोरिको जुसि पकि च पर एङरो भवन्ति । अविभयुः । अजिह्रयुः । अजुह्वयुः । अबिभरुः । अजागरुः । पकि—ह्रेपयति । ह्लेपयति । रेपयति । क्मापयति । ङ्याट्क्याखटोः विङस्वेनेदङ्विङद्भ्रुवं बाधित्वा सावकाशमविडतीति प्रतिषिध्यते । इयुः । स्नुयुः । स्तुयुः । ईयासुः । स्तूयासुः । अविदुः । अनेनिजुरित्यत्रैकाजुसो व्यवधानान्न भवति । जुस्पकीति होऽविशेष्यते न धातुः इगन्तस्य धातोरित्येका धातुं विशेषयितुं न शक्यते अरः सर्वादेशत्वप्रसङ्गात् ।

अविङल्लुङ्घेतौ ॥४।२।१७॥ धातोर्विहिते प्रत्यये परे पूर्वस्येक एङरो भवन्ति न विङति लुङ्घेतौ च । जेता । जयति । भविता । भवति । सुनोति । कर्ता । करोति । तरिता । तरति । धातुना—इकोऽविशेषणात् प्रत्ययेकोऽपि भवत्येव । अविङल्लुङ्घेताविति किम् ? चितः । चितवान् । कृतः । कृतवान् । अशिश्रियत् । अबुद्धवत् । निन्ये । लुलुवे । इतः—सुनुतः । तनुतः । जागृतः । जाग्रति । लोलुवः । पोपुवः । देद्यः । चेक्यः । चोक्षियतः । अलावीत् । इदुग्रहणं किम् ? विवेकः । एकः । भेकः । कर्कः । हेतुग्रहणं किम् ? रेटा । वेटा । प्रसज्यप्रतिषेधोऽयम् । तेन तितीर्वानित्यादौ न भवति । धातोर्विहिते प्रत्यये विधानादिह न भवति । अग्नित्वम् । अग्निकाम्यति ।

---

१. निपूर्तम्, क० म० । १. अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता । प्रसज्य प्रतिषेधोऽसौ क्रियया सह यत्र नञ् ॥ म० टि० ।

ह्रस्वस्य हलः ॥४।२।१८॥ हलन्तस्य धातोः प्रत्यये परे पूर्वस्येको ह्रस्वस्यैङरो भवन्ति अविङल्लुग्घेतौ । भेत्ता । गोप्ता । वर्तनम् । वर्तते । ह्रस्वस्येति किम् ? शोकते । पूरयति । कीर्तयते । अविङल्लुग्घेताविति किम् ? भिन्नः । भिन्नवान् । सुत्वा । सुत्वानौ । सुत्वानः । बेभिदः । मरीमृजः । प्रसज्यप्रतिषेधादिह न भवति । आनृच्छ्वान् । हल इत्युत्तरार्थमिह हि पूर्वेणाव्यवहितस्य सिद्धेर्व्यवहितार्थमेतदिति विज्ञायते । एकवर्णव्यवधाने कृतार्थत्वाद्विदेरनेकवर्णव्यवधाने न भवति । भिन्दते । सन्धुक्षते । वृक्षते । भिनत्ति । इको धातुनेह विशेषणादिह न भवति । अकणिषम् । अरणिषम् । कणितास्वः । रणितास्वः ।

द्व्यृक्तेर्नाचिल्यलौ ॥४।२।१९॥ द्वे उक्ती आवृत्ती यस्य स्तः तस्य द्व्यृक्तेर्द्विरुक्तस्य हलन्तस्य धातोरिकोऽजादौ लिर्वर्जितलादेशे परे एङरो न भवन्ति । बेभिदीति । अबेभिदम् । मोमुदीति । अमोमुदम् । नेनिजानि । अनेनिजम् । वेविषाणि । अवेविषम् । ननर्तीति । अननर्तम् । द्व्यृक्तेरिति किम् ? वेद । वेदानि । अवेदम् । अचीति किम् ? नेनेक्ति । मोमोति । ननर्ति । लीति किम् ? वर्तिषते । विवर्धिषते । अलाविति किम् ? निनेज । विवेच । बेभिदिषीष्ट । हल इति किम् ? जुहवानि । अजुहवम् ।

भूसोऽद्वेः ॥४।२।२०॥ न स्तो द्वे आवृत्ती यस्य तदद्वि. तस्याद्वेः । भू सू इत्येतयोरद्विरुक्तयोरिको लिर्वर्जितलादेशे पर एङ् न भवति । अभूत् । अभूः । सुवै । सुवावहै । सुवामहै । भूप्रतिषेधादबोभोत् । अद्वेरिति किम् ? बोभोति । सोसोति । बोभवीति । सोसवीति । लीति किम् ? भवति । अलाविति किम् ? व्यतिभविषीष्ट । आढधेन भविषीष्ट । योगविभागोऽचीत्येतन्निवृत्त्यर्थः ।

हल्योरौत् ॥४।२।२१॥ अविङल्लुग्घेतौ ल्यलाविति वर्तते । उवृर्णन्तिस्याऽद्विरुक्तस्य धातोरविङल्लुग्घेतौ हलादौ लिर्वर्जितलादेशे पर इक औकारादेशो भवति । यौति । रौति । स्तौति । यौषि । रौषि । स्तौषि । यौमि । रौमि । स्तौमि । अयौत् । अरौत् । हलीति किम् ? ब्रवीति । यवानि । रवाणि । ओरिति किम् ? एति । अध्येति । अविङल्लुग्घेताविति किम् ? ब्रूते । युतः । रुतः । अपि स्तुयाद्राजानम् । लीति किम् ? स्तोता । स्तोतुम् । अलाविति किम् ? व्योचीष्ट । पोषीष्ट । अद्वेरिति किम् ? योयोति । जुहोति । इहोकारान्तस्य धातोर्विधानादिह न भवति । सुनोति । सुनोषि । तनोति । तनोषि ।

धोर्णोः ॥४।२।२२॥ ऊर्णोतेर्द्विरुक्तस्याऽविङल्लुग्घेतौ हलादौ लिर्वर्जितलादेशे पर इक औकारो भवति वा । प्रोर्णोति । प्रोर्णौति । प्रोर्णोषि । प्रोर्णौषि । प्रोर्णोमि । प्रोर्णौमि । अद्वेरिति किम् ? प्रोर्णोनोति । पूर्वेण नित्ये प्राप्ते विकल्पः ।

अल्योत् ॥४।२।२३॥ ऊर्णोतेर्धातोरद्विरुक्तस्याऽविङल्लुग्घेतौ हलादौ लिर्वर्जितलादेशेऽल्मात्रे इक ओकारो भवति । औत्वापवादः । प्रोर्णोत् । प्रोर्णोः । अलीति किम् ? प्रोर्णौति ।

तृणेढ् ॥४।२।२४॥ तृणेढिति तृहि हिंसु हिंसायामित्येतस्याऽविङति हलादौ लिर्वर्जितलादेशे परे नमि कृते नकारस्य एत्वं निपात्यते । तृणेढ । तृणेक्षि । तृणेढ्मि । तृणेढु । अतृणेट् । अविङतीति किम् ? तृण्कः । तृण्ढ । हलीति किम् ? तृणहानि । अतृणहम् ।

ब्रुव ईट ॥४।२।२५॥ ब्रू इत्येतस्माद्विगन्तात्परस्याऽविङतो हलादेर्लिर्वर्जितलादेशस्य ईडागमो भवति । ब्रवीति । अब्रवीत् । ब्रवीषि । ब्रवीमि । अब्रवीः । इक इति किम् ? आरव । अविङतीति किम् ? ब्रूतः । ब्रूते । हल इति किम् ? अब्रवम् । ब्रवाणि ।

यङ्लुगन्तात्तुरुस्तोर्बहुलम् ॥४।२।२६॥ यङ्लुगन्तात्तुरुस्तु इत्येतेभ्यश्च धातुभ्यः परस्याऽविङतोर्हलादेर्वर्जितलादेशस्येडागमो बहुलं भवति । प्रियं मयूरः परिनर्नृतीति । यश्च त्वं नरवर ननर्तीषि हृष्टः । ननर्ति । ननर्तिस । बोभवीति । बोभोति । लालवीति । लालष्टि । तौति । तवीति । उस्तौति । उस्तवीति । रौति । रवीति । उपरौति । उपरवीति । स्तौति । स्तवीति । उपस्तौति । उपस्तवीति । सुदुष्टवव्याकरणं स्तवीमि ।

भूयो भूयः स्तवीमि हितेच्छया। तु वृत्तिर्हिंस्यमारणेष्वित्यादिषु स्मरन्ति। अविङत इति किम्? लालप्तः। स्तुतः। स्तुमः। हल इति किम्? लालपानि। स्तवानि। बहुलग्रहणं प्रयोगानुसरणार्थम्।

स्यस्तेरस्तोऽलः ॥४।२।२७॥ सि इत्यतः प्रत्ययादस्तेश्च धातोः सकारात् परस्यार्ङिङतो हलादेर्लिवर्जितलादेशस्यात्मात्रस्य ईडागमो भवति। अकार्षीत्। अकार्षीः। अलावीत्। अलावीः। आसीत्। आसीः। स इति किम्? असेवेत्। अभूत्। स इति विशेषणात् सिः प्रत्ययो गृह्यते न धातुः। अल इति किम्? अकार्षम्। अस्ति।

अदोऽट् ॥४।२।२८॥ अदेर्धातोः परस्याऽङिङतो हलादेर्लिवर्जितलादेशस्यात्मात्रस्याऽडागमो भवति। आदत्। आदः। अल इति किम्? अत्ति। अत्सि।

ईट् आजक्षरुद्भ्यः ॥४।२।२९॥ आजक्ष् अजित्यन्तेभ्यो रुदादिभ्यः परस्य ङिङतो हलादेर्लिवर्जितलादेशस्यात्मात्रस्याऽटीटौ आगमौ भवतः। (अरोदत्) अरोदीत्। अस्वपत् (अस्वपीत्)। प्राणत्। प्राणीत्। अश्वसत्। अश्वसीत्। अजक्षत्। अजक्षीत्। आजक्षिति किम्? अजागः। रुद्भ्य इति किम्? अहन्। अल इति किम्? रोदिति। स्वपिति।

वल इट् ॥४।२।३०॥ रुदादिभ्यो धातुभ्यो वलादेर्लिवर्जितलादेशस्येडागमो भवति। रोदिति। रुदितः। रोदिषि। रुदिथः। रोदिमि। रुदिवः। रुदिमः। स्वपिति। प्राणिति। श्वसिति। जक्षिति। वल इति किम्? रुदन्ति। आजक्षीति किम्? जागर्ति। रुद्भ्य इति किम्? हन्ति। लोटि किम्? स्वप्ता। अलाविति किम्? सुष्वप। व्यतिस्वप्सीष्ट।

ईशीङ्भ्यां रुध्वे ॥४।२।३१॥ ईश् ईङ् इत्येताभ्यां परस्य सकारादेः ध्वे इत्येतस्य च लिवर्जितलादेशस्येडागमो भवति। ईशिषे। ईशिध्वे। ईशिध्वम्। ईडिषे। ईडिध्वे। ईडिध्वम्। वचनभेदाद्यावसंख्यं नास्ति। ध्वे इति कृतैत्वस्य ग्रहणाल्लडि न भवति। ऐद्ध्वम्। लेटि तु एत्वे एकारस्य अमादेश इत्येकदेशविकृतस्यानन्यत्वाद् भवति।

जक्षोर्धिः ॥४।२।३२॥ जक्षन्तात् हु इत्येतस्माच्च धातोः परस्य लिवर्जितलादेशे हकारस्य धकारादेशो भवति। हकार उच्चारणार्थः। जक्ष—अद्धि। विद्धि। छिन्धि। भिन्धि। हु—जुहुधि। जक्षोरिति किम्? याहि। ह इति किम्? छिन्तात् त्वम्। जुहुतात् त्वम्। जक्षोः परत्वेन हकारस्य विशेषणादिह न भवति। रुदिहि। स्वपिहि।

शाध्येधिजहि ॥४।२।३३॥ शाधि, एधि, जहीति हौ निपात्यन्ते। शाश्नोति शास्तेः प्रकृतेर्यङ्लुगन्तस्य च हौ शाभावः हौ धश्च निपात्यते। एधीति अस्तेर्हौ एत्वं हा धश्च। जहीति हन्तेर्हौ जभावः यङ्लुगन्तस्यापि। अन्ये यङ्लुगन्तस्य नेच्छन्ति। जङ्घन्तीति भवतीत्याहुः। अतो हु इति ह्लुग्वातोः पकार-इकारान्तात्प्रत्ययात् परस्य विधीयते।

आमव्यतः ॥४।२।३४॥ धातोर्विहिते मकारादौ वकारादौ च लिवर्जितलादेशे परेऽकारस्याऽऽकारादेशो भवति। वावामि। वावावः। वावामः। पचामि। पचावः। पचामः। पचावहे। पचामहे। पक्ष्यामि। पक्ष्यावः। पक्ष्यामः। पक्ष्यावहे। पक्ष्यामहे। धातोः प्रत्ययेन सम्बन्धो नाकारेणेति प्रत्ययस्याकारस्याप्यात्वम्। मवीति किम्? पचति। पचतः। पचन्ति। पचथः। पचते। पचध्वम्। अत इति किम्? चिनुवः। चिनुमः। तकार उत्तरार्थः। आदिति तकारः प्लुतनिवृत्त्यर्थः। तेनास्य प्लुतनिर्णये प्लुतो न भवति।

इय्यः ॥४।२।३५॥ धातोर्यो लिवर्जितलादेशस्तस्य यो यश्च्स्तस्यातः परस्य इयादेशो भवति। पचेत्। पचेताम्। पचेयुः। दीव्येत्। दीव्येताम्। दीव्येयुः। तुदेत्। तुदेताम्। तुदेयुः। जुस्याकारलोपेऽप्येकदेशे

---

१. तु वृत्तिर्हिंसापूरणेष्वि- क० म०। २. तेनास्य प्लुतविषये प्लुतो न भवति। क० म०।

विकृतस्थानन्यस्वाद् भवति । अत इति किम् ? चिनुयात् । पायात् । यायात् । क इति किम् ? अयात् । अयासीत् ।

आतोऽपः ॥४।२।३६॥ धातोर्योऽपि लिबजितलादेशस्तस्य य आकारस्तस्यातः परस्य इयादेशो भवति । पचेते । पचेथे । पचेताम् । पचेथाम् । अपचेताम् । अपचेथाम् । पक्ष्येते । पक्ष्येथे । अपक्ष्येताम् । अपक्ष्येथाम् । आत इति किम् ? पचत. । अप इति किम् ? पचावहै । पचामहै । अत इति किम् ? मिमाते । मिमाथे ।

श्लुगुसि ॥४।२।३७॥ धातोर्य उस् तस्मिन् परत आकारस्य श्लुग्भवति । भिन्दुः । छिन्दुः । अदुः । अपुः । उसीति किम् ? भिन्द्यात् । धातोरित्यनेनाकारस्याविशेषणात् याटोऽप्याकारस्य भवत्येव । शित्वमुत्तरार्थम् ।

झेः ॥४।२।३८॥ धातोर्यो झिस्ततः परस्य लिबजितलादेशस्य श्लुग्भवति । अभावि । अकारि । झेरिति किम् ? कारिष्यते । अकारितमाम् । अझाविति किम् ? कारिषीष्ट । सकारः सर्वादेशार्थः ।

अतो हुः ॥४।२।३९॥ धातोः परो योऽकारान्तप्रत्ययस्तस्मात् परस्य हकारादेर्लिबजितलादेशस्य श्लुग्भवति । भव । दोग्ध्य । तुद । अत इति किम् ? युहि । रुहि । याहि । वाहि । अत. प्रत्ययादितीह न भवति । पापहि । वावहि । ह इति किम् ? भवतात् त्वम् ।

असंयोगादोः ॥४।२।४०॥ असंयोगात्परो य उकारस्तदन्तो य. प्रत्ययो धातोः ततः परस्य हकारादेर्लिबजितलादेशस्य श्लुग्भवति । कुरु । तनु । सुनु । चिनु । असंयोगादिति किम् ? अर्णुहि । तर्णुहि । अक्ष्णुहि । तक्ष्णुहि । ओरित्यस्य विशेषणादिहापि न भवति । आप्नुहि, राध्नुहि । ओरिति किम् ? क्रीणीहि । प्रत्ययविशेषणादिह न भवति । युहि । रुहि । ह इति किम् ? तनुतात् त्वम् ।

ञ्वि लुग्वा ॥४।२।४१॥ असंयोगात्परो य उकारस्तदन्तो यः प्रत्ययो धातोस्तस्य मकारादौ वकारादौ चापिति लिबजितलादेशे परे लुग्वा भवति । तन्वः । तनुवः । सुन्वः । सुनुवः । तन्मः । तनुमः । सुन्मः । सुनुमः । तन्वहे । तनुवहे । सुन्वहे । सुनुवहे । तन्महे । तनुमहे । सुन्महे । सुनुमहे । ञ्वीति किम् ? तनुतः । सुनुतः । ओरिति किम् ? क्रीणीवः । क्रीणीमः । प्रत्ययविशेषणादिह न भवति । युवः । युमः । असंयोगादिति किम् ? अर्णुवः । अर्णुमः । अक्ष्णुवः । अक्ष्णुवः । आप्नुवः । आप्नुमः । अपीति किम् । सुनोमि । तनोमि ।

कुर्यि च ॥४।२।४२॥ करोते परस्याकारस्य मकारवकारावपिति पकारादौ च लिबजितलादेशे परे नित्यं लुग्भवति । कुर्व. । कुर्मः । कुर्वहे । कुर्महे । कुर्यात् । कुर्याताम् । कुर्युः । उल्लुवः स्यानिबद्धावादकारादेशः । कृञि हिंसायाम्—कृणुवः । कृणुमः । कृणुयादित्यत्राकारो न कृ पर इति न भवति । इ चेति किम् ? कुरुतः । अपितीति किम् ? करोमि । ओरिति किम् ? करिष्यामः ।

अतः शि चोन् ॥४।२।४३॥ शित्यपि यि च लिबजितलादेशे च य उकारस्तन्निमित्तकस्तस्य कार्यभूतो योऽकारः कृञवयवस्तस्योदादेशो भवति । कुर्वाणः[2] । कुरुतः । कुर्वन्ति । कुर्वः । कुर्मः । कुर्यात् । उतः कार्यत्वेन विज्ञानादुकारलोपेऽपि भवति । करिष्यत इत्यत्रापि न भवति । अकुरुताम् । अकुरुतेत्यङागमस्य न भवति । उदिति तकारकरणादस्योकारो न भवति । अत इति स्थान्यर्थम् । तकार उत्तरार्थः । शि चेति लोत्यनुवृत्तेरुत्तरार्थं च । अपीति किम् ? करोति । करोषि । करोमि । लादेशस्योत्वं प्रति निमित्तविज्ञानम्, किन्तु कुरु अत्रापि यथा स्यात् । परत्वं हीह न स्यात् । कुरिति किम् ? अर्णुतः । तर्णुतः ।

मगाने ॥४।२।४४॥ धातोर्विहित आने परेऽतोऽकारस्य मगागमो भवति । पचमानः । पचमानः । शिक्षण्डं वहमानः । करिष्यमाणः । आत इति किम् ? पचन् । अत इति किम् ? अपह्नुवानः ।

---

१. कुरुपर क० म० । २. निर्वाणमस्तं गमने निर्वृतौ गजमज्जने । अपवर्गेऽपि कुर्वाणो वृष्णकारकयोरपि- इति विश्वः । क० म० टि० ।

आसीनः ॥४।२।४५॥ आसीन इति आस: परस्यानस्य ईकारो निपात्यते । आसीनः ।

नमस्त्योर्लुक् ॥४।२।४६॥ नमो विकरणस्याऽस्तेश्चाकारस्य शिस्मपिति यि च लिङ्वर्जितलादेशे परे लुग्भवति । रुन्धानः । रुन्धः । रुन्धन्ति । रुन्ध्यात् । भ्रिन्धानः । भ्रिन्धः । भ्रिन्धन्ति । भ्रिन्ध्यात् । सन्ति । स्थः । स्थ । स्वः । स्मः । स्यात् । अपीति किम् ? रुणद्धि । रुणत्सि । रुणद्मि । अस्ति । असि । अस्मि । अत इति किम् ? अन्त्यस्य मा भूत् । तकारः किम् ? आस्ताम् । आसन् ।

श्नाज्झेरातः ॥४।२।४७॥ श्नाप्रत्ययस्य अज्झेर्घुसंज्ञकस्य दारिद्रातेश्च धातोराकारस्य अपिति यि च लिङ्वर्जितलादेशे परे लुग्भवति । क्रीणन्ति । क्रीणन्तु । अक्रीणन् । लुनते । लुनताम् । अलुनत् । पुनते । पुनताम् । अपुनत् । ददति । ददतु । दद्यात् । मिमते । मिमताम् । अमिमत । उज्जिहते । उज्जिहताम् । उदजिहत । यायति । यायतु । वामति । वामतु । दरिद्रति । दरिद्रतु । श्नाज्झेरिति किम् ? यान्ति । वान्ति । आत इति किम् ? अक्षति । बिभ्रति । अपीति किम् ? अक्रीणाम् । अजहाम् । लीति किम् ? यायानम् ।

हल्यघोरीः ॥४।२।४८॥ श्नाप्रत्ययाज्झेश्चाघुसंज्ञकस्य धातोराकारस्याऽपिति यि च हलादौ लिङ्वर्जितलादेशे पर ईकारो भवति । लुनीतः । लुनीथः । लुनीव. । लुनीमः । लुनीते । लुनीषे । लुनीध्वे । लुनीवहे । लुनीमहे । लुनीयात् । मिमीते । मिमीषे । मिमीध्वे । मिमीवहे । मिमीमहे । दाद्दैपोर्यङ्श्लुचि । दादीतः । दादीथः । दादीध । हलीति किम् ? लुनन्ति । मिमते । अघोरिति किम् ? दत्त. । धत्तः । दद्व. । दध्वः । दद्मः । अपीति किम् ? लुनाति । ददाति ।

इद्दरिद्रः ॥४।२।४९॥ दरिद्रातेराकारस्याऽपिति यि च हलादौ लिङ्वर्जितलादेशे पर इकारादेशो भवति । दरिद्रितः । दरिद्रियः । दरिद्रिवः । दरिद्रिमः । दरिद्रियात् । अपीति किम् ? दरिद्राति । दरिद्रासि । दरिद्रामि । हलीति किम् ? दरिद्रन्ति । लीति किम् ? दिदरिद्रासति ।

भ्यो वा ॥४।२।५०॥ भी इत्येतस्य धातोरपिति यि च हलादौ लिङ्वर्जितलादेशे पर इकारादेशो वा भवति । बिभितः । बिभीतः । बिभियः । बिभीथः । बिभिवः । बिभीवः । बिभिमः । बिभीमः । बिभियात् । बिभीयात् । अपीति किम् ? बिभेति । हलीति किम् ? बिभ्यति । लीति किम् ? भीतः ।

हाकः ॥४।२।५१॥ ओहाक् त्याग इत्यस्य धातोरपिति यि च हलादौ लिङ्वर्जितलादेशे पर इकारादेशो भवति वा । जहितः । जहीतः । जहियः । जहीथः । जहिव । जहीव । जहिवः । जहीवः । जहिमः । जहीमः । अपीति किम् ? जहाति । हलीति किम् ? जहति । सानुबन्धनिर्देश ओहाङ्यङ्श्लुग्विनश्यर्थः । उज्जिहीते । संजिहीते । जहीतः । योगविभाग उत्तरार्थः ।

आ च हौ ॥४।२।५२॥ हाको हौ परत इकाराकारौ वा भवतः । जहिहि । जहाहि । जहीहि ।

यि लुक् ॥४।२।५३॥ हाको लिङ्वर्जितलादेशे यकारादौ परे लुग्भवति । अहात् । अहाताम् । अहुः ।

कसस्याचि ॥४।२।५४॥ धातोः कसप्रत्ययस्याऽऽदौ लिङ्वर्जितलादेशे परे लुग्भवति । अधुक्षाताम् । अधुक्षायाम् । अधुक्षि । अधिक्षाताम् । अधिक्षायाम् । अधिक्षि । अचीति किम् ? अधुक्षत् । अधिक्षत् । अधुक्षन्ते-रन्तादेशस्याल्विधौ स्थानिवद्भावात्सलोपे नादादेशः ।

दुहिदिहलिहगुहस्तङि तुचि श्लुग् वा ॥४।२।५५॥ दुह दिह लिह गुह इत्येतेभ्यो धातुभ्यः परस्य कसप्रत्ययस्य तवर्गचकारादौ तङि परे लुग्वा भवति । अदुग्ध । अधुक्षत । अदुग्धाः । अधुक्षथाः । अदुग्ध्वम् । अधुक्षध्वम् । अदुग्वहि । अधुक्षावहि । अदिग्ध । अधिक्षत । अदिग्धाः । अधिक्षथाः । अधिग्ध्वम् । अधिक्षध्वम् । अदिग्वहि । अधिक्षावहि । अलीढ । अलिक्षत । अलीढाः । अलिक्षथाः । अलिढ्वम् । अलिक्षध्वम् । अलिह्वहि । अलिक्षावहि । न्यगूढ । न्यधुक्षत । न्यगूढाः । न्यधुक्षथाः । न्यगूढ्वम् । न्यधुक्षध्वम् । न्यगुह्वहि । न्यधुक्षावहि । दुहादेरिति किम् ? व्यत्यधुक्षत । तङीति किम् ? अधुक्षत् । अधिक्षत् । तुचीति किम् । अधुक्षामहि । लुचि वर्तमानायां श्लुग्ग्रहणं सर्वार्थम् ।

ओतश्च्ये ॥४।२।५६॥ धातोरोकारस्य च्यप्रत्यये परे श्लुर्भवति । निष्यति । अवच्छ्यति । अवस्यति । अवचति । च्य इति किम् ? गोरिवाचरति गवति ।

यम्गमिषोशिच्छः ॥४।२।५७॥ यम् गम् इष इत्येतेषां धातूनां शिप्रत्यये परे छकारादेशो भवति । यच्छति । गच्छति । इच्छति । शीति किम् ? यन्ता । गन्ता । एष्टा । येमे । जग्मे । ईषे । इषे । ऊदितो ग्रहणादिह न भवति । इष्यति । इष्णाति ।

पाघ्राध्मास्थाम्नादाण्दृश्यर्तिशौतिधिन्वुकृण्वुशदसदः पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौकृशीयसीदाः[1] ॥४।२।५८॥ पादीनां धातूनां शिप्रत्यये परे यथासंख्यं पिबादय आदेशाः भवन्ति । पः पिबः—पिबति । पिबतः । पिबन्ति । पिबन् । उत्पिबन् । पिबः । अदन्तत्वात् पिबस्यैड् न भवति । घ्रो जिघ्रः—जिघ्रति । जिघ्रतः । जिघ्रन्ति । जिघ्रन् । उज्जिघ्रः । निजिघ्रः । ध्मो धम.—धमति । धमतः । धमन्ति । धमन् । उद्धमः । विधमः । स्था—तिष्ठति । तिष्ठतः । तिष्ठन्ति । तिष्ठन् । म्नो मनः—आमनति । आम्नन्ति । दाणो यच्छः—यच्छति । यच्छतः । यच्छन्ति । दृशेः पश्यः—पश्यति । पश्यतः । पश्यन्ति । उत्पश्यः । निपश्यः । अर्तेर्ऋच्छ —ऋच्छति । ऋच्छतः । ऋच्छन्ति । श्रौतेः श्रृ—श्रृणोति । श्रृणुतः । श्रृण्वन्ति । धिन्वो धिः—धिनोति । धिनुतः । धिन्वन्ति । कृण्वोः कृ—कृणोति । कृणुतः । कृण्वन्ति । शदेः शीयः—शीयते । शीयन्ते । शीयेते । सदेः सीदः—सीदति । सीदतः । सीदन्ति । पा इत्यनदादेर्ग्रहणम् । अदादेः पाण् दाण् इति णकारो यङ्श्लुग्घात्वन्तरनिवृत्त्यर्थः । दादत्, दान्, दृशेर्यत्तिश्रौतीति दृशेः ऋ इत्यस्य श्रु इत्यस्य च तिपा निर्देशो यङ्श्लुग्निवृत्त्यर्थः । ददृशत् । आरत् । शोश्रुवत् । एवमुकरात् (?) । देदिन्वन् । चरीकृण्वन् । पादिसाहचर्यादर्तेरनेधादेर्न भवति । इयृत् । शबत एव निर्देशान्न भवति । श्रुधिन्वुकृण्वयः स्वादौ द्रष्टव्या नेधादौ । प्रकृत्यन्तराणां सिद्धौ रूपान्तरनिवृत्त्यर्थं वचनम् ।

सर्तेर्धौ वेगे ॥४।२।५९॥ सर्तेर्धातोः शिति प्रत्यये धावादेशो भवति वेगे गम्यमाने । धावति । धावतः । धावन्ति । वेग इति किम् ? सरति ।

ज्ञाजनो जाः ॥४।२।६०॥ ज्ञा जन् इत्येतयोर्धात्वोः शिति प्रत्यये परे जा इत्ययमादेशो भवति । जानाति । जायते ।

पद्मिदोऽकः ॥४।२।६१॥ मिद् इत्येतस्य धातोरकः शिप्रत्यये परे एकारादेशो भवति । मेद्यति । मेद्यतः । मेद्यन्ति । अक इति किम् ? हलो मा भूत् । शीति किम् ? मिद्यते । मेमिद्यते । अमेद्यदित्यटो विप्रकर्षान्न भवति । एवमुत्तरत्रापि ।

प्वां ह्रस्वः ॥४।२।६२॥ पू इत्येवमादीनां धातूनामकः शिप्रत्यये ह्रस्वो भवति । पूङ्—पुनाति । धूञ्—धुनाति । स्तॄञ्—स्तृणाति । वॄञ्—वृणाति । शॄ—शृणाति । मॄ—मृणाति । पॄ—पृणाति । वॄ—वृणाति । भॄ—भृणाति । दॄ—दृणाति । जॄ—जृणाति । नॄ—नृणाति । ऋं—ऋणाति । वॄ—वृणाति । ज्यो—जिनाति । क्ष्ना—क्ष्णाति । क्ष्वी—क्ष्विनाति । री—रिणाति । ली—लिनाति । प्वामिति किम् ? द्रूणाति । पूर्वेषा न भवति । वृत्करणं प्वादिष्वादिपरिसमाप्त्यर्थमित्येके । तेषां वृत्करणात्परेषामपि न भवति । श्रोणाति । श्रीणाति । अपरेषामागणान्तात् प्वादयः तेषा जानातीत्यत्र ज्ञाजनो जा इति दीर्घोच्चारणाद्ह्रस्वो न भवति । जायत इति तु यङ्लेड्कृतिचर्दनोरि दीर्घविति दीर्घः सिद्धयति । अक इति बन्धादीनां न भवति । बध्नाति । श्रध्नाति ।

शमां दीर्घोऽष्टानाम् ॥४।२।६३॥ शमादीना यः शादिप्रत्ययस्तस्मिन् परतः शमादीनामेवाष्टानामको दीर्घो भवति । शाम्यति । दाम्यति । ताम्यति । श्राम्यति । भ्राम्यति । क्षाम्यति । क्लाम्यति । माद्यति । अष्टानामिति किम् ? अस्यति । शमादिभिः शिविशेषणाच्छपि न भवति । भ्रमति । अत एवोत्तरं क्लमुग्रहणं योगविभागश्च[2] इहाद्वयेऽपि सिद्धम् । दीर्घग्रहणमुत्तरार्थम् ।

---

१. शीयसीदम्, क० म० । २. इहाद्वयेपि, क० म० ।

ष्ठिवुक्लम्बाचमः ॥४।२।६४॥ ष्ठिवु क्लमु आचम इत्येतेषामकः क्ङिति प्रत्यये दीर्घो भवति। ष्ठीवति। क्लामति। आचामति। चम आङ्पूर्वस्य ग्रहणादिह न भवति। चमति। विचमति।

क्रमोऽतङाने ॥४।२।६५॥ क्रमोऽकोऽतङाने शिप्रत्यये दीर्घो भवति। क्रामति। क्रामतु। क्रामेत्। अक्रामत्। अतङाने इति किम्? आक्रामते चन्द्रमाः। आक्रममाण.। अतङाने इत्येतच्छिनिमित्तत्वेन विशेषणं न परत्वेन, तेन क्रामति तस्मिन् लुप्तेऽपि भवति प्रसज्यप्रतिषेधो वा।

सावार्धधातुकस्यः ॥४।२।६६॥ धातोरकः अतङानपरे सौ परतः आरैच आदेशा भवन्ति। अकार्षीत्। अहार्षीत्। अचैषीत्। अनैषीत्। अलावीत्। अपावीत्। साविति किम्? एति। येन नाप्राप्तिन्यायेनैङरोऽयं बाधकः। उवादेशोऽन्तरङ्गत्वाद् बाध्यते। न्यमुतोत्। न्यनुवीत्। प्रोर्णोनुवीत्। अतङान इति किम्? अचयोष्ट। अप्लोष्ट। अक इति किम्? गौरिवाचारीत् अगवीत्। अचिकीर्षीदित्यतः परत्वाल्लुक्।

हलाम् ॥४।२।६७॥ हलन्तस्य धातोर्योऽक् तस्याऽतङानपरे सौ परतः आ आरैचौ भवन्ति। अपाक्षीत्। अवाक्षीत्। अताप्सीत्। अदाप्सीत्। अभैत्सीत्। अरौत्सीत्। बहुवचनं जात्यर्थम्। तेनानेकहलव्यवधानेऽपि भवति। असांक्षीत्। अराक्षीत्। अताक्षीत्। अत्वाक्षीत्। अक इति किम्? उदबोधा(ढा)म्। उदबोध(ढ)।

वद्व्रजलोऽतः ॥४।२।६८॥ वद् व्रज् इत्येतयोर्लकारान्तस्य रेफान्तस्य च धातोरकारस्याऽतङानपरे सौ परतः आकार आदेशो भवति। अवादीत्। अव्राजीत्। अज्वालीत्। अह्वालीत्। अचारीत्। अक्षारीत्। वद्व्रजलो इति किम्? मा निरक्षीत्। मा निरदीत्। अत इति किम्? न्यमीलीत्। न्यरवारीत्। अश्वल्लीत्। अवभ्रीदित्यत्रात सेश्चाश्चानेकवर्णव्यवधानमिति न भवति।

वोर्णुञ् हलादेर्लघोरिटि ॥४।२।६९॥ ऊर्णुञो हलादेश्च धातोर्हलन्तस्य लघोरकारस्य इडादावतङानपरे सौ परत आरैजादेशो वा भवति। ऊर्णुञ्–प्रौर्णवीत्। प्रौर्णुवीत्। हलादे.–अक्षणीत्। अकाणीत्। अरणीत्। अराणीत्। गौरिवाचरीत् अगवीत्। अगावीत्। ऊर्णुञ्हलादेरिति किम्? मा भवानशीत्। मा भवानटीत्। सानुबन्धोपादानं यङ्श्लुग्निवृत्त्यर्थम्। प्रौर्णोनावीत्। प्रौर्णोनुवीत्। वोर्णो नुरित्यत्र त्वनुबन्धाभावाद् यङ्श्लुगन्तस्यापि ग्रहणम्। एवं च प्रकृतेस्तद्रूप्यम्। यङ्श्लुगन्तस्य द्वैरूप्यं भवति। लघोरिति किम्? अतक्षीत्। अरक्षीत्। हलामिति जात्युपादानमिति लघुग्रहणम्, अन्यथाऽनेकवर्णव्यवधानादेवात्र न भवति। अचकाक्षीदित्यत्र अज्झलसमुदाये न व्यवधानमिति न भवति। इटीति किम्? अपाक्षीत्। अवाक्षीत्। अत इति किम्? न्यमिलीत्। न्यखोरीत्। ऊर्णुञ् अत इत्यस्यासम्बन्धः। सम्बन्धे वावचनादेङ्पवादेशोऽयं विधिर्विज्ञायते।

न क्षण्शसिञ्जाग्रेदिन्मङ्ग्रश्च ॥४।२।७०॥ क्षण् शस् ञि जागृ इत्येतेषामेदितो महयान्तस्य हलन्तस्य च धातोरिडादावतङानपरे सौ परत आरैचौ न भवन्ति। क्षण्–अक्षणीत्। शस्–व्यशसीत्। ञि–अव्ययीत्। जागृ–अजागरीत्। एदित्–कखे–अकखीत्। कगे–अकगीत्। म–अस्यमीत्। अक्रमीत्। हृ–अजहीत्। अग्रहीत्। य–अग्रहयीत्। अव्ययीत्। हलानि–अकर्तीत्। अदेवीत्। अशेवीत्। अकोषीत्। अमोषीत्। क्षणादीनां यङ्श्लुगन्तानामपि प्रतिषेधः। अचक्ष्णणीत्। अशाशसीत्। एदितस्तु यङ्श्लुग्न्यप्रतिषेधः। अजाहसीत्। अजाहासीत्। अत एव क्षणादयो नैदितः क्रियन्ते, अन्यथा ह्येदितः कृत्वेह क्षणादिग्रहणं न क्रियेत। क्षणादिग्रहणं किम्? अलावीत्। अपावीत्। इटीति किम्? अपाक्षीत्। अवाक्षीत्।

धूञ्सुस्तुभ्यः इट् ॥४।२।७१॥ धूञ् सु स्तु इत्येतेभ्यो धातुभ्यः परस्य सेऽतङाने पर इडागमो भवति। अधावीत्। अधाविष्टाम्। अधाविषुः। असावीत्। असाविष्टाम्। असाविषुः। अस्तावीत्। अस्ताविष्टाम्। अस्ताविषुः। धूञित्यनुबन्धोपादानं धुवतिनिवृत्त्यर्थम्। अन्यथा हि धुवतेरेव ग्रहणं स्यात् तत्र नियमो विज्ञायेतार्थविशेषासम्भवात्। बहुवचनं सुखार्थम्। अतङाव इति किम्? अधोष्ट। असोष्ट। अस्तोष्ट। धूञो विकल्पे इतराभ्यामप्राप्ते वचनम्।

यमरमनमातां सक्च ॥४।२।७२॥ यम् रम् नम् इत्येतेभ्य आकारान्तेभ्यश्च धातुभ्यः परस्य सेरङाने पर इडागमो भवति सगागमश्चैतेषाम् । अयंसीत् । अयंसिष्टाम् । अयंसिषुः । अरंसीत् । अरंसिष्टाम् । अरंसिषुः । अनंसीत् । अनंसिष्टाम् । अनंसिषुः । तिप्सिपोश्चेटचाकारो न भवतीति विशेषः । आतः—अयासीत् । अयासिष्टाम् । अयासिषु (अवासीत्) । अवासिष्टाम् । अवासिषुः । अदरिद्रासीत् । अदरिद्रासिष्टाम् । अदरिद्रासिषुः । अदरीद्रीत् । अदरिद्रिष्टाम् । अदरिद्रिषुः । इति लुग्रक्षे । अतङान इति किम् ? आर्यस्त । आरंस्त । आनंस्त दण्डः स्वयमेव । अमास्त धान्यम् । बहुवचनं च लाक्षणिकार्थम् । अग्लासिष्टाम् । अग्लासिषुः ।

घुपाभूस्थैतेश्श्लुक् ॥४।२।७३॥ घुभ्यः पा भू स्था इत्येतेभ्यः एतिभ्यां च परस्य सेरङाने परे श्लुग्भवति । अदात् । अधात् । अस्थात् । अगात् । अध्यगात् । एभ्य इति किम् ? अदासीत् केदारम् । अदाक्षीद् भूमिम् । पा इति पा पाने इत्यस्य, न पा रक्षणे । पै ङ्वै शोषणे इत्यनयोरदादित्वाल्लाक्षणिकत्वाच्च, अपासीद् अनम्, अवाक्षीद् वस्त्रम् । भू इति भवत्यस्यादेशयोरुभयोर्ग्रहणम् । एतीति तिङ्निर्देश इणिगर्थः । अतङान इति किम् ? व्यत्यभविष्ट । उपास्थिषत ।

घ्राधेट्शाच्छासो वा ॥४।२।७४॥ घ्राधेट्शाच्छास इत्येतेभ्यः परस्य सेरतङाने परे श्लुग्भवति । अघ्रात् । अघ्रासीत् । अदात् । अदासीत् । अशात् । अशासीत् । अच्छात् । अच्छासीत् । असात् । असासीत् । अतङान इति किम् ? अघ्रासाताम् स्तनौ देवदत्तेन । धेटः पूर्वेण नित्ये प्राप्ते शेषेभ्योऽप्राप्ते विकल्पः ।

तन्भ्यस्थास्ते ॥४।२।७५॥ तनादिभ्यः परस्य सेः थासि ते च प्रत्यये परे श्लुग्वा भवति । अतत । अततथाः । अततनिष्ट । अततनिष्ठाः । अशात । अशाथाः । अशनिष्ट । अशनिष्ठाः । अक्षत । अक्षथाः । अक्षणिष्ट । अक्षणिष्ठाः । इह अतङान इति निवृत्तम् । थासाहचर्यात्तोऽपि तङैव परिगृह्यते । तेनेह न भवति । अततनिष्ट यूयम् ।

जल्हस्वाल्लुकस्तौ ॥४।२।७६॥ जलन्ताद्ध्रस्वान्ताच्च धातोः परस्य सेः सकारस्य तबर्गादौ प्रत्यये परे लुग्भवति । जलः—अभैत्ताम् । अभैत्त । अभित्त । अभित्थाः । अच्छैत्ताम् । अच्छैत्त । अच्छित्त । अच्छित्थाः । ह्रस्वात्—अकृत । अकृथाः । अहृत । अहृथाः । जल्ह्रस्वादिति किम् ? अमंस्त । अरंस्त । अक्ष्योष्ट । अप्लोष्ट । लुचः परत्वेऽपि नित्यत्वादेङ् । अस इति किम् ? अवादिष्टाम् । अवादिष्ट । ताविति किम् ? अभैत्स्म । अभैत्त । अभित्साताम् । अभित्सत । अकृषाताम् । अकृषत । धातोरिति किम् ? अलाविष्टाम् । अपाविष्टाम् । श्लुगधिकारे लुग्वचनं स्थानिकार्यार्थम् । अवात्ताम् । अवात्त । वसः सेर्लुचि हलमित्याकारः स नित्यत्वाच्छ्लुचि सत्यां सौ विधीयमानो न स्यात् ।

ईटोट ॥४।२।७७॥ इट उत्तरस्य सेः सकारस्येडादौ प्रत्यये परे लुग् भवति । अलावीत् । अपावीत् । सेर्लुचः स्थानिवद्भावादेच् । ईटोति किम् ? अलाविष्टाम् । अलाविषुः । इट इति किम् ? अकार्षीत् । अहार्षीत् ।

धि वा ॥४।२।७८॥ धातोर्धकारादौ प्रत्यये परे सकारस्य लुग् वा भवति । अलविध्वम् । अलविढ्वम् । चकाधि । चकाढि । धीति किम् ? चकास्ति । धाग्रहणमसिः प्रयोजयति धाग्रहणात् हन्मन्यमिति लोपविषयेऽपि न भवति । अनन्ध्वम् । अमन्ध्वम् ।

तासस्त्योः क्षि ॥४।२।७९॥ तास इत्येतस्य प्रत्ययस्य अस्तेश्च धातोः सकारस्य सकारादौ रेफादौ च प्रत्यये परे लुग्भवति । कर्तासि । कर्तासे । कर्तारौ । कर्तारः । अस्तेः—असि । व्यतिसे । अकारसकारयोर्लोपे से इति प्रत्ययमात्रं पदं तेनास्त्युदाहरणम् ।

पति ह्वः ॥४।२।८०॥ तासस्त्योः सकारस्यैकारादौ प्रत्यये परे हकारादेशो भवति । कर्ताहे । व्यतिभावयामहे । कारयामहे ।

तस्थिस्थ्यक्ष्वलि ॥४।२।८१॥ धातोरित्यधिकारे शिद्भिन्ने शिद्भिन्ने च सकारादौ प्रत्यये सकारस्य तकारादेशो भवति। व्यतिवत्सीष्ट। वत्सीष्ट देवदत्तेन। वत्स्यति। अवत्स्यत्। विवत्सति। जिघत्सति। अवात्सीत्। अवात्स्यम्। अवात्स्व। अवात्स्त। स्थिस्थक्ष्वलि इति विषयसप्तमी, तेन नित्याज् जल्लक्षणा-ल्लुक् सञ्ज्ञाविति लोपादपि सौ तकारो भवति। सौति किम्? वसिषीष्ट। वसिष्यते। स्थ्यक्षीति किम्? आस्ते। वस्ते। लेर्लत्वेन प्रतिषेधे प्राप्ते ग्रहणम्। शित्प्रतिषेधश्च उत्तरार्थः। न हि शित् सकारादिरस्ति। स इति किम्? पक्षीष्ट। पक्ष्यति।

थ्याहः ॥४।२।८२॥ आहः ब्रूवादेशस्य थादौ प्रत्यये परे तकारादेशो भवति। आत्थ। थीति किम्? आह। आहतुः। आहुः।

दीङो यिक्किङ्त्यचि ॥४।२।८३॥ दीङो धातोरजादौ ङिति प्रत्यये यिगागमो भवति। उपदि-दीये। उपदिदीयाते। उपदिदीयिरे। उपदिदीयिषे। उपदिदीयाथे। उपदिदीयिध्वे। उपदिदीयिढ्वे। दीङ इति किम्? उड्डीडये। ङकारः किम्? उपदिक्षितः। ङिदिति किम्? उपदानम्। अचीति किम्? उपदेदीयते।

इटि धातो लुक् ॥४।२।८४॥ आकारान्तस्य धातोरिडादावजादौ च ङिति ल्यक्ष्लिप्रत्यये लुग्भवति। इटि—पपिथ। तस्थिव। ङिदित्यचि—पप्तुः। पपुः। तस्थतुः। तस्थुः। अदधत्। आह्वत्। इटि चेति किम्? ग्लाता। इटीत्यङिदर्थम्। ङिदिति किम्? ग्लानम्। अचीति किम्? ग्लायते। ल्यक्ष्लीति किम्? यान्ति। वान्ति। व्यत्यरे। व्यत्यले।

हल्भ्यां लिङ्येद्वा ॥४।२।८५॥ धातोर्हल्भ्यां हल्भ्यां परस्याऽऽकारस्य ङिति लिङि प्रत्यये एका-रादेशो वा भवति। ग्लेयात्। ग्लायात्। म्लेयात्। म्लायात्। स्नेयात्। स्नायात्। हल्भ्यामिति किम्? यायात्। पायात्। लिङीति किम्? ग्लायते। ङिदीति किम्? ग्लासीष्ट।

घुमास्थागापाहाक्सः ॥४।२।८६॥ घु मा स्था गा पा हाक् सा इत्येतेषां ङिति लिङि प्रत्यये नित्यम् एकारादेशो भवति। देयात्। धेयात्। मेयात्। स्थेयात्। गेयात्। पेयात्। हेयात्। अवसेयात्। एतेषामिति किम्? दायात् केदारम्। अवदायात् भूमिम्। (पा) इत्यैषादिकस्य ग्रहणं न पा रक्षण इत्यदादेः। पायात्। हागिति ककारो यङ्लुङ्निवृत्त्यर्थः। ङिदीति किम्? दासीष्ट।

ई हल्यघ्ये ॥४।२।८७॥ घु मा स्था गा पा हाक् सा इत्येतेषां धातूनां घ्यवर्जिते हलादौ ङिति ल्यक्ष्लिप्रत्यये ईकारादेशो भवति। घु—दीयते। देदीयते। धीयते। देधीयते। धीतः। धीतवान्। धीत्वा स्तनम्। मा—मीयते। मेमीयते। स्था—स्थीयते। तेष्ठीयते। गा—गीयते। जेगीयते। गीतः। गीतवान्। गीत्वा। अध्यगीष्ट। पा—पीयते। पेपीयते। पीतः। पीतवान्। पीत्वा। हाक्—हीयते। जेहीयते। हीनः। हीनवान्। हाङिं—हायते। जाहायते। सा—सीयते। सेषीयते। हलीति किम्? तस्थतुः। तस्थुः। अघ्य इति किम्? प्रदाय। प्रधाय। प्रमाय। प्रस्थाय। प्रगाय। प्रपाय। अवहाय। अवस्थाय। ल्यक्ष्लीति किम्? अदाताम्। अधाताम्। अस्थाताम्। अपाताम्। ङिदीति किम्? दाता। धाता।

ये ॥४।२।८८॥ आकारान्तस्य धातोर्ये प्रत्यये परे ईकारादेशो भवति। देयम्। धेयम्। पेयम्। मेयम्। आघ्रेयम्।

आघ्रोर्यङि ॥४।२।८९॥ घ्रा ध्मा इत्येतयोर्धातोर्यङि परे ईकारादेशो भवति। जेघ्रीयते। देध्मीयते। यङीति किम्? घ्रायते। ध्मायते। आघ्राति। दाध्मातीति—यङोऽभावान्न भवति।

---

१. ङित् ङिट्, क० म० टि०। २. हाधिः, क० म०।

ज्ञो ज्ञी हिंसायाम् ॥४।२।९०॥ हन् इत्येतस्य धातोर्हिंसायां वर्तमानस्य यङि ज्ञीति ईक् अङ्लुक्च निपात्यते। जेघ्नीयते द्विषः। जेघ्नीयिषीष्ट वः। हिंसायामिति किम्? गतौ अङ्घन्यते। केचिदिमं विकल्पेनाहुः। त्वं तु राजन् षटकमपि न अङ्घन्यसे।

अस्तिब्रुवोर्भूवच्चौ ॥४।२।९१॥ ल्यश्लीति वर्तते। अस्तेर्ब्रूञश्च ल्यश्लिप्रत्ययविषये यथासङ्ख्यं भू वच इत्येतावादेशौ भवतः। बभूव। भूयात्। भविता। अभूत्। अभविष्यत्। भव्यम्। भवितुम्। भवितव्यम्। उवाच। ऊचे। उच्यात्। वक्षीष्ट। अवोचत्। वक्ष्यति। वक्ष्यते। अवक्ष्यत। वाच्यम्। वक्ता। वक्तुम्। वक्तव्यम्। ल्यश्लिति किम्? अस्ति। स्तः। ब्रवीति। आसीत्। अब्रवीत्। अस्तु। ब्रवीतु। स्यात्। ब्रूयात्। ल्यश्लीति विषयसप्तमी तेन तदुत्पत्तेः प्रागेव ल्यश्लादेशेषु कृतेषु पश्चात्तथायथं प्रत्यया भवन्ति। स्नादेशोऽस्तिनिवृत्त्यर्थः। वच्यादेशो ब्रूञ्निवृत्त्यर्थः। आत्मनेपदार्थश्च। द्विवचनात् ल्यश्लीत्यनेन यथासङ्ख्यं न भवति।

चक्षः ख्याञ् वाचि ॥४।२।९२॥ चक्षेर्धातोर्वाचि वर्तमानस्य ल्यश्लिप्रत्यये विषये ख्याञ् इत्ययमादेशो भवति। चर्त्वे–आख्यायात्। आख्येयात्। आख्याता। आख्यातुम्। आख्यातव्यम्। ख्यत्वे–आख्यायात्। आख्येयात्। आख्याता। आख्यातुम्। आख्यातव्यम्। वाचीति किम्? चक्षुः। विचक्षणः। अत्र [1]बोधे। अवसंचक्ष्याः। परिसंचक्ष्याः। अत्र वर्जने। नृचक्षः राक्षसः। अत्र हिंसायाम्। ल्यश्लीति किम्? आचष्टे। आचष्ट। आचष्टाम्। आचक्षीत। ख्याञिति ञकारो नित्यात्मनेपदनिवृत्त्यर्थः।

लिटि वा ॥४।३।९३॥ चक्षो लिटि ख्याञादेशो वा भवति। आचख्यौ। आचख्यतुः। आचख्युः। आचचक्षे। आचचक्षाते। आचचक्षिरे।

शो यः ॥४।२।९४॥ ख्याञादेशस्य यः शकारस्तस्य यकारादेशो वा भवति। आख्याता। आख्यातुम्। आख्यातव्यम्। आख्यानम्[2]। आक्षाता। आक्षातुम्। आक्षातव्यम्। आक्षानम्। शो यत्वविधानं ख्योऽलुचीत्येवमर्थम्।

भ्रस्जसोऽर् ॥४।२।९५॥ भ्रस्ज इत्येतस्य यो रसिति भागस्तस्य ल्यश्लिप्रत्यये विषये–अर् इत्ययमादेशो वा भवति। बभर्ज। बभर्जतुः। बभर्जुः। बभ्रज्ज। बभ्रज्जतुः। बभ्रज्जुः। भर्क्षीष्ट। भ्रक्षीष्ट। अभार्क्षीत्। अभ्राक्षीत्। भर्ष्टा। भर्ष्टुम्। भर्ष्टव्यम्। भ्रष्टा। भ्रष्टुम्। भ्रष्टव्यम्। बिभर्क्षति। बिभ्रक्षति। बिभर्जिषति। बिभ्रजिषति। भर्ग्यम्। भ्रग्यम्। [3]भर्गः। भ्रगः। भर्जनम्। भ्रज्जनम्। भ्रस्जोति किम्? स्रष्टा। स्रक्ष्यति। रस इति किम्? सर्वस्य स्यात्। ल्यश्लीति किम्? भृज्जति। भृज्जते। रसोर्वचने कथम्? भृष्टः। भृष्टवान्। भृज्यात्। भृज्यते। वरीभृज्यते। बभृज्जितः। इत्यरादेशे कृते पूर्वेणाचा साच्कस्य यत्र इग्भवति।

लुङि लुन्दरिद्रः ॥४।२।९६॥ दरिद्रो लुङि ल्यश्लि वा लुग्भवति। अदरिद्रीत्। अदरिद्रासीत्। अदरिद्रि। अदरिद्रायि।

अरुस्सन्व्युण्वने ॥४।२।९७॥ दरिद्रातेर्ल्यश्लिप्रत्यये विषयभूते नित्यं लुग् भवति। सकारादिसनम्ण्वु अनट् इत्येतांश्च वर्जयित्वा। दरिद्रयात्। दरिद्रयते। दरिद्रयति। अदरिद्रीत्। दरिद्रिता। दरिद्रितुम्। दरिद्रणीयम्। साधु दरिद्री। असन्व्युण्वने इति किम्? दरिद्रासति। दरिद्रायको व्रजति। दरिद्रायकाः। दरिद्रायिका। दरिद्राणम्। सनः सादिविशेषणं किम्? दिदरिद्रिषति। इदमेव ज्ञापकम्—दरिद्रः सनो विकल्पेनेडिति। व्युण्वोः पृथगुपादानं किम्? न वु इत्येवोच्येत—वुनि–दरिद्रकः। विषयविज्ञानं किम्? दुर्दरिद्रम्। [4]अनो न भवति।

---

१. बोधे। २. उपाख्यानम्, क० म०। ३. भर्ङ्गः, भर्ग्गः। क० म०। ४. आनो न इति, क० म० टि०।

हलो यः ॥४।२।९८॥ हलन्ताद्धातोः परस्य यकारस्य ल्यक्तिलप्रत्यये विषये नित्यं लुग्भवति । वेमिदिषीष्ट । वेमिदिता । मरीमृजीष्ट । मरीमृजकः । लोटिता । लोटकः । हल इति किम् ? लोलूयिता । कण्डूयिता । सोसूचिता । मोमूत्रिता । शाशयिता । कुषुभिता । मगधकः । इति ण्यलुचि कृतायाम् अयादेशे च हलन्तता । धातोरिति किम् ? ईषिता । मध्यिता । पुत्रकाम्यिता । ल्यक्तीति किम् ? वेमिद्यते । मगध्यति ।

क्यो वा ॥४।२।९९॥ धातोर्हल उत्तरस्य क्यः क्यच्क्यङोर्यकारस्य ल्यक्तिलप्रत्यये परे लुग्वा भवति । समिधिषीष्ट । समिध्यिषीष्ट । समिधिता । समिध्यिता । दुषदिषीष्ट । दुषद्यिषीष्ट । दुषदिता । दुषद्यिता । क्यच् क्यङ् वाऽयम् । हल इति किम् ? पुत्रीयिता । काकायिता । क्य इति किम् ? विभित्सकः । ककारः किम् ? इध्यिता । वेमिदिता । आद्युच्चारणं किम् ? कुषुभिता । मगधकः । अन्तोच्चारणे इह स्यात् । समिधितेत्यादौ न स्यात् । केचित्-यक् इत्यत्रापि विकल्पमाहुः । क्य इत्यनुकृत्य षष्ठी । अतो लुचि कृतायां गुणर्था अन्यथा ह्रस्वो गुणपवादो विज्ञायेत । ल्यक्तीति किम् ? समिध्यति । समिध्यते । दुषद्यति । दुषद्यते ।

अतः ॥४।२।१००॥ अकारान्ताद्धातोर्विहिते ल्यक्तिलप्रत्यये पूर्वस्याकारस्य लुग्भवति । कथयति । कुषुभ्यति । मनभ्यति । चिकीर्ष्यात् । चिकीर्षिता । चिकीर्ष्यते । प्रचिकीर्ष्य । समिध्यिता । दुषद्यिता । योगविभागाद्धल इति निवृत्तम् । हलन्ताद्धातोर्विज्ञायमाने चिकीर्ष्यते[1] इत्यादावेव स्यात् । मगध्यतीत्यादौ न स्यात् । अतो विहितविज्ञानात् ततः, ततवान्, तत्वा, ततिरित्यत्र न भवति ।

णेरिक्तानिडामाल्वन्तेत्न्वाय्ये ॥४।२।१०१॥ धातोरवयवस्य णेरिडाद्योः क्तयोरिडागमाल्वन्तेत्न्वाय्यवर्जिते च ल्यक्तिलप्रत्यये लुग्भवति । गणितः । गणितवान् । कारितवान् । कार्यात् । हार्यात् । अततक्षत् । आटिटत् । कारणा । कारकः । कार्यते । प्रकार्य । क्षोप्स्यति । अनिडामाल्वन्तेत्न्वाय्य इति किम् ? इटा—कारयिषीष्ट । हारयिषीष्ट । कारयिता । हारयिता । आम्—कारयाञ्चकार । हारयाञ्चकार । आलुः—स्पृहयालुः । गृहयालुः । अन्तः—गन्धयन्तः । मण्डयन्तः । त्नु—स्तनयित्नुः । गदयित्नुः । आप्य—स्पृहयाप्यः । महयाप्यः । इक्तग्रहणमिडर्थम् । इकारादिति(टि) कृते लोपः न प्राक्—शाकितः । शाकितवान् । अन्यथेहेड् न स्यात् । ककारादिह न भवति । हारयितव्यम् । कारयितव्यम् । अत एव क्तप्रत्ययस्य क्तवदवयवस्य चार्थवतोऽनर्थकस्य च द्वयोरपि ग्रहणम् ।

दान्तशान्तपूर्णदस्तस्पष्टछन्नज्ञप्ता वा ॥४।२।१०२॥ दान्त शान्त पूर्ण दस्त स्पष्ट छन्न ज्ञप्त इत्येते शब्दाः क्ते कृतणिलुगादयो निपात्यन्ते वा । दान्तः । दमितः । शान्तः । शमितः । पूर्णः । पूरितः । अत्र णिलुग्निपात्यते । दस्तः । दासितः । स्पष्टः । स्पाशितः । छन्नः । छादितः । अत्र ह्रस्वश्च । ज्ञप्तः । ज्ञपितः । ज्ञापितः । अत्र क्वचिद्ध्रस्वश्चेडभावश्च सर्वत्र । वृत्तो गुणो देवदत्तेन । वृत्तं पारायणं देवदत्तेनेति प्रकृतेरेव ण्यर्थः । वृत्तेः क्तः । यथा तेन निवृत्तमिति । ण्यन्तात्तु क्ते—वर्तितो गुणो देवदत्तेनेत्युक्ते । तेन णेरध्ययने वृत्तमित्यस्यानारम्भः ।

लघोर्हलः क्ष्येयः ॥४।२।१०३॥ धातोर्यो लघुस्ततः परो यो हल् तस्मात्परस्य णे. क्ष्ये नित्यमयादेशो भवति । प्रक्षमय्य । प्रतमय्य । प्रमेदिय्य (प्रमेधिदय्य) । प्रक्षेदिय्य । प्रकथय्य । प्रगणय्य गतः । लघोरिति किम् ? प्रतिपाद्य गतः । हल इति भूतपूर्वगतिन्युदासार्थम् । लघोरिति ह्रस्वमाने हल इत्यसति क्ष्ये लघोरव्यवहितो णिर्न सम्भवति । तत्र किमेकेन वर्णेन व्यवधानमाश्रयेयमुत भूतपूर्वगतिरिति सन्दिह्येत । तत्र भूतपूर्वगतौ प्रकथयेत्यादावेव स्यात् न प्रशमय्येत्यादौ प्रचिकीर्ष्येत्यादौ च स्यात् ।

वाऽऽप्नोः ॥४।२।१०४॥ आप्नु व्याप्तावित्येतस्माद्धातोः परस्य णेः क्ष्ये परतेऽयादेशो वा भवति । प्रापय्य गतः । प्राप्य गतः । विकरणनिर्देशः किम् ? अवाप्य गतः ।

इ मेङः ॥४।२।१०५॥ मेङः क्ष्ये पर इकारादेशो वा भवति । अपमित्य । अपमाय ।

---

१. चिकि(की)र्षीत्येत्यादावेव क० म० ।

क्षेरीः ॥४।२।१०६॥ क्षि इत्येतस्य धातोः क्ये परत ईकारादेशो भवति । क्षीय । उपक्षीय । योगविभागो नित्यार्थः ।

क्षय्यजय्यौ शक्तौ ॥४।२।१०७॥ क्षय जय इति शक्तौ गम्यमानायां यप्रत्ययो अयादेशो निपात्यते । क्षय्य इति । क्षिक्षिवोर्यः । क्षय्यं देवदत्तेन । क्षय्यो देवदत्तः । जय्यं देवदत्तेन । जय्यो देवदत्तः । क्षय इति क्षीडा । शक्ताविति किम् ? प्रतिपाद्य गतः । शक्ताविति किम् ? अर्हे—क्षेयम् । जेयम् ।

क्रय्यः क्रयार्थे ॥४।२।१०८॥ क्रय्य इति क्रीणातेर्यप्रत्यये अयादेशो निपात्यते क्रयार्थे क्रयाय चेत् प्रसारितोऽभिधेयो भवति । क्रय्यः कम्बलः । क्रय्या गौः । क्रयार्थ इति किम् ? क्रेयं नो वाच्यं न तु क्रयाय प्रसारितम् ।

दोसोमास्थां क्ति ॥४।२।१०९॥ द्यतिस्यतिमास्थां क्ति किति तकारादौ प्रत्यये परे इकारादेशो भवति । दो—दितः । दितवान् । दित्वा । दितिः । मा—मितः । मितवान् । मित्वा । मितिः । स्था—स्थितः । स्थितवान् । स्थित्वा । स्थितिः । दोसो इत्योकारनिर्देशो निश्चयेन दोऽवखण्डने षोऽन्त्यकर्मणि इत्यनयोः प्रतिपत्त्यर्थः । दा सा इत्यात्वनिर्देशे ह्येतन्न स्यात् । दावादिरपि हि दारूपः । क्षै जै सै क्षये इत्यपि सारूपः । मा इति मामेङ्माङा सामान्यग्रहणम् । क्तौति किम् ? अवदाय । अवसाय । ककारः किम् ? अवदाता । अवसाता । घोरेङ्द्रावस्यापवादः । शेषाणामित्यस्य । तेनायम् क्तौति सन्धिसामान्येऽपि—इकारो विज्ञायते ।

शो व्रते ॥४।२।११०॥ श्यतेर्व्रतविषये तकारादौ किति प्रत्यय इकारादेशो भवति । संशितो व्रती । संशितं व्रतम् । संशितशब्दोऽन्यत्राप्यस्तीति व्रतविशेषणं न दुष्यति । व्रत इति किम् ? निशातः । उत्तरेण विकल्पे प्राप्ते नित्यार्थं वचनम् ।

छश्च वा ॥४।२।१११॥ शा छा इत्येतयोर्घात्वोस्तकारादौ किति प्रत्यये इकारादेशो वा भवति । निशितः । निशितवान् । निशात । निशातवान् । अवच्छितः । अवच्छितवान् । अवच्छातः । अवच्छातवान् । निशित, निशात इति शिज्शात्योरप्येतत्सिद्धम् । तत्र श्यतेर्विकल्पवचन तनुजादिभिश्चैरित्येवमर्थं ज्ञाता । शीतम् ।

दद्घोर्दः ॥४।२।११२॥ दा इत्येतस्य धातोर्घुसंज्ञकस्य तकारादौ किति प्रत्यये परे दत् इत्ययं तकारान्त आदेशो भवति । दत्तः । दत्तवान् । दत्त्वा । दत्तिः । घोरिति किम् ? दातं बर्हिः । अवदातं मुखम् । द इति किम् ? धेट्-धीतः । धीतवान् । धीत्वा । धीतिः ।

श्नतोऽच उपसर्गात् ॥४।२।११३॥ अजन्तादुपसर्गादुत्तरस्य दा इत्येतस्य धातोर्घुसञ्ज्ञकस्य तकारादौ किति प्रत्यये श्नादेशो भवति । शकारः सर्वादेशार्थः । प्रत्तः । प्रत्तवान् । परीत्तः । परीत्तवान् । परिप्रिणम् । प्रणिणिमम् । अच इति किम् ? निदत्तम् । दुर्दत्तम् । निदितम् । दुर्दितम् । उपसर्गादिति किम् ? दधि दत्तम् । लुना दिता । घोरिति ? अवदात मुखम् ।

प्रादाऽस्ते वाऽऽरम्भे ॥४।२।११४॥ दाञ् इत्येतस्यारम्भे आदिकर्मणि वर्तमानस्याऽन्तादुपसर्गात्परादुत्तरस्य नकारादौ किति प्रत्यये ते क्ते परे श्नादेशो वा भवति । प्रत्तम् । प्रदत्तम् । प्रादिति किम् ? परीत्तम् । दाञ इति किम् ? दोऽवखण्डने—प्रत्तम् । क्तेरित्त्वम्—दत्त्वापवादेन सावकाशस्तेन परत्वाद्बाध्यते । त इति किम् ? प्रत्तवान् । आरम्भ इति किम् ? प्रत्तः ।

निविस्यन्वयात् ॥४।२।११५॥ नि वि सु अनु अव इत्येतेभ्यः प्रादिभ्य उत्तरस्य डुञः क्तप्रत्यये श्नादेशो वा भवति । नित्तम् । निदत्तम् । वित्तम् । विदत्तम् । सूत्तम् । सुदत्तम् । अनूत्तम् । अनुदत्तम् । अवत्तम् । अवदत्तम् । सुदत्तमित्येवैके । तत्र अन्वस्तिविभाषा विज्ञायते । केषाञ्चिन्नियमारम्भ एष विकल्पः ।

१. घदेर्दद्भाव- क० म० ।

तेषां योगविभागो वैचित्र्यार्थः । ग्रादेः क्रियान्तरोपादाने प्रदत्तमित्यादि सिद्ध्यति । योगविभागात्क्रियोपादानेन सिद्ध्यतीति विकल्पवचनम् ।

धात्वो हिः ॥४।२।११६॥ अत्र इकारादौ किति प्रत्यये परतो हिरादेशो भवति । हितः । हितवान् । हित्वा । हितिः । अकारो भेदनिवृत्त्यर्थः । धीतः । धीतवान् । धीत्वा । धीतिः । यङ्लुचा हिट् स्यात् । अथ त्वनित्यत्वान्महाशासनमिति न स्यात् तन्निवृत्त्यर्थश्च । दाधीतः । दाधीतवान् ।

हाकस्त्वि ॥४।२।११७॥ हाकः ओहाक् त्याग इत्येतस्य तकारादौ किति क्त्वाप्रत्यये परे हि इत्ययमादेशो भवति । हित्वा राज्यं वनं गतः । ककारो हाङ्निवृत्त्यर्थः । हात्वा । त्वीति किम् ? होनः । तीति किम् ? विहाय गतः ।

अञ्चवः प्ये च ॥४।२।११८॥ अद इत्येतस्य धातोस्तकारादौ किति प्ये च प्रत्यये अग्ध इत्ययमादेशो भवति । अग्धः । अग्धवान् । अग्धिः । अग्धा । प्रअग्ध्य । सन्निपातपरिभाषयेद् न भवति । प्ये चेति किम् ? अदनम् । तीति किम् ? अद्यात् । कितीति किम् ? अत्तुम् । क्त्वीत्येव सिद्धे प्यग्रहणमन्तरङ्गेऽप्योऽपि प्यो भवतीति विज्ञापनार्थम् । तेन प्रशम्य । प्रपृच्छ्य । प्रदीक्ष्य । प्रसन्य । प्रस्थाय । प्रवाय । प्रधायेत्यादौ प्ये दोर्घादि न भवति । अन्नमिति णोऽन्नादिति निपातनाद् भवति । अन प्राणन इत्यस्य धौणादिको नः ।

वस्तञ्चघस्लुङ्सनि ॥४।२।११९॥ अदेर्धातोः अच् घञ् लुङ् सन् इत्येतेषु प्रत्ययेषु घस्लृ इत्ययमादेशो भवति । प्रास्तोति प्रघसः, प्रदानं (प्रादनं) वा प्रघसः । घञ्—घासः । लुङ्—अघसत् । सन्—जिघत्सति । लृदिदर्थः ।

लिटि वा ॥४।२।१२०॥ अदेर्लिटि प्रत्यये परे घस्लृ इत्ययमादेशो भवति । जघास । जक्षतुः । जक्षुः । आद । आदतुः । आदुः । घस्लृ अदन इति धात्वन्तरं नाम ज्ञायते । घस्मर इत्यदेरेव अनुज्ञानेन घाऽसौ सर्वविषय इति सूचनार्थो विकल्पः ।

वेर्वय् ॥४।२।१२१॥ वेर्वेञो लिटि वय् इत्ययमादेशो वा भवति । उवाय । ऊवतुः । ऊयुः । ववौ । ववतुः । वयुः ।

घ्नो वधस्तङि लुङि ॥४।२।१२२॥ घ्नः हन इत्येतस्य धातोस्तङि लुङि वध इत्ययमादेशो भवति । नित्यापवादः । आवधिष्ट । आवधिषाताम् । आवधिषत । अवधि । आहत । आहसाताम् । आहसत । अवधानि । तङीति किम् ? अवधीत् । नित्य एव विधिः । लुङीति किम् ? आजघ्ने । भक्षकश्चेन्न विद्येत वधकोऽपि न विद्यत इति वधिः प्रकृत्यन्तरमजन्वध इत्याकारो वर्ण्यते ।

स्तिङि च ॥४।२।१२३॥ हन्तेस्तिङि लुङि च विषये वध इत्ययमादेशो भवति नित्यम् । अवधीत् । अवधिष्टाम् । अवधिषुः । वध्यात् । वध्यास्ताम् । वध्यासुः । आवधिषीष्ट । आवधिषीयास्ताम् । आवधिषारन् । वध इत्यदन्तोऽयमतः वोर्णुञ् हलादेरित्याकारो न भवति ।

गैत्योः ॥४।२।१२४॥ एत्योः इणः इकश्च लुङि गा इत्ययमादेशो भवति । अगात् । अगाताम् । अगुः । अगायि भवता । अध्यगात् । अध्यगाताम् । अध्यगुः । अध्यगायि भवता । इह स्येतेरित् इतोत्वज्ञापनाल्लिङीति न वर्तते ।

णौ गमज्ञाने ॥४।२।१२५॥ एत्योर्णौ प्रत्ययेऽज्ञानेऽर्थे गम् इत्ययमादेशो भवति । गमयति । अधिगमयति । अज्ञान इति किम् ? अर्थान् सम्प्रत्याययति । अज्ञान इति इणो विशेषणम् । नेकः असम्भवात् । एतदर्थमेव द्विवचनम् ।

सनीकस्य ॥४।२।१२६॥ सनि इडादौ एत्योश्च गम् इत्ययमादेशो भवति अज्ञाने । अधिजिगांसते । जिगमिषति । अधिजिगमिषति । अज्ञान इति किम् ? अर्थान् प्रतीषिषति । अज्ञान इतीण एव विशेषणं नेतरयोरसम्भवात्, अगम्यिचाराच्च ।

गाङ् क्ङिति ॥४।२।१२७॥ इङो ङिति गाङ् इत्ययमादेशो भवति । अधिजगे । अधिजगाते । अधिजगिरे । अधिजगिषे । ङकारो गाङ्कुटामिति विशेषणार्थः ।

लुङ्लृङ्णौ सन्ङे वा ॥४।२।१२८॥ इङो लुङि लृङि सन्परे ङपरे च णौ गाङ् इत्ययमादेशो वा भवति । लुङि—अध्यगीष्ट । अध्यगीषाताम् । अध्यगीषत । अध्यैष्ट । अध्यैषाताम् । अध्यैषत । लृङि—अध्यगीष्यत । अध्यगीष्येताम् । अध्यगीष्यन्त । अध्यैष्यत । अध्यैष्येताम् । अध्यैष्यन्त । णौ सनि—अधिजिगापयिषति । अध्यापिपयिषति । णौ ङे—अध्यजीगपत् । अध्यापिपत् । णि ग्रहणं किम् ? अधिजिगांसते । सन्ङ इति किम् ? अध्यापयति । सन्ङे इति णाल्परत्वेन कुविशेषणं न लुङ्लृङोरसम्भवात् । लुङ्लृङ्णिपरे सनिङ् चेति किङ्लृङ्णावित्येतत्सनो विशेषणं लक्षणविरोधात् । लुङ्लृङ्णाविति पूर्वमुपादानाच्च ।

व्यञ्जनेऽङ्गो वि ॥४।२।१२९॥ अज्[1] इत्येतस्य धातोर्वकादौ अन इत्येतस्मिंश्च ल्यङ्लिङ्प्रत्यये विषयभूते वि इत्ययमादेशो वा भवति । नित्यापवादः । प्रवेता । प्रवेतुम् । प्रवेतव्यम् । प्राजिता । प्राजितुम् । प्राजेतव्यम् । प्रवयणो दण्डः । प्राजनो दण्डः ।

अक्यङ्यञ्यनि ॥४।२।१३०॥ अजेर्व्यतोः क्यङ्यञ्यञ्जिते ल्यङ्लिङ्प्रत्यये वि इत्ययमादेशो नित्यं भवति । वीयात् । वीयास्ताम् । वीयासुः । विवाय । विव्यतुः । विव्युः । वीयते । प्रवेयम् । प्रव(य)णीयम् । प्रवायकः । प्रवीय । अक्यङ्यञ्यनीति किम् ? समज्या । समाजः । उदाजः । समजः पशूनाम् । उदजः पशूनाम् । अजतोरयञः । अजा ।

लङ्लुङ्लृङ्क्ष्वमाङाट् ॥४।२।१३१॥ धातोर्लङ्लुङ्लृङ्विषयेऽडागमो भवति अमाङा न चेन्माङास्य योगो भवति । अकरोत् । अहरत् । अकार्षीत् । अहार्षीत् । अकरिष्यत् । अहरिष्यत् । विषयविज्ञानाद्विकरणव्यवधानेऽपि भवति । परविज्ञाने हि अहन्नित्यादावेव स्यात् । अमाङेति किम् ? मा स्म भवान् करोत् । मा स्म भवान् हरत् । मा स्म भवान् कार्षीत् । मा स्म भवान् हार्षीत् । मा दोष(व)मन्ति वचनानि समानि भूवन् ।

आरैचाद्यचः ॥४।२।१३२॥ लङ्लुङ्लृङ्विषये धातोरादेरचः आ—आर् इत्येतौ ऐच्वादेशा भवन्ति, अमाङायोगे । आ—आटत् । आश्नात् । आटीत् । आश्नीत् । आटिष्यत् । आशिष्यत् । आर्—आर्च्छत् । [2]ऋणाते.—आर्णात् । आर्च्छीत् । आर्च्छिष्यत् । ऐच्—ऐन्नतः । ऐलयत् । ऐज्यत । ऐहिष्ट । ऐलिलत् । ऐहिष्यत । ऐलयिष्यत् । औ—औव(व्रज)त् । औम्भत् । औह्यत । औवी(जी)त् । औम्भीत् । औङिष्यत् । औम्भिष्यत् । उत्तामैच्छत् औत्तायत् । औकारीयत् । आ ऊढा ओढा । तामैच्छत् औढीयत् । अमाङेति किम् ? मा स्म भवानटत् । मा भवानटीत् । मा स्म भवानूच्छत् । मा भवानूच्छीत् ।

यसः ॥४।२।१३३॥ एः इण इकश्च अस भुवीत्येतस्य धातोराद्यचः लङ्लुङ्लृङ्विषये आरैचासन्न ऐकार आकारश्चादेशो भवति । अमाङा योगे । यङ्लुगपवादः । आयन् । अध्यायन् । आस्ताम् । आसन् । अमाङेति किम् ? मा स्म भवन्तो यन् । मा स्म भवन्तः सन् । यलादेशे कृतेऽल्लुचि च—आदिरज् नास्तीति पूर्वेणारैज् न भवति । इति वचनम् । अगात् । अभूत् । इति नेमावजादेशौ कस्य तर्हि धातोरिति न वाऽप्येते इदमेव ज्ञापकम्—लङ्लुङ्लृङ्विषयज्ञानेऽपि निष्पन्नेऽन्यस्मिन् धातुप्रत्ययकार्ये पश्चाच्चारैच् भवतीति तेन—अचीकरत् । अजीहरत् । अध्यैयन् । अध्यैरत । ऐयरित्यादि सिद्धं भवति । परविज्ञाने विकरणव्यवधाने न भवतीति विषयविज्ञानम् ।

वलादेरिङश्रवणादेः ॥४।२।१३४॥ धातोर्वलादेर्यश्चलः प्रत्ययस्य इडागमो भवति । अत्र वपुणादेः न चेदसौ त्रो वपादिरुणादिर्वा भवति । लुलविथ । लुलविवे । लुलविढ्वे । लविषीष्ट । पविषीष्ट । लविता । पविता । वलादेरिति किम् ? लव्यम् । लवनीयम् । आदिग्रहणं किम् ? लावकः । पावकः । अत्र वपुणादेरिति किम् ? त्र—हलस्य पोत्रम् । पत्रम् । सूकरस्य पोत्रम् । वप्—ईश्वरः । दीप्रम् । भस्म । भस्मः । उणादेरिति

---

१. अज् गतिक्षेपणयोः, इति धातुः । क० म० टि० । २. ऋणातेः—आर्णोत्, क० म० ।

तु, च, तृ, स्न(क्), क, च, स, सर, कु, त, स्य, तिक, तक, तन, थी, सि, सु, कर, पाल, त्रि, च, र, स, सिक, स्म, ति, फ, ह, ट, तुम्, स्म, तम इत्यत्र न भवति। तु—तन्तुः। अन्तुः। च—कुक्षम्। कोष्टम्। तृ—शंस्ता। शास्ता। स्नक्—कृत्स्नम्। अक्ष्णः। अभीक्ष्णः। तीक्ष्णम्। क—कल्कः। शल्कः। च—कर्षः। प्रवर्षः। स—वस्तः। वृक्षः। स्नुषा। सर—मत्सरः। अक्षरम्। असरः। ऋक्षरः। कु—रिस्कः। त—हस्तः। चैक्रीतम्। पुस्तः। स्य—शेत्यः। पस्त्यम्। तिक—वर्तिका। कृत्तिका। तक—इष्टका। अष्टका। तन—पट्टनम्। थि—अस्थि। सिक्—कुक्षिः। अक्षिः। सुक्—इक्षुः। अक्षुः। कर—कर्करा। पाल—शैपालम्। त्रि—कत्राच इवः पूची। रक्—शार[1]। स—शल्लः। सिक—मक्षिका। स्यङ्—मत्स्यः। ति—सप्तिः। वितस्तिः। फ—गुल्फः। शफः। क्षोफः। ट—अट्टाः। ह—क्षोहः। तुम्—क्रान्तुम्। क्षान्तुम्। स्म—सूक्ष्मम्। तम—तन्तमः। रुदादिव। रुदादिमेति स्नादिनियमाद् भवति। स्यश्लीति किम्? आस्ते, शेते।

तेर्ग्रहादिभ्यः॥४।२।१३५॥ ग्रहादिभ्यः परस्य बलादेर्यङ्लः प्रत्ययस्य तेरिडागमो भवति। गृहीतिः। अपस्निहितिः। विकुचितिः। निपकि(ठि)ति। उदितिः। तेर्ग्रहादेरेव नियमार्थं वचनम्। तेनान्यतस्तेर्न भवति। वान्तिः। दीप्तिः। पाक्तिः। याष्टिः। प्रज्ञप्तिः। तेरेव ग्रहादेरिति नियमो न भवति। उत्तरत्रालिटीति प्रतिषेधात्।

ग्रह एकाचोऽलिटीटः॥४।२।१३६॥ एकाचो ग्रहेर्वातोरिटः इडागमो भवति। अलिटि न चेत्स इट् लिटि भवति। ग्रहीता। ग्रहीतुम्। ग्रहीतव्यम्। अग्रहीत्। अग्रहीष्यम्। ग्रह इति किम्? भविता। एकाच इति किम्? अरीगृह्णीता। अरीगृह्णीतुम्। अरीगृह्णीतव्यम्। उत्तरार्थं चैकाज्ग्रहणम्। अलिटीति किम्? अगृहिष्व। अगृहिम। नित्यत्वेऽपि द्विर्वचनस्यैकाच इति विहितविशेषणमित्यलिट्ग्रहणम्। इटीति[2] किम्? ग्रहिषीष्ट। इट इति किम्? ग्रहणम्। ग्राहकः। अग्रहिषाताम् इति। त्रिअनेट्।

ऋदृवुर्वाल्लतङ्क्सेः॥४।२।१३७॥ ऋकारान्ताद् वृ इति वृङवृञ्भ्यां च इटः इट् भवति वा अलतङ्क्सेः। न चेत्स ल् लिङ्लिटोरतङ्परश्च सेर्भवति। (तरि)ता। तरीता। तितरिषति। तितरीषति। अरिता। अरीता। अरित्वा। अरीत्वा। जिअरिषति। जिअरीषति। वृ—वरिता। वरीता। विवरिषति। विवरिषते। प्रावरिता। प्रावरीता। प्राविवरिषति। प्राविवरीषति। ऋदृवुरिति किम्? करिष्यति। हरिष्यति। ऋदिति तकारो वर्णनिर्देशार्थः। अन्यथा ऋणाति विज्ञायेत। अलतङ्क्सेरिति किम्? तेरिव। वरिव। तेरिव। तेरिम। विशरिषीष्ट। आस्तरीषीष्ट। वरिषीष्ट। अतारिष्टाम्। अतारिषुः। आस्तारिष्टाम्। आस्तारिषुः। प्रावारिष्टाम्। प्रावारिषुः। अतङेति विशेषणादिहेट् भवत्येव। आस्तरिष्ट। आस्तरीष्ट। अवरिष्ट। अवरीष्ट। प्रावरिष्ट। प्रावरीष्ट।

हल्भ्यां षोस्सट् तङ्क्सेः॥४।२।१३८॥ धातोर्हल्भ्यां हलद्यात् परो य ऋकारस्तदन्तात् ऋदृवुरुच धातोः परस्य सटस्तङ्परस्य च सेरीडागमो वा भवति। दूषीष्ट। दूरिषीष्ट। स्मृषीष्ट। स्मरिषीष्ट। स्मरीषीष्ट। तर्षीष्ट। तरीषीष्ट। आस्तर्षीष्ट। आस्तरीषीष्ट। वृषीष्ट। वरिषीष्ट। प्रावृषीष्ट। प्रावरिषीष्ट। तङ्क्सेः—अध्वृषाताम्। अध्वरीषाताम्। अस्मृषाताम्। अस्मृरीषाताम्। आस्वीर्ष्ट। आस्तरीष्ट। आवृत। आवरिष्ट। प्रावृत। प्रावरीष्ट। हल्भ्यामिति किम्? कृषीष्ट। अकृत। धातोरिति विशेषणादिह न भवति। निष्कृषीष्ट। मा निष्कृत। 'स्कृच्छृत' इति स्कृग्रहणात्सट्। हल्भ्यामिति निर्दिश्यते। तेनेह न भवति। संस्कृषीष्ट। समस्कृत। ऋरिति ऋकारार्थम्। चकारः ऋद्वयर्थः। तङ्ग्रहणं किम्? अध्वार्षीत्। अस्मार्षीत्। अतारीत्। अस्तारीत्। प्रावारीत्। प्रावारिष्टाम्। प्रावारिषुः।

रधादीदिद्धूञः॥४।२।१३९॥ रधादेरीदितो धूञश्च धातोः परस्य बलादेर्यङ्लः प्रत्ययस्य इडागमो वा भवति। रध—रद्धा। रधिता। नश—नेट्टा। नशिता। तृप्—तर्प्ता। तर्पिता। दृप्—दर्प्ता। दर्पिता। द्रुह—द्रोग्धा। द्रोढा। द्रोहिता। मुह—मोग्धा। मोढा। मोहिता। ष्णुह—स्नोग्धा। स्नोढा। स्नोहिता। स्निह—स्नेग्धा। स्नेढा। स्नेहिता। ओदितः—गुपौ—गोप्ता। गोपिता। गुहौ—निगोढा।

---

१. शद् क० म०। २. इटौ किम्, क० म०।

निगोहिता । गाहौ—विगाढा । विगाहिता । औस्वृ—स्वर्ता । स्वरिता । सेर ऋदन्तः से इति नित्य एवेट् । सूङ्—सोता । सविता । आदादिको दैवादिकश्च । औदित न ष्य प्रेरणे इति तौदादिकः । ष्यङ्ग्रहणे इति तौदादिकः । षङ्ग्रहणे अदाञनदाद्योरनदादेरेव ग्रहणमिति तौ दीदितौ क्रियेते । रषादीनामेदित्करणाद्रषादिग्रहणमेव लघु मन्यते । धूञ्—धोता । धविता ।

अञ्जोऽस्तेः ॥४।२।१४०॥ अञ्ज इत्येतस्माद्धातोः परस्य सिचश्चितस्य वलादेर्त्यलः प्रत्ययस्य इडागमो भवति (वा) । अङ्क्ता । अञ्जिता । असेरिति किम् ? आञ्जीत । आञ्जिष्टाम् । आञ्जिषुः ।

निष्कुषः ॥४।२।१४१॥ निस्पूर्वात्कुष इत्येतस्माद्धातोः परस्य वलादेः प्रत्ययस्य इडागमो वा भवति । निष्कोष्टा[1] । निष्कोषिता । निष्कोष्टुम् । निष्कोषितुम् । निष्कोष्टव्यम् । निष्कोषितव्यम् । निस्पूर्वग्रहणात् केवलादन्यत्पूर्वाच्च नित्य एव । कोषिता । प्रकोषिता । योगविभाग उत्तरार्थः ।

क्तयोः ॥४।२।१४२॥ निष्कुषः क्तयोरिडागमो नित्यं भवति । निष्कुषितः । निष्कुषितवान् । योगविभागो नित्यार्थः ।

न डीयश्व्यैदिद्वेटोऽपतः ॥४।२।१४३॥ डीय श्वि इत्येताभ्याम् ऐकारानुबन्धाद् वेटः यत्र क्वचिद्विकल्पितेटश्च धातोरिडागमो न भवति, अपतः पतिवर्जितात् । डीय—निडीनः । निडीनवान् । उड्डीनः । उड्डीनवान् । डीयेति ङ्यनिर्देशात् शब्विकरणादिङ् भवत्येव । डयितः । डयितवान् । श्वि—शूनः । शूनवान् । ऐदितः—ओलजै–लग्नः । लग्नवान् । उद्विग्नः । उद्विग्नवान् । वेट्—अपरद्धः । अपरद्धवान् । अवतः । अवतवान् । शान्तः । शान्तवान् । सोढः । सोढवान् । भ्रष्टः । भ्रष्टवान् । विग्नः । विग्नवान् । तृग्नः । तृग्नवान् । अपत इति किम् ? पतितः । पतितवान् । सनि विकल्पितेट्त्वात् पतः पर्युदासः । एकाच इत्येव दरिद्रितः । दरिद्रितवान् । श्विडीययोरोदितित्सूयत्यादित्वसामर्थ्यात् क्तयोरिटपि न करः स्यादिति ग्रहणम् । कृन्तत्यादेः कृतन्नच्छदः इति विकल्पितेट्त्वेऽपि ऐदित्वं षङ्लुप्तार्थम् । चरीकृत. । चरीकृतवान् इति ऐदित्वसामर्थ्याच्च न तन्नैकाच इति विशेषणम् ।

अर्दस्तन्निवेः ॥४।२।१४४॥ सन्निवीत्येतेभ्यः परस्यार्देः क्तयोरिडागमो न भवति । समर्णः । म्यर्णः । ऽम्यर्णः । अर्द इति किम् ? समेधितः । सन्निवेरिति किम् ? अर्दितः । दुरर्दितः ।

अविदूरेऽभेः ॥४।२।१४५॥ अभेरुत्तरादर्तेः क्तयोरविदूरेऽविप्रकृष्टेऽर्थे इडागमो न भवति । अभ्यर्ण-(म्)—अविदूरमित्यर्थः । अभ्यर्णा शरत् । अभ्यर्णे आसवे । अविदूर इति किम् ? अभ्यर्दितः क्षीतेन । बाधित इत्यर्थः ।

शसि धृषः प्रगल्भे ॥४।२।१४६॥ शसि धृष् इत्येताभ्यां क्तयोः प्रगल्भेऽर्थे इडागमो न भवति । शस्तः । विशस्तः । धृष्टः—प्रगल्भ इत्यर्थः । प्रगल्भ इति किम् ? विशसितः । धर्षितः । शसिधृषोर्वेटः आर्धधातुक इति च प्रतिषेधे सिद्धे नियमार्थं वचनम् । भावारम्भयोश्चेह वृत्तिर्नास्ति ।

कृषः कृच्छ्रगहने ॥४।२।१४७॥ कृच्छ्रं दुःखं दुःखकारणं च तस्मिन् गहने चार्थे कर्षेर्धातोः क्तयोरिडागमो न भवति । कृष्टं वर्तते । कृष्टं वर्षितम् । कृष्टं वर्तनम् । कृच्छ्रगहन इति किम् ? कर्षितम् ।

घुषोऽविशब्दे ॥४।२।१४८॥ (वि)–नानाशब्दनं विशब्दः प्रतिज्ञानं वा तदोऽन्यत्राविशब्देऽर्थे वर्तमानाद्घुषेर्धातोः क्तयोरिडागमो न भवति । घुष्टो रज्जुः । घुष्टौ पादौ । घुष्टासम्बन्धावयवैत्यर्थः । अवि-शब्द इति किम् ? अवघुषितं वाक्यमाह । अयमेव विशब्दने प्रतिषेधो ज्ञापकम् । अनित्यश्चुरादिर्णिनिति, तेनेद-मप्यु(प)पन्नं जुघुषः घुष्यमाणवाः ।

---

१. अन्तरवयवानां बहिष्करणं निष्कोषः, क० म० टि० ।

दृढः स्थूलबलिनोः ॥४।२।१४६॥ दृढ इति दृहेः दृंहेर्वा धातोः क्तप्रत्यये स्थूले बलवति चार्थे इडभावादि निपात्यते। दृढः स्थूलो बली वा। परिदृढस्य गतः। पारिवृढी कन्या। स्थूलबलिनोरिति किम् ? द्रंहितम्। द्रंहितम् ॥

क्षुब्धस्वान्तध्वान्तपरिवृढलग्नम्लिष्टविरिब्धफाण्टबाढं मन्थमनस्तमःप्रभुसक्तास्पष्टस्वरानायासभृशे ॥४।२।१५०॥ क्षुब्ध स्वान्त ध्वान्त परिवृढ लग्न म्लिष्ट विरिब्ध फाण्ट बाढ इत्येतानि यथासंख्यं मन्थमनःतमःप्रभुसक्तास्पष्टस्वरानायासभृशेष्वर्थेषु निपात्यन्ते। क्षुब्ध इति क्षुभेः क्ते मन्थे इडभावो निपात्यते। मन्थनं मथ्यते वा यः स मन्थः[1]। तदभिधाने क्षुब्धं देवदत्तेन मथितमित्यर्थः। क्षुब्धः समुद्रः, क्षुब्धागी नदी। मथितः मथ्यमानो वा सन् क्षोभं गत इत्यर्थः। सक्तुः[2] संसृष्टं[3] वा द्रवद्रव्यं मन्थः, तद्द्रव्याभिधाने क्षुब्धो मन्थ इत्यर्थः। संचरितो मन्थ इत्यन्ये। मन्थ इति किम् ? क्षुभितं समुद्रेण। क्षुभितं मन्थेन। क्षुभितः समुद्रः। क्षुभितः समुद्रो मन्थेन। स्वान्तेति स्वनेः, स्वान्तं मनः, विषयेष्वविक्षिप्तमनाकुलमित्यर्थः। तन्नामधेयं वा। अन्यत्र स्वनितो मृदङ्गः। स्वनितं मनसा घट्टितं स्पृष्टमित्यर्थः। ध्वान्तेति ध्वनेः, ध्वान्तं तमः अनालोकं गम्भीरमित्यर्थः। तमो नामधेयं वा। अन्यत्र ध्वनितो मृदङ्गः। ध्वनितं तमसा। परिवृढेति परिपूर्वस्य बृंहेर्बृहेर्वा क्ते इडभावादि। परिवृढः कुटुम्बी, प्रभुरित्यर्थः। परिवृढस्य गतः। पारिवृढी कन्या। अन्यत्र परिबृंहितम्। परिबृंहितम्। लग्नेति लगतेः [4]लग्नम्, सक्त(म)–इत्यर्थः। लगितमन्यत्। म्लिष्टेति, म्लेच्छतेरिडभाव इत्व च। म्लिष्टमविस्पष्टम्। म्लेच्छितमन्यत्। विरिब्धेति रिभे. रेभृङ्शब्द इत्येतस्य वा विपूर्वस्य इत्वं विरिब्धः स्वरो ध्वनिरित्यर्थः। विरिभितम्। विरोभितं वान्यते रिभिः। सौत्रो धातुः। फाण्टेति फणे फाण्टमनायासं यदभ्रपितमपिष्टमृदकसम्पर्कमात्राद्विमक्षरसं कषायं तदुच्यते। अग्निना तप्तं यत्किञ्चिदुष्णं तत्फाण्टमित्यन्ये। फणितमन्यत्। बाढेति बाहेः बाढं भृशमित्यर्थः। बाहितमन्यत्। केचिल्लक्षणादिघात्वर्थस्य सक्तनादेर्विषयभावे मात्रे भवतीत्याहुः। यथा लोकेऽस्मिन् [5]हृष्टमिति।

आदितः ॥४।२।१५१॥ आदितो धातोः क्तयोरिडागमो न भवति। भिमिदा—भिन्नः। भिन्नवान्। छिखिदा—छिन्नः। छिन्नवान्। वेट इति यदुपधेविकल्पास्तदुपधेः प्रतिषेधः। विदितः। विदितवान्। हृषितः। हृषितवान्। तुष्ट इत्यर्थः। तुष्टयर्थं हृषिमेकेऽनूदितमाहुः प्रत्ययोऽवकाशत्वाद्भवति।

भावारम्भे वा ॥४।२।१५२॥ आदितो धातोर्भावे आरम्भे आदिकर्मणि चार्थे क्तयोरिडागमो वा न भवति। भिन्नमनेन। भेदितमनेन। प्रभिन्नः। प्रभेदितः। प्रभिन्नवान्। प्रभेदितवान्। छिन्नमनेन। छेदितमनेन। प्रछिन्नः। प्रछिन्नवान्। प्रछेदितः। प्रछेदितवान्। आदित इति किम् ? विदितमनेन। प्रविदितमनेन। प्रविदितः। भावारम्भ इति किम् ? भिन्नः। भिन्नवान्। पूर्वेण नित्ये प्रतिषेधे प्राप्ते विकल्पः।

शकेः कर्मणि ॥४।२।१५३॥ शकेः क्तयोः कर्मणि इडागमो वा न भवति। शक्तो घटः कर्तुम्। शकितो घटः कर्तुम्। कर्मणि क्तवतुर्नास्तीति क्त एवोदाह्रियते। कर्मणीति किम् ? शक्तो देवदत्तः।

हृषेर्लोमविस्मयप्रतिघाते ॥४।२।१५४॥ हृष् इत्येतस्माद्धातोर्लोमविस्मयप्रतिघातेषु वर्तमानात् क्तयोरिडागमो वा न भवति। लोमविषया लोमस्था क्रिया लोमेत्युच्यते। लोम चाङ्गजं मूर्धजं च गृह्यते। हृष्टं लोम। हर्षितं लोम। हृष्टानि लोमानि। हर्षितानि लोमानि। हृष्टं लोमभिः। हर्षितं लोमभिः। हृष्टाः केशाः। हर्षिताः केशाः। हृष्टं केशैः। हर्षितं केशैः। विस्मयः—हृष्टो देवदत्तः। हर्षितो देवदत्तः। विस्मय (स्मित) इत्यर्थः। प्रतिघाते—हृष्टा दन्ताः। हर्षिता दन्ताः। प्रतिहता इत्यर्थः। लोमविस्मयप्रतिघाते इति किम् ? हृष्टोऽग्नौ। हर्षितस्तुष्टौ।

---

१. क्रुद्यदुक्तमिति भावे कर्मणि च घञ्, क० म० टि०। २. भृष्टा यवाः पुनर्धानाः धाना चूर्णं तु सक्तव इति वैजयन्ती, क० म० टि०। ३. मिश्रितम्, क० म० टि०। ४. लग्नं राश्युदये लग्नं सक्तसञ्जितयोरपि, क० म० टि०। ५. हृष्टो हर्षितवद्रोमाञ्चितविस्मृतयोरपि, क० म० टि०।

अतश्चस्तापचितम् ॥४।२।१५५॥ अन्त चस्त अपचित इत्येते शब्दाः क्ते वा निपात्यन्ते । अन्तः । अपित्तः । इवस्तः । इवसितः । प्रश्वस्तः । प्रश्वसितः । आश्वस्तः । आश्वसितः । विश्वस्तः । विश्वसितः । अत्र पक्षे इडभावः । अपचितः । अपचायितः । अत्र चिभावश्च चिनोतेः पूजार्थो नास्तीति इदं निपातनम् । अथास्मिन् विषये पूजापचयश्च विज्ञायेत । क्षयमकर्तुं क्रियमाणं वा विस्पष्टार्थं भविष्यति ।

वमरुच्यमत्वरसङ्घुषास्वनः ॥४।२।१५६॥ वम रुचि अमत्वर सङ्घुष्ट आस्वन् इत्येतेभ्यः क्तयोरिडागमो वा न भवति । वान्तः । वान्तवान् । वमितः । वमितवान् । रुचि—रुष्टः । रुष्टवान् । रुचितः । रुचितवान् । अस्य वेटीति नित्ये प्रतिषेधे ग्रहणम् । अम्—अम्यान्तः[1] । अम्यान्तवान् । अम्पमितः । अम्यमितवान् । तूर्णः । तूर्णवान् । त्वरितः । त्वरितवान् । सङ्घुष्टः । सङ्घुष्टं वाक्यम् । सङ्घुषितं वाक्यम् । सङ्घुष्टौ दम्पौ । सङ्घुषितौ दम्पौ । अविशब्दनेऽपि परत्वादयमेव विकल्पः । आस्वन्—आस्वान्तो देवदत्तः । आस्वनितो देवदत्तः । आस्वान्तं मनः । आस्वनितं मनः । मनस्यपि विकल्प एव ।

जॄव्रश्चास्त्वि ॥४।२।१५७॥ जॄ वृश्च इत्येताभ्यां क्त्वाप्रत्यये परे तस्य इडागमो भवति । जरित्वा । जरीत्वा । वृश्चित्वा । जॄ इत्येतस्मोगन्तत्वात्प्रतिषेधे वृश्चेरौदित्वाद्विकल्पे प्राप्ते वचनम् । जॄ इति निरनुबन्धः क्र्यादिक उपादीयते । यस्तु जृषीति सानुबन्धो दैवादिकस्तस्य जीर्त्वा इत्येव भवति ।

क्षुधवसः क्त्वां क्त्वि ॥४।२।१५८॥ क्षुध बुभुक्षायां वस निवासे इत्येताभ्यां परयोः क्तयोः क्त्वायाश्च वलादेरिडागमो भवति । क्षुधितः । क्षुधितवान् । क्षुधित्वा । (क्षोधित्वा ?) । उषितः । उषितवान् । उषित्वा । वस्तेरप्रतिषेधादिडस्त्येव ।

लुभ्यश्च विमोहार्चे ॥४।२।१५९॥ लुभ अञ्चि इत्येताभ्यां धातुभ्यां [2]यथाक्रमं विमोहेऽर्चायां च.र्थे वर्तमानाभ्यां परयोः क्तयोः क्त्वायाश्च वलादेरिडागमो भवति । विलुभितः सीमन्तः । लुभिताः केशाः । विलुभितानि पदानि । विलुभितवन्तः । लुभित्वा । लोभित्वा केशान् गत । अञ्चेः—अञ्चिता गुरवः । गुरूनञ्चितवन्तः । अञ्चित्वा गुरून् स्वर्गमाप्नोति । विमोहार्चे इति किम् ? लुब्धो जात्मः । लुब्धा । लुभित्वा । लोभित्वा । उदक्तमुदकं कूपात् । अक्त्वा । अञ्चित्वा । विमोहः—विमोहनमाकुलीकरणम् । अर्चा पूजा तत्र यथाप्राप्तमेव भवति ।

पूङ्किलशो वा ॥४।२।१६०॥ पूङ् किलश इत्येताभ्यां परयोः क्तयोः क्त्वायाश्च वलादेरिडागमो वा भवति । पूतः । पूतवान् । पूत्वा । पवितः । पवितवान् । पवित्वा । किलष्टः । किलष्टवान् । किलष्ट्वा । किलशितः । किलशितवान् । किलशित्वा । किलशितः । पूङिति ङकारः पूङ्निवृत्त्यर्थः । तस्य हि शीङ् ङीङ् पूङ् स्विङ् मिदिक्ष्विद्घृषोऽनेः, इति प्रतिषेधाभावात्[3] पवितमित्यनिष्टमापद्यते । प्रतिषेधे चानुबन्धोच्चारणं पोपूयितः, पोपूयितवान् इति यङ्लुचि प्रतिषेधनिवृत्त्यर्थम् ।

त्व्यूदितः ॥४।२।१६१॥ ऊदितो धातोः क्त्वाप्रत्यये वलादेरिडागमो वा भवति । शम्—शान्त्वा । शमित्वा । तम्—तान्त्वा । तमित्वा । दम्—दान्त्वा । दमित्वा ।

सहलुभेच्छरुषरिषस्ति ॥४।२।१६२॥ सहलुभेच्छरुषरिष इत्येतेभ्यस्तकारे परतो वलादेर्यः वलः प्रत्ययस्य इडागमो वा भवति । सह—सोढा । सोढुम् । सोढव्यम् । सहिता । सहितुम् । सहितव्यम् । लुभ—लोब्धा । लोब्धुम् । लोब्धव्यम् । लोभिता । लोभितुम् । लोभितव्यम् । इच्छ—एष्टा । एष्टुम् । एष्टव्यम् । एषिता । एषितुम् । एषितव्यम् । इच्छेति इषेः शत्रिकरणोपादानम् । इष गतौ इष आभीक्ष्ण्ये इति दैवादिक-क्र्यादिकयोर्निवृत्त्यर्थम् । ताभ्यां नित्य एवेट् भवति । प्रेषिता । प्रेषितुम् । केचिदिष्णातेरपि विकल्पमाहुः । रुष—रोष्टा । रोषिता । रिष—रेष्टा । रेषिता । तीति किम् ? सहिष्यते ।

---

१. रोगी, क० म० टि० । २. यथासङ्ख्यम्, क० म० । ३. पुषित, क० म० ।

भ्रस्जृधदम्भतन्सनूपतिशपिभियूर्णुभरस्वृविषृतः सनि ॥४।२।१६३॥ भ्रस्ज ऋध दम्भ तन् सन पत शपि भि यु ऊर्णु भर स्वृ वि वृ इत्येतेभ्य इव इत्येवमन्तेभ्यः ऋकारान्तेभ्यश्च धातुभ्यः परस्य बलादेर्ल्यश्लः प्रत्ययस्य इडागमो वा भवति सनि । भ्रस्ज—विभ्रज्जति । विभर्क्षति । विभ्रज्जिषति । विभर्जिषति । ऋध—इर्त्सति । अदिधिषति । दम्भ—दिप्सति । दीप्सति । दिदम्भिषति । तन्—तितंसति । तितांसति । तितनिषति । सन्—सिषासति । सिसनिषति । सनिति सनते. सनोतेश्च ग्रहणम् । पत—पित्सति । पिपतिषति । शपि—शोप्सति । शिशपयिषति । शपीति कृतह्रस्वस्योपादानात् शापेर्जिज्ञापयिषतीत्येव भवति । शि—शिश्रीषति । शिश्नयिषति । यु—युयूषति । युयविषति । ऊर्णु—ऊर्णुनूषति । ऊर्णुनविषति । भर—बुभूर्षति । बिभरिषति । भरेति यद्निर्देशो धारणपोषणार्थवृत्तेर्बिभर्तेर्माभूत् इत्येवमर्थः । अन्ये भरतेर्बिभर्तेश्च नास्त्यर्थभेदः भरत्यरादेशनिपातनमेतत् । बिभर्यति यथा स्यादित्येवमर्थमित्याहुः । स्वृ—सुस्वूर्षति । सिस्वरिषति । स्वरतेरौदित्त्वलक्षणस्योपान्त्यत्वात्प्रतिषेधे प्राप्ते ग्रहणम् । वृ—वुवूर्षते । विवरिषते । प्रावुवूर्षति । प्राविवरिषति । प्राविवरीषति । वृ इति वृङ्वृञोर्ग्रहणम् । इव—दिदेविषति । सुस्यूषति । सिसेविषति । इवितीवन्तग्रहणम् । न इवु व्याप्ताविति धातोः, स ह्रादिरवादिन्व इति निर्दिश्येत । ऋत्—तितीर्षति । तितरिषति । तितरीषति । आतिस्तीर्षति । आतिस्तरिषति । आतिस्तरीषति । आचिकीर्षति । आजिहीर्षति । तौ दीर्घे कृते ऋकारो लाक्षणिक इति न भवति दरिद्रातेरतः सकारादौ सनि न लुगिति विशेषणाद्विकरो विज्ञायते । दिदरिद्रिषति । दिदरिद्रासति ।

क्राद्यपूङ्स्म्यञ्ज्यशः ॥४।२।१६४॥ कृ विक्षेपण इत्यादिभ्यः पञ्चभ्यः ऋपूङ्स्मि अञ्जि अशित्यतेभ्यश्च सन इडागमो नित्यं भवति । क्रादि—चिकरिषति । जिगरिषति । दिधरिषते । दिधरिषते । पिपृच्छिषति । पृच्छे. परतो वृत्करणात्तुदादिप्रतिपत्तेः कृणातेः चिकीर्षति । गृह्णाते (गृणाते.) जिगीर्षति । धरतेः—दिधीर्षति । इतीट् न भवति । ऋ—अरिरिषति । पूङ्—पिपरिषते । पूङः—पुपूषति । स्मि—सिस्मयिषति । अञ्जिग्रोर्षति । अशि—प्रशिशिषते । अशित्याशीङित्यस्य ग्रहणम् । अशातेरिडस्त्येव ।

न किदाद्युग्रहगुहः ॥४।२।१६५॥ किदादिभ्य उगन्ताद् ग्रहगुहाभ्यां च सनि, इडागमो न भवति । चिकित्सति । तितिक्षति । शिशासते । रुरुक्षति । लुलूषति । जिघृक्षति । जुघुक्षति । कित्तिज्गुप्शान्दान्धघाः किदादयः । गृभ्योऽभिषज्यादौ सन्विधीयते ।

ऋदृज्ञः स्ये ॥४।२।१६६॥ ऋकारान्ताद्दन्तेभ्यश्च परस्य ल्यश्लः प्रत्ययस्येडागमो भवति स्ये । करिष्यति । अकारिष्यत् । हरिष्यति । अहरिष्यत् । स्वरिष्यति । अस्वरिष्यत् । हनिष्यत् । अहनिष्यत् । स्वरतेरौदितोऽपि परस्मादयमेव नित्यः । तकारो वर्णनिर्देशार्थः ।

क्वस्येकाज्घसः ॥४।२।१६७॥ आकारान्तादेकाचः घसेश्च धातोः परस्य ल्यश्लः प्रत्ययस्येडागमो भवति क्वसौ । आतः—पपिवान् । तस्थिवान् । एकाचः—प्राधवान् । आरिवान् । आदिवान् । अनूषिवान् । पेचिवान् । पेरिवान् । उपसेदिवान् । घसः—अत्तिवान् । क्वसोति किम् ? बिभर्दिव । बिभर्दिम । एकाञ्चस इति किम् ? बिभिद्वान् । चिच्छिद्वान् । बभूवान् । उपशुश्रुवान् । नित्यत्वाद् द्विर्वचने कृते सत्यनेकाच्त्वं विहितविशेषणं चे ग्रहणं श्रीयते ? इणः—ईयिवान् । समीयिवानित्यत्र द्विर्वचने कृतेऽपि दीर्घे सत्येकाजेवार्यं भवतीति[1] हि प्राप्तिह्रः प्राप्तिसद्भावादिनित्य इति पूर्वमेव भवति घसग्रहणमनेकाजर्थं स्मादिनियमादिटि प्राप्ते नियमार्थं वचनम् ।

गमहनविदृदृक्षिशो वा ॥४।२।१६८॥ गम् हन् विद् दृश् विश् इत्येतेभ्य. क्वस इडागमो वा भवति । जगन्वान् । जग्मिवान् । जघन्वान् । जघ्निवान् । विविद्वान् । विविदिवान् । ददृश्वान् । ददृशिवान् । विविश्वान् । विविशिवान् । अदाद्यनदाद्योरेव ग्रहणमिति ज्ञानार्थस्य विदेर्ग्रहणम् । ज्ञानार्थस्य विविद्वानित्येव भवति । सत्ताविचारणार्थयोः क्वसुरेव नास्ति ।

---

१. –तीति टः प्राप्तिसद्भावादिः, क० म० टि० ।

कृतृन्तृञ्वृच्छृदस्यसौ ॥४।२।१६९॥ कृतँ च्छेदने, कृतँ संवेष्टने, द्वयोरपि ग्रहणम्। दृङ् हिंसानादरयोः। नृतँ गात्रविक्षेपणे। चृतँ हिंसाग्रन्थनयोः। छृद संदीपने—एभ्यो धातुभ्यः परस्य ल्यसलः प्रत्ययस्येडागमो वा भवति सकारादौ सिचि परे। कृत्—कर्त्स्यति। अकर्त्स्यत्। चिकृत्स्यति। कर्तिष्यति। अकर्तिष्यत्। चिकर्तिषति। तृद्—तर्त्स्यति। अतर्त्स्यत्। तितृत्स्यति। तर्दिष्यति। अतर्दिष्यत्। तितर्दिषति। नृत्—नर्त्स्यति। अनर्त्स्यत्। निनृत्स्यति। नर्तिष्यति। अनर्तिष्यत्। निनर्तिषति। चृत्–चर्त्स्यति। अचर्त्स्यत्। चिचृत्स्यति। चर्तिष्यति। अचर्तिष्यत्। चिचर्तिषति। छृद्–छर्त्स्यति। अछर्त्स्यत् चिच्छृत्सति। छर्दिष्यति। अच्छर्दिष्यत्। चिच्छर्दिषति। सीति किम्? कर्तिता। तर्दिता। नर्तिता। चर्तिता। छर्दिता। असाविति किम्? अकर्तीत्। अतर्दीत्। अनर्तीत्। अचर्तीत्। अछर्दीत्।

गमः ॥४।२।१७०॥ गमेर्धातोः परस्य सकारादेर्ल्यसलः प्रत्ययस्येडागमो वा भवति। संजिगंसिता। संजिगमिषिता। अधिजिगांसिता। अधिजिगमिषिता। सीति किम्? गन्ता।

अतङः ॥४।२।१७१॥ अतङ्निमित्ताद् गमे. परस्य सकारादेर्ल्यसलः प्रत्ययस्येडागमो नित्यं भवति। गमिष्यति। अगमिष्यत्। जिगमिषति ग्रामम्। अधिजिगमिषति मातुः। जिगमिषिता। जिगमिषितुम्। अधिजिगमिषिता। अधिजिगमिषितुम्। अधिजिगमिषितव्यम्।

न वृद्भ्यः ॥४।२।१७२॥ अतङ इति वर्तते न सीति। वृतादिभ्योऽतङ्निमित्तेभ्यः परस्य प्रत्ययस्येडागमो न भवति। अतङ्निमित्तं च वृतादय.। स्यसनोर्नासि च कृपि.। वृतूङ्–वर्त्स्यति। अवर्त्स्यत्। विवृत्सति। विवृत्सितुम्। वृधूङ्–वर्त्स्यति। अवर्त्स्यत्। विवृत्सति। विवृत्सितुम्। शृधूङ्–शर्त्स्यति। अशर्त्स्यत्। शिश्रृत्सति। शिश्रृत्सितुम्। स्यन्दोङ्–स्यन्त्स्यति। अस्यन्त्स्यत्। सिस्यन्त्स्यति। सिस्यन्त्स्यतु। असिस्यन्त्स्यत्। सिस्यन्त्स्यति। सिस्यन्त्स्यितुम्। कृपौङ्–कल्प्स्यति। अकल्प्स्यत्। चिकल्पयिषति। चिकल्पयिषिता। चिकल्पयिषितव्यम्। कल्प्ता। कल्प्तारौ। कल्प्तारः। कल्प्तासि। कल्प्तास्थः। कल्प्तास्थ। स्यन्दिकृपोः औदित्कल्लक्षणो विकल्पोऽनेन परत्वाद्वृतादित्वसामर्थ्याच्च बाध्यते। अतङ् इति किम्? वर्तिता। कल्पितव्यम्। स्यादावपि पाक्षिकनेषामतङ्निमित्तत्वम्। यत्रातङ्निमित्तता नास्ति तत्रेङ् भवत्येव। वर्तिष्यते। अवर्तिष्यत। विवर्तिषते। विवर्तिषिता। विवर्तिषितुम्। विवर्तिषितव्यम्। वर्द्धिष्यते। अवर्द्धिष्यत। विवर्द्धिषते। विवर्द्धिषितुम्। शर्द्धिष्यते। अशर्द्धिष्यत। शिशर्द्धिषते। शिशर्द्धिषितुम्। स्यन्दिकृपोरोदित्वाद्विकल्प. स्यन्त्स्यते। स्यन्दिष्यते। अस्यन्त्स्यत। अस्यन्दिष्यत। सिस्यन्त्स्यते। सिस्यन्दिषते। सिस्यन्त्स्यितुम्। सिस्यन्दिषितुम्। कल्प्स्यते। कल्पिष्यते। अकल्प्स्यत। अकल्पिष्यत्। चिकल्प्यते। चिकल्पिषत। चिकल्प्यितुम्। चिकल्पिषितुम्। कल्प्ता। कल्पिता। कल्प्तासे। कल्पितासे। विवृत्सतीयते (विवृत्सति) इत्यत्र क्यङतङः निमित्तं वृतिरतङ एव। वृतूङ् वृधूट् शृधूङ् स्यन्दोङ् कृपौङ् वृत् एते पञ्च वृतादय.। वृत्करणं तुदादिवृतादिपरिसमाप्त्यर्थम्।

गमस्नोरसुप्तङाने ॥४।२।१७३॥ गम् स्नु इत्येताभ्यां परस्य बलादेर्ल्यसलः प्रत्ययस्य इडागमो न भवति। असुप्तङाने। असुप्तानोः सम्बन्धिनि तङाने सति। गंस्यते ग्राम.। संगंस्यते वत्सो मात्रा। गंस्यमानः। सगंस्यमानः। अगंस्यत। समगंस्यत। गंसीष्ट। संगंसीष्ट। संजिगंसते। संजिगंसमानः। संजिगंसिष्यते। संजिगंसिष्यमाणः। अधिजिगांसते। अधिजिगांसमानः। अधिजिगांसिष्यते। अधिजिगांसिष्यमाणः। गम इति प्राप्तिः। स्नु–प्रस्नोता। प्रस्नोतासे। प्रस्नोष्यते। प्रस्नोष्यमाणः। प्रस्नोष्यसे। (प्रास्नोष्यत)। प्रस्नोषीष्ट। प्रास्नोष्ट। असुप्तङान इति किम्? संजिगमिषिता। अधिजिगमिषिता। प्रस्नवितुम्। प्रस्नवितव्यम्। असुबग्रहण किम्? जिगमिषिष्यते। प्रस्रविष्यते। असुबग्रहणात्तङानपरेऽपि तङानभावमात्रे प्रतिषेधः।

---

१. कर्तन छेदने प्राहुर्नारोणां तूलसेचने, इत्यभिधानम्, क० म० टि०। २. शृधूङ्शब्दः कुत्सायाम् (पर्दने-गुदस्खेत्यर्थः) क० म० टि०।

क्रमः ॥४।२।१७४॥ क्रमः परस्य वक्षादेर्य्यङः प्रत्ययस्याऽसुप्तङाने सति इडागमो न भवति। प्रक्रंसीष्ट। उपक्रंसीष्ट। प्रक्रन्ता। उपक्रन्ता। प्रक्रन्तासे। उपक्रन्तासे। प्रक्रंस्यते। उपक्रंस्यते। प्रक्रंस्यमानः। उपक्रंस्यमानः। प्राक्रंस्यत। उपाक्रंस्यत। प्राक्रंस्त। उपाक्रंस्त। प्रचिक्रंसते। प्रचिक्रंसिष्यते। असुप्तङान इति किम्? क्रमिता। निष्क्रमीत्। नृतिः। असुप्ग्रहणं किम्? क्रमिनीयते।

तुः ॥४।२।१७५॥ असुप्तङान इति वर्तते। असुप्तङाने यः क्रमिः। असुप्तङानविषये इत्यर्थः। तस्मात्परस्य तुः तृ इत्येतस्य प्रत्ययस्येडागमो न भवति। प्रक्रन्ता। उपक्रन्ता। असुप्तङान इति किम्? क्रमिता। निष्क्रमिता। असुग्ग्रहणं किम्? क्रमिनीयते।

शक्प्रच्छिविन्द्विद्यहन्वसिघस्यचोऽश्विधिशीङ्डीङ्रुषट्कोद्वृदतः ॥४।२।१७६॥ एकाच इति वर्तते। शक् प्रच्छि विन्द् विद् हन् वसि घसि इत्येतेभ्योऽन्तेभ्यश्चैकाज्भ्यो धातुभ्यो विहितस्य प्रत्ययस्येडागमो न भवति। विद् श्री शीङ् डी इत्येतान् रुषट्कमूकारान्तं वृङ्वृञौ ऋकारान्तमकारान्तं च वर्जयित्वा। शक्–शक्ता। शक्तुम्। प्रच्छि—प्रष्टा। प्रष्टुम्। विन्द—वेत्ता। वेत्तुम्। विद्–वेत्ता। वेत्तुम्। विन्विद्योरिति नमृश्यविकरणोपादानं ज्ञानार्थस्योदासार्थम्। वेदिता शास्त्रस्य। विभाषेनोपादानं साहचर्यार्थं विन्दतेरपि व्युदासार्थम्। केचिदाहुः। वेदिता धनस्य। हन्—हन्ता। हन्तुम्। वसि–वस्ता। वस्तुम्। वसीति वसतेर्ग्रहणं, न वस्तेरदादित्वात्। वसिता वस्त्राणाम्। घसि—घस्ता। घस्तुम्। घस्तव्यम्। अजन्तेभ्य.—पाता। चेता। नेता। स्तोता। कर्ता। हर्ता। अश्विधिशीङ्डीङ्रुषट्कोद्वृदत इति किम्? श्वयिता। श्रयिता। शयिता। डयिता। रुषट्कम्–रविता। क्षविता। क्णविता। प्रस्नविता। नविता। र्यविता। ऊत्–लू–लविता। पू–पविता। यू–यविता। वृ–वरिता। वरीता। प्रावरिता। प्रावरीता। वृ इति वृङ्वृञोः सामान्यग्रहणम्। ऋत्–तरिता। तरीता। स्तृ–आस्तरिता। आस्तरीता। अत्–अवधीत्। आवधिष्ट। आवधिषीष्ट। शकादिमाहचर्यात्पाठेऽन्तस्य प्रतिषेध इनीह न भवति। विरिवारीत् अवायीत्। अगवीत्। अगावीत्। एकाच इति किम्? प्रोर्णविता। प्र णुविता। शाशकिता। परिपृच्छिता। एकाचो विहितस्येति विहितविशेषणं किम्? विवृत्सति[1]। जिघत्सति। पश्चादनेकाज्त्वेऽपि प्रतिषेधो भवत्येव।

मुरिसिचिपवाञ्चः ॥४।२।१७७॥ मु रि सि चि पव इत्येतेभ्यः परो यश्चकारस्तदन्तादेकाचो विहितस्येडागमो न भवति। मुच–मोक्ता। मोक्तुम्। रिच–रेक्ता। रेक्तुम्। सिच्–सेक्ता। सेक्तुम्। विच–वेक्ता। वेक्तुम्। मुरिसिचिपवादिति किम्? शोचिता। च इति किम्? प्रमोदिता।

भ्रस्मस्तृयुयविनित्यभुरुभाज्जः ॥४।२।१७८॥ भ्रस् मस् तृ यु य वि नि त्य भु रु भ इत्येतेभ्यः परो यो जकारस्तदन्तादेकाचो धातोर्विहितस्येडागमो न भवति। भ्रस्ज–भ्रष्टा। भर्ष्टा। मस्ज–मङ्क्ता। मङ्क्तुम्। स्रज्–स्रष्टा। स्रष्टुम्। युज्–योक्ता। योक्तुम्। यज्–यष्टा। यष्टुम्। विज्–वेक्ता। वेक्तुम्। वोति बीजम् पृथग्भाव इति धातुरस्ति। तस्मादयं प्रतिषेधः। ओविजीङ् भयचलनयोरित्येतस्मात्त्वौदित्वान्न भवति। तद्धि क्तयोः प्रतिषेधार्थम्। यङ्लुगेव हि प्रतिषेधः स्यात्तर्हि तदनर्थकमापद्यते। निज्–नेक्ता। नेक्तुम्। त्यज्–(त्यक्ता) त्यक्त्वा। त्यक्तुम्। भुज–भोक्ता। भोक्तुम्। रुज्–रोक्ता। रोक्तुम्। भज–भक्ता। भक्तुम्। एतेभ्य इति किम्? गन्तुम्। ज इति किम्? रोचिता।

रमसस्वाञ्जः ॥४।२।१७९॥ र म स स्व इत्येतेभ्यः परो यो ञ्ज इति तदन्तादेकाचो धातोर्विहितस्येडागमो न भवति। रञ्ज–रङ्क्ता। रङ्क्तुम्। भञ्ज्–भङ्क्ता। भङ्क्तुम्। सञ्ज्–सङ्क्ता। सङ्क्तुम्। स्वञ्ज्–स्वङ्क्ता। स्वङ्क्तुम्। रमसस्वादिति किम्? शिञ्जितम्। ञ्ज इति किम्? रसितम्।

अक्षुनुत्रुस्कमिभ्क्ष्विणशपसहाद्दः ॥४।२।१८०॥ अ क्षु नु त्रु स्कन् मि भ्क्ष्वि ण श प स ह इत्येतेभ्यः परो यो दकारस्तदन्तादेकाचो धातोर्विहितस्येडागमो न भवति। अद्–अत्ता। अत्तुम्। क्षुद्–क्षोत्ता। क्षोत्तुम्। नुद्–नोत्ता। नोत्तुम्। त्रुद्–त्रोत्ता। त्रोत्तुम्। स्कन्द्–स्कन्ता। स्कन्तुम्। भिद्–भेत्ता। भेत्तुम्।

---

१. व्युदासम्, क० म०। २. विवरत्सति, क० म०।

छिद्–छेत्ता । छेत्तुम् । खिद्–खेत्ता । खेत्तुम् । शद्–शत्ता । शत्तुम् । पद्–पत्ता । पत्तुम् । सद्–सत्ता । सत्तुम् । हद्–हत्ता । हत्तुम् । एतेभ्य इति किम् ? रोदिता । केचिदिह क्विबग्रहणमपीच्छन्ति । श्वेत्ता । श्वेत्स्यति । अपरेषाम्–श्वेदिता । श्वेदिष्यति । द इति किम् ? असितम् ।

बन्धरासायुबुक्रुशुरुक्षुव्याद्धः ॥४।२।१८१॥ बन् रा सा यु बु क्रु शु रु क्षु व्य इत्येतेभ्यः परो यो धकारस्तन्तादेकाचो धातोर्विहितस्येडागमो न भवति । बन्ध–बद्धा । राध–राद्धा । साध–साद्धा । युध–योद्धा । बुध–बोद्धा । क्रुध–क्रोद्धा । शुध–शोद्धा । रुध–रोद्धा । क्षुध–क्षोद्धा । व्यध–व्यद्धा । एतेभ्य इति किम् ? बाधिता । ध इति किम् ? रोदिता ।

आवलिलुक्षिच्छुसूस्वतिशतात्पः ॥४।२।१८२॥ आ व लि लु क्षि छु सू स्व ति श त इत्येतेभ्यः परो यः पकारस्तदन्तादेकाचो धातोर्विहितस्येडागमो न भवति । आप्–आप्ता । आप्तुम् । वप्–वप्ता । वप्तुम् । लिप्–लेप्ता । लेप्तुम् । लुप्–लोप्ता । लोप्तुम् । क्षिप्–क्षेप्ता । क्षेप्तुम् । छुप्–छोप्ता । छोप्तुम् । सृप्–सर्प्ता । सर्प्तुम् । स्वप्–स्वप्ता । स्वप्तुम् । तिप्–तेप्ता । तेप्तुम् । शप्–शप्ता । शप्तुम् । तप्–तप्ता । तप्तुम् । एतेभ्य इति किम् ? वेपितम् । प इति किम् ? आसितम् ।

यरलाद्धः ॥४।२।१८३॥ य र ल इत्येतेभ्यः परो यो भकारस्तदन्तादेकाचो धातोर्विहितस्येडागमो न भवति । यभ्–यब्धा । यब्धुम् । रभ्–आरब्धा । आरब्धुम् । लभ्–लब्धा । लब्धुम् । यरलादिति किम् ? बलिभता । भ इति किम् ? रणितम् ।

रयनगान्मः ॥४।२।१८४॥ र य न ग इत्येतेभ्यः परो यो मकारस्तदन्तादेकाचो धातोर्विहितस्येडागमो न भवति । रम्–रन्ता । रन्तुम् । यम्–यन्ता । यन्तुम् । नम्–नन्ता । नन्तुम् । गम्–गन्ता । गन्तुम् । रयनगादिति किम् ? कमिता । म इति किम् ? रणितम् । रयेत्यादिकेवलग्रहणं भ्रस्मसित्यादौ यस्यादिग्रहणात्तेन भ्रमिता, स्यमिता इत्यादौ न प्रतिषेधः ।

दन्दृलिविसृमृदिरुक्रुरेः शः ॥४।२।१८५॥ दन् दृ लि वि सृ मृ दि रु क्रु रि इत्येतेभ्यः परो यः शकारस्तदन्तादेकाचो धातोर्विहितस्येडागमो न भवति । दंश—दंष्टा । (दंष्टुम्) । दृश—(द्रष्टा) द्रष्टुम् । विश्—प्रवेष्टा । प्रवेष्टुम् । स्पृश्—स्प्रष्टा । स्प्रष्टुम् । मृश्—आम्रष्टा । आमर्ष्टा । आम्रष्टुम् । आमर्ष्टुम् । दिश्—देष्टा । देष्टुम् । रुश्—रोष्टा । रोष्टुम् । क्रुश्—क्रोष्टा । क्रोष्टुम् । रिश्—रेष्टा । रेष्टुम् । एतेभ्य इति किम् ? मृषिता (भ्रषिता) । श इति किम् ? रुदितम् ।

शिशुद्वित्विक्रुपिवितुदोष्यः ॥४।२।१८६॥ शि शु द्वि त्वि क्रु पि वि तु दु इत्येतेभ्यः परो यः षकारस्तदन्तादेकाचो धातोर्विहितस्येडागमो न भवति । शिष्—शेष्टा । शेष्टुम् । शुष्—शोष्टा । शोष्टुम् । द्विष्—द्वेष्टा । द्वेष्टुम् । त्विष्—त्वेष्टा । त्वेष्टुम् । क्रुष्—क्रष्टा । क्रष्टुम् । कर्ष्टा । पिष—पेष्टा । पेष्टुम् । विष्—वेष्टा । वेष्टुम् । तुष्—तोष्टा । तोष्टुम् । दुष्—दोष्टा । दोष्टुम् । एतेभ्य इति किम् ? अमोषिता । ष इति किम् ? श्नीषिता ।

वनमिवुरुदिलिदादृहः ॥४।२।१८७॥ व न मि वु रु दि लि द इत्येतेभ्यः परो यो हकारस्तदन्तादेकाचो धातोर्विहितस्येडागमो न भवति । वह—वोढा । वोढुम् । नह्—नद्धा । नद्धुम् । दुह—दोग्धा । दोग्धुम् । रुह—आरोढा । आरोढुम् । दिह—देग्धा । देग्धुम् । लिह—लेढा । लेढुम् । दह—दग्धा । दग्धुम् । एतेभ्य इति किम् ? सहिष्यते । असहिष्ट । ह इति किम् ? रुदितम् ।

स्विदमन्सिधिश्रिषिपुषश्श्यात् ॥४।२।१८८॥ स्विद् मन् सि धि श्रि षि पुष् इत्येतेभ्यः श्यञ्विकरणेभ्यो विहितस्येडागमो न भवति । स्वेत्ता । मन्ता । सेद्धा । श्रिष्टा । पोष्टा । श्यादिति किम् ? स्वेदिता । मनिता । सेधिता । श्लेषिता । पोषिता ।

किस्युकञ्श्यूषणुः ॥४।२।१८९॥ उगन्तात् श्नि इत्येतस्माच्चैकाच ऊर्णुनवश्च किति प्रत्यये विहित इडागमो न भवति । रुतम् । लूनम् । युत्वा । तीर्त्वा । क्षित्वा (श्वित्वा) । ऊर्णुत्वा । विहितविशेषणविज्ञानात्स्वरूपादनुगतत्वेऽपि प्रतिषेधो न भवति । एकाच इति किम् ? जागरितः । जागरितवान् । जागरित्वा । ऊर्णुग्रहणमनेकाजर्थम् । सानुबन्धनिर्देशाद्धङ्ङ्लुधि न भवति । ऊर्णोनवित्वा ।

नित्यानिट्तासोऽत्वदृच्छृजदृशस्थेषावृव्यार्तेः ॥४।२।१९०॥ नित्यानिट् तास् यस्यास्ति स नित्यानिट् तास् तस्मादकारवतोऽभ्यात् सृजिदृशिभ्यां च य तुम्या विहिते यप्रत्यय इडागमो वा न भवति । वृ ऋ्व्या अति इत्येतान् वर्जयित्वा । एतेभ्यो भवत्येवेत्यर्थः । अत्वत्—पपक्थ । पेचिथ । शशक्थ । शेकिथ । जगन्थ । अगमिथ । इयष्ठ । इयजिथ । अच्—प्रयाथ । ययिथ । ववाथ । वविथ । चिचेथ । चिचयिथ । निनेथ । निनयिथ । जुहोथ । जुहविथ । स्रज्—ससर्ष्ठ । ससर्जिथ । दृश्—ददर्ष्ठ । ददर्शिथ । नित्यानिट्तास इति किम् ? अवसिथ । उवयिथ । नास्य तासस्ति लिट्यादेशविधानात् । नित्यानिट्ग्रहणं किम् ? जग्रहिथ । लुलुविथ । नित्यग्रहणं किम् ? आनञ्जिथ । दुवविथ । अत्वदृच्सृजदृश इति किम् ? बिभेदिथ । तकारः किम् ? ररधिथ । थ इति किम् ? पेचिव । पेचिम । अवृव्यार्तेरिति किम् ? विवरिथ । आरिथ । संविव्ययिथ । आदिथ । वृत्वारेतत्प्रतिषेधसामर्थ्यान्नोत्तरोऽपि प्रतिषेधः । वृत्रः स्वयमूत्र इति च प्राप्तिः । विहितविशेषणं किम् ? त्वकर्यिथ ।

ऋतः ॥४।२।१९१॥ ऋकारान्तादेकाचो धातोर्विहितस्य थ इत्येतस्य प्रत्ययस्य इगागमो न भवति । सस्मर्थ । सस्वर्थ । विजहर्थ । भूर्त्य । थ किम् ? सस्मरिम । सस्वरिम । ऋत इति किम् ? निनयिथ । एकाच इति किम ? जजागरिथ ।

कृञोऽसः ॥४।२।१९२॥ कृञोऽसकारादिहितस्य यस्येडागमो न भवति । चकर्थ । अस इति किम् ? संवस्करिथ । ससकारात् पूर्वेण प्रतिषेधे प्राप्ते इदं वचनम् ।

सृभृवृस्तुद्रुश्रुस्रुभ्यश्च लिटि ॥४।२।१९३॥ सृ भृ वृ स्तु द्रु श्रु स्रु इत्येतेभ्यः कृञश्च सकारकादिहितस्य लिट इडागमो न भवति । सृ—ससृव । ससृम । भृ—बभूव । बभूम । वृ इति—वृङ्वृञोः सामान्येन ग्रहणम् । (ववृम्हे) । ववृमहे । ववृव । ववृम । स्तु—तुष्टोथ । तुष्टुव । तुष्टुम । द्रु—दुद्रोथ । दुद्रुव । दुद्रुम । श्रु—शुश्रोथ । शुश्रुव । शुश्रुम । स्रु—सुस्रोथ । सुस्रुव । सुस्रुम । कृ—चकृव । चकृम । परस्वार्थेऽप्ययमेव प्रतिषेधो न विकल्पः । अस इति किम् ? संचस्करिव । संचस्करिम । सिद्धे सत्यारम्भो नियमार्थः । तेन लिटि स्रादिभ्योऽन्ये सेट एव । सस्वरिव । सस्वरिम । बिभेदिथ । बिभेदिव । बिभेदिम । वृङ्वृञोः प्रत्ययाश्रयः प्रकृतिप्रत्ययाश्रयश्च प्रतिषेधः । शेषस्य प्रकृत्याश्रयश्च तत्तस्य सर्वस्याप्ययं प्रतिषेधः ।

सृजदृशोऽम् जल्यकि ॥४।२।१९४॥ स्वरूपलोति निवृत्तम् । सृज दृश इत्येतयोर्धत्वौर्जलादौ प्रत्यये परेऽमागमो भवति । अकि—अकिति । स्रष्टा । स्रक्ष्यति । अस्राक्षीत् । अस्राष्टाम् । द्रष्टा । द्रक्ष्यति । अद्राक्षीत् । अद्राष्टाम् । अमि कृतेऽसावाकारः । अलीति किम् ? सर्जनम् । दर्शनम् । अकीति किम् ? दृष्टः । सृष्टः । सिसृक्षति । दिदृक्षते । प्रसज्यप्रतिषेधोऽयम् । प्रतिषेधे अलीति नाश्रीयते इति सिलुचः स्थानिवद्भावादिहापि प्रतिषेधः । असृष्ट । असृष्टाः । समसृक्षः । समसृष्टाः । धातुप्रत्यये कार्यविज्ञानाच्चेह न भवति । रज्जुसृड्भ्याम् । देवदृग्भ्याम् ।

दृप्तृपस्तृपकृपिस्तृश्मृषो वा ॥४।२।१९५॥ दृप् तृप् सृप् कृप् स्तृश् मृश् इत्येतेषामकिति जलादौ प्रत्ययेऽमागमो वा भवति । द्रप्ता । दर्प्ता । प्रप्ता । तर्प्ता । स्रप्ता । सर्प्ता । क्रप्ता । कर्प्ता । स्त्रष्टा । स्तर्ष्टा । आम्रष्टा । आमर्ष्टा ।

---

१. किट्यादेशे विधा—क० म० । २. नियमः । क० म० ।

नश्मस्जसोर्नम् ॥४।२।१९६॥ नश् इत्येतस्य धातोर्मस्जश्च धातोः सकारस्य स्थाने अलि प्रत्यये परे नमागमो भवति । नंष्टा । नंष्टुम् । नंष्टव्यम् । नंष्ट्वा । नङ्क्ष्यति । निनङ्क्षति । मङ्क्ता । मङ्क्तुम् । मङ्क्तव्यम् । मङ्क्त्वा । मङ्क्ष्यति । मिमङ्क्षति । अलीति किम् ? नशिता । मज्जनम् । मस्जेः सकारस्य स्थाने भवन्नयमागम आदेशश्च । आदेशकरणम् । मग्नः । मग्नवान् । मक्त्वा । ममाक्त इति नलोपार्थम् ।

उदितः ॥४।२।१९७॥ उदितो धातोर्नमागमो भवति प्रत्यये विषयभूते । तेन प्रत्ययोत्पत्तेः प्रागेव नमि सति यथायथं प्रत्ययो भवति । उदित्वं च हलो नोऽर्वाङ्न्युदितोरिति विशेषणार्थम् । निन्दति । नन्दति । [1]निन्दतः । [2]नन्दनः । कुण्डिता । हुण्डिता । कुण्डा । हुण्डा ।

लिपादितृफदफगुफोभशुभश्शे ॥४।२।१९८॥ लिपादीनां तृफ दफ गुफ उभ शुभ इत्येतेषां च धातूनां शे प्रत्यये परे नमागमो भवति । लिपादि—लिम्पति । लिम्पते । सिञ्चति । सिञ्चते । मुञ्चति । मुञ्चते । लुम्पति । लुम्पते । विन्दति । विन्दते । कृन्तति । कृन्तते । [3]स्कन्दति । पिंशति । तृफ—तृम्फति । दृफ—दृम्फति । गुफ—गुम्फति । उभ—उम्भति । शुभ—शुम्भति । लिपादिग्रहणं किम् ? तुदति । नुदति । तृपादीनां श्ये नस्य लुगिति तृफादीनां नम्वचनम् । श इति किम् ? लेप्ता । लेप्तुम् । लिपि पिचि मुच्लृञ् विद्लृञ् कृतै खिद पिश वृत् इति लिपादि ।

जभोऽचि ॥४।२।१९९॥ [4]जभ इत्येतस्य धातोरजादौ प्रत्यये नमागमो भवति । जम्भयति । जम्भकः । साधुजम्भी । जम्भंजम्भम् । जम्भो वर्तते । अचीति किम् ? जम्पम् । जञ्जभ्यते ।

रधः ॥४।२।२००॥ रध इत्येतस्य धातोरचि प्रत्यये नम् भवति । रन्धयति । रन्धकः । साधुरन्धी । रन्धंरन्धम् । रन्धो वर्तते । अचीति किम् ? रद्धा ।

नेटथलिटि ॥४।२।२०१॥ रध इडादावलिटि नम् न भवति । रधिता । रधिष्यति । इटीति किम् ? रन्धयति । अलिटीति किम् ? ररन्धिव । ररन्धिम । रेधिवानित्यत्र नमो लुक्लिटीति पूर्वेण सिद्धे नियमार्थं योगे लिटीट्येवेत्यवधारणे ररन्धेन्यत्र न स्यात् । रोधितेत्यादौ स्यादेव ।

रभः ॥४।२।२०२॥ रभ् इत्येतस्य लिड्वर्जितेऽजादौ प्रत्यये नम् भवति । आरम्भयति । आरम्भकः । साध्वारम्भी । आरम्भमारम्भम् । आरम्भो वर्तते । अलिटीति किम् ? आरेभे । अचीति किम् ? आरब्धा । आरभते इति तुदादित्वाच्छे न लुक् ।

लभ ॥४।२।२०३॥ लभ इत्येतस्य लिड्वर्जितेऽजादौ प्रत्यये नमागमो भवति । लम्भयति । लम्भकः । साधुलम्भी । अलिटीति किम् ? लेभे । अचीति किम् ? लब्धा । भ्वल्लभत (लभत) इति तुदादित्वाच्छेन लुक् । लभेर्न शतानि च नित्यो नुम् । लम्भतीति भावेऽपि ङित्योर्वा दर्शन इति व्यवस्थितविभाषा स्येते योगविभाग उत्तरार्थः ।

व्याङः ॥४।२।२०४॥ आङ परस्य लभेर्यि—यकारादौ—प्रत्यये नमागमो भवति । आलम्भ्या गौः । यीति किम् ? आलब्धा । आङ् इति किम् ? लम्भम् ।

स्तुताद्युपात् ॥४।२।२०५॥ उप इत्येतस्मात् परस्य लभो यकारादौ प्रत्यये परे स्तुतौ प्रशंसायां गम्यमानायां नमागमो भवति । उपलम्भ्या विद्या । उपलम्भ्यं धनम् । स्तुताविति किम् ? उपलब्धमस्माद् वपलात् किञ्चित् ।

ङ्यमि वा ॥४।२।२०६॥ लभेर्ङौ—अमि च प्रत्यये नमागमो वा भवति । अलम्भि । अलाभि । लम्भंलम्भम् । लाभंलाभम् ।

---

१. निन्दितः, क० म० । २. नन्दितः, क० म० । ३. स्विन्दति, क० म० । ४. जभ मैथुने । क० म० टि० ।

घञ्खे ओपसर्गात् ॥४।२।२०७॥ घञ्खे ञ्यमि च प्रत्यये उपसर्गात्परस्य लभेर्नमागमो भवति। प्रलम्भः। उपलम्भः। ईषत्प्रलम्भः। ईषदुपलम्भम्। दुष्प्रलम्भम्। प्रालम्भि। प्रलम्भम्। उपसर्गादिति किम्? लाभः। ईषल्लाभः। ञ्यमि नित्यार्थं घञ्खे उपसर्गादेव घञ्ख इति नियमार्थं च वचनम्।

सुदुर्भ्यः ॥४।२।२०८॥ सु दुस् इत्येताभ्यामुपसर्गाभ्यां व्यस्ताभ्यां समस्ताभ्यां ओपसर्गात्पराभ्यां परस्य लभेर्घञ् खे परे नमागमो भवति। अतिसुलम्भः। अतिदुर्लम्भः। अतिसुदुर्लम्भः। अतिसुलम्भम्। अतिदुर्लम्भम्। अतिसुदुर्लम्भम्। उपसर्गादिति किम्? सुलाभः। दुर्लाभः। सुलभम्। दुर्लभम्। अतिसुलभम्। अत्रार्थायामतिक्रमे वाऽतिः। उपसर्गादेव सुदुर्भ्य इति नियमार्थं वचनम्।

क्रीञ्तन्यक्षस्यादेर्लुग्बहुलम् ॥४।२।२०९॥ अव इत्येतस्योपसर्गस्य क्रीञ्तन्योर्धात्वोः परयोरादेर्बहुलं लुग्भवति। [1]वक्रयः। अवक्रयः। तनुषु वक्रयगेहवदम्पृहाः। वतंसः[2]। अवतंसः। वतंसयन्ति सहकारमञ्जरीम्। बहुलग्रहणं किम्? प्रयोगानुसरणार्थम्।

धाञ्नह्योः ॥४।२।२१०॥ अपि इत्येतस्योपसर्गस्य धाञ्नह्योर्धात्वोः परत आदेर्बहुलं लुग्भवति। पिहितम्। अपिहितम्। अत्र संहृताभ्यां [3]पिहितं स्तनाभ्याम्। पिनद्धम्। अपिनद्धम्। पिनद्धरत्नाङ्गदकोटिरेषः।

सम्पर्युपात्कृञस्सङ् भूषसमवाये ॥४।२।२११॥ सम् परि उप इत्येतेभ्यः परस्य कृञो भूषे भूषायामलङ्कारे समवाये समुदाये चार्थे सडागमो भवति। संस्करोति। परिष्करोति। उपस्करोति कन्याम्। भूषयतीत्यर्थः। तत्र न संस्कृतम्। तत्र न परिष्कृतम्। तत्र न उपस्कृतम्। समुदितमित्यर्थः। सम्पर्युपादिति किम्? सुकृता कन्या। कृञ इति किम्? सङ्गतम्। भूषसमवाय इति किम्? संकृतिः। संकारः। परिकृतम्। उपकरोति। संस्कृतं वचनमिति भावतो निर्देशः। सञ्चस्कार। सञ्चस्करतुः। सञ्चस्करुः। सञ्चिकीर्षति। सञ्चिकीर्ष्यते। समस्करोत्। समस्कार्षीत्। समचिस्करदित्यत्र परस्मादन्तरङ्गत्वाच्च सटि कृते पश्चाद्द्वित्वाडागमौ। प्रत्यय इति हि निवृत्तम्। संस्क्रियात्। संस्क्रियते। संस्कृषीष्टेति सटः कृआदित्वेऽपि स्मर्यते। स्मर्यात्। समरिष्टेष्ट। बादरिटोस्कृच्छृत इति स्कृग्रहणाद्वल्ग्रहणमित्यपरिग्रहान्न भवतः। सडिति डित्सकारको निर्देशः, तेन सकार एव सड् भवतीति समचिस्करदित्यादौ षिर्न भवति। परिष्करोतीत्यादौ सट्स्तु स्वञ्जामिति वचनाद्भवति।

उपाद्यधिकारप्रतियत्नवाक्याध्याहारे ॥४।२।२१२॥ प्रकृतेरन्यथाभावो विकारः। पुनर्यतते प्रतियत्नः। सतोऽर्थस्य संबन्धाय वृद्धये तावदवस्थाय वासमीहा। गम्यमानार्थस्य वाक्यैकदेशस्य स्वरूपेणोपादानं वाक्याध्याहारः। एतेष्वर्थेषु वर्तमानस्य उप इत्येतस्मादुपसर्गात् परस्य कृञः सडागमो भवति। विकारे–उपस्कृतं भुङ्क्ते। उपस्कृतं गच्छति। विकृतमित्यर्थः। प्रतियत्ने–गृहो दकस्योपस्कुरुते। काण्डः शरस्योपस्कुरुते। अत्र प्रतियतत इत्यर्थः। वाक्याध्याहारे–उपस्कृतमधीते। उपस्कृतं जल्पति। सोपस्काराणि सूत्राणि। सवाक्याध्याहाराणीत्यर्थः।[4]

किरतेर्लवने ॥४।२।२१३॥ उप इत्येतस्मादुपसर्गात्परस्य कॄ विक्षेपण इत्येतस्य धातोः सडागमो भवति लवने लवनविषयश्चेत्तदर्थो भवति। उपस्किरं मद्रका लुनन्ति। उपस्कीर्य मद्रका लुनन्ति। विक्षिप्य लुनन्तीत्यर्थः। लवन इति किम्? उपकिरति धान्यम्।

प्रतेश्च वधे ॥४।२।२१४॥ प्रतेरुपाच्चोपसर्गात् परस्य किरतेर्धातोर्वधे हिंसाविषये सडागमो भवति। प्रतिस्कीर्णं ह ते बृषल भूयात्। उपस्कीर्णं ह ते बृषल भूयात्। हिंसानुबन्धी विक्षेपस्ते भूयादित्यर्थः।

---

१. भाटको वक्रयः स्मृतः, इति हलायुधः। क० म० टि०। २. वतंसोत्तावतंसाः कर्णपूरेऽपि शेखरे, इति वैजयन्ती, क० म० टि०। ३. अपवारितं च पिहितं संवीतं संवृतं स्थगितम्, इत्यभिधानचिन्तामणिः क० म० टि०। ४. प्रतियत्नस्तु संस्कारे वीप्सोपग्रहयोरपि, इत्यभिधानम् क० म० टि०। ५. सवाक्याध्याहारीत्यर्थः क० म०। ६. कृञिमप्राद्देशात्कः क० म०।

चतुष्पथपाद्धर्षात् ॥४।२।२१५॥ अप इत्येतस्मादुपसर्गात् परस्य किरतेः सडागमो भवति । हर्षाभ्येष्यतुष्पदीविषये तदर्थो भवति । अपस्किरते वृषभः । हर्षाद्विलिख्य विक्षिपतीत्यर्थः । चतुष्पदीति किम् ? अपकिरति बालो हृष्टः । अपादिति किम् ? विकिरति वृषभः । हर्षादिति किम् ? अपकिरति श्वा हर्षादित्यत एव निर्देशाद्वेती पञ्चमी ।

वि शुनि भक्षाश्रयाय ॥४।२।२१६॥ अपात् परस्य किरतेः सड् भवति वीपक्षिणि भक्षाय शुनि चाश्रयाय चेत्तदर्थो भवति । अपस्किरते कुक्कुटः भक्षाय । विलिख्य विक्षिपतीत्यर्थः । अपस्किरति श्वा आश्रयाय । विलिख्य विक्षिपतीत्यर्थः । भक्षाश्रयायेति किम् ? अपकिरति श्वा ओदनपिण्डमाशितः ।

वौ विष्किरो वा ॥४।२।२१७॥ विष्किर इति वौ पक्षिणि शकुनावभिधेये विपूर्वस्य किरतेः कप्रत्यये पक्षे सट्(ड्) निपात्यते । विष्किरः शकुनिः, विकिरो वा । एके विष्किरः शकुनिः विकिरो वेति । [1]परे तु आहुः—विष्किरो वेति वक्तव्ये विकिरोपादान तस्यापि पक्षिण्येव प्रयोगो नान्यत्रेति प्रयोगनियमार्थम् ।

प्रास्तुम्पतेर्गवि ॥४।२।२१८॥ प्र इत्येतस्मादुपसर्गात् परस्य तुप तुम्प इत्येतस्य धातोर्गवि कर्तरि सडागमो भवति । प्रस्तुम्पति गोः । प्रस्तुम्पति वत्सो मातरम् । प्रस्तुम्पको वत्सः । गवीति किम् ? प्रतुम्पति वनस्पतिः । कपीति गवीत्यत्र पाठः । कपि हिंसायां कपि कचि वा समासान्त इत्याहुः ।

प्रादुसश्चाज्व्यस्तेष्विः ॥४।२।२१९॥ उपसर्गादिति वर्तते । उपसर्गात्प्रादुसश्च परस्यास्तेरचि यकारे च परे विकारादेशो भवति । क्विब्. सिष्विः । शर्नम इति चेहोपतिष्ठते । अभिषन्ति । निषन्ति । व्यतिषते कृत्यानि । निष्यात् । विष्यात् । प्रादुःषति । प्रादुष्यात् । प्रादुसश्चेति किम् ? दधीनि सन्ति । दधि स्यात् । अज्योति किम् ? निस्तः । प्रादुस्त । अस्तेरिति किम् ? अनुसरणम् । अनुस्तोपत्यम् । [2]अनुसेयम् ।

सूञ्सूसोस्तुस्तुभोऽटयप्यद्वेः ॥४।२।२२०॥ उपसर्गादित्येव । षुञ् अभिषवे षू प्रेरणे षो अन्तकर्मणि ष्टुञ् स्तुतौ । ष्टुभूङ् स्तम्भ इत्येतेषामद्विरूपाणा सकारस्योपसर्गात्परस्य विरादेशो भवति, न अटथागमेऽन्तरे सत्यसत्यपि षुञ्—अभिषुणोति । निःषुणोति । अभिषावयति । परिषावयन्ति । अभ्यषुणोत् । सू—अभिषुवति । परिषुवति । अभ्यषुवत् । पर्यषुवत् । सो—अभिष्यति । परिष्यति । अभ्यष्यत् । पर्यष्यत् । अभिष्टौति । प्रतिष्टौति । सुष्टुतम् । सुदुष्टवम् । व्याकरणं स्तवीमि । अभ्यष्टौत् । प्रत्यष्टौत् । स्तुभ । अभिष्टोभते । परिष्टोभते । अभ्यष्टोभत् । पर्यष्टोभत् । पर्यष्टोभत । उपसर्गादिति किम् ? दधि सुनोति । पदात् परस्याप्राप्तेर्वचनं क्विबः सः षिः शर्नम इति विनियम्यते तत्र । दिशति कर्णौषर्न प्राप्नोति[3] ग्रहणं अपिशब्दादभावार्थः । अन्यथा ह्यटयेव स्यात् । अद्वेरिति किम् ? अभिसुसूषति । अभ्यपुसूषत् । परिसुसूषति । पर्यसुसूषत् । अभिसिसोषति । अभ्यसिसोषत् ।

स्थासेनिसेधसिच्सञ्जां द्व्यटि ॥४।२।२२१॥ स्था सेनि सेध् सिच् सञ्ज् इत्येतेषामुपसर्गात्परेषां सकारस्य षिरादेशो भवति । द्वयोः सतोर्द्विभावे अटि च सत्यसत्यपि । स्था—अभिष्ठास्यति । अधिष्ठाष्ठः । अभ्यष्ठात् । अभ्यष्ठास्यत् । अनुष्ठास्यते । अनुतष्ठौ । अन्वष्ठात् । अन्वष्ठास्यत् । सेनि—सेनया अभियाति । अभिषेणयति । अभिषिषेणयिषति । अभ्यषेणयत् । अभ्यषिषेणयिषत् । सेध—प्रतिषेधति । प्रतिषिषेधिषति । प्रत्यषेधत् । प्रत्यषिषेधिषत् । सिच्—अभिषिञ्चति । सुषिक्तं नाम किं तवात्र । अभिषिषिक्षति । अभ्यषिञ्चत् । अभ्यषिक्षत् । सञ्ज—अभिषञ्जति । अभिषषञ्ज । अभिषिषङ्क्षति । अभ्यषजत् । अभ्यषिषङ्क्षत् । सेधतीत्यादिपरिग्रहः । सिध्यति निवृत्त्यर्थः । यङ्लुचस्तु ग्रहणमित्यत एव प्रतिषेधिषीति असोऽपदेशार्थं अनिजतीत्यर्थं प्रतिषेधार्थं वचनम् ।

---

१. परन्त आहुः, क० म० । २. आनुसेयम्, क० म० । ३. कर्णाषिर् इति क० म० नास्ति । ४. —तीत्यनुग्रह—क० म० । ५. कोकिलानकनिःस्वानैरकिञ्चारवजृम्भितैः । अभिषेणयतीवोच्चैर्मनोभूसूदनत्रयम् । क० म० टि० ।

स्तम्भोऽङ्प्रतिस्तब्धनिस्तब्धे ॥४।२।२२२॥ उपसर्गात्परस्य स्तम्भेः सकारस्य द्वयोरटि (सत्य) —सत्यपि षिरादेशो भवति । न चेदसौ स्तम्भःङे प्रतिस्तब्धनिस्तब्धे च भवति । विष्टम्नाति । प्रतिष्टम्नाति । वितष्टम्भ । प्रतितष्टम्भ । व्यष्टम्नात् । प्रत्यष्टम्नात् । अङ्प्रतिस्तब्धनिस्तब्ध इति किम् ? व्यतस्तम्भत् । प्रत्यतस्तम्भत् । प्रतिस्तब्धः । निस्तब्धः ।

अवाच्चालम्बनाविदूर्योः ॥४।२।२२३॥ आलम्बनमाश्रयणम् । अविदूरभावः आविदूर्यम् । औजित्यमूर्कः, एतेष्वर्थेषु वर्तमानस्य स्तम्भेरव इत्येतस्मादुपसर्गात्परस्य सकारस्य द्वयोरटि च सत्यसत्यपि षिरादेशो भवत्यङि आलम्बने । दुर्गमवष्टम्भः । दुर्गमवष्टम्नाति । अवतष्टम्भ । अवाष्टम्नात् । आविदूर्ये अवष्टब्धा, शरत् । अवष्टब्धे सेने । ऊर्जि अहो वृषलस्यावष्टम्भः । अवष्टब्धो रिपुः शूरेण । अवादिति किम् ? प्रस्तब्धः । चकारः अपि इत्यस्यानुकर्षणार्थः । अवातस्तम्भत् । आलम्बनाविदूर्योरिति किम् ? अवस्तब्धो वृषलः शीतेन ।

वेश्च स्वनोऽशने ॥४।२।२२४॥ वि इत्येतस्मादवाच्चोपसर्गात्परस्य स्वन् इत्येतस्य धातोरशनेऽर्थे वर्तमानस्य सकारस्य द्वयोरटि च सत्यसत्यपि षिरादेशो भवति । विष्वणति । विषष्वाण । विषष्वण्यते । व्यष्वणत् । अवष्वणति । अवषष्वाण । अवषष्वण्यते । अवाष्वणत् । भोजनमत्र स्वनेरर्थः । विष्वणत्यवष्वणति । भुङ्क्ते इत्यर्थः । अन्ये सशब्दं भोजनमाहुः । अपरे भोजने स्वनपेम् । अशन इति किम् ? विस्वनति । अवस्वनति मृदङ्गः ।

सदोऽप्रतेर्लोत्वादे ॥४।२।२२५॥ प्रतिवर्जितादुपसर्गात्परस्य सदेर्धातोर्द्वयोरटि सत्यसत्यपि षिरादेशो भवति लो लिटि तु द्वयोः सतोरादेर्भवति । निषीदति । विषीदति । निषाषद्यते । विषाषद्यते । न्यषीसत् । अप्रतेरिति किम् ? प्रतिषीदति । लोत्वादेरिति किम् ? परनिवृत्त्यर्थः । निषसाद । विषसाद । तुविशेषणार्थः । अन्यत्राविशेषः । लिटयेव विशेष इति ।

स्वञ्जेश्च ॥४।२।२२६॥ उपसर्गात्परस्य स्वञ्जेस्सकारस्य द्वयोरटि च सत्यसत्यपि षिरादेशो भवति लो लिटि तु द्वयोः सतोरादेरेव भवति । अभिष्वजते । परिष्वजते । प्रतिष्वजते । अभिषिष्वङ्क्षते । परिषिष्वङ्क्षते । प्रतिषिष्वङ्क्षते । अभ्यष्वजत । पर्यष्वजत । प्रत्यष्वजत । अभिषस्वजे । अभिषस्वञ्जे । प्रतिषस्वजे । प्रतिषस्वञ्जे । योगविभागादप्रतेरिति नास्ति । चकारो लोत्वादेरित्यस्यानुकर्षणार्थः ।

परिनिविभ्यः सेवँ ॥४।२।२२७॥ परि नि वि इत्येतेभ्य उपसर्गेभ्यः परस्य सेवँतेः सकारस्य द्वयोरटि च सत्यसत्यपि षिरादेशो भवति । परिषेवँते । परिषिषेविषते । पर्यषेवँत् । निषेवते । निषिषेविषते । न्यषेवत् । विषेवते । विषिषेविषते । व्यषेवत ।

सयसिते ॥४।२।२२८॥ परिनिविभ्यः परयोः सयसित इत्येतयोः सकारस्य षिरादेशो भवति । परिषयः । निषयः । विषयः । परिषितः । निषितः । विषित. । सय इति [8]सिनोतेरजन्तः । सित इति क्तान्तः । अपरे तु स्यतेरपि ग्रहणमिच्छन्ति । क्ते परिनिविभ्य एव यथा स्यादन्येभ्यो मा भूदिति नियमार्थम् । योगविभागा (त्) द्वयटि अपीति निवृत्तम् । इह न भवति । मा विषयत् । व्यसीयत् । पर्यसितायत ।

सट्स्तुस्वञ्जां धा त्वटि ॥४।२।२२९॥ परिनिविभ्यः परस्य सट्स्तुस्वञ्जोश्च धात्वोः षिरादेशो भवति । वचनभेदाद्यावासंख्याभावः । अटि तु सति वा भवति । परिष्करोति । विष्करोति[10] शकुनिः । परिष्टौति । निष्टौति । विष्टौति । परिष्वजते । विष्वजते । वा त्वटि । पर्यस्करोत् । पर्यष्करोत् । पर्यस्तौत् । पर्यष्टौत् । न्यस्तौत् । न्यष्टौत् । व्यस्तौत् । व्यष्टौत् । पर्यस्वजत । पर्यष्वजत । न्यस्वजत । न्यष्वजत । व्यस्वजत । व्यष्वजत ।

---

१. कोऽयं प्रभुरवष्टम्भी कुतस्थो (हि) कियद्बलः । बकवादित्यनासोढ्य नाभिषेण्यः कथञ्चन, क० म० टि० । २. स्वनम् क० म० । ३. सेधः, क० म० । ४. सेधतेः, क० म० । ५. परिषेधते, क० म० । ६. परिषिषेधिषते क० म० । ७. पर्यषेधत्–क० म० । ८. सिनोति— क० म० । ९. व्यसयीयत– क० म० । १०. विष्किरः–क० म० ।

स्तुस्वजिग्रहणमविकल्पार्थम् । तुशब्दो विशेषणार्थः । अधिकविकल्पो नान्यत्रेति । परिनिवेरिति किम् ? प्रतिस्कीर्णं ते वृषल भूयात् ।

सीधोसहोऽङेऽसोः ॥४।२।२३०॥ परिनिविभ्यः परस्य सीध्यतेः—असोभूतस्य च सहोऽपि षिरादेशो भवति वा स्वटि । परिषीध्यति । निषीध्यति । विषीध्यति । परिषहते । निषहते । विषहते । अटि पर्यषीध्यत् । पर्यसीध्यत् । न्यषीध्यत् । न्यसीध्यत् । व्यषीध्यत् । व्यसीध्यत् । पर्यसहत । पर्य्यषहत । न्यसहत । न्यषहत । व्यसहत । व्यषहत । अनुबन्धः किम् ? परिसेषिवीति । अटीति किम् ? मा परिसिषीवत् । पर्यसिषीवत् । मा परिसिषहते । पर्यसिषहत । परस्य कृतस्येति भवति । असोरिति किम् ? परिसोढः । परिसोढव्यः । निसोढः । निसोढव्य. । विसोढः । विसोढव्यः ।

स्यन्देर्वाऽभ्यनोश्चाप्राणिनि ॥४।२।२३१॥ अभि अनु इत्येताभ्यां परिनिविभ्यश्चोपसर्गेभ्यः परस्य स्यन्देषः षिरादेशो वा भवति अप्राणिनि अप्राणिकर्तृकश्चेदर्थो भवति । अभिष्यन्दते तैलम् । अभिस्यन्दते तैलम् । अनुष्यन्दते । अनुस्यन्दते । परिष्यन्दते । परिस्यन्दते । विष्यन्दते । विस्यन्दते । तिप्निर्देशादिह न भवति । अभिसास्यन्दीति तैलम् । प्रकृतमटि स्विदीति वा ग्रहणम् । अभ्यनोश्चेति किम् ? अतिस्यन्दते तैलम् । अप्राणिनीति किम् ? परिस्यन्दते मत्स्यः उदके । पर्युदासोऽयम् । न तु प्राणिनि प्रतिषेधः । तेनेहापि भवति । अनुष्यन्देते मत्स्योदके । अनुस्यन्देते मत्स्योदके ।

वेस्स्कन्दोऽक्तयोः ॥४।२।२३२॥ वेरुपसर्गात्परस्य स्कन्देर्धातो षिरादेशो वा भवति अक्तयोः न चेत् क्तक्तवतूपरतो भवतः, द्विवचनादुभयपरिग्रहः । विष्कन्ता । विस्कन्ता । अक्तयोरिति किम् ? विस्कन्नः । विस्कन्नवान् ।

परेः ॥४।२।२३३॥ परेरुपसर्गात् परस्य स्कन्देः षिरादेशो वा भवति । परिष्कन्ता । परिस्कन्ता । परिस्कन्नः । परिष्कन्न. । परिष्कन्नवान् । परिस्कन्नवान् । अक्तयोरितीह नापेक्ष्यते । परिस्कन्दः प्राच्यभरतेष्विति नारभ्यते । तत्र हि केचित् परिष्कन्द इति षत्वं निपातयन्ति । अन्ये परिस्कन्द इति षत्वाभावं तदुभयमिति परिग्रहो विकल्प एवायं स च परेरित्येव सिद्धः । अन्यतरनियमे वा व्यवस्थितविभाषा विज्ञायते[1] ।

स्फुरस्फुलोर्निनिः ॥४।२।२३४॥ निस् नि इत्येताभ्यां परयोः स्फुर स्फुल इत्येतयोः षिरादेशो भवति वा । निःष्फुरति । निस्स्फुरति । निष्फुरति । निस्फुरति । निस्फुलति । निष्फुलति । निष्ष्फुलति । निस्स्फुलति ।

वेः ॥४।२।२३५॥ वेरुपसर्गात्परयोः स्फुरस्फुलो. षिरादेशो वा भवति । विष्फुरति । विस्फुरति । निष्फुरति । निस्फुरति । विष्फुलति । विस्फुलति । निष्फुलति । निस्फुलति । योगविभाग उत्तरार्थः ।

स्कम्भः ॥४।२।२३६॥ वेरुपसर्गात्परस्य स्कम्भातेर्निर्यं षिरादेशो भवति । विष्कम्भाति । विष्कम्भिता । विष्कम्भितुम् । विष्कम्भः । विष्कम्भक. । धनादिर्देश. स्कम्भतेर्निवृत्त्यर्थः । विस्कम्भते । योगविभागो नित्यार्थः । अन्यथा हि वेः स्कम्नश्चेति पठ्येत ।

निर्दुस्सुषेस्समस्तिस्वपोऽवः ॥४।२।२३७॥ निस् दुस् सु वि इत्येतेभ्य उपसर्गेभ्यः परस्य समशब्दस्य सूतिशब्दस्य च स्वपेश्चावकारस्य धातोः षिरादेशो भवति । निष्षमः । दुष्षम. । सुषमः । विषमः । विष्ठूतिः । दुष्ठूतिः । सुष्ठूतिः । विष्ठूतिः । निष्ष्वप्तः । दुष्ष्वप्तः । सुष्वप्तः । विष्वप्तः । विष्वपतुः । विष्वपुः । अव इति किम् ? निस्स्वप्न । दुस्स्वप्नः । विसुष्वाप । समसूतीति प्रातिपदिकग्रहणम् । तेनेह न भवति । निस्समति । दुस्समति । निस्सूतम् । दुस्सूतम् । अन्ये धातुग्रहणमेवाहुः । तेषां निष्षमति । दुष्षमति । निष्ठूतम् । दुष्ठूतम् ।

---

१. विज्ञास्यते क० म० ।

हिनुमीनाणिनोऽदुरोऽन्तरश्च णः ॥४।२।२३८॥ दुर्वर्जितादुपसर्गादन्तःशब्दाच्च परस्य धातो-र्हिनुमीनाआनि इत्येतेषां नकारस्य णकारादेशो भवति। प्राप्नोण इति परिभाषया व्यवस्था। प्रहिणोति। प्रमीणाति। प्रयाणि। प्रवपाणि। प्रापयाणि। प्रणमति। परिणमति। प्रणयति। परिणयति। प्रणामकः। परिणामकः। अन्तर्णयति। अन्तर्णायकः। हिनुमीनानिण इति किम्? प्रनृत्यति। प्रनन्दति। नृतिनन्दिनक्षि-नदिनकिनाटिनाथृणां णोपदेशाभावाच्च भवति। प्रवपानि मांसानीत्यानीत्यनर्थकम्। लेडादेशोऽर्थवान्। अदुर इति किम्? दुर्नयः। दुर्नतम्। अन्तरश्चेति किम्? मुनिर्नयति। साधुर्नयति। प्रगतो नायकोऽस्मात् प्रनायको देशः। प्रादेरत्र प्रत्ययार्थेन योगो न धातुनेत्यनुपसर्गत्वम्। परिनदनमित्यत्र नदनशब्दस्य क्षुभ्नादिषु पाठान्न भवति।

शः ॥४।२।२३९॥ अदुर उपसर्गादन्तरश्च परस्य शकारान्तस्य धातोर्णकारादेशो भवति। प्रणश्यति। परिणश्यति। अन्तर्णश्यति। प्रणाशः। परिणाशः। प्रणाशकः। परिणाशकः। अशान्तत्वादिह न भवति। प्रनष्टः। प्रनङ्क्ष्यति। धात्प्राप्तत्वसत्त्वान्न भवति। नशेरणोपदेशत्वात्पूर्वेणासिद्धे विध्यर्थो योगः।

नेर्घुमानद्गदपत्यदिस्यतियातिवातिद्रातिप्सातिहन्तिवपिव (हि) ह्वीशमूचिञ्देग्धौ ॥४।२।२४०॥ अदुर उपसर्गादन्तरश्च परस्य नेर्घुमंज्ञे मानद् गद् पत्यदि स्यति याति वाति द्राति प्साति हन्ति वपि वहि शमू चिञ् देग्धिषु च परतो णकारादेशो भवति। प्रणियच्छति। परिणियच्छति। प्रणिदयते। परिणिदयते। प्रणिददाति। परिणिददाति। प्रणिष्यति। परिणिष्यति। प्रणिदयति। परिणिदयति। प्रणिदधाति। परिणिदधाति। प्रणिमयते। प्रणिमिमीते। प्रणिमाता। प्रणिनदति। परिणिनदति। प्रणिगदति। परिणिगदति। प्रणिपतति। परिणिपतति। प्रणिपद्यते। परिणिपद्यते। प्रणिष्यति। प्रणियाति। परिणियाति। प्रणिवाति। परिणिवाति। प्रणिद्राति। परिणिद्राति। प्रणिप्साति। परिणिप्साति। प्रणिहन्ति। परिणिहन्ति। प्रणिवपति। परिणिवपति। प्रणिवहति। परिणिवहति। प्रणिशाम्यति। परिणिशाम्यति। प्रणिचिनोति। परिणिचिनोति। प्रणिदेग्धि। परिणिदेग्धि। अन्तर्णिदेग्धि। तिङ्निर्देशो यङ्ङ्लुङ्निवृत्त्यर्थः। तेन प्रनिसासाति प्रनिसासेति इत्यादौ न भवति। अन्यत्र भवति। प्रणिदादाति। प्रणिमामाति। प्रणिआगदीति। मा इति मेङ्माङोर्ग्रहणम्। मारूपेण धातूपलक्षणाद्घुसाहचर्यान्मानेस्य। प्रनिमाता। प्रण्यमादित्यादावडागमो धातुभक्त इति भवति। प्रण्यास्यतीत्यादावाङ्यत्तरप्रतिषेधाभावाद् भवति। उपसर्गादिति किम्? वारि निदधाति।

शेषेऽप्यान्तकखपाठे वा ॥४।२।२४१॥ शेषे भ्वादिभ्योऽन्यस्मिन् धातौ पाठे धातूपदेशेऽप्यान्ते-ऽकखादौ परेऽदुर उपसर्गादन्तरश्च परस्य नेर्णकारादेशो वा भवति। प्रणिपचति। प्रनिपचति। परिणिपचति। परिनिपचति। प्रणिभिनत्ति। प्रनिभिनत्ति। परिणिभिनत्ति। परिनिभिनत्ति। अन्तर्णिभिनत्ति। अन्तर्निभिनत्ति। शेष इति किम्? प्रणिदयते। प्रणिमयते। घुमा नद्गदपत्यदिग्रहणं यङ्ङ्लुचि सावकाशम्। अप्यान्तकखे इति किम्? प्रनिपिनष्टि। प्रनिकरोति। प्रनिखनति। पाठ इति किम्? प्रनिसासाति। प्रनिपापचीति। प्रनि-चकार। प्रनिचखाद। प्रनिपेदयति। अत्रायं विधिर्न भवति। प्रणिवेष्टा। प्रनिवेष्टा। प्रणिदेष्टा। प्रनिदेष्टा।

परेरनितेः ॥४।२।२४२॥ परेरुपसर्गात्परस्यानितेर्धातोर्णकारादेशो भवति वा। पर्यणिति। पर्यनिति। परेरिति किम्? प्राणिति। अनित इति दैवादिकोऽस्तीति ति(त्)निर्देशः। नित्यापवादोऽयम्।

अन्ते च ॥४।२।२४३॥ अदुर उपसर्गादन्तरश्च परस्यानितेर्नकारस्य पदस्यान्तेऽनन्ते च वर्तमानस्य णकारादेशो भवति। प्राणिति। पराणिति। हे प्राण्। हे पराण्। हे पर्यण्। अन्त.क्षुभ्नादीनामिति निषेधा-दन्तेन विकल्पविधिरिति परेरप्यन्तेऽप्यनेन विधिः। पर्यनिति पर्यनित्येवैके तत्र नम् प्रवलेषेवापरे रनितेरन्ते चेत्येक एव योगः। अन्तेविधानं प्रतिषेधबाधनार्थम्। अत एवान्त इति पदान्तो गृह्यते।

---

१. दिह उपदेहे क० म० टि०। २. मान्यस्य क० म०। ३. प्रण्यदा–क० म०। ४. कखि क० म०। ५. खीति क० म०। ६. धोऽन्यकर्मणि, एधोऽर्थाः यङ्ङ्लुक्। द्विः। पश्चात् क्रियार्थो धातुः। क० म० टि०।

ह्रयोः ॥४।२।२४४॥ अदुर उपसर्गादन्तरश्च परस्य अनितेर्द्वयोर्नकारयोर्णकारादेशो भवति। प्रत्येकम्। प्रणिणिषति। पर्यणिणिषति। प्राणिणत्। पर्यणिणत्। प्राणिणिनिषत्। इचुल्लुप्ताविति प्रतिषेधात्परस्य न प्राप्नोतीति वचनम्। परिपूर्वस्य पक्षे अप्राप्तिस्तदर्थं च।

ह्नः ॥४।२।२४५॥ अदुर उपसर्गादन्तरश्च परस्य हन्तेर्नकारस्य णकारादेशो भवति। प्रहण्यते। पराहण्यते। निर्हण्यते। परिहण्यते। प्रहणनम्। पराहणनम्। अन्तर्हणनम्। प्रघ्नन्ति। प्रघानीत्यत्र घि घ्न इति प्रतिषेधान्न भवति।

म्वि वा ॥४।२।२४६॥ अदुर उपसर्गादन्तरश्च परस्य हन्तेर्मकारवकारयोः परतो णकारादेशो वा भवति। प्रहण्व.। प्रहण्म.। प्रहन्वः। प्रहन्मः। प्राहण्वहे। प्राहन्वहे। प्राहण्महे। प्राहन्महे। अन्तर्हण्वः। अन्तर्हन्वः। अन्तर्हण्मः। अन्तर्हन्मः।

न देशेऽन्तरोऽयनघ्नः ॥४।२।२४७॥ अन्तर इत्येतस्मात्तरस्याऽयनशब्दस्य हन्तेश्च नकारस्य णकारादेशो न भवति देशाभिधाने। अन्तरयनो देशः। अन्तर्हणनो देशः। देश इति किम्? अन्तरयणं वर्तते। अन्तर्हणनं वर्तते। अन्तर्हण्यते। अन्तर इति किम्? प्रायणो देशः। प्रहणनो देशः। अयनघ्न इति किम्? अतर्नमनो देशः।

निंसनिक्षनिन्दः कृति वा ॥४।२।२४८॥ अदुर उपसर्गादन्तरश्च परेण निंसनिक्षनिन्दा धातूना कृति परे णकारादेशो भवति वा। प्रणिंसनम्। प्रनिंसनम्। प्रणिक्षणम्। प्रनिक्षणम्। प्रणिन्दनम्। प्रनिन्दनम्। कृतीति किम्? प्रणिंस्ते। प्रणिक्षति। परिणिक्षति। प्रणिन्दति। परिणिन्दति। हिनुमी(ने)नीति नित्यमेव भवति।

अपोऽचोऽभाभूपूज्कम्गम्प्यायिवेपः ॥४।२।२४९॥ कृतीति वर्तते। अपकारान्ताददुर उपसर्गादन्तरश्च परात् भा भू पूज् कम् गम् प्यायि वेप इत्येतद्वर्जिताद्धातोः परस्य कृत्प्रत्ययस्यस्य नकारस्याच. परस्य णकारादेशो भवति। प्रयाणम्। परियाणम्। निर्यागम्। प्रयायमाणम्। परियायमाणम्। प्रयाणीयम्। परियाणीयम्। अप्रयाणिः। अपरियाणि.। प्रयायिणो। परियायिणो। प्रहीण.। परिहीणः। अप इति किम्? निष्पानम्। अच इति किम्? प्रजग्न। निर्भुग्न। अभा भू पूज् कम् गम् प्यायि वेप इति किम्? प्रभानम्। प्रभवनम्। प्रकमनम्। प्रगमनम्। प्राप्यायनम्। प्रवेपनम्। पूनिति प्रकारानुबन्धोपादानाद् इकारानुबन्धस्य भवति। प्रपवणम्। प्रपवमाण.। कृतीति किम्? प्रवापेन।

नमीजादेरेव ॥४।२।२५०॥ अपान्ताददुर उपसर्गादन्तरश्च परस्य धातोर्न नमि सति इजादेरेव भादिवर्जिताक्तस्थस्य नकारस्याच. परस्य णकारादेशो भवति। प्रेङ्खणम्। परेङ्खणम्। प्रेङ्गणम्। परेङ्गणम्। नमीति किम्? नम्यमति नियमो नास्ति। प्रवपणम्। इजादेरिति किम्? प्रमङ्क्तनम्। प्रमङ्क्तनम्। एवकार इष्टावधारणार्थो नम्येवेजादेरिति हि नियमे इह णो न स्यात्। प्रेहणम्। प्रोहणम्। प्रेन्धनमित्यत्र इचुल्लुप्ताविति प्रतिषेधान्न भवति। पूवण प्राप्ते नियमार्थं वचनम्। ण्यन्तादुत्तरेण विकल्पो भवत्येव। प्रमङ्क्तणा, प्रमङ्क्तनेति। अत एव नियमाज्ज्ञपीति विधेरसत्त्वम्।

णिहलिजुपान्त्याद्वा ॥४।२।२५१॥ हण्यन्ताद्धल. परो य इच् तदुपान्त्याच्च धातोर्भादिवर्जिताक्तस्थस्याचः परस्य नकारस्यापकारान्तोपसर्गस्यान्निमित्तात्परस्य णकारादेशो वा भवति। प्रयापणम्। प्रयापनम्। प्रयाप्यमाणम्। प्रयाप्यमाणनम्। प्रयापणीयम्। प्रयापनीयम्। अप्रयापणिः। अप्रयापनिः। प्रयायिणः। प्रयायिनः। हलिजुपान्त्यात् प्रकोपणम्। प्रकोपनम्। प्रकोप्यमाणम्। प्रकोप्यमानम्। हल्ग्रहणं किम्? प्राहणम्। पराहणम्। इजुपान्तस्य हकन्तस्याद्यभिचारादूनः परो य इच् तदुपान्त्यादिति सम्बध्यते। इजुपान्त्यादिति किम्? प्रवपणम्। परिवपणम्। अप इति किम्? निष्पापनम्। दुष्पापनम्। अभादेरिति किम्? प्रभापना। प्रभावना। प्रपावना। प्रकावना। प्रगमना। प्राह्वायना। प्रवेपना। उभयत्र विभाषेयं नम्यनिजादेरप्राप्तेरन्यतः प्राप्ते।

निर्विण्णः ॥४।२।२५२॥ निर्विण इति निष्पूर्वाद्विदेः सक्ताक्तभविचारार्थात्परस्य क्तनकारस्य णकारादेशो निपात्यते । निर्विण्णः प्राव्रज्यापिता ।

रोलोऽयौ ॥४।२।२५३॥ उपसर्गादिति वर्तते । उपसर्गादयि गतौ परे उपसर्गस्य रेफस्य लकारादेशो भवति । प्लायते । पलायते । पल्ययते । अया इति किम् ? प्रायः । परायः । इणोऽय्, अस्यायादेशे कृतेऽयतिरूपस्य लाक्षणिकत्वात्पाठ इत्यविकाराच्च । अयिवयीति प्रतिपदोक्तं गृह्यते ।

निष्प्रतेर्वा ॥४।२।२५४॥ निस् प्रति इत्येतयो रेफस्यायतौ परे लादेशो वा भवति । निलयनम् । निलयते । निरयणम् । निरयते । प्रत्ययते । प्रत्ययते । दुलयनम् । दुलयत इति दुरः—दुरयनम् । दुरयते इति । दुस—दुसः दुष्टं दुस्थितमित्येवमर्थं हीमौ द्वावप्यभ्युपगम्येते ।

परेर्याङ्क्वयोगे ॥४।२।२५५॥ परे रेफस्य च अङ्क्वयोग इत्येतेषु परतो लादेशो वा भवति । परिघः । पलिघः । पल्यङ्कः । पर्यङ्कः । पलियोगः । परियोगः ।

ऊश्रर्फिडादीनाम् ॥४।२।२५६॥ ऋफिडादीनां रेफस्य ऊकारस्य च लकारादेशो वा भवति । लृफिडः । ऋफिडः । लृतकाः । ऋतकाः । कपिलकः । कपिरकः । तेल्पिरीकं तेल्पिरीकं (?) लोमानि । रोमाणि । पामुलम् । पामुरम् । कल्मः । कर्मः । इस्य—ऋफिलः । ऋफिडः । चूडा । चूला । पोला । पोडा । वलिशम् । वडिशम् । पुलिनम् । पुडिनम् । अज्भागमध्यगतरेफ ऋवर्णः प्रतिज्ञायते । अज्भागमध्यगतलकारश्च लृवर्णः । तत्र ऋवर्णरेफस्य लकारे कृते लृवर्णः सम्पद्यते । धातुरित्यनुवर्तमानमपीहाग्रहणान्न सम्बध्यते । ऋपिडादयः शिष्टप्रयोगादनुसर्तव्याः ।

ग्रोऽचि ॥४।२।२५७॥ ग्रॄ इत्येतस्य धातोर्विहितेऽचिच्य अजादौ प्रत्यये परे रेफस्य लकारादेशो भवति वा । निगिलति । निगिरति । निगलनम् । निगरणम् । निगालकः । निगारकः । अचीति किम् ? निगीर्णम् । निगीर्यते । निगाल्यते । निगार्यते—इत्यत्रान्तरङ्गत्वाल्लत्वे कृते णिलुक् । गिरो गिर इत्यत्र न धातोः प्रत्यय इति न भवति ।

यङि ॥४।२।२५८॥ वेति निवृत्तम् । ग्रो यङि रेफस्य लकारादेशो नित्यं भवति । निजेगील्यते । निजेगील्यते । निजेगील्यन्ते ।

गरगलं विषप्राण्यङ्गे ॥४।२।२५९॥ गर गल इति विषे प्राण्यङ्गे च यथासंख्यं लत्वाभावो लत्वं च निपात्येते । गरो विषम् । गलः प्राण्यङ्गम् । नियमार्थमिदम् । विषे गर एव । प्राण्यङ्गे गल एवेति वदीशे (?) तूभयं दृश्यते गरो गल इति च ।

कृपोऽकृपीडादिषु ॥४।२।२६०॥ कृपेर्धातो रेफस्य कृपीडादिवर्जितेषु शब्देषु लकारादेशो भवति । क्लृप्तः । क्लृप्तवान् । विक्लृप्तति । अविक्लृपत् । कल्पते । कल्पिता । कल्पकः । अकृपीडादिष्विति किम् ? कृपीडाः । कृपणः । कृपाणः । कर्पूरः ।

आदेर्ण्योऽव्यक्तष्ठाष्ठीवस्त्नम् ॥४।२।२६१॥ पाठ इति वर्तते । व्यक्तष्ठाष्ठीवृवर्जितस्य धातोः पकारस्य णकारस्य च धातुपाठे आदिभूतस्य यथासंख्यं सकारो नकारस्यादेशो भवतः । सही—(हि)सहते । सिचि—सिञ्चति । सिञ्—नयति । सम्—नमति । आदेरिति किम् ? प्रणिलयति । प्रनिरेक्ष्यति । प्रनिपिनष्टि । वणति । मणति । अव्यक्तष्ठाष्ठीव इति किम् ? व्यक्तते । ष्ठायति । ष्ठीवति । पाठ इति किम् ? षोडीयति । णकारीयति । अवर्णस्यपरसादस्सृवि सृजि स्यास्तु सृष्टेकु वर्जः स्मिवच्च सत्वव्यवस्थार्थं ष्विव्यव्यक्तष्ठायतिवत् षादयः पठ्यन्ते । नदिनाटिनाथृवर्जणादयः पठ्यन्ते । नात्वव्यवस्थार्थम् । नृति नशि नदि नन्दि -नक्कि तन्नेदं स्नात्वविधानम् ।

इति श्रीभगवत्पाणिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने वृत्तौ चतुर्थस्याध्यायस्य द्वितीयः पादः समाप्तः ।४।२।

■

[तृतीयः पादः]

तास्त्यौ लुलोः ॥४।३।१॥ धातोरिति वर्तते। तदेतत्प्रभृति पञ्चम्यन्तं वेदितव्यम्। लुलोरिति सप्तमी। धातोः लुङ् इत्येतयोः परतो यथासंख्यं मध्ये तास् स्य इत्येतौ प्रत्ययौ भवतः। लृ इति लृटो ग्रहणम्। लुङि स्यादेरपवादः। लृ इति लृङ्लृटोः सामान्येन ग्रहणम्। श्वः कर्त्ता। कर्त्तारौ। कर्त्तारः। कर्तासि। कर्तास्थः। कर्तास्थ। करिष्यति। अकरिष्यत्।

सिर्लुङि ॥४।३।२॥ धातोर्लुङि परे मध्ये सिप्रत्ययो भवति। अकार्षीत्। अहार्षीत्।

दृपादेर्वाऽस्तृपः ॥४।३।३॥ दृप इत्येवमादिभ्यः सृपिवर्जितेभ्यो लुङि परे मध्ये सिः प्रत्ययो वा भवति। क्सङोरपवादः। दृप् तृप् सृप् कृषि स्पृ भ्मृशो वेति सूत्रोपात्ताः, दृपादयः। अदृपत्। अदार्प्सीत्। अद्राप्सीत्। अतृपत्। अतार्प्सीत्। अत्राप्सीत्। अकृक्षत्। अकार्क्षीत्। अक्राक्षीत्। अस्पृक्षत्। अस्पार्क्षीत्। अस्प्राक्षीत्। अमृक्षत्। अमार्क्षीत्। अम्राक्षीत्। असृप इति किम्? असृपत्।

इक.शलोदशः क्सो नेट् चेत् ॥४।३।४॥ इकः परो यः शल् तदन्ताद्धातोर्दृशिवर्जिताल्लुङि परे मध्ये क्सः प्रत्ययो भवति न चेत्तस्य क्सस्येड्भवेत्। लिह्—अलिक्षत्। अलिक्षताम्। अलिक्षन्। द्विष्—अद्विक्षत्। अद्विक्षताम्। अद्विक्षन्। दुह्—अधुक्षत्। अधुक्षताम्। अधुक्षन्। इक इति किम्? अधाक्षीत्। अतौक्षीत्। शल इति किम्? अभैत्सीत्। अदृश इति किम्? अद्राक्षीत्। नेट् चेदिति किम्? अकार्षीत्। अमार्षीत्। विकल्पितेटो यदेड्भवति तदा न भवति। न्यगूहीत्। यदा न भवति तदा भवत्येव। न्यधुक्षत्।

श्लिषः ॥४।३।५॥ श्लिषेर्धातोर्लुङि क्सो भवति न चेत्तस्येड् भवति। आश्लिक्षत् कन्यां देवदत्तः। नेट् चेदिति किम्? उषू श्लिषू प्रषू प्लुषू दाहे। अश्लेषीत्। श्लिषोऽस्य पुष्यादित्वात्—अतङे ङा क्सस्य बाधितत्वात्। आँश्लेषि कन्या देवदत्तेनेत्यत्र तूत्तरो अिर्भवत्येव।

नानालिङ्गने ॥४।३।६॥ आलिङ्गनमुपगूहनं परिष्वङ्गनं परिरम्भणम्। अनालिङ्गनेऽर्थे वर्तमानाच्छिषेर्धातोः क्सप्रत्ययो न भवति पूर्वाभ्यां योगाभ्यां प्राप्तः प्रतिषिध्यते। उपाश्लिषज्जतु काष्ठम्। समाश्लिषमुरु कुलम्। समाश्लिष्टा. प्लक्षा न्यग्रोधेन। अनालिङ्गन इति किम्? आश्लिक्षत् कन्या देवदत्तः। अश्लिक्षन्त कन्या देवदत्तेन। आलिङ्गन इत्युच्यमाने अिशाखा विज्ञायेत न क्सनियम इति प्रतिषेधवचनम्।

कम् श्रीद्रुस्रुणेर्ङः कर्तरि ॥४।३।७॥ कम् श्रि द्रु स्रु इत्येतेभ्यो ण्यन्तेभ्यश्च धातुभ्यः कर्तरि लुङि परे मध्ये ङप्रत्ययो भवति। अचकमत्। अशिश्रियत्। अदुद्रुवत्। असुस्रुवत्। णेः—अचीकरत्। अजीहरत्। अचीकमत्। अजीहरत्। अचीकरत्। कटः स्वयमेव। कमिग्रहणमणिङन्तार्थम्। कर्तरीति किम्? अकमिषाताम्। अकारयिषातां कटो देवदत्तेन।

धेट्श्वेर्वा ॥४।३।८॥ धेटः श्वयतेश्च कर्तरि लुङि परे मध्ये ङप्रत्ययो वा भवति। अदधत्। अधात्। अधासीत्। अशिश्वियत्। अश्वत्। अश्वयीत्। अजरत्। अजारीत्। गृज्धेरचि पृथगुपादानसामर्थ्यान्न लुग्न भवति। केचिदाहुः—ग्रुचिग्रुक्ष्वोरर्थभेदात्। द्वयोरप्यर्थयो रूपद्वयार्थमुपादानमिति तेषां लुग्भवत्येव।

---

१. ह्वो गतेऽनागतेऽह्नि श्वः परश्वस्तु परेऽहनि—इत्यमरः। क० म० टि०। २. अताङ्क्षीत् क० म०। ३. अकोषीत्। अमोषीत् क० म०। ४. वनम्, आश्लेषीति कन्या क० म०। ५. ग्रुचिग्रुक्ष्वोः क० म०।

ऋदितोऽङ्क्ति ॥४।३।१०॥ ऋदितो धातोः कर्तरि अतङि लुङि परे मध्येऽङ्प्रत्ययो वा भवति। अरधत्। अरौत्सीत्। अभिदत्। अभैत्सीत्। अच्छिदत्। अच्छैत्सीत्। पर्यविशत्। पर्यविक्षत्। अतङीति किम्? अरद्ध। अभित्त। अच्छित्त।

सर्तिशास्तिच्छिद्युत्पुष्यादेः ॥४।३।११॥ सर्तिशास्तिभ्यो लुदितः द्युतादिभ्यः पुष्यादिभ्यश्च कर्तर्यतङि लुङि परेऽङ्प्रत्ययो भवति। असरत्। असिषत्। लुदिद्भ्यः—अगमत्। असूषत्। अशकत्। आपत्। द्युतादिभ्यः—अद्युतत्। द्युतादयो युद्भ्यो लुङि इत्यत्रोदाहृताः। पुष्यादिभ्यः, पुष्—अपुषत्। शुष—अशुषत्। तुष्—अतुषत्। दुष—अदुषत्। विलप—उपाविलपत् अतु च काशकृत्स्न। शक—अशकत्। ष्विदा—अस्विदत्। क्रुध—अक्रुधत्। क्षुध्—अक्षुधत्। शुध—अशुधत्। षिधू—असिधत्। शमू—अशमत्। दमू—अदमत्। तमू—अतमत्। श्रमू—अश्रमत्। भ्रमू—अभ्रमत्। क्षमू—अक्षमत्। क्लमू—अक्लमत्। मदै—अमदत्। असू—आस्यत्। यसू—अयसत्। जसू—अजसत्। तसू—अतसत्। दसू—अदसत्। वसू—अवसत्। प्लुङ्—अप्लुषत्। पुस—अपुसत्। कुस्—अकुसत्। बुस—अबुसत्। मुस—अमुसत्। मसै—अमसत्। लुट—अलुटत्। उच—औचत्। मृष्—अमृषत्। भ्रश—अभ्रशत्। वृश—अवृशत्। कृश—अकृशत्। जितृष्—अतृषत्। हृष—अहृषत्। रुष—अरुषत्। विष—अदिषत्। कुप्—अकुपत्। गुप्—अगुपत्। युप—अयुपत्। कप—अकपत्। लुर—अलुरत्। लुभ—अलुभत्। क्षुभ—अक्षुभत्। णभ्—अनभत्। तुभ्—अतुभत्। कत्रोडी—अकत्रोडत्। मिमिदा—अमिदत्। मिमिदा—अमिदत्। ऋदृ—आर्दत। गुधू—अगुधत्। रध—अरधत्। नश्—अनशत्। तृप—अतृपत्। दृप—अदृपत्। द्रुह—अद्रुहत्। मुह—अमुहत्। ष्णुह—अष्णुहत्। ष्णिह—अस्निहत्। वृत्। ब्येन निर्देशः किम्? अपौषीत्। अकृत्। अक्षापीत्। पौषतिपुष्णात्यादिभ्यो न भवति। तङ्गेति किम्? व्यद्योतिष्ट। व्यत्यक्षत। योगविभागो नित्यार्थः।

वक्थक्षसूख्यातेः ॥४।३।१२॥ वक्तीति वच भाषणे ब्रूञादेशश्च, असू क्षेपणे, ख्यातीति ख्या प्रकथने चक्षादेशश्च। एतेभ्यो धातुभ्यः कर्तरि लुङि अङ्प्रत्ययो भवति। अवोचत्, अवोचत। पर्यस्थित, पर्यस्थेतां कुण्डे स्वयमेव। आख्यत्। आख्यत। असूग्रहणं तङर्थम्। अतङि पुष्यादित्वात्सिद्धम्। तिब्निर्देशो यङ्लुग्निवृत्त्यर्थम्। अवाचचीत्। अचाख्यासीत्। इनिर्देशोऽदाद्यनदाद्योरनादेरित्यस्यानित्यत्वात्। क्थाग्रहणमस्त्यादेशार्थम्। अभूत्। ओसोऽचेवादिधातुरिति तन्निवृत्त्यर्थमित्येके।

लिप्सिचृह्रार्तेः ॥४।३।१३॥ लिप्सिच् हृ इति इत्येतेभ्यो धातुभ्यः कर्तरि लुङि परे मध्येऽङ्प्रत्ययो भवति। अलिपत्। असिचत्। आहृत्। आरत्। योगविभाग उत्तरार्थः।

तङि वा ॥४।३।१४॥ लिप्सिच्हार्तिभ्यो धातुभ्यः कर्तरि लुङि तङि परेऽङ्प्रत्ययो वा भवति। अलिपत्। अलिप्त। असिचत्। असिक्त। आहृत। आहार्स्त। समारत। समार्ष्ट। पूर्वेण नित्ये प्राप्ते विकल्पः।

दिप्पूरञ्जुधताय्प्याय्स्ते जिः ॥४।३।१५॥ दिप् पूर जन बुध ताय् प्याय् इत्येतेभ्यः कर्तरि लुङि तङि ते परे जिप्रत्ययो वा भवति। अदीपि। अदीपिष्ट। अपूरि। अपूरिष्ट। अजनि। अजनिष्ट। अबोधि। अबुद्ध। अतायि। अतायिष्ट। अप्यायि। अप्यायिष्ट। त इति किम्? अदीपिषाताम्। अदीपिषत। कर्तरीति किम्? अदीपि भवता। तङीति किम्? बुधि बोधने—अबोधिष्ट यूयम्।

पदः ॥४।३।१६॥ पदेर्धातोर्जिप्रत्ययो भवति कर्तरि लुङि ते परे। उदपादि भैक्षम्। समुदैपादि सत्यम्। त इति किम्? उदपत्साताम्। उदपत्सत। योगविभागो नित्यार्थः।

कर्मभावे ॥४।३।१७॥ धातोः कर्मणि भावे च लुङि ते परे मध्ये जिप्रत्ययो भवति। अकारि कटो देवदत्तेन। अहारि भारो देवदत्तेन। आशि भवता। अशायि भवता।

---

१. क्थाग्रहणेऽस्त्यादेशार्थः, क० म०। २. आ (अ) सोस्वेचादिधातुरस्ति तन्निवृत्त्यर्थमित्येके, क० म०। ३. समचादि, क० म०।

हन्दृशिग्रहज्यव्यस्तितास्त्यसटां झिङ् वा ॥४।३।१८॥ हन् दृशि ग्रह इत्येतेभ्योऽन्तेभ्यश्च धातुभ्यो विहितानां कर्मभावविषयाणां सि तास् स्य सट् इत्येतेषां प्रत्ययानां झिङागमो भवति वा। हनः सेः–अहनिषाताम्। अवधिषाताम्। अहसाताम्। दृशः–अदर्शिषाताम्। अदृक्षाताम्। ग्रहः–अग्राहिषाताम्। अग्रहिषाताम्। अचः–अचायिषाताम्। अचेषाताम्। अदायिषाताम्। अदिषाताम्। अशामिषाताम्। अशमयिषाताम्। अशमिषाताम्। तासः, हनः–घातिता। हन्ता। दृशः–दर्शिता। द्रष्टा। ग्रहः–ग्राहिता। ग्रहीता। अचः–चायिता। चेता। दायिता। दाता। शमिता। शमयिता। स्यस्य, हनः–घानिष्यते। हनिष्यते। अघानिष्यत। अहनिष्यत। दृशः–दर्शिष्यते। द्रक्ष्यते। अदर्शिष्यत। अद्रक्ष्यत। ग्रहः–ग्राहिष्यते। ग्रहीष्यते। अग्राहिष्यत। अग्रहीष्यत। अचः–चायिष्यते। चेष्यते। अचायिष्यत। अचेष्यत। दायिष्यते। दास्यते। अदायिष्यत। अदास्यत। शामिष्यते। शमयिष्यते। शमिष्यते (अशामिष्यत), अशमयिष्यत। अशमिष्यत। सटः, हनः–घानिषीष्ट। वधिषीष्ट। दृशः–दर्शिषीष्ट। दृक्षीष्ट। ग्रहः–ग्राहिषीष्ट। ग्रहिषीष्ट। अचः–चायिषीष्ट। चेषीष्ट। दायिषीष्ट। दासीष्ट। शामिषीष्ट। शमिषीष्ट। शमयिषीष्ट। हन्दृशिग्रहज्यः इति किम्? अपरिषाताम्। अवधिषाताम्। कारिता। करिष्यते। कारिष्यते। (६) त्यत्र नित्यत्वादरादेशे कृतेऽपि तास्त्यावत्र एव विहिताविति झिङ् भवति। तास्त्यसटामिति किम्? चेच्ये। चीयते। कर्मभाव इति किम्? आहत। अचेष्ट। बहुवचनाद्यासङ्ख्याभावः। यदि स्यात्लावादेकवचनेन निर्दिश्येत्। उभयत्र बहुवचनम्। हनादिभ्यः स्यादीनां सर्वेषां झिङर्थम्। तेन घातिषीष्टेति वधादेशो न भवति। यदि स्यात्त झिङ्विधानमनर्थकं स्यात्। ङित्त्वमेङ्निवृत्त्यर्थम्। झिप्रदेशा एकशेषः। पूर्वस्मिन्नीति सिरपि स्यात्।

श्लेले यक् ॥४।३।१९॥ धातोः कर्मणि भावे च वर्तमाने शि शिदादौ ले ले लेट् लेङि लङ् लडि च प्रत्यये परे मध्ये यक्प्रत्ययो भवति। क्रियता कटः। क्रियेत कटः। क्रियते कटः। अक्रियत कटः। अक्रियेता कटौ। अक्रियन्त कटाः। आस्यता भवता। आस्येत भवता। आस्यते भवता। आस्यत भवता। शिदग्रहणमुत्तरार्थम्। श्लेले इति किम्? चक्रे। कृषीष्ट। शिश्ये। शयिषीष्ट।

कर्तरि शप् ॥४।३।२०॥ धातोः कर्तरि वर्तमाने श्लेले परतो मध्ये शप्प्रत्ययो भवति। पारयः। पारयः। अङ्गमेजयः। धनमेजयः। श्लायतु। श्लायेत्। श्लायति। अश्लायत्। जयतु। जयेत्। जयति। अजयत्। कर्तरीति किम्? पच्यते। उत्तरार्थं च। श्लेले इति किम्? पपाच। पच्यात्। पक्तासि। पक्ष्यति। अपक्ष्यत्। अपाक्षीत्। अत्र तासादिर्यकि सावकाशः। परत्वाच्छप्प्रभृतिभिर्बाध्यते।

हृदादेः श्लुश्लुक् ॥४।३।२१॥ हु इत्येवमादिभ्योऽदादिभ्यश्च परस्य कर्तरि श्लेलेविकरणस्य शपोऽन्यस्य वा यथासङ्ख्यं श्लुप् लुक् च। शिल्लोपो बाधकमित्यो भवति। जुह्वानः। जुहोतु। जुहुयात्। जुहोति। अजुहोत्। अत्ति। हन्ति। बाभ्राष्टि। त्वात्वष्टि। कति हु निघ्नानाः। हुञि, ञिभि, ह्वो, पॄ भॄ, भु, ओहाक्, ओहाङ्, माङ्, टुदुभृञ्, डुदाञ्, डुधाञ्, णिजृञ्, विजृञ् इति ह्वादयः। अद, विदि, हन, अस, मृजो, वच, रुद, ञिष्वप, अन, श्वस्, जक्ष, जागृ, दरिद्रा, चकासृ, शासु, सस्रु, शस, वस, घृ, सु, तु, कु, रु, टुक्षु, क्षु, स्नु, णु, यू, इण्, इक, वि, या, वा, भा, ष्णा, श्रा, द्रा, प्सा, पा, रा, ला, दाङ्, ख्या, प्रा, मा, चर्करीतिश्च, अङिङिदितः। चक्षि, ईरि, ईटि, ईशि, आसि, वसि, आङः शासुङ् कुसुङ्, णिजुङ्, विजुङ्, पृजुङ्, पृचैङ्, पृङो, शीङ, इङ्, ह्रुङ, द्विषी, द्रुही, दिहो, लिहो, उर्णुञ् ष्टुञ्, ब्रूञ्, इत्यदादयः।

दिवादेः श्यः ॥४।३।२२॥ दिवादिभ्यो धातुभ्यः कर्तरि श्लेले परे मध्ये श्यप्रत्ययो भवति। दीव्यतान्यः। दीव्यतु। दीव्येत्। दीव्यति। अदीव्यत्। दिवू, षिवू, स्रिवू, ष्णसू, कसृ, प्यूस, नृतॅ, त्रसॅ, कुथ, पुथ, गुध, क्षिप, पुष्यति, म–ष्टिम, ष्टीम, ष्टील, इष, पुह, राध वृद्धौ, ष्यध, पुष्, शुष्, तुष्, दुष्, श्लिष, शक मर्षणे, ष्विदा, क्षुध्, शुध्, शिधू, शमू, दमू, तमू, भ्रमू, क्षमू (क्रमू),

---

१. पपच, क० म०।

वस्नू, मदै, अस्नू, यस्नू, जस्नू, तस्नू, दस्नू, वस्नू, प्लुषू, घुषू, पुस्नू, विस, कुस, वुस, नुस, मसै, लुट, वच, भृषू, भ्रषू, म्लक्ष, वृष, कृष, मितृष, हृष, रुष, दीप, कुप, गुप, युप, रुप, लुप, क्षुभ, क्षुभ, णभ, तुभ, त्रिकडी, त्रिभिदा, त्रिक्विदा, ऋधू, गृधू, रध, नक्ष, तृप, दृप, दृह, मुह, ष्णुह, ष्णिह, वृत्, जृष्, भ्रू, शो, छो, षो, वनैङ्, काशि, पूरैङ्, तूरैङ्, धूरैङ्, जूरैङ्, डूरैङ्, गूरैङ्, घूरैङ्, चूरैङ्, तपि ऐश्वर्ये, वा वृतूङ् वरणे, दिल, वली, वाशि, पदि, विदि, युधि, बुधि, मनि, यनि, अनो रुधि, काशे, मुधि, सुधि, लिधि, पृङी, वृङ्, दीङ्, धीङ्, मीङ्, रीङ्, लीङ्, ब्रीञ्, वृत्, पीङ्, ईङ्, प्रीङ्, मृषी, शू, वृञ्, जही, रज्जी, शपि इति दिवादयः ।

आशम्लाशभ्रमिक्रमित्रसिभ्रुटिक्षयो वा ॥४।३।२३॥ आश, म्लाश भ्रमि क्रमि त्रसि भ्रुटि क्षय इत्येतेभ्यो धातुभ्यः कर्तरि श्लेले परे मध्ये श्यप्रत्ययो वा भवति । आश्यमानः । आशमानः । म्लाश्यमानः । म्लाशमानः । भ्रम्यतु । भ्रमतु । क्रम्यतु । क्रामतु । त्रस्यतु । त्रसतु । भ्रुट्यतु । भ्रुटतु । क्षयतु । क्षीयतु । भ्रमेर्दैवादिकस्य ग्रहणं दीर्घोऽश्नातिभ्रीति दीर्घो नैवादिकस्य । क्रमेः—क्रम्यति । क्रामतीति शमां दीर्घोऽश्नातिभ्रीति दीर्घविधानात् शप्श्यनौ भवतः ।

यसोऽनुपसर्गात् ॥४।३।२४॥ अनुपसर्गादसिभ्यसो धातोः कर्तरि श्लेलेपरे श्यप्रत्ययो वा भवति । यस्यमानः । यसमानः । यस्यतु । यसतु । अनुपसर्गादिति किम् ? आयस्यति । प्रयस्यति । सम इति सम एवोपसर्गादिति दुर्ज्ञानम् ।

समः ॥४।३।२५॥ सम इत्युपसर्गात् परात् यसिभ्यसो धातोः कर्तरि श्लेलेपरे श्यप्रत्ययो वा भवति । सं(य)स्यमानः, सं(य)समानः । संयस्यतु, संयसतु । सोपसर्गार्थं आरम्भः ।

अक्षः ष्णुः ॥४।३।२६॥ अक्षौ इत्येतस्माद्धातोः कर्तरि प्रत्यये श्लेले मध्ये ष्णुप्रत्ययो वा भवति । अक्ष्णुवाणः । अक्षाणः । अक्षनु । अक्षणोतु ।

तक्षस्तनूकृतौ ॥४।३।२७॥ तनूकृतौ वर्तमानात्तक्षेर्धातोः कर्तरि प्रत्यये श्लेलेपरे ष्णुप्रत्ययो वा भवति । तक्ष्णुवाणः । तक्षाणः । तक्षनु । तक्ष्णोतु काष्ठम् । तनूकृताविति किम् ? संतक्षति वाग्भिः । निर्भर्त्सयतीत्यर्थः ।

स्वादेः ॥४।३।२८॥ वेति निवृत्तम् । स्वादिभ्यो धातुभ्यः कर्तरि श्लेले प्रत्यये परे ष्णुप्रत्ययो भवति । सुष्वाणः । सुनोतु । सुनुयात् । सुनोति । असुनोत् । षुञ्, षिञ्, शिञ्, डुमिञ्, षिञ्, स्तृञ्, कृञ्, वृञ्, दृञ्, टु, धु, श्रु, हि, पृ, स्पृ, आप्लृ, शक्लृ, राध, साध, तिक, तिग, सच, मिषृषा, दम्भू, ऋभू, दिवु, क्रुधु, क्षौङ्, ष्टिघि, इति स्वादयः ।

स्तम्भूस्तुम्भूस्कम्भूस्कुम्भूस्कोः ष्ठनाक्नुः ॥४।३।२९॥ स्तम्भू स्तुम्भू स्कम्भू स्कुम्भू स्कु इत्येतेभ्यो धातुभ्यः कर्तरि श्लेले परे मध्ये ष्ठनाप्रत्ययो भवति क्नुश्च । स्तभ्नानः । स्तम्नुवानः । स्तभ्नातु । स्तभ्नोतु । स्तुभ्नातु । स्तुभ्नोतु । स्कभ्नातु । स्कभ्नोतु । स्कुभ्नातु । स्कुभ्नोतु । स्कुनातु । स्कुनोतु । सौत्रा एते धातवः । स्तुजस्तु स्तुनाति[2], स्तुनोत्र इत्येव भवति । ऊकार इत् । स्तब्धा, स्तब्धिमत्ता इति इड्विकल्पार्थः ।

क्रयादेः ॥४।३।३०॥ डुक्रीञ् इत्येवमादिभ्यो धातुभ्यः कर्तरि श्लेले ष्ठनाप्रत्ययो भवति । [3]क्रीणानः । क्रीणातु । क्रीणीयात् । क्रीणाति । अक्रीणात् । डुक्रीञ्, प्रीञ्, श्रीञ्, मीञ्, धीञ्, पुञ्, स्कुञ्, क्नुञ्, ग्रहीं, पूञ्, लूञ्, धूञ्, स्तॄञ्[4], कॄञ्, वॄञ्, शॄ, ॠ, मॄ, पॄ, भॄ, धॄ, जॄ, नॄ, ऋ, गॄ, ज्या, व्ली, री, ली, वृत्, व्रीं, भ्रीं, क्षिव्, क्ष्मा, वन्ध, अन्ध, मन्थ, ग्रन्थ, कुन्थ, मृड्, मृद, गुध, कुष, क्षुभ, णभ, तुभ, त्रिकडी, अश, घृषू, इष, विष, प्रुष, प्लुष, मुष, पुष, [5]ञिक्ष, वृङ्, इति क्रयादयः ।

---

१. वस्नूकरणे, क० म० । २. स्तुनाति, स्तुनीतः, क० म० । ३. आत्मकर्मं क्रीणानः त्रिभुरौत्सुक्यं भजते, इति अमोघः । क० म० टि० । ४. इत आरभ्य इत्वे ऋकारविशिष्टा धातवः, क० म० । ५. कुन्थ संक्लेशे, क० म० । ६. खपि क० म० ।

हलः श्नो ह्रस्वात् ॥४।३।३१॥ हलन्ताद्धातोः परस्य श्नाप्रत्ययस्य ह्रौ परे आनादेशो भवति। स्तभान। स्तुभान। कृषाण। मृषाण। हल इति किम् ? क्रीणीहि। श्न इति किम् ? स्तभ्नुहि। स्तुभ्नुहि। श्व इति स्थानिनिर्देशः आदेशसम्प्रत्ययार्थः। इतरथा हि सर्वविषयः क्रयादिविषयो वा प्रत्ययो विज्ञायेत। ह्रावितिं किम् ? स्तभ्नाति।

तुदादिभ्यः शः ॥४।३।३२॥ तुदादिभ्यः कर्तरि शलेलेप्रत्यये परे मध्ये शप्रत्ययो भवति। तुदमानः। तुदतु। तुदेत्। तुदताम्। तुदति। अतुदत्। तुदि, दिशि, भ्रस्जो, क्षिपी, कृपी, लिपी, विची, मुच्लृञ्, लुप्लृञ्, विप्लृञ्, कृती, खिद, पिश, वृत्। रि, पि, धि, उक्षिषू, मृ, कृ, गृ, दृङ्, धृङ्, प्रच्छ, वृत्। सृप्, डुमस्जौ, रुजो, भुजो, छृप, स्पृश, रुश, रिश, मृश, विश, लिश, विद, गुध, पक्ष्, ओव्रश्चौ, चर्छ, ऋछ, मिछ, चर्च, ह्रर्ज, वर्ज, त्वच, ऋच, उञ्छ, उञ्छ, लुच, रिफ, रिङ्फ, दृफ, दृङ्फ, पृफ, पृङ्फ, गुफ, गुम्फ, उभ, उम्भ, शुभ, शुम्भ, दृभै, चृतै, ऋषै, जुन, शुन, विद, पृड, मृड, पृण, मृण, तृण, पृण, मृण, कृण, दृण, घृण, घूर्ण, सुर, कुर, क्षुर, पिर, मुर, घुर, पुर, बृही, तृही, स्तृही, तृंही, इषू, मिष, किल, तिल, बिल, चल, बिल, इल, खिल, णिल, हिल, शिल, सिल, स्खिल, लिख, कुट, पुट, कुच, व्यच, गुज, गुड, दीप, छुर, चट, छुट, तृट, स्फुट, मुट, त्रुट, जुड, कुड, कड, लुड, कुड, घुड, तुड, थुड, स्थुड, स्फर, स्फुर, वुड, वृड, मृड, तृड, हृड, स्फल, स्थुल, णू, दू, गु, द्रु, कुड, कूड, गूरैङ, वृत्। पुङ्, जृषैङ्, ओविजैङ्, औलस्जैङ्, षञ्जि, रभि, डुलभिष, इति तुदादयः।

कृञ्तनादेरुः ॥४।३।३३॥ कृञस्तनादिभ्यश्च कर्तरि शलेले परे मध्ये उप्रत्ययो भवति। कुर्वाणः। करोतु। कुर्यात्। करोति। अकरोत्। तन्वानः। तनोतु। तनुयात्। तनोति। अतनोत्। कृञोऽतनादित्वाद्-ग्रहणं तनादित्वेऽन्यदपि तनादिकार्यं स्यात्। कृतः। कृतवान्। तनूञ्, षणूञ् ऋणूञ्, तृणूञ्, घृणूञ्, वनूङ्, मनूङ् इति तनादयः।

रुधां नम् नुक् च ॥४।३।३४॥ रुधादीनां धातूनां कर्तरि शलेले नम् भवति नकारस्य च लुक् अन्वा-दीयते। मित्त्वादयोऽन्त्यादचः परा वेदितव्याः। शपस्त्वेककार्यत्वाद् बाधकः। रुन्धानः। रुणद्धु। रुन्धात्। रुणद्धि। अरुणत्। भञ्जो–भनक्तु। हिंसु–हिनस्तु। उन्धैं–उनत्तु। अन्ज–व्यनक्तु। तन्जु–आतनक्तु। नमोऽ-कारस्य विधानसामर्थ्याल्लुग्भवति। रुधूञ्, भिदृञ्, छिदृञ्, रिचूञ्, विचूञ्, छुदृञ्, दृदृञ्, तिजृञ्, त्रि इन्धैङ्, विदि, विदि, कृती, शिष्लृ, पिष्लृ, भन्जो, भुज, तृह, हिंसु, उन्धैं, अन्ज, तन्मू, ओविजैं, वृचैं, पृचैं इति रुधादयः।

कर्मण्यस्त्रादीनां कर्मवच्च ॥४।३।३५॥ धातोः कस्यचित्कश्चिदर्थभागः कर्मस्थः प्रधानम् फलरूपो विक्लेदादिः कश्चित्कर्तृस्थो गुणो भवनारूपोऽधिश्रयणादिः, तत्र यथाकर्मस्थे स्वस्यार्थभागे सुकरत्वेन वा कर्मण्यध्यारोपिताया भवनाया धातुर्वर्तते तथा तत्कर्मकर्ता भवति। तस्मिन् स्त्रवत्यादिवर्जितस्य धातोः कर्तरि लकारे सति तदन्तस्य कर्मवत्कार्यं भवति। कर्मणि लकारे सति यथा अभिप्रेयमाणा भवन्ति तथाऽत्रापि ते भवन्तीत्यर्थः। पचत्योदनं देवदत्तः विक्लेदयतीत्यर्थः। पच्यते ओदनः स्वयमेव। विक्लिद्यतीत्यर्थः। भिनत्ति कुसूलं देवदत्तः। द्वेधाभावयतीत्यर्थः। भिद्यते कुसूलः स्वयमेव। द्वेधाभवतीत्यर्थः। एवं लूयते केदारः। लूयमानः केदारः स्वयमेव। क्रियते कटः। क्रियमाणः कटः स्वयमेव। अपाच्योदनः स्वयमेव। अभेदि कुसूलः स्वयमेव। लविषीष्ट[1] लविष्ट केदारः स्वयमेव। कृषीष्ट कारिषीष्ट कटः स्वयमेव। लुलुवे केदारः स्वयमेव। बिभिदे कुसूलः स्वयमेव। कर्मणीति किम् ? ग्रामं गच्छति देवदत्तः। साध्वसिः छिनत्ति। साधु स्थाली पचति। पचत्योदनं देवदत्तः। राध्यत्योदनः स्वयमेव। भिद्यमानः कुसूलः

---

१. अर्च्छं अर्च, क० म०। २. भूड, क० म०। ३. निर्वाणमस्तंगमने निर्भृतौ गजमज्जने। अपवर्गेऽपि कुर्वाणो भृत्यकारकयोरपि। इति विश्वः क० म० टि०। ४. अन्वाचयो नैकः प्राधान्येना-भिधीयते। परो गुणभावेनेति। भिक्षामटन् गामानय। अत्र भिक्षाटनं प्रधानम्। गवानयनमुपसर्जनम्, क० म० टि०। ५. तदा क० म०। ६. अविविष्ट क० म०।

पचादि भिनत्ति अन्योन्यमाश्लिष्यतः । हन्त्यात्मानमात्मना इत्यत्रापि न राध्यतीत्यादिपदं कर्मकर्तरि, तस्य कर्तुः कर्मत्वं पचत्योदनमित्यादेः शब्दान्तरात्प्रतीयमानं बहिरङ्गं प्रत्यासत्तेश्च धातुक्रियाकारकभेदेन भवति । दुग्धे गौः पयः । उदुम्बरः फलं पच्यते इति पच.फलयोः कर्मत्वेऽपि देवदत्तादिव्यापारापेक्षया गवोदुम्बरयोरपि कर्मतास्त्येव । गां दोग्धि पयो देवदत्तः । उदुम्बरं फलं पचति वायुरिति । अस्रादीनामिति किम् ? स्रवत्युदकं कुम्भः । स्रवत्युदकं स्वयमेव । गलत्युदकं कुम्भः । गलत्युदकं स्वयमेव । क्रीति किम् ? भिन्नानः कुसूलः स्वयमेव । पृथक् प्रत्यये मा भूत् ।

तपस्तपति ॥४।३।३६॥ कर्मणोत्येतदिह तपसीत्येतस्य विशेषणम् । तपेर्धातोस्तपसि कर्मणि सति यः कर्ता तस्मिन्लकारे तदन्तस्य कर्मवत्कार्यं भवति । तप्यते तपांसि धीरः तेपे तपांसि धीरः । तपिरत्र करोत्यर्थः । तप इति किम् ? कुरुते तपांसि धीरः । तपसीति किम् ? अस्तपति सुवर्णं सुवर्णकारः । कर्मणीति किम् ? तपांसि साधु तपन्ति । दुःखयन्तीत्यर्थः ।

सृजः आद्ये ॥४।३।३७॥ [1]सृजेर्धातोः [2]आद्ये अद्यावयवे कर्तरि लकारे सति तदन्तस्य कर्मवत्कार्यं भवति । सृज्यते माला मालिकः । असृजि माला मालिकः । आद्य इति किम् ? सृजति मालां मालिकः । असृक्षीन्मालां मालिकः ।

करणे क्वचित् ॥४।३।३८॥ धातोः करणे कर्तरि लकारे सति क्वचित् कर्मवत्कार्यं भवति । परिवारयन्ति कण्टकैः पुरुषा वृक्षम् । परिवारयन्ते कण्टका वृक्षं स्वयमेव । क्वचिदिति किम् ? साध्वसिः छिनत्ति ।

(कु)कृषिरञ्जेरश्याञ्च वा ॥४।३।३९॥ (कु)कृषिरञ्जिभ्यां श्यात्परस्य कर्मणि कर्तरि लकारस्य कर्मवत्कार्यं तङानं वा न भवति । कुष्णाति पादं देवदत्तः । कुष्यति पादः स्वयमेव । कुष्यते पादः स्वयमेव । कुष्यन्पादः स्वयमेव । कुष्यमाणः पादः स्वयमेव । रजन्ति वस्त्रं रजकः । रज्यति वस्त्रं स्वयमेव । रज्यते वस्त्रं स्वयमेव । रज्यद्वस्त्रं स्वयमेव । रज्यमानं वस्त्रं स्वयमेव । श्यादिति किम् ? चुकुषे । कोषिषीष्ट । ररञ्जे । रंक्षीष्ट । कोषिताहे । अकोषि । रंक्ताहे । अरञ्जि । कोषिष्यते । कोषिष्यमाणम् । अकोषिष्यत । रङ्क्ष्यते । रङ्क्ष्यमाणम् । अरङ्क्ष्यत स्वयमेव । अत एव वचनाद्धकोऽपवादः श्यो विज्ञायते । तेन कुष्यन्ति रज्यन्तीति नित्यं नम् । नेति कर्मवदिति विधिनिवृत्त्यर्थमुत्तरार्थं च कतीह कुष्णानाः पादा इत्यत्र श्यः कर्मवत्त्व एवेति न भवति ।

व्यञ् दुहः ॥४।३।४०॥ अजन्ताद् दुहेश्च धातोः कर्तरि क्विप्रत्ययो वा न भवति । अकृत कटः स्वयमेव । अकारि कटः स्वयमेव । अलविष्ट केदारः स्वयमेव । अलावि केदारः स्वयमेव । अदुग्ध गौः स्वयमेव । अदोहि गौः स्वयमेव । [3]जेर्विकल्पे कर्मणि कर्तरि प्राप्नोति इति निषेधविकल्पः क्रियते । कर्तरीति किम् ? अकारि कटो देवदत्तेन । अदोहि गौर्गोपालकेन ।

रुधः ॥४।३।४१॥ रुधेर्धातोः कर्तरि क्विन् भवति । अरुद्ध गौः स्वयमेव । कर्तरीति अरोधि गौर्गोपालकेन । योगविभागो नित्यार्थः ।

तपोऽनुतापे च ॥४।३।४२॥ तपेर्धातोः कर्तरि अनुतापे च विषये क्विन् भवति । अतप्त तपांसि घोरः । अन्यत्रातप्त पापेन कर्मणा । अनुतापे चेति किम् ? अतापि पृथिवी राज्ञा । अनुतापग्रहणं कर्मभावार्थम् ।

णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ॥४।३।४३॥ ण्यन्तानां च श्रि स्नु इत्येतयोश्च तङि विधातव्ये येऽकर्मकाः येभ्यः कर्मण्यतङ् विधीयते, तेषां च धातूनां कर्तरि क्विन् भवति । णि–स्वयं पच्यमान ओदनः पाकं प्रायुङ्क्त इति अपीपचदोदनः स्वयमेव अथवा पचत्योदनं गुरुदत्तः । तेन अपीपचदोदनं देवदत्तः । तस्य पुनः कर्तृत्वे अपीपचदोदनः स्वयमेव । स्वयमेवाऽपाचीत्यर्थः । उदपुप्लुवत गौः स्वयमेव प्लुष्टं वा । श्रि–उदश्रि-

---

१. सृजिमिर्मितयोः आद्ये, क्रियु, सृष्टं च निर्मिते । इति कद्रम् । क० म० टि० । २. आद्यः अद्यावयवास्तिकः, इति वैजयन्ती, क० म० टि० । ३. जेर्विधिविकल्पे, क० म० ।

भिमद्दण्डं देवदत्तः । उदयशिश्रियत दण्डः स्वयमेव । स्नु–प्रास्नावीद् गां देवदत्तः । प्रास्नोष्ट गौः स्वयमेव । तङ्कर्मणः–[1]व्यकृत सैन्धवः स्वयमेव । व्यकृत कटः स्वयमेव । आहत गौः स्वयमेव । व्यतप्त पृथिवी स्वयमेव । अतप्त सुवर्णं स्वयमेव । करोतिर्बलनेऽन्तर्भावितेऽर्थः कर्मस्थक्रियो भवति । क्रिः–[2]पापचितौदनः स्वयमेव, [3]पापचिद्दोदनः स्वयमेव । उच्छ्रावित दण्डः स्वयमेव । उच्छ्रायिषोष्ट दण्डः स्वयमेव । प्रास्नाविष्ट गौः स्वयमेव । अधानिष्ट धानिषीष्ट गौः स्वयमेव । योगविभाग उत्तरार्थः ।

भूषार्थसन्दुहादीनां च भि यक् ॥४।३।४४॥ भूषार्थानां समन्तानां दुहादीनां णिश्निस्नूनां तङ्कर्मणां च कर्तरि भिन्निट् यक् च प्रत्ययो न भवति । अबुभूषत्कन्यां देवदत्तः । अबुभूषत कन्या स्वयमेव । अममण्डत कन्या स्वयमेव । भूषयिष्यति कन्यां देवदत्तः । भूषयिष्यते कन्या स्वयमेव । मण्डयिष्यते कन्या स्वयमेव । भूषयति कन्यां देवदत्तः । भूषयते कन्या स्वयमेव । मण्डयते कन्या स्वयमेव । अचिकीर्षत्कटं देवदत्तः । उत्पादयितुमैषीदित्यर्थः । अचिकीर्षिष्ट कटः स्वयमेव । [4]उत्पत्तुमैषीदित्यर्थः । एवमभिसीष्ट कुसूलः स्वयमेव । अचित्सीष्ट रज्जुः स्वयमेव । बिभित्सते कन्या स्वयमेव । दुहादि–दुग्धे गौः स्वयमेव । दुहेर्निर्विकल्प उक्तः । अनंसीद्दण्डं देवदत्तः । अनंस्त दण्डः स्वयमेव । नमते दण्डः स्वयमेव । परिणममानं पक्वालं न भवति । यदान्तर्भावितण्यर्थो नमिस्तदा कर्मस्थक्रियेति कर्मकर्तृता, यदा तु नान्तर्भावितण्यर्थो नमिस्तदा न कर्मकर्तृता भवति भाववशात्परिणमत्येवमिति एवं चैवंविधानान्नमत इत्यादीनि रूपाणि पाक्षिकाणि वेदितव्यानि । अग्रन्थीद् ग्रन्थं देवदत्तः । अग्रन्थिष्ट ग्रन्थः स्वयमेव । अग्रन्थिष्ट मेखला स्वयमेव । ग्रन्थते ग्रन्थः स्वयमेव । ग्रन्थते मेखला स्वयमेव । ग्रथ्नीते मेखला स्वयमेव । ग्रन्थि ग्रन्थि क्रयादौ युजादौ च । अवोचत्कथां देवदत्तः । अवोचत कथा स्वयमेव । वृते स्वयमेव । अकीर्ष्ट स्वयमेव । कीर्षीष्ट स्वयमेव । किरते स्वयमेव । अगीष्ट स्वयमेव । गिरते स्वयमेव । णिश्निस्नु तङः कर्मणां निरुदाहृतः । यक्–पाचयत्योदनः स्वयमेव । उत्पुच्छयते गौः स्वयमेव । पुच्छं वा लक्षयते गौ स्वयमेव । उच्छ्रयते दण्डः स्वयमेव । प्रस्नुते गौः स्वयमेव । विकुर्वते सैन्धवाः स्वयमेव । आहते गौः स्वयमेव । कर्तरीति किम् ? अभूवि । भूषिष्यते । भूष्यते कन्यया । अत्र णिजपि प्रतिषिध्यते ।

कृल्लोऽतुन्स्वाम् ॥४।३।४५॥ तुं त्वा अम् इत्येतद्वर्जिताः कृतो लकारस्य प्रत्ययाः कर्तरि भवन्ति । कर्तैषां वाच्यत्वेन विवक्षीयते । कर्ता । कारकः । पचति आस्ते । ल् ग्रहणं भावकर्मभ्यां[5] बाधार्थम् । अतुंस्वामिति किम् ? कर्तुं व्रजति । कृत्वा व्रजति । कारंकारं व्रजति । चोरं कारमाक्रोशति । अतिथिवेदं भोजयति देवदत्तः । अनिर्दिष्टार्थाः प्रत्यया स्वार्थे भाव एवैते भवन्ति । बलादयस्तु धात्वर्थाद् बहिर्भावे । अत्र च प्रधानक्रियाया व्रज्यादेः कर्तरि तङादिनाभिहिते तुमाद्यन्तक्रियाकर्तृत्वं न भेदेन विवक्षत इति देवदत्ते कर्तृविभक्तिर्न भवति । निषादेशस्य त्वमस्तुन्स्वाश्रयत्वात्प्रतिषेधो नेष्यते स तु कर्तर्येव ।

घुरकेलिमकृष्टपच्यं कर्मणि ॥४।३।४६॥ घुर केलिम इत्येतौ प्रत्ययौ कृष्ट पच्यश्च कर्मणि कर्तरि भवन्तीति वेदितव्यम् । घुरो वक्षयते । केलिमोऽतएव वचनाद्विज्ञायते । कृष्टपच्ये यत्र भङ्गुरं काष्ठम् । भिदुरं काष्ठम् । छिदुरा रज्जुः । पचेलिमा माषाः । भिदेलिमानि काष्ठानि । कृष्टे पच्यन्त इति कृष्टपच्याः शालयः । [6]भाक्तमिदिदं कर्तर्येव घुरः, कर्मकर्तुः असम्भवात् ।

सकृतेऽर्थम् ॥४।३।४७॥ सङ्कल्पनं सङ्कृतं तस्मिन् कर्तरि अर्थं भवतीति वेदितव्यम् । अतएव वचनाद्भ् पूर्वज्जीर्यतेर्थः प्रत्ययो विज्ञायते । अर्थं सङ्कृतम् । अर्थं नोऽस्तु सङ्कृतम् । सङ्कृत इति किम् ? अजरः पटः । अजरिता कम्बलः । अकर्तरीति किम् ? अर्थं सङ्कृतेन ।

---

१. वेः कृञः शब्दे—क० म० टि० । २. पापचितौदनः स्वयमेव । क० म० । ३. पापचिद्दौदनः स्वयमेव, क० म० । ४. उच्छ्रायिता दण्डः, क० म० । ५. प्रास्नाविषीष्ट, क० म० । ६. उत्पत्तुमैषीदित्यर्थः, क० म० । ७. साधु दास्त वक्ष्यन्ति इत्यर्थः । क० म० टि० । ८. -ग्यामबाधा—म०, -ग्यामाबाधा- क० । ९. भाक्तमिदिदं, म० ।

रुच्यार्थ्यध्यौ ॥४।३।४८॥ रुच्य अर्ध्यध्य इत्येतौ कर्तरि भवत इति वेदितव्यम् । अत एव रोचतेर्नञ्-पूर्वाच्च व्यभ्यतेः कथप्प्रत्ययो विज्ञायते । रोचत इति रुच्यो मोदको देवदत्ताय । न व्यभ्यत इत्यव्यध्यो देवदत्तः ।

भूगे यो वा ॥४।३।४९॥ भू गा इत्येताभ्यां यप्रत्ययः कर्तरि वा भवति । भावकर्मणोः प्राप्तयोः कर्तृत्वेन पक्षे वाक्यत्वेन विधीयते । भव्यो देवदत्तः । भव्यं देवदत्तेन । [1]गेयो माणवको गाथानाम् । गेया माणवकेन गाथा ।

प्रब्रूपस्थोऽनीयः ॥४।३।५०॥ प्रब्रूपस्था इत्येताभ्यामनीयःप्रत्ययः कर्तरि वा भवति । प्रवचनीयो गुरुः शासनस्य । प्रवचनीयं गुरुणा शासनम् । उपस्थापनीयः शिष्यो गुरोः । उपस्थापनीयः शिष्येण गुरुः ।

जनाप्ल्वापतो ण्यण् ॥४।३।५१॥ जन् आप्लृ आपत् इत्येतेभ्यो ण्यण्प्रत्ययः कर्तरि वा भवति । जन्योऽयम् । जन्यमनेन । आप्लाव्योऽयम् । आप्लाव्यमनेन । आपात्योऽयम् । आपात्यमनेन । ण्यणीति किम् ? आप्लव्यं देवदत्तेन ।

शिलषशीङ्स्थाजूषास्वसभ्रुहारभात् क्तः ॥४।३।५२॥ शिलष् शीङ् स्था जूष् आस् वस् जन रुहः इत्येतेभ्य आरभमात् आदिकर्मार्थेभ्यश्च धातुभ्यो यः क्तः स कर्तरि वा भवति । शिलष–आशिलष्टः कन्यां देवदत्तः । आशिलष्टा कन्या देवदत्तेन । आशिलष्टं देवदत्तेन । शीङ–अतिशयितो गुरुं देवदत्तः । अतिशयितो गुरुर्देवदत्तेन । अतिशयितं देवदत्तेन । स्था–उपस्थितो गुरुं देवदत्तः । उपस्थितो गुरुर्देवदत्तेन । उपस्थितं देवदत्तेन । जूष–अनुजीर्णो वृषलीं देवदत्तः । अनुजीर्णा वृषली देवदत्तेन । अनुजीर्णं देवदत्तेन । आस्–उपासितो गुरुं देवदत्तः । उपासितो गुरुर्देवदत्तेन । उपासितं देवदत्तेन । वसि–अनूषितो गुरुं देवदत्तः । अनूषितो गुरुर्देवदत्तेन । अनूषितं देवदत्तेन । जन्—अनुजातो माणविकां माणवकः । अनुजाता माणविका माणवकेन । अनुजातं माणवकेन । विजाता वत्सं गौः । विजातो वत्सो गवा विजातं गवा । रुह–आरूढो वृक्षं देवदत्तः । आरूढो वृक्षो देवदत्तेन । आरूढं देवदत्तेन । आरभः प्रकृतः कटं देवदत्तः । प्रकृतः कटो देवदत्तेन । प्रकृतं देवदत्तेन । प्रभुक्त ओदनं देवदत्तः । प्रभुक्त ओदनो देवदत्तेन । प्रभुक्तं देवदत्तेन । अकर्मका अपि धातवः सोपसर्गाः सकर्मका भवन्ति इति शिलषादीनां ग्रहणम् ।

गत्यकर्मण्याधारे च ॥४।३।५३॥ गत्यकर्मके चार्थे वर्तमानाद्धातोः क्तः आधारे चकारात्कर्तरि वा भवति । इदमहैः सृप्तम् । इदं यातम् । इदं मतं देवदत्तस्य । गतो देवदत्तो ग्रामम् । गतो देवदत्तेन ग्रामः । गतं देवदत्तेन । इदमेषामासितम् । इदमेषां शयितम् । आसितो देवदत्तः । शयितो देवदत्तः । आसितं शयितं देवदत्तेन । अकर्मकीति यस्य कालादिकर्म नास्ति तन्निर्देशः । तेन कृतो देवदत्तः हुतो देवदत्तः इत्यविवक्षित-कर्मकात्कर्तरि न भवति । भुक्ता[3] ब्राह्मणाः । पीता गाव इति मत्वर्थीयोऽकारः ।

अवौ ॥४।३।५४॥ अवार्थविशेषव्यवहारार्थाद्धातोः क्तप्रत्यय आधारे वा भवति । इदमेषां जग्धम् । इदमेषां भुक्तम् । इदमेषां पीतम् । भुक्त ओदनः । पीतमुदकं देवदत्तेन । भुक्तं पीतं देवदत्तेन । योगविभागात्कर्तरीति नास्ति ।

स्याध्याप्याक्ष्लक्तव्यपूजार्थाः कर्मभावे ॥४।३।५५॥ वेति निवृत्तम् । क्ष्ल इति लग्रहणात् सकर्मकादकर्मकाच्च धातोर्लकारवद्व्यपूजार्थाः प्रत्यया यथासंख्यं कर्मणि भावे च भवन्ति । एवं लकाराणां त्रयोऽर्था वाक्यत्वेन विहिता भवन्ति । शेषाणां द्वौ । पच्यते ओदनो देवदत्तेन । पेचे ओदनो देव-दत्तेन । अभ्यते देवदत्तेन । शिश्ये देवदत्तेन । कृतः कटो देवदत्तेन । शयितं देवदत्तेन । कार्यः कर्तव्यः

---

१. गेयो गानव्ये गानवेऽपि च, क० म० टि० । २. प्लुङ् गतौ, क० म० टि० । ३. भुञ्जते स्म । भोजनार्थात्कर्तर्यपि क्तः स्यादिति व्यवहितपाठः । ओदनं ते भुक्ताः, जलं ताः पीताः, इति कथञ्चित् । क० म० टि० ।

कटो देवदत्तेन । शयितव्यं देवदत्तेन । सुकरः कटो देवदत्तेन । सुशयं देवदत्तेन । सुकटंकराणि वीरणानि । ईषदाढ्यम्भवं देवदत्तेन । सुज्ञातं तत्त्वं देवदत्तेन । सुस्नानं देवदत्तेन । साध्यानाध्यादिति किम् ? सकर्मकाद्भावे मा भूत् । कटं क्रियते देवदत्तेनेति । अविवक्षिते तु कर्मण्यकर्मका एवेति भवन्ति । भुज्यते देवदत्तेनेति । गोदोहमास्यते । कुरून् सुप्यत इत्यकर्म चेति वचनाद्भवति । द्विकर्मकाणां धातूनां गुणमुख्यकर्मणोस्तुल्यकक्षताभावाद्गुणपदमिधानयोगे मुख्यक्रिया भावकर्मणि भवन्ति । अजा नीयते ग्रामम् । गौर्दुह्यते पयः । माणवको बोध्यते धर्मम् । माणवकं बोध्यते शास्त्रमित्यत्र तु बुद्धिरुपगमे वर्तते इत्युपगन्तुं शास्त्रमेव प्रधानक्रिया कर्म तद्विप्रेष्यते ।

भीमादयोऽपादाने ॥४।३।५६॥ अपादीयतेऽस्मादित्यपादानं अपायोऽवधिरुच्यते । तत्र भीमादयः शब्दा भवन्ति । बिभ्यत्यस्मादिति भीमः । एवं भीष्मः । भयानकः । भयानकवचरः समुद्रः । स्रुवः, स्रुक् स्रुचिः रक्षः संकुसुकः खलतिः ।

सम्प्रदानाच्चान्यत्रोणादयः ॥४।३।५७॥ सम्प्रदीयतेऽस्मै इति सम्प्रदानम्, तस्माच्चकारादपादानाच्चान्यत्रोणादयः प्रत्यया भवन्ति । करोतीति कारुः । कवितोऽवाविति कविः । ऋचन्ति तयेति ऋक् । वृतं तत्रेति वरम् । चर्म । मर्म ।

कृद्बहुलम् ॥४।३।५८॥ कृत्यप्रत्ययो निर्दिष्टादर्थादन्यत्राप्यर्थे बहुलं भवति । पादाभ्यां ह्रियत इति पादहारकः । गले चोप्यत इति गलेचोपकः । दाश्यते तस्मादिति दाशः । गा घ्नन्ति तस्मै दातुमिति गोघ्नो ब्राह्मणः । स्नान्ति तेनेति स्नानीयं चूर्णम् । दीयते तस्मा इति दानीयोऽतिथिः । समावर्तन्ते तस्मादिति समावर्तनीयो गुरुः । उद्वेजनीयो राजा । मोह्यत्यात्मानं मुह्यत्यनेनात्मेति मोहनीयं कर्म । निरदन्ति तदिति निरदनम् । अवसेचनम् । अवस्रावणम् । राजभोजनाः शालयः । राज्ञश्छादनानि वासांसि । सम्प्रदीयते तस्मा इति सम्प्रदानम् । अपादीयते तस्मादित्यपादानम् । प्रस्कन्दनम् । प्रपतनम् । निर्दिष्टेऽर्थे कृतो नियोगतो भवन्त्यन्यत्र तु यथादर्शनमल्पशः बहुत्ववचनाच्चरेट्टः मनसो हृत्रः सञ्ज्ञायामित्येके । मनोहरी मनोहार्यास्तनयोऽतिबलस्य च । अधिकारश्चायं तेन वक्ष्यमाणाः प्रत्यया बाहुलकेन भवन्त्यनभिधानानुसारेण ।

प्राक्स्त्रिप्राप्तोऽसमः ॥४।३।५९॥ इत ऊर्ध्वं स्त्रियां क्तिन्नित्यतः प्राग्यो विषयस्तस्मिन्प्राप्तश्चासमः औत्सर्गिकश्चापवादरूपः प्रत्ययो भवति । अपवादेन बाधितस्योत्सर्गस्यापवादविषयेऽनेन समावेशः क्रियते । अवश्यलाव्यम् । अवश्यलवितव्यम् । अवश्यलवनीयम् । जेयम् । जेतव्यम् । जयनीयम् । ज्ञा–ज्ञाता । ज्ञायकः । विक्षिप्तः । विक्षेप्ता । विक्षेपकः । प्राक्स्त्रीति किम् ? कृतिः । चितिः । रक्षितम् । रक्षणम् । यजादिर्न भवति । चिकीर्षा । जिहीर्षा । क्तिन्न भवति । ईषत्पानः । सुपानः । क्तो न भवति । प्राप्त इति किम् ? सुभगङ्करणम् ल्यणादिः । खनदादिविषये न भवति । असम इति किम् ? उत्तिवः । निपिवः । को न भवति । नानुबन्धकृतमसाम्यम् । तथाहि नानसमः कविचत् ।

ण्यण् ॥४।३।६०॥ धातोर्ण्यण्प्रत्ययो भवति । कार्यम् । हार्यम् । पाक्यम् । पाठ्यम् ।

पाणिसमवात् सृजः ॥४।३।६१॥ पाणि समव इत्येताभ्यां परात्सृजेर्धातोर्ण्यण्प्रत्ययो भवति । कथमोऽपवादः । पाणिसर्ग्या रज्जुः । समवसर्ग्यः । पाणिसमवादिति किम् ? संसृज्यः । समवेति समुदायपूर्वाद् विज्ञायते लाघवार्थम् सम्पाद्यवादिस्यनिर्देशात् ।

ओरावश्यके ॥४।३।६२॥ उवर्णान्ताद्धातोरवश्यभावे द्योत्ये ण्यण्प्रत्ययो भवति । आपवादः । लाव्यम् । लाव्यमवश्यम् । अवश्यलाव्यम् । पाव्यम् । पाव्यमवश्यम् । अवश्यपाव्यम् । समासो मयूरव्यंसकादित्वात् । आवश्यक इति किम् ? लव्यम् । पव्यम् । अवश्यस्तुल्य इत्यत्र परत्वात्ण्यत्रभवति ।

---

१. बहुः पुनर्माणवको भिक्षा स्यात् प्रातमात्रकम्—क० म० टि० । २. पक्ष्यम्, क० म० टि० ।

वाऽऽरेऽमावस्या ॥४।३।६३॥ अमापूर्वाद्वसतेराधारे ष्यण्प्रत्ययः धातोः। पक्षे ह्रस्वश्च निपात्यते। अमा वसतोऽस्यां तिथौ सूर्याचन्द्रमसौ इति अमावस्या। अमावास्या वा। रूढिशब्दाविमौ। तिथिविशेषवचनौ। अमावास्याशब्दस्यैव पक्षे ह्रस्वनिपातनादेकदेशविकृतस्यानन्यत्वाद् वाश्चामावस्याया इत्यत्र अमावास्याग्रहणेनामावस्याशब्दस्यापि ग्रहणं भवति।

कुण्डपाज्यसञ्चाज्यराजसूयाः क्रतौ ॥४।३।६४॥ कुण्डपाज्य सञ्चाज्य राजसूय इत्येते शब्दाः क्रतावभिधेये ष्यणन्ता निपात्यन्ते। कुण्डैः पीयतेऽस्मिन् सोम इति कुण्डपाज्यः क्रतुः। कुण्डपानोऽन्यः। सञ्चीयत इति सञ्चाज्यः क्रतुः। सञ्चयेऽन्यः। राज्ञा सोतव्यो राजा वा सूयतेऽस्मिन्निति राजसूयः क्रतुः।

पाज्यधाज्यसाम्राज्यनिकाज्यप्राणाज्यानाज्यं मानार्घैर्विनिवासास्तम्मत्यनिते ॥४।३।६५॥ पाज्यादयः शब्दा मानादिष्वर्थेषु यथासंख्यं ष्यणन्ता निपात्यन्ते। मीयते येन तन्मानं तत्र पाज्येति माङो ष्यण् आदिपत्वं च निपात्यते। पाज्यं मानम्। मेयमन्यत्। धाज्येति धाञ् ऋचि ष्यण् धाज्या ऋचः। रूढिशब्दोऽयम्। काश्चिदेव ऋच उच्यन्ते। साम्राज्येति सम्पूर्वान्नियो हविषि ष्यण्। उपसर्गदीर्घत्वं च। सान्नाज्यं हविः। अयमपि रूढिशब्दः। किञ्चिदेव हविरुच्यते। निकाज्येति निपूर्वाच्चिनोतेर्निवासे ष्यणायादेशादिकुत्वानि निकाज्यो निवास इत्यर्थः। निवसन्त्यस्मिन्निति निवासः। प्राणाज्येति प्रपूर्वान्नियोऽसम्मतौ सम्मतिरिच्छा संरोधोऽभिलाष, स चास्मिन्नास्तीत्यसम्मति, असम्मतो निष्कामो वोच्यते। प्राणाज्यहोरः। परेषां तत्र सम्मत्यभावात्। प्राणाज्योऽन्येषामपि विषय स्वात्मन इच्छाभावात्। आनाज्येति आङ्पूर्वान्नीयोऽनित्ये, आनाज्यो दक्षिणाग्निः। रूढिशब्दोऽयम्। गार्हपत्यादानेनन्ये नित्यं नायति वा दक्षिणाग्नौ वर्तते। अनित्य इति च रूढिदेशामर्शः। आनाज्यो गोधूमिति च केषाञ्चिदुदाहरणम् नेऽनित्यार्थायमेवानाज्य मन्यन्ते।

अग्नौ परिचाज्योपचाज्यसमूह्यचित्याः ॥४।३।६६॥ अग्नौ परिचाज्यादयः शब्दा निपात्यन्ते। परिचाज्यो नायेति पर्यपूर्वस्य चिञो ष्यणाजादेशो निपात्येते। परिचाज्योऽग्निः। परिचेयोऽन्यः। उपचाज्योऽग्निः। उपचेयोऽन्यः। समूह्येति सम्पूर्वादूहतेर्ष्यण् ममूह्योऽग्निः। समूहितव्योऽन्यः। चित्येति चिञ ष्यप् चित्योऽग्निः। चेयोऽन्यः। समूहे ष्यणित्येव सिद्धे नियमार्थम्। ममूह्येत्यनेरन्यत्र मा भूत्। शेषाणां ये प्राप्ते निपातनम्।

तव्यानीयौ ॥४।३।६७॥ तान्तोस्तव्य अनीयौ इत्येतौ प्रत्ययौ भवतः। कर्तव्यम्। करणीयम्। वक्तव्यम्। वचनीयं देवदत्तेन। वास्तव्य इति तद्धिते वस्तुनि भवति इति।

पक्षस्तकिशकशसियत्सहियक्रोऽव्वासुषपरपलपत्रपदिपदभजमुर्यः ॥४।३।६८॥ पक्षन्तिादन्ताच्चत् तंक अलि यत् सहि इत्येतेभ्यश्च धातुभ्यो यप्रत्ययो भवति यु आसु वप रप लप त्रप दिप दभ भज इत्येतान् ऋवर्णान्तादच्च वर्जयित्वा। पु–शब्यम्। लब्यम्। गम्यम्। रम्यम्। अच्–देयम्। धेयम्। लब्यम्। पब्यम्। चवादिभ्य —चव्यम्। तव्यम्। शक्यम्। शस्यम्। यव्यम्। सह्यम्। यज्यम्। त्यज्यमिति। वचनाद् ण्यणपि। याज्यम्। ण्वादिप्रतिषेध. किम्? याव्यम्। आसाव्यम्। वाप्यम्। राप्यम्। लाप्यम्। अपत्राप्यम्। देप्यम्। दाप्यम्। आधाव्यम्। कार्यम्। हार्यम्। हिंसे कुदादित्वाद्य एकारो न लुप्यत इति ण्यणेव प्राप्यते।

गद्मद्यमोऽनुपसर्गात् ॥४।३।६९॥ गद मद यम इत्येतेभ्योऽनुपसर्गेभ्यो यप्रत्ययो भवति। गद्यम्। मद्यम्। यम्यम्। अनुपसर्गादिति किम्? निगाद्यम्। प्रमाद्यम्। आयाम्यम्।

चरः ॥४।३।७०॥ चरतेर्धातोरनुपसर्गाद्यप्रत्ययो भवति। चर्यम्। योगविभाग उत्तरार्थः।

आङोऽनुरो ॥४।३।७१॥ आङः परात् चरेर्यं प्रत्ययो भवति अनुरो। आचर्यो देश.। अनुरिति किम्? आचार्यो दामनन्दी।

पणोऽपसृत्रवदाद्विक्रेयतुर्मत्युपेयागर्ह्ये ॥४।३।७२॥ पण अपसृ वृ अवद इत्येतेभ्योऽनुपसर्गेभ्यो यप्रत्ययो भवति यथासङ्ख्यं विक्रेयतुर्मत्युपेयागर्ह्येष्वर्थेषु। पण्यः कम्बलः। पण्यो गौः। विक्रेय इत्यर्थः।

उपसर्या गौः । उपसर्या वडवा । ऋतुमती कार्या प्रेजन इत्यर्थः । शतेन वर्या स्त्री । सहस्रेण वर्या स्त्री । उपेया सम्भक्तव्या मिश्रीकर्तव्येत्यर्थः । अवद्यं पापम् । अवद्या हिंसा । गर्ह्येत्यर्थः । अवदेति नञ्पूर्वस्य वदेर्निर्देशः । विक्रेयर्तुमत्युपेयागर्ह्येति किम् ? पाण्यः साधुः । उपसार्या शरदि मथुरा । वृत्या गौः । अनूद्या [2]अनवार्ता । अवद्या इति निरुपपादात् । ण्यणि पश्चान्नञ् समासे भवति । उपेयेति स्त्रीलिङ्गनिर्देशादिह न भवति । वार्या ऋत्विजः वृदि एव ण्यण् । वृत्येति वृजः कथर् ।

स्वामिवैश्येऽर्तेः ॥४।३।७३॥ स्वामिनि वैश्ये चाभिधेये ऋ गतावित्येतस्मादनुपसर्गादः प्रत्ययो भवति । अर्यः स्वामी । अर्यो वैश्यः । स्वामिवैश्य इति किम् ? आर्यो देवदत्तः ।

वदः सुपः कथप् च ॥४।३।७४॥ अनुपसर्गादिति वर्तते । अनुपसर्गात्सुपः परादुवदेः धातोः कथप्-प्रत्ययो भवति । चकाराद्यश्च । ब्रह्मोद्यम् । ब्रह्मवद्यम् । सत्योद्यम् । सत्यवद्यम् । सुप इति किम् ? वाद्यम् । अनुपसर्गादिति किम् ? प्रवाद्यम् ।

हृत्याभूयं भावे ॥४।३।७५॥ अनुपसर्गात्सुबन्तात् परं हृत्या भूय इत्येतद्भावे कथबन्तं निपात्यते । हृत्येति हृतेः स्त्रीभावे कथप् तकारश्चान्तादेशः । ब्रह्महत्या । भ्रूणहत्या । दरिद्रहत्या । अश्व[3]हत्या । भूयेति भुवतेर्नपुंसके भावे कथप् । ब्रह्मभूयं गतः । देवभूयं गतः । ब्रह्मत्वं देवत्वमित्यर्थः । भाव इति किम् ? इवघात्या वृषली । सुप इति किम् ? हृतिर्वर्तते । अनुपसर्गादिति किम् ? उपहृन्तिर्वर्तते । ण्यपा तु हृतेर्भावऽभिधानान्नोदाह्रियते । तथा च बहुलाधिकार ।

अग्निचित्या ॥४।३।७६॥ अग्नेः परात्चिञः स्त्रीभावे [4]कथप् निपात्यते । अग्नेश्चयनमग्निचित्या ।

खेयमूषोद्यम् ॥४।३।७७॥ खेयमूषोद्येमिति कथबन्तं निपात्यते । खेयेति खनेर्ण्यणोऽपवादः कथप् । अन्त्यस्य च इकारः । खेयम् । उत्खेयम् । निखेयम् । मूषोद्येति मूषापूर्वाद्वदेः पक्षे ये प्राप्ते नित्यं कथप् । मूषोद्यम् । न भाव इति योगविभागः ।

कुप्याज्यभिद्योद्यसिद्ध्ययुग्यं नाम्नि ॥४।३।७८॥ कुप्य आज्य भिद्य उद्य सिद्ध्य युग्य इत्येतानि शब्दरूपाणि कथबन्तानि नाम्नि निपात्यन्ते । गोपाद्यत इति कुप्यं धनम् । आज्यत इत्याज्यं घृतम् । भिनत्ति कूलमिति भिद्यो नाम नदः । उद्यत्युदकमिति उद्द्यो नाम नदः । सिद्ध्यन्त्यस्मिन्नर्था इति सिद्ध्यो नाम नक्षत्रम् । युज्यते तद्गमन इति युग्यं यानम् । नाम्नीति रूढ्यर्थम् । अतोऽन्यत्र गोप्यम् । आङ्ड्यम् । भेद्यः । उद्यः । सेधनः । योग्यं पुण्यमूर्यो । पुण्यार्थादिनुर्वसुर्ज्योतिषि सूर्यागस्त्ययोश्छे चेति निपातनात्सिद्धो ।

शास्वृजदृजुषस्त्वेत्यृदुपान्त्यादनृच्चक्लृप्चृतः ॥४।३।७९॥ शास् वृज् दृ जुष् स्तु एति इत्येतेभ्यः ऋच्चक्लृपिचृतिवर्जितेभ्यश्च ऋकारोपान्त्येभ्यो धातुभ्यः कथप्प्रत्ययो भवति । एतीति इणिकोर्ग्रहणं नेङ्गः । शिष्यः । प्रावृत्यम् । आदृत्यम् । जुष्यम् । स्तुत्यम् । इत्यम् । अधीत्यम् । वृत्यम् । वृध्यम् । भृध्यम् । ऋकारः किम् ? वार्या ऋत्विजः । अनृच्चक्लृप्चृत इति किम् ? अर्च्यम् । कल्प्यम् । चित्यम् । उपेयमिति इङ्गः ।

जिविपूल्यो हलिमुष्कल्के ॥४।३।८०॥ जि इत्येतस्मादिपूर्वस्मात् पू नि इत्येताभ्यां च धातुभ्यां यथासंख्यं हलिमुष्कल्केषु कर्मसु वाच्येषु कथप्प्रत्ययो भवति । महद्धलं हलि । मुष्करस्तृणविशेषः । कल्कस्त्रि-फलादीनाम् । जित्या हलिः । विपूयो मुष्करः । विनीय. कल्कः । हलिमुष्कल्क इति किम् ? जेयम् । विपव्यम् । विनेयम् ।

ग्रहः पदास्वैरिबाह्यापचये ॥४।३।८१॥ सुबन्तं पदं स्वयमिर्ने(यति) इति स्वैरी स्वतन्त्रः, अस्वैरी परतन्त्रः । बाह्या बहिर्भवाः । पक्षो वर्ग्यः । एतेषु ग्रहेः कथप्प्रत्ययो भवति । ण्यणोऽपवादः । पदे—ग्रगृह्यम् । अवगृह्यं पदम् । अस्वैरिणि—गृह्यका इमे गृहीतकाः । परवशा इत्यर्थः । बाह्यायाम्—ग्रामगृह्या स्त्री । नगर-

---

१. वृषभसङ्गम इत्यर्थः । क० म० टि० । २. अनवार्ताः क० म० । ३. अश्वहत्या, क० म० । ४. कथञ् नि—क० म० । ५. —घोष इति क्य—क० म० ।

गृह्या सेना । बहिर्भूतेत्यर्थः । बाह्येति स्त्रीलिङ्गनिर्देशाल्लिङ्गान्तरे न भवति । पक्षे—स्वद्गृह्यो, मद्गृह्यो गुणगृह्या वचने विपश्चितः । तत्पक्षाश्रिता इत्यर्थः । अन्यत्र ग्राह्यम् ।

भृञोऽजन्ये ॥४।३।८२॥ भृञो धातोरनाम्नि कथप्रत्ययो भवति । [1]भृत्याः । कर्मकराः भर्तव्याः पोष्या इत्यर्थः । अनाम्नीति किम् ? भार्या नाम स्त्रियाः । भार्या देवदत्तस्य ।

सम्भो वा ॥४।३।८३॥ सम्पूर्वाद्भृञः कथप्प्रत्ययो वा भवति । सम्भृत्याः सम्भार्याः ।

कृमृजृवृषशंसगुहदुहजपः ॥४।३।८४॥ कृ मृज् वृष शंस गुह दुह जप् इत्येतेभ्यो धातुभ्यः कथप्प्रत्ययो वा भवति । कृत्यम् । कार्यम् । मृज्यम् । मार्ज्यम् । वृष्यम् । वर्ष्यम् । शस्यम् । शास्यम् । गुह्यम् । गोह्यम् । दुह्यम् । दोह्यम् । ऊह्यम् । जाप्यम् । कथप्ग्रहणं ये विकल्पाभावात् ।

ण्वुञ्रञ् लिहादिभ्यश्च ॥४।३।८५॥ धातोर्लिहादिभ्यश्च ण्वु तृ अच् इत्येते प्रत्यया भवन्ति । कारकः । कर्ता । करः । हारकः । हर्ता । हरः । पाचकः । पक्ता । पचः । वाचकः । वक्ता । वचः । वापकः । वप्ता । वपः । वादकः । वदिता । वदः । लोलुवः । पोपुवः । मरीमृजः । एवं चय उत्सर्गाः । लिहादिभ्यः—लेढः । शेषः । मेषः । सेधः । कोपः । मेधः । नर्तः । दर्शः । दर्भः । सर्पः । जारभराश्च । पचः । अजगरः । बाधकबाधनार्थं लिहादिग्रहणम् । आकृतिगणश्चायम् । नटो । भर्ता । प्लवो । चरो । गरो । तरो । चोरो । गाही । सूदो । देवीति गौरादिषु द्रष्टव्याः ।

नन्द्यादिभ्योऽनः ॥४।३।८६॥ नन्द्यादयो नन्दनरमणेत्यादिप्रातिपदिकपाठादपोद्धृता वेदितव्याः । स च प्रत्ययपाठो विशिष्टविषयार्थः । रूपनिग्रहार्थश्च । नन्दनः । वाशनः । मदनः । दूषणः । साधनः । नर्दनः । शोभनः । रोचनः[2] । अत्र प्यन्तेभ्यः—सहनः । तपनः । दमनः । सर्व एते सञ्ज्ञायाम् । जल्पनः । दर्पणः । रमणः । क्रन्दनः । सङ्कर्षणः । संहर्षणः । विभीषणः । यवनः । लवणः । निपातनाण्णत्वम् । जनार्दनः । मधुसूदनः । वित्तविनाशनः । कुलदमनः । अत्राणिष्यते ।

ग्रहादिभ्यो णिन् ॥४।३।८७॥ ग्रहादिभ्यो णिन्प्रत्ययो भवति । ग्रहादयश्च प्रातिपदिकपाठादेवापोद्धृता वेदितव्या । ग्राही । उरसाही । उद्दासी । उद्भाषी । न्यायी । मन्त्री । समर्द्धी । ग्रहादिराकृतिगणस्तेन विसारीत्यादि सिद्धम् ।

नेर्वपश्रुशाविशरक्षः ॥४।३।८८॥ निपूर्वेभ्यः वप श्रु शा विश रक्ष इत्येतेभ्यो धातुभ्यो णिन्प्रत्ययो भवति । निवापी । निश्रावी । निशायी । निवेशी । निरक्षी ।

नञो याचूह्यसंह्याहव्रजवदवसः ॥४।३।८९॥ नञः परेभ्यो याचू ह्याह संह्याह व्रज वद वस इत्येतेभ्यो णिन्प्रत्ययो भवति । अयाची । अह्याही । असंह्याहारी । अव्राजी । अवादी । अवासी ।

अधोऽविक्षे ॥४।३।९०॥ नञः परादजन्ताद्धातोरविक्षे कर्तरि णिन्प्रत्ययो भवति । अकारी परशुः । अहारी गन्धः । अविक्ष इति किम् ? अकर्ता । अहर्ता देवदत्तः । नञ इति किम् ? कर्ता । हर्ता । केचिदिह नञ इति नानुवर्तयन्ति । कारी, हारीत्युदाहरन्ति ।

रुषराधोऽपाम् ॥४।३।९१॥ रुष राध इत्येताभ्यामपपूर्वाभ्यां णिन्प्रत्ययो भवति । अपरोधी । अपराधी ।

इन् च परिभ्वः ॥४।३।९२॥ परि भू इत्येतस्मादिन्प्रत्ययो भवति चकारात् णिन्च । परिभवी । परिभावी ।

वेः शीङ्विशो देशे ॥४।३।९३॥ विपूर्वात् शीङ् विशश्च इन्प्रत्ययो भवति देशेऽभिधेये । विशयी देशः । विषयी देशः । विश इनीह निपातनादेव षत्वम् ।

१. भृतौ साधवः, क० म० टि० । २. पूरणः, क० म० टि० ।

ज्ञाकृगृप्रोरुपान्त्यात्कः ॥४।३।९४॥ ज्ञा कृ गृ प्रो इत्येतेभ्य इगुपान्तेभ्यश्च धातुभ्यः कप्रत्ययो भवति । ज्ञः । किरः । उत्किरः । विकिरः । गिल. । निगिलः । प्रियः । सम्प्रियः । त्रिलिलः । बुधः । युधः । वित्तुदः । काष्ठभेदे परत्वादण् ।

उपसर्गादातोऽनिक् ॥४।३।९५॥ उपसर्गात्परादाकारान्ताद्धातोः कप्रत्ययो भवति अनिक् इत्यस्मात्र न भवति । प्रस्थः । सुस्थः । सुष्ठ. । सुरः । व्यालः । उपसर्गादिति किम् ? ज्ञाता । आत इति किम् ? प्रहर्ता । अनिगिति किम् ? आह्वः । प्रह्वः । प्रज्व. । अन्यथा होरालः स्यात् । यथा जुहुवनुः । जुहुवुः । दीङः उपदायः । अवदाय इति । पूंकित्यात्व णेरक इति णो भवति । पूर्वेऽपवादा आनन्तरान्विधीन् बाधन्ते नोत्तरानिति णो बाध्यते, नाऽण् । गोसन्दायः । वडवासन्दायः ।

पाघ्राध्माधेट्दृशः शः ॥४।३।९६॥ पा घ्रा ध्मा धेट् दृश इत्येतेभ्यो धातुभ्य उपसर्गात्परेभ्यः शप्रत्ययो भवति । कापवादः । पा इति पिबत्यग्रहण न पानेः । उत्पिबः । निपिबः । उज्जिघ्रः । विजिघ्र । उद्धम. । विधम. । उद्धयः । विधयः । उत्पश्यः । निपश्य. । क्वचिदुपसर्गादिति नानुवर्त्तयम् । पश्य इति हि दृश्यत इत्याहुः । व्याघ्रो व्याघ्रादिभिरगौणैरिन्यादिनिर्देशात्सिद्धः । व्याघ्रः सञ्ज्ञायामन्यत्र व्याजिघ्र इति विषयनियमो लोकात् ।

धारिपारिवेद्युदेजिचेतिसातिसाहिलिम्पविन्दोऽनुपसर्गात् ॥४।३।९७॥ धारि पारि वेदि उदेजि चेति सादि साहि इत्येतेभ्यो धातेभ्य. लिम्पतेर्विन्दतेश्चानुपसर्गेभ्यः श. प्रत्ययो भवति । धारय. । पारय । वेदय । उदेजय । चेतयः । सादय । साहयः । लिम्पः । विन्दः । अनुपसर्गादिति किम् ? संधारयिता । प्रलिपः । छत्रधारः । कुडधलेरा इति । मध्येऽपवादाः पूर्वान्विधीन् बाधन्ते नोत्तरानिति अण् भवति । त्रिलिम्पा नाम देवाः । गोविन्दः । अरविन्दः । कुरुविन्द इति । संज्ञा एता । अत्र लिम्पविन्दिभ्यां केवलाभ्यां प्रत्ययः । पश्चान्त्यादिनागमादिषु प्रादय इत्यादिना समास. । लिम्पविन्दोः सनभ्रनिर्देशः सम्प्रदेशावस्थायामेवेति ज्ञापनार्थः । तेन कुण्डा हुण्डेति सिद्धः । ददः, दद्यः, इति ददिदद्योश्च् । दायः, धाय., इति दाज्धाञोर्णः । तेन ददातिदधात्योर्विभाषा नारभ्यते ।

धुन्यो णः ॥४।३।९८॥ धु नु इत्येताभ्यामनुपसर्गाभ्यां णप्रत्ययो भवति । धावः । नाय । अनुपसर्गादिति किम् ? प्रधवः । प्रणयः ।

सहादिग्रहाद्वा ॥४।३।९९॥ सह इत्येवमादिभ्यो ग्रह इत्येतस्माच्च धातोरनुपसर्गाण्णिप्रत्ययो वा भवति । सहः । साहः । रम. । रामः । बुध । बोधः । ज्वल. । ज्वालः । चल । चाल. । ग्रह । ग्राहः । अनुपसर्गादिति किम् ? उज्ज्वलः । प्रज्वल. । बहुलाधिकाराद्विषयनियमादि विज्ञायते । ज्यादिषु ग्रहः इति । जलचरे ग्राहः इति । गृहं गृह्णा इति गृह्यादेरच् । षह, रमि, बुध, ज्वल, चल, टल ट्वल, स्खल, हल, णल, बल, पुल, कुल, शल, ह्वल, फल, पल्यू, पथे, हुल, क्वचे, मथे, टुवामू, क्षर, पद्लृ, ऋद्लृ, कुश, कुच, वह, कस, भू, वृत् सहादिः ।

श्यातन्व्यधाञ्संस्रवसावहव्रतीण्वसः ॥४।३।१००॥ श्या अत् तन् व्यध आसु सस्रु अवसा अवहव् अतीण् इवस् इत्येतेभ्यो णप्रत्ययो भवति । अनुपसर्गाडिति चेह निवृत्तम् । श्या—अवश्यायः । प्रतिश्यायः । श्यायग्रहण सोपसर्गार्थम् । आत्—दायः । धायः । त्रायः । तन्—तान. । उत्तान. । अवतानः । व्यधः । व्याधः । आस्रावः । संस्रावः । अवसायः । अवहारः । अत्यायः । इवासः । आश्वासः ।

नृत्खनृजोर्वुट् शिल्पिनि ॥४।३।१०१॥ नृत् खन् रज् इत्येतेभ्यः शिल्पिनि कर्त्तरि वुट्प्रत्ययो भवति । शिल्पं क्रियाजं कौशलं तद्वान् शिल्पी । नर्तकः । नर्तकी । खनकः । खनकी । रजकः । रजकी । अत एव निर्देशाद्रञ्जेरिहानुषङ्गलोप. । शिल्पिनीति किम् ? नर्त्तिका । ककारो ङ्यर्थः ।

---

१. जानातीति ज्ञः, सर्वज्ञः । क० म० टि० । २. -णैरिति निर्दे—क० म० ।

पाणिघट्ताडघट् ॥४।३।१०२॥ पाणिघट् ताडघटिति पाणिताडपूर्वस्य हन्तेः शिल्पिनि कर्तरि अट्प्रत्ययो घादेशश्च निपात्यते । टकारो ङ्यर्थः । पाणिं हन्तीति पाणिना हन्तीति वा पाणिघः । पाणिघौ । ताडं हन्तीति ताडघः । ताडघौ । शिल्पिनीति किम् ? पाणिघातः । ताडघातः ।

गस्थकः ॥४।३।१०३॥ गायते शिल्पिनि कर्तरि थकप्रत्ययो भवति । गाथकः ।

टनण् ॥४।३।१०४॥ गायतेः शिल्पिनि कर्तरि टनण्प्रत्ययो भवति । गायनः । गायनौ । टकारो ङ्यर्थः । णकारो यार्थः । योगविभाग उत्तरार्थः ।

हो ह्वीहिकाले ॥४।३।१०५॥ हा इत्येतस्माद्धातोः टनण्प्रत्ययो भवति ह्वीहौ काले च कर्तरि । जहत्युदकमिति हायना नाम ग्राह्यः । जहाति भवानिति हायनः संवत्सरः ।

प्रसूल्वस्साधौ वुच् ॥४।३।१०६॥ प्रु सृ लू इत्येतेभ्यः साधुत्वविशेषेऽर्थे वर्तमानेभ्यो वुच्प्रत्ययो भवति । साधु प्रवन इति प्रवकः । एव सरकः । लवकः । साधाविति किम् ? प्रावकः । सारकः । लावकः । वकारो वोरक इति सामान्यग्रहणार्थः ।

आशिषि वुन् ॥४।३।१०७॥ अभीष्टस्य प्रार्थनाऽऽशीस्तस्यां गम्यमानायां धातोर्वुन्प्रत्ययो भवति । जीवतादित्याशास्यमानो जीवकः । एवं नन्दकः । भवकः । नकार इच्छार्थंसो नित्काडथसुप इति पर्युदासार्थः । जीवकाः । नन्दकाः । भवकाः ।

नाम्नि किः ॥४।३।१०८॥ आशिषि गम्यमानायां धातोः किप्रत्ययो भवति नाम्नि समुदायश्चेन्नाम भवति । तनुवात् तन्तिः । रन्तिः । सान्तिः । शान्तिः । भूतिः ।

कर्मणोऽण् ॥४।३।१०९॥ कर्मणः परादधातोरण्प्रत्ययो भवति । अजाद्यदाराधवादः । कुम्भं करोतीति कुम्भकारः । नगरकारः । काण्डलावः । शरलावः । वेदाध्यायः । चर्चापाठः । छत्रधारः । द्वारपालः । उष्ट्रप्रणायः । भारहारः । ग्रामं गच्छत्यादित्यं पश्यति द्विपवन्तं भृणोतीति प्राप्यात्कर्मणो महान्तं कुम्भं करोतीति चानभिधानान्न भवति । तथा च बहुलाधिकारः ।

शीलिकामिभक्ष्याचरीक्षिक्षमो णः ॥४।३।११०॥ शीलि कामि भक्षि आचर् ईक्षि क्षम इत्येतेभ्यः कर्मणः परेभ्यो णप्रत्ययो भवति । आचरित्याड्पूर्वश्चरतिः । धर्मं शीलयतीति धर्मशीलः । धर्मशीला । धर्मकामः । वायुभक्षः । वायुभक्षा । कल्याणाचारः । कल्याणाचारा । सुखप्रतीक्षः । सुखप्रतीक्षा । क्लेशक्षमः । क्लेशक्षमा । कर्मणि शीलादौ बहुवीहिणाऽन्येते सिध्यन्ति । अण्बाधनार्थं तु वचनम् । अणि हि स्त्रियामीकारः स्यात् । पयस्कामोस्यण्यन्ते पयस्यकामेति मा भूत् । इति कामेर्णवचनमत एव कामीति व्यन्तापादानात्कर्मणीत्यण्यन्तग्रहणम् । अम्भोगामोऽस्या इति बहुव्रीहिर्न भवति तत्र बाहुलकादम्भोगामीति तत्राणेव ।

गोऽनुपसर्गाट्टक् ॥४।३।१११॥ कर्मणः परादनुपसर्गाद्गा इत्येतस्माद्धातोः टक्प्रत्ययो भवति । इत्यणपवादः । वक्तगः । वक्तगौ । अनुपसर्गादिति किम् ? वक्तसङ्गायः । खरुसंगायः । समसङ्गायः ।

सुराक्षीधोः पिबान् ॥४।३।११२॥ सुरा क्षीधु इत्येताभ्यां कर्मभ्यां परात्पिबतेरनुपसर्गाट्टक्प्रत्ययो भवति । सुरापी । क्षीधुपी । सुराक्षीधोरिति किम् ? क्षीरपा ।

आतोऽदाधामोऽङ् ॥४।३।११३॥ कर्मणः परात् ह्वादामादिसंज्ञिताकारान्तादनुपसर्गाद्धातोरङिति ङित्कारः प्रत्ययो भवति । अणोऽपवादः । मोदः । कम्बलदः । पाणिग्रम् । अङ्गुलिग्रम् । ह्वाज्यः । अह्वादाम इति किम् ? स्वर्गाह्वायः । तन्तुवायः । धान्यमायः । अनुपसर्गादिति किम् ? गोसन्दायः । बडवासन्दायः ।

दाप्रः प्रे ॥४।३।११४॥ कर्मणः पराभ्यां दा ग्र इत्येताभ्यामनुपसर्गाभ्यां धातुभ्यां प्रे उपसर्गेऽङ्प्रत्ययो भवति । अणोऽपवादः । सर्वप्रदः । पक्षिग्रहः । ग्र इति किम् ? गोसन्दायः ।

संज्ञायः ॥४।३।११५॥ कर्मणः परादनुपसर्गात् क्या इत्येतस्मात् सम्युपसर्गेऽट्प्रत्ययो भवति। अणोऽपवाद। गाः सञ्जयष्टे गोसंज्ञयः। अश्वसंज्ञयः।

आशिषि घ्नः ॥४।३।११६॥ आशिषि गम्यमानायां कर्मणः पराद्धन्तेरट्प्रत्ययो भवति। तिमिं बध्यादित्याशंसितः तिमिहः। शत्रुहः। पापहः।

क्लेशतमसोऽपे ॥४।३।११७॥ क्लेश तमस् इत्येताभ्यां कर्मवाचिभ्यां पराद्धन्तेरप उपसर्गे सति अट्प्रत्ययो भवति। क्लेशापहः। तमोऽपहः। अनाशीरर्थ आरम्भः।

शीर्षकुमाराण्णिन् ॥४।३।११८॥ शीर्ष कुमार इत्येताभ्यां पराद्धन्तेर्णिन्प्रत्ययो भवति। शीर्षघाती। कुमारघाती। निपातनाच्छिरसः शीर्षभाव. इत्येके। शिर.पर्यायः शीर्षशब्दोऽकारान्तोऽस्तीत्यन्ये। दृश्यते च प्रयोग —शीर्षाश्रितं पृथुः शीर्षापहारादिभिरात्मदु खैरित्यादि।

अमनुष्ये टक् ॥४।३।११९॥ कर्मणः पराद्धन्तेरमनुष्ये कर्तरि टक्प्रत्ययो भवति। वातघ्नमाविकं क्षीरम्। पित्तघ्नं माहिषं पय.। श्लेष्मघ्न कटुकम्। शशघ्नः शकुनि। जायाघ्न· तिलकालक.। पतिघ्नी पाणिलेखा। अमनुष्य इति किम्? आखुघात. शूद्र.। प्राणघातः ऋषि.। चोरघातो हस्ती। नगरघातो हस्ती। बहुलाधिकारान्न भवति।

जायापतेर्लक्षणे ॥४।३।१२०॥ जाया पति इत्येताभ्यां कर्मभ्यां पराद्धन्तेर्लक्षणे लक्षणवति कर्तरि टक्प्रत्ययो भवति। लक्षणं शुभाशुभसूचकं शरीरस्थं किञ्चिवत्तिलकालकादि। जायाघ्नो ब्राह्मणः। पतिघ्नी कन्या। मनुष्यार्थ आरम्भ।

हस्तिकवाटाच्छक्तौ ॥४।३।१२१॥ हस्ति कवाट इत्येताभ्यां कर्मभ्यां पराद्धन्तेः शक्तौ गम्यमानायां टक्प्रत्ययो भवति। हस्तिनं हन्ति इति हस्तिघ्नः पुरुष.। हस्तिनं हन्तुं शक्त इत्यर्थः। एवं कवाटघ्नश्चोरः। हस्तिकवाटादिति किम्? चोरघातो मनुष्यः। शक्ताविति किम्? हस्तिनं हन्ति विशेषेण हस्तिघातो देवदत्त.। मनुष्यार्थ आरम्भः।

राजघः ॥४।३।१२२॥ राजघ इति राज्ञः कर्मणो हन्तेष्टक्प्रत्ययो घादेशश्च निपात्यते। राजानं हन्ति राजघः।

अर्होऽः ॥४।३।१२३॥ अर्ह इत्येतस्माद्धातोः कर्मणः परादप्रत्ययो भवति। अणोऽपवादः। पूजार्हः। पूजार्हा प्रतिमा।

शक्तिलाङ्गलाङ्कुशर्ष्टितोमरधनुर्घटाद्ग्राहः ॥४।३।१२४॥ शक्ति लाङ्गल अङ्कुश ऋषि तोमर धनुष् घट इत्येतेभ्यः परादृग्रहेर्धातोर भवति। अणोऽपवादः। शक्तिग्रहः। लाङ्गलग्रहः। अङ्कुशग्रहः। ऋष्टिग्रहः। तोमरग्रहः। धनुर्ग्रहः। घटग्रहः। शक्तयादेरिति किम्? कमण्डलुग्राहः। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति। घटीग्रहः।

सूत्राद्धारणे ॥४।३।१२५॥ सूत्रशब्दात्कर्मण. परादृग्रहेर्धारणेऽर्थे वर्तमानादप्रत्ययो भवति। सूत्रग्रहः। धारण इति किम्? यो हि सूत्रमुपादत्ते स सूत्रग्राहः।

हृभो वयोऽनुद्यमे ॥४।३।१२६॥ कर्मणः परादृभृञ् इत्येतस्माद्धातोर्वयस्यनुद्यमे च गम्यमानेऽप्रत्ययो भवति। अणोऽपवादः। प्राणिनां कालकृतावस्था यौवनादिर्वयः[1]। उद्यम उत्क्षेपणमाकाशस्थस्य वा धारणम्। हस्तिहरः इभा। कवचहरः क्षत्रियकुमारः। अंशहरः पुत्रः। विषहरो मणिः। वयोऽनुद्यम इति किम्? भारहारः। वयसि क्रियमाणः सम्मान्यमानो वोद्यम उच्यमानो वयो गमयतीत्युद्यमार्थं वयोग्रहणम्।

---

१. वयः पक्षिणि बाल्यादौ वयो यौवनमात्रके, क० म० टि०।

आकि शीले ॥४।३।१२७॥ शील्यत इति शीलं स्वाभाविकम्। कर्मणः पराच्छीलेऽर्थे वर्तमानाद्धृञो-धातोराङुपसर्गे सति अप्रत्ययो भवति। पुष्पाहारः। फलाहारः। सुखाहारः। दुःखाहारः। यस्य कर्तुः पुष्पाद्याहरणेन स्वभावादन्यो हेतुरस्ति स एवमुच्यते। आङीति किम्? पुष्पाणि हर्ता। शील इति किम्? पुष्पाहारः सुखाहारः, इत्यशीलेऽनुत्तम इति पूर्वेणाकारः।

दृतिनाथात्पशाविः ॥४।३।१२८॥ दृति नाथ इत्येताभ्यां कर्मभ्यां पराद्भृञः पशौ कर्तरि इप्रत्ययो भवति। दृतिहरिः पशुः। नाथहरिः पशुः। पशाविति किम्? दृतिहारः। नाथहारः।

फलेग्रहात्मम्भरिकुक्षिम्भरिः ॥४।३।१२९॥ फलेग्रहि आत्मम्भरि कुक्षिम्भरि इति इप्रत्ययान्ता शब्दा निपात्यन्ते। फलानि गृह्णातीति फलेग्रहिर्वृक्षः। निपातनादेव फलकर्मण एकारान्तत्वम्। आत्मानं बिभर्त्यात्मम्भरिः। कुक्षिं बिभर्तीति कुक्षिम्भरिः। निपातनादेव कर्मणो मम्।

शकृत्स्तम्बाद्वत्सव्रीहौ कृञः ॥४।३।१३०॥ शकृत् स्तम्ब इत्येताभ्यां पराद्कृञः यथासंख्यं वत्से व्रीहौ च कर्तरि इप्रत्ययो भवति। शकृत्करिर्वत्सः। स्तम्बकरिर्व्रीहिः। वत्सव्रीहाविति किम्? अन्यः शकृत्कारः। स्तम्बकारः।

किँयत्तद्बहोरः ॥४।३।१३१॥ किम् यत् तत् बहु इत्येतेभ्यः कर्मभ्यः परात्कृञोऽप्रत्ययो भवति। अणोऽपवादः। किंकरः। यत्करः। तत्करः। बहुकरः। बहुकरा। बहुकरीति संख्यावचनात् परेण टः। जाति-रिदानीम्। किंकरीति हेत्वादौ ट।

दिवाविभानिशाप्रभाभास्कारारुष्कर्त्रन्तानन्तादिनान्दीलिपिलिविबलिचित्रक्षेत्रजङ्घा-बाहुधनुर्भक्तसंख्याट्टः ४।३।१३२॥ दिवा विभा निशा प्रभा भास् कार अहस् कर्तृ अन्त अनन्त आदि नान्दी लिपि लिवि बलि चित्र क्षेत्र जङ्घा बाहु अहन् धनुस् भक्त इत्येतेभ्यः संख्यायाश्च कर्मभ्यः परात्करोतेरप्रत्ययो भवति। सहरेत्यर्थग्रहणम्। तेनेकादिपरिग्रहः। दिवाकरः। विभाकरः। निशाकरः। प्रभाकरः। भास्करः। कारकरः। अहस्करः। कर्तृकरः। अन्तकरः। अनन्तकरः। आदिकरः। नान्दीकरः। लिपिकरः। लिविकरः। बलिकरः। चित्रकरः। क्षेत्रकरः। जङ्घाकरः। बाहुकरः। अहस्करः। धनुष्करः। भक्तकरः। सख्या–एककरः। द्विकरः। त्रिकरः। प्रत्ययान्तरकरणं स्त्रिया ङ्यर्थम्। भक्तकरी।

हेतुतच्छीलानुकूलेऽशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदात् ॥४।३।१३३॥ हेतुरै-कान्तिकं करणम्, तच्छीलस्तत्स्वभावः, अनुकूलः आराध्यचित्तानुवर्ती। शब्द श्लोक कलह गाथा वैर चाटु सूत्र मन्त्र पद इत्येतद्वर्जितात् कर्मणः पराट्करोतेर्हेत्वादिषु कर्तृषु टप्रत्ययो भवति। हेतौ–यशस्करी विद्या। शोककरी कन्या। कुलकरं धनम्। तच्छीले–पूजाकरः। श्राद्धकरः। अनुकूले–प्रेषणकरः। वचनकरः। हेतुतच्छीलानुकूल इति किम्? कुम्भकारः। नगरकारः। शब्दादिप्रतिषेधः किम्? शब्दकारः। श्लोककारः। कलहकारः। गाथाकारः। वैरकारः। चाटुकारः। सूत्रकारः। मन्त्रकारः। पदकारः। तच्छीलो ताच्छीलिकः तृप्रत्यय उदाहार्यः।

भृतौ कर्मणः ॥४।३।१३४॥ कर्मणः कर्मन्शब्दात्कृञो भृतौ गम्यमानायां कर्तरि टप्रत्ययो भवति। भृतिर्वेतनम्। कर्मकरो भृतकः। भृताविति किम्? कर्मकारः।

क्षेमप्रियमद्रात्खाण् ॥४।३।१३५॥ क्षेम प्रिय मद्र इत्येतेभ्यः कर्मभ्यः परात्कृञः ख, अण्, इत्येतौ प्रत्ययौ भवतः। क्षेमंकरः। क्षेमकारः। प्रियङ्करः। प्रियकारः। मद्रंकरः। मद्रकारः। हेत्वादिविवक्षायामपि परत्वादिमावेव प्रत्ययौ भवतः। मोक्षक्षेमकरी लोकस्येति तदन्तविज्ञानाभावाद्भवति। खकारो ममर्थः।

मेघर्तेः खञ् ॥४।३।१३६॥ मेघ ऋति इत्येताभ्यां कर्मभ्यां परात् कृञः खञ्प्रत्ययो भवति। मेघंकर। ऋतिङ्करः। खकारः खरीति विशेषणार्थः।

भयात् ॥४।३।१३७॥ इह कर्मण इत्येतदनुवर्त्तत इत्येतेन विशेष्यते । तेन भयान्ताच्च कर्मणः परात्कृञः खच्प्रत्ययो भवति । भयंकर· । अभयंकरः ।

प्रियवशाद् वदः ॥४।३।१३८॥ प्रिय वश इत्येताभ्यां कर्मभ्यां परावद् वदेर्धातोः खच्प्रत्ययो भवति । प्रियंवदः । वशंवदः ।

द्विषत्परात्तस्तापे ॥४।३।१३९॥ पर इत्येतस्मात्कारान्ताच्च द्विषच्छब्दात्कर्मणः परात्तापेर्धातोः खच्प्रत्ययो भवति । द्विषन्तपः । परन्तपः । त इति द्विषद्विशेषणं किम् ? द्विषतीं तापयति द्विषतीतापः । द्विषत्तापः । परतापः । इति तपेरण्यन्तस्य रूपम् । तापेरिति यौजादिक ऐथादिकश्च ण्यन्त परिगृह्यते ।

मितनखपरिमाणात्पचः ॥४।३।१४०॥ मित नख इत्येताभ्यां परिमाणशब्देभ्यश्च कर्मभ्यः परात्पचेर्धातोः खच्प्रत्ययो भवति । सर्वतो मान परिमाणं प्रस्थादि । मितम्पचा ब्राह्मणी । नखम्पचा यवागू । प्रस्थम्पचं कुलम् । द्रोणंपचा स्थाली । खारीपचः कटाह· ।

करीषाभ्रकूलात्कषः ॥४।३।१४१॥ करीष अभ्र कूल इत्येतेभ्य. कर्मभ्यः परात्कषेर्धातोः खच्-प्रत्ययो भवति । करीषङ्कषा वात्या । अभ्रकषाः कदलीध्वजाः । कूलंकषा नदी ।

सर्वात्सहश्च ॥४।३।१४२॥ सर्वशब्दात्कर्मणः परात्सहेः कषेश्च धातो खच्प्रत्ययो भवति । सर्वंसह । सर्वंकष· ।

भृतृवृधारिजिदमितपश्च नाम्नि ॥४।३।१४३॥ कर्मणः परेभ्यो भृ तृ वृ धारि जि दमि तप इत्येतेभ्यो धातुभ्य. सहेश्च कर्मणो नाम्नि खच्प्रत्ययो भवति । विश्वम्भरा वसुधा । रथन्तरं साम । पतिंवरा कन्या । वसुन्धरा पृथिवी । शत्रुजयः पर्वतः । अरिन्दम· । शत्रुतपः । शत्रुसहः । एवं नामानो राजान । नाम्नीति किम् ? कुटुम्बं बिभर्ति कुटुम्बभर· ।

वाचंयमो व्रती ॥४।३।१४४॥ वाचंयम इति वाचः कर्मणः परात्यमेर्धातोः खच्प्रत्ययोऽमश्चालुग् निपात्यते व्रती चेदुच्यते । व्रतं शास्त्रोयो नियमः । वाचं यच्छति वाचंयमः । व्रतीति किम् ? वाग्यमोऽन्य. ।

मन्याण्णिन् ॥४।३।१४५॥ कर्मणः परान्मन्यतेर्धातोर्णिन्प्रत्ययो भवति । पण्डितं मन्यतेऽसौ पण्डितमानी । दर्शनीर्यमानी । विकरणनिर्देश उत्तरार्थ. ।

कर्तुः शूखः ॥४।३।१४६॥ कर्मणः परान्मन्यतेः शूखप्रत्ययो भवति । प्रत्ययार्थः कर्ता चेत् तत्कर्म भवति । पण्डितमात्मानं मन्यते पण्डितम्मन्यः । दर्शनीयम्मन्यः । सर्वज्ञम्मन्यः । असमत्व णिन्नपि भवत्येव । पण्डितमानी । दर्शनीयमानी । कर्तुरिति किम् ? दर्शनीयमानो देवदत्तस्य । शकारो विकरणार्थ. ।

एजेः ॥४।३।१४७॥ कर्मण. परादेजयतेर्धातोः शूखप्रत्ययो भवति । अन्नमेजयः । धनमेजयः ।

शुनीस्तनाट्टेटः ॥४।३।१४८॥ शुनी स्तन इत्येताभ्यां कर्मभ्यां पराट्टेटः खप्रत्ययो भवति । शुनिन्धयं. । स्तनन्धयः । धेटश्चित्त्वान् ङी । स्तनंधयी सर्पजातिः ।

नाडीमुष्टिघटीखरीनासिकावातात् धमश्च ॥४।३।१४९॥ नाडी मुष्टि घटी खरी नासिका वात इत्येतेभ्यः कर्मभ्यः परादध्मः धेटश्च धातोः खप्रत्ययो भवति । नाडिन्धमः । नाडिन्धयः । मुष्टीन्धमः । मुष्टीन्धयः । घटीन्धमः । घटोन्धयः । खरीन्धमः । खरीन्धयः । नासिकन्धमः । नासिकन्धयः । वातंधमः । वातंधयः । चकारो धेटोऽनुकर्षणार्थः ।

---

१. कदली करी वैजयन्ती स्यादिति वैजयन्ती । क० म० टि० । २. कूलङ्कषा निर्झरिणी रोधोवप्रा पयस्विनी क० म० टि० । ३. कुटुम्बचिन्ताकारकः क० म० टि० । ४. दर्शनीयं मनोज्ञे च क्षिप्तपर्यायहारि च क० म० टि० । ५. वैयादिकः स्यः, क० म० टि० । ६. स्तनपास्तु स्तनन्धयी, क० म० टि० । ७. नाडी नार्कं वायुसखः, क० म० टि० ।

पाणेः ॥४।३।१५०॥ पाणेः कर्मणः परात् घ्मा इत्येतस्माद्धातोः इञ्प्रत्ययो भवति । पाणिं धमतीति पाणिन्धमः । पाणिन्धमाः पत्थानः इति तद्योगात् । यथा वृत्रा हसन्तीति ।

कूलादुद्दिरुज्वहः ॥४।३।१५१॥ कूलादुद्दिकर्मणः पराभ्यां रुजिवहिभ्यां उत्तरपदाभ्यां इञ्प्रत्ययो भवति । कूलमुद्रुजः । कूलमुद्वहः ।

वह्राभ्रालिहः ॥४।३।१५२॥ वह अभ्र इत्येताभ्यां कर्मभ्यां पराल्लिहेर्धातोः इञ्प्रत्ययो भवति । वह्निलिहो गौः । अभ्रंलिहः प्रासादः ।

विध्वरुस्तिलात्तुदः ॥४।३।१५३॥ विधु अरुस् तिल इत्येतेभ्यः कर्मभ्यः परात् तुदो धातोः इञ्प्रत्ययो भवति । विधुन्तुदः । अरुन्तुदः । तिलन्तुदः ।

शर्धललाटवातात् हाकपाजः ॥४।३।१५४॥ शर्ध ललाट वात इत्येतेभ्यः कर्मभ्यः परेभ्यो यथासंख्यं हाक, तप्, अज् इत्येतेभ्यो धातुभ्य इञ्प्रत्ययो भवति । शर्धंजहा मृगाः । ललाटंतपः सविता । वातमजाः मृगाः । हाकिति ककारो हाङ्निवृत्त्यर्थः ।

पुरन्दरभगन्दरेरम्मदोग्रंपश्यासूर्यंपश्या ॥४।३।१५५॥ पुरन्दरादयः शब्दाः इञ्प्रान्ता निपात्यन्ते । पुरं दारयतीति पुरन्दरः शक्रः । पुःशब्दपूर्वाद्दारयतेः खच्प्रत्ययोऽमश्चान्तादेशश्च निपात्यते । पुरंपूर्वान्तु पुरन्दार इति भवति । भगं दारयतीति भगन्दरो व्याधिः । अत्र खच् । इरा सुरा तया माद्यतीति इरम्मदः इराकरणपूर्वान्माद्यतेः खच् । उग्रं पश्यतीत्युग्रंपश्य । उग्रकर्मणो दृशेः पक्षः । सूर्यं न पश्यन्तीत्यसूर्यंपश्या राजदाराः । असूर्यम्पश्यानि मुखानि । सूर्यकर्मणो नञ्युक्तात्पक्षः । नञो दृशिनाऽभिसम्बन्धः न सूर्येण गुप्तिः परमेतद्वेषं नामगुप्ता परिदृश्यदर्शनं सूर्यमपि न पश्यन्तीति ।

सुभगाढ्यस्थूलपलितनग्नान्धप्रियात् सुपोऽच्व्येरिच्व्यौ खल्खुकञ् भुवः ॥४।३।१५६॥ सुभग आढ्य स्थूल पलित नग्न अन्ध प्रिय इत्येतेभ्यः अच्प्रत्ययान्तेभ्यश्च्व्यर्थे वर्तमानेभ्यः सुबन्तेभ्यः पराद्भू इत्येतस्माद्धातोः खल् खुकञ् इत्येतौ प्रत्ययौ भवतः । असुभगः सुभगो भवति सुभगंभविष्णुः । सुभगंभावुकः । एवमाढ्यंभविष्णुः । आढ्यंभावुकः । स्थूलंभविष्णुः । स्थूलंभावुकः । पलितंभविष्णुः । पलितंभावुकः । नग्नंभविष्णुः । नग्नंभावुकः । अन्धंभविष्णुः । अन्धंभावुकः । प्रियंभविष्णुः । प्रियंभावुकः । सुब्ग्रहणमिह सुभगादिभिः सुबन्तविशेषणार्थम् । तेन सुभगाद्यन्तादपि भवति । सुभगः असुभगो भवति असुभगंभविष्णुः, असुभगंभावुक इत्यादि । अच्व्येरिति किम् ? सुभगीभविता । च्वाविति किम् ? सुभगो भविता ।

कृञः करणे खनट् ॥४।३।१५७॥ सुभग आढ्य स्थूल पलित नग्न अन्ध प्रिय इत्येतेभ्यः अच्प्रत्ययेभ्यः च्व्यर्थे वर्तमानेभ्यः पराद् कृञः करणे खनट्प्रत्ययो भवति । करणे इति कर्मणोऽपवादः । एवमन्यत्रापि । असुभगं सुभगं करोत्यनेनेति सुभगंकरणो मन्त्रः । सुभगंकरणी विद्या । एवमाढ्यंकरणम् । स्थूलंकरणम् । पलितंकरणम् । नग्नंकरणम् । अन्धंकरणम् । प्रियंकरणम् । सुभगाद्यन्तादपि भवति । सुभगमसुभगं कुर्वन्त्यनेनेति असुभगंकरणो मन्त्रः । एवमनाढ्यंकरणमित्यादि । अन्यत्र तु सुप्कर्म चोपात्तस्य विशेषणं विज्ञेयम् । अच्व्येरिति किम् ? सुभगीकुर्वन्त्यनेन खनटः प्रतिषेधसामर्थ्यादिनडपि भवति । नञ्सुभयोरच्प्रत्ययपूर्वाद्विधाने विशेषोऽस्ति । अच्व्येरित्येकेषां नानुवर्तते । च्वाविति किम् ? सुभगं कुर्वन्ति तैलेनाभ्यञ्जनम् । अनाढ्यितपूर्वविध्यो वा प्रादुर्भावे इह कृञोऽर्थः ।

भावे चाशितंभवः ॥४।३।१५८॥ आशितम्भव इति आशितशब्दाद्दनातिभवत्योः कर्तृवचनात्सुबन्तात्पराद्भूवतेः खप्रत्ययो भावे करणे च निपात्यते । आशितस्य भवनमाशितंभवो वर्तते । आशितत्वमित्यर्थः । आशितो भवत्यनेन आशितम्भव ओदनः । अत एव निपातनाद्दनातेः कर्तरि क्तो दीर्घश्च ।

---

१. पाणेर्घ्मः, क० ग० ।

गमः खखड्डाः ॥४।३।१५९॥ सुबन्तात्परादृगमेर्धातोः ख खड् ड इत्येते प्रत्यया बहुलं भवन्ति। ख–सुतङ्गमः। तुरङ्गमः। भुजङ्गमः। प्रवङ्गमः। मितङ्गमः। अमितङ्गमा हस्तिनी। हृदयङ्गमा वाचः। खड्–तुरङ्गः। भुजङ्गः। ड–तुरगः। भुजगः। प्लवगः। पतगः। अन्तगः। अनन्तगः। अत्यन्तगः। अध्वगः। दूरगः। पारगः। सर्वगः। सर्वत्रगः। ग्रामगः। स्त्र्यगारगः। गुरुतल्पगः। बहुलाधिकाराद्यथाप्रयोगदर्शनं व्यवस्था।

विहायसो विहङ्ग ॥४।३।१६०॥ विहायस् इत्येतस्मात् सुबन्तात्परादृगमे. खखड्डाः प्रत्यया भवन्ति विहायसश्च विहादेश. । विहायसा गच्छतीति विहङ्गमः। विहङ्गः। विहग.।

उरगः ॥४।३।१६१॥ उरग इत्युरस्शब्दात् परादृगमेर्डप्रत्ययः सलुक्च निपात्यते। उरसा गच्छतीत्युरगः।

सुगदुर्गमाधारे ॥४।३।१६२॥ सुग दुर्ग इत्याधारे डप्रत्ययान्तौ निपात्यते। सुखेन गम्यतेऽस्मिन्निति सुगो देशः। दुःखेन गम्यतेऽस्मिन्निति दुर्गो देशः। सुगमनो दुर्गमन इत्यसरूपत्वादनादपि भवति। आधार इति किम्? सुखेन गच्छतीति सुगन्ता। सुगम. दुर्गम इति कर्मणि।

निर्गो देशे ॥४।३।१६३॥ निर्ग इति आधारे देशे निपात्यते। निर्गम्यतेऽस्मिन्देशे इति निर्गो देशः। देश इति किम्? निर्गमनः।

नाम्न्यः शमः ॥४।३।१६४॥ शमित्येतस्मात्सुबन्तात्पराद्धातोर्नाम्नि संज्ञायामकारप्रत्ययो भवति। शङ्करः। शम्भवः। शंवदः। हेत्वादावपि नाम्नि परत्वादयमेवाकारो न टप्रत्ययः। शङ्करा नाम शकुनिका। शङ्करा नाम परिव्राजिका, तच्छीला च। नाम्नीति किम्? शङ्करी विद्या।

पार्श्वादिभ्यः शीङः ॥४।३।१६५॥ पार्श्वादिभ्यः सुबन्तेभ्यः परात् शीङः अकारप्रत्ययो भवति। पार्श्वाभ्यां शेते पार्श्वशयः। उदरशयः। पृष्ठशयः। दिग्धेन सह शेते, दिग्धसहशय.। दिग्धसहात्तृतीया समासाच्छीङोऽकारः। पार्श्वादयः प्रयोगगम्याः। अनाधारार्थ आरम्भः।

उत्तानादिभ्यः कर्तुः ॥४।३।१६६॥ उत्तानादिभ्यः कर्तृवाचिभ्य. परात्सुबन्तात्छीङोऽकारप्रत्ययो भवति। उत्तानः शेते उत्तानशयः। अवमूर्धशयः। उत्तानादयोऽपि प्रयोगगम्याः।

आधारात् ॥४।३।१६७॥ आधारात्तद्वाचिनः सुबन्ताच्छीङोऽकारः प्रत्ययो भवति। खे शेते खशयः। खेशय.। बिलशयः। बिलेशयः। गुहाशयः। गिरिश इति गिरिशब्दाल्लोमादित्वाच्छः।

भिक्षासेनादायाच्च चरष्टः ॥४।३।१६८॥ भिक्षा सेना आदाय इत्येतेभ्यः आधारवाचिभ्यश्च सुबन्तेभ्यः पराच्चरेर्धातोष्टप्रत्ययो भवति। भिक्षा चरति भिक्षाचरः। भिक्षाचरी। सेना चरति सैनाचरः। सेनाचरी। आदाय चरति आदायचरः। आदायचरी। आदायेति प्यन्तः। कुरुषु चरति कुरुचरः। कुरुचरी। मद्रचरः। मद्रचरी। भिक्षासेनादायाच्चेति किम्? कुरूंश्चरति। पञ्चालाश्चरति। टकारो ङ्यर्थ.।

पुरोऽग्रतोऽग्रेः सर्तेः ॥४।३।१६९॥ पुरस् अग्रतस् अग्र इत्येतेभ्य. सुबन्तेभ्यः परात्सर्तेर्धातोष्टप्रत्ययो भवति। एकारान्तत्वं चाग्रे इति पूर्वपदस्य निपात्यते। पुरः सरतीति पुरस्सरः। अग्रतः सरतीति अग्रतःसरः। अग्रेण सरति अग्रे सरति अग्र. सरति इति वा अग्रेसरः।

पूर्वात्कर्तुः ॥४।३।१७०॥ पूर्वशब्दात्कर्तुः परात्सर्तेर्धातोष्टप्रत्ययो भवति। पूर्वः सरति पूर्वसरः। कर्तुरिति किम्? पूर्वदेशं सरति पूर्वसारः।

स्थः कः ॥४।३।१७१॥ सुबन्तात् परात्तिष्ठतेः कप्रत्ययो भवति। समे तिष्ठतीति समस्थः। विषमस्थः। परत्वादयं नाम्न्यः शम इत्यकारं बाधते। सम्भा नाम कश्चित्। विशेषा समत्वात्समावेशः संस्था इति।

---

१. भिक्षाचरः कौक्कुटिकः, क० म० टि०।

दुहो घञ् ॥४।३।१७२॥ सुबन्तात्परात् दुहेर्धातोः कप्रत्ययो भवति घञ्चास्यान्तादेशः। कामान् दुग्धे कामदुघा। धर्माय दुग्धे धर्मदुघा[1] धेनुः।

शोकापनुदतुन्दपरिमृजस्तम्बेरमकर्णेजपास्यसुखाहरालस्यहस्तिसूचकाः ॥४।३।१७३॥ शोकापनुद तुन्दपरिमृज स्तम्बेरम कर्णेजप इत्येते कप्रत्ययान्ता निपात्यन्ते यथासंख्यं सुखाहरालस्यहस्तिसूचकाश्चेत् कर्तारो वाच्या भवन्ति। शोकमपनुदतीति शोकापनुदः। सुखाहरः। सुखस्याहर्ता। शोकापनोदोऽन्यः। तुन्दपरिमृडोऽन्यः। तुन्दपरिमार्जोऽन्यः। स्तम्बेरमो हस्ती। स्तम्बेरन्ताऽन्यः। कर्णेजपः सूचकः। कर्णेजपिताऽन्यः।

मूलविभुजादयः ॥४।३।१७४॥ मूलविभुजादयो नियतार्थधातूपपदाः कप्रत्ययान्ता यथाशिष्टप्रयोगं साधवो वेदितव्याः। मूलानि बिभुजति मूलविभुजो रथः। नखानि मुञ्चन्ति नखमुचानि धनूंषि। काकेभ्यो गृहीतव्या काकगृह्यास्तिलाः। कौ मोदते कुमुदम्। द्वाभ्यां पिबति द्विपः। अनेकपः। कच्छपः। पादपः। कटाहृपः। धर्माय प्रददातीति धर्मप्रदः। कामप्रदः। स्वर्गप्रदः। शास्त्रेण प्रजानातीति शास्त्रप्रज्ञः। आगमप्रज्ञः।

विण्भजः ॥४।३।१७५॥ सुबन्ताद्भजेर्धातोर्विण्प्रत्ययो भवति। (अर्धं भजतीति) अर्धभाक्[2]। पादभाक्। प्रभाक्। वकारो विण्क्विपोः साम्यार्थः। तेनेह क्विप् न भवति।

स्पृशोऽनुदकात् क्विप् ॥४।३।१७६॥ अनुदकात् सुबन्तात् स्पृशेर्धातोः क्विप्प्रत्ययो भवति। घृतं स्पृशतीति घृतस्पृक्। मन्त्रेण स्पृशतीति मन्त्रस्पृक्। अनुदकादित्युदकसदृशोऽनुपसर्गः। मुप् परिगृह्यते। तेनेह न भवति। उपस्पृशति। अनुदकादिति किम्? उदकस्पृक्। उदकेन स्प्रष्टा।

अदोऽनन्नात् ॥४।३।१७७॥ अन्नवर्जितात् सुबन्तात्पराददेर्धातोः क्विप्प्रत्ययो भवति। आममत्ति आमात्। सस्यात्। अनन्नादिति किम्? अन्नादः। अन्नप्रतिषेधार्थं वचनम्।

क्रव्यात्क्रव्यादवामपक्वादौ ॥४।३।१७८॥ क्रव्यात् क्रव्याद इत्येतौ क्रव्यकर्मपूर्वाददेः क्विबन्तौ साधू भवतः यथासंख्यं यद्यामपक्वाभिधेयौ भवतः। क्रव्यमत्ति क्रव्यात्—आममांसभक्षकः। क्रव्यादः पक्वमांसभक्षकः। वृत्तावेवात्र पक्वमांसे क्रव्यशब्दः। सिद्धौ प्रत्ययौ विषयनियमार्थं वचनम्।

मन्वन्क्वनिब्विच इच्छन्ति ॥४।३।१७९॥ सुबन्तात्परराद्धातोः मन् वन् क्वनिप् विच् क्विप् च प्रत्ययो दृश्यते। मन्-सुशर्म[3]। सुतर्म[4]। शर्म[5]। वर्म[6]। हेम[7]। दाम[8]। वन्-विजावा[9]। अग्रेगावा[10]। क्वनिप्-प्रातरित्वा[11]। क्रत्वा[12]। पीत्वा[13]। पोत्वा[14]। विच्-दृट्। रेट्। नागः। नुभयुः। कोलालपाः। क्विप्-अन्तरिक्षसत्। प्रसत्। उपसत्। अण्डसूः। शतसूः। प्रसूः। मित्रद्रुट्। प्रद्रुट्। द्विषोष्णी। यविष्ठयः। मित्रघ्रुक्। प्रघ्रुक्। विघ्रुक्। गोधुक्। कामधुक्। प्रधुक्। अश्वयुक्। प्रयुक्। युङ्। युञ्जौ। युञ्जः। तत्ववित्। प्रविद्। निर्विविदे। विदांवरः। काष्ठभिद्। प्रभिद्। तमश्छिद्। भवतोज्ञानं भवच्छिद्। दुर्धरं तपः प्रच्छित्।

---

१. धर्माय दुग्धे धर्मदुघा क० म०। २. णकारः णिस्कार्यार्थः। इकार उच्चारणार्थः। वकारः विण्क्विपोः सामान्यार्थः। तेनेह क्विबन भवति। ३. अर्धं भजतीति विग्रहः, क० म०। ४. णप्रत्ययान्त क० म० टि०। ५. तर्म। सुशर्म। वर्म, क० म०। (सुष्ठु शृणातीति) सुशर्म, न्यगिति दीर्घः। न लुक्। सुष्ठु तरतीति सुतर्म, शृणाति दुःखमिति शर्म सुखम्। क० म० टि०। ६. वृणाति शरीरमिति वर्म तनुत्रम्, क० म० टि। ७. हिनोति व्यवहारमिति हेम, क० म० टि०। ८. ददाति (इति) दाम क० म० टि०। (इहिग्रहणाक्विरूपपदादपि प्रत्ययः) क० म० टि०। ९. विजायत इति विजावा, वन्यनुनासिकस्याः, इति नकारस्याकारः। क० म० टि०। १०. अग्रे गच्छतीति अग्रे गावा तत्पुरुषे कृति बहुलमिति अलुक्, क० म० टि०। ११. पकारस्तगर्थः। क्विबादेकरभावः। इकार उच्चारणार्थः। क० म० टि०। १२. प्रातरेति (इति) प्रातरित्वा, क० म० टि०। १३. करोतीति कृत्वा, क० म० टि०। १४ पर्याप्त इति पीत्वा, क० म० टि०। १५. प्यायते इति पीत्वा, क० म० टि०।

सञ्जित् । प्रजित् । प्रसेनजित् । अग्रणीः । ग्रामणीः । प्रणीः । नीः । नियौ । नियः । पक् । क्विप् । भिद् । विराट् । सम्राट् । राजराट् । प्रतिभूः । मित्रभूः । उखास्रत् । पर्णध्वत् । महाभृत् । प्राड् । दण्डाड् । ऋतुं ऋतौ ऋतवे ऋतुपयो वनो वा यजत इति ऋत्विक् । धृष्णोति दधृक् । दधृक्परिखादिति निपातनादित्वकुत्वे । वस्त्रिष्वत्युष्णहरीति वा उण्णिक् । अनडुदुक्त्विगिति निपातनात् कुत्वादि । सृज्यत इति स्रक् । दिश्यत इति दिगिति । सम्पदादि क्विप् । तपः स्रग्मायामेधासो दिक्षिति निपातनात् सृजेरमागमः कुत्वं च । दृशिग्रहणं प्रयोगानुसरणार्थम् । तेन न सर्वस्मादेते प्रत्यया भवन्ति । निरुक्तपदादपि भवन्ति । साधु धर्मशीलेऽपि क्वचित् क्विप् भवति । विभ्राट् । भाः । भूः । विद्युत् । उर्क् । पूः । प्रावस्तुत् । विष्यन्तरं च भवति । क्वचिद्दीर्घश्च । जूः । स्रूः । स्रोः । आयतस्नूः । कटप्रूः । क्वचिद्दीर्घयजिगमाश्च । वाक् । प्राट् । शब्दप्राक् । तत्त्वप्राट् । क्वचिद्द्विर्वचने च । दिद्युत् । जगत् । जुहोतेर्द्विर्वचनदीर्घत्वे च जुहू. दुणातेर्ह्रस्वद्विर्वचने च । ददृत् । दधातेर्ध्यतेर्वा धी. । इति दृश्यत इत्यपि बहुलमित्येव स्मार्ष्यते ।

स्यदाद्यन्यसमानादृगौणाद् दृशेराप्येक्विकट्कसाः ॥४।३।१८०॥ स्यदादेरन्यशब्दात्समानशब्दाच्च गौणादुपमेयवृत्तेः सुबन्ताद् दृशेर्धातोराप्ये कर्मणि क्विप् कट् कस इत्येते प्रत्यया भवन्ति । स्य इव दृश्यते स्यादृक् । स्यादृशः । स्यादृशी । स्यादृक्षः । तादृक् । तादृशः । तादृशी । तादृक्षः । अन्यादृक् । अन्यादृशः । अन्यादृशी । अन्यादृक्षः । सदृक् । सदृशः । सदृशी । सदृक्षः । कसमपि दितं मन्यते । वचनभेदादयमारम्भः । स्यदादन्यसमानादिति किम् ? वृक्ष इव दृश्यते । गौणादिति किम् ? स दृश्यते । आप्य इति किम् ? स इव पश्यति ।

कर्तुर्णिन् ॥४।३।१८१॥ कर्तृवाचिनो गौणात्सुबन्तात्परादातोर्णिन्प्रत्ययो भवति । उष्ट्र इव क्रोशति उष्ट्रक्रोशी । उष्ट्रक्षरावी । रासभरावी । खरनादी । सिंहनर्दी । कर्तुरिति किम् ? शालीनिव भुङ्क्ते कोद्रवान् । अजानिव भक्षयति माषान् । गौणादिति किम् ? उष्ट्रः क्रोशति ।

शीलेऽजातेः ॥४।३।१८२॥ शीलेऽर्थे वर्तमानाद्धातोः सुबन्तादजातिवाचिनः पराण्णिन्प्रत्ययो भवति । उष्णभोजी । शीतभोजी । उदासारिण्यो गावः । प्रत्यासारिण्यो गावः । प्रस्थायी । प्रतिष्ठायी । प्रयायी । प्रतियायी । शील इति किम् ? उष्णभोजः । अजातेरिति किम् ? ब्राह्मणानामन्त्रयिता । शालिभोक्ता । उपभोक्ता । सम्भोक्तेत्यनभिधानान्न भवति ।

व्रताभीक्ष्ण्ये ॥४।३।१८३॥ सुबन्तात्पराद्धातोर्व्रते आभीक्ष्ण्ये च गम्यमाने णिन्प्रत्ययो भवति । व्रत शास्त्रीयो नियमः । आभीक्ष्ण्यं पौनःपुन्यम् । तात्पर्यमासेवा । व्रते—पार्श्वशायी । स्वपिडलशायी । अश्राद्धभोजी । अलवणभोजी । तदन्यपरिवर्जनमिहं व्रतं गम्यते । आभीक्ष्ण्ये । कषायपायिणो गान्धाराः । क्षीरपायिण उशीनराः । सौवीरपायिणो वाह्लीकाः । बहुलाधिकारान् कुल्माषखादा इत्यत्र न भवति । अशीलार्थं आरभ्यर्थं च वचनम् ।

साधौ ॥४।३।१८४॥ साधावर्थे वर्तमानाद्धातोः सुबन्तात्पराण्णिन्प्रत्ययो भवति । साधुकारी । साधुदायी ।

ब्रह्मवादी ॥४।३।१८५॥ ब्रह्मवादीति ब्रह्मकर्मपूर्वाद्वदेर्णिन्प्रत्ययो निपात्यते । अशीलार्थमसमभिव्याहृत्यर्थं च । ब्रह्मवादिनो वदन्ति ब्रह्माणं ब्रह्मवादिनम् ।

व्यभेर्भुवो भूते ॥४।३।१८६॥ वि अभि इत्येताभ्यां सुबन्ताभ्यां पराद् भू इत्येतस्माद्धातोर्भूतेऽर्थे वर्तमानाण्णिन्प्रत्ययो भवति । विभूतवान् विभावी । अभिभूतवान् अभिभावी । भूत इति किम् ? विभवति । अभिभवति ।

करणाद्यजः ॥४।३।१८७॥ करणवाचिनः सुबन्तात् पराद्यजेर्धातोर्भूतेऽर्थे वर्तमानाण्णिन्प्रत्ययो भवति । अग्निष्टोमेनेष्टवान् अग्निष्टोमयाजी । अग्निष्टोमयाज्यस्य पुत्रो जनिता । विश्वजिदस्य पुत्रो जनितेति

भविष्यतास्य विशेष्येण सम्बध्यमानमग्न्यग्निष्टोमयाज्यादिपदं विशेषणं भूतार्थमेव । अग्निष्टोमेन यक्ष्यमाणो अनिनेति हि प्रयोगेऽव्यन्तरमेव गम्यते एवमेतदुक्तं भवति पठन् गतः । पठनगमिष्यति । आविक्रुत्यमाशीत् । आविक्रुत्यं भवति । सोमानाशीत् । सोमान् भविष्यतीति स्वकालमेव विशेषणं विशेष्येण सम्बध्यते ।

इन्धिक्रयः कर्मणः कुरस्ये ॥४।३।१८८॥ कर्मणः सुपः पराद्धिक्रयः विपूर्वात्क्रीणातेरर्थे वर्तमानात्कुरस्ये कर्तरि इन्प्रत्ययो भवति । तैलं विक्रीतवान् तैलविक्रयी । घृतविक्रयी । रसविक्रयी । सोमविक्रयी । कुरस्य इति किम् ? धान्यविक्रयः ।

ब्लो णिन् ॥४।३।१८९॥ कर्मणः सुबन्तात्पराद्धन्तेर्भूतेऽर्थे वर्तमानात्कुरस्ये कर्तरि णिन्प्रत्ययो भवति । पितृघाती । मातृघाती । पितृव्यघाती । मातुलघाती । कुरस्य इति किम् ? चोरं हतवान् । ब्रह्मणं हतवान् ।

ब्रह्मभ्रूणवृत्राद्विच्वप् ॥४।३।१९०॥ ब्रह्म भ्रूण वृत्र इत्येतेभ्यः पराद्धन्तेर्भूतेऽर्थे क्विबेव प्रत्ययो भवति । ब्रह्म हतवान् ब्रह्महा । भ्रूणहा । वृत्रहा । अन्यः प्रत्ययो णिन् वा न भवति । पुनः ब्रह्मभ्रूणवृत्रादेव हन्तेर्भूते क्विप् भवति । इह न भवति । पुरुषं हतवान् । आखुहा विडाल इत्यभूते पुनः ब्रह्मभ्रूणवृत्राद्धन्तेरेव भूते क्विप् भवति । इह न भवति ब्रह्माघोतवान् । पुनः ब्रह्मभ्रूणवृत्राद्धन्तेर्भूत एव क्विप् भवति । इह न भवति ब्रह्माणं हन्ति ब्रह्माणं हनिष्यति । तन्त्रेण इमे चत्वारो योगा मन्त्रकृत्रनिब्विप्रित्येव सिद्धे नियमार्था वेदितव्याः ।

सुकर्मपापमन्त्रपुण्यात् कृञः ॥४।३।१९१॥ सु इत्येतस्मात् कर्म पाप मन्त्र पुण्य इत्येतेभ्यश्च कर्मभ्यः सुबन्तेभ्यः परात् कृञो भूते क्विबेव प्रत्ययो भवति । सुष्ठु कृतवान् सुकृत्, कर्मकृत् । पापकृत् । मन्त्रकृत् । पुण्यकृत् । अन्यः प्रत्ययो न भवति । पुनः सुकर्मपापमन्त्रपुण्यात् कृञ एव भूते क्विप् । इह न भवति । मन्त्रमधीतवान् । पुनः सुकर्मपापमन्त्रपुण्यात्कृञो भूत एव क्विप् । कर्म करोति । कर्म करिष्यति । सुकर्ममन्त्रपापपुण्यादेवेति धातुनियमो नेष्यते । शास्त्रकृत्, तीर्थकृदित्यपि हि भवति । केचिदिह धातुनियममपीच्छन्ति । शास्त्रकृत्तीर्थकृदित्यभूत इत्याहुः । इमेऽपि पूर्ववत् क्विपि सिद्धे तन्त्रेण नवचतुश्चत्वारो वा नियमार्था योगा वेदितव्याः ।

सोमात्सुञः ॥४।३।१९२॥ सोमात्कर्मणः सुबन्तात्पराट् सुनोतेर्भूते क्विबेव प्रत्ययो भवति । सोमं सुतवान् सोमसुत् । पूर्ववदत्रापि चतुर्विधो नियमः । तेनान्यः प्रत्ययोऽत्र न भवति । इहापि क्विप् न भवति । सुरां सुतवान् । सोमं पीतवान् । सोमं सुनोतीति ।

अग्नेश्चेः ॥४।३।१९३॥ अग्नेः कर्मणः सुबन्तात्पराच्चिनोतेर्भूते क्विप्प्रत्ययो भवति । अग्निं चितवान् अग्निचित् । अत्रापि चतुर्विधो नियमः तेनान्यः प्रत्ययो न भवति । इहापि क्विप् न भवति । इष्टकाश्चितवान् । अग्निं हुतवान् । अग्निं चिनोतीति । मध्येऽपवादाः पूर्वान्विधीन् बाधन्ते नोत्तरानिति हन्त्यादिक्विपोऽप्यादिरेव बाध्यते, न क्तवतुः ।

कर्मण्यण्यर्थे ॥४।३।१९४॥ कर्मणः परात् चिनोतेर्भूते कर्मण्यण्यर्थेऽभिधेये क्विप्प्रत्ययो भवति । श्येन इव श्येनः । श्येनश्चितः श्येनचित् । अण्यर्थं इष्टकादय उच्यते । बहुलाधिकाराद्बहुविषय एवायं द्रष्टव्यः ।

दृशः क्वनिप् ॥४।३।१९५॥ कर्मणः पराद्दृशो भूते क्वनिप्प्रत्ययो भवति । मेरुं दृष्टवान् मेरुदृश्वा । परलोकदृश्वा । मन्त्रकृत्रनिब्विप्रित्येव सिद्धे प्रत्ययान्तरनिवृत्त्यर्थं वचनम् । दृशिग्रहणस्यैव प्रपञ्चः ।

राजसहाद्भ्राजयुधिभ्याम् ॥४।३।१९६॥ राजन् इत्येतस्मात्कर्मणः सहशब्दाच्च पराद्भ्राजयुधेरेव धातोर्भूते क्वनिप्प्रत्ययो भवति । वचनभेदाद्यथासङ्ख्यमत्र नेष्यते । राजानं कृतवान् राजकृत्वा । राजानं शोभितवान् राजभ्रुवा । सह कृतवान् सहकृत्वा । सह युद्धवान् सहयुध्वा । युधिर्योधनेऽर्थे सकर्मको भवति । अकर्मका अपि हि धातवो ध्यर्थे वर्तमानाः सकर्मका भवन्ति । यथा ग्रामं गमयन्तीति । प्रत्ययान्तरनिवृत्त्यर्थं वचनम् ।

---

१. कृञ एव भूते क० म० ।

अनोऽनौ डः ॥४।३।१९७॥ कर्मणः परादनुपूर्वाज्जनेर्धातोर्भूतेऽर्थे डप्रत्ययो भवति। अजरवादः। पुमांसमनुजातः पुमनुजः।

सप्तम्याः ॥४।३।१९८॥ सप्तम्यन्तात्परराज्जनेर्धातोर्भूते डप्रत्ययो भवति। उपकरे जाताः उपकरजाः। कन्दुरायां जातो मन्दुरजः। अप्सु जातम् अब्जम्। अप्सुजम्।

अजातेः पञ्चम्याः ॥४।३।१९९॥ पञ्चम्यन्तादजातिवाचिनः सुपो जनेर्भूते डप्रत्ययो भवति। बुद्धेर्जातो बुद्धिजः संस्कारः। शोकजः। दुःखजः। विषादजः। अजातेरिति किम्? अश्वाज्जातः। हस्तिनो जातः।

क्वचित् ॥४।३।२००॥ क्वचिदन्यस्मिन्नपि विषये डो भवति। लक्ष्यानुसारेणान्यस्मादपि सुबन्तात्-पराज्जनेर्धातोर्भूते डप्रत्ययो भवति। किंजातेन किंजः। अलं जातेन अलंजः। न जातोऽजः। अविजाः। उपजाः। परिजाः केशाः। शशास कृत्स्नेदिषु कर्मसु प्रजाः। अनुजा विनयार्थशैलभर्तुः। स्त्रीजमनृतम्। ब्राह्मणजः पशुवधः। क्षत्रियजं युद्धम्। अब्जम्। अन्यस्मिन्कर्त्तर्यपि क्वचिदर्थे भवति। पुंसा अनुजाता पुंसानुजा। अन्यस्मादपि धातोर्भवति, वरमाहन्ति वराहः। परिज्ञाता परिज्ञा। आज्ञा। उपज्ञा। अ। क। खम्। भम्।

जृषोऽतृ ॥४।३।२०१॥ जृषेर्धातोर्भूते अतृप्रत्ययो भवति। जरन्। जरन्तौ। जरन्तः।

सुयजो क्वनिप् ॥४।३।२०२॥ सु यज् इत्येताभ्यां धातुभ्यां भूते ड्वनिप्प्रत्ययो भवति। सुत्वा[1]। सुत्वानौ। सुत्वानः। यज्वा। यज्वानौ। यज्वानः। यज्वसुत्वनावेवंस्वनिसिद्धयोर्भूते नियमार्थं वचनम्। वृषिग्रहणस्यैव प्रपञ्चः।

भस्मादयः ॥४।३।२०३॥ भस्मन्निष्पेवमादयः शब्दा मन्नादिप्रत्ययान्ता भूते धात्वर्थे साधवो वेदितव्याः। भसितं तदिति भस्म। चरितं तत्रेति चर्म। वृत्तं तत्रेति वर्त्म। भस्मादयः प्रयोगतोऽनुसर्तव्याः।

कक्वत् ॥४।३।२०४॥ धातोर्भूतेऽर्थे वर्तमानात् क्त क्तवत् इत्येतौ प्रत्ययौ भवतः। कृतः। कृतवान्। प्रकृतः कटं देवदत्तः। प्रकृतं कटो देवदत्तेन। इत्यादि कर्मणि तस्य भूतत्वादभूतत्वेऽपि समुदायस्य भवति।

लुङ् ॥४।३।२०५॥ भूतेऽर्थे वर्तमानाद्धातोर्लुङ्प्रत्ययो भवति। अकार्षीत्। अहार्षीत्।

रात्रौ वसोऽन्ययामास्वापेऽद्य ॥४।३।२०६॥ रात्रौ भूतेऽर्थे वर्तमानाद्वसतेर्धातोरद्यतनलुङ्प्रत्ययो भवति। लङोऽपवादः। अन्ययामास्वापे। यस्यां रात्रावसौ वसिर्वर्तते। तद्रात्रेरन्ययामस्वप्तरि चेत्कर्तरीयसौ भूतत्वर्थो भवति। क्व भवानुषितः। अमुत्रावात्सम्। रात्र्यन्तयामे तु मुहूर्तमपि स्वापे लङेव। अमुत्रावसम्। अद्येति प्रयोगकालनियमः। तेन यत्रासावन्ययो यामस्तदहरेव प्रयोगो न दिवसान्तरे।

अनद्यतने लङ् ॥४।३।२०७॥ आन्ह्यःश्व्यादुत्थानादान्ह्यःश्व्यात्संवेशनादेशोऽद्यतनः कालः। अहरुभयतोऽर्धरात्रं वा न विद्यतेऽद्यतनोऽस्मिन्तस्मिन्भूतेऽर्थे वर्तमानाद्धातोर्लुङ्प्रत्ययो भवति। अपचत्। अपठत्। बहुभ्र हि-परिग्रहः किम्? अद्य ह्योऽमुष्मिन्नहीति क्वामिथे भूतसामान्ये च मा भूत्। अद्यतनेऽप्यद्यतनो मुहूर्तादि सामान्यं भवतीति अद्यतने न भवति। अगमाम घोषानापाम पयः। जम्बूद्वीपे विदेहेऽभूदितः सप्तमजन्मनीति भूत्वाऽनद्यतनेऽपि भूतमात्रविवक्षायां लुङ्।

ख्यातेऽदृश्ये ॥४।३।२०८॥ भूतेऽनद्यतने ख्याते लोकविज्ञाते दृश्ये प्रयोक्तुः सम्बन्धदर्शने वर्तमानाद्धातोर्लुङ्प्रत्ययो भवति। लिडपवादः। अरुणद्देव पाण्डवम्। अदहदमोघवर्षोऽरातीन्। ख्यात इति किम्? चकार कटं देवदत्तः। दृश्य इति किम्? अघान कंसं किल वासुदेवः। अनद्यतन इति किम्? उदगादादित्यः।

---

१. स स्यादलक्षः किमश्च यस्य निरर्थकम्, क० म० टि०। २. कृत्यादिषु क० म०। ३. सुत्वा स्वभिषवादूर्ध्वम्, इति वैजयन्ती। क० म० टि०।

स्मृत्यर्थैऽयदि लृट् ॥४।३।२०९॥ स्मृत्यर्थे धातावुपपदे सति भूतानद्यतनेऽर्थे वर्तमानाद्धातोर्लृट्प्रत्ययो भवति अयदि न चेत्तत्र यच्छब्दः प्रयुज्यते। अभिजानासि देवदत्तः कदमीरेषु वत्स्यामः। गमिष्यामः। अभिजानामि नभस्तिलकपर्वतम्। स्मरसि बुध्यसे चेतयसि कलिङ्गेषु वत्स्यामः। अयदीति किम्? अभिजानासि देवदत्त यत्कलिङ्गेष्ववसाम।

साकाङ्क्षे वा ॥४।३।२१०॥ अपेक्षा आकाङ्क्षा तद्वान् साकाङ्क्षः, साकाङ्क्षे भूतानद्यतनेऽर्थे वर्तमानाद्धातोः स्मृत्यर्थे उपपदे लृट्प्रत्ययो वा भवति। अयदीति नानुवर्तते। तेन यद्ययदि च परत्वादयमेव विकल्पः। अभिजानासि देवदत्त कलिङ्गेषु वत्स्यामः तत्रौदनं भोक्ष्यामहे। अभिजानासि देवदत्त कलिङ्गेष्ववसाम तत्रौदनमभुञ्ज्महि। अभिजानासि देवदत्त यत्कलिङ्गेषु वत्स्यामस्तत्रौदनं भोक्ष्यामहे। अभिजानासि देवदत्त यत्कलिङ्गेष्ववसाम तत्रौदनमभुञ्ज्महि। तत्र वासः भोजने लक्षणलक्षणतया परस्पराकाङ्क्षे। वासेन हि भोजनं लक्ष्यते।

अत्यन्तापह्नवे लिट् ॥४।३।२११॥ अपह्नवो निह्नुतिः, अपलापोऽनभ्युपगमः। अत्यन्तापह्नवो यत्सदसद्वा न किञ्चिदभ्युपैति सर्वं मूलतोऽपलपति तत्र भूतानद्यतनेऽर्थे वर्तमानाद्धातोर्लिट्प्रत्ययो भवति। लङोऽपवादः। किं त्वं गत्वा कलिङ्गेषु स्थितोऽसि? कः कलिङ्गान् जगाम। नाहं कलिङ्गान् जगाम। नाहं कलिङ्गान् ददर्श। अत्यन्तग्रहणादेकदेशापह्नवे लङेव। नाहं कलिङ्गेष्वभ्रमतिष्ठम्।

परोक्षे ॥४।३।२१२॥ परोक्षे भूतेऽनद्यतनेऽर्थे वर्तमानाद्धातोर्लिट्प्रत्ययो भवति। परोक्षं यत्प्रयोक्त्रा न साक्षादधिगतम्। चकार। जहार। सुप्तोऽहं किल विललाप। मत्तोऽहं किल विचचार। चिन्तयन् किलाहं शिरः कम्पयाम्बभूव। अङ्गुलिं स्फोटयामास। अभूवन्तापसाः केचित्पाण्डुपत्रपलाशिनः पारिव्राज्यं तदाऽऽदत्त मरीचिश्च तृषार्दितः इति। भूतानद्यतनपरोक्षेऽपि भूतमात्रस्य भूतानद्यतनमात्रस्य च विवक्षाया लुङ्लङौ भवतः। न हि वस्तुनि सम्भविनो धर्माः सर्वे विवक्षिताः भवन्ति। योगविभाग उत्तरार्थः।

ह शश्वत्पञ्चाब्द्यन्तःप्रच्छ्यै लङ् च ॥४।३।२१३॥ ह शश्वदित्येतयोरुपपदयोः पञ्चाब्द्यन्तः प्रच्छ्यै च भूतानद्यतने परोक्षेऽर्थे वर्तमानाद्धातोर्लङ् लिट् च प्रत्ययो भवतः। पञ्चानामब्दानां वर्षाणां समाहारः पञ्चाब्दी तस्यामन्तर्यः पृच्छ्यते स पञ्चाब्द्यन्तःपृच्छ्यः। अभिजानासि देवदत्त इति हाकरोत्। इति ह चकार। शश्वदकरोत्। शश्वच्चकार। किमगच्छद् देवदत्तः? अगच्छद् देवदत्तः। किं जगाम देवदत्तः? जगाम देवदत्तः। ह शश्वत्पञ्चाब्द्यन्तःप्रच्छ्य इति किम्? जघान कंसं किल वासुदेवः। लङ् परोक्षापरोक्षयोः सामान्यशब्दो न परोक्षं विशेषं बोधयति तत्र विशेषप्रतिपत्तेरन्यापेक्षमिति पूर्वेणैव सिद्धम्। स्मृत्यर्थे लृङ्बाधनार्थं वचनम्। अतएव लङ्ग्रहणमन्यथा वेत्युच्यते।

पुरि लुङ्लङ् ॥४।३।२१४॥ परोक्ष इति निवृत्तम्। भूतानद्यतनेऽर्थे वर्तमानाद्धातोः पुरशब्द उपपदे लुङ् वा भवति। अवात्सुरिह पुरा छात्राः। आसन्निह पुरा छात्राः। परोक्षे किट्। ऊषुरिह पुरा छात्राः। इति ह पुराऽकार्षीत्। शश्वत्पुराऽकार्षीत्। पुरि लुङ्वचनात् स्मृत्यर्थे ह शश्वत्सु सामान्यविवक्षाया लुङ्न भवति।

स्मे च लट् ॥४।३।२१५॥ भूतानद्यतनेऽर्थे वर्तमानाद्धातोः स्मशब्दे पुराशब्दे चोपपदे लट्प्रत्ययो भवति। पृच्छति स्म पुरोषसम्। वसन्तीह पुरा छात्राः। एवं पुराशब्दे चत्वारो लकारा भवन्ति। स्म पुरायोगे तु परत्वाल्लडेव। माणवकेन स्म पुरा दीयते।

लृडी पृष्टोक्तौ ॥४।३।२१६॥ अनद्यतन इति निवृत्तम्। पृष्टस्योक्तिरुत्तरं प्रतिवचनमित्यर्थः। तत्र भूतेऽर्थे वर्तमानाद्धातोर्लृङनुषञ्ज उपपदे लट्प्रत्ययो भवति। किमकार्षीः कटं देवदत्त? ननु करोमि भोः। किमवोचः किञ्चिद् देवदत्त? ननु ब्रवीमि भोः। पृष्टोक्ताविति किम्? नन्वकार्षीन्माणवकः कटम्। वर्तमाना-

---

१. -वर्षाग्रहणे—क० म०। २. वेत्यं चेत क० म०।

विवक्षैवेयं तथाहि शत्रानशावपि दृश्येते । ननु कुर्वन्तं मा पश्य । ननु कुर्वाणं मा पश्येति तत्रोत्तरेणैव सिद्धम् । भूतविवक्षाव्युदासार्थं वचनम् । अन्यथा हि लुङाद्यपि प्रसज्येत । यथा किमकार्षीः कटं देवदत्त ? न करोमि । नाकार्षम् । अहं नु करोमि । अहं स्वकार्षमिति ।

सति ॥४।३।२१७॥ सन्विद्यमानो वर्तमान इत्यर्थः । वर्तमानाद्धातोर्लट्प्रत्ययो भवति । पूर्वापरीभूतावयवा क्रिया समुदायरूपा पाकादिस्तस्याः सैव सत्ता [2]यावताऽवयवसत्त्वम् । पचति । पठति ।

पूङ्यजः शानः ॥४।३।२१८॥ पूङो यजेश्च धातोः सत्यर्थे वर्तमानात् शानप्रत्ययो भवति । पवमानः । यजमानः । आनशानः । षष्ठीसमासः । न च यजेरफलेशे शोऽस्तीति वचनम् ।

वयः शक्तिशीले ॥४।३।२१९॥ धातोः सत्यर्थे वर्तमानाद् वयसि शक्तौ शीले च गम्यमाने शानप्रत्ययो भवति । वयः प्राणिना कालकृताऽवस्था यौवनादिः । शक्तिः सामर्थ्यम् । शीलं स्वाभाविकम् । वयसि–कतीह शिखण्डं वहमानाः । कतीह कवचं पर्यस्यमानाः । कतीह कण्डूस्निघ्नानाः । यस्मिन्वयसि शिखण्डिवहनादि भवति तद्विह वयो गम्यते । शक्तौ–कतीह पचमानाः । कतीह समश्नानाः । कतीह पाके समर्थाः इत्यर्थः । शीले–कतीहाञ्जानाः । कतीह मण्डयमानाः । अञ्जनशीला मण्डनशीला इत्यर्थः ।

धारीरु. शत्रकृच्छ्रे ॥४।३।२२०॥ अकृच्छ्रः सुखसाध्यः अकृच्छ्रे सत्यर्थे वर्तमानाद्धारेरिरुदव धातोः शतृप्रत्ययो भवति । धारयन्नाचारप्रकल्पम् । अधीयन् पुण्डरीकम् । अकृच्छ्र इति किम् ? कृच्छ्रेण धारयति । कृच्छ्रेणाधीयते ।

सुञ्द्विषार्हस्तव्यरिप्रशस्ये ॥४।३।२२१॥ सुञ् द्विष अर्ह इत्येतेभ्यो धातुभ्यः सत्यर्थे वर्तमानेभ्यो यथाक्रमं सत्रिणि अरौ प्रशस्ये च कर्तरि शतृप्रत्ययो भवति । सर्वे सुन्वन्तो यजमानाः सत्रिण उच्यन्ते । द्विषन् शत्रुरित्यर्थः । अर्हन् विद्याम् । अर्हन् पूजाम् । विद्यापूजार्हतया कर्ता प्रशस्यते । सत्यरिप्रशस्य इति किम् ? सुरां सुन्वन्ति । पतिं द्वेष्टि । चोरो वधमर्हति ।

तृ साधुधर्मशीलेषु ॥४।३।२२२॥ साधो धर्मशीले च सत्यर्थे वर्तमानाद्धातोस्तृप्रत्ययो भवति । धर्मानुवृत्त आचारः । साधौ–कर्ता विकटः । कर्ता खेदः । साधु करोति । साधु गच्छतीत्यर्थः । धर्मे–बधूर्मुण्डो मुण्डयितारः । श्राविष्ठायनाः । श्राद्धे सिद्धेऽन्नमपहर्तरि आहूकाराः । मुण्डाद्येतेषां कुलधर्म इत्यर्थः । शीले–कर्ता कटान् । वदिता जनवादान् । करणं वदनं चास्य शीलमित्यर्थः । नप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तार औणादिका पित्रमात्रादिवत् । अतएव नैषां तृप् । स्वसृनप्तृनेष्ट्रिति दीर्घविधौ पृथगुपादानम् । बहुवचनं लवपत्पद इत्यादावयवासंख्यार्थम् ।

भूवृतूवृधूभ्राजसहचररुचपत्रपालङ्कृन्निराकृञ् प्रजनोत्पत्योत्पदोन्मदाविष्णुः ॥४।३।२२३॥ साधुधर्मशीले सत्यर्थे वर्तमानेभ्यः भू वृतू वृधू भ्राज सह चर रुच अपत्रप अलंकृञ् निराकृञ् प्रजन उत्पत उत्पद उन्मद इत्येतेभ्यः इष्णुक्प्रत्ययो भवति । भविष्णुः । सर्वेषां प्रभविष्णुः । राजन्यानां मनुष्योभ्यः । वर्तिष्णुः । वर्द्धिष्णुः । भ्राजिष्णुः । भ्राजिष्णुना लोहितचन्दनेन । सहिष्णुः । चरिष्णुः । रोचिष्णुः । अपत्रपिष्णुः । अलंकरिष्णुः । निराकरिष्णुः । प्रजनिष्णुः । उत्पविष्णुः । उत्पतिष्णुः । उत्पदिष्णुः ।

भूजेः स्नुक् ॥४।३।२२४॥ साधुधर्मशीले सत्यर्थे वर्तमानाभ्यां भू जि इत्येताभ्यां धातुभ्यां स्नुक् प्रत्ययो भवति । भूष्णुः । जिष्णुः ।

स्थास्त्र्याः स्नुः ॥४।३।२२५॥ साधुधर्मशीले सत्यर्थे वर्तमानाभ्यां स्थ स्त्रा इत्येताभ्यां धातुभ्यां स्नुप्रत्ययो भवति । स्थास्नुः । स्त्रास्नुः । प्रत्ययान्तरकरणं स्वार्थम् तस्य हि कितीकारः स्यात् ।

---

१. न ह्यन्यं करोमि अहमात्मकार्यम्, इति क० म० । २. यावतावयवसत्त्वम्, क० म० टि० । ३. परिनीतामित्यर्थः, क० म० ।

गृधिधृषिक्षिप्वञः क्नुः ॥४।३।१२६॥ साधुधर्मशीले सत्यर्थे वर्तमानेभ्यो गृधि धृषि क्षिप् वञ् इत्येतेभ्यो धातुभ्यः क्नुप्रत्ययो भवति । गृध्नुः । धृष्णुः । क्षिप्नुः । वस्नुः ।

सन्भिक्षाशंस्विन्दीच्छादुः ॥४।३।१२७॥ साधुधर्मशीले सत्यर्थे वर्तमानेभ्यः सन्प्रत्ययान्ताद्भिक्ष आशंस् विन्द इच्छ इत्येतेभ्यश्च उप्रत्ययो भवति । चिकीर्षुः । जिहीर्षुः । भिक्षुः । आशंसुः । विन्दुः । इच्छुः । सन्निति प्रत्ययग्रहणं न धातोः । आशंसितिः आङः शसुङ इच्छायामित्यस्य ग्रहणं न शंसू स्तुतावित्येतस्य विन्दिति विद ज्ञान इत्येतस्य प्रत्ययसन्नियोगे निपातनान्नकारः । इच्छेति इच्छतेश्छकारः ।

शृवन्द्वारुः ॥४।३।१२८॥ शृ वन्द इत्येताभ्यां साधुधर्मशीले सत्यर्थे वर्तमानाभ्याम् आरुप्रत्ययो भवति । शरारुः । वन्दारुः ।

सहाशडेट् सेरुः ॥४।३।१२९॥ सह वा शद् षेट् सि इत्येतेभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यः रुप्रत्ययो भवति । सहरुः । दारुः । शद्रुः । धारुः । सेरुः ।

निद्रातन्द्राश्रद्धास्पृहिगृहिपतिशीङ्दयादालुः ॥४।३।१३०॥ निद्रा, तन्द्रा, श्रद्धा, स्पृहि, गृहि, पति, शीङ्, दय इत्येतेभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्य आलुप्रत्ययो भवति । निद्रालुः । तन्द्रालुः । श्रद्धालुः । स्पृहयालुः । ग्रहयालुः । पतयालुः । शयालुः । दयालुः । निद्रातन्द्रेति निसन्पूर्वात् द्रायतेर्दकारस्य नकारो निपातनात् श्रद्धेति श्रत्पूर्वो धाः । स्पृहिगृहिपतयश्चुरादिषु कथादयः ।

सहिवहिचलिपापतो यङ इः ॥४।३।१३१॥ सहि वहि चलि पापत् इत्येतेभ्यो यङन्तेभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यः इप्रत्ययो भवति । सासहिः । वावहिः । चाचलिः । पापतिः । पापदिति पतेर्यङ् प्रकृते निर्देशो नियमभावार्थः ।

वदिसन्निचक्रिजक्षिनेमिः ॥४।३।१३२॥ वदि सन्नि चक्रि जक्षि नेमि इत्येते शब्दा इप्रत्ययान्ताः साधुधर्मशीले सत्यर्थे निपात्यन्ते । वदीति द्युवाग्रः इः किद् द्विर्वचनं च । वदिः । एवं 'सू' इत्येतस्य सन्निः । कुलवक्रिः । जनेर्जक्षिः । नेमीति नमेरेत्वं च नेमिः ।

भूवृषस्थाशूहन्कमगमादुकण् ॥४।३।१३३॥ भू वृष स्था शू हन् कम् गम् इत्येतेभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यः उकण् प्रत्ययो भवति । प्रभावुकः । वर्षुकः । प्रवर्षुकः पर्जन्यः । उपस्थायुकः । गुणानधिष्ठायुकः । प्रशारुकः । आघातुकः । कामुकः । आगामुकः ।

लषपतपदः ॥४।३।१३४॥ लष पत् पद् इत्येतेभ्यः धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यः उकण् प्रत्ययो भवति । अपलाषुका वृषली । अपलाषुकं वृषलं सङ्गतं प्रपातुकामर्भः, उपपादुकः सत्वः, योगविभाग उत्तरार्थः ।

क्रुद्भूषार्थसूयुजवल्गुशुभश्चानः ॥४।३।१३५॥ क्रुध् क्रोधो भूषाऽलङ्कारश्चार्थो येषां तेभ्यः सू गृध जवल् जु शुभ इत्येतेभ्यः लषपतपदिभ्यश्च धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यः अनप्रत्ययो भवति । क्रोधनः । रोषणः । भूषणः । मण्डनः । सरणः । गर्धनः । उज्वलनः । जवनः । शोभनः । लषणः । पतनः । पदनः । अयतिर्वेगे संस्कारे वर्तते । पदेरिङतो न वचनम् सकर्मकार्थमुत्तरज्ञानवचने ह्यकर्मकाधिकारः । एकेऽवादविषये साध्वार्थं सत्सर्थो समत्वान्न भवतीति ज्ञापनार्थम् उकणा ह्यस्य बाधायां प्राप्तायामिदं वचनम् । तेन चिकीर्षिता कटम्, अलङ्करणा कन्यामिति न भवतीति प्रायिकं चेदं ज्ञापकं विज्ञेयम् । मन्ता खेलं[1] भविता, जागरिता परराष्ट्रान् । अवलापुकं वृषलसङ्गतम् । विकरणः । भासनः । कमना युवतिः । कम्पना शाखेति हि दृश्यते तथा चोत्तरत्र दीप्तिग्रहणम् । अन्यथा रेणाऽनोऽस्य बाध्यत इति तदर्थकं स्यात् ।

---

१. खेला, क० म० ।

रुशदादिभ्यः सार्वधातुके ॥४।३।२३६॥ रुशब्दे चल कम्पन इत्येतदर्थेभ्योऽकर्मकेभ्योऽविद्यमानकर्मभ्योऽविवक्षितकर्मभ्यश्च धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्योऽनप्रत्ययो भवति। रुणः। शब्दनः। आक्रोशनः। कथनः। चलनः। जापनः। अकर्मकादिति किम्? परीता विद्याम्।

हलाद्यन्तान्डिदितः ॥४।३।२३७॥ डित इति तदेव धातोर्हलन्तादकर्मकात् साधुधर्मशीले सत्यर्थे वर्तमानादनप्रत्ययो भवति। वृतुङ्—वर्तनः। वर्धनः। शर्धनः। स्पर्द्धि—स्पर्द्धनः। गुपि—जुगुप्सनः। मीमांसनः। चेतनः। हलाद्यन्तादिति किम्? एधिता। वर्ता। डिदित इति किम्? पक्ता। हलाद्यन्त एक एव विज्ञायते। तेन यथासंख्यं च न भवति। अकर्मकादिति किम्? वसिता वस्त्रम्। एकेऽत्राकर्मकादिति नापेक्षन्ते।

न दीक्षादीप्सूदृणि ञ्यः ॥४।३।२३८॥ दीक्ष् दीप् सूद् इत्येतेभ्यो णिजन्तेभ्यो यकारान्तेभ्यश्च धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्योऽनप्रत्ययो न भवति। दीक्षिता। दीपिता। सूदिता। णिज—हस्तयिता। उत्पुच्छयिता। इदं प्राप्तिमतोर्णेरुपलक्षणम्। तेन भावयिता। यः—वनूयिता। क्षमायिता। मधुसूदनः। रिपुसूदनः। बलसूदनः। इति नन्द्यादिषु द्रष्टव्याः।

द्रम्क्रमो यङः ॥४।३।२३९॥ द्रम् क्रम् इत्येताभ्यां यङन्ताभ्यां धातुभ्यां साधुधर्मशीले सत्यर्थे वर्तमानाभ्यामनप्रत्ययो भवति। दन्द्रमणः। चङ्क्रमणः। सकर्मकार्थं य इति प्रतिषेधनिवृत्त्यर्थं वचनम्। अतो लुग्विधप्रत्यये विषयभूते एव भवति।

यज्वदृशजपादूकः ॥४।३।२४०॥ यज् वद दृश् जप् इत्येतेभ्यो यङन्तेभ्यो धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्य ऊकप्रत्ययो भवति। यायजूकः। वावदूकः। दन्दशूकः। जञ्जपूकः।

जागुः ॥४।३।२४१॥ जागृ इत्येतस्माद्धातोः साधुधर्मशीले सत्यर्थे वर्तमानादूकप्रत्ययो भवति। यङ इति निवृत्तम्। जागरूकः।

शमष्टक्युषद्विषद्रुहदुहयुजत्यजरजभजाभ्याहनाऽनुरुधो घिनञ् ॥४।३।२४२॥ शमादिभ्योऽष्टाभ्यो दुष द्विष द्रुह दुह युज त्यज रज भज अभ्याहन अनुरुध इत्येतेभ्यश्च धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यः घिनञ् प्रत्ययो भवति। शमी। दमी। तमी। श्रमी। भ्रमी। क्षमी। क्लमी। वन्दी। प्रवन्दी। दोषी। द्वेषी। द्रोही। दोही। योगी। त्यागी। रागी। भोगी। कल्याणभागी। अभ्याघाती। अनुरोधी। युजिति युज्यतियुनक्तयोर्ग्रहणम्। रजेति निपातनान्न लुक्। अनुरुधेत्यनो रुधि कामे।

आङः क्रीडयम्यस्मुषः ॥४।३।२४३॥ आङः परेभ्यः क्रीड् यम् यस् मुष इत्येतेभ्यो धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यो घिनञ्प्रत्ययो भवति। आक्रीडी। आयामी। आयासी। आमोषी। साध्वादीयाः(दयः) प्रायेण लक्षिप्रकाराः प्रयोगानुसारेण प्रयुज्यन्ते इत्युपसर्गविधयेन भवति। एवमुत्तरत्रापि।

समः पृच्सृजज्वरोऽकर्मकात् ॥४।३।२४४॥ समः परेभ्यः पृच् सृज् ज्वर इत्येतेभ्योऽकर्मकेभ्यो धातुभ्यः साधुधर्मशीलेऽर्थे वर्तमानेभ्यो घिनञ् प्रत्ययो भवति। सम्पर्की। संसर्गी। संज्वारी। अकर्मकादिति किम्? सम्पृणक्ति शाकम्।

वौविचकषकत्थक्लम्भलसः ॥४।३।२४५॥ विअम्बे उपपदे विच कष कत्थ क्लम्भ लस इत्येतेभ्यो धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यो घिनञ्प्रत्ययो भवति। विवेकी। विकाषी। विकत्थी। विक्लम्भी। विलासी।

लापोऽपे च ॥४।३।२४६॥ अपे चोपपदे लपेर्धातोः साधुधर्मशीले सत्यर्थे वर्तमानाद् घिनञ्प्रत्ययो भवति। अपलपतीत्येवं अपलापी। विलापी।

चरोऽतौ च ॥४।३।२४७॥ अतिशब्देऽपे चोपपदे चरेर्धातोः साधुधर्मशीले सत्यर्थे वर्तमानाद् घिनञ्प्रत्ययो भवति। अतिचारी। अपचारी।

लप्सुद्रुमथवदवसः ग्रे ॥४।३।२४८॥ प्र उपपदे लप् सु द्रु मथ वद वस इत्येतेभ्यो धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यो विनल्प्रत्ययो भवति । प्रलापी । प्रसारी । प्रद्रावी । प्रमाथी । प्रवादी । वसतेर्ग्रहणम्, न वस्तेः ।

परेः सृवसहमुहः ॥४।३।२४९॥ परिपूर्वेभ्यः सु वद् वह मुह इत्येतेभ्यस्साधुधर्मशीले सत्यर्थे वर्तमानेभ्यो धातुभ्यो विनल्प्रत्ययो भवति । परिसारी । परिवादी । परिदाही । परिमोही ।

देवो णेश्च ॥४।३।२५०॥ परिपूर्वाद्देवृङ् इत्येतस्मात् ण्यन्तात्केवलाच्च साधुधर्मशीले सत्यर्थे वर्तमानाद् विनल्प्रत्ययो भवति । परिदेवत इति परिदेवी । णेः परिदेवयतीति परिदेवी ।

क्षिपरटः ॥४।३।२५१॥ परिपूर्वाभ्यां क्षिप रट इत्येताभ्यां धातुभ्यां साधुधर्मशीले सत्यर्थे वर्तमानाभ्या विनल्प्रत्ययो भवति । परिक्षेपी । परिराटी ।

वादेश्च वुञ् ॥४।३।२५२॥ परिपूर्वात् वादि इत्येतस्मात् ण्यन्तात् क्षिपरटिभ्यां च साधुधर्मशीले सत्यर्थे वुञ्प्रत्ययो भवति । परिवादकः । परिक्षेपकः । परिराटकः । अतो वुञ् वचनात् ण्वादयोऽपि साध्वादिविषये असमत्वान्न भवन्तीति विज्ञायते ।

निन्दहिंसक्लिशखादविनाशिव्यामाषासूयात् ॥४।३।२५३॥ निन्द हिंस क्लिश खाद विनाशी व्यामाष असूय इत्येतेभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यो वुञ्प्रत्ययो भवति । निन्दकः । हिंसकः । क्लेशकः । खादकः । विनाशकः । व्यामाषकः । असूयकः ।

उपसर्गादेवदेविक्रुशः ॥४।३।२५४॥ उपसर्गपरेभ्यो देव देवि क्रुश इत्येतेभ्यो धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यो वुञ्प्रत्ययो भवति । आदेवत इति आदेवकः । परिदेवकः । आदेवर्त्यादेवकः । परिदेवकः । आक्रोशकः । परिक्रोशकः । उपसर्गादिति किम् ? देवनः । देवयिता । क्रोष्टा ।

कुट्टिलुण्टिवृङ्जल्पभिक्षादाकट् ॥४।३।२५५॥ कुट्टि लुण्टि वृङ् जल्प भिक्ष इत्येतेभ्यः धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्य आकट्प्रत्ययो भवति । कुट्टाकः । लुण्टाकः । वराकः । जल्पाकः । भिक्षाकः । टकारो ङ्यर्थः । कुट्टाकी । लुण्टाकी । वराकी । भिक्षाकी ।

दक्षीण्वमज्यव्यथाभ्यमपरिभूविभ्रेरिन् ॥४।३।२५६॥ दृ क्षि इण् वम जि अव्यथ अभ्यम् परिभू विभ्रि इत्येतेभ्यो धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्य इन्प्रत्ययो भवति । आद्यपवादः । क्षांति निरनुबन्धस्य ग्रहणम्, न क्षियः । अव्ययेति व्यधेनल् पूर्वस्य ग्रहणम् । आदरी । क्षयी । उदयी । अत्ययी । वमी । जयी । अव्यथी । अभ्यमी । परिभवी । विश्रमी ।

प्रास्सूजोः ॥४।३।२५७॥ प्रपूर्वाभ्यां सू जु इत्येताभ्यां साधुधर्मशीले सत्यर्थे वर्तमानाभ्यां धातुभ्यामिन्प्रत्ययो भवति । प्रसवी । प्रजवी । सु इति सुवतेर्ग्रहणं न सूतिसूयत्योः । प्रसविता ।

मरक् अयुस्वः ॥४।३।२५८॥ सृ अद् वस् इत्येतेभ्यो धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यो मरक्प्रत्ययो भवति । सृमरः । अदरः । वस्वरः ।

भञ्जभासमिदो घुरः ॥४।३।२५९॥ भञ्ज भास मिद् इत्येतेभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यो धातुभ्यो घुरप्रत्ययो भवति । भङ्गुरं काष्ठम् । भासुरं वपुः । मेदुरो नरः ।

वेत्तिच्छिदिभिदः कित् ॥४।३।२६०॥ विद् ज्ञाने छिद् भिद् इत्येतेभ्यो धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यः कित् घुरप्रत्ययो भवति । विदुरः । छिदुरः । भिदुरः । वेत्तीति तिङ्निर्देश इतरविशिष्टयनिरासार्थः[1] । कित्त्वमनेङ्यर्थम् ।

---

१. ष्वुदासार्थः, क० म० ।

सर्तीण्वृशृक्षेष्टरप् ॥४।३।२६१॥ किदिति वर्तते । सर्ति इण नश् जि इत्येतेभ्यो धातुभ्यः साधुधर्मशीले वर्तमानेभ्यः कित् ट्वरप्प्रत्ययो भवति । सृत्वरः । सृत्वरी । इत्वरः । इत्वरी । नश्वरः । नश्वरी । जित्वरः । जित्वरी । टकारो ङ्यर्थः । पकारस्तगर्थः ।

गत्वरः ॥४।३।२६२॥ गत्वर इति गमेः साधुधर्मशीले सत्यर्थे वर्तमानात् ट्वरप्प्रलुक् च निपात्यते । गत्वरः । गत्वरी यवनस्त्रियः ।

नम्कम्यजस्कम्पस्मिहिंसदीपो रः ॥४।३।२६३॥ नम् कमि अजस् कम्प स्मि हिंस दीप इत्येतेभ्यो धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यो रप्रत्ययो भवति । नम्रं मुखम् । नम्रा युवतिः । अजस्रं श्रवणम् । कम्प्रा शाखा । स्मेरं मुखम् । हिंस्रः पापः । दीप्रः प्रदीपः । अजसिति जस् मोक्षणे नञ्पूर्वः सरप्रत्ययान्तः क्रियासातत्ये दृश्यते ।

स्वप्तृषिधृषो ङ्नज् ॥४।३।२६४॥ स्वप् तृषि धृष् इत्येतेभ्यः धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यो ङ्नज्प्रत्ययो भवति । स्वप्नक् । तृष्णक् । धृष्णक् ।

भ्यः क्रुकुकक्लुकाः ॥४।३।२६५॥ भी इत्येतस्मात्साधुधर्मशीले सत्यर्थे वर्तमानाद् धातोः क्रु कुक क्लुक इत्येते प्रत्यया भवन्ति । भीरुः । भीरुकः । भीलुकः । इति ऋफिडादित्वात्क्लुकवचनं लघु ।

स्थेशभासपिसकसो वरः ॥४।३।२६६॥ स्था ईश भास पिस कस् इत्येतेभ्यो धातुभ्यः साधुधर्मशीले सत्यर्थे वर्तमानेभ्यो वरप्रत्ययो भवति । स्थावरः । ईश्वरः । भास्वरः । पेस्वरः । कस्वरः । विकस्वरः ।

यायावरश्च ॥४।३।२६७॥ या इत्येतस्माद्यङन्तात् साधुधर्मशीले सत्यर्थे वर्तमानाद् वरप्रत्यय आकारलुगभावश्च निपात्यते । यायावरः । चकारः साधुधर्मशीलेष्वित्यस्यानुकर्षणार्थः । तेनोत्तरत्रानुवृत्तिः ।

संविप्राद्भुवोऽनाम्न्युङ् ॥४।३।२६८॥ सं वि प्र इत्येतेभ्यः पराद्भुवो धातोः सत्यर्थे वर्तमानाद्दुङ्प्रत्ययो भवति । अनाम्नि समुदायश्चेत्तद्संज्ञा न भवति । सम्भवतीति सम्भूर्जनिता । विभुः सर्वगतः । प्रभुः स्वामी । अनाम्नीति किम् ? विभूर्नाम कश्चित् ।

मितद्र्वादयः ॥४।३।२६९॥ मित द्रु इत्येवमादयः उङ्प्रत्ययान्ताः साधवो वेदितव्याः । आदिशब्दः प्रकारे । मितं द्रवतीति मितद्रुः । शम्भुः । स्वयम्भुः । शम्भुवः[1] सदृशः । स्वयम्भुवा भूतहितेन भूतलेनेति क्विबन्तौ ।

इत्रः प्वो दैवते ॥४।३।२७०॥ पू इत्येतस्माद्धातोः देवतैव दैवतं तस्मिन् कर्तरि इत्रप्रत्ययो भवति । पवित्रोऽर्हन् स मा पुनातु ।

सञ्ज्ञायां करणे ॥४।३।२७१॥ पुवो धातोः करणे इत्रप्रत्ययो भवति संज्ञाया ऋषौ चाभिधेये । दर्भः पवित्रम् । बर्हिः पवित्रम् । यज्ञोपवीतं पवित्रम् । ओघोपकरणं पवित्रम् । पवित्रा नदी । ऋषौ पवित्रोऽयं ऋषिः ।

लूधूसूखनसहचरेः ॥४।३।२७२॥ लू धू सू खन सह चर इति इत्येतेभ्यः करणे इत्रप्रत्ययो भवति । लवित्रम् । धवित्रम् । सवित्रम् । खनित्रम् । सहित्रम् । चरित्रम् । अरित्रम् ।

व्ययोद्र्घनः ॥४।३।२७३॥ वि अयस्[2] द्रु इत्येतेभ्यः पराद्धन्तेः करणेऽप्रत्ययो घनभावश्च निपात्यते । विहन्यतेऽनेनेति विघनः । अयोघनः । द्रुघनः । द्रुघण इति घणतिरजन्तः घणिग्रहणार्थः प्रकृत्यन्तरमस्ति अरिहणादिषु तथापाठाद्वा णत्वम् ।

स्तम्बाद्घ्नश्च ॥४।३।२७४॥ स्तम्बशब्दात्पराद्धन्तेः कः प्रत्ययः चकाराद्घ्नश्च करणे कारके निपात्यते । स्तम्बो हन्यतेऽनेनेति स्तम्बघ्नः । स्तम्बघनः । स्वभावात्पुंसि नपुंसके च घनशब्दः । तेन स्त्रियां क

---

१. सदृशम्, क० म० । २. अयश्चर्मटिका कूटः द्रुघणस्ताडकश्चमः क० म० टि० ।

एव स्तम्बघ्नी इषीका । असमस्वात् क्तिनादिरपि । स्तम्बहृतिः । स्तम्बहरणी । करणस्य कर्तृत्वविवक्षायामपि । स्तम्बघ्नीषीका ।

वह्यपरिघम् ॥४।३।२७५॥ वहतेर्यप्रत्ययः परिपूर्वस्य च हन्तेरप्रत्ययो घादेशश्च करणे कारके निपात्यते । वह्यतेऽनेनेति वह्यम् । परिहण्यतेऽनेनेति परिघः ।

ष्ठ्यो हलक्रोडमुखे अट् ॥४।३।२७६॥ पू दृत्येतस्माद्धातोः हलमुखे क्रोडमुखे च करणे अट्प्रत्ययो भवति । क्रोडः [1]सूकरः । हलस्य पोत्रम् । सूकरस्य पोत्रम् । मुखमित्यर्थः । टकारो नदृधीति ङ्यर्थः ।

दाम्नीशस्युयुसिचसितस्तुतुदसिहनहदंशपतः ॥४।३।२७७॥ दाञ् नी शस् युज् यु सिच् सि स्तु तुद् सिह नह दंश पत् इत्येतेभ्यो धातुभ्यः करणे अट्प्रत्ययो भवति । दान्ति लुनन्ति तेनेति दात्रम् । नेत्रम् । शस्त्रम् । योक्त्रम् । योत्रम् । सेक्त्रम् । सेत्रम् । स्तोत्रम् । तोत्रम् । मेढ्रम् । नदृधी । दंष्ट्रा । [2]अजादिस्वादाड्(ट्) पत्रम् । दाविति दाञ्लवन इत्यस्य ग्रहणम्, न दैप्शोधन इत्यस्य दंष्ट्रेत्यजादित्वादाप् ।

धात्री ॥४।३।२७८॥ धेटो धारणश्च कर्मणि ष्ट्रन् निपात्यते । धयन्ति तामिति [3]धात्री स्तनदायिनी । दधाति तां व्याधिभ्यस्त्रायते धात्री आमलकी ।

मतिपूजार्थभीच्छील्यादिभ्यः क्तः ॥४।३।२७९॥ सतीति वर्तते । मत्यर्थेभ्यः पूजार्थेभ्यः भीदृभ्यः शीलादिभ्यश्च धातुभ्यः सत्यर्थे वर्तमानेभ्यः क्तप्रत्ययो भवति । मतिरिच्छा ज्ञानं च । इच्छार्थेभ्यः—राज्ञां मतः । राज्ञामिष्टः । ज्ञानार्थेभ्यः—राज्ञा ज्ञातः । राज्ञा बुद्धः । राज्ञां विदितस्तत्रापि । पूजार्थेभ्यः—राज्ञां पूजितः । राज्ञामर्चितः । भीतः, त्रिमिदा—मिन्नः । त्रिष्विदा—क्ष्विण्णः । त्रिधृषा—धृष्टः । शीलादिभ्यः श्लोकः—

शीलितो रक्षितः क्षान्त आकृष्टो जुष्ट उद्यतः । संयतः शयितस्तुष्टो हृष्टो रुचित आसितः ॥

कान्तोऽभिध्याहृतो हृष्टो दृप्तस्तृप्तो मृतस्तथा । लिप्तस्त्रिनग्नश्च दयित इत्याद्या सति कथितः ॥

कष्टं भविष्यतीत्याहुः मगम्यादिषु दृश्यताम् ।

केचिदत्र भूतकालता तत्र क्त इतीदं नारभ्यते ।

उणादयः ॥४।३।२८०॥ बहुलमिति वर्तते । धातोः सत्यर्थे वर्तमानादुणित्येवमादयो बहुलं भवन्ति । कारुः । [4]पायुः । करण्डः । वरण्डः । जरण्डः । एरण्डः । ऋष्किडः । ऋष्किडुः । सरीसृपः । यजूंषि । तस् । पिस् ह्रः । [5]कुसुरः । धूमरः । शाद्वः । षण्डः । बहुलग्रहणं किम् ? प्रयोगानुसरणार्थम् । तेन येभ्यो धातुभ्यो यस्मिन्नर्थे यथा दृश्यन्ते ते तेभ्यस्तस्मिन्नर्थे तथा भवन्तीति । धात्वर्थकार्यनियमः सिद्धो भवति ।

गम्यादिर्धात्वर्थेति ॥४।३।२८१॥ गम्यादिशब्दगणः इनादिप्रत्ययान्तो वर्त्स्यति धात्वर्थे साधुर्वेदितव्यः । गमी । आगामी । भावी । प्रस्थायी । प्रतिबोधी । प्रयायी । प्रतियायी । प्रतियायी । कष्टं पदं सामान्यवृत्तावप्यर्थात् प्रकरणाच्छब्दान्तरसन्निधेर्वा विशेषप्रतिपत्तिर्भवति । श्वो गमी ग्राममिति स वाक्यार्थः ।

लृट् ॥४।३।२८२॥ वर्त्स्यत्यर्थे वर्तमानाद्धातोर्लृट्प्रत्ययो भवति । करिष्यति । हरिष्यति ।

परिदेवनानद्यतने लुट् ॥४।३।२८३॥ भविष्यत्यर्थे वर्तमानाद्धातोर्लुट्प्रत्ययो भवति । लृटोऽपवादः । परिदेवने अनद्यतने च । परिदेवनमनुशोचनम् । परिदेवमानश्चेत्प्रयुङ्क्ते । अनद्यतनश्च इति धात्वर्थो भवति । इयं नु कदा गन्ता येवं पादौ निदधाति । अयं नु कदाऽध्येता य एवमनभियुक्तः । अनद्यतने श्वो गन्ता । श्वोऽध्येता । भविष्यत्सामान्ये लुट्बाधनार्थं परिदेवनग्रहणम् । श्वः करिष्यति मासे न करिष्यति इति पदं भविष्यत्सामान्य एव । अनद्यतन इति बहुव्रीहिः । तेनेह न भवति । अद्य श्वो वा गमिष्यति ।

---

१. बहून्यपत्यानि सूते सूकरः क० म० टि० । २. क० म० पुस्तकयोर्नास्ति । ३. धात्री स्यात्स्तनदायिनी, इति व्यभिमञ्जरी, क० म० टि० । ४. धायुः क० म० । ५. मुद्गादिसिद्धं कुसरमित्यभिधानम्, क० म० टि० । तुलनी तिलकाम्बे कुसरतुसरावत्र पिष्टकः, इति वैजयन्ती, क० म० टि० ।

पुरायावद्यतोर्लट् ॥४।३।२८४॥ वर्त्स्यतीत्येव वर्तते । वर्त्स्यत्यर्थे वर्तमानाद्धातोः पुरायावदित्येतयोरव्यययोरुपपदयोर्लट्प्रत्ययो भवति । लृट्लुटोर्बाधकः । पुराऽधीते । पुरा भुङ्क्ते । पुरा श्वोऽधीते । पुरा श्वो भुङ्क्ते । यावद्भुङ्क्ते । यावदधीते । यावच्छ्वो भुङ्क्ते । यावच्छ्वोऽधीते । लाक्षणिकत्वादिह न भवति । प्रत्युक्षातया पुरामान इष्यते नगरेणेत्यर्थः । यावद्दास्यते तावद्भक्ष्यते यत्परिमाणमित्यर्थः ।

कदाकर्ह्योर्वा ॥४।३।२८५॥ कदा कर्हि इत्येतयोरुपपदयोर्वर्त्स्यत्यर्थे वर्तमानाद्धातोर्लट्प्रत्ययो वा भवति लृट्लुटावपि भवतः । कदा भुङ्क्ते, कदा भोक्ष्यते । कदा भोक्ता । कर्हि भुङ्क्ते । कर्हि भोक्ष्यते । कर्हि भोक्ता । कदा भुङ्क्ते । कर्हि भुङ्क्ते इति वर्त्स्यद्विवक्षेयम्, सद्विवक्षायां हि शत्रानशावपि प्रसज्येयाताम् ।

किंवृत्तेऽर्थित्वे ॥४।३।२८६॥ वर्त्स्यत्यर्थे वर्तमानाद्धातोः किंवृत्त उपपदे अर्थित्वे प्रष्टुर्लिप्सायां गम्यमानायां लट्वा भवति । पक्षे लृट्लुटावपि भवतः । को भवतां भिक्षां ददाति । को भवतां भिक्षां दास्यति । को भवता भिक्षां दाता । के भवतो भोजयन्ति । भोजयिष्यन्ति । भोजयितारः । कतरो भिक्षां ददाति । दास्यति । दाता । कतमो भिक्षां ददाति । दास्यति । दाता । वृत्तग्रहणे तद्विभक्तयन्तं डतरडतमौ च इति वैयाकरणस्मृतिः । तेन कितराम् । कितमाम् । किंगौः । किंपुरुष इत्यादौ न भवति । अर्थित्व इति किम् ? कः पाटलिपुत्रं गमिष्यति । गन्ता ।

अर्थ्यसिद्धौ ॥४।३।२८७॥ अर्थ्यो दाता देयं वा । अर्थ्यस्य अर्थ्याद्वा सिद्धिः अर्थ्यसिद्धिः फलनिष्पत्तिः फलावाप्तिः तस्यां गम्यमानायां वा किंवृत्ते वर्त्स्यत्यर्थे वर्तमानाद्धातोर्लृट्प्रत्ययो वा भवति । लृट्लुटावपि भवतः । यो भक्तं ददाति स स्वर्गं गच्छति । यो भक्तं दास्यति स स्वर्गं गमिष्यति । यो भक्तं दाता स स्वर्गं गन्ता । दातुर्दानात्स्वर्गसिद्धिमाचक्षाणो दाने प्रवर्तयति ।

लेटिहेतौ ॥४।३।२८८॥ लेङन्त उपपदे लेटो लेङन्तार्थस्य हेतौ निमित्ते वर्त्स्यत्यर्थे वर्तमानाद्धातोर्लृट्प्रत्ययो वा भवति । पक्षे लृट्लुटावपि भवतः । उपाध्यायश्चेदागच्छति आगमिष्यत्यागन्ता, अथ त्वं सूत्रमधीष्व, अथ त्वमनुयोगमाधत्स्व । उपाध्यायागमनमधीष्वेत्याद्यस्य निमित्तम् ।

लेङ्चोर्ध्वमौहूर्तिके ॥४।३।२८९॥ ऊर्ध्वं मुहूर्तादिभवमूर्ध्वमौहूर्तिकम् प्रत्यासन्नमित्यर्थः । निपातनात् सिद्धिः । लेङन्त उपपदे लेटो लेङन्तार्थस्य हेतौ ऊर्ध्वमौहूर्तिकेवर्त्स्यत्यर्थे वर्तमानाद्धातोर्लेङ् च लट्च वा भवतः । पक्षे लृट्लुटावपि भवतः । ऊर्ध्वं मुहूर्तादुपरि मुहूर्तस्य परमुहूर्तच्छीघ्रमुपाध्यायश्चेदागच्छेत् आगच्छति आगमिष्यति, आगन्ता । अथ त्वं सूत्रमधीष्व अनुयोगमाधत्स्व ।

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने वृत्तौ चतुर्थस्याध्यायस्य तृतीयः पादः समाप्तः ।

■

[चतुर्थः पादः]

पद्रुजो घञ् ॥४।४।१॥ पद रुज इत्येताभ्यां घञ्प्रत्ययो[1] भवति । पद्यतेऽनेनेति पादः । रुजत्यसाविति रोगः । देशस्पर्शो व्याधिः । स्पर्शो देवदत्त. कम्बलस्येति लिङ्गाद्यचा सिद्धम् ।

सुस्थिरव्याधिमत्स्यबले ॥४।४।२॥ सृ इत्येतस्माद्धातोः स्थिरव्याधिमत्स्यबलेषु कर्तृषु घञ्प्रत्ययो भवति । स्थिरे—चन्दनसारः[3] । खदिरसारः । अवयव—संश्लेषं गतः[4] संहतश्चिरस्थायी पदार्थ उच्यते । व्याध्यादौ-अतीसारो व्याधिः । विसारो मत्स्यः । सारो बलम् ।

---

१. पूर्वं कालविशेषे प्रत्यया उक्ता अतः सामान्येन विधानम् । क०म०टि० । २. वेगकर्शो,क०म०। ३. सरतीति सारः, चन्दनस्य सारः क० म० टि० । ४. -यव-संगे—क० म० । ५. संहतश्चि—क० म० ।

अकर्तरि ॥४।४।३॥ भावे कर्तृवर्जिते च कारके धातोर्घञ्प्रत्ययो भवति । पचनं पाकः । त्यागः । रागः । कारके–प्रास्यन्ति तमिति प्रासः । प्रसेवः[1] । दायो दत्तः । लाभो लब्धः । दास्यते तस्मै इति[2] दासः । आहरन्ति तस्मादित्याहारः, कृतः कटः, हृतो भारः—इत्यादौ क्वचिदसञ्ज्ञायां कारके षष्ठ्या चानभिधानं न भवति । तथा च बहुलाधिकारः । धात्वर्थे धातुनोक्तत्वाच्च कृद्ग्राह्यस्तु भावो धात्वर्थो धर्मः सिद्धतानाम सक्रिय-संख्यायोगी । द्रव्यवद्धात्वर्थादन्यः ।

इङः ॥४।४।४॥ इङोऽकर्तरि घञ्प्रत्ययो भवति । अधोऽपवादः । अध्यायः । उपेत्याधीयते[3] ऽस्येत्यु-पाध्यायः[4] । उपाध्यायेति बह्वादिषु उपाध्यायशब्दपाठात्पदादौ स्त्रियां क्तिन्बाधया घञ् ङी वा भवति ।

श्रो वायुवर्णनिवृते ॥४।४।५॥ श्रु इत्येतस्मादकर्तरि वायौ वर्णे निवृते चाभिधेये घञ्प्रत्ययो भवति । निवृतं निवर्त्यमावरणमित्यर्थः । शारो वायुः । शारो वर्णः शबलः । निशारो निवृतम् । गौरिवाकृतिनिशारः प्रायेण शिशिरे कृशः । वायुवर्णनिवृत इति किम् ? शरः ।

पूलूनिरोर्निरभ्यवोपसर्गे ॥४।४।६॥ निम् अभि अव इत्येतेषूपपदेषु यथासंख्यं पू लू नि रु इत्ये-तेभ्योऽकर्तरि घञ्प्रत्ययो भवति । निष्पाव । अभिलावः । अवनायः । संरावः । निरावः । निरभ्यवोपसर्ग इति किम् ? पवः । लवः । नवः । रवः ।

भृञ्यदोऽच् ॥४।४।७॥ उपसर्ग इति वर्तते । उपसर्ग उपपदे भृ श्री अद् इत्येतेभ्यो कर्तरि अच्-प्रत्ययो भवति । घञपवादः । चकारः चम्लज्ज्वल्लुञ्ज्वलनीति ग्रहणार्थः । प्रभवः । विभवः । सम्भवः । प्रश्रयः । प्रनिश्चयः । संश्रयः । प्रग्रहः । विग्रहः । संग्रहः । उपसर्ग इति किम् ? भावः । श्रायः । ग्राहः । भृञ्योरुपसर्ग एवेति नियमार्थमुपादानम् ।

नौ णञ्चाद्यः ॥४।४।८॥ नावुपसर्ग उपपदे अदेरकर्तरि णप्रत्ययो भवति । अन्न । न्यादः । निषदः । अन्यिकल्पे घञि घस्लादेशः स्यादिति णत्वचनम् । अन्नन्न बाधा माभूदिति चकारः ।

स्वनह्वगत्क्वणप्ठो वा ॥४।४।९॥ स्वन् नद् गद् क्वण पठ् इत्येतेभ्यो नावुपसर्ग उपपदेऽकर्तरि अच्प्रत्ययो वा भवति । तेन मुक्ते पक्षे घञ् । निस्वनत्यनेनेति निस्वनः । निस्वानः । निनदः । निनादः । निगदः । निगादः । निक्वणः । निक्वाणः । निपठः । निपाठः । णप्रत्ययविकल्पे तेन मुक्ते घञा भवितव्यम् । ततश्च कर्तरीत्येव सिध्यतीत्यञ्विकल्पो विज्ञायते ।

यमः सन्नियुपे ॥४।४।१०॥ सम् नि वि उप इत्येतेषूपसर्गेषु उपपदेषु यमेर्धातोरच्प्रत्ययो वा भवति । संयमः । संयामः । नियमः । नियामः । वियमः । वियामः । उपयमः । उपयामः ।

क्वणो वैणे ॥४।४।११॥ वीणायां च भवो वैणः । वैणेऽर्थे वर्तमानात् क्वणेर्धातोरुपसर्गे उपपदेऽकर्तरि अच्प्रत्ययो वा भवति । प्रक्वणो वीणायाः । प्रक्वाणो वीणायाः । वैण इति किम् ? प्रक्वाणः भ्रुकुलस्य । अनुप-सर्गात् "क्वण्यमृदृस्वनन्यो वा" इति वैणेऽपि भवति ।

धोः किः ॥४।४।१२॥ धेति निवृत्तम् । धुसञ्ज्ञकाद्धातोरुपसर्गे उपपदेऽकर्तरि किप्रत्ययो भवति । [5]प्रधिः । विधिः । उपधिः । निधिः । समाधिः । [6]आधिः । धोरिति किम् ? निदायः केदारस्य । अवदायो मुखस्य ।

आप्यादाधारे ॥४।४।१३॥ आप्यात्कर्मणः [7]पराद्धातोरकर्तर्याधारे किप्रत्ययो भवति । जलं धीयतेऽस्मिन्निति [8]जलधिः । शरधिः । इषुधिः । वालधिः ।

---

१. प्रसीव्यन्ति तद् प्रसुवंन्ति वं प्राकारः । क० म० टि० । २. दासः स्याद्दानपात्रेऽपि, इत्यभि-धानम्, क० म० टि० । ३. -त्या इत्यु क० म० टि० । ४. उपाध्यायस्तु पाठकः, इत्यभिधानचिन्तामणिः, क० म० टि० । ५. -त्येतेषूपसर्गे धोपपदे क० म० टि० । ६. प्रग्रहोऽनुनयः समौ, क० म० टि० । ७. सन्नशाका प्रतिज्ञयः, इति हलायुधः क० म० टि० । ८. प्रधानं प्रधीयते इति वादे । दोधाणो वा किः । इदि चाली स्तुतिस्थाकारलोपः । प्रधिः । ९. आधीयतेऽस्मादिति चतुर्णां चाक्रपाणामन्यतमस्मात्किः । क० म० टि० । १०. शब्दोरक—क० म० । ११. स्यक्तास्युक्तमिति समासः क० म० टि० ।

ऋगमवज्रचरणहग्रहोऽच् ॥४।४।१४॥ इ उ ऋ इत्येतदन्तेभ्यो गम् वश् वृ रण् पृ ग्रह इत्येतेभ्यश्च धातुभ्योऽकर्तरि अच्प्रत्ययो भवति। घञपवादः। इ–चयः। जयः। क्षयः। उ–नयः। यवः। स्तवः। लवः। पवः। ऋ–सरः। दरः। शरः। करः। गमादिः–गमः। वशः। वरः। रणः। आदरः। ग्रहः। चकारः अव्यवधानार्थः।

समुद्यजः पशौ ॥४।४।१५॥ सम् उत् इत्येतयोरजेर्धातोरच्प्रत्ययो भवति। पशौ पशुविषयश्चेत् स आख्यो भवति। समजः पशूनाम्, समवाय इत्यर्थः। उदजः पशूनाम्। प्रेरणमित्यर्थः। समुदिति किम्? व्याजः पशूनाम्। पशाविति किम्? समाजो मनुष्याणाम्। उदाजः क्षत्रियाणाम्।

सर्तिग्लहृपणः प्रजनाक्षेयत्वे ॥४।४।१६॥ सर्तिग्लहृपणिभ्यो धातुभ्योऽकर्तर्यच्प्रत्ययो भवति यथासंख्यं प्रजनाक्षेयत्वेषु। प्रजनविषये धात्वर्थे सर्तेः–गवामुपसरः। पशूनामुपसरः। प्रजनो गर्भग्रहणम्। तदर्थं स्त्रीगवीषु पुङ्गवानामुपसरणमुच्यते। अक्षविषयेऽर्थे ग्लहः अक्षस्य ग्लहः ग्रहणमित्यर्थः। ग्रहेर्लत्वनिपातनम्। ग्लहिः प्रकृत्यन्तरं वा। इयत्त्वे गम्यमाने पणः–मूलकपणः। शाकपणः। मूलकादीनामियत्तापरिच्छिन्नः सव्यवहारार्थं मुष्टिरुच्यते। प्रजनाक्षेयत्व इति किम्? उपसारः। ग्लाहः। पाणः।

प्रमदसम्मदौ हर्षे ॥४।४।१७॥ प्रमदसम्मदावित्येतावजन्तौ निपात्येते हर्षाभिधेये। प्रमदः कन्यानाम्। सम्मदः कोकिलनाम्। हर्ष इति किम्? प्रमादः। सम्मादः। सम्प्राग्मदो हर्ष इत्यनुक्त्वा निपातनं रूपविग्रहणार्थम्। तेनोपसर्गान्तराधिक्येन भवति। प्रसम्मादः। अभिसम्मादः।

देशेऽन्तर्घनान्तर्घणौ ॥४।४।१८॥ अन्तःपूर्वाद्धन्तेर्देशेऽभिधेयेऽच्प्रत्ययो भवति घनघणौ चादेशौ निपात्येते। अन्तर्हण्यतेऽस्मिन्निति अन्तर्घनः, अन्तर्घणो वादेशः। वाहीकेषु देशविशेषस्य सञ्ज्ञे इमे। देशे इति किम्? अन्यत्रान्तर्घातः; अन्तर्घण इति। घणिः प्रकृत्यन्तरं वा तस्मादच्।

प्रघणप्रघाणौ कोष्ठकांशे ॥४।४।१९॥ प्रपूर्वाद्धन्तेः कोष्ठकांशे दीर्घकुट्या एकदेशेऽभिधेये अच्प्रत्ययो घणाघणौ चादेशौ निपात्येते। प्रघणः। प्रघाणः। कोष्ठके बाह्यप्रदेश उच्यते। कोष्ठकांश इति किम्? प्रघाणोऽन्यत्र।

घनोद्घनापघनोपघ्ननिघोद्घसङ्घामूर्त्यत्याधानाक्षासन्ननिमित्तप्रशस्तगणाः ॥४।४।२०॥ घन उद्घन अपघन उपघ्न [1]निघ उद्घ [2]सङ्घ इत्येते शब्दा अजन्ता निपात्यन्ते यथासङ्ख्यं मूर्त्यादिषु वाच्येषु। घनो मूर्तिः संहतिः काठिन्यम्। अभ्रघनः। दधिघनः। घनं दधीति घर्म्यभिधानम्। गुणशब्दोऽयं गुणिन्यपि वर्तते। उद्घन्यतेऽस्मिन्निति उद्घनोऽत्याधानं यस्मिन्काष्ठे स्थापयित्वा काष्ठानि तद्यन्ते। [3]कर्मारिणामधिकरणमित्येके। अपहन्यतेऽनेनेति अपघनोऽङ्गम् पाणिः। पादो वा। न सर्वमुपहन्यते समीपमिति ज्ञायते इत्युपघ्नः अच्, घनभावश्च। आसन्नः समीप उच्यते। सर्वतोपघ्नः। ग्रामतोऽपघ्नः[4]। निहन्यते निर्विशेषं निश्चयेन वा ज्ञायत इति निघः। अजघभावश्च निमित्तः। समारोह परिणाह उच्यते। निघा वृक्षाः। निघाः शालयः। उद्धन्यते उत्कर्षेण ज्ञायत इत्युद्धः प्रशस्तः। संहतिः सङ्घः गणः प्राणिसमुदायः। कथं सङ्घातो मनुष्याणामिति? सङ्घातशब्दः समुदायमात्रे निपातनादेवोपात्तार्थविशेषे वृत्तिरसमप्रत्ययबाधनं च विज्ञायते।

ह्वो यश्चोश्विन्यभ्युपे ॥४।४।२१॥ वि नि अभि उप इत्येतेषूपपदेषु ह्वयतेरकर्तर्यच्प्रत्यय उशादेशश्च वा शब्दस्य भवति। विहवः। निहवः। अभिहवः। उपहूतः। विन्यभ्युप इति किम्? संह्वायः। ह्वा इति किम्? निवाद्यः। व इति किम्? सर्वस्य माभूत्। चकारः सन्नियोगार्थः। शकारो वा इत्यस्यादेशार्थः। हव इत्यनिपातनं ण्वुल्लुगर्थम्। विजो हवः। जुहोतेर्ह्वानि वृत्तिर्न दृष्टा ह्वयतेश्च यजि रूपान्तरं प्राप्नोतीति वचनम्।

---

१. आविदो विद्यते येन तत्र विश्वक् स मे निघः, इति नामलिङ्गानुशासने क० म० टि०। २. उद्घः स्वाप्यापके हस्तपुटके देहजानिले, इति विश्वः, क० म० टि०। ३. कर्मारआध्यवसार इत्यभिधानम्। क० म० टि०। ४. -घिकरणीत्ये—क० म०। ५. ग्रामोपघ्नः क० म०। ६. वृत्ति क० म०।

आङि युद्धे ॥४।४।२२॥ आङ्पूर्वात् ह्वयतेरकर्तरि अच्प्रत्यय उकारादेशश्च वा शब्दस्य भवति युद्धेऽभिधेये। आह्वयन्तेऽस्मिन्परस्परमित्याहवो युद्धम्। युद्ध इति किम्? आह्वायः। आह्वानम्।

निपानमाहावः ॥४।४।२३॥ आङ्पूर्वाद् ह्वयतेरच्प्रत्ययो[1] भवति हावादेशश्च निपात्यते निपानं चेदभिधेयं भवति। निपिबन्त्यत्रेति निपानमुदकाधारः पशुशकुनीनां पानाय कृत उच्यते। आह्वयन्ते पशवः पानायात्रेति, आहावः पशूनाम्। आहावः शकुनीनाम्। निपानमित्यर्थः। निपानमिति किम्? आह्वायः। आह्वानम्।

भावेऽनुपसर्गात् ॥४।४।२४॥ ह्वयतेर्वर्तमानोपसर्गादिकर्तरि भावेऽच्प्रत्यय उकारादेशश्च वा शब्दस्य भवति। हवः। भाव इति किम्? अन्यत्र ह्वायः। अनुपसर्गादिति किम्? आह्वायः।

मदव्यधजपः ॥४।४।२५॥ मद् व्यध् जप् इत्येतेभ्योऽनुपसर्गेभ्योऽकर्तरि अच्प्रत्ययो भवति। मदः। व्यधः। जपः। अनुपसर्गादिति किम्? उन्मादः। अभ्याधः। उपजापः। वध इति वस्य मजन्वध इत्यात्वप्रतिषेधः तस्य घञि[2] रूपम्। हन्तेश्च घात इति यदि वध इत्यस्यानुपसर्गस्यैव भाव एव प्रयोग इष्यते ततोऽन्यत्रानभिधानं श्रयितव्यम्। घञि प्रायेणाभिधानाश्रय एव। तथाहि दायो दत्तः। लाभो लब्धः इति कर्मणि भवति। कर्तव्य कट इत्यादौ न भवति।

क्रव्यमहस्स्वन्यो वा ॥४।४।२६॥ क्रवण् यम् हस् स्वन नि इत्येतेभ्योऽनुपसर्गेभ्यो धातुभ्योऽकर्तरि अच्प्रत्ययो वा भवति। क्रवणः। क्राणः। यमः। यामः। हसः। हासः। स्वनः। स्वानः। नयः। नायः। अनुपसर्गादिति किम्? प्रक्राणः। प्रयामः। प्रहासः। विस्वाणः। प्रणयः। क्रवणादीनां घञि नयतेरचि प्राप्ते विकल्पः।

आङि रुप्लोः ॥४।४।२७॥ आङ्पूर्वात् रु प्लु इत्येताभ्यामकर्तरि अच्प्रत्ययो वा भवति। आरवः। आरावः। आप्लवः। आप्लावः। आङ्गीति किम्? विरावः। विप्लवः। रौतेर्धञि प्लवतेरचि नित्यं प्राप्ते विकल्पः।

ग्रहोऽवे वर्षे ॥४।४।२८॥ अव इत्येतस्मिन्नुपपदे ग्रहेर्धातोरकर्तरि अच्प्रत्ययो वा भवति वर्षे वर्षविषयश्चेद्भात्यर्थो भवति। अवग्रहो वर्षस्य। अवग्राहो वर्षस्य। प्रतिबन्धः प्राप्तकालस्य वर्षस्य कुतश्चिन्निमित्तादभावो धात्वर्थो न वर्षः। वर्ष इति किम्? अवग्रहः पदस्य[3]। अत्र नित्यमेवाच्।

प्रे युग्यतुलासूत्रे ॥४।४।२९॥ प्र उपपदे ग्रहेर्धातोरकर्तर्यच्प्रत्ययो वा भवति युग्यसूत्रे तुलासूत्रे चाभिधेये। युगं वहन् युग्यः अश्वो बलीवर्दो वा। प्रग्रहः। प्रग्राहः। रथादिनियुक्ताश्वादिसंयमरज्जु। तुलाग्रहणसूत्रं चाभिधीयते। युग्यतुलासूत्र इति किम्? अन्यत्र प्रग्रह एव।

वृञ्वस्त्रे ॥४।४।३०॥ प्र उपपदे वृ इत्येतस्मादकर्तरि अच्प्रत्ययो वा भवति वस्त्रविशेषे चाभिधेये। प्रवरः। प्रावारः। वस्त्र इति किम्? प्रवरो यतिः। नित्येऽचि प्राप्ते विकल्पः।

उदि नीग्रिभ्रः ॥४।४।३१॥ उदि उपपदे नी ग्रि भ्रि इत्येताभ्यां धातुभ्यामकर्तर्यच्प्रत्ययो वा भवति। उन्नयः। उन्नायः। उद्ग्रयः। उद्ग्राः। नित्यमचि प्राप्ते विकल्पः।

प्रभृ[4]थ्वीतेर्वच् ॥४।४।३२॥ वेति निवृत्तम्। उदुपपदे पृभृथ्वीतिभ्योऽकर्तरि अच्प्रत्ययो भवति। अवोऽपवादः। उत्पावः। उद्भावः। उत्थावः।

अहः ॥४।४।३३॥ अह इत्येतस्मादुदुपपदेऽकर्तरि अच्प्रत्ययो भवति। अवोऽपवादः। उदग्राहः। उदिति किम्? ग्रहः। विग्रहः।

---

१. अवर्तीति क० म० पुस्तकयोर्नास्ति। २. घञि क० म०। ३. पदस्य क० म०। ४. भृञ् इदावितिधातुः। पृथोदरादित्वात्साधु क० म० टि०।

समि मुष्टौ ॥४।४।३४॥ सम्युपपदे ग्रहेर्मुष्टिविषयेऽर्थे वर्तमानादकर्तरि घञ्प्रत्ययो भवति। [1]मुष्टिरंगुलिसन्निवेशो न परिमाणम्। तत्र मान इति सिद्धत्वात्। अहो मत्तस्य संग्राहः[2]। अहो मौष्टिकस्य[3] संग्राहः। मुष्टेर्दार्ढ्यमाख्यायते। मुष्टाविति किम्? संग्रहस्तत्स्वार्थस्य।

युद्रुदोः ॥४।४।३५॥ यु द्रु दु इत्येतेभ्यः सम्युपपदे कर्तरि घञ्प्रत्ययो भवति। संयावः[4]। संद्रावः। संदावः। समीति किम्? यवः। द्रवः। उपद्रवः। दवः।

स्तोर्यज्ञे ॥४।४।३६॥ सम्पूर्वात् स्तौतेरकर्तरि यज्ञविषये घञ्प्रत्ययो भवति। संस्तुवन्त्यत्रेति संस्तावः छन्दोगानाम्। यत्र देशे छन्दोगाः समेत्य स्तुवन्ति स देशः संस्ताव उच्यते। यज्ञ इति किम्? संस्तवोऽन्यदृष्टेः।

परौ ग्रहः ॥४।४।३७॥ परिपूर्वाद् ग्रहेरकर्तरि यज्ञविषये घञ्प्रत्ययो भवति। उत्तरपरिग्राहः। अधरपरिग्राहः। यज्ञ इति किम्? परिग्रहः।

न्यवे शापे ॥४।४।३८॥ नि अव इत्येतत्पूर्वाद् ग्रहेरकर्तरि घञ्प्रत्ययो भवति शाप आक्रोशे गम्यमाने। निग्राहो ह ते जाल्म भूयात्। अवग्राहो ह ते जाल्म भूयात्। शाप इति किम्? निग्रहश्चोरस्य। अवग्रहः पदस्य।

लिप्सायां प्रे ॥४।४।३९॥ प्रपूर्वाद् ग्रहेरकर्तरि घञ्प्रत्ययो भवति लिप्सायां गम्यमानायाम्। पात्रग्राहेण चरति पिण्डपातार्थी। स्रुवग्राहेण चरति दक्षिणार्थी। लिप्सायामिति किम्? मत्तस. ग्रहः।

द्रुस्तुस्रोः ॥४।४।४०॥ प्रपूर्वेभ्यो द्रु स्तु स्रु इत्येतेभ्योऽकर्तरि घञ्प्रत्ययो भवति। प्रद्रावः। प्रस्तावः। प्रस्रावः। प्र इति किम्? द्रवः। स्तवः। स्रवः।

स्रोऽयज्ञे ॥४।४।४१॥ प्रपूर्वात् स्रु इत्येतस्माद्धातोरकर्तरि घञ्प्रत्ययो भवति अयज्ञे न चेद्यागविषयः प्रयोगो भवति। प्रस्तारः। मणिप्रस्तारः। विमानप्रस्तारः। नवप्रस्तारः। अयज्ञ इति किम्? बर्हिःप्रस्तरः।

वौ प्रथनेऽशब्दे ॥४।४।४२॥ विपूर्वात् स्तृ इत्येतस्माद्धातोः प्रथन विस्तीर्णतायां वर्तमानादकर्तरि घञ्प्रत्ययो भवति अशब्देन चेत्तत्प्रथनं शब्दविषयं भवति। विस्तारः पटस्य। विस्तारो गृहस्य। प्रथन इति किम्? विस्तरस्तृणस्य छादनमित्यर्थः। अशब्द इति किम्? अहो द्वादशाङ्गस्य विस्तरः। विष्टारः पङ्क्तिश्छन्दः। विष्टारः बृहतीछन्दः इति विष्टाराभिनिष्ठानमिति निपातनात्सिद्धम्।

क्षुश्वोः ॥४।४।४३॥ विपूर्वाभ्यां क्षु श्वि गमकर्तरि घञ् भवति। विक्षावः[5]। विश्वावः[6]। वाविति किम्? क्षवः। श्वयः।

व्युपे शीङः क्रमे ॥४।४।४४॥ वि उप इत्येतयोरुपपदयोः शीङोऽकर्तरि घञ्प्रत्ययो भवति क्रमे। क्रमविक्रमविषयश्चेद्धात्वर्थो भवति। तत्र विशायः। मम विशायः। तव राजोपशायः। मम राजोपशायः। क्रमप्राप्तं पर्यायसाध्यं शयनमुच्यते। अन्ये शयितुं पर्याय उच्यते इत्याहुः। क्रम इति किम्? विशयः। उपशयः। अत्र केचित् निविषये घञेव भवतीत्याहुः। तदपरे तद्वर्या एतदेव तदनिष्टज्ञैरुच्यमानमनादरणीयमित्याहुः।

हस्तादेयेऽस्तेयेऽनुदश्चेः ॥४।४।४५॥ हस्तादेये हस्ते नोपायान्तरनिरपेक्षं यदादातुं शक्यते तद्विषयाच्चिनोतेर्वातोरनुत्पूर्वात्कर्तरि घञ्प्रत्ययो भवति अस्तेये। स चेद्धात्वर्थस्तेये न भवति। स्तेयं चौर्यम्। हस्तादेये इति च प्रत्यासत्तिरुच्यते। तेन तत्प्रत्यासन्नकर्मविषये धात्वर्थे विधानम्। पुष्पप्रचायः। फलप्रचायो[10]

---

१. मुष्टिः प्रहरणस्य इति, क० म० टि०। २. अस्मियां मुष्टिमस्तू द्वौ सङ्ग्राहो मुष्टिरिः स्त्रियाम्, इति वैजयन्ती, क० म० टि०। ३. दृढाङ्गुलिसङ्गतः, क० म० टि०। ४. संयावो घनप्रपातितः, क० म० टि०। ५. अभिनिष्टानशब्दो विसर्जनीयाक्षं (?) मतः इति विश्वः, क० म० टि०। ६. निगारो द्वारविक्षावोद्ग्राहा निगरणादिषु, इत्यमरः, क० म०टि०। ७. विश्रावस्तु प्रतिख्यातिः, इत्यमरः, क०म०टि०। ८. उपशायो विशायश्च पर्यायशयनार्थको, इति नामलिङ्गानुशासनम् क० म० टि०। क्रमेण क्रियायाः पदार्थानां सम्बन्धः प्राप्तिकालानतिवृत्तिः पर्यायः क० म० टि०। ९. पुष्पप्रचायकः। क० म० टि०। १०. फलप्रचायकः। क० म० टि०।

गुल्मात्[1]। हस्तादेय इति किम्? पुष्पप्रचयं करोति। फलप्रचयं करोति तरुशिखरे। अस्तेय इति किम्? पुष्पप्रचयः स्तेयेन। अनुद इति किम्? पुष्पोच्चयः। फलोच्चयः। माने नियमार्थं चेदं विज्ञेयमस्तेय एवेति। हस्तादेयमिति हि तेन प्रमाणं चोद्यते यद्यस्ते सम्भवति न हस्तादतिरिच्यत इति। तेन हस्तादेये चेः स्तेये मानेऽपि पुष्पाणां हस्तप्रचय इत्येव भवति।

चित्युपसमाधानावासदेहे कश्चादेः ॥४।४।४६॥ चीयत इति चितिः, अग्न्याधारः विप्रकीर्णानामेकत्रोपर्युपरिराशीभावेन करणमुपसमाधानम्। आवसन्त्यत्रेत्यावासः। देहं शरीरम्। एतेष्वभिधेयेषु चिनोतेरकर्तरि घञ्प्रत्ययो भवति आदेश्च ककारादेः। चितौ आकाये अग्नि चिन्वीत। उपसमाधाने–महान् गोमयनिकायः। गोमयपरिकायः। आवासे–ऋषिनिकायः। देहे–जलबुद्बुदवर्णिः कायाः। एतेष्विति किम्? चयः काष्ठनिचयः इत्यत्र बहुत्वमुच्यते शब्देन न राशिः।

सङ्घेऽनुपरौ ॥४।४।४७॥ न विद्यते कस्यचिदुपरि किञ्चिदस्मिन्नोऽनुपरि तस्मिन् सङ्घे प्राणिसमुदायेऽकर्तरि चिनोतेर्घञ्प्रत्ययो भवति। आदेश्च कः। वैयाकरणनिकायः। तार्किकनिकायः। संघ इति किम्? सारसमुच्चयः। सर्वसमुच्चयः। अनुपराविति किम्? सूकरनिकायः। सूकरा उपर्युपरि निचीयन्ते।

माने ॥४।४।४८॥ माने इयत्तायां गम्यमानायां धातोरकर्तरि घञ्प्रत्ययो भवति। णाचोरपवादः। इयत्ता च संख्या परिमाणं च। एको निघासः। द्वौ निघासौ। एकस्तण्डुलावक्षायः। एकस्तण्डुलनिक्षायः। एकः कारः। द्वौ कारौ। त्रय कारः। समित्यग्राहः[2]। तण्डुलसंग्राहः[3]। मुष्टिरित्यर्थः।

न्युदि ग्रः ॥४।४।४९॥ नि उद् इत्येताभ्यां पराद् ग्र इत्येतस्मादकर्तरि घञ्प्रत्ययो भवति। निगारः। उद्गारः। न्युदिति किम्? गरः। संगरः।

क्रो धान्ये ॥४।४।५०॥ नि उत् इत्येताभ्यां परात्कृ इत्येतस्माद्धातोरकर्तरि धान्यविषयेऽर्थे वर्तमानाद् घञ्प्रत्ययो भवति। निकारो धान्यस्य। उत्कारो धान्यस्य। राशिरित्यर्थः। धान्य इति किम्? पुष्पोत्करः। फलनिकरः।

नौ वृः ॥४।४।५१॥ धान्य इति वर्तते तत्समुदायविशेषणम्। नि इत्येतस्मिन्नुपपदे वृ इत्येतस्मादकर्तरि घञ्प्रत्ययो भवति। धान्ये प्रत्ययान्ते न चेद्धान्यविशेषोऽभिधीयते। निव्रियन्ते इति नीवारा नाम व्रीहयो भवन्ति। धान्य इति किम्? निवरा कन्या।

इणोऽभ्येषे ॥४।४।५२॥ निपूर्वादिणो धातोरभ्येषे विषयेऽर्थे वर्तमानादकर्तरि घञ्प्रत्ययो भवति। अभ्येषः स्वरूपाच्चलनम् प्रच्युतिः। एषोऽत्र न्यायः। एतदत्र साधु इत्यर्थे। अभ्येष इति किम्? न्यय गतं पापम्।

परौ क्रमे ॥४।४।५३॥ परावुपपदे इणः क्रमविषयेऽर्थे वर्तमानादकर्तरि घञ्प्रत्ययो भवति। तव पर्यायो भोक्तुम्। क्रमेण पदार्थानां क्रियासम्बन्धः पर्यायः। क्रम इति किम्? पर्ययः कालस्य अतिपात इत्यर्थः।

धूते न्यः ॥४।४।५४॥ परिपूर्वान्नयतेर्धातोर्द्यूतविषयेऽर्थे वर्तमानादकर्तरि घञ्प्रत्ययो भवति। परिणायेन शारो हन्ति। समन्तान्नयमेत्यर्थः। द्यूत इति किम्? परिणयः कन्यायाः।

भ्वोऽवज्ञाने वा ॥४।४।५५॥ परिपूर्वाद्भवतेर्धातोः अवज्ञाने वर्तमानादकर्तरि घञ्प्रत्ययो वा भवति। परिभावः। परिभवो देवदत्तस्य। अवज्ञान इति किम्? समन्ताद्भावः परिभवः।

---

१. फलपुष्पादिपुरुषात्, क० म० टि०। २. करलवनादिना उपायान्तरेण फलपुष्पादीनि लुनातीति यावत्। किंपुष्पावचयः शत्रवः फलकाले समागते इति क्षत्रचूडामणौ। ३. अञ्जिपौ मुष्टिमस्तू द्वौ संग्राहौ मुचुटिः किंपाम् क० म० टि०। ४. परिणायस्तु शारीणां समन्ताच्चयने, क० म० टि०।

स्थादिभ्यः कः ॥४।४।५६॥ (इदमपि तथा) स्था इत्येवमादिभ्योऽकर्तरि कप्रत्ययो वा[1] भवति। सन्तिष्ठन्तेऽस्थामिति संस्था। व्यवतिष्ठन्तेऽनयेति व्यवस्था। प्रस्नान्त(न्त्य)स्मिन्निति प्रस्नः। प्रपिबन्त्यस्यामिति प्रपा। विद्यतेऽनेनेति विदः। [2]आविद्यतेऽनेनेत्याविद्यः। निहन्यतेऽनेनास्मिन्निति वा निघ्नः। आयुध्यन्तेऽनेनेत्यायुधः। करणाधिकरणयोरनटि प्राप्ते कः। वेत्येव आख्याघः। घातः। विघातः। उपघातः।

डुङ्वितोऽथुक्त्री ॥४।४।५७॥ टु डु इत्येतदितो धातोर्यथासंख्यम् अकर्तरि अथु क्त्रि इत्येतौ प्रत्ययौ भवतः। ट्वितोऽथुः–वेपथु.[3]। श्वयथुः। क्षयथुः। ङित: क्त्रिः। पवित्रम्। उष्ट्रिमम्। कृत्रिमम्। विहित्रिमम्। याचित्रिमम्।

यजयत्प्रच्छस्वप्रक्षो नः ॥४।४।५८॥ यज् यत् प्रच्छ् स्वप् रक्ष इत्येतेभ्योऽकर्तरि नप्रत्ययो भवति। यज्ञः। यत्नः। प्रश्नः[4]। स्वप्नः। रक्षणः।

विच्छेर्नङ् ॥४।४।५९॥ विच्छेर्धातोरकर्तरि [5]नङ्प्रत्ययो भवति। विश्नः। एकाराभावार्थं न ङि (नङ्व) वचनम्।

व्याप्तौ भावेऽनञिन् ॥४।४।६०॥ धातोर्व्याप्तौ क्रियायां स्वसम्बन्धिनः साकल्येनाभिसम्बन्धे गम्यमाने भावे अन अिन् इत्येतौ प्रत्ययौ भवतः। संकुटिनं साकोटिनमेषाम्। संरवणम्, सारविणम्। सेनाया वर्तते। व्याप्ताविति किम्? सकोटः। सरावः। भावग्रहण कर्मप्रतिषेधार्थम्। अनग्रहणादयम इति घञादिर्न भवति।

स्त्रियां क्तिन् ॥४।४।६१॥ धातोरकर्तरि स्त्रियां क्तिन्प्रत्ययो भवति। घञादेरपवाद.। दृष्टिः। सृष्टिः। चितिः। वृतिः। वृत्तिः। नकारो वेदाक्तिनोऽङिति प्रतिषेधार्थ.। स्त्रियामिति किम्? सर्गः। जयः।

लभादिभ्यः ॥४।४।६२॥ लभादिभ्यो धातुभ्योऽकर्तरि स्त्रियामर्थे क्तिन्प्रत्ययो भवति। लब्धिः। उपलब्धिः। आप्तिः। राद्धिः। दीप्तिः। स्तब्धिः। ष्टब्धिः। कुञ्चेर्णि कुचितिः, अर्देः–शिरोऽर्त्ति। क्तित्वादङपि भवति। उपलभ्या[6]।

ञिवप्यजस्तोः करणे ॥४।४।६३॥ स्तु इप् यज स्तु इत्येतेभ्यो धातुभ्योऽकर्तरि स्त्रियामर्थे करणे कारके क्तिन्प्रत्ययो भवति। अनङपवाद:। स्तवन्त्यनयेति स्तुति.। इच्छन्त्यनयेति इष्टिः। यजन्तेऽनया इति इष्टिः। स्तुवन्त्यनयेति स्तुतिः।

गापापचो भावे ॥४।४।६४॥ गा पा पच् इत्येतेभ्यो धातुभ्योऽकर्तरि स्त्रियामर्थे भावे क्तिन्प्रत्ययो भवति। अङपवाद.। संगीतिः। उपगीतिः। प्रपीतिः। पक्तिः।

स्थो वा ॥४।४।६५॥ स्था इत्येतस्मादकर्तरि स्त्रियामर्थे भावे क्तिन्प्रत्ययो वा भवति। प्रस्थितिः। उपस्थितिः। वावचनादङपि भवति। आस्था। व्यवस्था। अड्बाधाया प्राप्तायाः पक्षे प्रापणार्थं वचनम्। ष्विजङ्या तु परत्वाद्बाध्यते।

व्यतिहारे अः ॥४।४।६६॥ व्यतिह्रियत इति व्यतिहारः व्यतिह्रियमाणेऽर्थे वर्तमानाद्धातोरकर्तरि स्त्रियामर्थे भावे अप्रत्ययो भवति वा। व्यतिहृतिरत्र[7] परस्परस्य कृतप्रतिकृतम्। व्याक्रोशो वर्तते। व्याकृष्टि-र्वर्तते। परस्परमाक्रोशत्स्वेवं प्रयुज्यते। एवं व्यापलेखी। व्यापलावी। व्यापदासी वर्तते। अग्निनो णित्यणन्तस्य प्रयोगः। स्त्रियामिति किम्? व्यतिहारो वर्तते।

---

१. इदं सूत्रपुस्तके नास्ति। २. आविध्यन्त्यस्मिन्नित्याविधः, क० म० टि०। ३. लोकस्तु श्वयथुः स्त्रीयः, इति नामलिङ्गानुशासनम्। क० म० टि०। ४. शूच्छ्वोऽनुनासिके च, क० म०। इति सकारस्य शकारः क० म० टि०। ५. क्तित्वादेङ् भवति क० म० टि०। ६. उदलभा क० म०। ७. –रिह क० म०।

ण्युट्च् ॥४।४।६७॥ ण्यन्तादुक्षेश्च धातोर्व्यतिहारेऽर्थे वर्तमानादकर्तरि स्त्रियामर्थे भावे अप्रत्ययो भवति । अनाकारापवादः । [1]व्यवचोरी । व्यावचर्ची । व्यास्थुली वर्तते । योगविभागो नित्यार्थः ।

अज्यजः क्यप् ॥४।४।६८॥ वज् यज् इत्येताभ्यां धातुभ्यामकर्तरि स्त्रियां भावेऽर्थे क्यप्प्रत्ययो भवति । व्रज्या । इज्या । पित्त्वमुत्तरार्थम् ।

नाम्नि भुजः ॥४।४।६९॥ भुजो धातोरकर्तरि स्त्रियां भावेऽर्थे नाम्नि क्यप्प्रत्ययो भवति । भुज्या । नाम्नीति किम् ? भुक्तिः । भाव इति किम् ? भार्या ।

समजनिषद्निपद्मन्विदीण्क्षुञ्शीङः ॥४।४।७०॥ योगविभागाद् भाव इति निवृत्तम् । समज् निषद् निपद् मन् विद् इण् क्षुञ् शीङ् इत्येतेभ्योऽकर्तरि स्त्रियामर्थे क्यप्प्रत्ययो भवति नाम्नि । समज्यन्ति तस्यामिति समज्या । निषद्या । निपद्या । मन्या । विद्या । इत्या । क्षुत्या । शय्या । केचित् निपदन्तीति पतिं गृह्णन्ति निपतन्ति तस्यामिति निपत्या मतिः । समितिः । आसुतिरिति बहुलाधिकारात् ।

कृञश्शक्तिन् च ॥४।४।७१॥ कृञोऽकर्तरि स्त्रियामर्थे श क्तिन् इत्येतौ प्रत्ययौ भवतः । चकारात्क्यप् च । क्रिया । कृतिः । कृत्या ।

सम्पदादिभ्यः क्तिन् क्विप् ॥४।४।७२॥ सम्पदादिभ्योऽकर्तरि स्त्रियामर्थे क्तिन् क्विप् इत्येतौ प्रत्ययौ भवतः । सम्पत्तिः । विपत्तिः । आपत्तिः । प्रतिपत्तिः । संवित्तिः । क्विपि–सम्पत् । विपत् । आपत् । प्रतिपत् । संवित् । परिषत् । आशीः ।

यूतिजूतिसातिहेतिकीर्त्यटाट्यामृगयेच्छायाच्चाकृपाः ॥४।४।७३॥ यूत्यादयः शब्दा अकर्तरि स्त्रियामर्थे निपात्यन्ते इच्छति भावे अकर्तरीति सामान्येनाधिकारेऽप्यभिधानतोऽर्थव्यवस्था । यूतिः । जूतिः । अत्र दीर्घो निपात्यते । सातिः । अत्र स्यतेरित्वाभावः । हेतिः । हन्तेर्हिनोर्वा हेर्भावः । सञ्ज्ञेपा । कीर्तिः । कीर्त्यतेः क्तिन् । अटाट्या अटतेर्यः । यद्वा द्विर्वचनं च । मृगया । इच्छा । मृगयतेरिच्छतेश्च शः शप् च यगपवादः । याञ्चा नः । कृपा क्रपतेरङ्यञौ च ।

ग्लाज्याह्वो निः ॥४।४।७४॥ ग्लै ज्या ह्वा इत्येतेभ्यो स्त्रियामर्थे निप्रत्ययो भवति । ग्लानिः । ज्यानिः । ह्वानिः ।

णिवेत्यासश्रन्थघट्टवन्दोऽनः ॥४।४।७५॥ ण्यन्तेभ्यो वेत्ति-आसश्रन्थघट्टवन्दिभ्यश्च धातुभ्योऽकर्तरि स्त्रियामर्थेऽनप्रत्ययो भवति । कारणा । हारणा । कामना । लक्षणा । [2]भावना । वेदना । आसना । श्रन्थना । घट्टना । वन्दना । अस्यतेरिति ण्यना सिद्धम् । वेत्तेरिति तिङिनर्देशो ज्ञानार्थपरिग्रहार्थः ।

इषोऽनिच्छायाम् ॥४।४।७६॥ इषोऽनिच्छायां वर्तमानात् अकर्तरि स्त्रियामर्थे अनप्रत्ययो भवति । एषणा । अन्वेषणा । अनिच्छायामिति किम् ? इष्यत इति इष्टिः । इच्छेति भावे ।

परेर्वा ॥४।४।७७॥ परिपूर्वादिषेरनिच्छायामर्थे वर्तमानादकर्तरि स्त्रियामर्थेऽनप्रत्ययो वा भवति । पर्येषणा । परीष्टिः ।

सुचरो यः ॥४।४।७८॥ परिपूर्वाभ्यां सु चर इत्येताभ्यामकर्तरि स्त्रियामर्थे यप्रत्ययो भवति । परिसर्या । परिचर्या । परेरिति किम् ? संसृतिः । चूर्तिः ।

आगुरश्च ॥४।४।७९॥ आङ् गृ इत्येताभ्यामकर्तरि स्त्रियामर्थेऽप्रत्ययो यश्च । आपरा । आगर्या ।

प्रत्ययात् ॥४।४।८०॥ प्रत्ययान्ताद्धातोरकर्तरि स्त्रियामर्थेऽप्रत्ययो भवति । गोपाया । चिकित्सा । तितिक्षा । चिकीर्षा । कण्डूया । लोलूया । पुत्रीया । पुत्रीकाम्या । चिच्छिन्तीत्यादिनैकयोगेन विधानुक्त्वा कारवचनं वानाकस्येति प्रतिषेधार्थम् ।

---

१. व्यतिचोरी क० म० । २. भुवेः प्राक्षाविणिरिति इणिः । पूर्वेकारस्तदर्थः । क० म० टि० ।

गुरोर्हलः ॥४।४।८१॥ गुरुमतो हलन्ताद्धातोरकर्तरि स्त्रियामर्थेऽप्रत्ययो भवति । कुण्डा । दुण्डा । शिक्षा । भिक्षा । ईहा । ऊहा । गुरोरिति किम् ? निपठिति. । निगृह्णातीः । हल इति किम् ? नीतिः । संस्तुतिः । लक्षादित्वात् आप्तिः । राद्धिः । दीप्तिः । सृप्तिः[1] । ध्वस्तिः ।

षिच्चिन्तिपूजिकथिकुम्भिचर्च्यन्तर्धोऽङ् ॥४।४।८२॥ णितः चिन्त्यादिभ्यः अन्तःपूर्वाच्च धातोरकर्तरि स्त्रियामर्थेऽङ्प्रत्ययो भवति । जूप्–जरा:[2] । क्षिष्–क्षिया । घटिष्–घटा । व्यथिष्–व्यथा । प्रथिष्–प्रथा । चिन्त्यादेः–चिन्ता । पूजा । कथा । कुम्भा । चर्चा । चिन्तिपूजिकुम्भिचर्चिग्रहणमनर्थकाधार्थम् । अन्तर्धा अन्तर्द्धिरिति तिरोऽन्तर्धाविति सिद्धम् ।

उपसर्गादातः ॥४।४।८३॥ उपसर्गात्परादाकारान्ताद्धातोरकर्तरि स्त्रियामर्थेऽङ्प्रत्ययो भवति । प्रज्ञा । प्रदा[3] । उपदा । उपधा । आशा । उपसर्गादिति किम्? दत्ति । श्रद्धेति प्रज्ञाश्रद्धार्थावृत्तेर्ण इति निपातनात्सिद्धम् ।

भिदादयः क्वचित् ॥४।४।८४॥ भिदादयः शब्दाः अङन्ता. क्वचिदकर्तरि स्त्रियामर्थे साधवो वेदितव्याः । भिदा विदारणे । भित्तिरन्या । छिदा द्वैधीकरणे । छित्तिरन्या । विदा विचारणे । वित्तिरन्या । आरा शस्त्र्याम् । आर्तिरन्या । धारा प्रपतने । धृतिरन्या । गुहा गिर्योषधयोः । गूढिरन्या । एवं क्षिपा । मेधा । हाका । काका । तरा । क्षिया । रेखा । लेखा । चूडा । पीडा । वपा । वसा । मृषा । यदिह लक्षणेनानुत्पन्नं तत्सर्वं निपातनात्सिद्धं वेदितव्यम् ।

सञ्ज्ञाभावे ण्वुः ॥४।४।८५॥ धातोरकर्तरि स्त्रियामर्थे सञ्ज्ञाया भावे च क्वचित् ण्वुप्रत्ययो भवति । प्रच्छर्दिका । प्रवाहिका । प्रस्कन्दिका । विचर्चिका । एवं नामानो व्याधयः । उद्दालकपुष्पभञ्जिका । वारणपुष्पप्रचायिका । सालभञ्जिका । तालभञ्जिका । आम्रीषण्वादिका । अवीषखादिका । एवंनाम्न्यः क्रीडाः । भावे का नाम आसिका । अन्येष्वीहमानेषु का नाम धीयिका[4] । अन्येष्वधीयमानेषु क्वचिदिति वचनात् क्वचिन्न भवति । शिरोऽर्ति. । शिरोऽभितप्तिः । ईक्षा । ईहा ।

प्रश्नाख्याने वेऽच ॥४।४।८६॥ धातोरकर्तरि स्त्रियामर्थप्रश्ने आख्याने च प्रश्नस्य प्रतिवचने च इञ्प्रत्ययो भवति ण्वुश्च । वाग्वचनाद्यथाप्राप्तं च । का कारिम्, का कारिकाम्, कां क्रियाम्, कां कृतिम्, कां कृत्यामकार्षीः । सर्वा. कारोः, सर्वाः कारिकाः, सर्वाः क्रियाः, सर्वाः कृतीः, सर्वाः कृत्याः, अकार्षम् । एवं गणिम्, गणिकाम्, गणनाम् । पचिम्, पाचिकाम्, पक्तिम् । पठिम्, पाठिकाम्, पठितिम् ।

पर्यायोत्पत्यर्हणे ण्वुः ॥४।४।८७॥ धातोरकर्तरि स्त्रियामर्थे पर्यायोत्पत्यर्हणेषु गम्यमानेषु नित्यं ण्वुप्रत्ययो भवति । क्तिनाद्यपवाद. । पर्याये–भवत आसिका । भवतः शायिका । भवतोऽग्रगामिका । आसनपर्यायः शयनपर्याय इत्यर्थ । उत्पत्तौ–इक्षुभक्षिका मे उदपादि । पयःपायिका मे उदपादि । अर्हणमर्हः अत्रार्हति भवानिक्षुभक्षिकाम् । अर्हति भवानोदनभोजिकाम् । अर्हति भवान्दरिद्रायिकाम् । ऋणे–इक्षुभक्षिकां मे धारयसि । असञ्ज्ञाभावार्थं क्वचित्करत्व व्युदासार्थविज्ञानादिबाधनार्थं वचनम् । केचिद्धेत्यनुवर्त्य चिकीर्षोत्पद्यते जिहीर्षोत्पद्यते इत्यप्युदाहरन्ति ।

नञोऽनिश्शापे ॥४।४।८८॥ नञ पराद्धातोरकर्तरि स्त्रियामर्थे शाप आक्रोशे गम्यमानेऽनिप्रत्ययो भवति । क्तिनाद्यपवादः । अकरणिः । अप्रयाणिः । अगमनिर्हं ते वृषल भूयात् । नञ इति किम् ? मृतिस्ते जाल्म भूयात् । शाप इति किम् ? अकृतिः कटस्य । सत्रकक्षकक्षकुच्छ्रगहनात्पापे । चिकीर्षा चरिष्यतिवधो (दा) विश्वपत्यश्ववचनात् सतिशास्तिच्छिन्द्यजह्लकातेरित्यादिना निर्देशाद्धाताः स्वरूपार्थनिर्देशे सिति वीकोशवादिविकरणस्तदभावश्च विज्ञायते ।

---

१. स्वस्तिः क० म० । २. ऋदशोरित्यरादेशः, क० म० टि० । ३. इटि चाभो लुक्, क० म० टि० । ४. खीयिका क० म० ।

नञ्भावे क्रोऽभ्यादिभ्यः ॥४।४।८२॥ विभेस्त्यादिवर्जितेभ्यो धातुभ्यो नञ्भावे नपुंसकभावे क्तप्रत्ययो भवति। घञाद्यपवादः। हसितम्। जल्पितम्। शयितम्। आशितम् छात्रस्य शोभनम्। नपुंग्रहणं किम्? हसः, हासः। अभ्यादिभ्य इति किम्? भयम्। वर्षम्।

करणाधारे आनट् ॥४।४।९०॥ भ्यादिवर्जितेभ्यो धातुभ्यः करणे आधारे अधिकरणे चकारान्नञ्भावे चार्थेऽनट्प्रत्ययो भवति। घञाद्यपवादः। करणे–विचयनी इध्मप्रदचनः। फलशातनः। अविलवनः। इमश्रुकर्तनः[1]। आधारे–(शय्यतेऽस्मिन्निति) शयनम्। आसनम्[2]। अधिकरणम्[3]। गोदोहनी[4]। तिलपीडनी[5]। सक्तुधानी[6]। राजधानी[7]। नञ्भावे–हसनम्। जल्पनम्। शयनम्। आसनम्। राजभोजनाः शालयः। राजाच्छादनानि वासांसि इति कृद्बहुलमिति सिद्धम्। पयःपानं सुखम्। ओदनभोजनं सुखमित्यत्र पयःपानमिति वासमासो दृश्यत इति कर्मणे भावे येन संस्पर्शार्तुः शरीरसुखमिति नारभ्यते ष्टिविसिव्यारेवेनटिकारस्य पक्षे दीर्घः। निष्ठीवनं निष्ठेवनं[8] निसीवनं निसेवनमिति केचित्।

पुंसामिन घः प्रायः ॥४।४।९१॥ पुंसो नाम्नि पुल्लिङ्गनाम्नि धातोः करणाधिकरणयोर्घप्रत्ययो भवति प्राय; क्वचिन्न भवत्यपीत्यर्थः। करणे–प्रच्छाद्यतेऽनेनेति[9] प्रच्छदः। उरच्छदः। दन्तच्छदः। प्लवः। करः। अधिकरणे एत्यस्मिन्कुर्वन्तीत्याकरः। आस्रवः। आपवः। पुंसामिनीति किम्? हरणो दण्डः। पुंग्रहणं किम्? विचयनी। प्रसादनम्। प्राय इति किम्? दोहनः। प्रसादनः। घकारः वेद्यद्युपसर्गस्येति विशेषणार्थः।

गोचरसञ्चरवहव्रजव्यजापणनिगमम् ॥४।४।९२॥ गोचरादयः शब्दाः करणाधारयो. पुंसामिन घप्रत्ययान्ता निपात्यन्ते। हलो घञोऽपवादः। गावश्चरन्त्यस्मिन्निति गोचरः। सञ्चरन्त्यनेनेति सञ्चरः[10]। कषन्ति तस्मिन् कषः। निकषः। खलः। भगः। वहः। व्रजः। व्यजः। आपणः। निगम.। पदमिति मुङ्पदमिति निपातनात्सिद्धम्।

हलो घञ् ॥४।४।९३॥ हलन्ताद्धातोः करणाधारयोः पुंसामिन घञ्प्रत्ययो भवति। घापवादः। वेदः। वेष्टः। स्कन्दः। नेगः। वेगः। अपामार्गः। विमार्गः। आरामः। प्रासादः। आपाकः। प्राय इत्येव। आकर्षः। दोहनः।

तॄस्त्रोऽवात् ॥४।४।९४॥ तॄ स्तॄ इत्येताभ्यां करणाधारयो. पुंसामिन घञ्प्रत्ययो भवति। अवतारः[11]। अवस्तारः।

समश्च हरः ॥४।४।९५॥ समवाभ्यां पराद्धरः करणाधारयोः पुंसामिन घञ्प्रत्ययो भवति। संहारः। अवहारः।

आरदाराध्यायन्यायोध्याधानायाधारायायाः ॥४।४।९६॥ आरादयः शब्दाः करणाधारयोः पुंसामिन घञन्ता निपात्यन्ते। ऋीर्यतेऽनेनेति आरः। दीर्यते पुमानेभिरिति दाराः। अधीयतेऽस्मिन्नित्यध्यायः। नीयतेऽनेनेति[12] न्यायः। उद्धन्ति अनेनेति उदायः। आनीयतेऽनेनेत्यानायः। आध्रियतेऽस्मिन्नित्याधारः। एत्यवयत्यस्मिन्नित्यवायः।

---

१. इमश्रुकृत्यतेऽनेनेति क० म०। २. शेरतेऽस्मिन्निति, शयनम् क० म० टि०। ३. आसतेऽस्मिन्निति, आसनम्, क० म० टि०। ४. अधिक्रियतेऽस्मिन्निति, क० म० टि०। ५. गौर्दुह्यतेऽस्यामिति, गोदोहनी। क० म० टि०। ६. तिलाः पीड्यन्तेऽस्यामिति, क० म० टि०। ७. सक्तवो धीयन्तेऽस्यामिति, क० म० टि०। ८. राजानो धीयन्तेऽस्यामिति, क० म० टि०। ९. सीवनम्, सेवनम्, क० म० टि०। १०. निसन्तादः क० म० टि०। ११. मार्गः क० म० टि०। १२. अवतारो घट्टस्तीर्थः क० म० टि०। १३. नियन्ति अनेनेति न्यायः, क० म०।

उदङ्कोऽजले ॥४।४।९७॥ उदङ्क इति उत्पूर्वादञ्चतेर्वो घञ् वा निपात्यते करणाधारयोः पुंस्यग्नि, अजले जलविषयश्चेन्न घात्वर्थो भवति। जलं चेत्तेन नोच्यत इत्यर्थः। तैलोदङ्कः। घृतोदङ्कः। अजल इति किम्? जलोदञ्चनः[1]। उदकोदञ्चनः। जलप्रतिषेधार्थं आरम्भः।

खनोऽडडरेकेकवकाश्च ॥४।४।९८॥ खनेर्धातोः करणाधारयोः पुंस्यग्नि अड, डर, इक, इकवक इत्येते प्रत्यया भवन्ति। चकारादघञ्च। आखनः। आखः। आखरः। आखनिकः। आखनिकवकः। बलि–आखानः। बहुवचनमकाराभिन्यवत्यर्थम्।

दुस्स्वीषतः कृच्छ्राकृच्छ्रे खः ॥४।४।९९॥ करणाधार इति निवृत्तम्। कृच्छ्रं दुःखम्। अकृच्छ्रं सुखम्। कृच्छ्रार्थवृत्तेर्दुरः, अकृच्छ्रार्थवृत्तिभ्यां सु ईषदित्येताभ्यां पराद्धातोः खप्रत्ययो भवति। घञादयपवादः। सम्भवापेक्षं विशेषणम्। दुःखेन शक्यत इति दुःशयं भवता। सुखेन शक्यत इति सुशयम्। ईषच्छयं भवता। दुष्करः। सुकरः। ईषत्करः कटो भवता। दुस्स्वीषत इति किम्? कृच्छ्रेण कार्या। कृच्छ्राकृच्छ्र इति किम्? ईषल्लभ्यम्, अल्पं लभ्यमित्यर्थः। खकार उत्तरत्र ममर्थः। खार्थेति विशेषणार्थश्च।

च्वौ कर्ताऽप्याद् भूकृञः ॥४।४।१००॥ कृच्छ्राकृच्छ्रार्थेभ्यो दुस्स्वीषद्भ्यः पराट्कर्तृवाचिनः आप्यातकर्मवाचिनश्च च्वौ च्यर्थे वर्तमानात् परो यथासंख्यं भवतेः कृञश्च खप्रत्ययो भवति। दुःखेनाढ्येनाढ्येन भाव्यं[2] दुराढ्यभव भवता। सुखेनानाढ्येनाढ्येन भाव्यं स्वाढ्यम्भवं भवता। ईषदाढ्यम्भवं भवता। दुःखेनाढ्यं आढ्यः क्रियते दुराढ्यङ्करो देवदत्तो भवता। सुखेनानाढ्यः आढ्यं क्रियते इति स्वाढ्यङ्करम्। ईषदाढ्यङ्करो देवदत्तो भवता। सुकरङ्करणि वीरणानि। सुकरः कटो वीरणैरिति वीरणाना करणत्वविवक्षा। च्वाविति किम्? दुःखेनाढ्यः क्रियते।

आतोऽनः ॥४।४।१०१॥ कृच्छ्राकृच्छ्रार्थेभ्यो दुस्स्वीषद्भ्यः पराकारान्ताद्धातोरनप्रत्ययो भवति। खापवादः। दुर्लानम्। सुलानम्। ईषद्लानम्। दुर्ल्लनम्। सुम्लानम्। ईषद्म्लानम्। दुर्जानम्। सुज्ञानम्। ईषज्ज्ञानम्। दुःपानम्। सुपानम्। ईषत्पानम्। दुर्धाना गौः। सुधाना। ईषद्धाना।

शास्युधिदृशिधृषिमृषेः ॥४।४।१०२॥ कृच्छ्राकृच्छ्रार्थेभ्यो दुस्स्वीषद्भ्यः शास युधि दृशि धृषि मृषि इत्येतेभ्योऽनप्रत्ययो भवति। दुःशासन। दुर्योधनः। दुर्दर्शन। दुर्धर्षणः। हृदि दुर्मर्षणमुद्वहन् सरोषः। योगविभागादयमनित्यो वेदितव्यः। तथा चेदमप्युपपन्नं भवति। दुर्दर्शो हि राजा कार्याकार्यविपर्यासमासन्नैः कार्यते। अर्थमन्विष्ट दुर्धर्षभीरुष्टानोन्मृक्तत्वरमिति।

वाऽशंस्ये सद्भूतवत् ॥४।४।१०३॥ प्राप्तुमिष्टमाशंस्यमभिप्रेतं प्रधारितमित्यर्थः। तस्मिन्नर्थे वर्तमानाद्धातोः सद्भूतवच्च वा प्रत्ययो भवति। आशंस्यस्य भविष्यत्त्व दयमतिदेशः। वावचनाद्यथाप्राप्तं च। उपाध्यायश्चेदागच्छति आगमत्, आगतः, आगमिष्यति, आगन्ता, युक्ता अधीमहे, अध्यगीष्महि, एतदधीतं अध्येष्यामहे अध्येतास्महे। सामान्यातिदेशोऽयं न विशेषस्येति लङ्लिटौ न भवतः। आशंस्य इति किम्? उपाध्याय आगमिष्यति। कदा देवदत्त आगतोऽसि। अयमागच्छामि, आगच्छन्तमेव मां विद्धि। अयमागामुकोऽस्मि। कदा देव.त्तागमिष्यसि, अयमागच्छामि, आगच्छन्तमेव मां विद्धि। अयमागामुक इति समीपेऽसमीपेऽसमीपशब्दा[3]वृत्तिर्यथा गङ्गायां घोष इति कारणकार्ययोर्वा कार्योपचार[4] इति वर्तमानसामीप्ये वर्तमानवद्वेति नारभ्यते। देवश्चेद्वृष्टो निष्पन्नाः शालयः इति सिद्धं कृत्वेदमभिधानम् तत्र यथाकालमेव प्रत्ययः। कूपोऽस्ति, कूपो भविष्यति, कूपो भविता, कूपोऽभूत्, कूप आसीत्, कूपो बभूवेति तत्कालसत्तापेक्षाः प्रत्ययाः।

---

१. जनमुदन्त्यतेऽनेनेति क० म० टि०। २. अस्युक्मिति जातिनिर्देश इति दुराख्येत्यस्युक्मिति समुदायस्य स्वकृतास्युक्मिति समासः। क० म० टि०। ३. -पे शब्दवृत्तिर्यदा क० म०। ४. कार्योपचारः क० म०।

क्षिप्राशंसार्थे लृट् लेङ् ॥४।४।१०४॥ *आशंसेऽर्थे वर्तमानाद्धातोः क्षिप्रार्थे आशंसार्थे द्योत्यमाने यथासंख्यं लृट् लेङ् इत्येतौ प्रत्ययौ भवतः। वाऽऽशंसे सद्भूतवदित्येतस्य लुटश्चापवादः। उपाध्यायश्चेदागच्छति आगमत्, आगमिष्यति आगन्ता क्षिप्रमाशु त्वरितं वीघ्रमङ्गायाध्येष्यामहे। आशंसे [1]संभावयेऽवकल्पये युक्तोऽधीयीय। द्वयोरपप्रयोर्लेङ् भवति। शब्दतः परत्वादाशंसे। क्षिप्रमधीयीय।*

अनेवास्तज्ञाविच्छिन्नस्योः ॥४।४।१०५॥ [2]*आसन्नः कालतस्तुल्यजातीयेनाव्यवहितकालः अविच्छिन्नः अव्यवच्छिन्नः [3]प्रतिबन्धवान् सन्ततः। आसन्ने अवच्छिन्ने चार्थेऽनद्यतने वर्तमानाद्धातोरेव प्रत्ययौ भवति। नानद्यतनः। आसन्ने—येयं पौर्णमास्यति[4]क्रान्ता एतस्यां जिनमहः प्रावर्तिष्ट[5] प्रावर्तत[6]। येयं पौर्णमास्यागामिनि(नी) एतस्यां जिनमहः प्रवर्तिष्यते। यावज्जीवं वृषमन्नं दत्तवान्। यावज्जीवं वृषमदादन्नम्, दास्यति। यावज्जीवं युक्तोऽध्यापयिष्यति। अद्यतनानुवादेन यद्यपि न कश्चिदप्रत्ययो विहितोऽस्ति तथाप्यद्यतने दृष्टो लङ् लुडादिर्भूतभविष्यत्सामान्यप्रत्ययो विधीयते। इदंशब्दो यथाविहितार्थः। तेन[7] यथाकालं विधिर्न भवति। अनद्यतनप्रत्ययबाधनार्थं वचनम्।*

वर्त्स्यत्यहोरात्रेऽवोऽवधौ ॥४।४।१०६॥ *अवधौ सति योऽवोऽर्वाक् अवरस्मिन्विभागे वर्त्स्यत्यर्थे तस्मिन्वर्तमानाद्धातोरेव प्रत्ययविधिर्भवति नानद्यतनः अनहोरात्रे न चेदसौ वर्त्स्यत्यर्थः। अहोरात्रविषये भवति। आपिष्टपुराद् गन्तव्येऽस्मिन्नध्वनि पौदनस्यावरस्ताद् द्विरोदनं भोक्ष्यामहे, द्विः सूत्रमध्येष्यामहे। आगामिनि संवत्सरेऽवरस्तादाग्रहायण्या द्विरोदनं भोक्ष्यामहे द्विः सूत्रमध्येष्यामहे। लुड् न भवति। वर्त्स्यदिति किम्? आपिष्टपुराद्गन्तव्येऽस्मिन्नध्वनि पौदनस्यावरस्ताद् द्विरोदनमभुञ्ज्महि[8]। द्विः सूत्रमध्यैमहि। अतीते संवत्सरेऽवरस्तादाग्रहायण्या द्विरोदनमभुञ्ज्महि। द्विः सूत्रमध्यैमहि। अनहोरात्र इति किम्? आगामिनो मासस्यावरस्मिन् पञ्चदशरात्रे द्विः सूत्रमध्येतास्महे[9]। आगामिनस्त्रिंशद्रात्रस्यावरस्मिन्नर्धमासे द्विः सूत्रमध्येतास्महे। त्रिंशद्रात्रावयवार्धमासविषयोऽप्यहोरात्रविषय एवेति तत्रापि प्रतिषेधः प्रसज्यप्रतिषेधात्। नञ्होरात्रावयवविषयप्रतिषेधे पर्युदासप्रतिषेधयोरस्ति विशेषः। अव इति किम्? आपिष्टपुराद् गन्तव्येऽस्मिन्नध्वनि द्विः सूत्रमध्येतास्महे। आगामिनि संवत्सरे द्विः सूत्रमध्येतास्महे। अवधाविति किम्? योऽयमध्वा निरवधिको गन्तव्यस्तस्मिन्पोदनस्यावरस्ताद् द्विः सूत्रमध्येतास्महे। योऽयं निरवधिकः काल आगामी, एतस्मिन्नवरस्तादाग्रहायण्या द्विः सूत्रमध्येतास्महे। अनासन्नाविच्छिन्नस्यार्थं वचनम्। आसन्नाविच्छिन्नस्योर्हि पूर्वेणैव सिद्धम्। देशकालयोरयं विधिरनहोरात्रग्रहणादुत्तत्र च [10]कालग्रहणात्।*

काले परे वा ॥४।४।१०७॥ *अवधौ सति परस्मिन्विभागे काले वर्त्स्यत्यर्थे वर्तमानाद्धातोरेव प्रत्ययो वा भवति अनहोरात्रे। आगामिनः संवत्सरस्य आग्रहायण्याः परस्ताद् द्वि सूत्रमध्येष्यामहे। अविच्छिन्नं सूत्रमध्येतास्महे। काल इति किम्? आपिष्टपुराद् गन्तव्येऽस्मिन्नध्वनि पौदनस्य पुरस्तादवच्छिन्नं सूत्रमध्येष्यामहे। पर इति किम्? आगामिनि संवत्सरे अवरस्तादाग्रहायण्याः सूत्रमध्येष्यामहे। वर्त्स्यतीति किम्? अतीते संवत्सरे परस्तादाग्रहायण्याः निरन्तरमध्यगीष्महि। अनहोरात्र इति किम्? आगामिनो मासस्य परस्तात्पञ्चदशरात्रे निरन्तरं सूत्रमध्येष्यामहे। अवधाविति किम्? योऽयं निरवधिकः कालः आगामी, एतस्मिन् परस्ताद् आग्रहायण्या निरन्तरमध्येष्यामहे। आसन्नाविच्छिन्नयोरपि, अस्मिन्विषयेऽयमेव विकल्प इति सूत्रम्।*

---

१. भूकृञोऽवक्षेपणे शुरादिः। २. भूताद्यतने अविष्यद्यतनेऽनद्यतने च लुङ्लुटौ विहितौ। तयोः प्रतिषेधः क्रियते। क० म० टि०। ३. प्रबन्धवान् सन्ततः क० म०। ४. पौर्णमास्यवान्तरेण अव्यवहिता या पौर्णमासी तामविच्छिन्नेत्याह येयमिति। सा हि यद्यप्यमावास्यया अन्याभिश्च तिथिभिर्व्यवहिता तथापि तुल्यजातीयेन पौर्णमास्याख्येन कालेन अव्यवहितत्वात्सामीप्यं नातिवर्तते। क० म० टि०। ५. भूताद्यतने लुङ्, क० म० टि०। ६. क० म० पुस्तकयोर्नास्ति। ७. —नायथा क० म०। ८. अनद्यतने लङ्, क० म० टि०। ९. अत्र अविष्यदनद्यतने लुट् क० म० टि०। १०. इह सूत्रे देशकृता मर्यादा, उत्तरसूत्रे कालकृता मर्यादा ज्ञेयव्यः। तत्र च विशेषं वक्ष्यति। क० म० टि०।

लेङ्निमित्तेऽवृत्तौ भूते च लृङ् ॥४।४।१०८॥ लेङ्तो निमित्तं कारणसामग्री लेङ्निमित्तं तस्य वृत्तिर्निष्पत्तिरस्तीत्यवृत्तिरतिपत्तिमान्। लेङ्निमित्तेऽवृत्तौ भूते वर्त्स्यति चार्थे वर्तमानाद्धातोर्लृङ्प्रत्ययो भवति। यदि स गुरूनुपासिष्यत शास्त्रान्तमगमिष्यत्। दक्षिणेन चेदयास्यद् न शकटं पर्याभविष्यत्। यदि [1]कमलकमाह्लास्यत् न शकटं पर्याभविष्यत्। यदि मत्समीप आसिष्यत घृतेनाभोक्ष्यत। हेतुभूतं गुरूपासनादिफलभूतं च शास्त्रान्तगमनादिभविष्यद्वृत्तिकमुपलक्ष्यैवं प्रयुज्यते। कारणं फलं [2] च। लेङ्निमित्तभूते न क्षमो न श्रद्धे तत्र भवान्नामादाय कृतमसेविष्यत। अत्राभ[3]र्षाश्रद्धे दृष्टो मया भवतः पुत्रोऽन्नार्थी चङ्क्रम्यमाणः अपरश्चातिथ्यर्थी यदि स तेन दृष्टोऽभविष्यत् अथ भोक्ष्यत उताभोक्ष्यत न तु दृष्टोऽन्येन पथा गतः अत्र वाढेऽप्युते[4] न पर्याभविष्यत्। घृतेनाभोक्ष्यते इति नञ् घृतविशिष्टस्यावृत्तिः। भूते चेति आसन्नवृत्त्यर्थः।

वाऽशेषात् ॥४।४।१०९॥ भूते इति वर्तते। [5]आशेषसंशब्दनाद्यदित ऊर्ध्वं लेङ्निमित्त एतस्मिन् भूते वृत्तिकेऽर्थे वर्तमानाद्धातोर्लृङ्प्रत्ययो वा भवति। पूर्वेण नित्ये प्राप्ते विकल्पः। तेन पूर्वेण भूते वाढेऽप्युते लेङ्न्यादौ भवति। कथं नाम संयतः सन्नगारे तत्र भवानादाय कृतमसेविष्यत धिग्गर्हामहे। वावचनाच्चाप्राप्तं च। कथ सेवेत सेवते धिग्गर्हामहे। आशेषादिति किम्? कालोऽयमभोक्ष्यत् भवान्। भूत इति किम्? भविष्यति नित्यमेव।

गर्हेऽपिजात्योर्लट् ॥४।४।११०॥ अपि जातु इत्येतयोरुपपदयोर्धातोर्गर्हे क्षेपे गम्यमाने लट्प्रत्ययो भवति। काल[6]सामान्येऽयं लट् परत्वात्काल[7]विशेषविहितानपि प्रत्ययान् बाधते। एवमुत्तरत्रापि। अपि तत्र भवान् भूतानि हिनस्ति जातु तत्र भवान् भूतानि हिनस्ति अपि संयतः सन्नगारे तत्र भवानादाय कृतं सेवते जातु तत्र भवानादाय कृतं सेवते धिग्गर्हामहे। अन्याय्यमेतत् इह लेङ्निमित्तो लृङ् न भवति।

[8] कथमि लेङ् च वा ॥४।४।१११॥ कथंशब्द उपपदे धातोर्गर्हे गम्यमाने लेट् लट् च प्रत्ययौ वा भवतः। वावचनाच्चाप्राप्ते च। कथ नाम तत्र भवान् भूतानि हिनस्ति। कथं नाम तत्र भवान् भूतानि [9]हिंस्यात्। हिंसिष्यति। हिंसिता। अहिंसीत्। अहिनत्। जिहिंस। अत्र लेङ्निमित्तमस्तीत्यवृत्तौ लृङ् भवति। कथं नाम तत्र भवान् भूतान्यहिंसिष्यत्।

किंवृत्ते लेङ्लृटौ ॥४।४।११२॥ किंवृत्त उपपदे गर्हायां गम्यमानायां धातोर्नित्यं लेङ्लृटौ प्रत्ययौ भवत.[9]। किं तत्र भवाननृतं ब्रूयात्। किं तत्र भवाननृतं वक्ष्यति। को नाम कतरो नाम कतमो नाम यस्मै तत्र

---

१. भविष्यत्कालविषयमेतद्वचनम्। भविष्यदपर्याभवनम्। हेतुहेतुमत्तद्धेतुभूतं च कमलकाह्लानं लिङ्गेन बुद्ध्वा तदतिपत्तिं च प्रमाणान्तरादवगम्य, वक्ता वाक्यं प्रयुङ्क्ते—यदि कमलकमाह्लास्यत् न शकटं पर्याभविष्यत्। हेतुहेतुमतोराह्वननापर्याभवनयोः भविष्यद्विषययोः अतिपत्तिरितो वाक्याद् गम्यते। लिङ्गेन बुद्ध्वा इत्यत्रोच्यते—असकृत् प्राक् कमलकाह्लाने सति शकटस्य पर्याभवनं दृष्ट्वा भाविनोऽपि कमलकाह्लानस्य शकटापर्याभवनहेतुभूतत्वं लिङ्गेन बुद्ध्वा लिङ्गं पुनः कमलकाह्लानत्वसामान्यधर्मतदतिपत्तिज्ञेति कमलकाह्लानस्य शकटापर्याभवनस्य चातिपत्तिस्तत्र कमलकाह्लानस्य चातिपत्तिं कमलकस्य देशान्तरागमनादिना लिङ्गेनावगम्य शकटापर्याभवनस्यातिपत्तिमपि शकटस्य तु गुरुतरभारारोपणादिना हृतो वाक्यादिति। यदि कमलकमाह्लास्यदित्येवमादिवाक्यात् क० म० टि०। २. वर्त्स्यति फलकारणे, इति वक्ष्यमाणत्वात् क० म० टि०। ३. अत्रामर्षाश्रद्धेऽन्यत्रापि, क० म० टि०। ४. लेङ् क० म० टि०। ५. मर्यादायामाङ्। नाभिविधौ। लृट्शेषे यदाविति वक्ष्यति। प्रागेतस्मिन् सूत्रावधेर्यागीत ऊर्ध्वमनुक्रमिष्यामः। क० म० टि०। ६. वर्तमाने लङ्लृङः कालसामान्ये न प्राप्नोतीति विधीयते कालविशेषविहितानपि प्रत्ययानयं परत्वादस्मिन्विषये बाधते। क० म० टि०। ७. कालसामान्य इत्यनेन भविष्यतीत्यादेः कालविशेषवाचिनोऽननुवृत्तिं दर्शयति। ८. भूते कालविशेषे लङ्लुङ्लिटो विहिताः। भविष्यति लुट्लिङौ तान् सर्वा-(न्) (बाधते) इत्यर्थः। क० म० टि०। ९. सर्वलकाराणामपवादः। लेङ्ग्रहणं लटो निवृत्त्यर्थम्। वृत्तग्रहणेन तद्विभक्त्यन्तं प्रतीयात्— उत्त-उतमौ चेति। क० म० टि०।

भवाननृतं ब्रूयात् । अनृतं वक्ष्यति । लेङ्निमित्तं तत्रास्तीत्यवृत्तौ लृङ् भवति । किं तत्र भवाननृतमवक्ष्यत् ।

अमर्षाश्रद्धेऽन्यत्रापि ॥४।४।११३॥ लेङ्गृटावित्यनुवर्तते । अमर्षोऽक्षमा । अश्रद्धाऽसम्भावना । अन्यत्र अकिंवृत्तेऽपि शब्दात् किंवृत्तेऽप्युपपदेऽमर्षाश्रद्धयोर्गम्यमानयोर्धातोर्लेङ्लृटौ प्रत्ययौ भवतः, वचनभेदाद्याधाराक्यं नास्ति । अमर्षे किंवृत्ते न क्षमे नावमर्षयामि चिङ्मिथ्या नैतदस्ति किं तत्र भवानदत्तं गृह्णीयात् किं तत्र भवानदत्तं ग्रहीष्यति । अकिंवृत्तेन क्षमे अहममर्षो मे चिङ्मिथ्या नैतदस्ति तत्र भवान्नामादत्तं गृह्णीयात् ग्रहीष्यति । अश्रद्धायाम् किंवृत्ते–न श्रद्दधे न सम्भावयामि नावकल्पयामि किं तत्र भवानदत्तं गृह्णीयाद् ग्रहीष्यति । अकिंवृत्ते–न श्रद्दधे तत्र भवान्नामादत्तं गृह्णीयाद् ग्रहीष्यति । अन्यत्रापीति किम् ? अर्थात् प्रकरणाद्ऽमर्षाश्रद्धयोर्गम्यमानयोर्निरुपपदाद्धातोर्मा भूताम् । अवृत्तौ लृङ् भवति । न क्षमे न श्रद्दधे तत्र भवान्नामादत्तमग्रहीष्यत् ।

किंकिलास्त्यर्थयोर्लृट् ॥४।४।११४॥ किंकिलशब्दे समुदाये[1] अस्त्यर्थे चोपपदे अमर्षाश्रद्धयोर्गम्यमानयोर्धातोर्लृट्प्रत्ययो भवति । लेङ्ाऽपवादः । वचनभेदाद्याधाराक्यं नास्ति । न क्षमे न श्रद्दधे किंकिल नाम तत्र भवानकल्प्यं प्रसेविष्यते । अस्ति नाम भवति नाम विद्यते नाम तत्र भवानकल्प्यं सेविष्यते । अत्र लेङ् नास्तीति लृङ् न भवति ।

यद्यदियदाजातौ लेङ् ॥४।४।११५॥ यद् यदि यदा जातु इत्येतेषूपपदेषु अमर्षाश्रद्धयोर्गम्यमानयोर्धातोर्लेङ्प्रत्ययो भवति । लृटोऽपवादः । न क्षमे अमर्षो मे न श्रद्दधे न प्रत्ययो मे यत्तत्र भवानकल्प्यं सेवेत, यदि तत्र भवानकल्प्यं सेवेत, यदा तत्र भवानकल्प्यं सेवेत, जातु तत्र भवानकल्प्यं सेवेत लेङ्निमित्तमत्रास्तीत्यवृत्तौ लृङ् भवति । यदि तत्र भवानकल्प्यमसेविष्यत ।

गर्हेऽपि च यच्चयत्रे ॥४।४।११६॥ यच्च यत्र इत्येतयोरुपपदयोर्गर्हेऽश्रद्धयोश्च गम्यमानयोर्धातोर्लेङ्प्रत्ययो भवति । अमर्षाश्रद्धयोर्लृटोऽपवादः । गर्हे सर्वलकाराणाम् । न क्षमे न श्रद्दधे धिग्गर्हामहे यच्च तत्र भवानाक्रोक्ष्यत् । तत्रावृत्तौ लृङ् भवति । यच्च तत्र भवानाक्रोक्ष्यत् । तत्र भवानाक्रोक्ष्यत् ।

चित्रे ॥४।४।११७॥ चित्रमाश्चर्यमद्भुतं विस्मयनीयम् । यच्चयत्रयोरुपपदयोश्चित्रेऽर्थे गम्यमाने धातोर्लेङ् भवति । चित्रमाश्चर्यं यच्च तत्र[3] भवानकल्प्यं सेवेत । यत्र तत्र भवान् अकल्प्यं सेवेत । अवृत्तौ लृट् चित्रं यच्च तत्र भवानकल्प्यमसेविष्यत । यत्र तत्र भवानकल्प्यमसेविष्यत । योगविभाग उत्तरार्थः ।

लृट्शेषेऽपदौ ॥४।४।११८॥ [4]शेष इत्युपदे चित्रे गम्यमाने धातोर्लृट्प्रत्ययो भवति अपदौ यदि शब्दरूपेण प्रयुज्यते । आश्चर्यमन्धो नाम पर्वतमारोक्ष्यति बधिरो नाम व्याकरणं श्रोष्यति मूको नाम धर्मं कथयिष्यति । शेष इति किम् ? यच्चयत्रयोर्लेङेव । यदौ पूर्वयोगः सावकाशः; यद्यभावे तु यच्चयत्रयोरपि परत्वादयमेव स्यात् इति शेषग्रहणम् । अपदाविति किम् ? आश्चर्यं यदि स भुञ्जीत[5]–अश्रद्धाऽप्यस्तीति लेङ्निमित्तं नास्तीति न लृङ् ।

वाडेऽप्युते लेङ् ॥४।४।११९॥ वाङ्ार्थयोरप्युत इत्येतयोरुपपदयोर्धातोर्लेङ्प्रत्ययो भवति । अपि कुर्यात् उत कुर्यात् वाङ करिष्यतीत्यर्थः । एवमप्यधोयीत । वाङ इति किम् ? अपि दास्यति द्वारं उत दण्डः पतिष्यति । अत्र प्रच्छादनं प्रश्नार्थं[6] । उतावलस्य बलवानुत बालस्य पण्डितः । उतानूचस्य वेदज्ञः पुत्रो जनक जायते । कदिवदित्यर्थः । अवृत्तौ लृङ् । अप्यभोक्ष्यत उताभोक्ष्यत ।

---

१. वृत्तेन किंशब्दकिलशब्दयोः प्रत्येकमुपपदत्वं निरस्यति कस्मात्पुनस्तयोः प्रत्येकमुपपदत्वं न भवति, केवलस्य किंशब्दस्य किलशब्दस्य वामर्षाश्रद्धयोर्गम्यमानत्वसम्भवात् । समुदायस्य च सम्भवात् । क० म० टि० । २. पूर्वेण प्राप्तस्य लेङ्निमित्तमिह नास्तीति लृट एव विधानात् । क० म० टि० । ३. अत्र भवान् तत्र भवान् पूजये च भगवानिति । ४. शेषोऽदादिस्यारभ्य, एतस्मात् सूत्रादुत्तरोपपदेभ्योऽन्यः शेषः, क० म० टि० । ५. अत्र अश्रद्धायामिह गम्यते । क० म० टि० । ६. गम्यः क० म० टि० ।

सम्भावनेऽलमर्थात् ॥४।४।१२०॥ सम्भाव्ये अर्थेऽर्थे वर्तमानाद्धातोः लेङ्प्रत्ययो भवति अलमर्थाद्यदि च्छेदलं भवति न स्वरूपतः। [1]अपि पर्वतं शिरसा भिन्द्यात्। अपि द्रोणपाकं भुञ्जीत। अपि मासमुपवसेत्। अपि पुण्डरीकमध्यायमिहाधीयीत। सम्भाव्यत एतच्छक्त इत्यर्थः। शक्यर्थश्चेहालं परिगृह्यते। अलमीति किम्? निदेशस्थो मे प्रायेण गमिष्यति ग्रामं [2]नगरं वेति देवदत्तो जिनदत्तो वेति वा प्रतीयते। अर्थादिति किम्? अलं देवदत्तो धर्मं करिष्यति। शब्दस्य द्वावात्मानौ अर्थः स्वरूपञ्च तत्र स्वरूपव्युदासार्थमर्थग्रहणम्। अत्र लेङ्निमित्तमस्तीत्यवृत्तौ लृङपि बाध्यते नापतिष्यत्। [3]आशंसाभिलाषो भविष्यकालासम्भावना पुनः श्रद्धानं प्रत्ययस्त्रिकालविषयेत्याशास्यसम्भाव्ययोर्विशेषः।

धातूक्तौ वा यदि ॥४।४।१२१॥ धातूनां सम्भावनावचनेन सम्भावनाया उक्तौ प्रतिपादने सति सम्भाव्येऽर्थे वर्तमानाद्धातोरलम्यर्थादिति लेङ्प्रत्ययो वा भवति; अयदि यच्छब्दश्चेन्न प्रयुज्यते। पूर्वेण नित्ये प्राप्ते विकल्प। सम्भावयामि श्रद्दधे प्रत्येमि अवकल्पयामि भुञ्जीत भवान्, अभुक्त भवान्। धातुग्रहणं किम्? अपि पर्वतं शिरसा भिन्द्यात्। अयदीति किम्? सम्भावयामि यद्भुञ्जीत भवान्। अवृत्तौ लृङ्–सम्भावयाम्यभोक्ष्यत भवान्।

सतीच्छार्थात् ॥४।४।१२२॥ सति वर्तमानेऽर्थे वर्तमानादिच्छार्थाद्धातोर्लेङ्प्रत्ययो भवति वा। इच्छेत्। इच्छति। उश्यात्। वष्टि। कामयेत। कामयते। वाञ्छेत्। वाञ्छति। गर्होऽपि जात्वोर्लेङित्यादावपि परत्वादयमेव विकल्पः। भूते चेति वचनादत्र लृङ्न भवति।

वर्त्स्यति फलकारणे ॥३।४।१२३॥ फलं कार्यं हेतुमत्। करोतीति कारणं [4]हेतुर्निमित्तम्। अत एव निपातनात्कर्तर्यनो दीर्घश्च। वर्त्स्यति फलकारणे [5]चार्थे वर्तमानाद् धातोर्लेङ् प्रत्ययो वा भवति। यदि गुरूनुपासीत शास्त्रान्तं गच्छेत्। यदि गुरूनुपासिष्यते शास्त्रान्तं गमिष्यति। दक्षिणेन चेद्यायात् न शकटं पर्याभवेत्। दक्षिणेन चेद्यास्यति न शकटं पर्याभविष्यति। वर्त्स्यतीति किम्? दक्षिणेन चेद्याति न शकटं पर्याभवति। अवृत्तौ लेङ्। दक्षिणेन चेद् यास्यते न शकटं पर्याभविष्यत्।

कामाविष्कारेऽकच्चिति ॥४।४।१२४॥ वर्त्स्यति चेति निवृत्तम्। काम इच्छाभिप्रायः [6]। तस्याविष्कारे प्रवेदने धातोर्लेङ् [7]प्रत्ययो भवति अकच्चिति कच्चिच्छब्दश्चेन्न प्रयुज्यते। कामो मे भुञ्जीत भवान्, इच्छा मे भुञ्जीत भवान्, अभिप्रायो मे भुञ्जीत भवान्। अनेन परस्य स्वाभिप्रायो निवेद्यते। अकच्चिति किम्? कच्चिज्जीवति ते माता कच्चिज्जीवति ते पिता।

इच्छार्थे लेङ् लेट् ॥४।४।१२५॥ इच्छार्थे उपपदे कामाविष्कारे धातोर्लेङ् लेट् इत्येतौ प्रत्ययौ भवतः [8]। इच्छामि कामये प्रार्थये भुञ्जीत भवान् भुङ्क्तां भवान्। कामाविष्कार इति किम्? इच्छन् करोति। अत्रावृत्तौ परत्वाल्लेटा लृङ् बाध्यते। केवले हि लेङ्विधौ लृङ्वचनं सावकाशमेवमुत्तरत्रापि।

विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थने ॥४।४।१२६॥ विधिर्नियोगः। अज्ञातज्ञापनमित्येके। आमन्त्रणं यत्कामचारतः कर्तव्यम्, कर्तव्येष्वनुज्ञापनमित्येके। अधीष्टः–सत्कारपूर्विका व्यापारणा। सम्प्रश्नः सम्प्रधारणा बुभुत्सा वेदनम्। प्रार्थना याच्ञा। एतेषु प्रत्ययार्थविशेषणेषु धातोर्लेङ्लेटौ प्रत्ययौ भवतः। विधौ–कटं भवान् कुर्यात्, करोतु। ग्रामं भवान् गच्छेत्, गच्छतु। निमन्त्रणे–सख्यासु भवान् नियमं कुर्यात्

---

१. अत्र यत्पर्वतभेदनसामर्थ्यं पुंसि संभाव्यते तत्तस्य विद्यत एवेत्यविद्यमानत्वात्पर्याप्तं सम्भावनम्। क० म० टि०। २. अस्यत्र सम्भावनम् प्रायशब्दात्प्रतीयमानम्। अलमर्थस्तु नास्ति। तेन भविष्यत्कालविवक्षायां लृडेव भवति। क० म० टि०। ३. कोऽर्थः, क० म० टि०। ४. दक्षिणेन मार्गं हेतुं, अपर्याभवनं हेतुमत्, कारणं कार्यमित्यर्थः, क० म० टि०। ५. हेतुमद्धेतुभूत क० म० टि०। ६. इत्यवधारणान्तरमिति शेषः, क० म० टि०। ७. सर्वलकाराणामपवादः, क० म० टि०। ८. सर्वलकाराणामपवादः, क० म० टि०।

सूत्रं भवान् ब्याकरणमधीयीत, अधीताम्। आमन्त्रणे–इह भवानासीत, आस्ताम्। देवदत्तः पठेत्, पठतु। अधीष्टे-तस्वं नः प्रतीदेयुः पादाः। प्रतीदन्तु पादाः। संप्रश्ने–किं नु खलु भो व्याकरणमधीयीय, धर्मशास्त्रमधीयीय। किं नु खलु भोः व्याकरणमध्ययै, धर्मशास्त्रमध्ययै। प्रार्थने–भवति मे व्याकरणमधीयीय, अध्ययै। भवति मेऽध्यात्मशास्त्रमधीयीय, अध्ययै। लेटा बाधनादवृत्तावपि लृङ् न भवति।

प्रैषानुज्ञावसरे लेट्ष्यप् ॥४।४।१२७॥ प्रेषणं प्रैषः। बलाभियोगः–अनुज्ञा। अतिसर्जनमतिसर्गः। अवसरः प्राप्तकालता–निमित्तभूतकालोपनतिः। एतेषु गम्यमानेषु धातोर्लेट् ष्यपश्च प्रत्यया भवन्ति। भवान् कटं करोतु। भवता खलु कटः कार्यः, कर्तव्यः, करणीयः, कृत्यः। भवानिह प्रेषितः, अनुज्ञातः, भवतोऽवसरः कटकरणे लेड् विधीयते ष्यप्ग्रहणं लेटा ष्यपामबाधनार्थम्, अनुज्ञायां केचिल्लेडमप्याहुः। अतिसृष्टो भवान् ग्रामं गच्छेत्, नगरं गच्छेत्। पूर्वसूत्रेऽतिसर्जनग्रहणमधीयते। प्रैषे लेटि विहितेऽपि प्रैषग्रहणं व्यवर्थम्।

लेङ् चौर्ध्वे मुहूर्तात् ॥४।४।१२८॥ प्रैषानुज्ञावसरेषु गम्यमानेषु ऊर्ध्वं मुहूर्तादुपरि मुहूर्तस्य वर्तमानार्थे वर्तमानाद्धातोर्लेङ्प्रत्ययो भवति लेट् ष्यप् च। ऊर्ध्वं मुहूर्तादिदं भवान् कटं कुर्यात्, करोतु, भवता खलु कटः कार्यः, कर्तव्यः, करणीयः, कृत्यः। भवानिह प्रेषितः, अनुज्ञातः, भवतोऽवसरः, कटकरणे।

लेट् स्मे ॥४।४।१२९॥ स्मशब्दे उपपदे प्रैषानुज्ञावसरेषु गम्यमानेषु ऊर्ध्वमौहूर्तिकेऽर्थे वर्तमानाद्धातोर्लेट्प्रत्ययो भवति। लेङ्ष्यपोरपवादः। ऊर्ध्वं मुहूर्तादिदं भवान् कटं करोतु स्म। भवानिह प्रेषितोऽनुज्ञातो भवतोऽवसरः कटकरणे।

अधीष्टे ॥४।४।१३०॥ ऊर्ध्वं मुहूर्तादिति निवृत्तम्। स्म उपपदेऽधीष्टे गम्यमाने धातोर्लेट्प्रत्ययो भवति। लेङोऽपवादः। अङ्ग स्म राजन् अणुव्रतानि रक्ष, शिक्षाः प्रतिपद्यस्व।

कालवेलासमयेऽवसरे तुं वा ॥४।४।१३१॥ काल वेला समय इत्येतेषूपपदेषु, अवसरे गम्यमाने धातोस्तुमप्रत्ययो वा भवति। कालो भोक्तुम्। वेला भोक्तुम्। समयो भोक्तुम्। ऊर्ध्वं मुहूर्तात् कालो भोक्तुम्। भावचनाश्चयाप्र.प्तं च। कालो भोजनस्य, वेला भोजनस्य, अवसर इति। कालः पचति भूतानि, कालः संहरति प्रजाः। कालः सुप्तेषु जागर्ति, कालो हि दुरतिक्रमः॥

लेङ् यदि ॥४।४।१३२॥ यदि सति कालवेलासमयेषु उपपदेषु अवसरे धातोर्लेङ्प्रत्ययो भवति। तुमोऽपवादः। कालो यद्भुञ्जीत भवान्। वेला यद्भुञ्जीत भवान्। समयो यद्भुञ्जीत भवान्।

तुष्यप् चार्हे ॥४।४।१३३॥ अर्हे इति प्रकृत्यर्थस्य वा विशेषणम्। अर्हे गम्यमाने धातोर्लेङ्प्रत्ययो भवति तुष्यपौ च। भवान् खलु कन्यां वहेत्, कन्याया वोढा। भवता खलु कन्या वोढव्या। भवान् खलु च्छेदसूत्रं वहेत्, च्छेदसूत्रस्य वोढा। भवता खलु च्छेदसूत्रं वोढव्यम्। भवानेतदर्हति। लेङ् विधीयते तुष्यब्ग्रहणं लेङ् तुष्यपोरबाधनार्थम्।

णिन्ष्यपावावश्यकाधमर्ण्ये ॥४।४।१३४॥ आवश्यकं आधमर्ण्यं च गम्यमाने धातोर्णिन् ष्यप् च

---

१. किमर्थं प्रैषादिषु ष्यपो विधीयन्ते। सामान्येन भावकर्मणोर्विहिता ये ते प्रैषादिष्वन्यत्र च भविष्यन्तीत्याशङ्क्याह–ष्यविधानादिति। २. विशेषविहितेन लेटा(टा)ऽनेन बाध्यन्ते तन्माभूदित्येवमर्थः क०म०टि०। ३. विधिप्रैषयोः को विशेषः? केचिदाहुः—अज्ञातज्ञापनं विधिः। अप्रवृत्तप्रवर्तनं प्रैषः। क० म० टि०। ४. कालो भोजनस्येत्युक्तेरस्माद् भुङ्क्ष्वेति प्रैषो गम्यते। ततश्च प्रैषादिकमिह प्राप्नोतीत्यभिप्रायः, क० म०टि०। ५. अर्हतीत्यर्हः योग्य इत्यर्थः, तस्मिन्। क० म० टि०। ६. अथ कस्मात् तुष्यपौ विधीयन्ते। ते यावता सामान्येन विहितत्वात् तेनैव भविष्यन्ति। योऽयमिह लेङ्विधीयते तेन बाधा मा भूदिति। ७.चोपाध्यात् गुरुपोषमाद् कुत्सिते क्नुन्। उपाधिरयं आवश्यकशब्दो नोपपदः। उपाधिरिति प्रत्ययार्थविशेषण इत्यर्थः। उपपदत्वे हि कार्यहारीति निरुपपदे न स्यादित्यभिप्रायः। ओरावश्यक इत्यत्र प्रतिपादितमेतत्। आवश्यकमुपाधिर्नोपपदमिति तदिहापि तदुदेनोपाधित्वमावश्यकस्य वेदितव्यम्। तेन सह निर्देशात् अधमर्ण्यमप्युपाधिरेव नोपपदम्। यथावश्यकमुपाधिरेवं सत्यपि उपपदमतिङ् इति समासो न स्यात्। सिध्यति न चान्यकल्पनमस्ति। नैव स समासः स्यात् यो मन्येत तं प्रत्याह—समासो मयूरव्यंसकादित्वादिति क०म०टि०।

प्रत्ययो भवति। अवश्यम्भावः आवश्यकम्। ऋणेऽधमः अधमर्णः, अधमर्णस्य भाव आधमर्ण्यम्। वचनभेदादाधार्यं नास्ति। आवश्यके—कारी। हारी। अवश्यंकारी। अवश्यंहारी। अवश्यंलावी। अवश्यम्पावी। समासो मयूरव्यंसकादित्वात् अवश्यकारीत्यत्रावश्यशब्दस्याकारोऽन्तोऽपि ह्यवश्यशब्दोऽस्ति। ण्यप्—अवश्यम्भाव्यः। अवश्यंगेयः। आधमर्ण्ये—शतं सहस्रं दायो। कारी मेऽसि कटम्। हारी मेऽसि भारम्। ण्यप्—गेयो गाथानाम्। णिन्विधीयते ण्यप्ग्रहणं णिना ण्यामबाधनार्थम्। भव्यादयो हि कर्तरि भवन्ति। अधमर्णग्रहणमुत्तमर्ण्युदासार्थम्।

शक्तौ लेङ्ण्यप् ॥४।४।१३५॥ शक्तौ[2] गम्यमानायां धातोर्लेङ् ण्यप् च प्रत्ययो भवति। भवान् खलु भारं वहेत्। भवता खलु भारो वोढव्यो वाह्यो। वोढव्यः। वहनीयः। भवान् हि शक्तः। लेङ् विधीयते ण्यप्ग्रहणं त्वबाधनार्थम्।

लिङ् लेङाशिषि ॥४।४।१३६॥ आशंसनमाशी.। आङ् शासूञ् इच्छायाम् आशिषि गम्यमानायां धातोर्लेङ्लेटौ प्रत्ययौ भवतः। जीयात्। जीयास्ताम्। जीयासुः। जयतात्। जयताम्। जयन्तु।

माङि लुङ् ॥४।४।१३७॥ माङ्युपपदे धातोर्लुङ् प्रत्ययो भवति। सर्वलकारापवादः। मा भूत्। तन्मा जनि खपुष्पवत्।

लङ् च स्मेन ॥४।४।१३८॥ स्मशब्देन सह माङ्युपपदे धातोर्लङ् लुङ् च प्रत्ययौ भवतः। मा स्म करोत् मा स्म कार्षीत्—देवदत्तः स्म हरत्। मा देवदत्त. स्म हार्षीत्।

भृशाभीक्ष्ण्ये लेट् तस्मिंस्तथार्थे ॥४।४।१३९॥ अवयवक्रियाणामधिश्रयणादीना क्रियान्तरैरव्यवहितानां साकल्यं फलातिरेको वा भृशार्थः। आभीक्ष्ण्य पौनःपुन्यम्। प्रधानक्रियाया भृश आभीक्ष्ण्ये चार्थे वर्तमानाद्धातोर्लेट्प्रत्ययो भवति। सर्वलकारापवादः। तस्मिन् धातौ तथार्थे उपपदे यथाविधोऽर्थो लेडन्तसाधनोपग्रह इत्यर्थः। लुनीहि लुनीहीत्येवं लुनाति। लुनीतः। लुनन्ति। लुनासि। लुनीथः। लुनीथ। लुनामि। लुनीवः। लुनीमः। अलावीत्। अलाविष्टाम्। अलाविषुः। अलावीः। अलाविष्टम्। अलाविष्ट। अलाविषम्। अलाविष्व। अलाविष्म। लविष्यति। लविष्यतः। लविष्यन्ति। लविष्यसि। लविष्यथः। लविष्यथ। लविष्यामि। लविष्यावः। लविष्यामः। अधीष्व अधीष्वेत्येवाधीते। अधीयाते। अधीयते। अधीषे। अधीयाथे। अधीध्वे। अधीये। अधीवहे। अधीमहे। अध्यगीष्ट। अध्यगीषाताम्। अध्यगीषत। अध्यगीष्ठाः। अध्यगीषाथाम्। अध्यगीढ्वम्। अध्यगीषि। अध्यगीष्वहि। अध्यगीष्महि। अध्येष्यते। अध्येष्येते। अध्येष्यन्ते। अध्येष्यसे। अध्येष्येथे। अध्येष्यध्वे। अध्येष्ये। अध्येष्यावहे। अध्येष्यामहे। अधीयस्व। अधीयस्वेत्यधीयते। अधीयेते। अधीयन्ते। अध्यायि। अध्यायिषाताम्। अध्यायिषत। अध्यायिष्यते। अध्यायिष्येते। अध्यायिष्यन्ते। शप्यस्व शप्यस्वेति शप्यते। अशापि। शापिष्यते। एवं सर्वलकारेषूदाहार्यम्। तस्मिन्निति किम्? लुनीहि लुनीहीति छिनत्तीति मा भूत्। तथार्था इति किम्? लुनीहि लुनीहीति लुनीते अधीष्व अधीष्वेत्यधीयते देवदत्तेनेति मा भूत्। अर्थग्रहणं स्वरूपगतप्रकारव्युदासार्थम्। अन्यथा हि लुनात्यलुनात् लुनातु लुनीयादिति लट्लङ्लेट्लेङ्वेव स्यात्। अलावीत्, लुवाव, लविष्यति, लविता, अलविष्यत्, लूयादिति प्रत्ययान्तरे न स्यात्।

प्रचये वा सामान्यार्थे ॥४।४।१४०॥ लेडित्यनुवर्तते। प्रचयः समुच्चयः स्वतः साधनभेदेन वा भिद्यमानस्यैकत्रानेकस्य धात्वर्थस्याध्यारोपः[3]। सामान्यार्थे धावुपपदे प्रचये गम्यमाने धातोर्लेट्प्रत्ययो वा भवति। व्रीहीन्वपति, लुनीहि, पुनीहीत्येव यतते, चेष्टते, समीहते, यत्यते, चेष्टयते, समीह्यते। व्रीहीन्वपति लुनाति

---

१. णिन्वि—क० म०। २. शक्ताविति प्रकृत्यर्थविशेषणमेतत्। एतेनोपपदशक्तेर्निराकृतं भवति। उपपदत्वे हि अप्रयुज्यमाने शक्तेर्न स्यादिति भावः क० म० टि०। ३. ध्यावापः क० म० टि०।

पुनातीत्येव यतते, यत्यते । ग्राममट वनमट गिरिमटेत्येवाटति । घटते । चेष्टते । अटघते । घटघते । चेष्टघते । घटघते । ग्राममटति गिरिमटति वनमटतीत्येव अटति । घटते । अटघते । घटघते । [2]देवदत्तोऽत्तु इत्येव भुज्यते । देवदत्तोऽत्ति जिनदत्तोऽत्ति गुरुदत्तोऽत्तीत्येव भुञ्जते । भुज्यते । ओदनं भुङ्क्ष्व, सक्तून् पिब, धानाः खादेत्येव अभ्यवहरति, अभ्यवहियते । ओदनं भुङ्क्ते, सक्तून् पिबति, धानाः खादतीत्येवाभ्यवहरति, अभ्यवहियते । सूत्राण्यधीष्व, निर्युक्तीरधीष्व, भाष्याण्यधीष्वेत्यधीते । पठति । अधीयते । पठघते । सूत्राण्यधीते निर्युक्तीरधीते भाष्याण्यधीते । इत्यधीते, पठति । अधीयते । पठघते । सामान्यार्थ इति किम् ? निरुपपदः सर्वविशेषोपपदो वा प्रयोगो मा भूत् ।

निषेधेऽलं खलौ क्त्वा ॥४।४।१४१॥ वेति वर्तते । निषेधे वर्तमानयोरलं खलु इत्येतयोरुपपदयोर्धातोः क्त्वाप्रत्ययो वा भवति । वाग्रहणाद्यथाप्राप्तं च । अलंकृत्वा । खलु कृत्वा । अलं बाले रुदित्वा । अलं बाले रुदितेन रोदनेन महान् प्रयोगविषयो नियतविषयाश्च भवन्तीति स्वविषये खलुशब्दो निषेधार्थो द्रष्टव्यः । निषेध इति किम् ? अलंकारं सिद्धं खलु । अलंखलाविति किम् ? मा भावि नार्थो रुदितेन ।

परावरे ॥४।४।१४२॥ धातोः क्त्वाप्रत्ययो वा भवति परावरे परेऽवरे च गम्यमाने । पर्वतमनुक्रम्य नदी । नदीमप्राप्य पर्वतः । नदी परावरः पर्वत इत्यर्थः । नदीपर्वतयोः परावरत्वेन व्यवस्थामात्रं प्रतीयते । अस्ति प्राप्यत इति वा न द्वितीया क्रियेति वचनम् । वाधिकाराद्यथाप्राप्तं च पर्वतातिक्रमेण नदी नद्यप्राप्त्या पर्वत इत्यपि भवति ।

व्यतिहारे मेङ् स्तुल्ये कर्तृके ॥४।४।१४३॥ तुल्यः साधारणः कर्ता यस्य तस्मिन् यस्माद् धातोः प्रत्ययो भवति । तस्य धातोर्यः कर्ता स यस्य कर्ता भवति तस्मिन धातावुपपदे व्यतीहारेऽर्थे वर्तमानान् मेङो धातोः क्त्वाप्रत्ययो वा भवति । अपमित्य याचते याचित्वापमयते । अपमित्य हरति हृत्वापमयतेऽपमित्य याचत इत्यपमातुं याचत इत्यर्थः । प्राक्काले प्राप्तेऽप्राक्कालेऽयं क्त्वाऽऽरभ्यते । अतएव मेङः क्त्वायां याचेः क्त्वा न भवति । व्यतिहार इति किम् ? अर्थान्तरे मा भूत् । अनेकार्था हि धातवो भवन्ति । तुल्यकर्तृक इति किम् ? देवदत्तस्याऽऽयमाने गुरुदत्तो याचते ।

प्राक्काले ॥४।४।१४४॥ प्राक्काले अपरकालेन तुल्यकर्तृकेऽर्थे वर्तमानाद्धातोः क्त्वाप्रत्ययो वा भवति । भुक्त्वा व्रजति । आसित्वा भुङ्क्ते । स्नात्वा भुक्त्वा पीत्वा व्रजति । वानुवृत्तेरास्यते भोक्तुमित्यपि भवति । उत्तरार्थं च वानुवृत्तिः । तुल्यकर्तृक इति किम् ? ऋषीणां भोजने जाते सति भुङ्क्ते देवदत्तः । व्यादाय स्वपिति । सम्भोज्य हसति इति व्यादानाद्युत्तरकालस्वापाद्यपेक्षया प्रत्ययः व्यादाय ह्युत्तरकालं किञ्चित्स्वपिति । सम्भोज्य चोत्तरकालं किञ्चिद्धसति । यद्भुज्यते ततो गच्छति यदधीयते ततः शेत इत्यत्र भुज्यते अधीयत इति न पदं प्राक्काले यत्तद्भ्यां क्रमप्रतीतिरिति न भवति । यथापूर्वं भुङ्क्ते ततो व्रजतीति यद्भुक्त्वा व्रजति । अधीत एव ततः परिमितिकत्वाद्व्रज्यायाः प्राक्काले यत्तद्भ्या व्रज्याऽध्ययनयोः क्रमः प्रतीयते । प्राक्काल इत्येतदुत्तरत्रानवस्थितम् । अभिधानतो व्यवस्था ।

पूर्वाग्रे प्रथमाभीक्ष्ण्ये क्रमुञ् ॥४।४।१४५॥ पूर्व अग्र प्रथम इत्येतेषूपपदेषु आभीक्ष्ण्यधात्वर्थोपाधौ गम्यमाने तुल्यकर्तृकेऽर्थे वर्तमानाद्धातोः क्रमुञ्प्रत्ययो वा भवति । पूर्वं भोजं व्रजति । पूर्वं भुक्त्वा व्रजति । अग्रे भोजं व्रजति । अग्रे भुक्त्वा व्रजति । प्रथमं भोजं व्रजति । प्रथमं भुक्त्वा व्रजति । आभीक्ष्ण्ये–भोजं भोजं व्रजति । भुक्त्वा भुक्त्वा व्रजति । पायं पायं व्रजति । पीत्वा पीत्वा व्रजति । क्रमुञ् भुक्ते क्त्वा । लडादयस्तु

---

१. ग्राममटति वनमटति गिरिमटतीत्येवाटमटति । इमावटतः । इमे अटन्तीति । ग्राममटतीत्यादि स्वमटति युवामटथः यूयमटथ इति सर्वविशेषानुप्रयोगनिदर्शनार्थः । लाघवं च लौकिके व्यवहारे शब्दस्य गाह्यिते । ग्राममट वनमट गिरिमट इत्येवाटतीति अत्रापि कारणभेदात् क्रियाभेदे सति सामान्यवचनात्सम्भवत्येव । क० म० टि० । २. देवदत्तोऽद्दि इत्येव भुञ्जते भुज्यते क० म० ।

नैव तमर्थं गमयन्ति । तत्रापि[1] कार्या भविष्यति पूर्वं [2]भुनक्ति ततो व्रजति पूर्वशब्दोऽत्र [3]प्राक्कालेन तत्पदं पूर्वं भुक्त्वा ततो व्रजतीत्यत्र तु व्रज्यापेक्षे प्राक्काले क्त्वा । व्यापारान्तरापेक्षे पूर्वशब्दः । यत्पुनः पुनर्भुज्यते ततो व्रजतीति यत्तद्भ्यां क्रमः प्रतीयते पुनः पुनरित्यत आभीक्ष्ण्यम् । भुज्यते भुज्यते इति च द्विरुक्तावविच्छेदः प्रतीयते नाभीक्ष्ण्ये । प्राक्काल्ये खित्वम् चोरङ्कारमाक्रोशति स्वादुङ्कारं भुङ्क्त इत्युत्तरार्थम् ।

अन्यथैवं कथमित्थमः कृञोऽनर्थकात् ॥४।४।१४६॥ अन्यथा एवं कथम् इत्थम् इत्येतेभ्यः परातुल्यकर्तृकेऽर्थे वर्तमानात् करोतेरनर्थकाद्धातोः खमुञ्प्रत्ययो भवति वा । आनर्थक्यं करोतेरन्यथादिभ्यः पृथगर्थाभावात् । यत्र ह्यन्यथादयो यया तुल्यकर्तृका प्रकृतिक्रिया भवति । तत्प्रकारमाचक्षते । तत्र कृञपि तैर्विशिष्यमाणस्तमेव प्रकारमाचष्टे । अन्यथाकारं भुङ्क्ते । अन्यथा भुङ्क्त इत्येवार्थः । एवमेवङ्कारं कथङ्कारं भुङ्क्ते । इत्थङ्कारं भुङ्क्ते । वाधिकारात् [4]खमुञा भुक्ते यथाप्राप्तं क्त्वाऽपि भवति । अन्यथाकृत्वा । एवंकृत्वा । कथंकृत्वा । इत्थंकृत्वा । एवमुत्तरत्रापि । अनर्थकादिति किम् ? अन्यथाकृत्वा शिरो भुङ्क्ते । अन्यथाशब्द शिरःप्रकारे कृञश्च शिरःकर्म तत्र विना (?) कृञो गम्यते ।

यथा तथादीर्ष्याप्रत्युक्तौ ॥४।४।१४७॥ यथा तथा इत्येताभ्यां परातुल्यकर्तृकेऽर्थे वर्तमानादनर्थकात् करोतेः खमुञ्प्रत्ययो वा भवति ईर्ष्याप्रत्युक्तौ ईर्ष्यश्चेत्पृष्टः प्रतिवक्ति । ईर्ष्या असहमा । कथं भवान् भोक्ष्यते यथाकारमहं भोक्ष्ये, तथाकारमहं भोक्ष्ये किं तवानेन किं ते मया । यथाऽहं भोक्ष्ये, तथाऽहं भोक्ष्ये इत्यर्थः । ईर्ष्याप्रत्युक्ताविति किम् ? यथा कृत्वा तिलान् खादति । यथाकृत्वाऽहं भोक्ष्ये तथा द्रक्ष्यसि । अनर्थकादिति किम् ? यथाकृत्वाहं शिरो भोक्षे तथाकृत्वाहं शिरो भोक्ष्ये किं तवानेन ।

आप्यादाक्रोशे ॥४।४।१४८॥ आप्यात्कर्मणः परातुल्यकर्तृकेऽर्थे वर्तमानात् करोतेः खमुञ्प्रत्ययो भवति वा आक्रोशे गम्यमाने । चोरंकारमाक्रोशति चोरं कृत्वा चोरशब्दमुच्चार्य क्रोशति चोरोऽसीत्याक्रोशतीत्यर्थः । एवं दस्युंकारमाक्रोशति । व्याधंकारमाक्रोशति । आक्रोश इति किम् ? चोरं कृत्वा हेतुभिः कथयति । साधुं कृत्वा स्तौति ।

स्वादोरप्यच्च्वेः ॥४।४।१४९॥ स्वादुशब्दादाप्यात्परात् कृञः तुल्यकर्तृकेऽर्थे खमुञ्प्रत्ययो वा भवति । अप्यच्च्वेः व्यदन्तं च्व्यन्तं च वर्जयित्वा । स्वादुङ्कारं भुङ्क्ते । सम्पन्नङ्कारं भुङ्क्ते । लवणङ्कारं भुङ्क्ते । स्वादोरित्यर्थः ग्रहणम् । व्यदिति प्रत्याहारः । अप्यच्च्वेरिति किम् ? स्वादुं कृत्वा सम्पन्नं कृत्वा यवागूं भुङ्क्ते । स्वादूकृत्य भुङ्क्ते । सम्पन्नङ्कारं यवागूं भुङ्क्ते । अस्वादुं स्वादुं कृत्वा भुङ्क्ते स्वादुङ्कारं भुङ्क्ते इति [5]स्वादुत्वमात्रं विवक्षितं न लिङ्गम् । च्विश्च विकल्पित इति भवति ।

विद्दृशिभ्यः कात्स्न्र्ये णम् ॥४।४।१५०॥ आप्यात्परेभ्यो विदिभ्यो दृशेश्च प्राक्काले तुल्यकर्तृकेऽर्थे णमप्रत्ययो वा भवति । कात्स्न्र्ये साकल्ये गम्यमाने विद्यतिवर्जास्त्रयो विदयो गृह्यन्ते । विद्यतिस्त्वकर्मकः । अतिथिवेदं भोजयति यं यमतिथिं वेत्ति लभते विचारयति वा तं तं सर्वं भोजयतीत्यर्थः । कन्यादर्शं वरयति । या या कन्या पश्यति ता ता सर्वा वरयतीत्यर्थः । बहुवचनात्त्रयाणामपि विदोर्ना ग्रहणम् । अन्यथाऽज्ञानदाद्योरनादेरेव ग्रहणम् । निरनुबन्धकग्रहणे न सानुबन्धकस्येति वा न लभ्येत । कात्स्न्र्ये इति किम् ? अतिथिं विदित्वा भोजयति । कन्यां दृष्ट्वा वरयति ।

यावतो जीवविन्दात् ॥४।४।१५१॥ यावत् इत्येतस्मादाप्यात् पराभ्यां जीव् विन्द इत्येताभ्यां तुल्यकर्तृकेऽर्थे णमप्रत्ययो भवति कात्स्न्र्ये गम्यमाने । विन्देति लाभार्थस्य सविकरणेन निर्देशः । यावज्जीवमधीते । यावज्जीवति तावदधीते इत्यर्थः । यावद्वेदं गृह्णाति, यावल्लभते तावत्सर्वं गृह्णातीत्यर्थः । जीवेः क्त्वाप्रसङ्गो नात्स्न्र्यपूर्व एव विधिः ।

---

१. –यं वाकाप्यौभ—क० म० । २. भुञ्जति क० म० । ३. प्राक्कालेन क० म० । ४. प्रत्याहारात् क० म० । ५. सम्पन्नत्वमात्रम्, क० म० ।

चर्मोदरात्पूरेः ॥४।४।१५२॥ चर्मन् उदर इत्येताभ्यां कर्मभ्यां परात् पूरयतेः प्राक्काले तुल्यकर्तृकेऽर्थे णम्प्रत्ययो वा भवति। चर्मपूरमास्ते। चर्म पूरयित्वाऽस्त इत्यर्थः। उदरपूरं शेते। उदरं पूरयित्वा शेत इत्यर्थः।

वृद्धीयस्त्वेऽस्योलुग्वा ॥४।४।१५३॥ आप्यारपूरयतेर्णम्प्रत्ययो वा भवति अस्य पूरेरूकारस्य च लुग्वा भवति वृद्धीयस्त्वे वृद्धेरियत्वे गम्यमाने। गोष्पदप्रो वृष्टो देवः। गोष्पदपूरं वृष्टो देवः। सीताप्रवृष्टो देवः। सीतापूरं वृष्टो देवः। यावता गोष्पदादिपूरणा भवति तावद्वृष्ट इत्यर्थः। अस्येति किम्? मूषिकाबिलपूरं वृष्टो देवः। उपपदोकारस्य माभूत्। गोष्पदप्रमिति प्रातेरदा केन वा क्रियाविशेषणे सिद्धयति। गोष्पदपूरमित्यणाऽपा वा। एवं यावज्जीवमित्यादयोऽपि तत्र णम्विधानं गोष्पदप्रतारं गोष्पदप्रतमां गोष्पदप्रकल्पमित्यादयर्थम्। अन्यथा हि गोष्पदप्रतरमित्यादेरेव[1] स्यात्।

चेलार्थात्क्नोपेः॥४।४।१५४॥ चेलार्थादाप्यात् परात् क्नोपेर्धातोः तुल्यकर्तृकेऽर्थे णम्प्रत्ययो वा भवति वृद्धीयस्त्वे गम्यमाने। चेलक्नोपं वृष्टो देवः। वस्त्रक्नोपं वसनक्नोपं [2]परिधानक्नोपं वृष्टो देवः। यावता चेलक्नोपितं [3]समुन्नं भवति तावद् वृष्ट इत्यर्थः।

तृतीयोपदंशः ॥४।४।१५५॥ उपपूर्वादंशतेस्तुल्यकर्तृकेऽर्थे वर्तमानात्तृतीयान्तेन योगे णम्प्रत्ययो वा भवति। मूलकोपदंशं भुङ्क्ते मूलकेनोपदंशं भुङ्क्ते। आर्द्रकोपदंशं भुङ्क्ते। आर्द्रकेणोपदंशं भुङ्क्ते। मूलकाद्युपदंशैः कर्मभुजेः करणम् उपदंशैरपि वा करणमेव कार्मणस्य करणविवक्षाऽस्ति। यथा तण्डुलान्पचति तण्डुलैः पचतीति।

हिंसार्थात्तुल्याप्यात् ॥४।४।१५६॥ हिंसा प्राण्यपकारः। हिंसार्थाद्धातोरतुल्याप्याद् यदासौ तुल्यकर्तृकस्तत् क्रियातुल्यकर्मणस्तृतीयायोगे णम्प्रत्ययो वा भवति। दण्डाघातं गाः [4]कालयति। दण्डेनाघातं गाः कालयति। खड्गप्रहारं शत्रून् जयति। हिंसार्थादिति किम्? चन्दनेनानुलिप्य देवदत्तं परिचारयति। तुल्याप्यादिति किम्? दण्डेनाहत्य गोपालो गाः कालयति।

तत्सप्तम्योपात्पीङ्रुधकृषः ॥४।४।१५७॥ तया तृतीयया सप्तम्या च योगे उप इत्येतस्मात्परेभ्यः पीङ् रुध् कृष इत्येतेभ्यस्तुल्यकर्तृकेऽर्थे णम्प्रत्ययो वा भवति। पार्श्वोपपीडं शेते। पार्श्वेनोपपीडं शेते। भुजोपपीडं परिरब्धयोस्तयोः। व्रजोपरोधं व्रजेनोपरोधं गाः स्थापयति। पाण्युपकर्षं धाना गृह्णाति। पाणावुपकर्षं धाना गृह्णाति। तृतीयासप्तम्योर्बाह्यविशेषः। उपादिति किम्? पार्श्वेन निषीदय तिष्ठति।

प्रमाणसमासस्थोः ॥४।४।१५८॥ आयामयानं प्रमाणम्, संरम्भात् सन्निकर्षः समासत्तिः, प्रमाणसमासस्थोर्गम्यमानयोस्तृतीयासप्तमीभ्यां योगे धातोस्तुल्यकर्तृकेऽर्थे णम्प्रत्ययो वा भवति। प्रमाणे—द्वयङ्गुलोत्कर्षं गण्डिकाविछनत्ति। द्वयङ्गुलेनोत्कर्षम्। द्वयङ्गुल उत्कर्षं गण्डिकाविछनत्ति। त्र्यङ्गुलोत्कर्षम्। त्र्यङ्गुलेनोत्कर्षम्। त्र्यङ्गुल उत्कर्षं गण्डिकाविछनत्ति। समासत्तौ—केशग्राहं युध्यन्ते। केशेषु ग्राहम्। हस्तग्राहं हस्ताभ्यां ग्राहम्। हस्तयोर्ग्राहम्। अस्त्रपनोदम्। असिभिरपनोदम्। असिष्वपनोदं युध्यन्ते। एवं नाम युद्धसंरभात् सन्निकृष्य युध्यन्त इत्यर्थः।

तूर्णेऽपादानेन ॥४।४।१५९॥ त्वरणं तूर्णं त्वरेत्यर्थः। त्वरायां गम्यमानायामपादानेनापायेऽवधिना यस्माद्धात्वर्थे प्रवर्तते, तेन योगे धातोस्तुल्यकर्तृकेऽर्थे णम्प्रत्ययो वा भवति। शय्योत्थार्यं धावति। शय्याया उत्थाय धावति। एवं नाम त्वरते यदन्यानि कर्तव्यानि परित्यज्य शयनादुत्थानमात्रापेक्षो धावति। एवं रन्ध्रापकर्षं रन्ध्रादपकर्षं पयः पिबति। भ्राष्ट्रापकर्षं भ्राष्ट्रादपकर्षम्। अपूपान् भक्षयति। तूर्ण इति किम्? शासनादुत्थाय गच्छति।

---

१. -मित्यादेव स्यात्, क० म०। २. अन्तरीयोपसंव्यानं परिधानाम्बरोऽस्त्रके, इत्यमरः, क० म० टि०। ३. आर्द्रम्, क० म० टि०। ४. कल आगतौ भ्वादिः, क० म० टि०।

द्वितीयया ॥४।४।१६०॥ द्वितीयान्तेन योगे तूर्णे गम्यमाने धातोस्तुल्यकर्तृकेऽर्थे णमुप्रत्ययो वा भवति। लोष्टग्राहं युध्यन्ते। लोष्टान् ग्राहं युध्यन्ते। यष्टिग्राहं युध्यन्ते यष्टीर्ग्राहं युध्यन्ते। दण्डोद्यामं धावति। दण्डमुद्यामं धावति। एवंनामा त्वरमाणा युध्यन्ते यदायुधग्रहणमपि नाद्रियन्त इत्यर्थः। योगविभाग उत्तरार्थः।

स्वाङ्गेनाध्रुवाबाध्येन ॥४।४।१६१॥ अवह्लक्ष्यंयोगोपात्तादि यत्र स्वाङ्गमुपलक्षणं यस्मिन्सत्यपि जीवन्ति तदध्रुवम्। अबाधः सर्वतो विबाधनम्, परिक्लेशः। स्वाङ्गेनाध्रुवेण आबाधेन च द्वितीयान्तेन योगे धातोस्तुल्यकर्तृकेऽर्थे णमुप्रत्ययो वा भवति। अक्षिकाणं जल्पति। अक्षिणी काणं जल्पति। भ्रूक्षेपं जल्पति। भ्रुवोः क्षेपं जल्पति। आबाध्येन—उरःप्रतिपेषं युध्यन्ते। उरांसि प्रतिपेष युध्यन्ते। शिरश्छेदं युध्यन्ते। शिरांसि च्छेदं युध्यन्ते। स्वाङ्गेनेति किम्? गडुमुपोद्य तिष्ठति। अध्रुवाबाध्येनेति किम्? शिरः सवृक्षिप्य जल्पति। आबाध्यग्रहणं ध्रुवार्थम्।

विशिपतिपदिस्कन्दाङ्गीप्साऽऽभीक्ष्ण्ये ॥४।४।१६२॥ विशि पति पद स्कन्द इत्येतेभ्यो धातुभ्यो द्वितीयान्तेन योगे वीप्सायामाभीक्ष्ण्ये च गम्यमाने णमुप्रत्ययो वा भवति। गेहानुप्रवेशमास्ते। गेहं गेहमनुप्रवेशमास्ते। गेहानुप्रपातमास्ते। गेहं गेहमनुप्रपातमास्ते। गेहमनुप्रपातमनुप्रपातमास्ते। गेहानुप्रपादमास्ते। गेहं गेहमनुप्रपादमास्ते। गेहमनुप्रपादमनुप्रपादमास्ते। गेहावस्कन्दमास्ते। गेहं गेहमवस्कन्दमास्ते। गेहमवस्कन्दमवस्कन्दमास्ते। असमासे द्विर्वचनं समासेऽसमासस्तत्र रूढ इति न भवति। तत्र वीप्साया द्रव्यस्य आभीक्ष्ण्ये क्रियाया आभीक्ष्ण्ये णमुप्रचनं समासार्थम्। अत्र हि टोक्तत्वात् समासो भवति। पूर्वत्रैव प्रथमाभीक्ष्ण्ये णमुञि-यत्र वाधिकारात्तु वक्ष्या भवत्येव। गेहं गेहमनुप्रविश्यास्ते। गेहमनुप्रविश्यानुप्रविश्यास्ते।

तृष्यसः कालेनान्तरे ॥४।४।१६३॥ क्रियामन्तरयतीत्यन्तरः क्रियाया व्यवधायको विच्छेदकः क्रियाभेदस्तस्मिन्नर्थे वर्तमानात् तृष्यतेरस्यतेश्च धातोः कालवाचिना द्वितीयान्तेन योगे णमुप्रत्ययो वा भवति। द्वयहंतर्षं गावः पिबन्ति। द्वयहं तर्षं गावः पिबन्ति। द्वयहात्यासं गावः पिबन्ति। द्वयहमत्यासं गावः पिबन्ति। अन्तर्मुहूर्तात्यासं सम्यक्पश्यति। अन्तर्मुहूर्तमत्यासं सम्यक्पश्यति। द्वयहादेः पूर्वापरपानाद्यन्तरे तृष्यस्यती। तृष्यस इति किम्? द्वयहमुषोष्य भुङ्क्ते। कालेनेति किम्? योजनं तृषिन्धा गावः पिबन्ति। योजनमत्यस्य गावः पिबन्ति। अन्तर इति किम्? अहरत्यस्येष्यन् गतः। क्रिया क्रियामेवान्तरयतीति क्रियाग्रहणं न क्रियते।

ग्रहादिशो नाम्ना ॥४।४।१६४॥ ग्रहेरादिशेश्च नाम्ना नामशब्देन द्वितीयान्तेन योगे णमुप्रत्ययो वा भवति। नामग्राहमाचष्टे। नामादेशमाचष्टे। असमासे नामनि ग्राहं नामानि ग्राह नाम देवदत्तो ग्राहमाचष्टे।

कृञोऽव्ययेनानिष्टोक्तौ णमुक्त्वौ ॥४।४।१६५॥ कृञो धातोरव्ययेन योगे णमुक्त्वाविश्येतौ प्रत्ययौ वा भवतः अनिष्टायामुक्तौ गम्यमानायाम्। ब्राह्मण पुत्रस्ते जातः। किं तर्हि वृषल नीचैःकारमाचष्टे। किं तर्हि नीचैर्वृषल कारमाचष्टे। किं तर्हि वृषल नीचैःकृत्य नीचैः कृत्वाऽऽचष्टे। उच्चैर्नाम प्रियमाख्येयम्। ब्राह्मण कन्या ते गर्भिणी जाता। किं तर्हि वृषलोच्चैःकारमुच्चैर्वृषल कारमाचष्टे उच्चैःकृत्य उच्चैःकृत्वाऽऽचष्टे नीचैर्नामाप्रियमाख्येयम्। अनिष्टोक्ताविति किम्? उच्चैःकृत्वाचष्टे ब्राह्मण पुत्रस्ते जातः। नीचैः कृत्वाचष्टे ब्राह्मण कन्या ते गर्भिणी जाता। अव्ययेनेति किम्? ब्राह्मण पुत्रस्ते जातः। किं तर्हि वृषल मन्दं कृत्वाऽऽचष्टे? ब्राह्मण कन्या ते गर्भिणी जाता। किन्तर्हि वृषल वारं कृत्वाचष्टे? णमुक्त्वाग्रहणमुभयोः समासार्थम्। अन्यथा हि वाधिकाराद्यथाप्राप्तं क्त्वाऽप्यनुज्ञाने टोक्त इति समासो णम एव स्यान्न क्त्वायाः तद्विधौ टोक्त्यभावात्। उत्तरत्र च तुल्यकक्ष्यमुभयमनुवर्तते।

तिरश्चापवर्गे ॥४।४।१६६॥ तिरश्च इत्यनेनाव्ययेन योगेऽपवर्गे गम्यमाने कृञो धातोर्णम् क्त्वा इत्येतौ प्रत्ययौ वा भवतः। अपवर्गः समाप्तिर्निष्ठा। समाप्तिपूर्वको विराम इत्येके। त्याग इत्यन्ये। तिर्यककारम् तिर्यक्कृत्य, तिर्यक्कृत्वा गतः। समाप्य विरम्य वा—उत्सृत्य वा गत इत्यर्थः। अपवर्ग इति किम्? तिर्यक् कृत्वा काष्ठं गतः।

भुवोऽनूचानुलोम्ये ॥४।४।१६७॥ भू इत्येतस्माद्धातोरनूङित्त्वनेनाव्ययेन योगे आनुलोम्ये गम्यमाने णम्-क्त्वाप्रत्ययौ भवतः । आनुलोम्यमानुकूल्यं परचित्ताराधनम् । अन्वग्भावम्, अन्वग्भूय, अन्वग्भूत्वा तिष्ठति । अनुकूलो भूत्वेत्यर्थः ।

तूष्णीमा ॥४।४।१६८॥ तूष्णीमा योगे भुवो धातोर्णम्-क्त्वाप्रत्ययौ वा भवतः । तूष्णीम्भावम्, तूष्णीम्भूय, तूष्णीम्भूत्वा तिष्ठति । जोषं तिष्ठतीत्यर्थः ।

स्वाङ्गात्तसा कृभ्वः ॥४।४।१६९॥ व्याश्रये तसित्यस्य यस्तस्प्रत्ययः स्वाङ्गाद्विहितस्तदन्तेन योगे कृभूभ्वां धातुभ्यां णम्-क्त्वाप्रत्ययौ वा भवतः । स्वाङ्गमुक्तलक्षणम् । वचनभेदाद्यथासंख्यं नास्ति । तेनोभाभ्यामुभावपि प्रत्ययौ भवतः । मुखत.कारम्, मुखत:कृत्य, मुखत:कृत्वा गतः । मुखतोभावम्, मुखतोभूय, मुखतोभूत्वा स्थितः । स्वाङ्गादिति किम् ? सर्वतः कृत्वा गतः । तसेति किम् ? मुखं कृत्वा गतः । तसेति निरनुबन्धकस्य प्रत्ययस्य ग्रहणं न यातोः सानुबन्धकस्य तस्य उपक्षय इति ।

च्वौ धाण् विना नाना ॥४।४।१७०॥ धाणिति संज्ञायां वा इत्यारभ्या तद्धति धणः प्रत्याहारेण धाञ् प्यञ् च (१) एव मेधाः परिगृह्यन्ते । धणस्त्वव्ययेनेति व्युदासः । च्वाविति च्व्यर्थनिर्देशोऽयं णन्तेन च यथा-वृत्तिनाव्ययेन विना नाना इत्येताभ्यां च योगे कृभूभ्वां, क्त्वा-णम्प्रत्ययौ वा भवतः । द्विधाभूतं कृत्वा गतः । द्विधाकारम्, द्विधाकृत्य, द्विधा कृत्वा गतः । अद्विधाभूतः द्विधाभूत्वा स्थितः । द्विधाभावम्, द्विधाभूय, द्विधाभूत्वा स्थितः । एवमैकध्यकारम्, ऐकध्यकृत्य, ऐकध्यभावम् ऐकध्यंभूय, ऐकध्यं भूत्वा, द्वैधङ्कारं द्वैधङ्कृत्य, द्वैधम्भा-वम्, द्वैधम्भूय, द्वैधम्भूत्वा । द्वेधाकारं द्वेधाकृत्वा, द्वेधाभावम् , द्वेधाभूय, द्वेधाभूत्वा, विनाकृत्वा, विनाभावम्, विनाभूय, विनाभूत्वा, नानाकारम्, नानाकृत्य, नानाकृत्वा, नानाभावम् , नानाभूय, नानाभूत्वा स्थितः । च्वाविति किम् ? द्विधाकृत्वा काष्ठानि गतः ।

शुष्कचूर्णरूक्षाद्दाप्यात्पिषस्तस्मिन् णम् ॥४।४।१७१॥ शुष्क चूर्ण रूक्ष इत्येतेभ्यः कर्मभ्यः परा-त्पिषेर्धातोर्णम्प्रत्ययो भवति तस्मिन्यदि स एव धातुरुपपदं भवति । शुष्कपेषं पिनष्टि । शुष्कं पिनष्टीत्यर्थः । शुष्कपेष पिष्ट. । शुष्कः पिष्ट इत्यर्थः । एवं चूर्णपेषं पिनष्टि । रूक्षपेष पिनष्टि । बाधिकाराच्छुष्कस्य पेषं पिनष्टीति यजादयोऽपि भवन्ति । प्रकृत्युपपदयोः क्रियाभेदाभावात् प्राक्काल्यं नास्तीत्यत्वाप्रसङ्ग एव विधिः ।

कृम्ग्रहोऽकृतजीवात् ॥४।४।१७२॥ अकृत जीव इत्येताभ्याम् आभ्यां यथासंख्यं पराभ्यां कृम् ग्रह इत्येताभ्यां धातुभ्यां णम्प्रत्ययो वा भवति तस्मिन् धातावुपपदे । अकृतकारं करोति अकृतं करोतीत्यर्थ. । जीवग्राहं गृह्णाति जीवन्तं गृह्णातीत्यर्थः ।

निमूलात्कषः ॥४।४।१७३॥ निमूलादाभ्यात्परात् कषेर्धातोर्णम्प्रत्ययो वा भवति तस्मिन्धातावुपपदे । निमूलकाषं कषति । निमूलं कषतीत्यर्थः ।

समूलाद्घनश्च ॥४।४।१७४॥ समूलशब्दादाभ्यात् पराद्धन्ते. कषेश्च णम्प्रत्ययो वा भवति तस्मि-न्धातावुपपदे । समूलघातं हन्ति । समूलं हन्तीत्यर्थ. । समूलकाषं कषति । समूलं कषतीत्यर्थ. ।

करणात् ॥४।४।१७५॥ करणवाचिनः पराद्धन्तेर्णम्प्रत्ययो भवति वा तस्मिन्धातावुपपदे । पाणि-घातं हन्ति, पाणिना हन्तीत्यर्थः । एवं पादघातं हन्ति । असिघातं हन्ति । शरघातं हन्ति शत्रून् । हिंसार्थादपि करणात् परत्वादयमेव विधिः । अस्मिन्सति नित्यसमासः स एव च धातुरुपपदं भवति ।

हस्तार्यादू वृत्तवर्तिग्रहः ॥४।४।१७६॥ हस्तार्यात्करणवाचिनः परेभ्यो वृतुवर्तिग्रहेभ्यो धातुभ्यो णम्प्रत्ययो वा भवति तेष्वेवोपपदेषु । हस्तवर्तं वर्तते । करवर्तं पाणिवर्तं बहुवर्तं हस्तेन वर्तन इत्यर्थः । हस्त-वर्तं वर्तयति करवर्तं पाणिवर्तं हस्तेन वर्तयतीत्यर्थः । हस्तग्राहं गृह्णाति । करग्राहं पाणिग्राहं गृह्णाति । हस्तेन गृह्णातीत्यर्थः ।

स्वस्नेहनार्थात् पुष्पिषः ॥४।४।१७७॥ स्वार्थात्स्नेहनार्थाच्च करणवाचिनो यथासंख्यं पराप्पुषः पिषेश्च धातोस्तस्मिन्नुपपदे णम्प्रत्ययो वा भवति । आत्मात्मीयं जातिर्धनं च स्वार्थः । स्निह्यते येन स स्नेह-

मार्थो हवीकरणार्थः । स्वार्थात्पुषः—स्वपोषं पुष्णाति । आत्मपोषं पुष्णाति । शोपोषं पुष्णाति । महिषपोषं पुष्णाति । पितृपोषं पुष्णाति । मातृपोषं पुष्णाति । रैपोषं पुष्णाति । धनपोषं पुष्णाति । स्वादिभिः पुष्णातीत्यर्थः । स्नेहनार्थात्पिषः—उदपेषं पिनष्टि । घृतपेषं पिनष्टि । तैलपेषं पिनष्टि । उदकादिभिः पिनष्टीत्यर्थः ।

नाम्नि बन्धः ॥४।४।१७८॥ बन्ध इति प्रकृतिर्नामविशेषणं च बन्धार्थस्य बन्धनस्य यन्नाम तद्विषयात् करणवाचिनः पराद्बन्धेस्तस्मिन्नुपपदे णम्प्रत्ययो भवति । अट्टालिकाबन्धं बद्धः । चण्डालिकाबन्धं बद्धः । क्रौञ्चबन्धं बद्धः । महिषिकाबन्धं बद्धः । मयूरिकाबन्धं बद्धः । मर्कटबन्धं बद्धः । अट्टालिकादीनि बन्धनामधेयानि तैर्बन्धेर्बद्ध इत्यर्थः । अन्ये नाम्नीति प्रत्ययान्तोपाधिं मन्यन्ते प्रत्ययान्तं चेन्नाम भवतीति तेषामट्टालिकाबन्धमित्येवमादीनि बन्धनामधेयानि ।

आधाराद् ॥४।४।१७९॥ आधारवाचिनः पराद् बन्धे तस्मिन्नुपपदे णम्प्रत्ययो वा भवति । चक्रबन्धं बद्धः । मयूरिकाबन्धं बद्धः । कूटबन्धं बद्धः । गुप्तिबन्धं बद्धः । चक्रादिषु बद्ध इत्यर्थः । ग्रामे बन्ध इति बहुलाधिकारान्न भवति । नाम्नीति चाऽनुवर्तते ।

कर्तुर्जीवपुरुषाभ्यांशिवहः ॥४।४।१८०॥ कर्तृवाचिनो जीवशब्दात् पुरुषशब्दाच्च यथासंख्यं पराद्वहेर्वोदश्च धातोस्तस्मिन्धातावुपपदे णम्प्रत्ययो वा भवति । जीवनांशं नश्यति जीवन्नश्यतीत्यर्थः । पुरुषवाहं वहति । पुरुषः प्रेष्यो भूत्वा वहतीत्यर्थः । कर्तुरिति किम् ? जीवेन नष्टः । पुरुषं वहति ।

ऊर्ध्वात्पूङ्शुषः ॥४।४।१८१॥ ऊर्ध्वशब्दात्कर्तृवाचिनः परात्पूरेः शुषेश्च तस्मिन्धातावुपपदे णम्प्रत्ययो वा भवति । ऊर्ध्वपूरं पूर्यते । ऊर्ध्वः पूर्यत इत्यर्थः । ऊर्ध्वशोषं शुष्यति । ऊर्ध्वः शुष्यतीत्यर्थः ।

आप्याय्यचेवे ॥४।४।१८२॥ आप्यात्कर्मणः कर्तुश्च पराद्धातोस्तस्मिन्धातावुपपदे णम्प्रत्ययो वा भवति इवे इवार्थे लोपम्ये गम्यमाने । आप्यात्—घृतनिचायं निहितः । घृतमिव निहित इत्यर्थः । शाकक्लेशं विलष्टः । कर्तुः—संभिन्ननाशं नश्यति । महामतिनाशं नश्यति नास्तिकः । तादृग्नश्यतीत्यर्थः । एवमजनकनाशं नश्यति । ननाश शत्रुर्गजनाशमाशु ।

समर्थास्त्यर्थधृषज्ञाशक्लाघटसहार्हारभलभक्रमे तुम् ॥४।४।१८३॥ समर्थोऽस्त्यर्थे धृष ज्ञा शक ग्ला घट सह अर्ह रभ लभ क्रम इत्येतेषु चोपपदेषु इवे धातोस्तुम्प्रत्ययो भवति । अतदर्थोपपदार्थोऽयमारम्भः । समर्थो भोक्तुम् । पर्याप्तो भोक्तुम् । अलं भोक्तुम् । पारयति भोक्तुम् । अत्र भोजने सामर्थ्यं प्रतीयते । अस्ति भोक्तुम् । भवति भोक्तुम् । विद्यते भोक्तुम् । अत्र सम्भवमात्रम् । धृषादिषु—धृष्णोति भोक्तुम्, शक्नोति भोक्तुम्, अत्र प्रागल्भ्यमात्रम् । ग्लायति भोक्तुम्, अज्ञाशक्तिः । घटते भोक्तुम्, सहते भोक्तुम्, अर्हति भोक्तुम् । अत्र योग्यतामात्रम् । लभते भोक्तुम् । अत्र प्रक्रमनमात्रम् । आरभते भोक्तुम्, प्रक्रमते भोक्तुम् । अत्र भुजेरेवाद्यावस्था न क्रियान्तरम् । शक्तिग्रहणसमर्थार्थं शकधमेवं कर्तुमिति हि लोकयं प्रतीयते सम्भावो वा शक्त्या भुज्यत इत्यादावनभिधानान्न भवति ।

क्रियायां तदर्थायां वुण् लट् च ॥४।४।१८४॥ धातोस्तुम् वुण् लुट् च प्रत्यया भवन्ति क्रियायां तदर्थायाम् । यस्माद्धातोः स तुम्प्रत्ययो भवति तदभिधेयार्थं चेत् क्रियान्तरं गम्यते । कर्तुं व्रजति । हर्तुं व्रजति । भोक्तुं ददाति । पातुं ददाति । भोजको व्रजति । भोजका व्रजन्ति । भोजकं कुलं व्रजति । ययौ श्वश्रूमुपाचिका । करिष्यामीति व्रजति । अर्जयिष्यन् वसति । प्रियमिव कथयिष्यन्नालिलिङ्ग स्फुरन्तीम् । क्रियायामिति किम् ? भिक्षित्र इत्यस्य जटाः । तदर्थायामिति किम् ? यावतस्ते पतिष्यति दध्नः । प्रत्ययान्तराणामेते बाधकाः । पाकाय व्रजति, जयाय व्रजति, भूतये व्रजति, व्रज्यायै तिष्ठति, भोजनाय तिष्ठतीति चतुर्थ्यांऽपि तादर्थ्यं गम्यते । स्थाणि वुण इति केचिद् भवति ।

---

१. सरन् सरसि सम्फुल्लकल्हारस्वादुवारिणि । मत्स्यो बडिशमांसार्थी जीवनाशं व्रजिष्यति । क० म० टि० ।

कर्मणोऽण् ॥४।४।१८५॥ कर्मणः पराद्धातोः क्रियायां तदर्थायां गम्यमानायां अण्प्रत्ययो भवति। (कुम्भं करोतीति) कुम्भकारो व्रजति। गोदायो व्रजति। वुण्लुटोः प्राप्तयोर्वचनम्। परत्वादुगादीनपि बाधते।

लेङ्तुमिच्छार्थे तुल्यकर्तृके ॥४।४।१८६॥ कालोर्लेङ्तुमौ प्रत्ययौ भवतः तदर्थायां क्रियायां वर्तमान इच्छार्थे तुल्यकर्तृक उपपदे यस्माद्धातोर्लेङ्तुमावुत्पद्येते तदर्थस्य चेत्कर्ता इच्छार्थस्यापि कर्ता भवति। भुञ्जीयेतीच्छति भुञ्जीयेति वाञ्छति। भोक्तुमिच्छति। भोक्तुं वाञ्छति। भोक्तुं वष्टि। भोक्तुमभिलषति। भोक्तुं कामयते। लेङ् तुमं बाधते[1] इति तुल्यकर्तृके नियमार्थं च तुमुग्रहणम्। इच्छार्थ इति किम्? भोजको गच्छति। तुल्यकर्तृक इति किम्? इच्छामि भुक्तां भवान्। क्रियायां तदर्थायामिति किम्? इच्छन् भुङ्क्ते।

इति श्रुतकेवलिदेशीयाचार्यशाकटायनकृतौ शब्दानुशासने वृत्तौ चतुर्थस्याध्यायस्य चतुर्थः पादः (समाप्तः)। समाप्तमिदं शास्त्रम्।

■

---

१. बाधेति-सु—[illegible] अ०।

परिशिष्ट–१

सूत्राणामकारादिक्रमणिका

अ

अकः २।१।२०६
अकर्तरि ४।४।३
अकर्मकात् १।३।११७
अकल्पात् सूत्रात् २।४।१७५
अकामेऽमूर्धमस्तकात्स्वाङ्गात् २।२।१२
अक्षयञ्जयचि ४।२।१३०
अक्षिदल्लुग्घेतौ ४।२।१७
अक्ष्णोऽप्राण्यङ्गे २।१।१४८
अक्षश्वनुः ४।३।२६
अक्षनुतुस्कन्निच्छिश्वशपसहाद्. ४।२।१८०
अग्नेश्चेः ४।३।१९३
अग्निचित्या ४.३।७६
अग्नौ परिचाय्योपचाय्यसमूह्यचित्याः ४।५।६६
अग्रान्तशुद्धशुभ्रवृषवराहाहिमूषिकात् २।१।२११
अचि १।१।१२१
अचि ४।१।१३
अचोऽचित्ते ४।३।९०
अचो ह्नोऽह्नवः १।१।११७
अच्याक् ४।१।८३
अच्यस्पृष्टश्च १।१।१५४
अजाड्माड्डः १।१।१२६
अजाते. पञ्चम्याः ४।३।१९९
अजादिभ्यो धेनोः २।४।२४
अजाद्यताम् १।३।१३
अज्ञेः शतुः १।२।१४
अटधाद्येकाज् हलादिभ्योऽचिशुचिभ्या भृशाभीक्ष्ण्ये यङ् ४।१।१०
अणि २।३।६२
अण् कुटिलिकायाः ३।२।१७
अतः ४।२।१००
अत इञ् २ ४।२१
अतडः ४।२।१७१
अतडाण्णशतुसुस्थाथुसश्णश्वमाः १।४।१०१
अतोऽम् १।२।४
अतश्शि चोत् ४।२।४३
अतोऽह्नः २।२।१६८
अतोऽनुनासिकस्य मम् ४।१।८८
अतोऽद्वष्युः १।१।१५७
अतो हः ४।२।३९
अत्र च ३।२।२२६
अत्यन्तापह्नवे लिट् ४।३।२११
अदोर्घात् १।१।११८
अदोऽनन्नात् ४।३।१७७
अदोऽट् ४।२।२८
अद्यश्यत. ४।२।३४
अदौ ४।३।५४
अद्येवासन्नविच्छित्त्यो ४।४।१०५
अद्व्यादिवैगुण्यात्सर्वादिकिबहोः प्तम् ३।४।१२
अध. १।२।८०
अधर्मक्षत्रसंसर्गाङ्क्त्रेविद्यायाः २।४।१७६
अधराच्चात् ३।४।३९
अधिकमस्मिन्शतसहस्रे तत्संख्यं-घातिशदशान्तादड् ३।३।७५
अधीष्टे ४।४।१३०
अध्यायिन्यदेशकालात् ३।२।७४
अध्यानौ यज्ञो ३।३।५७
अन. २।१।१५३
अनुडुहो नम् १।२।११३
अनडुद्यदुक्षिगिदृक्स्पृधृक्परिव्राट् १।२।७०
अनत्यन्ते ३ ४।८०
अनद्यतने हिः ३।४।२४
अनद्यतने लङ् ४।३।२०७
अनपत्ये २।३।६४
अनाच्छादनाज्जातेः पूर्वपदात् कृतादजातकृतमितप्रतिपन्नात् १।३।२४
अनात्मन्यनाध्याने १।४।६१
अनाश्वान् १।४।८२
अनादेः शतादतस्मिन्यठौ ३।२।१२७
अनुकम्पातन्त्रीत्योः ३।४।८७
अनुगादिनः ३।४।१३८
अनुग्वलम् ३।३।५६
अनुशतिकादीनाम् २।३।१०८
अनुसर्गाः क्षीवोल्लाघकृशपरिकृशफुल्लोत्फुल्लसंफुल्लाः ४।१।२५८
अनेकाचोऽव्यक्तानुकरणात्कुम्बस्तिभ्यां द्विश्च ३।४।५४
अन्तः २।१।१२४
अन्तःश्नुभ्नादीनाम् १।२।५४
अन्त्रोऽसेः ४।२।१४०
अन्त्रलेश्वालुचः २।१।१६४
अन्त.पूर्वात् ३।१।१२७
अन्त्योपान्त्यतामिर् ४।१।१६९
अन्तर्बहिर्भ्यां लोम्नः २।१।१९२
अन्तरोऽपसो मः ३।१।६३
अन्ते च ४।२।२४३
अंसं ह्मरिणि ३।३।१०२

अंशावृतेः २।३।९४
अपायेऽवधौ १।३।१५६
अपूर्वपदो डत् १।१।१२
अप्सरसः ४।१।२५
अप्रयोगीत् १।१।५
अप्राणिनि २।१।१७५
अब्भौ चोदन्वान् १।२।९९
अभिजनात् ३।१।१९८
अभिनिविशश्च १।३।१२४
अभिनिष्क्रामति द्वारे ३।१।१९१
अभिन्ने १।२।५६
अभ्रादिभ्यः ३।३।१४२
अमनुष्ये टक् ४।३।११९
अमपञ्चभ्यः १।२।१५७
अमर्षश्रद्धेऽन्यत्रापि ४।४।११३
अमोऽधिकृत्य ३।१।१८७
अमोढल्याः १।२।१८३
अम्यपगुरो वा ४।१।१८३
अर्थाधिताद्भावात् ३।३।१५५
अर्थ्यसिद्धौ ४।३।२८७
अर्दसन्निवेः ४।२।१४४
अर्धपूर्वो डत् १।१।१२
अर्धाच्च २।१।१६६
अर्धात्पलकंसकर्षात् ३।२।१३१
अर्हेः ४।३।१२३
अर्हति ३।२।१७३
अलुग्वा १।२।३
अलुचो नाम्नि प्लुक् ३।२।१४२
अल्पे २।२।१२२
अल्पाच्च मेधायाः २।१।१९८
अल्योत् ४।२।२३
अवस्थायाम् २।१।२१५
अवयवात्तयट् ३।३।७२
अवस्वयंभुवः २।३।८२
अवात् १।४।४०
अवाच्चालम्बनाविदूर्योः ४।२।२२३
अविदूरेऽभेः ४।२।१४५
अवोऽध्वनक्षे १।१।९६
अव्ययम् २।१।४
अव्ययस्य १।२।१५४
अव्ययीभावस्य १।२।१५५
अव्ययात् स्वौजस् १।३।९७
अव्ययैर्कितिङोऽसत्त्वेतयोर्डाम् ३।४।७४
अशिशोः १।३।२
अशिरस्कोऽक्षीर्वंदश्च ३।३।१५४
अशोऽचि नट् २।२।६४
अश्चैकादेः ३।२।१८५
अश्ववडवपूर्वापराधरोत्तराः २।१।९५
असहनञ्विद्यमानाभ्राक्षिकोदरोष्ठ-जङ्घादन्तकर्णशृङ्गाङ्ग-गात्रकण्ठाबह्वच् संयोगोपा-न्त्यात्स्वाङ्गात् समासात् १।३।२७
असेवितेऽनोष्पदम् २।२।२७
असोऽनेधादेः १।२।१३८
अस्मिन् ३।४।६८
अस्तिक्षुवोर्भूवचौ ४।२।९१
अस् प्रजायाः २।१।१९७
अस्तं पुरोऽव्ययम् १।१।२९
अस्वे १।१।७३
असंयोगादोः ४।२।४०
अस्तन्युष्णजे ४।२।९७
अस्त्यस्मिन्नेति मतुः ३।३।११६
अष्टेकाक्षपूर्वपदस्याचि ३।४।९३
अषोऽचोऽभाभूपूत् कंगंप्यायिवेपः ४।२।२४९
अष्टात् ३।४।११९
अष्टीवक्त्वक्षीवत्कक्षीवच्चर्मबद्रुम-ण्वत् १।२।९८
अष्ट औस् १।२।१५३
अहीयरुहोऽपाये ३।४।११
अह्नः २।१।१७९
अह्नोऽह्नाटि २।३।७५
अन्यथैवंकथमित्थम: कुत्सोऽन-र्थकात् ४।४।१४६

आ

आकालिकंठदचाद्यन्ते ३।२।१२४
आख्यातर्युपयोगे १।३।१५७
आग्नीध्रं गृहे ३।१।१४०
आग्रहायण्यश्वत्थाट्टुण् २।४।२०४
आघद्दृन्दृशदृक्षे २।२।१०७
आङः ४।१।२४२
आङः क्रीड्यम्यस्मुषः ४।३।२४३
आङा १।३।१५८
आङि युद्धे ४।४।२२
आङि शीले ४।३।१२७
आङि रुप्लोः ४।४।२७
आङो गुरौ ४।३।७१
आङोऽन्धूधसोः ४।१।१२८
आड् २।२।३१
आड् १।३।५५
आ च हौ ४।२।५२
आडश्चौतो गोः १।२।१९
आण्जश्रज्ञ्रसः ४।१।७७
आतोऽनः ४।४।१०१
आतोऽपः ४।२।३६
आतोऽनाड. ड्लुक् १।२।१५१
आतो यम् ४।१।२३७
आतोऽह्वाबामोऽड् ४।३।११३
आथर्वणोऽण् ३।१।१५३
आदितः ४।२।१५१
आदिजन्ते २।२।८७
आदेः ष्णोऽव्यकटथाष्टीवः स्नम् ४।२।२६१
आदेश्छन्दसः प्रगाथे २।४।२१५
आद्दिषो क्षेर्जुस्वा १।४।१०६
आद्यमन्यतः ४।२।३४
आद्यात् २।४।१९
आद्यादिभ्यः ३।४।७
आद्यामग्र्यं सम्मत्यसूयाकोपे-ऽक्षेवन्त्यश्च प्लुतः २।२।१७
आद्येकाच् ४।१।४४
आधारात् ४।३।१६७
आधारात् ४।४।१७९

आधारे १।३।१७६
आध्याय्येदे ४।४।१८२
आध्यायोशे ४।४।१४८
आध्यायोधारे ४।४।१३
आध्वगदम् ३।३।५४
आधाये २।३।११
आमः कृञः १।४।४७
आमन्त्र्ये १।३।९९
आयात् ३।३।११७
आयस्थानात् ३।१।१६२
आरादर्थैः १।३।१५३
आरैआधवः ४।२।१३२
आरैधोऽवादेः २।३।८४
आर्तृतीयाया ऋते १।१।८९
आर्यक्षत्रियाद्वान् १।३।४८
आर्वाचि ४।१।२३३
आवलिलुलिलुसृस्वतिशतात्परः ४।२।१८२
आशिषि घ्नः ४।३।११६
आशिषि वुन् ४।३।१०७
आशिषि नाथः १।३।११५
आश्वयुज्या वुञ् ३।१।१०४
आसन्नः १।१।७
आसन्नादूराधिकाभ्यर्षार्षिदि-इद्द्वितीयाद्यन्यार्थे २।१।३
आसीनः ४।२।४५
आस्तेयम् ३।१।११९
आस्स्यनः १।२।१११
आहि दूरे ३।४।४४

इ

इकदशकोऽदृशः क्सो नेट् चेत् ४।३।४
इको लुक् १।२।७
इक् ठः २।३।३२
इक्येङर् १।१।८२
इग्यणःसाधोऽर्याज्यम् ४।१।१०८
इ घ्नः ४।१।१३८
इङः ४।४।४
इच्छार्थे लेङ् लेट् ४।४।१२५
इच्वापुंसोऽनित्यास्त्रघसुषः १।३।८६
इजाद्यायास्तद्धितः १।१।४२
इज्युद्धे २।१।१३५
इञः ३।१।२२
इण २।३।९२
इतो लिलुडां धो ढः १।२।८१
इटि धातो लुक् ४।२।८४
इटि विधः ४।१।१४५
इणोऽग्रेधे ४।४।५२
इतोऽनिञः २।४।५७
इतोऽतः कुतः ३।४।१३
इत्रः च्वौ दैवते ४।३।२७०
इदमः १।२।२०४
इदुतो गिग्वौतोऽस्त्रेः १।२।२२
इद्दरिद्रः ४।२।४९
इन्द्राक्षोमादिषु देवतानाम् २।२।३३
इन्द्रियम् ३।३।९२
इन्द्रे १।१।९७
इनः कच् २।१।२२६
इन्ध परिस्वः ४।३।९२
इन्धिभवः कर्मणः ४।३।१८८
इनृहनूपूर्यर्यणवक्षो १।२।१३६
इ मेङः ४।२।१०५
इय् १।२।२११
इय्यः ४।२।३५
इलच्च देशे ३।३।१३२
इलुसोर्बहुकम् ३।४।५७
इलुसोऽपेक्षायाम् १।१।१७१
इषोऽनिच्छायाम् ४।४।७६
इष्टादेः ३।३।८८
इष्टादिभ्योऽमं धाम् ३।२।६०

ई

ईङ्कः ३।४।५८
ईटीटः ४।२।७७
ईट् चाक्रवस्वत्म्यः ४।२।२९
ईयसः २।१।१३०
ईरोपान्त्यादुल् ३।१।३४
ईर्म्यः ४।१।५२
ईक्षीङ्म्यां स्त्रे ४।२।३१
ईशे ३।२।१५३
ईषद्गुणवचनैः २।१।३५
ईषदसमाप्तेऽकादेः कल्पब्देश्य-म्देशीयर् ३।४।७७
ईहल्यप्ये ४।२।८७

उ

उः ४।१।१६३
उः २।२।१४२
उकोऽचो लुकप्रकृत्या च ३।४।९०
उगिदचोऽनेधादेः १।२।११४
उणादयः ४।३।२८०
उत्तरात् ३।४।४५
उता स्वः १।१।२
उत्तानादिभ्यः कर्तुः ४।३।१६६
उति शपः क्तयोर्मावीरम्भे ४।१।१५३
उत्कृष्टेऽनूपेन १।३।१०४
उत्कर्षापकर्षयोरः ३।१।८२
उत्थापनादेच्छः ३।२।१२१
उत्पातेन ज्ञाप्ये १।३।१४७
उत्साहेरल् २।४।१०
उद ई १।२।१४७
उदग्रामाद्यकुल्लोम्नः ३।१।१९
उदरे ठगाद्यूने ३।३।१००
उदस्थास्तम्नः १।१।१३४
उदितः ४।२।१९७
उदिनीशिनः ४।४।३१
उदोऽनूर्ध्वेहे १।४।३५
उदक्कोऽजले ४।४।९७
उद्गादयः ४।१।१७३
उन्मनस्युत्सोः ३।३।११३
उपसर्गात् २।१।२२०
उपसर्गादुद्गृहः ४।२।५
उपसर्गादध्वनः २।१।१४२
उपशाले ३।१।१८२

उपसर्गादातः ४।४।८३
उपसर्गादेवद् देविक्रुशः ४।३।२५४
उपसर्गादातोऽनिक् ४।३।९५
उपात् १।४।३१
उपात् १।४।६९
उपाद्विकारप्रतियत्नवाक्या-
ध्याहारे ४।२।२१२
उपाज्ज्ञानुनीविकरणस्त्रियाम्
३।१।१२६
उपेनाधिकिनि १।३।१७५
उप्ते ३।१।१०३
उभयशुश्च ३।४।२२
उर प्रभृत्यृन्नित्याटः २।१।२२७
उरगः ४।३।१६१
उरसोऽग्रे २।१।१७८
उरृत् ४।१।२१३
उषामोषसः २।२।३६
उष्णक् ३।१।१६१
उष्णादिभ्य कालात् ३।१।२७
उष्ट्राद्वुन् २।४।१५८

ऊ

ऊँ चोजः १।१।१०४
ऊद्दुषो णौ ४।१।२१६
ऊनः १।३।२०
ऊरुतोऽप्राणिनश्चायुरज्वा-
दिभ्यः १।३।७१
ऊरूत्तरपदादौपम्ये १।३।७२
ऊर्णाहंशुभमो युम् ३।३।१४८
ऊर्ध्वात्पूः शुषः ४।४।१८१
ऊर्ध्वाद्मदेहान्मक् चोर्ध्व-
स्यैकेषाम् ३।१।६५
ऊह्यसोर्वोपसर्गात् १।४।३

ऋ

ऋक्पूःपथ्यपोऽत् २।१।१३९
ऋच्छत्यृताम्यष्ठण् ३।१।१३१
ऋच्याद् १।३।११
ऋणे १।३।१५५
ऋतः ४।२।१९१
ऋतां विद्यायोनिसम्बन्धे
२।२।२८
ऋत्यकः १।१।७५
ऋत्वादिभ्योऽण् ३।२।११४
ऋत्याऽपसर्गश्च १।१।९१
ऋत्सञ्जीदुशनस्पुरुदंशोऽनेहः-
सस्सोः १।२।१९
ऋदृशोऽङ् ४।२।९
ऋद्धनस्स्ये ४।२।१६६
ऋषभोपानहाल्ङ्यः ३।२।२२३
ऋषेरण्याये ३।१।१३२
ऋषौ मित्रे २।२।९९

ॠ

ॠश्चोस्वावः १।१।७६
ॠदितोऽतङि ४।३।१०
ॠद्वृवर्णलृतङ् सेः ४।२।१३७
ॠत्वादेः क्तक्तिनना नोऽन्नः
४।१।२४५

ऌ

ऌट् ४।३।२८२

ए

एः २।३।७४
एकदिशि ३।१।१७९
एकशालायाष्टः ३।३।४४
एकद्विबहौ १।३।९८
एकात् ३।४।१०८
एकार्थं च २।१।५
एकादन्नाद्नौ २।२।६२
एकागाराच्चौरे ३।२।११८
एकादाकिंरचासहाये ३।४।१२१
एकादेः कर्मधारयात् ३।३।१६२
एकादशषोडशषोडावङ्ग
२।२।१०१
एङः ४।४।४
एत्रमिदाहाकोः ४।१।८६
एडितो लुक् १।४।१०५
एङो लुक् १।२।१०५
एचोऽय्यवायाव् १।१।७१
एजूर्ध्वच् १।१।८३
एजेः ४।३।१४७
ए टितः १।४।९३
एण्या ढक् २।४।१५६
एतदो वो घः ३।३।६९
एति हः ४।२।८०
एतोऽपृ १।४।११६
एत्यगः २।२।१५७
एदाङः १।२।१२४
एदे १।२।१०६
एधिदोऽकः ४।२।६१
एनोऽदूरे ३।४।४६
एवेऽनियोगे १।१।८७
एश् शीङः ४।२।३

ऐ

ऐम् भिसोऽङ्कुशः १।२।१६४

ओ

ओजःसहोऽम्भसा वर्तते ३।२।२५
ओजोऽङ्गम्महोऽम्भस्तपसष्टः
२।२।४
ओतः १।१।१०२
ओत औ १।२।११७
ओतः श्ये ४।२।५६
ओदौतोऽवाय्ये २।३।३६
ओः पुयङ्ज्ये ४।१।९७
ओमः प्रारम्भे २।३।२१
ओमाङि परः १।१।८६
ओरावश्यके ४।३।६२
ओर्ढेऽकद्रवाः २।३।८१
ओष्ठण् ३।१।३२

औ

औक्षम् २।३।६८
औपयिकम् ३।४।१३७
औस्सुलुक् चादसोऽनोः
१।२।२१२

क

कन्थायाष्ठण् ३।१।१२
कम्बलाच्चाग्नि ३।२।२१२
कंसमस्तियुस्तुयस्तबभाः
३।३।१४९

कं भिदुरुणेर्डः कर्तरि ४।३।७
कंसार्षाट्टुट् ३।२।१३०
कंसीयाञ् ञ्यः २।४।१५२
कण्ड्वादेर्नृत्स्थे ३।१।४६
कण्ड्वादुरः ३।३।१३५
कत्र नाम्नि २।१।१२९
कटादेः प्राचः ३।१।५२
कठादिभ्यः इलुग्वेदे ३।१।१७१
कडारादयः कर्मधारये २।१।११७
कडङ्गरदक्षिणास्थालीबिलाच्छयौ ३।२।१७६
कणेमनश्रद्धाच्छेदे १।१।२८
कतरकतमं जातिप्रश्ने २।१।७१
कत्रि २।२।१२०।
कत्र्यादेश्च ढकञ् ३।१।४
कथमित्थमुः ३।४।२६
कथमि लेट् च वा ४।४ १११
कथादिगतिस्फायोऽल्लग्वम् ४।१।१९७
कथादेष्ठण् ३।२।२०२
कदाकर्ह्योर्वा ४।३।२८५
कन्यात्रिवेण्यो. कनीनत्रिवेणी च २।४।४९
कन्वाल्मयूनोः २।३।४६
कपिज्ञातेर्ढण् ३।३।१८
कपिबोधादाङ्गिरसे २।४।४०
कपेर्गोत्रे २।२।१४४
कबरमणिविपशरात् १।३।३०
कमितर्यन्वन्यभीम्य. ३।३।१०५
कमूतेर्णिट् यट् ४ १ २
कम्येकर्तृकात्सन्नतत्मनः ४।१।१६
करणात् ४।४।१७५
करणात् क्रीतात् १।३।३४
करणाद्यजः ४।३।१८७
करणे वर्त्तचित् ४ ३।३८
करणाधारे चानट् ४।४।९०
करणे ज्ञोऽज्ञाने १।३।१६५
करीषाग्नकूलात्कषः ४।३।१४१
कर्कलोहितादीकण्व ३।३।४६
कर्णललाटात्कः ३।१।१२९
कर्णादिपक्षाज्ञाहतिमूले ३।३।४८
कर्तरि क्षप् ४।३।२०
कर्तुर्जीवपुरुषान्नशिवहः ४।४।१८०
कर्तुर्णिन् ४।३।१८१
कर्तुः क्यङः ४।३।१४६
कर्तुः क्विप् ४ १।२०
कर्तृभ्येऽतनावाप्ये १।४।१५
कर्म च १।३।१०७
कर्मणि १।३।१०५
कर्मणि गुणे १।३।१६९
कर्मवेषाद्यः ३।२।९९
कर्मण्यस्त्रवादीनां कर्मवल्लि ४।३।३५
कर्मण्यमत्यनोः १।४।५४
कर्मणोदश्चरः १।४।८
कर्मठो घटः ३।३।१०१
कर्मकर्तृभ्या प्रागततत्त्वे च्वि. ३।४।५५
कर्मणस्संदिष्टे ३।४।१३४
कर्मणोऽण् ४।३।१०९
कर्मण्यन्यर्थे ४।३।१९४
कर्मणोऽण् ४।४।१८५
कर्मणि घ्रा च २।१।४८
कर्मभावे ४।३।१७
कर्मभावे १।४।७७
कलाप्यश्वत्थयवबुसोमाभ्यामैय-मसोऽकः ३।१।१०७
कल्यग्नेर्ढण् २।४।८
कल्याण्यादेर्ढिन् च २।४ ६२
कवचिहृदस्थचित्ताच्च ठण् २।४।१३२
कषः कृच्छ्रगहने ४।२।१४७
कसमासेऽध्यर्ध. १।१।११
कसोमाट्टच्यण् २।४।२१२
कस्कादिषु १।१।१८०
काकतालीयादयः ३।३।४२
काकवी बोण्णे २।२।१२४
काकलंकावाकिनगारेयकार्कटघ-चर्मिवर्मिणश्चकं च २।४।८८
काकादिभिश्च क्षेपे २।१।५६
काडाजटाघाटात्क्षेपे ३।३।१२३
काण्डादक्षेत्रे १।३।३८
काण्डाण्डभाण्डादीरः ३।३।१३४
कामाविष्कारेऽकच्चिति ४।४।१२४
कारकमध्येऽध्वकाले षष्ठमी च १।३।१८६
कारिसेनान्तलक्षमणादिभ्यश्च २।४।८२
कारिकालमदोऽन्तस्मदसत्स्थित्या-दिभूषानुपदेशापरिग्रहा-दरक्षेपे १।१।२७
कारे प्राचा हलि २।२।१०
